श्रीमल्लक्ष्मीपतमहादमाय सादरसमर्पित
विक्रमी-ऋषेण-
२०.३.४७

❀ ॐ ❀

चरक-प्रदीपिका

चरकसंहितायाः सुसंगता विस्तृता च टिप्पणी।

सूत्रस्थानाद् इन्द्रियस्थानान्ता

प्रथमखण्डात्मिका

देहली-मदनमोहनलालायुर्वेदानुसन्धानपीठसञ्चालकेन
निखिलभारतीयायुर्वेद—विद्यापीठाध्यक्षेण

श्रीमज्ज्योतिषचन्द्रसरस्वत्या

विरचिता।

सा च

कलिकातराजकीयसंस्कृतमहाविद्यालये प्रधानसंस्कृताध्यापकेन
महामहोपाध्याय श्रीयोगेन्द्रनाथ तर्कवेदान्ततीर्थेन
कलिकताविश्वविद्यालये संस्कृतविभागे आशुतोषाध्यापकेन
महामहोपाध्याय श्रीविधुशेखर भट्टाचार्येण च
संशोधिता।

प्रकाशकः—

मोतीलाल बनारसीदास

हिन्दी-संस्कृत पुस्तक-विक्रेता

सैदमिट्ठा, लाहौर।

सन् १९४६] प्रथमं संस्करणम् [मूल्यम् १०)

प्रकाशक
सुन्दरलाल जैन,
मैनेजिंग प्रोप्राइटर,
मोतीलाल बनारसीदास,
सैदमिट्ठा बाजार, लाहौर।

(सर्वाधिकार सुरक्षित हैं)

मुद्रक
शान्तिलाल जैन,
बम्बई संस्कृत प्रैस,
शाही मुहल्ला, लाहौर।

संसार भर की हिन्दी संस्कृत पुस्तकें मिलने का एक मात्र पता—

मोतीलाल बनारसीदास
पुस्तकविक्रेता
बांकीपुर-पटना

मोतीलाल बनारसीदास
पुस्तकविक्रेता
सैदमिट्ठा, लाहौर

चरकप्रदीपिकायाः—

उपोद्घातः ।

विद्यमानास्वपि पूर्वैः पूर्वतरैराचार्यैः कृतासु चरकसंहितायाष्टीकासु कस्याश्चिन्नवीनायाष्टीकायाः प्रयोजनं वर्तते न वेत्यत्र आयुर्वेदमर्मविदः सुधिय एव प्रमाणम् । अस्याः संहिताया अतिगम्भीरार्थत्वात् सतीष्वपि प्राचीनासु विवृतिषु अध्ययने अध्यापनायां वा बहव एव तत्त्वावबोधे परं क्लेशमनुभवन्तीति सर्व एव जानन्ति । तमस्विन्यां हि सत्यपि पौर्णमासिके चन्द्रमसि न खलु न विद्यते नक्षत्रज्योतिरपि, इति हि चिन्तयित्वा सविनयं निवेद्यते यत्, न खल्वियं टिप्पणी विद्वद्भिरुपेक्षणीया, ईक्षणीया वा ईर्ष्याकलुषितेन चेतसा । स्मर्यते चास्माकमाचार्यस्य चरकस्य वचनम्—

"कृत्स्नो हि लोको बुद्धिमतामाचार्यः, शत्रुश्चाबुद्धिमताम" इति (३.८)

अन्यच्च स्खलितानि मे विद्वांसः करुणया निवेदयन्तु, इत्यपि साञ्जलिबन्धं प्रार्थ्यते । यथा तानि शक्यते परिहर्तुम् ।

चरकसंहिता तु प्राधान्येन आयुर्वेदस्य विज्ञानांशं समासतः प्रकाशयति, इति पुरा प्रचरितेष्वपि बहुषु आर्षतन्त्रेषु अद्यत्वेऽपि इयं जनतायाः श्रद्धातिशय्यमाकर्षन्ती देदीप्यमाना वर्तते कायचिकित्साया आयुर्वेदस्यैव मूलतत्त्वमत्र निबद्धम् । अतएवास्याष्टीकाकरणे प्रवृत्तिर्बहूनामेव मनीषिणामासीत् वर्तते च । पञ्चशतवर्षात् प्रागपि शिवदाससमये आसन्नस्या बहव्यष्टीकाग्रन्थाः, येऽद्यत्वे नाममात्रशेषतां गताः । तत्र के के टीकाकाराः प्राक् चरकसंहिताया आसन्निति तेषां नामनिर्देशश्च निर्णयसागरमुद्रितचरकोपोद्घाते मोतीलालवाराणसीदासमुद्रिते च उपोद्घाते सुहृद्वरेण सम्पादनकुशलेन यादवशर्मणा हरिदत्तशास्त्रिणा च सम्यङ् निर्दिष्टमिति वयमिहोदास्महे ।

तेषु तु प्राच्यटीकाकृत्सु सुप्राचीनस्य आचार्यहरिचन्द्रस्य उपोद्घातांशमात्रं मुद्रितमास्ते, श्रूयते च सूत्रस्थानस्य प्रथमाध्यायत्रयस्यापि टीकाग्रन्थोऽद्यत्वे उपलभ्यते, परन्तु न स जनतानां नयनगोचरोऽभवत् । ततस्तु लघुवाग्भटशिष्यस्य जज्जटस्य टीकाऽपि स्वल्पमात्रैव बहुशः खण्डिताऽपि, सुहृद्वरेण हरिदत्तशास्त्रिणा परिपूरिता अस्मात् प्रकाशकादेव प्रकाशिताऽभूत् । न तया जिज्ञासूनां सम्यक्तया समीहितार्थसिद्धिर्भवति ततस्तु चक्रपाणिदत्तकृता टीका अद्यत्वे आद्योपान्तं मुद्रिता वर्तते । परन्तु न सा मूलावबोधाय सम्यक्तया युक्ततरेति मे सम्मतिः । शिवदासस्यापि टीका केषांचिद् विद्वद्वर्याणां नयनगोचराऽभवदिति क्वचित् क्वचित् मुद्रितेषु ग्रन्थेषु

पाठोद्धारादवगम्यते । परन्तु न तस्या मुद्रणप्रयासः कस्यचिदद्यापि दृश्यत-इति दूयते नश्चेतः । ततस्तु परमाचार्यस्य गङ्गाधरस्यापि टीका एतावत्काल-ममुद्रितैवासीत् । साम्प्रतं सा प्रचारितेति विशेषेण नो हर्षावकाशः संवृत्तः । अत्यल्पतिमेन स्वर्गतेन योगीन्द्रनाथसेनेन या टीका विरचिता, सा अपूर्णा-वस्थायामेव तस्य परलोकगमनान् न सम्पूर्णतां गता । अद्यावधि एता-वन्तष्टीकाग्रन्था अंशतः पूर्णतश्च लोकलोचनगोचरा अभवन् ।

विद्यमानेष्वपि एतावत्सु टीकाग्रन्थेषु कथमस्माकं पुनष्टिप्पणीविर-चने प्रयासोऽभवत्, तत्रास्माभिर्नूनं किञ्चित्प्रतिवक्तव्यम् । यदा खलु पञ्च-चत्वारिंशद्वर्षेभ्यः प्राक् चरकसंहिताऽधीताऽस्माभिस्तदा परमाचार्यस्य टीकया सह मुद्रितग्रन्थानां निःशेषात् न सा टीका सुलभाऽऽसीत् । कृच्छ्रसाध-नेनासादिताऽपि न सा अतिविपुलकायत्वाद्, अस्मादृशां विद्यार्थिनामति-दुर्गमत्वाच्च, न मे सहायोऽभवदिति, चक्रपाणेरपि इन्द्रियस्थानान्तस्य ग्रन्थस्य सुलभत्वेऽपि जिज्ञासापूरणाय नासीदिति च, मे प्रवृत्तिरासीत् कापि स्वल्पा मूलावबोधे सहायत्वेन टिप्पणीप्रणयने । मदीयाचार्येणापि परमाचार्य-गङ्गाधरस्य ज्येष्ठान्तेवासिना अस्माकं संशयनिरसनपुरःसरं या या विवृतिः प्रदत्ता तदैवास्माभिरेतदर्थं ताः संगृहीताः । ततस्तु उपाचार्यस्य मे कर्म-शिक्षकस्य स्वर्गतहाराणचन्द्रस्य सुश्रुतसन्दीपनभाष्यप्रणयने कृतसहायेन मया शाके एकोनत्रिंशदधिकाष्टादशशततमे टिप्पणीयं विरचयितुं समा-रब्धा । त्रिंशद्वर्षेण च एकोनषष्ट्यधिकाष्टादशशततमे शकाब्दे च समाप्तिं नीता । औत्सुक्यनिवृत्तये, विद्यार्थिनाञ्च अध्ययनसौकर्यायैव ग्रथितेयं, बहु-भिर्बहुभिः महामहोपाध्यायैर्विद्वद्वर्यैरवलोकितैषा कमपि अर्थविशेषं प्रकाश-यिष्यतीत्यवगत्याद्यत्वे मुद्रणे मे प्रवृत्तिरभूत् । न तु तावन् मे प्रयासं सफलं मन्ये, यावदनया विदुषां परितोषः सम्पद्यत इति । ❀

अस्यामेव संहितायाम् आयुर्वेददर्शनं पुष्कलत्वेन वर्तते । सुश्रुते खलु तस्य स्वल्पा विवृतिर्दृश्यते शारीरे प्रथमेऽध्याये, सा तु प्राधान्येन एकीयमतमेवेति "इत्येके भाषन्ते" इति स्पष्टोक्त्या प्रतिपादितम् । ततस्तु वैद्यकसम्मतिं विवक्षुणाऽऽचार्येण वैद्यके तु इत्युपष्टम्भेन सांख्यमताद् यत्किञ्चित् पार्थक्यमात्रं प्रदर्शितम् । अत एव वक्तुमुत्सहे तत्रापि आयुर्वेद-दर्शनविवक्षा नासीदिति । तत्रैव तथा प्रतिपादितमपि यथा—

"भूतेभ्यो हि परं यस्मान्नास्ति चिन्ता चिकित्सिते ।" इति

चरके तु सौत्रीये प्रथमाध्याये आयुर्वेदसम्मतं पदार्थविवेचनं कृतम् । शारीरे च प्रथमे सृष्टिरहस्यं मुक्त्युपायश्च प्रदर्शितम् । परन्तु क इह पदार्थ-विवेक इत्यत्र आबहुतिथात् कालाद् विप्रतिपद्यन्ते विद्वांसः । अव्यक्तादि-पदसाम्येन प्राञ्चो व्याख्यातारो यथाकथञ्चिद् अत्रापि ईश्वरकृष्णसम्मतं सांख्यदर्शनमेव प्रतिपिपादयिषन्ति । तेन च क्वचित्सुगमोऽपि मूलश्लोको

❀ ग्रन्थस्यान्तिमे केषाञ्चिन् महामहोपाध्यायानामन्येषाञ्च विदुषां सम्मतिः प्रदर्शिता ।

दुर्बोधः, क्वचित् पूर्वापरविरोधः क्वचिच्च स्वतन्त्रसिद्धान्तो न्यक्कृतः। अतएव स्वतन्त्रानुकूल्येन सांख्यमताविरोधेन च आयुर्वेददर्शनसम्मतिः विदुषां पुरत उपस्थापिता मयाऽस्यां चरकप्रदीपिकायां टिप्पण्याम्।

साम्प्रतं येषां सांख्याचार्याणां निबन्धा आसाद्यन्ते, सर्व एव ईश्वरकृष्णाद् अर्वाचीनाः। ज्ञायते च तत्तन्निबन्धेभ्यो यत्, ततोऽपि प्रत्नतमा बहवः सांख्यप्रवक्तार आसन्निति। ईश्वरकृष्णोऽपि षष्टितन्त्रमुपदिशति*। उक्तं चाहिर्बुध्न्यसंहितायाम् (११।१८।१६ ॥)

"सांख्यरूपेण संकल्पो वैष्णवः कपिलादृषेः।
उदितो यादृशः पूर्वं तादृशं शृणु मेऽखिलम् ॥
षष्टिभेदं स्मृतं तन्त्रं सांख्यं नाम महामुने।
प्राकृतं वैकृतञ्चेति मण्डले द्वे समासतः ॥" इति

ततश्च बहुधाकृततन्त्राणां सांख्याचार्याणां मतानि अन्योन्यमभिद्यन्त नवेति, नेदानीं सर्वथा विचारयितुं शक्यते तदीयानां ग्रन्थानां दुर्लभत्वात्। ये तु तेषां मतान्यनुसरन्ति, तेषान्तु ग्रन्थे स्पष्टभेदो लक्ष्यते।

सांख्याः खलु विशेषेण ईश्वरकृष्णादयः पञ्चविंशतितत्त्ववादिन इति सर्वतः प्रसिद्धम्। चरकसंहितायान्तु "चतुर्विंशतिको राशिः पुरुषः" इत्युक्त्या चतुर्विंशतिरेव तत्त्वानीति स्फुटम्। न पुनरिदानीमुपलभ्यमानेषु सांख्यग्रन्थेषु तादृक्किञ्चिदुपलभ्यते। यतः पुनर्बुद्धचरिते †महाभारते च ‡सांख्याचार्याणां केचन चतुर्विंशतितत्त्ववादिन आसन्निति दृश्यते, तत्त्वतोऽप्यैक्यञ्चोपलभ्यते, अतश्चरकोक्तमतमपि सांख्यमतमेवेत्यवगच्छामः। तदिदं मतम् ईश्वरकृष्णादेः प्रत्नतमम्। तत्र प्रकृतेः पुरुषात् पृथक् तत्त्वत्वं नाङ्गीकृतम्। त्रिगुणयोगात् पुरुष एव सृजति। मतस्यैतस्य प्रत्नतमत्वं षड्दर्शनसमुच्चयस्य टीकाकृद्-गुणरत्नसूरिरेव प्रमाणम्। यदुक्तं तेन सांख्यदर्शनांशटीकायाम्—

"मौलिक्यसांख्या हि आत्मानमात्मानं प्रति पृथक् प्रधानं वदन्ति। उत्तरे तु सर्वात्मसु एकं नित्यं प्रधानमिति प्रपन्नाः ॥" इति×

एतेनैतत्प्रतीयते यत्सगुणादात्मन एव जगत्सृष्टिरिति। सत्त्वरज-स्तमसां साम्यावस्थैव नित्यैका प्रकृतिः। प्रतिपुरुषं पुनः प्रकृतेर्भिन्नत्वे नित्याया एकस्याः प्रकृतेस्तत्त्वान्तरत्वेनाभ्युपगमो निरर्थक एव। अतो मौलिक्यः सांख्याश्चतुर्विंशतितत्त्ववादिन इति ज्ञायते। मतमिदमनुसृत्यैव चरकसंहितायाम् अव्यक्तात् क्षेत्रज्ञादेव क्रमशो महदादितत्त्वानां सृष्टिरुक्ता।%

---

* ७२ कारिका द्रष्टव्या।
† द्वादशसर्गे २०–३२ श्लोका द्रष्टव्याः।
‡ १२–३२३, ६२–३२८ श्लोकौ द्रष्टव्यौ।
× ६६ पृष्ठे द्रष्टव्यम्।
% चरकशारीरे प्रथमाध्याये ६३–६४ श्लोकौ द्रष्टव्यौ।

एवमव्यक्तशब्देन भेलसंहितायामपि स्पष्टतो ब्रह्मैवोक्तम्। तद्यथा—

"षड्धातुरेवायं पुरुषो भवति। धातवः पुनः पञ्चभूतानि ब्रह्म च यदव्यक्तम्।"

पुनश्च—"भिद्यमाने शरीरे वै धातुर्धातुं नियच्छति।
मनो बुद्धिश्च सर्वेषां ब्रह्मणि प्रतितिष्ठति॥" इति (४.५)

एवं वृद्धजीवकीयेऽपि क्षेत्रज्ञस्यैव अव्यक्तसंज्ञा प्रोक्ता। सृष्टिप्रक्रियाऽपि सर्वथा चरकमनुसरति तद्यथा—

'समुदायकरणं ब्रूमः। अव्यक्तान् महान्, महतोऽहङ्कारः, अहङ्कारात् खादीनि, ता अष्टौ भूतप्रकृतयः। चक्षुः श्रोत्रं घ्राणं रसनं स्पर्शनमिति पञ्चेन्द्रियाणि, तान्येव बुद्धीन्द्रियाणि। हस्तौ पादौ जिह्वा गुद उपस्थ इति पञ्च कर्मेन्द्रियाणि। शब्दस्पर्शरूपरसगन्धाः पञ्चेन्द्रियार्थाः। अतीन्द्रियन्तु मनः। इत्येते षोडशविकाराः। महदादिसर्वं क्षेत्रम्। अव्यक्तमाचक्षते क्षेत्रज्ञं तु शाश्वतमचिन्त्यमात्मानम्।" इति (४.१)

अनेन चरकवचनानां तुलनार्थमत्रैवोद्धियन्ते तानि। तद्यथा—

खादीनि बुद्धिरव्यक्तमहङ्कारस्तथाष्टमः।
भूतप्रकृतिरुद्दिष्टा विकाराश्चैव षोडश॥
बुद्धीन्द्रियाणि पञ्चैव पञ्चकर्मेन्द्रियाणि च।
समनस्काश्च पञ्चार्था विकार इति संज्ञिताः॥
इति क्षेत्रं समुद्दिष्टं सर्वमव्यक्तवर्जितम्।
अव्यक्तमस्य क्षेत्रस्य क्षेत्रज्ञमृषयो विदुः॥
जायन्ते बुद्धिरव्यक्ताद् बुद्ध्याऽहमिति मन्यते।
परं खादीन्यहङ्कार उपादत्ते यथाक्रमम्॥" इति (४.६१.६४)

एवं पुनरपि चरकेण अव्यक्तपदेन आत्मैवोक्तो यथा—"अव्यक्तमात्मा क्षेत्रज्ञः शाश्वतो विभुरव्ययः।" इति (४-२) अपरञ्च—'पृथिव्यपतेजोवायुराकाशं ब्रह्म च अव्यक्तम् इत्येत एव षड् धातवः समुदिताः पुरुष इति शब्दं लभते।" इति। (४. ५.)

अत आयुर्वेददर्शने चतुर्विंशतितत्त्ववादे न खलु एकस्याः प्रकृतेरस्तित्वं वर्तत इति नूनं स्वीकर्तव्यम्। आयुर्वेदे सगुणपुरुष एव सृष्टेः प्रकृतिर्भवति। स एव सगुणः पुरुषः सर्वजीवेषु वर्तते। तस्य स्थानमपि हृदयमेवेति प्राह आयुर्वेदो यथा—

"आत्मा च सगुणश्चेतश्चिन्त्यश्च हृदि संस्थितम्।" इति (च०१।३०)

सेयमायुर्वेदोक्तसृष्टिप्रक्रिया न केवलं बुद्धचरिते महाभारते चोक्ता अपि तु याज्ञवल्क्यस्मृतावपि दृश्यते। इयं हि मानवस्मृतेरर्वाचीनाऽपि अन्यान्यसर्वाभ्यः स्मृतिभ्यः प्रत्नतमेति कथ्यते। तस्याश्च कालः खीष्टीयाब्दस्य चतुर्थशतकं चरकस्य तु द्वितीयशतकमिति प्रतीच्याः प्राहुः।*

* Vide Mocdonell's A History of Sanskrit Literature P. 429 × P. 130.

याज्ञवल्क्यस्मृतौ बहवो विषयाः श्लोकाश्च सर्वथा चरकोक्तिमनुहरन्ति। तदेतेन न खलु न शक्यतेऽनुमातुं यत्, चरकमतमेव याज्ञवल्क्येनानूदितमिति। इह कतिचित् श्लोका द्वाभ्यामेव ग्रन्थाभ्यामुद्धियन्ते—

"प्रभवो न ह्यनादित्वाद् विद्यते परमात्मनः।
पुरुषो राशिसंज्ञस्तु मोहेच्छाद्वेषकर्मजः॥" इति (चरक. ४.१.५१)

"अनादिरात्मसम्भूतिर्विद्यते नान्तरात्मनः।
समवायी तु पुरुषो मोहेच्छाद्वेषकर्मजः॥" इति (याज्ञ. ४. १४५)

"पश्यतोऽपि यथादर्शे संक्लिष्टे नास्ति दर्शनम्।" (चरक ४. १. ५३)

"मलिनो हि यथादर्शो रूपालोकस्य न क्षमः।" (४. १४३)

"प्राणापानौ निमेषाद्या जीवनं मनसो गतिः।
इन्द्रियान्तरसञ्चारः प्रेरणं धारणञ्च यत्॥
देशान्तरगतिः स्वप्ने पञ्चत्वग्रहणं तथा।
दृष्टस्य दक्षिणेनाक्ष्णा सव्येनावगमस्तथा॥
इच्छा द्वेषः सुखं दुःखं प्रयत्नश्चेतना धृतिः।
बुद्धिः स्मृतिरहङ्कारो लिङ्गानि परमात्मनः॥" (चर. ४. १.६८-७०)

"अहङ्कारः स्मृतिर्मेधा द्वेषो बुद्धिः सुखं धृतिः।
इन्द्रियान्तरसञ्चार इच्छा धारणजीविते॥
स्वर्गः स्वप्नश्च भावानां प्रेरणं मनसो गतिः।
निमेषश्चेतना यत्न आदानं पाञ्चभौतिकम्॥
यत एतानि दृश्यन्ते लिङ्गानि परमात्मनः॥" (याज्ञ. ४. १७४-१७६)

एवं चरकसंहितायाः शारीराध्यायानां बहवोऽर्था अपि याज्ञवल्क्येनानूदिताः। अनेनापि चतुर्विंशतितत्त्वान्येव स्वीक्रियन्ते न प्रधानं पृथक्। जगदुत्पत्तिप्रकरणे च अव्यक्तादात्मन एव महत्तत्त्वादेरुत्पत्तिरित्यप्यस्मिन्नप्यंशे चरकसंहितातो न कश्चिद् भेदः। यदुक्तं तत्र—

बुद्धीन्द्रियाणि सार्थानि मनःकर्मेन्द्रियाणि च।
अहङ्कारश्च बुद्धिश्च पृथिव्यादीनि चैव हि॥
अव्यक्तमात्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते।
ईश्वरः सर्वभूतस्थः सन्नसन् सदसच्च यः॥
बुद्धेरुत्पत्तिरव्यक्तात् ततोऽहङ्कारसम्भवः।
तन्मात्रादीन्यहङ्कारादेकोत्तरगुणानि च॥
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च तद्गुणाः॥" इति

एतेन सह पूर्वोक्तानि चरकवचनानि वृद्धजीवकीयानि च तुलनीयानि भवन्ति। अनयोर्भाषाक्रमयोरपि पूर्णतया सादृश्यं वर्तते। एवं द्वयोरपि विद्यमानेऽप्यसाधारणे साम्ये मिताक्षरापरार्कटीकाकारौ विज्ञानेश्वरापरादित्यौ चक्रपाणिना क्षुण्णेनैव मार्गेण ईश्वरकृष्णमनुसृत्य अव्यक्तमितिपदं पृथक्कृत्य

तस्य मूलप्रकृत्यर्थकत्वमाहतुः। पूर्वापरैकवाक्यतारक्षणेच्छुभिस्तु अव्यक्तमित्यात्मन एव विशेषणमुच्यते। बालक्रीडाटीकाकारस्तु तथैव प्राह "आत्मविशेषणत्वेनाव्यक्त इत्येतद् योजनीयम्" इत्युक्त्या। पुनरिदमिहावधातव्यं यद् इह पूर्ववाक्यान्वयबोधकस्य 'च' आदिशब्दस्य प्रयोगो नास्तीति। अतः परवाक्यान्तर्गतस्य आत्मशब्दस्य विशेषणत्वमेव सुष्ठु युज्यते। अतएव तत् परस्मिन् वाक्ये 'बुद्धेरुत्पत्तिरव्यक्ताद्' इत्यत्र अव्यक्तपदेन सगुण आत्मैवाभिप्रेयते आत्मन एव सृष्टिकर्तृत्वमधस्ताद् उपरिष्टाच्च सुस्पष्टम्। तथा चोक्तं याज्ञवल्क्यसंहितायाम्—

"सर्गादौ च यथाकाशं वायुं ज्योतिर्जलं महीम्।
सृजत्येकोत्तरगुणान् तथादत्ते भवन्नपि॥" (४. ७०) ‡
"आत्मनस्तु जगत् सर्वं जगतश्चात्मसम्भवः।" (४. ११७)
"इमे लोका एष चात्मा तस्माच्च सचराचरम्।" (४. १४५)
"यथात्मानं सृजत्यात्मा तथा वः कथितो मया।
विपाकात्त्रिप्रकाराणां कर्मणामीश्वरोऽपि सन्॥ (४. १८१)
सत्त्वं रजस्तमश्चैव गुणास्तस्यैव कीर्तिताः॥" (४. १८२॥

सत्त्वादिगुणा आत्मन एवेति स्पष्टोक्त्या याज्ञवल्क्यमतेन पृथक्प्रकृतेरस्तित्वं परास्तम्।

अपिच चरकयाज्ञवल्क्ययोरीश्वरकृष्णमतानुवादित्वे पञ्चतन्मात्राणामाहङ्कारिकत्वं पञ्चभूतप्रकृतित्वञ्च स्यात्। न तु तत्तथा दृश्यते। न चास्ति चरके पञ्चतन्मात्राणां नामापि। खादीनामेव भूतानामाहङ्कारिकत्वम् इन्द्रियप्रकृतित्वञ्च तत्र 'एकैकाधिकयुक्तेन" (४. १. २३) इत्यादिना सुस्पष्टं व्याहृतम्। याज्ञवल्क्ये तु "तन्मात्रादीन्यहङ्कारात्" इत्युक्त्या समुद्दिष्टेष्वपि तेषु, न तेन साङ्ख्यसम्मतानि तन्मात्राण्यवबुध्यन्ते 'एकोत्तरगुणानि च' इति विशेषणात्। न खलु साङ्ख्यसम्मतेषु तन्मात्रेषु एकोत्तरगुणाः सन्ति, सन्ति तु पञ्चभूतेषु। ततश्चात्र तन्मात्रपदेन पञ्चमहाभूतान्येवोपलक्ष्यन्ते। अनन्तरोक्तश्लोके च "शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च तद्गुणाः" इत्यत्र 'तत'पदेन महाभूतान्येव परामृश्यन्ते। न ह्यत्र कापि पञ्चभूतान्युच्यन्ते। वक्तव्यानि तु तानि। अतः पञ्चतन्मात्रशब्दस्यैव पञ्चमहाभूतवाच्यत्वं युज्यते। न च "आदि"पदेन भूतानां परिग्रहो युक्तः। तदितिपदेन हि तस्यैव कस्यचिन् निर्देशो युक्तो यत् पूर्वमुक्तम्। ततश्चात्र आदिपदेन पञ्चमहाभूतविकाराणामिन्द्रियादिषोडशपदार्थानामेव परिग्रहो न्याय्यः। क्षेत्रवर्णनप्रस्तावे च (४. १७७) पञ्चमहाभूतान्येव उद्दिश्यन्ते,

‡ तुलनीयोऽत्र चरकनिबन्धः—"यथा प्रलयात्यये सिसृक्षुर्भूतानि अचरभूतः सत्वोपादानमाकाशं सृजति। ततः क्रमेण व्यक्ततरगुणान् धातून् वाय्वादिकांश्चतुरः। तथा देहग्रहणेऽपि प्रवर्तमानः पूर्वतरमाकाशमेवोपादत्ते, ततः क्रमेण व्यक्ततरगुणान् धातून् वाय्वादिकांश्चतुरः॥" इति (४. ४.)

न पुनस्त्वत्र नामापि तन्मात्राणाम्*। अतश्चरकयाज्ञवल्क्ययोर्मतं नान्योन्यं भिद्यत इति निश्चीयते। तयोष्टीकाकृतः सर्व एव ईश्वरकृष्णादर्वाचीनाः। अतस्तदात्वे चतुर्विंशतितत्त्ववादिनां साङ्ख्यानां समर्थकं मूलग्रन्थम् अलब्ध्वा पञ्चविंशतितत्त्ववादिनामेव मतमनुसृत्य मूलं व्याख्यातुकामा अपि ते आचार्य्या मूलनिबन्धविरुद्धमेवोक्तवन्त इति प्रतीयते।

न केवलं याज्ञवल्क्येन दर्शनांश एव चरकोऽनुसृतः। शारीरांशोऽपि चरकोक्ता संज्ञा तस्य च क्रमः तस्यैव च संख्या सर्वथा अनूदिता तेन। शरीरसंख्याव्याकरणे येनैव क्रमेण अङ्गप्रत्यङ्गविवृतिश्चरकेण व्याहृता तेनैव क्रमेण याज्ञवल्क्योऽप्याह। तत्र प्राक् त्वग्वर्णनं, ततश्च अस्थनां, तत इन्द्रियाणि, ततः प्राणायतनानि दश, ततः पञ्चदश कोष्ठाङ्गानि, ततश्च षट्-पञ्चाशद् बाह्याङ्गानि, ततः शिराधमन्यादीनि, ततश्च अञ्जलिमानेन शारीर-द्रव्याणां मानम्, एष एव क्रमोऽविकलो याज्ञवल्क्येऽपि दृश्यते। तेन च चरकपाठशुद्धौ याज्ञवल्क्यस्मृतिरपि परं प्रमाणं भवितुमर्हति। परन्तु नः परं दुःखाकरमेतद् यत् प्रत्नतरधर्मशास्त्रत्वेनास्य विशेषतः शारीरेऽशे बहुशः पाठच्युतिर्दृश्यते। टीकाकृतामपि विभिन्नपाठग्रहणात् स्पष्टतस्तत् प्रतीयते। पुनश्च तेषां शारीरज्ञानाल्पत्वाद् व्याख्यायां बहुत्र त्रुटयोऽप्युपलक्ष्यन्ते। प्रदीपिकायामस्यां तदपि मनागनिच्छया आलोचितं मया। चरकवचनानां यथार्थग्रहणायैव कृतं तदिति क्षन्तव्योऽहं विपश्चिद्भिरित्याशासे।

साम्प्रतं संहिताया अस्याश्चतुर्थांशस्तु दृढबलेन अस्मादृशेनाल्पज्ञेन लिखित इति केचित् प्रतिपिपादयिषन्ति। ❀ अतोऽधुना तद्विचारावसरो मे संप्राप्तः। तर्कस्यास्य मूलन्तु संहितायामेव वर्तते। तांश्च श्लोकान् निगदत उल्लिख्य प्रवृत्ते आलोचने मन्ये विपश्चितां विचारसरणिः सुगमा भवेदिति मे प्रचेष्टा न तथा उपेक्षार्हा भविष्यतीति। ते च श्लोकाः—

अस्मिन् सप्तदशाध्यायाः कल्पाः सिद्धय एव च।
नासाद्यन्तेऽग्निवेशस्य तन्त्रे चरकसंस्कृते॥
तानेतान् कापिलबलिः शेषान् दृढबलोऽकरोत्।
तन्त्रस्यास्य महार्थस्य पूरणार्थं यथातथम्॥" इति (६.३०.)

पुनश्च—विस्तारयति लेशोक्तं संक्षिपत्यतिविस्तरम्।
संस्कर्ता कुरुते तन्त्रं पुराणञ्च पुनर्नवम्॥
अतस्तन्त्रोत्तममिदं चरकेणातिबुद्धिना।
संस्कृतं, तत्त्वसम्पूर्णं त्रिभागेनोपलक्ष्यते॥
तच्छङ्करं भूतपतिं संप्रसाद्य समापयत्।
अखण्डार्थं दृढबलो जातः पञ्चनदे पुरे॥

---

* प्रत्यक्षशारीरोपोद्घाते म० म० गणनाथसेनेन। तदनुजीविभिरपि बहुभिरायुर्वेदनिष्णातैः॥

कृत्वा बहुभ्यस्तन्त्रेभ्यो विशेषोच्छशिलोच्चयम् ।
सप्तदशौषधाध्यायसिद्धिकल्पैरपूरयत् ॥ (८. १२.)

तत्र चिकित्सास्थानोक्तवचनैरेतदेवावगम्यते यद् अग्निवेशतन्त्रस्य चिकित्सास्थानस्य सप्तदशाध्यायाः कल्पसिद्धयोः सर्वेऽध्यायाश्च चरकसंस्कृता न प्राप्यन्त इति । नैते अग्निवेशतन्त्रस्यापि एते अंशा नोपलभ्यन्त इत्यर्थोऽवगम्यते । तस्य तस्य तन्त्रस्य वचनोद्धाराच्चक्रपाणिविजयरक्षितश्रीकण्ठदत्तादिभिरर्वाचीनैरपि । न खलु विलुप्ते तन्त्रे महार्थकल्पना, न वा याथातथ्यरक्षा सम्भवति इति, तदा अग्निवेशतन्त्रमासीदेवेति निश्चीयते । अत्र मुद्रितेषु केषुचित् पुस्तकेषु 'यथायथमिति पाठो दृश्यते, स चानाकर एव । चक्रपाणिना न धृतेऽप्यस्मिन् पाठे, जेज्जटस्तु यथातथम् इति पाठ एव धृतवान् । तत्र च मूलं निखिलेनोद्धृत्य पुनर्व्याख्यायां "यथातथमविपरीतार्थम्" इति लिलेख । अतो दृढबलोऽग्निवेशतन्त्रस्य असंस्कृतान् शेषान् अंशान् अकरोत् संस्कारेणैवापूरयत । स च संस्कारस्तन्त्रस्यास्य विपरीतार्थवादी नासीत् । अर्थमिमं चक्रपाणेरुपष्टम्भोऽपि समर्थयति । यथा—

"परिशिष्टसंस्कारस्य अदृष्टातिशयसम्पादकत्वादात्मनो निर्दिष्टविषयमेव दर्शयन्नाह तन्त्रस्येत्यादि ।" इति ।

इति स्पष्टतो दृढबलस्य अग्निवेशतन्त्रस्य परिशिष्टसंस्कर्तृत्वमेवाह । पुनश्च स एव सिद्धिस्थाने अग्निवेशतन्त्रस्य शिष्टांशस्यैव संस्कर्ता दृढबल इति स्पष्टतः प्राह यथा—

"एतच्छास्त्रसंस्कारोपपत्त्युपदर्शनपूर्वकं शास्त्रस्य संस्कारकौ चरकदृढबलौ दर्शयन्नाह दृढबलः ।" इति

पुनश्च अप्राप्ते अग्निवेशतन्त्रे दृढबलेन, 'चरकसंस्कृते' इति विशेषणस्य वैयर्थापत्तिः स्यात् । यथातथमिति क्रियाविशेषणस्यापि नैरर्थक्यं प्रसज्येत । अतएव शेषानेतानंशान् दृढबलः संस्कृतानेव अकरोद् इत्यर्थ एव साधुः स्यात् । पुनश्च सिद्धिस्थाने संस्कारशब्दस्यापि विवृतिर्युज्यते । आर्षे तन्त्रे भ्रमप्रमादजुष्टस्य तादृशलौकिकपुरुषस्य संस्कारः न जनतानामास्थारक्षणाय भवेदिति तादृशी विवृतिः प्रदत्ता । संस्कारे चेन् मूलार्थस्य प्रतिकूलं किमपि नोक्तं स्यात्, तर्हि आर्षवचनार्थानुगामित्वात् सुभाषिते लौकिकपुरुषस्यापि वचने जनतानां श्रद्धातिशय्यं स्यादेव । अत एव लघुवाग्भटो दृढबलप्रतिसंस्कृतस्यापि ग्रन्थस्यार्षत्वं स्वीचकार । यदुक्तं तेन—

"ऋषिप्रणीते प्रीतिश्चेन् मुक्त्वा चरकसुश्रुतौ ।
भेलाद्याः किं न पठ्यन्ते तस्माद् ग्राह्यं सुभाषितम् ॥" इति

एतेन चरकसुश्रुतभेलादीनां संहितानामृषिप्रणीतत्वं स्वीकृतं तेन । अत्र के खलु सप्तदशाध्यायाः ? इति चक्रः प्राह, "ते च चरकसंस्कृतान् यद्दमचिकित्सितान्तान् अष्टावध्यायान्, तथा अर्शोऽतीसारविसर्पद्विव्रणीयमदात्ययोक्तान् विहाय ज्ञेयाः ।" इति । केन प्रमाणेन प्रमाणितोऽसौ सिद्धान्तः

न जाने। जेज्जटस्तु–"सप्तदशाध्यायाश्चरमाश्चिकित्सितस्थाने" इति प्राह। परमाचार्यः गङ्गाधरोऽपि "चिकित्सितस्थाने शेषाः सप्तदशाध्यायाः" इत्याह अतो वयमपि चिकित्सितस्थानस्य अर्शआदियोनिव्यापदन्तान् सप्तदशाध्यायान् दृढबलोऽकरोत् इत्येव ब्रूमः।

ततः सिद्धिस्थानोक्तवचनान्यालोचयामः। तत्र 'इदं तन्त्रोत्तमम्' इति अग्निवेशतन्त्रस्योल्लेखस्तस्य वर्तमानतामेव सूचयति न तु भूतपूर्वताम्। अत्र अतिप्रत्नतमतन्त्रस्य भाष्यादिना विस्तारात् अतिविस्तृतस्य च संक्षेपादेव नवीकरणं भवति अतश्चरकेण त्रिविधशिष्यबुद्धिबोधायैव प्रतिसंस्कृतं तत्। परन्तु स च चरककृतसंस्कारः त्रिभागेन असम्पूर्णो दृश्यते। न तु अग्निवेशतन्त्रस्य। स च संस्कारो दृढबलेन समापितः। समापयत् इति क्रियाया अखण्डार्थमिति विशेषणात् ज्ञायते यत् आर्षोऽर्थस्तत्र प्रतिसंस्कृतेऽपि अखण्ड एव आसीदिति। अत एव चरके दृढबलेन संस्कृताया अप्यस्याः संहितायाः सर्व एव अर्था आत्रेयेण पुनर्वसुना उपदिष्टा अग्निवेशेन च प्रोक्ताः इति स्पष्टतः प्रतिज्ञातं दृढबलेन। तद्यथा—

"इत्यध्यायशतं विंशमात्रेयमुनिवाङ्मयम्।
हितार्थं प्राणिनां प्रोक्तमग्निवेशेन धीमता॥" इति (८. १२. ६२)

अत इयमद्यत्वे वर्तमाना चरकसंहिता विंशत्यधिकशताध्यायात्मिका आत्रेयेणैवोपदिष्टा अग्निवेशेन च प्रोक्ता इत्यत्र नास्ति मनागपि संशयः। सैव चरकेण दृढबलेन च संस्कृता। अतएव कल्पसिद्धिस्थानेऽपि अध्यायान्ते अग्निवेशकृते तन्त्रे इति दृढबलस्य मृषाभाषणं न भवति। तृतीयांशस्य दृढबलप्रतिसंस्कृतत्वेऽपि "प्राधान्येन व्यपदेशा भवन्ति" इति न्यायान्माषराशिवत् चरकप्रतिसंस्कृते इति वाक्यस्य सिद्धिः स्यात्। अतएवास्याः चरकसंहितेति प्रसिद्धिः।

एवं परिस्थितौ पूर्वोक्तैर्दृढबलवचनैर्न खल्वेतत् प्रतीयते यत् समग्रमेव अग्निवेशतन्त्रं चरकेण संस्कृतं कालवशाल्लुप्तं तदिति। न वा अग्निवेशतन्त्रमपि लुप्ततां गतमिति। विवादिभिरपि तत्तन्त्रम् अर्वाचीने विजयरक्षितकालेऽपि आसीदिति स्वीकृतम्†। अतएव एवमध्यवसानमेव वरं स्याद् यत्, चरकेण तन्त्रस्य शिष्टांशो नैव संस्कृत इति। न खलु सर्वेषामेव ग्रन्थकाराणां ग्रन्थसमाप्तिसौभाग्यं भवेत्। आयुर्वेदेऽपि एवं ग्रन्थानामसद्भावो नास्ति। न वा संस्कारलक्षणे पुराणमिति कथनेन तस्यातिजीर्णत्वादन्तरान्तरा विलोपाशंका भेलसंहिताकाश्यपसंहितापुस्तकवत् कर्तव्या। दृढबलकाले सर्वजनसमादृतस्य तन्त्रस्य एकमेव खण्डितं पुस्तकमासीदिति कल्पना कल्पनैव। सा च प्रमाणविरहिता बलात्कारा इव भवेत्। दृढबलस्तु 'यथातथम्' 'अखण्डार्थम्' इत्याद्युक्त्वा आर्षवाक्यानामेव लेशोक्तानां भाष्यरूपेण विस्तारेण अतिविस्तृतस्य च संक्षेपेण प्रत्नतमस्य आर्षसिद्धान्तस्य नवीकरणमाह। एतेन

† प्रत्यक्षशारीरोपोद्घाते १७ पृष्ठे द्रष्टव्यम्।

वचनबलेन तत्र दृढबलसिद्धान्तो मनागपि नास्तीति दृढं वक्तुं शक्यते।

दृढबलस्य अनृषित्वेऽपि स खलु वृद्धवाग्भटादपि प्रत्नतमो वक्तुं युज्यते। बहुत्र तदीये ग्रन्थे दृढबलसंस्कृतस्यापि अंशस्य स्पष्टत उल्लेखात्। तद्यथा—"त्र्यूषणं त्रिफला हिंगु" इत्यादि (७. ७. ६३) "त्रिवृन्मुष्टींस्तु सनखान्" इत्यादि (७. ७. ६६) दृढबलसंस्कृतवचनानि अक्षरशोऽनूदितानि वृद्धवाग्भटेन। तस्यापि काले अष्टांगायुर्वेदस्य प्रसार आसीत्। तदापि मृतकखण्डनेन शारीरज्ञाने बलाधिक्यं क्रियते स्म आयुर्वेदविद्यार्थिभिः। अतस्तत्पूर्वतनस्य दृढबलस्य आयुर्वेदे दृढसंस्कार आसीदिति, तेनाचार्यवरेण संस्कृतस्य ग्रन्थस्य न्यक्करणमस्मादृशां पल्लवग्राहिणां शोभत एव।

ननु प्राक् प्रसिद्धबौद्धनृपतेर्धर्माशोकस्याज्ञया शवव्यवच्छेदः प्रतिषिद्ध आसीत्, कुतः पुनस्तदर्वाचीनस्य दृढबलस्य वाग्भटस्य वा आयुर्वेदगवेषणायां योग्यता? अतएव प्रतिसंस्कर्तृणां संग्रहकृताञ्च कल्पनाकल्पतरोरुदियाय नानाविधः प्रमाद इति चेत् कथ्यते †। अत्र मन्निबद्धस्य आयुर्वेदशारीरविनिश्चयस्योपोद्घाते विवादिनां प्रतिवाक्ये व्यासतः समालोचितेऽपि स्थूणानिखननन्यायेनात्रापि किञ्चिदुच्यते। धर्माशोकस्य शवव्यच्छेदप्रतिषेधे यत् खलु प्रमाणमुपस्थापितं तैः, ‡ तत्र सत्यपि कस्मिंश्चिद् अशोकलिपिपाठे, न तत्र शवव्यवच्छेदनिषेधस्य गन्धोऽप्याघ्रायते प्रत्नतत्त्वविद्भिः। विग्रहसम्भाषायां छलस्यान्यतमोपायत्वे कथितेऽपि कथं तत्रोपोद्घाते स्वग्रन्थस्य आयुर्वेदजिज्ञासून् छलयितुमीहासीत् न बुध्यते। अशोकस्य तादृगाज्ञाप्रचारः, प्रचारितेऽपि अखण्डभारतीयविदुषां स्वीकारः, तत्परस्ताद् वर्णाश्रमिणामधिकारे तथैव व्यवस्थास्थितिर्न कदाचित् सम्भाव्यत इति शारीरविनिश्चयोपोद्घाते प्रतिपादितं विस्तरेणेत्युदास्महे। परन्तु एवं वितथप्रचारेण आयुर्वेदस्याहितमेव सम्पद्यते इति मे शंका वर्तते। एवंविधमस्मद्देशीयैरुद्भावितमतं प्रतीच्यप्रत्नतत्त्वविद्भिः साग्रहमार्षमतमिति मत्वा या खलु स्वग्रन्थे टिप्पणी प्रदत्ता, ‖ सा च पृथिव्यामायुर्वेदस्य निकृष्टताप्रचारे परंसहाया भवति। प्रतीच्यास्तु सदैव भारतीयज्ञानविज्ञानस्य अर्वाचीनतां निकृष्टतां वा प्रचारयितुं मुखराः। तत्र चेद् अस्माकमप्रमाणं वचः सहायकं भवेत् ततः किन्नु दुःखतमं स्यात्।

पुनश्च वृद्धवाग्भटसमयेऽपि शवव्यवच्छेदपुरःसरमध्यापनमासीदिति तदीयो निबन्धः सम्यक् प्रमाणयति। यदुक्तं तेन सौत्रीये यन्त्रशस्त्रविध्यध्याये—

"युक्तकारी भिषग् बुभूषुः पुरुषं सम्पूर्णगात्रमविषहतमदीर्घव्याधिपीडितं निकृष्टदृष्टान्त्रम् अवहन्त्यामापगायां मुञ्जवल्वज-

† प्रत्यक्षशारीरोपोद्घाते ६० पृष्ठे द्रष्टव्यम्।

‡ Journal of Asiatic Society Vol. VII P. 261.

‖ Vide History of Sanskrit Literature by Keith. P. 408.

वेष्टितं पञ्जरस्थमप्रकाशे देशे कोथयेत् । तं सम्यक् प्रकुथितं चोद्धृत्य आयतदेहं कृत्वा उशीरवेणुकूर्चादीनामन्यतमेन शनैः शनैरवघृष्य त्वगादीन् सर्वानेव बाह्याभ्यन्तराङ्गशिरास्नाय्वादीन् अवयवान् आचार्योपदर्शितेन आगमेन चक्षुषा लक्षयेत् ।" इति

न खलु सुश्रुतस्यैव अनुवाद एष इति वाच्यम् । सुश्रुतवचनानुसारेण कर्मकरणे या या अनुक्तता आसीत्, कर्म कृत्वा तांस्तानेव विषयान् अत्र निवेश्य वागभटः स्वकर्मकुशलतां प्रख्यापयामास । तत्र सुश्रुते अन्त्रं निष्कास्य शवं कोथयितुं कुथितञ्च तं द्रष्टुमुपदिदेश, तेन अन्त्राणां दर्शनं विद्यार्थिनां न भवतीति समीक्ष्य निष्कृष्टदृष्टान्तं लिलेख वागभटः । शवकोथनात् प्रागेव तस्योदरं विदार्य अन्त्रादिदर्शनं कृत्वा ततः कोथयितव्यमित्याह । पुनश्च सुश्रुतः प्राह शिक्षार्थी स्वयमेव "त्वगादीन् सर्वान् बाह्याभ्यन्तराङ्गप्रत्यङ्गविशेषान् यथोक्तान् लक्षयेच्चक्षुषा" इति । एवमुपदेशान् मृतकखण्डनस्थाने आचार्यस्योपस्थितिर्न नियता । विनोपदेशाच्चक्षुषा दर्शनमात्रेण अंगप्रत्यङ्गज्ञानं कस्यचित् सम्भवतीति न्यूनतापरिहारार्थं तत्र "आचार्योपदर्शितेनागमेन" इत्यतिरिक्तः पाठो वागभटस्य शवव्यवच्छेदकुशलतां विज्ञापयति । पुनश्चात्र शवावस्थापनक्रमोऽपि सुश्रुतादतिरिक्तो निवेदितः । स्वयमेवाकृते मृतकखण्डने न खलु विशेषोऽयं तत्पुस्तके कथमपि नास्थास्यत् । लघुवागभटसमये तु मृतकखण्डनं परिहृतमिति सम्भाव्यते, अथवा स एवाचार्योऽसाधारणशास्त्रनिष्णातोऽपि न खलु शारीरतन्त्रे कुशल आसीत्, अतः पाठोऽयं साकमितराभिः शारीरविवृतिभिः, संग्रहग्रन्थस्य अक्षरशोऽनुवादे कृतेऽपि सर्वथा परिहृतवान् ।

चरकसंहिताया उत्तरतन्त्रमासीन्नवेत्यधुना विचार्यते । संहिताग्रन्थानां सर्वेषामेवोत्तरतन्त्रं दृश्यते । येन तु अग्निवेशतन्त्रं प्राक् प्रतिसंस्कृत्य चरकसंहिता कृता, तस्य चरकाचार्यस्य समग्रतन्त्राणां प्रतिसंस्कारेऽवकाशो नासीदिति तेन उत्तरतन्त्रं न निबद्धमिति ध्रुवम् । परन्तु शिष्टांशप्रतिसंस्कर्ता दृढबलस्तु नूनमुत्तरतन्त्रं विग्रथितम् अत एव स स्पष्टतः प्रतिजज्ञे—

"तस्मादेताः प्रवक्ष्यन्ते विस्तरेणोत्तरे पुनः ।" इति (८.१२.७७)

पाठोऽयं जेज्जटसमये चक्रपाणिसमयेऽप्यासीत् । ताभ्यामुभाभ्यामेव धृतोऽयं पाठः । चक्रपाणिस्तु पाठोऽयमनार्ष इति कथयति "अग्निवेशतन्त्रे उत्तरतन्त्रस्यैव अनार्षत्वात्" इत्युक्त्या । अग्निवेशतन्त्रस्य उत्तरतन्त्रं नासीदिति सत्यम् । परन्तु दृढबलेन तु अन्येभ्यस्तन्त्रेभ्यः शिलोञ्छवृत्त्या कायचिकित्सा-प्रधानसंहिताया उत्तरतन्त्रे शल्यशालाक्यादिकं लिखितमासीदिति अप्राप्तेऽपि ग्रन्थे अनुमातुं युज्यते । चक्रपाणिकालेऽपि चरकस्योत्तरतन्त्रमासीत् दृष्टञ्च तेन । अत एव स्पष्टत उक्तं तेन—

"व्याख्या पञ्चदशप्रकारा सप्तविधा कल्पना, एकविंशतिरर्थाश्रया, सप्तदश ताच्छील्यानि चतुर्दश च तन्त्रदोषा भवन्ति ।

तद् उत्तरतन्त्रे प्रतिपादितत्वान् नेह विलिखिता आचार्येण।" इति
(८. १२. ७१)

तेनात्र चक्रटीकायां केषाञ्चित् पाठसंशुद्धिप्रयासः "उत्तरतन्त्रस्यैवानार्षत्वात्" इत्यत्र "उत्तरतन्त्रस्यैवाप्रोक्तत्वात्" इति न शोभते। शल्यतन्त्रप्रधानायां सुश्रुतसंहितायामपि एतन्नानातन्त्रेभ्य आहृत्य शालाक्यकायचिकित्सादिकं लिखितमास्ते। शिवदाससमये पञ्चशतवर्षात्प्रागपि चरकोत्तरतन्त्रमासीत्। अष्टाङ्गहृदयस्य शिवदासटीकायामद्यत्वेऽपि तस्य वचनमुपलभ्यते तद् यथा—

"चरकोत्तरतन्त्रेऽप्युक्तम्—

बहुवक्त्रां गतिं ज्ञात्वा प्रपूर्यं गुडसिक्थकैः।
दहेत् पूर्वविधानेन, कषायैः क्षीरवृक्षजैः॥
गण्डूषः, तैलमेभिर्वा सिद्धं नस्यं प्रकल्पयेत्॥
इति (अ०हृ० उ० २२ अ०)

श्लोकोऽयं शालाक्यतन्त्रोक्तः। न खलु चरकसंहितायाश्चिकित्सितस्थाने दन्तगतनाड्याः कोऽप्युपक्रमो निवेदितः, अतश्चरकसंहिताया दृढबलकृतमुत्तरतन्त्रमासीदेव। परन्तु सुश्रुतकृतोत्तरतन्त्रवन्न तज्जनतायाः श्रद्धाभाजनमभूदिति, अद्यत्वे लुप्तता गतमित्यनुमानं नासङ्गतं भवति।

अस्य चोत्तरतन्त्रस्य सत्ता वृद्धवाग्भटसमयेऽपि प्रथितासीत्। अत एव स क्रममेतं स्वसंग्रहे भाषान्तरेणोज्जहार। यथा—

"कुब्जामनेकगतिं वा गुडमधुसिक्थान्यतमपूर्णाम् (दहेत्)। ततः क्षीरिवृक्षकषायेण गण्डूषं धारयेत्। तत्सिद्धेन वा तैलेन।" इति (उ० २६अ०)

लघुवाग्भटोऽपि उत्तरतन्त्रं ददर्श एवं तत एवाविकलमेव क्रममेतं लिलेख संग्रहाद् वैशिष्ट्यमापादयन् यथा—

"कुब्जां नैकगतिं पूर्णां मदनेन गुडेन वा।
क्षीरिवृक्षाम्बुगण्डूषो नस्यं तैलञ्च तत्कृतम्॥" इति(उ० २२-४२)

अत्र वृद्धवाग्भटेन मधुना पूरणमतिरिक्तं व्याहृतम्। पुनश्च तत्सिद्धेन तैलेन नस्यं कर्तव्यमिति नोक्तं कण्ठतः। अतश्चरकोत्तरतन्त्रस्य पाठं दृष्ट्वैव लघुवाग्भटोऽतिरिक्तं मधुना पूरणं विहाय तैलेन च नस्यं दातुमुपदिदेश। अतो द्वावपि तौ चरकस्योत्तरं तन्त्रं ददर्शतुरित्यत्र नास्ति संशयलेशोऽपि।

ननु अष्टाङ्गसंग्रहहृदययोरेक एव ग्रन्थकार इति केषाञ्चित् प्रथितानामायुर्वेदसेविनां सम्मतिर्दृश्यते ते च हेतुषट्कात् तयोरैक्यं प्रतिपिपादयिषन्ति। ते च हेतवो यथा—उभयोर्भाषासादृश्यम्, तयोः पितृनामैक्यम्, उभयत्र मतभेदाभावः, हृदयकारस्य स्पष्टोक्तिः, संग्रहश्लोकस्याविकृत्या हृदयग्रन्थे उल्लेखः टीकाकाराणामपि ग्रन्थकारैकत्वसमर्थनञ्चेति। * इति

* प्रथमं हेतुत्रयं प्रत्यक्षशारीरोपोद्घाते ५५ पृष्ठे चतुर्थपञ्चमौ हेतू निर्णयसागरमुद्रिते चरकोपोद्घाते १४ पृष्ठे षष्ठस्तु तत्रैव मुद्रिते अष्टांगहृदयोपोद्घाते द्रष्टव्याः।

चेत् कथ्यते। एतेषां षण्णां हेतूनामयौक्तिकत्वं व्यासतोऽस्मत्सम्पादिते शिवदासकृतटीकया सह मुद्रिते अष्टाङ्गहृदयोत्तरतन्त्रे ग्रन्थे द्रष्टव्यम्। अत्र च समासतः किंचिदुच्यते। मध्ययुगे संग्रहग्रन्थलेखने प्रथितायुर्वेद-ग्रन्थस्यानुवादे अर्वाचीनकोविदानां प्रवृत्तिरासीदिति सर्वत्रोपलभ्यते विशेषतः संग्रहग्रन्थलेखकानाम्। तत्र माधवकरस्य गदनिग्रहमनूद्य वृन्देन सिद्धयोगो विरचितः। तमप्यनुकृत्य चक्रपाणिना चिकित्सासंग्रहः कृतः। † तेषु माधवकरस्य चिकित्साग्रन्थोऽद्यत्वे दुर्लभः ❀ इतरयोर्द्वयोरालोचितयोः स्पष्टतः प्रतिभाति श्लोकानामैक्यं क्रमस्य चैक्यम्, अतस्तेषामैक्यं प्रतिपादयितुं न केऽपि उत्सहन्ते। हृदये कुत्रापि ग्रन्थकारपरिचयो नास्ति संग्रहे तु वर्तत एव। अद्यत्वे मुद्रितहृदयग्रन्थे समाप्तिवाक्ये या खलु पितृनामोक्तिर्दृश्यते सा खलु परवर्त्तिलेखकानां कृतित्वम्। यथा अधुनापि दृश्यते निर्णयसागरमुद्रिते चरके अन्तिमेषु केषुचिदध्यायेषु 'दृढबलपरिपूरिते' इति समाप्तिवाक्येऽन्तर्भावः। अतोऽनेन हेतुना नैक्यं सम्भवति। मतभेदस्तु तयोर्बहुत्र बहुत्र वर्तते। तेष्वेको मर्मणः पञ्चविधत्वं षड्विधत्वञ्च। तत्र हृदयकारस्य मतं प्रायोऽनार्षं नापि च युक्तिसिद्धम्। अतोऽनयोर्मतभेददर्शनमनवधानतैव। अत उभयत्र स्पष्टतो मतभेददर्शनात् तयोर्नैक्यं भवितुमर्हति। हृदयकारस्तु स्वग्रन्थस्तुतौ प्रथितात् संग्रहादपि हृदयस्य आतिशय्येनौपयौगिकत्वं प्रादर्शयत्। न खलु स्वरचितादेकस्माद् ग्रन्थादितरस्य उपादेयत्ववचनं विपश्चितां भवितुमर्हति। अनुपादेयस्य एकमेव पुस्तकं तेन स्वहस्तेन लिखितमासीत् पुनश्च तस्य प्रचारः कोऽकार्षीत्। प्रथमलिखिते अनुपादेयत्वेन परित्यक्ते संग्रहे तस्यैव प्रधानान्तेवासिन इन्दोः कथं टीकाकरणे प्रवृत्तिरासीत्। अतस्तयोरैक्यं न प्रतिभाति। हृदयकारस्य स्पष्टोक्तिरित्युक्त्या यानि हृदयवचनान्युक्तानि तानि तु तयोर्भेदमेवापादयन्ति। टीकाकृतस्तु न कुत्रापि तयोरैक्यमाहुः, परमिन्दुः हृदयकारं सर्वत्र आचार्यपदेनोल्लिलेख, संग्रहकारन्तु "सोऽयं वाहटनामा शास्त्रकारः" इत्युक्त्या अवज्ञानसूचिकया भाषया। अन्ये शिवदासडल्हणचक्रपाणिप्रभृतयस्तयोः पार्थक्यमेव जगुः। एवं बहुभिर्बहुभिर्हेतुभिस्तयोः पार्थक्यमेव प्रतिपादितम्।

चरकाग्निवेशयोः कालनिर्णये प्राच्यप्रतीच्या बहवो विद्वांसो बहुत्र स्वल्पान्तरेण अतिविपुलतया च आलोचितवन्तः। यैः खलु नानायुक्तिपरम्पराभिः स्वपक्षस्थापने परपक्षनिरसने च परः प्रयासः कृतः। अत्रातो न मे किञ्चिद्वक्तव्यमस्ति। परन्तु ये केचिदिमं चरकम् ईश्वरकृष्णादपि

---

† "वृन्देन मन्दमतिनात्महितार्थिनायं निबध्यते गदविनिग्रहजक्रमेण।" (सि० १)
'यः सिद्धयोगलिखिताधिकसिद्धयोगान्–'इत्यादि (चक० स०)

❀ कलिकातासंस्कृतमहाविद्यालयाध्यक्षेण दासगुप्तमहोदयेन माधवरचितः कश्चित् चिकित्साग्रन्थः जर्मनीदेशे कस्मिन् पुस्तकालये दृष्टः, आनीतश्च तत आद्योपान्तं छायाचित्रं, तस्यानुलिपिरपि मया दृष्टा। सा च सर्वथा सिद्धयोगमनुवदति।

अर्वाचीनं मन्यन्ते तत् तथ्यं न वेति किञ्चिदालोचयामः। तेषामयमभिप्रायः—बौद्धत्रिपिटकस्य चैनिकभाषानुवादाज् ज्ञायते यत्—आसीद् राज्ञः कनिष्कस्य सभायां चरको वैद्यः अश्वघोषो गुरुः माठरश्च प्रधानमन्त्रीति। सोऽयं चरकोऽग्निवेशतन्त्रस्य प्रतिसंस्कर्ता। अश्वघोषो बुद्धचरितकारः। माठरश्च ईश्वरकृष्णसांख्यकारिकाया वृत्तिकारः। माठरवृत्तौ मूलकर्त्तुर्बहुशो भगवत्पदेन कीर्तनात् वृत्तिकारादतिप्राचीनः स इति सूच्यते। अतश्चरकादतिप्राचीनोऽयमीश्वरकृष्ण इति।

नायं तर्को विचारसहः। ईश्वरकृष्णस्य पूर्ववर्तित्वे अर्वाचीनयोरश्वघोषचरकयोर्ग्रन्थे तत्सम्मतमेव सांख्यमतमद्रक्ष्यत। नतु तत् तथा दृश्यते सुश्रुतसंहिताकर्ता तु ईश्वरकृष्णादर्वाचीनः। स खल्वाचार्यः सुश्रुतः स्वसंहितायामीश्वरकृष्णसम्मतमेव सांख्यमतमनूद्य प्राह, इत्येके भाषन्ते, ततो वैद्यके तु इत्युक्त्या आयुर्वेदसम्मतं मतं प्रादर्शयत्। नत्वेवं कृतं चरकेण। तस्मिन् हि काले चतुर्विंशतितत्त्ववादिनां मौलिक्यसांख्यानामेव मतमप्रथत अतश्चरकेण सुश्रुतेनेव न मतद्वयं भेदेनोक्तम। सोऽयं विशेषश्चरक ईश्वरकृष्णात् प्राचीन इति सूचयति।

वाग्बन्धशैलीतोऽपि चरको माठरात् प्राग्भव इति शक्यतेऽवगन्तुम्। किञ्च चरकस्य माठरस्य चोपरिष्टात् प्रदर्शमानयोः श्लोकयोः वाग्विन्यासेनापि शक्यमवबोद्धुं यत्—माठरेण कृतः श्लोकश्चरकस्य श्लोकमनुहरतीति। ताविमौ श्लोकौ—

"पुनस्तत् शिरसः शूलं ज्वरः स पुनरागतः।
पुनः स कासो बलवांश्छर्दिः सा पुनरागता॥" इति चरकस्य (४·१)

"पुनर्दाहः समुत्पन्नः पुनर्जातश्च वेपथुः।
बाधते च पुनर्हिक्का ज्वरश्च पुनरागतः॥" इति माठरस्य

किञ्चैव माठरेण सांख्यकारिकावृत्तौ—

"किञ्च नास्ति सम्यग् धातुपरिज्ञाननिपुणतया भैषज्यम्। तथा हि—
यानि कानि च मूलानि येन केन च पेषयेत्।
यस्मै कस्मै च दातव्यं यद्वा तद्वा भविष्यति॥"

अन्यच्च कार्यार्थिजनद्रव्यभक्षणाय स्वशक्तिख्यापनाय च स्वल्पमपि रोगं पुरस्ताद् वर्धयन्ति भिषजः। ततश्च कदाचिदसौ तेषामसाध्यतामायाति। तथा च—

वैद्य, वैद्य, नमस्तुभ्यं क्षपिताशेषमानव।
त्वयि विन्यस्तभारोऽयं कृतान्तः सुखमेधते॥

इत्युक्तम्। न खल्वेतच्चरककाले सम्भवति। न वा कश्चिच्चरकेणावस्थिते राजसदसि एवं ब्रूयात्। नूनमिमावाभाणकौ तात्कालिकीं चिकित्सकानां शोच्यां दशां सूचयतः। नत्वेवं वर्तमाने भगवति चरके

सम्भाव्यते। न चापि चरकोक्तकुवैद्यलक्षणे माठरोक्तस्य ज्ञानकृतापराधस्य मनागपि गन्ध आघ्रायते*।

याज्ञवल्क्यस्मृतावपि एवं ज्ञानकृतापरांधस्य कुवैद्यस्य दण्डविधानं न दृश्यते। अतस्तस्या अपि स्मृतेरर्वाचीनो माठर इति प्रतीयते। अन्यथा तत्र स दण्डविधिर्ध्रुवमस्थास्यत्। अतो याज्ञवल्क्यादपि प्रत्नतमश्चरको न कदापि माठरसमकालीनो भवितुमर्हति।

अथ राज्ञः कणिष्कस्य सदसि चरको नाम प्रधानवैद्य आसीत्, स एव चरकसंहिताया: प्रतिसंस्कर्ता इति यदुच्यते तद् विचारयामः। कणिष्कसमयो नाद्यापि सम्यङ् निरूपितः। केचित्तं खीष्टीयाब्दात् पूर्वं, केचित्तस्य प्रथमे शतके, केचिद्वा द्वितीयशतके वदन्ति। वयन्तु आयुर्वेद-ग्रन्थविरचनपरम्परामनुसृत्य चरकस्य कालं निर्देष्टुं यतामहे। सर्व एव प्रत्न-तत्त्वविद ऐकमत्येन वदन्ति अष्टमे खीष्टीयशतके माधवकरस्य रुग्विनिश्चयः आरबीयभाषायामवतारित इति। अतोऽस्य बंगीयग्रन्थस्य परःसहस्रयोजन-दूरवर्तिनि तुरुष्के देशे गमनं नाल्पेन कालेन सम्भाव्यते। न वा अप्रथितस्य ग्रन्थस्यानुवादे प्रवृत्तिर्देशान्तरीयाणां सम्भवति। मुद्रायन्त्ररहिते, गतागति-दुर्गमे, च सुदूरे तस्मिन् काले, न खलु त्रिचतुर्वर्षशतात् कालात् पूर्वं न तथा भवितुमर्हतीति, नूनं स्वीकार्यं भवति यद्, अनुवादकालादन्तिमतस्त्रिचतुः-शतवर्षात् प्रागेव माधवकरस्याविर्भावोऽभूदिति। अतः पञ्चमे शतके तत्पूर्वं वा माधवकरस्य निदानग्रन्थः सम्भूतः।

पुनरस्त्येष क्रमः। तत्रादौ माधवकृतगदविनिग्रहजक्रमेण वृन्देन सिद्धयोगः वृन्दमाधवापरनामा संकलितः। न खलु अप्रथिते अनार्षे संग्रहग्रन्थे तदनुवादो न कस्यचिद् भवितुमर्हति। शिष्यपरम्परयैव तदात्वे एवं हस्तलिखितो ग्रन्थः प्रदेशात् प्रदेशान्तरं गच्छति स्मेति, सदैवानुस्मर्तव्य-मस्माभिः। अतो विभिन्नप्रदेशीयेन क्षत्रियेण वृन्देन तस्यानुकरणं, ग्रन्थ-समाप्तेः शतकत्रयादनन्तरमेव भाव्यम्। ततश्च तमनुसृत्य बङ्गीयेन चक्र-पाणिदत्तेन चक्रदत्तः संग्रहो विरचितः। अयं चक्रपाणिदत्तो गौडाधि-नाथस्य नयपालदेवस्य समये आसीत् (१०३३ खी०)। नूनं सुप्रथिते एव सिद्धयोगे, पठनपाठनादिना बहुजनसम्मते च, चक्रपाणिना तमुपजीव्य संग्रहो विरचितः। एवं सुप्रथितत्वं तस्य तदात्वे अन्तिमतो द्वित्रात् शतकात् कालादन्तरेण न सम्भवति। एवं परिस्थितौ वृन्दोऽपि चक्रपाणितो द्वित्रात् शतकात् पूर्वमिति सूच्यते। अनयैव युक्त्या माधवकरश्चक्रपाणिदत्ताद् अन्तिमतः पञ्चषात् शतकात् पूर्वमासीदिति नाप्रमाणं भवति। ततश्च पञ्चमे शतके माधवकरस्याविर्भावो नूनं प्रत्नतत्त्वविद्भिः स्वीकार्यः।

---

* चरकसंहिता-सूत्रस्थाने २९ अध्याये भिषक्छद्मचरस्य लक्षणं द्रष्टव्यम्।

ननु प्रतीच्यप्रत्नतत्त्वविदस्तु आयुर्वेदग्रन्थकाराणां समयनिर्देशे अधस्तान्निर्दिष्टा: सम्मती: प्रदर्शयन्ति। तेषु ए० एफ० होर्णले महोदयै:, यै: खलु महाभागैरायुर्वेदग्रन्थालोचने एव बहुतर: कालो व्यतीत:, तेषां सम्मतिरेव च समधिकत्वेनात्रोल्लिख्यते तद्यथा—

ग्रन्थकार:	काल:
अग्निवेश:	खीष्टाविर्भावात् षट्सप्तशतवत्सरात् प्राक्
चरक:	खीष्टीयाब्दस्य प्रथमे शतके।
वृद्धवाग्भट:	,, सप्तमशतकस्य प्रथमे भागे।
माधवकर:	,, सप्तमशतके।
दृढबल:	,, अष्टमे शतके।
लघुवाग्भट:	,, नवमे शतके।
चक्रपाणिदत्त:	,, १०६० अब्दे।

त एते कालनिर्देशा: दत्ततरहोर्णले-महोदयेन निर्णीता इति आप्तवाक्यत्वेन सर्वैरेव प्राच्यप्रतीच्यै: प्रत्नतत्त्वविद्भि: स्वीकृता: अतस्तत्प्रतिकूलवचनं नाप्रमाणमिति चेत् कथ्यते।

ता एता: सम्मतय आद्योपान्तग्रन्थालोचनेन निर्णीता इति न वक्तुमुत्सहे। तत्र चक्रपाणिदत्तात् माधवकरस्य कियत: कालात् प्रत्नतमत्वं सम्भवति तत्प्रागेवालोचितम्। ननु होर्णले-महोदयेन प्रागेव प्रतिपादितं * यत् न खलु वृन्दमाधवयो: कश्चिद् भेदोऽस्तीति। ग्रन्थकारस्तु वृन्दनामा। विजयरक्षितस्य मधुकोषसृष्टे: परस्तात्तस्य जनताभि: मधुकरो, माधवकरो वेति आलङ्कारिकदृष्ट्या संज्ञाऽभूदित्यध्यवसानमपि तस्य न समीचीनं भवति। तैर्हि महाभागै: वृन्दमाधवयोरैक्ये ये नाम हेतव: प्रदर्शिता आसन्, तेषां युक्तायुक्तत्वं त्रिंशद्वर्षात प्रागेव मया विचारितम्। अतिविस्तृतिभयात्तेषां साकल्येन उल्लेखेऽत्र न सम्भवत्यपि, तत्प्रदर्शितेषु हेतुषु एक एव विदुषां पुरत उपस्थाप्यते, त एव तस्य युक्तायुक्तत्वं निरूपयिष्यन्ति। तद्यथा—माधवविदाने ब्रध्नरोगस्य निदानं न लिखितम्। सिद्धयोगे तु तस्य चिकित्साधिकारे निदानं लिखितं दृश्यते। अतस्तयोर्ग्रन्थयोरेकग्रन्थकारत्वे एव पूर्वग्रन्थस्य त्रुटि: परवर्तिग्रन्थे संशोधनं सम्भवति नान्यथा। यतो निदानरचनाकाले प्रमादवशाद् ब्रध्नस्य निदानमलिखितं दृष्ट्वा, स एव ग्रन्थकारश्चिकित्सितग्रन्थरचनाकाले तस्य निदानं चिकित्साग्रन्थान्तर्भुक्तं कृत्वा प्रमाद: संशोधित इति तयोरैक्ये अन्यतमा युक्ति:। न खलु चिन्तितं तैर्महोदयै: सार्धसहस्रवर्षात् प्राङ्नासीत् अद्यतनीव परिस्थितिरिति। न खलु सिद्धयोगलेखनसमये रुग्विनिश्चयरूपं प्रथमं खण्डं मुद्रितमासीत्, येन ब्रध्ननिदानस्य तदन्तर्निवेशनमसम्भाव्यमभूत्। एकग्रन्थकारत्वे तस्यैव पुरत: रुग्विनिश्चयस्य ताडीपत्रादिषु हस्तेन लिखितं यत्पुस्तकमवर्तत, तत्रैव यथास्थानमेव ब्रध्नस्य

* Vide J.R.A.S. 1906 A.D. P. 289.

निदानं, स्थानाभावे पत्रस्य उपर्यधो वा लेखितुमशक्यत्। चिकित्साग्रन्थे निदानं संलिख्य अप्राकरणिकता दोषापातं नाकरिष्यदिति। एवंपरिस्थितौ आयुर्वेदग्रन्थकाराणां कालनिर्णये, पौर्वापर्य्यनिर्णये वा तेषामध्यवसायेन सिद्धान्त इति निर्णयः, आयुर्वेदनिष्णातानां न भवितुमर्हति। रोगाणामिति-वृत्तसंकलने कृते सर्व एवावबोद्धुं प्रभवन्ति यत्, काले काले नवीननवीन-तरा व्याधयो नवीनां संज्ञां गृहीत्वा आविर्भूताः। एवमेव रुग्विनिश्चय-कारात् गते बहुतिथे, वृन्दस्य समये ब्रह्मस्य प्रादुर्भावोऽभूदिति, तन्निदानं चिकित्सा च सिद्धयोगकारेण लिखितमासीत् नत्वेकग्रन्थकारत्वेन। अद्य-त्वेऽपि एवं बहवो व्याधयो नानाविधाभिरभिधाभिराविर्भूताः सन्ति। अत एव त्रिकालदर्शिमहर्षयस्तारस्वरेण जगुः—

"विकारनामा कुशलो न जिह्रीयात् कथञ्चन।
न हि सर्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः॥" इति (च०सू० १८ अ०)

यातु किमनेन प्रसङ्गान्तरेण। साम्प्रतं तमेव प्रसङ्गमवतारयामि। एवं परिस्थितौ अष्टमे शतके तुरुष्कदेशे अनुदितस्य बंगीयग्रन्थस्य काल-स्तदात्वे अन्तिमतः शतकत्रयात् प्राक् तत्पूर्वं वा भवितुमर्हत्येव। अतो माधवनिदानस्य कालः न कदापि पञ्चमशतकात् परस्ताद् भवितुमर्हति।

पुनश्च तत्र निदानसंग्रहे सत्स्वपि चरकसुश्रुतयोस्तदर्थबोधकेषु सूत्रेषु प्रतीच्यमतेन नवमशतके संगृहीतस्य अष्टाङ्गहृदयस्यैव सूत्राणि उद्धृतानि, यानि खलु द्रष्टुं पाश्चात्त्यपण्डितानामवसरो नाभूदिति, न मे दुःखम्, परन्त्विदमेव दुःखायते नश्चेतः, यद् आयुर्वेदनिष्णाता अपि तेषां मतमार्ष-मतमिति मेनिरे इति। माधवनिदानमष्टांगहृदयात् परस्ताद् ग्रथितमिति दृष्टान्तेनैकेन स्पष्टीकरोमि पञ्चनिदानलक्षणन्तु अष्टांगहृदयस्यैव, न त्वष्टांग-संग्रहस्य, न वा चरकसुश्रुतयोः, इत एव अष्टांगहृदयकारो नूनं माधवकरात् प्रत्नतमः स्वीकार्यः। अत एव माधवकरसमये अष्टांगहृदयं चरकसुश्रुता-भ्यामपि समाद्रियततरामित्यत्र नास्ति संशयावकाशः। तस्मिन् हि दुर्गमागमे, स्वहस्तेन लिखितेन ग्रन्थेनाध्ययननियमे च, काले वत्सराणां शतकत्रयादल्पेन कालेन न तस्य प्रदेशान्तरे प्रथितिः सम्भवति। जेज्जटेन्दु-प्रभृतीनां प्रसिद्धानां टीकाकृतामाचार्यो लघुवाग्भटः पञ्चनदप्रदेशवासी आसीदिति लोकपरम्परासंप्राप्तिः। तद् भवतु वा, न वा, तस्य गौडीयत्वं न केनापि गीयते। अतस्तस्य वंगादितरदेशवासित्वं सम्भवति। दाक्षिणात्ये ग्रन्थस्यास्य बहुलप्रचारदर्शनात् ग्रन्थकारोऽयं दाक्षिणात्य इत्यपि केचिद् वदन्ति। माधवकरस्य तु गौडीयत्वं प्रसिद्धमेव पुनस्तस्य रत्नमालाकोषे सुश्रुतटिप्पण्याञ्च बहुतरगौडीयभाषादर्शनाद् अनुमीयते च गौडीयोऽयमिति। अतस्ततोऽपि शतत्रयवर्षात् प्राक्तनो लघुवाग्भटकारः खीष्टीये द्वितीये शतके आपतति।

ततोऽपि अष्टाङ्गसंग्रहकारो वृद्धवाग्भटः प्रत्नतमः। अष्टांगसंग्रहस्य

क्षितेयं सतीष्वपि पूर्वपूर्वासु विवृतिषु अर्थविशेषं प्रकाशयेदिति कृतोऽयं मुद्रणप्रयासः। परन्तु भूमण्डलव्यापिविग्रहेणाद्यत्वे मुद्रणार्थं पत्रं सर्वथाऽप्राप्यमभूदिति निकृष्टैरेव पत्रैः मुद्रयित्वा प्रकाश्यते इन्द्रियस्थानान्तं प्रथमं खण्डम्। पत्राभावादेव मूलग्रन्थोऽत्र न सन्निविष्टः। नूनं सर्वेषामेवायुर्वेदज्ञानां विद्यार्थिनाञ्च समीपे मूलग्रन्थो भविष्यतीति मत्वा, प्रदीपिकांशे श्लोकसंख्योल्लेखेन पण्डितानामालोचने सुगमता सम्पादिता। टिप्पणीसंख्या च पं० हरिदत्तशास्त्रिणा सम्पादिताया जज्जटचक्रपाणिटीकासमन्वितायाश्चरकसंहिताया: श्लोकसंख्यानुसारेणैवोपस्थापितेति, मन्ये न खलु विद्यार्थिनां मूलटिप्पणीसमन्वये कापि विप्रतिपत्तिः स्यादिति। प्रदीपिकाया विशेषांशस्यापि सूचीपत्रमप्येकं पृथक् प्रदत्तम्।

कलिकाताराजकीयसंस्कृतमहाविद्यालयस्य प्रधानाध्यापकेन महामहोपाध्यायेन श्रीमता योगेन्द्रनाथतर्कवेदान्ततीर्थेन, कलिकताविश्वविद्यालये आशुतोषाध्यापकेन संस्कृतविभागाध्यक्षेण अस्मत्प्रियसुहृदा महामहोपाध्यायेन श्रीमद्विधुशेखरभट्टाचार्येण च संशोधितेयमिति परमनयोरनुग्रहं स्मरामि। पुनश्च लाहोरस्थ-खैरातिरामनिधिसमितेरायुर्वेदातुरालयस्य अध्यक्षेण भूतपूर्वनिखिलभारतायुर्वेदविद्यापीठसभापतिना प्रियसुहृदा श्रीमता हरिदत्तशास्त्रिमहोदयेन मुद्रणार्थं लिखितोऽयं टीकाग्रन्थः कृपया आद्योपान्तं संशोधित इति पुनस्तेषां महोदयानां प्रयत्नवशादेव टिप्पणीयं मुद्रिताऽभवदिति स्मारं स्मारं चेतो मे कृतज्ञताप्लुतं भवतीति शम्।

मदनमोहनलाल आयुर्वेदअनुसन्धानपीठः,
काश्मीरी गेट, देहली।
१९४५ खी:

विदुषामाश्रव :—
श्रीज्योतिषचन्द्रसरस्वतीः

निदानस्थानम् ।

विषयः	पृष्ठांकः
प्रथमाध्यायस्य टिप्पणी	१८४–१९२
दोषप्रकोपविमर्षः	१८६
आमाशयशब्दार्थः	१८७
द्वितीयाध्यायस्य टिप्पणी	१९२–१९४
रक्तपित्तसंप्राप्तिव्याख्या	१९३
तृतीयाध्यायस्य टिप्पणी	१९४–१९७
चतुर्थाध्यायस्य ,,	१९७–२०१
पञ्चमाध्यायस्य ,,	२०१–२०४
षष्ठाध्यायस्य ,,	२०४–२०८
सप्तमाध्यायस्य ,,	२०८–२११
अष्टमाध्यायस्य ,,	२११–२१५

विमानस्थानम् ।

प्रथमाध्यायस्य टिप्पणी	२१६–२२३
द्वितीयाध्यायस्य ,,	२२३–२२७
तृतीयाध्यायस्य ,,	२२७–२३७
चतुर्थाध्यायस्य ,,	२३७–२३९
पञ्चमाध्यायस्य ,,	२४०–२४७
मनस इन्द्रियाणाञ्च स्रोतोविमर्षः	२४१
प्राणोदकवहस्रोतसां ,, ,,	२४२
अन्नादिवहानां स्रोतसां ,, ,,	२४३
शुक्रवहानां ,, ,,	२४४
षष्ठाध्यायस्य टिप्पणी	२४७–२५३
जाठराग्निविमर्षः	२५०
सप्तमाध्यायस्य टिप्पणी	२५३–२६०
भल्लातकस्नेहनिष्कासनयन्त्रम्	२५६
अष्टमाध्यायस्य टिप्पणी	२६०–२८९
सूत्रभाष्यादिलक्षणम्	२६१
बाह्यावयवविवृतिः	२८३

शारीरस्थानम् ।

विषयः	पृष्ठांकः
प्रथमाध्यायस्य टिप्पणी	२९०–३०८
अव्यक्तमात्मा	२९१
चतुर्विंशतितत्त्ववादिसांख्यम्	,,
इन्द्रियाणि पाञ्चभौतिकानि	२९२
क्षणभंगवादिमतनिरासः	२९५
क्षेत्रक्षेत्रज्ञयोर्निर्देशः	२९७
आत्मैव जगत्स्रष्टा	२९८
द्वितीयाध्यायस्य टिप्पणी	३०९–३१५
तृतीयाध्यायस्य ,,	३१६–३२३
गर्भे आत्मावक्रमप्रकारः	३१६
चतुर्विधयोनिप्रतिपादनम्	३१८
चतुर्थाध्यायस्य टिप्पणी	३२३–३३३
शुक्रार्तवसंयोगप्रकारः	३२४
पञ्चमाध्यायस्य टिप्पणी	३३३–३३८
षष्ठाध्यायस्य ,,	३३८–३४८
वातादीनां शरीरस्य स्थित्युत्पत्तिविनाशे कारणत्वम्	३३९
पित्ताग्न्योः सम्बन्धः	३४२
प्रसादमलयोर्विमर्षः	३४३
सप्तमाध्यायस्य टिप्पणी	३४८–३६१
त्वग्विवृतौ चरकसुश्रुतयोर्विरोधपरीहारः	३४९
अस्थिसंख्यायां विरोधपरीहारः	३५०
हृदयसंस्थानम्	३५२
कोष्ठांगानां स्थानं संस्थानञ्च	३५३–३५६
तत्र पक्वाशयस्यान्तर्भावोऽनाकरः	३५३
नाभिः कोष्ठांगमेव	३५४
बाह्यांगविवृतिः	३५६
स्नायुविवरणम्	३५७
शिराधमनीवर्णनम्	३५८
मर्मविवृतिः	३५९

विषयः	पृष्ठांकः
अष्टमाध्यायस्य टिप्पणी	३६१–३८०
अन्तर्मृतगर्भनिर्हरणम्	३७०
सूतिकागारविधिः	३७१
अचेष्टशिशोः प्रतीकारः	३७४

इन्द्रियस्थानम्।

प्रथमाध्यायस्य टिप्पणी		३८१–३८४
द्वितीयाध्यायस्य	,,	३८४–३८५
तृतीयाध्यायस्य	,,	३८५–३८६
चतुर्थाध्यायस्य	,,	३८६–३८८
पञ्चमाध्यायस्य	,,	३८८–३९१
षष्ठाध्यायस्य	,,	३९१–३९२
सप्तमाध्यायस्य	,,	३९२–३९४
अष्टमाध्यायस्य	,,	३९४–३९६
नवमाध्यायस्य	,,	३९६–३९७
दशमाध्यायस्य	,,	३९७–३९८
एकादशाध्यायस्य	,,	३९९–४०१
मुमूर्षोः सकाशादन्नजलाग्रहणस्य हेतुः		४००
द्वादशाध्यायस्य टिप्पणी		४०१–४०५

चरकसंहितायाः

चरकप्रदीपिकाख्या टिप्पणी

सूत्रस्थाने प्रथमोऽध्यायः ।

या नीलाम्भोजवर्णा शवधृतचरणा रक्तपंकेरुहाढ्या,
खड्गं मुण्डं दधाना करकमलयुगे या च सव्ये दिशन्ती ।
दत्तेऽभीतिं वरं वा विगलितचिकुरा लोलजिह्वां ललन्ती,
सा काली कालभीतिर्भवभयहरणी पातु नो ज्ञानदात्री ॥
ब्रह्माणं देवराजञ्च नासत्यौ च प्रजापतिम् ।
अग्निवेशं नमस्कृत्य भारद्वाजं पुनर्वसुम् ॥
कृता ज्योतिषचन्द्रेण टिप्पणीयं प्रदीपिका ।
चरकसंहितार्थस्य दीपीभूता प्रकाशिका ॥ युग्मकम्
विमलविपुलबुद्धेर्नातिसौख्येन वेद्या चरकभणितिरेषा किं पुनः स्वल्पबुद्धेः ।
त्वरयति खलु मन्दा मामकीनाऽपि बुद्धिः सुगमयितुमिमाञ्चेत्तत्र वाच्यो भवेयम्
यद्वा भीतिः कुतोऽपि नहि मम भवेत् प्रोक्तकार्ये कदाचि-
दाचार्य्यस्येश्वरस्य वचनममलं ध्वान्तहारं विदित्वा ।
यस्य ज्ञाने बलं हि विमलतमधियो वैद्यगंगाधरस्य
प्रेष्याऽकार्षीत् सतीव सुविमलरवेर्ध्वान्तसंहारहेतोः ॥
दुर्बोधं यच्च जातं दुरधिगमतया संहितावाक्यभंग्या-
प्रायेणाऽत्याजितद्वै सुगममितिगिरा चासु टीकासु कस्मिन् ।
यच्च स्पष्टं स्वतस्तत् मतिरुचिगहनैस्तर्कजालैः समस्य
व्याख्यातं कुत्रचिद्वा परमसुकृतिभिः पण्डितैस्तद्विचार्य्यम् ॥
टीकाः प्राच्याः सुभव्यास्त्वतिमतिवशगो नात्र कामं लभेत
पाश्चात्या वा न दृश्याः किमपि च वचनं तत्र नाहं ब्रवीमि ।
ये कृत्स्ने लोकजाते विमलतमधियाऽऽचार्यतां निर्दिशन्ति
नेदिष्ठे वा दविष्ठे समविमलदृशस्तान् सहस्रं प्रणौमि ॥
भास्वद्भास्वन्निभा भातु दीपिकेव प्रदीपिका ।
अन्तस्तमो निराकृत्य प्रकाशं काशताञ्च वः ॥
जगदुपकृतिहेतोर्लिख्यते दीपिकेयं सरलनयनपातैः प्रेक्षणीया भवद्भिः ।
विमलकपणपीठे कथ्यते नो हि यावदमलसमलबुद्धिः काञ्चने नो लभेत ॥

सर्वविघ्नविनाशाय गणेशाय नमो नमः ।
नमामि शारदां भक्त्या सर्वविद्याप्रदायिनीम् ॥

कार्य्यप्रारम्भे विघ्नविनाशाय मङ्गलमाचरणीयमिति हि परमाप्ताचार-रेप्राप्तो व्यवहारः । अतोऽग्निवेशतन्त्रस्य परमशिष्टः कर्ताऽपि प्राक्तनाचार-ल्लंघयितुमसमर्थः "अथातो दीर्घञ्जीवितीयमध्यायं व्याख्यास्यामः" इत्यादि-वनविन्यासेन अथशब्दोल्लेखं कृत्वा मङ्गलमाचरितवान् । तथा हि—"ओंका-धाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्मांगलिका-मौ ॥" इति । अथेत्ययमधिकारार्थः । दीर्घञ्जीवितीयमध्यायमधिकृत्य व्याख्या-ामि इत्यर्थः । नन्वेक एवाथशब्दः कथंकारमधिकारार्थो मंगलार्थश्च स्यात्, सकृदुच्चरितः शब्दः सकृदर्थमेव गमयति" इति न्यायादिति चेन्न । अथशब्दोऽ-धिकारार्थ एव न तु मंगलार्थः । मांगलिको ह्यथशब्द उच्चारणमात्रेण मंगलं ादधाति अन्यार्थनीयमानोदकुम्भदर्शनेनान्यस्य यात्रासिद्धिवत् । अतः शब्द-ानन्तर्यार्थः । इह हि चतुर्वर्गाणां धर्मार्थकाममोक्षाणामारोग्यमेव मूलम् । ारवस्थदेहिनो हि न कथमपि चतुर्वर्गलाभाय प्रभवन्तीत्यतः सर्वेषामेव ारोग्यस्य परमपुरुषार्थत्वेन तदाकांक्षा भवति । अतस्तद्विषयकशिष्यप्रश्नानन्तरं न्थारम्भो युज्यत एव । यतः सर्वाण्यपि भूतानि आरोग्यमभीप्सन्ति ततो ीर्घञ्जीवितीयमध्यायं व्याख्यास्याम इत्याशयः । प्रायः सर्वैऽपि तन्त्रकृतः तन्त्रे स्वाभिमतां संज्ञां कर्तुं प्रभवन्तीति अत्रापि शास्त्रकृता प्रायोऽध्यायस्य थमशब्दमधिकृत्यैवाध्यायसंज्ञा कृता । दीर्घञ्जीवितमितिशब्दमधिकृत्य प्रवृत्तोऽ-यायः दीर्घञ्जीवितीयः "अध्यायानुवाकयोर्लुग् वा" इति ईयः । तं व्याख्यास्यामः ाह्मादिनोक्तस्य तन्त्रस्य विवरणं करिष्याम इत्यर्थः । इतिह ऐतिह्ये इति श्रूयत-त्यर्थः । स्मशब्दोऽतीतार्थद्योतकः ॥ १—२ ॥

शास्त्रारम्भे तत्र जनतानां श्रद्धातिशयमापादयितुं तन्त्रस्यास्य ब्रह्मादि-ावक्तृत्वरूपमितिहासमादौ विवृणोति दीर्घञ्जीवितमित्यादिश्लोकैः । यथा येन ाकारेण । ततस्तस्मात् प्रजापतेः । ऋषिप्रोक्तः ऋषिभिश्चोदितः, सर्वे ऋषयो रद्वाज(पुनर्वसु)मिन्द्रादायुर्वेदं ग्रहीतुं चोदयामासुरित्यर्थः ॥ ३—५ ॥

कथमृषीणां स्वर्गादायुर्वेदानयने प्रवृत्तिरासीदित्याह विघ्नभूतेत्यादि । अनुक्रोशमाक्रन्दनमभियोगमित्यर्थः । समेताः समवेता एकत्रीभूता इत्यर्थः । के ते इत्याह अंगिरेत्यादि । यमस्य=अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहरूपस्य योगांगस्य । नियमस्य=शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानरूपस्य । निधयः= परं स्थानम् । तस्य=आरोग्यस्य । अयं महान् इति विधेयप्राधान्यादेकवचनम् । एको वृक्षः पञ्च नौका भवन्तीतिवत् । कः सदस्माद्भवनं गच्छेदिति प्रश्नस्य अयमहमत्रार्थे नियुज्ये इत्युत्तरम् ॥ ६—२३ ॥

हेत्वित्यादि । त्रिसूत्रं हेतुसूत्रं लिंगसूत्रमौषधसूत्रञ्च । अथवा सामान्य-सूत्रं विशेषसूत्रं तदुभयसूत्रञ्च । ननु हेतुलिंगयोरेकपर्य्यायत्वात् को भेदः ?

तयोरुभयोरपि व्याधिकारणत्वे उत्पादकज्ञापकत्वभेदाद् भेदो वर्तत एव। त्रिस्कन्
त्रयः स्कन्धा अंशा विद्यन्ते यत्र तम्। तत्र प्रथमे स्कन्धे हेतुसूत्राणां समावेः
द्वितीये तु लिंगसूत्राणां तृतीये चौषधसूत्राणाम्। सुखान्वितमायुरिति आयु
सुखासुखहिताहितभेदेन चतुर्धा भिद्यते इति परस्तात्प्रतिपादयिष्यति। ऋषिभ्
इति क्रियाग्रहणाच्चतुर्थी। अनधिकमनवशेषयंश्च यथावदित्यर्थः। आयुषो वर्ध
तं वेदमायुर्वेदमित्यर्थः॥ २४—२७॥

तेनेति। तेन आयुर्वेदग्रहणेन। सामान्यादिना जगतां निखिलमेव पदा
सूचयति, तेनैतद्व्यतिरिक्तः पदार्थो नास्तीति तात्पर्यम्। तेनास्य तन्त्रस्य पदा
संग्रहेण वैशेषिकवत् षट् पदार्थवादित्वमुपलभ्यते। तज्ज्ञात्वेति तच्छब्दे
निखिलविश्वरूपं परामृशति। तन्त्रोक्तमेतच्छास्त्रोक्तमायुर्वेदोक्तमित्यर्थः। अनित
रमविनाशि॥ २८—२९॥

अथेति। पुनर्वसुरिति भरद्वाजगोत्रोद्भवस्यात्रिपुत्रस्यैव भगवतः संज्ञ
इति ह्यस्मिन्तन्त्रे क्वचिद् भरद्वाज इति क्व वात्रेय इति कुत्र वा पुनर्वसुरित्
श्लेखो दृश्यते। मैत्रीपरः स्नेहशीलो जगतां हितेप्सुरित्यर्थः। के ते शिष्या अग्नि
वेश इति। बुद्धेर्विशेषेत्यादिश्लोकार्धस्य प्रतिवचनमेव भवभूतिराह "वितरा
गुरुः प्राज्ञे विदां यथैव तथा जडे" इत्यादिना। कृतानि तन्त्राणि श्रावयामासुरि
योजना। सर्षिसंघमृषिभिः परिवेष्टितमित्यर्थः॥ ३०—३४॥

सर्व एवेति। साधुभूतेष्वनुक्रोश इति साध्विति क्रियाविशेषणम्। भूते
साधु यथास्यात्तथा तेऽनुक्रोशो भवतीत्यर्थः, अभिनन्दकोऽव्ययो वा यथ
रामायणे "साधु साध्विति देवास्तामहल्यां समपूजयन्" इति। अनुक्रोशः अनु
कम्पा भावाय मंगलाय॥ ३५—४०॥

यदुक्तं "ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते। ग्रन्थादौ तेन वक्तव्य
संबंधः सप्रयोजनः॥" इत्यतो ग्रन्थप्रयोजनं विवक्षुरायुर्वेदलक्षणद्वारेण प्रयोजनम
हिताहितमित्यादि। आयुर्हि चतुर्धा भिद्यते हितत्वेनाहितत्वेन सुखत्वेन दुःखत्वे
च। तस्यायुषो हिताहितं स्थापनं व्यपोहनञ्च, मानमायुष एव। तच्च आयुश्च
यस्मिन् हि तन्त्रे दुःखाहितायुषी विहाय कथं सुखहितायुषी लभ्येते, यत्र च हि
नामायुषो हिताय किं वा अहिताय किञ्चायुषः परिमाणं किन्नामायुश्चेत्येतानि
विचारयति दीर्घायुःप्राप्तेरुपायञ्च निर्दिशति तच्छास्त्रमायुर्वेद इति कथ्य
इति निष्कर्षः॥ ४१॥

किन्नामायुरित्याह शरीरेत्यादि। अत्र शरीरशब्देन सविषयाः पञ्चभूत
इन्द्रियशब्देन पञ्चज्ञानेन्द्रियाणि पञ्च च कर्मेन्द्रियाणि सत्त्वशब्देन चान्तःकर
बुद्ध्यहंकारमनःसंज्ञकमिति त्रयोविंशतिस्तत्त्वानि बोध्यन्ते। आत्मा चेति
चतुर्विंशतितत्त्वानां संयोगः एकत्र समावेश आयुरित्यर्थः। धार्य्यादिशब्दा
स्तस्य पर्य्यायाः। उभयोरितीहपरकालयोः। नन्वायुर्वेदो मानवानामिह हिताय

---

१ तेनर्षयस्ते दृढशरिति पाठोऽत्र गृहीतः। पाठोऽयं चक्रसम्मतश्च।

तीति युज्यते कथं नु च परत्र च हिताय प्रभवेत्, प्रेते हि लोके किन्नामा-
दस्योपयोगित्वमिति चेत् सत्यं ह्यायुर्वेदः परत्र साक्षान्न किञ्चिदुपकाराय सम्प-
, स्वस्थस्य तु धर्म्मादिप्राप्तिद्वारेण परम्परया हिताय स्यादेव। धर्म्मादीनां ह्या-
यं मूलं तत्प्राप्त्युपायभूत स्यायुर्वेदस्य परत्रापि हितकारित्वं वर्तत एव ॥४२-४३॥

आयुर्वेदमारिरिप्सुरादौ सामान्यादीन् पदार्थान् विवृण्वन् सामान्यस्य
शेषस्य च कार्य्यमुपदिशति सर्वदेति। सर्वभावानां द्रव्यगुणकर्मणां वृद्धिकारणं
द्धौ प्रयोजकमित्यर्थः। समानो हि भावस्तत्समानं वर्धयितुं प्रयुज्यते सामा-
न, एवं विशिष्टो हि भावस्तद्विशिष्टं ह्रासयितुं प्रयुज्यत इत्यर्थः। तुः पक्षान्तरे
यस्य सामान्यविशेषयोः प्रवृत्तिः प्रकर्षेण वृत्तिः सत्ता एकत्रैव वर्तत इति
ः। यथैकस्मिन्नेव घटपदार्थे घटसामान्यात् सामान्यं पटवैशेष्याच्च विशेषस्य
ता वर्तत एवेत्यर्थः। ननु कथं सामान्यं वृद्धिकारणं विशेषश्च ह्रासहेतुः स्यादिति
यन्तरमाह सामान्यमिति। एकत्वकरत्वादेव सामान्यं वृद्धिकारणं पृथक्करणा च
शेषो ह्रासहेतुः स्यादित्यर्थः। तयोरितरव्यावर्तकं लक्षणमाह तुल्यार्थतेति।
र्थः कारणभूतं कार्यभूतञ्च वस्तु तुल्यं येषां ते तुल्यार्थास्तेषां भाव इत्यर्थः।
पर्य्ययस्तद्विपरीतोऽतुल्यार्थता इत्यर्थः। एतद्द्वयं हि द्रव्यगुणकर्म्मणामुपरि
धारणो धर्मः। यथाहि श्लेष्मसमानो मधुरो रसस्तद्वर्धकः स्यात्, वातह्रास-
त्वाच्च तद्विशिष्टः स्यात्। अयं हि विशेषः सामान्याकारेण कथितो न तु वैशेषि-
वदन्त्यो विशेषः। तत्रापि सामान्याकारेण तस्योल्लेखो दृश्यते "द्रव्यत्वं गुणत्वं
ामान्यानि विशेषाः" इति "अन्यत्र अन्त्येभ्यो विशेषेभ्यः" इति च सूत्रद्वयेन।

यद्वा सर्वदेतिसूत्रद्वयमेवं व्याख्येयम्। व्याससमासाभ्यामुपदिष्टं हि शास्त्रं
नाभिवृद्धये प्रभवतीति कृत्वा तस्येत्युपक्रम्य वक्ष्यतेऽयं मनुष्याणामित्येवं प्रस्तु-
मर्थं प्रथमं तावत् सूत्रयति। आयुर्वेदो ह्यातुराणां विकारप्रशमनार्थं स्वस्थस्य
स्वास्थ्यानुवर्तनार्थमुपदिश्यते एतच्च तन्त्रमिदमवगाह्यावगम्यते विकारश्च धातु-
षम्यान्नातिरिच्यते "विकारो धातुवैषम्यम्" इत्यनागतावेक्षणात्। तच्च धातु-
षम्यमुपयुक्ताभ्यां समानासमानधर्मिभ्यां प्रवर्तते। निवर्तते च यथायोगमुपयुक्ता-
यामेव तद्विपर्यस्ताभ्याम्। यथावदुपयुक्ताभ्यामेवाभ्यां स्वास्थ्यञ्चानुवर्तते इत्ये-
वेदयितुमिदमुच्यते सर्वदेति। सर्वभावानां निखिलद्रव्यगुणकर्मणां सामान्यं
द्धिकारणं वृद्धिहेतुः धातूनां वर्धनमित्येतत्। एनेनैव ह्रासहेतुविशेषश्चेति व्या-
यातप्रायः। वृद्धा ह्रसिता वा धातवो ह्यवश्यं यथास्वं कार्य्याणि हित्वा विपरीता-
प्रारभन्ते, आरब्धेषु विपरीतेषु कर्मसु अवश्यं दुःखमुत्पद्यते, तदिह दुःखयतीति
युत्पत्त्या विषमस्थांस्तांस्तान् धातून् विकारनाम्नाऽवगमयन् इदमुच्यते "विकारो
दुःखमेव तु" इति। तान् पुनर्विषमान् धातून् शास्त्रमिदमाश्रित्य भिषजो वैपरी-
येन यथा समीकर्तुं समीहंते, तथैव समांश्च धातून् उभयेषां विपरीताविपरीतानां
यथावदुपयोगेन परिपालयितुं प्रभवन्तीत्यवोचाम शास्त्रमिदमातुराणां विकारोप-
शमनार्थं स्वस्थानां स्वास्थ्यानुवर्तनार्थञ्चोपदिश्यते इत्येवं सूत्रितार्थस्य व्याख्या

कृत्स्नोऽयं ग्रन्थो वेदितव्य इति भावः।

"प्रवृत्तिरुभयस्य तु" इत्ययं ग्रन्थ एवं व्याख्येयः। उभयस्य सामान्यस्य विशेषस्य च प्रवृत्तिः प्रवाहो धारावाहित्वमिति यावत्। तुकारात् पारिशेष्यात् स्वास्थ्यस्येति नेयम्। अत्र सर्वदेति विशेषणं सूत्रितार्थस्याव्यभिचरितत्वमाख्यातुम्। एतेनैतदुक्तं भवति-रूक्षशीतादयो वातसधर्माणो भावा वातं वर्धयन्ति विपरीताश्च यथावदुपसेवितास्तं पुनर्ह्रसयन्ति समीकर्तुम्। विशिष्टानामुपसेवनेन ह्रसितञ्च तं समानधर्मिणां यथावदुपसेवनेन वर्धयन्ति समत्वमापादयितुम्। अनयैव दिशा शेषाणां वृद्धानां ह्रसितानाञ्च धातूनां ह्रासो वृद्धिश्च व्याख्यातव्या। एवमेव सधर्माणो विधर्माणश्च भावा यथावदुपसेविताः स्वस्थानां स्वास्थ्यमनुवर्तयन्तीति हृदयम्। अत एव स्वस्थान् प्रति सर्वरसाभ्यासमभिनन्दन्ति कुशलाः। भगवन् नैतावता संशयोऽपयाति सम्यक्प्रत्ययश्च जायते तदिदं जिज्ञासामहे कुतः पुनः सामान्यं वृद्धिकारणं विशेषश्च ह्रासहेतुर्भवति इत्याह सामान्यमेकत्वकरमिति। उक्तमर्थं लक्षणतः स्पष्टयति तुल्यार्थतेति इति निगदव्याख्यातम् ॥४४-४५॥

किमधिकरणकोऽयं वेद इत्याह सत्त्वमित्यादि। अत्र सत्त्वपदेनान्तःकरणानि गृह्यन्ते। शरीरपदेन पाञ्चभौतिकं सेन्द्रियं शरीरम्। त्रिदण्डः पदत्रयेण निर्मित आधारविशेषः 'तेपाया' इति वंगीयाः। यथाह्यस्य पादस्यैकस्याभावादाधारत्वं नश्यति तद्वज्ज्ञातव्यम्। लोकः भूतग्रामः, संयोगाद् एतत्त्रयसंयोगात्तिष्ठति=वर्तते। तत्र=पुरुषाख्ये संयोगे। सर्वमिति-शारीरे १ अध्याये व्याकरिष्यति। कथमयमधिकरणमित्याह—तदर्थमिति। हि यतः तदर्थं तस्य पुरुषस्यैव हिताहितव्याकरणाय अयं वेदः आयुर्वेद इत्यर्थः। त्रिदण्डान्न्यूनं नाधिकरणं भवतीति सत्त्वादीनां त्रिदण्डकल्पना साध्वी भवति। यथाह्येकस्मिन् दण्डे हीने तस्य त्रिदण्डसंज्ञया सहाधिकरणत्वं नश्यति तथैव मिलितानामेतेषां त्रयाणां लोकसंज्ञाऽविरुद्धा भवति। तत्र संयुक्ते पुरुषे सर्वमैहिकपारत्रिकञ्च वस्तुजातं प्रतिष्ठितम्। न च केवले आत्मनि प्रतिष्ठा सम्भवति तस्य निर्विकल्परूपत्वात्। तथा च श्रुतिः-"स यदत्र किञ्चित् पश्यति अनन्वागतस्तेन भवति असंगो ह्ययं पुरुषः" इति। तदिति विधेयप्राधान्यान्नपुंसकम्॥ ४६-४७ ॥

क्रमप्राप्तत्वाद् द्रव्यं विभजते खादीनीति। खादीनि=क्षित्यप्तेजोवाय्वाकाशसंज्ञकानि पञ्चभूतानि। आत्मा जीवात्मा। कालविवृतौ सुश्रुतः प्राह-(सू.६ अ.) "कालो हि नाम भगवान् स्वम्भूरनादिमध्यनिधनः। स सूक्ष्मामपि कलां न लीयते इति कालः। संकलयति कालयति वा भूतानीति कालः।" इति। स च त्रुटिलवनिमेष-काष्ठा-कला-मुहूर्तयामाहोरात्र-पक्षमासर्त्वयनसंवत्सरयुगादिव्यवहारहेतुः। दिक् च पूर्वापरादिप्रत्ययलिंगा। मूर्तद्रव्यमवधीकृत्य मूर्तेष्वेव द्रव्येषु एतस्मादिदं पूर्वेण दक्षिणेन पश्चिमेनोत्तरेणेत्यादिदिक्प्रत्यया यतो भवन्ति सा दिगित्यर्थः। तस्य द्रव्यस्य द्वैविध्यमाह सेन्द्रियमिति। ननु वृक्षादीनां स्थावराणामिन्द्रियाद्यहित्यादचेतनत्वं प्रसज्येत इति चेन्न। तेषां खलु रसग्रहणालोकप्रयासित्वा-

दना इन्द्रियाणां सत्त्वानुमानात्। अत्र हि चेतनत्वं चैतन्यविकाशित्वं ज्ञेयम्। "कारणगुणाः कार्य्यगुणमारभन्ते" इति न्यायादायुर्वेदनये सर्वेषामेव द्रव्याणामव्यक्ताख्यात्मकार्य्यत्वेन चैतन्यं वर्तत एवेति चेतनलक्षणे सात्मकत्वं विहाय सेन्द्रियत्वमेव गृहीतम्। जड़ानान्तु इन्द्रियाभावाच्चैतन्यविकाशाभाव इति तानि अचेतनानि कथ्यन्ते। अतो यत्र द्रव्ये चैतन्यस्य विकाशो दृश्यते तदेव चेतनमित्यर्थः।

ननु शरीरस्यांशांशेषु वेदनाग्राहकत्वाच्चयापचयशीलत्वाच्च चैतन्यं वर्तत एव। वक्ष्यति च (शा. १ अ.) "वेदनानामधिष्ठानं मनो देहश्च सेन्द्रियः। केशलोमनखाग्रान्नमलद्रवगणैर्विना॥" इति तर्हि शरीरधातवः सर्व एव चेतना इति प्रत्यंशमेव पृथक्चैतन्यवत्त्वात् सेन्द्रियं भवितुमर्हतीति चेन्न। एकेनैव हि चेतनेनात्मना चेतनावच्छरीरगतं प्रत्यंशं चेतनानुभूयते। पृथक्चैतन्यस्वीकारे स्वतन्त्रत्वात् तैरेकच्छन्दोऽनुसारतः क्रिया न भवेत तेन साकल्येनो ह्रसप्रसंगः स्यात्। यदुक्तं भामत्यां वाचस्पतिमिश्रेण-"प्रत्येकं चेतनत्वपक्षे बहूनां चेतनानां स्वतन्त्राणामेकवाक्यताभावादपय्यर्यायं विरुद्धदिक्क्रियतया शरीरमुन्मथ्येत, अक्रियं वा प्रसज्येत" इति। (अध्यासभाष्यटीका)॥ ४८॥

गुणान् विभजते सार्था इत्यादि। अर्थाः शब्दस्पर्शरूपरसगन्धाः पञ्च। गुर्वादयः इति-गुरुलघुशीतोष्णस्निग्धरूक्षमन्दतीक्ष्णस्थिरसरमृदुकठिनविशदपिच्छिलश्लक्ष्ण-खरस्थूलसूक्ष्मसान्द्रद्रवाः इति विंशतिः। बुद्धिपदेनात्र स्मृतिचेतनाधृतिप्रज्ञाहंकाराः संगृह्यन्ते। प्रयत्नान्ता इति इच्छाद्वेषसुखदुःखप्रयत्नाः इति पञ्च। तत्र प्रयत्नः पुनः प्रवृत्तिनिवृत्तिजीवनयोनित्वेन त्रेधा भिद्यते, परादयस्तु परः अपरः युक्तिः संख्या संयोगः विभागः पृथक्त्वं परिमाणं संस्कारः अभ्यासश्चेति दश। इत्येवमेकचत्वारिंशद् गुणपदार्था भवन्ति। कर्म निरूपयति प्रयत्नेति। प्रयत्नः प्रवृत्तिः निवृत्तिः जीवनयोनिश्च आदि कारणं यस्य तच्चेष्टितं कर्म इत्युच्यते॥४९॥

समवायमाह समवाय इति। गुणैरिति बहुवचननिर्देशाद् गुणक्रियाभिरित्यर्थः। तैः सह भूम्यादीनां द्रव्याणामपृथग्भावोऽयुतसिद्धसम्बन्धः नित्यसम्बन्ध इत्यर्थः। अपृथग्भूतत्वमेव तस्य नित्यत्वे हेतुः। ननूत्पत्त्यव्यवहितक्षणे द्रव्येषु गुणाभावो दृश्यत एवेति चेन्न। तत्रापि गुणानां सत्ता वर्तत एवाभूतोत्पत्तेरसम्भवात् सौक्ष्म्यात्तु नानुपलब्धिः। तस्य नित्यत्वे हेतुमाह यत्रेति। हि यतो यत्र द्रव्यं तत्रैव गुणोऽनियतो न भवतीति शेषः। गुणानां क्रियाणां सदैव द्रव्यान्वयित्वाद् द्रव्यगुणयोः सम्बन्धो नित्य एवेत्यर्थः॥ ५०॥

द्रव्यलक्षणमाह-यत्राश्रिता इति। आश्रिताः समवायसम्बन्धेन वृत्तिमन्तः। नन्वाद्यक्षणे घटादौ गुणक्रियाभावाद् गगने च कर्मशून्यतया गुणक्रियाभ्यां समवायसम्बन्धेन वृत्तिमत्त्वाभावात्तत्र तत्र लक्षणमिदमव्याप्तमिति पुनर्विशेषयति कारणमित्यादि। यत् समवायि सत् कारणं भवति अंगांगित्वेन इत्यर्थः। द्रव्यं समवेतमेव कार्य्यं भवति न तु द्रव्यगुणसमवेतमिति तात्पर्य्यम्। "क्रियागुणवत्-

समवायिकारणमिति द्रव्यलक्षणम्" इति वैशेषिके । गगनादावव्याप्तिवारणाय क्रियागुणवद् इति विशेषणम् ।

गुणलक्षणमाह समवायीति । समवायी यः समवायसम्बन्धेन द्रव्ये तिष्ठति द्रव्याश्रित इत्यर्थः । कर्मण्यतिव्याप्तिवारणाय विशिनष्टि निश्चेष्ट इति । कार्योत्पत्तौ चेष्टाविरहित इत्यर्थः । असमवायिकारणमिति तात्पर्य्यम् । यथा हि कपालद्वयस्य संयोगो घटोत्पत्तौ कारणं भवति ॥ ५१ ॥

कर्मलक्षणमाह संयोग इत्यादि । कार्य्यमारभमाणानां संयोगे विभागे च यत् कारणं स्वभिन्नं कर्मान्तरं नापेक्षते तद् द्रव्याश्रितं कर्म कर्तव्यस्य क्रिया इत्यर्थः । तथा च वैशेषिके "संयोगविभागेषु अनपेक्षकारणमिति कर्मलक्षणम्" इति ॥ ५२ ॥

पदार्थान् निवेद्य आयुर्वेदप्रयोजनं धातुसाम्यक्रियां निवेदयति इत्युक्तमित्यादि । अस्य तन्त्रस्य आयुर्वेदस्य । वक्तव्ये धातुसाम्ये तत्प्रतियोगिधातुवैषम्यरूपस्य विकारस्य निदानमादौ वक्तव्यमित्याह कालबुद्धीत्यादि । कालस्य ऋतुलक्षणरूपाणां शीतोष्णवर्षाणामित्यर्थः । बुद्धेः धीधृतिस्मृतिरूपस्य इन्द्रियार्थानां शब्दस्पर्शरूपरसगन्धानां मिथ्यायोगो न योगोऽतियोगश्च व्याधीनां समासेन त्रिविधो हेतुरित्यर्थः । तत्र कालस्यायोगः शीतोष्णवर्षलक्षणस्यर्तुधर्मस्य अप्रवृत्तिः । यथा वर्षायां वर्षणाभाव इत्यादि । एवमतियोगस्तद्धर्मस्यातिप्रवृत्तिर्यथा शीते शीताधिक्यम् । मिथ्यायोगस्तु तद्विपरीतधर्मप्रवृत्तिः यथा शीतेऽपि काल-औष्ण्याधिक्यमिति । एवं सर्वत्रोहनीयम् ॥ ५३-५४ ॥

द्वयाश्रयाणामिति कौ तावाश्रयाविति आह शरीरमित्यादि । शरीरं मनश्च व्याधेरधिकरणम् । तथा सुखानामारोग्याणामपि ते एवाधिकरणमित्यर्थः । सुखशब्दस्यारोग्यवाचित्वमत्रैव वक्ष्यति यथा "सुखसंज्ञकमारोग्यं विकारो दुःखमेव च ।" इति । ननु सुखोत्पत्तौ किं कारणमित्याह योग इति । कालबुद्धीन्द्रियार्थानां समयोगः सुखानां कारणमित्यर्थः । नन्वात्मैव व्याधीनामाश्रयो भवतु नेत्याह निर्विकार इति । निर्विकारः विकाररहितः सुखदुःखासंश्लिष्ट इति यावत् । "साक्षी चेताः केवलो निर्गुणश्च" इत्यादिश्रुतेः । परः सत्त्वशरीराभ्यामन्य इत्यर्थः । सत्त्वभूतगुणेन्द्रियैरिति-सत्त्वमत्रान्तःकरणत्रयं बुद्ध्यहंकारमनांसि । भूतगुणाः शब्दादयो विषयाः, इन्द्रियाणि ज्ञानेन्द्रियाणि तैः करणैः चैतन्ये कारणं भवति । चेतनच्छायापत्त्या अचेतनाऽपि बुद्धिश्चेतनवद् भवतीति तत्साधनेन पुरुषश्चैतन्ये कारणं भवति इत्यर्थः । स च द्रष्टा न तु कर्ता । वक्ष्यति च "चेतनावान् यतश्चात्मा ततः कर्ता निरुच्यते । अचेतनत्वाच्च मनःक्रियावदपि नोच्यते ॥" इति । श्रुतिश्च "पश्यत्यनन्वागतस्तेन भवति" इति ॥ ५५-५६ ॥

विकाराणां विप्रकृष्टान् हेतून् निवेद्य सन्निकृष्टान् हेतून् निवेदयति वायुरित्यादि । त्रयाणामेषां दुष्टिकर्तृत्वाद्दोषत्वेऽपि त एते वात-पित्त-कफा एव देहसञ्जननहेतवो भवन्ति । समत्वमेषां यथा देहोत्पत्तौ देहधारणे च मूलं भवति

तथैवैषां वैषम्यं व्याध्युत्पत्तेर्हेतुर्भवति। वक्ष्यति हि "सर्व एव खलु वातपित्तश्लेष्माणः प्रकृतिभूताः पुरुषमव्यापन्नेन्द्रियं बलवर्णसुखोपपन्नमायुषामहतोपपादयन्ति, विकृतास्त्वेनं महता विपर्ययेण उपपादयन्ति" इति। तथा च वृद्धवाग्भटे--"दोषधातुमलमूलो हि देहः" इति। अतस्त एव देहधारणाद् धातव इति दूषणस्वभावाच्च दोषाः मलिनीकरणान् मलभूतत्वाच्च मला उच्यन्ते। विशेषास्त्वेषां मदीये "आयुर्वेदे-शारीरविनिश्चये" द्रष्टव्याः। शरीरदूषणादेते शारीरदोषाः। एभ्य एव शारीरा व्याधयो जायन्ते। रजस्तमश्च मानसौ दोषौ। ते च मनः सन्दूष्य मानसान् व्याधीन् जनयत इत्यर्थः। तयोर्दोषयोः प्रशमनमाह प्रशाम्यतीति। पूर्वः शारीरो दोषः। दैवव्यपाश्रयैरिति शान्तिस्वस्त्ययनहोमनियमप्रायश्चित्तादिभिः। युक्तिव्यपाश्रयैरायुर्वेदोक्तैः कषायकल्कलेहादिभिः। मानसस्तु दोषो ज्ञानादिभिः प्रशाम्यति। तत्र ज्ञानविज्ञाने तु "मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः" इति लक्षणे। धैर्यं धृतिः संयम इत्यर्थः। स्मृतिस्तत्त्वज्ञानोदयः। समाधिस्तु "तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत्। मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते॥" इति विष्णुपुराणोक्तलक्षणः॥ ५७—५८॥

सामान्यविशेषाभ्यां हि दोषाणां वृद्धिह्रासौ भवत इति कर्तव्ये दोषसाम्ये अनुक्तेषु दोषगुणेषु तन्न सम्भवतीति कृत्वा दोषगुणानाह रूक्ष इति। विपरीतगुणैः स्निग्धोष्णगुरुस्थूलस्थिरपिच्छिलश्लक्ष्णगुणैरित्यर्थः। पित्तगुणानाह सस्नेहमिति। अत्र स्निग्धमिति वक्तव्ये सस्नेहमित्युक्त्या ईषत्स्नेहगुणविशिष्टमित्यर्थो गम्यते। तेन स्नेहमयमपि घृतं शैत्यादिभिर्गुणैः पित्तं प्रशमयतीत्यर्थः। विपरीतगुणैः रूक्षशीतमृदुसान्द्रस्थिरमधुरगुणैरित्यर्थः। श्लेष्मगुणान् वक्ति गुरुशीतेति। विपरीतगुणैः लघूष्णतीक्ष्णरूक्षकटुसरविशदगुणैरित्यर्थः। विशदोऽपिच्छिलः। सरश्चलः। ननु पित्तस्य सरत्वाद् विरेचनानामपि तत्सामान्यं स्यादिति "विरेचनं पित्तहराणाम्" इति कथं संगच्छत इति कथ्यते तत्समानस्यापि विरेचनस्य प्रभावात्तन्निर्हारकत्वं न प्रतिषिध्यते न खलु विरेचनं स्वगुणात्तत्शमकं भवति। बलात् पित्तं निर्हारयत्येव॥ ५९-६१॥

ननु विपरीतगुणैर्द्रव्यैश्चेद्दोषाः प्रशाम्येरंस्तर्हि सर्व एव व्याधयश्चिकित्सासाध्या भवेयुर्न च तथा दृश्यते इति पुनर्विशिनष्टि विपरीतगुणैरिति। देशमात्राकालोपपादितैः देशकालोपयोगिभिर्मात्रावद्भिश्च विपरीतगुणैर्भेषजैः साध्या व्याधयो विनिवर्तन्ते। साध्यसम्मता इति साध्यत्वेनाभिज्ञैर्निर्दिष्टाः। अज्ञा हि असाध्यमपि साध्यत्वेन निर्दिशन्तीति साध्यसम्मता इत्युक्तम्। अत एवाह साधनमिति। साधनं निरामयीकरणम्। उपदिश्यते चिकित्सातन्त्र इति शेषः। अतः द्रव्याणां सामान्यविशेषाभ्यामुपयोगित्वप्रदर्शनायेत्यर्थः। यथा द्रव्यं द्रव्ये, गुणकर्माणि गुणाः कर्माणि च भूयः पुनः पुनः वक्ष्यते समग्रेऽस्मिन् तन्त्र इति शेषः॥ ६२-६३॥

वक्तव्येषु द्रव्यगुणकर्मसु तेषां रसायत्तत्वादादौ रसगुणान् विवक्षु रस-

भेदान् तद्गुणांश्च निर्दिशति रसनार्थ इति । रसनार्थः रसनेन्द्रियग्राह्यो विषयः । पञ्चभूतेषु क्षितौ जले च रसा वर्तन्त इत्याह द्रव्यमिति । खादयस्त्रयः खं वायुरग्निश्च रसस्य निर्वृत्तौ उत्पत्तौ विशेषे विभेदे च प्रत्ययाः कारणानि भवन्ति । यथा पाञ्चभौतिके द्रव्ये तेजोबाहुल्यात् कटुकः आकाशबाहुल्यात् कषाय इत्यादि । रसभेदानाह स्वादुरिति । स्वादुर्मधुरः । के रसाः कं दोषं शमयन्तीत्याह-स्वाद्वम्लेति । एतेन प्रशमकातिरिक्तरसास्तं तं दोषं जनयन्तीति ज्ञातव्यम् ॥ ६४-६६ ॥

रसान् समासतो निवेद्य द्रव्यं विभजते किञ्चिदिति । दोषप्रशमनं द्रव्यप्रभावादेव दोषान्प्रशमयति इत्यर्थः । यथाह्यामलकं स्वभावादेव सर्वदोषप्रशमकं भवति । अत्र दोषग्रहणेन दोषदुष्टा धातवोऽपि परिगृह्यन्ते । धातुप्रदूषणं दोषान् रक्तादीन् धातूंश्च दूषयति । यथा यवकमन्दकादयस्ते हि स्वभावादेव धातून् दूषयन्ति । क्वचिच्चोपकारकत्वेऽपि स्वभावादेव धातुदूषकत्वाद् दूषकभेदे ते निपतन्ति । स्वस्थवृत्ताविति-सुसुन्दरं नीरोगत्वेनावातिष्ठते इति स्वस्थः तस्य वृत्तिरनुवर्तनं तस्मिन् मतं पूजितम् । स्वस्थस्य स्वास्थ्यानुवर्तनाय रक्तशाल्यन्नादिकं सदैवोपसेव्यते । कानिचिद् द्रव्याणि प्रकुपिते दोषे तत्प्रशमनाय प्रयुज्यन्ते, कानिचिद्वाऽभ्यवहृता धातून् प्रदूषयन्ति कानि वा दोषाणां समतापादनेन शरीरमनुपालयन्ति इति कर्मभेदात् त्रिविधमेव द्रव्यं भवतीति तात्पर्यम् ॥६७॥

तद्द्रव्यं पुनर्भेदप्रकृत्यन्तरेण भिन्नं त्रेधा भिद्यते इत्याह तत्पुनरिति । जंगमाः सञ्चरणशीलाः प्राणिनः तस्मादागतमिति जांगमम् मध्वादिरोचनान्तं द्रव्यम् । यद्यपि मधुनः पुष्परसस्वरूपत्वान्न जांगमत्वप्रसक्तिस्तथापि जंगमैर्मक्षिकादिभिराहृतत्वात् तद्गतविषादिसंसृष्टत्वाच्च जांगमत्वमव्याहतं स्यात् । यद्वदयति-"हन्यान्मधूष्णमुष्णार्तमथवा सविषान्वयात्" इति । गोरसाः दुग्धं तद्विकाराश्च । पित्तं यकृत्संसक्तपित्तकोषे सञ्चितं मलपित्तम् । असृग् रक्तम् । रोचना गवां पित्तकोषे जाता पित्ताश्मरी गोरोचना इत्यर्थः । पार्थिवमाह सुवर्णमिति । सुवर्णाद्यञ्जनान्तं पार्थिवम् । पञ्च लोहाः, रौप्यताम्रसीसवंगलोहाः । तेषां मला मण्डुरादयः । सिकता बालुका । सुधा गोदन्तादयः । आलं हरितालम् । भौमं पार्थिवम् । औद्भिदमाह औद्भिदन्त्विति । फलैर्वनस्पतिरिति अदृश्यपुष्पैः फलैरित्यर्थः । फलपाकान्ताः याः फलपाकादूर्ध्वं म्रियन्ते ता ओषध्यः । प्रतानैराश्रयं प्राप्य या इतस्ततो विस्तृता भवन्ति ता वीरुधो लता इत्यर्थः ॥ ६८-७२ ॥

औद्भिदां कान्यंगान्यत्र प्रयुज्यन्त इत्याह मूलत्वगिति । मूलादिप्ररोहान्त औद्भिदो गणश्चात्र व्यवह्रियत इत्यर्थः । सारः खदिरादीनाम् । निर्यासो धूपादयः । क्षाराः भस्मप्रस्रुतोदकक्रताः । क्षीरं स्नुह्यादेः । शुंगाः पल्लवमुकुलानि । प्ररोहा वटादेः । यद्यपि पल्लवग्रहणेन पत्रस्यापि ग्रहणं भवति तथापि पल्लवस्य किशलयार्थत्वान्न द्विरुक्तिः । नाडं पटोलादेः । अधुना द्रव्येषु प्राधान्येन केषाञ्चिद् गुणान् विवक्षुर्मूलिन्यादिभेदेन उद्दिशति मूलिन्य इति । मूलिन्यः मूलान्यौषधार्थं प्रशस्तानि यासामिति प्राशस्त्ये 'इन्' । फलिन्यः फलप्रधानाः

एकोना विंशतिरिति योजना। पुनर्वसुनिदर्शिता आत्रेयतन्त्रोक्ताः औषधाय
योक्तुमिति शेषः। एतान् मूलिन्यादीन् पदार्थान् विकारेषु व्याधिषु संयोक्तुं
योक्तुम्। वेदविद् आयुर्वेदनिष्णातः॥ ७३—७६॥

क्रमश एतान् व्याचिख्यासुर्मूलिनीराह हास्तिदन्तीति। हस्तिदन्ती वृद्द-
न्ती, हैमवती वचा। श्यामा श्याममूला त्रिवृत् 'तेउड़ी' इति वंगे। अधोगुडा
वृद्धदारकः। सप्तला चर्मकषा। श्वेतनामा श्वेतापराजिता। प्रत्यक्श्रेणी लघु-
न्ती। गवाक्षी गोरक्तकर्कटी 'गुडुम' इति भाषा। ज्योतिष्मती "लताफट्की"
ति भाषा। बिम्बी ओष्ठोपमफला 'तेलाकुचा' इति वंगे। शणपुष्पी घण्टारवा।
वेषाणिका मेषशृंगी। अजगन्धा वन्ययमानी। द्रवन्ती दन्तिभेदः। क्षीरिणी
वर्णक्षीरी। छर्दन वमनक्रियायाम्। फलिनीराह फलिनीरिति। शंखिनी "चोर-
डाकी" इति वंगीयाः। त्रपुषं 'शशा' इति भाषा गंगाधरस्तु 'तरमुज' इत्याह।
क्लीतकं यष्टीमधु। धामार्गवः घोषकभेदः 'तितधूमा' इति वंगे। इक्ष्वाकुः तिक्ता-
लाबुः। जीमूतं 'घोषा' इति भाषा। कृतवेधनं 'लताफटकी' इति भाषा। प्रकीर्य्या
नाटाकरञ्जः। उदकीर्य्या गोकरञ्जः। प्रत्यक्पुष्पी अपामार्गः। अन्तःकोटरपुष्पी
नीली। हास्तिपर्णी हस्तिकर्णपलाशः। कम्पिल्लकं 'कमलागुँडी' इति भाषा।
आरग्वधः स्वर्णालुः। कुटजः 'कुर्ची' इति भाषा॥ ७७—८६॥

चतुःस्नेहान् नामकर्मभ्यामाह सर्पिरिति। सर्पिर्घृतम्। वसा प्राणिनां
शरीरस्य शुद्धस्नेहः। मज्जा तु तेषामस्थ्यन्तर्गतस्त्यानघृतवत्पदार्थविशेषः।
अभ्यञ्जनं देहे मर्दनम्। योगतः तत्तद्दोषप्रशमकैर्द्रव्यैः संयोगात्। वर्ण्या-
वर्णाय हिताः। बलोपचयवर्धना बलस्य उपचयस्य च शरीरपुष्टेर्वर्धकाः॥८७-८८॥

लवणान्याह सौवर्चलमिति। सौवर्चलं स्फाटिकाकारः भंगे सकोणः लवण-
विशेषः 'सचललवण' इति भाषा। औद्भिदम् ऊषरमृत्तिकात उद्भूतम् "खारी-
नुन" इति भाषा। सामुद्रं समुद्रसलिलाज्जातं करकचाख्यम्। अधोभागे विरे-
चने ऊर्ध्वभागे वमने। निरूह आस्थापनवस्तिः। अनुवासनं स्नेहवस्तिः।
अभ्यञ्जने अभ्यंगे। शस्त्रकर्मणीति सामान्येनोक्तेऽपि लेखनकर्मणीति ज्ञेयम्।
अत्रोदरे इति सामान्यत उक्तिः वातोदरपरा। उत्सादनं चूर्णेन शरीरघर्षणम्।
आनाहो विड्विबन्धः॥ ८९—९२॥

मूत्राण्याह ऊर्ध्वमित्यादि। मे इति विवक्षावशात् षष्ठी। मुख्यानि प्रधा-
नानि। आत्रेयशासने पुनर्वसुरचिते आत्रेयतन्त्रे। मूत्रं हि स्त्रीपशूनामेव गृह्य-
यात्लघुत्वात्। अवीमूत्रं मेषीमूत्रम्। खरस्य गर्दभ्या इत्यर्थः। मूत्रसामान्य-
गुणान् आह उष्णमिति। दीपनीयत्वादिगुणा हि आभ्यन्तरप्रयोगाज्ज्ञातव्याः।
किलासः श्वित्रभेदः। उपनाहे स्वेदविशेषे। पीतं मूत्रं श्लेष्माणं शमयेदिति योजना।
अस्मिन् अत्राध्याये। मूत्राणां पृथग्गुणानाह अवीमूत्रमिति। पित्ताविरोधि
न च पित्तं शमयति वातकफौ च शमयतीत्यर्थः। पथ्यं हितम्। दोषान् वात-
पित्तकफान्। दोषोदरे वातादिजोदरे न तु दूष्योदरे इति भावः। शोफः शोथः।

सरं भेदकम् । प्रशस्तमिति । बद्धविण्मूत्रस्य विषादेश्च प्रशस्तमित्यर्थः । श्लेष्मा
मयः कफविकारः । ग्रहनाशनमिति ग्रहाविष्टानामुन्मादादीनां नाशन
मित्यर्थः ॥ ६३-१०५ ॥

क्षीराण्याह अथेति । नागीनां हस्तिनीनाम् । वडवायाः घोटक्याः
प्रायशो मधुरमिति अश्वक्षीरस्य सतिक्तत्वात् प्रायःशब्दः प्रयुक्तः । प्रीणनं तृप्ति
जनकम् । बृंहणमुपचयकारकम् । मनस्करं हृद्यम् । विहतस्य क्षतस्य । सर्वप्राण
भृतां सात्म्यमिति तस्य तस्य प्राणिनस्तत्तद्दुग्धसात्म्यता ज्ञेया । शमनलक्षण
त्वाह शार्ङ्गधरः-यथा "न शोधयति न द्वेष्टि समान् दोषांस्तथोद्धतान् । समी
करोति विषमान् शमनं तद् यथामृता" इति । शोधनलक्षणमपि तत्रैव "स्थानाद
बहिर्नयेदूर्ध्वमधो वा मलसञ्चयम् । देहसंशोधनं तत् स्याद् देवदालीफलं यथा"
इति ॥ १०६—११३ ॥

शोधनार्थान् षड्वृक्षानाह अथापरे इति । स्नुही महातरुः 'सिझु' इति
भाषा । अर्कः 'आकन्द' इति वंगे । अश्मन्तकः 'लोहाचुर' इति उत्तरवंगे
स्नुहीक्षीरं विरेचने इति अतितीक्ष्णविरेचनं हि तद्बिन्दुमात्रेणैव प्रभूतं विरेच
यति । पूतीको नाटाकरञ्जः । कृष्णगन्धा शोभाञ्जनः । तिल्वको लोध्रः । परीस
विसर्पे व्याधौ । गण्डे गलगण्डे । अलजी प्रमेहपिडकाविशेषः । उपसंहरति
इत्युक्ता इति ॥ ११४—११६ ॥

नन्वौद्भिदो गणो नामरूपाभ्यां ज्ञातव्य एवेति तदुपायमाह ओषधीरिति
ये च सदैव छागादिपालनार्थं वने वने अटन्ति ये च तत्रैव कृतनिवासा त
नामरूपाभ्यामोषधीर्जानते तेभ्य एव ओषधीनां नामसंस्थानादिकं ज्ञातव्य
इत्यभिप्रायः । ननु त एव तर्हि चिकित्सितुमर्हन्ति नेत्याह न नामेत्यादि । पर
प्राप्तिं युक्तं प्रयोगज्ञानम् । सर्वथा नामरूपप्रयोगैः । तासामोषधीनाम् ।
भिषग् भवतीति शेषः । न खलु प्रयोगादिज्ञानमात्रेणैव सर्वत्र साफल्यं भवती
त्याह योगमिति । देशकालादिभेदेनापि प्रयोगो भिद्यते इति तदुपपादितो
प्रयोगो ज्ञातव्य इत्यर्थः । एतैर्नामादिभिरज्ञातं ज्ञातं वा मात्रादिभिर्दुर्युक्तमनर्थ
भवतीत्याह औषधमिति । तमेवार्थं दृष्टान्तेन द्रढयति योगादिति । दुर्युक्तकाल
अदेशे च अमात्रावत् प्रयुक्तम् । अतएव नामरूपप्रयोगादिभिरज्ञस्य भिषज
भेषजं नादेयमित्याह तस्मादिति । युक्तिबाह्येन सम्यक्प्रयोगाज्ञेन । वासवाश
निर्वज्रम् । सशेषं कुर्य्यात् कदाचिन्न हन्यादित्यर्थः । कुवैद्यनिन्दामाह दुःखि
तायेति । दुःखिताय पीडिताय । शरणागतायेति तात्पर्यम् । प्राज्ञ
मानी वैद्याभिमानी न तु वैद्यगुणैर्युक्त इति भावः । मृत्युभूतस्य यथा हि मृत्यु
स्वयमेव नरस्यान्ताय भवति तथैव कुवैद्योऽपि चिकित्साव्यपदेशेन जनान्
मृत्यवे प्रापयतीति तस्य मृत्युस्वरूपत्वं युक्तं भवति । पारस्येति तस्यैवं ज्ञानकृत
नरहत्यारूपपापकारित्वात् । सम्भाषणेऽपि पापसंक्रमणमुक्तं गारुडे नीतिसा
यथा-"आलापाद् गात्रसंस्पर्शात् संवासात् सहभोजनात् । ××××

क्रमते पापं घटाद् घटमिवोदकम्।" इति। नन्वेष एवास्य जीविकोपाय इति न्यङ्करोति वरमिति। आशीविषविषं कृष्णसर्पविषम्। भक्षिता इति लिंग-परिणामेनान्वयः कार्य्यः। कथितं तीव्रतापेन गलितं स्फुटितं च अयोगुडः। पिण्डम्। एतेन त्रिविधेनोपायेन तस्य मरणमेव वरमित्यर्थः। श्रुतवताम् आयुर्वेदज्ञानाम्। वेशं बिभ्रतामित्यनेन वैद्यच्छद्मचरेणेति ज्ञेयम्। अन्नं पानं वा गृहीतं न वरमिति योजना। एतेन भिषक्चिकित्सानिष्क्रयणार्थं व्याधितादन्नादित्रयं ग्रहीतुमर्हतीति भावः। तेन मुमूर्षोः कामपि क्रियां कर्तुं शक्यत्वेन तत्र किञ्चिदपि ग्रहणं विधिविगर्हितं स्यात्। अत एव वक्ष्यति नैषामन्नानि भुञ्जीत न चोदकमपि स्पृशेत्" इति। (इन्द्रिय० ११ अ०) तत्रान्नपाननिषेधाद् अपिकारेण च वित्तग्रहणं तु सर्वथा विधिविगर्हितं स्यादिति उच्यते। सद्वैद्यस्य कर्तव्यमाह भिषगिति। भिषग् बुभूषुः सचिकित्सको भवितु-मिच्छुः॥ १२०—१३३॥

युक्तभैषज्यस्य भिषक्श्रेष्ठस्य च सामान्यं लक्षणमाह तदेवेति। यत् खलु भेषज्यं व्याधिमेकं प्रशाम्य व्याध्यन्तरमापादयति न तद् युक्तं स्यात्। एवं यदृच्छिकसिद्धया वा न खलु मूर्खस्यापि वैद्यश्रेष्ठत्वं स्यात् इति लक्षणमेतत् सामान्यतया निर्दिष्टम्। "प्रयोगः शमयेद् व्याधिं योऽन्यमन्यमुदीरयेत्। नासौ विशुद्धः-" इति पुनश्च "यदृच्छया समापन्नमुत्तार्य्यं नियतायुषाम्। भिषङ्मानी हन्त्याशु शतान्यनियतायुषाम्॥" इत्यादिना तु भैषज्यस्य भिषजश्च विशेष-लक्षणं वक्ष्यति॥ १३४-१३५॥

अयं हि तन्त्रस्यास्य समयो यदध्यायान्तेऽध्यायार्थं पुनः श्लोकेन श्लोकैर्वा भासत उक्ताऽध्यायं समापयति इत्याह तत्र श्लोका इति॥ १३६—१४०॥

इति श्रीज्योतिषचन्द्रसरस्वती-विरचितायां चरकप्रदीपिकायां चरक-तिप्पणयां सूत्रस्थाने दीर्घञ्जीवितीयो नाम प्रथमोऽध्यायः॥

द्वितीयोऽध्यायः।

आयुर्वेदप्रयोजनभूतस्य स्वस्थस्य स्वास्थ्यरक्षणार्थं विकारस्य च प्रशमनार्थ-मादित एव शरीरसंशुद्धिः कर्तव्येति भेषजचतुष्के यश्च फलिनीमूलिन्यादीना-मुल्लेखः कृतस्तेषां तदतिरिक्तानां च भेषजानां पञ्चकर्मसूपयोगित्वं निर्विवेद-यिषुरध्यायान्तरमारभते अथात इत्यादिना। पञ्चकर्मणां वमनस्यादिकर्तव्यत्वेऽपि शरीरावयवेषु शिरस उत्तमाङ्गत्वात् शरीरस्य मूलस्वरूपत्वाच्च तद्गतरोगाणां त्वरितचिकित्स्यत्वाच्च तद्गतदोषनिर्हरणरूपशिरोविरेचनांगभूतभेषजानि आदा-वाह। यदुक्तं वृद्धवाग्भटेन "ऊर्ध्वमूलमधः शाखमृषयः पुरुषं विदुः। मूलहा-रणस्तस्माद् रोगान् शीघ्रतरं जयेत्" इति। अपामार्गस्येति। अपामार्गतण्डुली-यति अध्यायनामकरणाद् अपामार्गबीजं निस्तुषं ग्राह्यमिति ज्ञेयम्। शिग्रुः

शोभाञ्जनं तस्य बीजम्। तुम्बुरुः कुस्तुम्बुरुः। अजाजी जीरकम्। पिलु 'आखरोट' इति फलमज्जा। एला स्थूलफला। हरेणुका रेणुका। पृथ्वीका सूक्ष्मैला। सुरसा तुलसी। श्वेता श्वेतापराजिता। कुठेरकः कृष्णतुलसी। फणिज्झकः क्षुद्रपत्र-तुलसी। शिरीषः कटभीसदृशः। लवणद्वयं सैन्धवसौवर्चले। गौरवं शिरस-इत्यन्वयः। कृमिव्याधौ कृमिजशिरोरोगे। प्रमोहके मूर्छासामान्ये॥ १—६॥

वमनद्रव्याण्याह मदनमिति। मदनं 'मयनाकाँटा' इति ख्यातस्य फलम्। मधुकं यष्टीमधु। जीमूतकृतवेधनौ घोषकभेदौ। इक्ष्वाकुः तिक्कालाबुः। धामार्गवो घोषकभेदः 'तितधूमा' इति वंगे। एषु निम्बस्य त्वक् मधुकस्य मूलम् अन्येषाञ्च फलं ग्राह्यम्॥ ७—८॥

वैरेचनिकद्रव्याण्याह त्रिवृतामिति। त्रिवृता श्यामामूला अरुणमूला च त्रिवृत्। सप्तला चर्मकषा। कम्पिल्लकं 'कमलागुँडी' इति भाषा। गवाक्षी गोडुम्बा। उदकीर्यका नाटाकरञ्जः। आरग्वधः स्वर्णालुः। द्रवन्ती लघुदन्ती। निचुल इज्जडः। एतेषु त्रिफलाकम्पिल्लकगवाक्षीपीलुवारग्वधद्राक्षानिचुलानां फलानि अन्येषां तु मूलं ग्राह्यम्॥ ९—१०॥

आस्थापनानुवासनयोर्द्रव्याण्याह पाटलामित्यादि। पाटला 'पारुल' इति भाषा। अग्निमन्थो गणिकारिका। काश्मर्यः गाम्भारी। पृष्णिपर्णी 'चाकुले' इति वंगे ख्याता। निदिग्धिका कण्टकारी। बला वाट्यालकः। श्वदंष्ट्रा गोक्षुरकः। कोलं बृहद्बदरम्। कत्तृणं गन्धतृणम्। विबन्धेषु मलमूत्रादीनामिति शेषः। अत एव अस्मादौषधगणादेव। संकल्प्य युक्तितो विचार्य्य॥ ११—१४॥

तानीति। तानि पञ्चकर्माणीति योजना। उपस्थितदोषाणामत्यर्थसञ्चित-दोषाणाम्। मात्रेति मात्रां कालञ्च प्रमाणीकृत्येत्यर्थः। यथाकालं सममात्रया प्रयोग एव कार्यसिद्धौ प्रभवतीत्याह मात्राकालेति। युक्तिः औषधानां सम्यक्-प्रयोगः। सिद्धिरारोग्यम्। न केवलद्रव्यज्ञानेन औषधीनां परा प्राप्तिर्भवति, सम्यक्प्रयोगज्ञ एव सिद्धिदातृत्वात् श्रेष्ठ इत्यर्थः॥ १५—१६॥

सम्यक्प्रच्छर्दितेषु पञ्चकर्मसु प्रतिभोगार्थं व्यापन्नेषु वा व्यापदः परि-संख्याय विभिन्नोपद्रवेषु नानौषधीर्यवागूर्दातव्या इत्यत्रैव अष्टाविंशतिर्यवागूराह अत ऊर्ध्वमिति। विविधौषधा इति विविधान्यौषधानि विद्यन्ते अत्र। तत्साध्यानां यवागूसाध्यानाम्। पिप्पलीति प्रथमामाह। अत्र षडंगपरिभाषया द्रव्याणां क्वाथं कृत्वा तेन यवागूः साधनीया इत्यर्थः। सा च "कर्षमात्रं ततो द्रव्यं साध-यित्वा प्रास्थिकेऽम्भसि। अर्धशृतं प्रयोक्तव्यं पाने पेयादिसंविधौ" इति। दधित्थेति यवागूर्द्वितीया। दधित्थं कपित्थस्य फलम्। चांगेरी अम्लपत्रशाकविशेषः "आम-रुल" इति वंगीयाः। दाडिमं दाडिमफलस्य त्वक्। अत्र तक्रं क्षीरपाकपरिभाषया दधित्थादिकल्केन पक्वा तेन यवागूः पाचनीया। सा च परिभाषा यथा-"द्रव्या-दष्टगुणं क्षीरं क्षीरात्तोयं चतुर्गुणम्। क्षीरावशेषः कर्तव्यः क्षीरपाके त्वयं विधिः" इति। सवाते इति तृतीया। सवाते वातिकातिसारे "ध्रुवाद्यैर्वाय्वतीसारे" इति

समानतन्त्रपाठात्। पाञ्चमूलिकीति स्वल्पपञ्चमूलकृतकाथसाध्येत्यर्थः। चतुर्थीमाह शालपर्णीति। बिल्वः बिल्वशलाटुः। यवागूं पक्त्वा अम्लदाडिमरसेनाम्लां कुर्य्यादित्याह दाडिमाम्लेति॥ १७—२०॥

पयसीति पञ्चमी। अर्धोदके समजले इत्यर्थः। ह्रीवेरं बालकम्। उत्पलं नीलोत्पलम्। दद्यादिति षष्ठी। अतिविषा 'आतइच' इति ख्याता। साम्ला अम्लदाडिमरसेन व्यक्ताम्ला। सामे आमातिसारे। श्वदंष्ट्रेति सप्तमी। श्वदंष्ट्रा गोक्षुरकः। सफाणितेति फाणितेन प्रक्षेपविधिना प्रयुक्तेनार्धावर्तितेनेक्षुरसेन सहेत्यर्थः। विडंगेत्यष्टमी। सुवर्चिका स्वर्जिकाक्षारः तस्य प्रक्षेपः। अत्रापि तक्रं विडंगादिना पक्त्वा तेनैव यवागूः पचनीया। मृद्विकेति पिपासाघ्नीं नवमीमाह। अत्र लाजा यवागूद्रव्यम्। मधु च शीतीभूतायां प्रक्षिप्य पिबेत् एवं प्रक्षेप्ये मधुनि सर्वत्र शीतीभूत एव ज्ञेयं यद् वक्ष्यति "उष्णे उष्णार्तस्य वा मधु विरुद्धम्" इति। विषघ्नीं दशमीमाह विषघ्नीति॥ २१—२४॥

बृंहणीमेकादशीमाह सिद्धेति। वराहनिर्यूहे वराहमांसक्काथे। कर्षणीयां द्वादशीमाह गवेधुकानामिति। गवेधुको 'देवधान' इति प्रसिद्धः कुधान्यविशेषः। समाक्षिकेति मधु प्रक्षेप्यम्। स्नेहनीं त्रयोदशीमाह सर्पिष्मतीति। अत्र तिलचूर्णेन यवागूः कर्तव्या। सर्पिर्लवणे साधनयोग्ये। विरूक्षणीं चतुर्दशीमाह कुशेति। श्यामाकस्तृणधान्यविशेषः। तद्बीजान्येव यवागूतण्डुलार्थं ग्राह्याणि। दशमूलीति पञ्चदशी। यमके इति षोडशी। यमके समधृते घृततैले। अत्र मदिरा द्रवार्थं ग्राह्या। वर्चोनिरसनीं सप्तदशीमाह शाकैरिति। अत्र तिलमाषौ तण्डुलार्थौ। सांग्राहिकीमष्टादशीमाह जम्ब्विति। अत्र जम्ब्वाम्रयोरस्थिमज्जानौ बिल्वशलाटु कपित्थफलञ्च काथ्यार्थम्। अम्लं तक्रमत्र द्रवार्थम्। भेदिनीमूनविंशतितमामाह क्षारेति। क्षारः यवक्षारः। अम्लवेतसः 'थैकड़' इति उत्तरबंगीयफलविशेषः। अनुलोमनीं विंशतितमामाह अभयेति। घृतव्यापद्विनाशिनीमेकविंशतितमामाह तक्रेति। घृतव्यापद्विनाशिनीति अतिघृतसेवया यो व्याधिर्जायते सा घृतव्यापत् तन्नाशिनी। तैलव्यापदीति द्वाविंशतितमामाह। पिण्याकः खलिः। गव्येति त्रयोविंशतितमामाह। साम्ला दाडिमादिना कृताम्ला। कण्ठ्येति चतुर्विंशतितमामाह। कण्ठ्या स्वरप्रसादनी। अत्र यमके यवचूर्णं भृष्ट्वा पिप्पल्यादिक्काथे यवागूः पक्तव्या। ताम्रेति पञ्चविंशतितमामाह। ताम्रचूडरसे कुक्कुटमांसरसे समाषेति षड्विंशतितमा। अत्र माषविदलचूर्णं घृतभृष्टं क्षीरसिद्धं कुर्य्यात्। उपोदिकेति सप्तविंशतितमामाह। उपोदिका "पुदिना" इति लोके। क्षुधमित्यष्टाविंशतितमा। अत्र अत्यग्निपुरुषस्य क्षुधा व्याधिरूपा ज्ञातव्या। अध्यायं समापयति तत्र श्लोका इति। निगदव्याख्यातमन्यत्॥ २५—३६॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने अपामार्गतण्डुलीयो नाम द्वितीयोऽध्यायः।

तृतीयोऽध्यायः।

अथ वक्ष्यव्ये भेषजचतुष्केऽध्याये आदौ भेषजनिर्देशः द्वितीये च द्विविधानामन्तःपरिमार्जनबहिःपरिमार्जनरूपाणां भेषजानामन्तःपरिमार्जनं संशोधनरूपमुक्ताऽवसरवशाद् बहिःपरिमार्जनमुपदिदिक्षुरध्यायान्तरमारभते अथात इत्यादिना। तत्रादौ षट्प्रलेपानाह आरग्वध इति। आरग्वधः स्वर्णालुस्तस्य पत्रमिह योज्यमन्तःपरिमार्जने तु फलमज्ञा। एडगजः 'एडाञ्चि' इति ख्यातस्य क्षुपस्य बीजम्। करञ्जः तस्य फलम्। श्रथाद्धः नवनीतखोटी। सुराह्वः देवदारुः। घवः "घाओया" इति ख्यातः। भौर्जो ग्रन्थिः भूर्जत्वक्। लोमशो जटामांसी। कृष्णागन्धा शोभाञ्जनस्तस्य त्वक्। फणिज्झकस्तुलसी। वत्सक इन्द्रयवः। सुमनःप्रवालाः जात्याः पल्लवानि। निकुम्भो दन्ती। अञ्जनं रसाञ्जनं तच्च लिम्पाकरसेन भावयित्वा संशोध्य ग्राह्यम्। आलं हरितालम्। काशीशं धातुकाशीशम्। सर्जो धुनकः। अर्धरूपैरर्धश्लोकैः। गोपित्तपीता गोरोचनया भाविताः। सिद्धा इति निश्चितफलप्रदत्वात् ॥ १—७ ॥

उद्वर्तनान्याह कुष्ठमित्यादि। सुरसस्तुलसी। शिग्रुः शोभाञ्जनः। तुम्बुरुः कुस्तुम्बुरुः। वन्यं कैवर्तमुस्तकम्। चण्डा शंखपुष्पी "ढोलकलुम" इति वंगे। तैलं सर्षपादितैलं कुष्ठहरत्वात्। तेन प्रथममाक्तमभ्यक्तं शरीरम् उद्वर्तयितुं यतेतेति योजना। कुष्ठहरमवचूर्णनमाह कुष्ठेति। संगस्तुत्थकम्। कटंकटेरी दारुहरिद्रा। सौगन्धिकं गन्धकम्। सर्जरसो धूपः। करवीरकत्वगिति श्वेतकरवीरस्य मूलत्वक्। प्रदेहद्वयमाह मनःशिलेति। तैलमत्र सार्षपं कुष्ठहरत्वात्। आर्के पयः इति अर्कक्षीरेण पेषणमित्यर्थः। तद्वदिति आर्केण पयसा पिष्टमित्यर्थः। रसाञ्जनमिति। प्रपुन्नाडबीजमेडगजवीजम् 'एडाञ्चि' इति लोके। कपित्थस्य कपित्थफलस्य। रसेन युक्तः पिष्ट इत्यर्थः। करञ्जेति गोकरञ्जवीजम्। उभे इति। कुटजस्य वीजम् इन्द्रयवः। सुमनःप्रवालाः मालतीपुष्पस्य नवीनपल्लवाः। हयमारकस्य श्वेतकरवीरस्य समध्यां गर्भकाष्ठसहितां त्वचं मूलत्वचम्। तिलक्षारस्तु शुष्कदग्धतिलनालेभ्यः क्षारप्रक्रियया निष्पादितं क्षारोदकं तेन युतं पिष्टमित्यर्थः। मनःशिलेति। कुटजात् कुटजवृक्षात् त्वगिति योजना। लोमशो जटामांसी। भौर्जो ग्रन्थिः भूर्जत्वक्। तुषोदकेन काञ्जिकविशेषेण तल्लक्षणन्तु शार्ङ्गधरे यथा- 'तुषाम्बुसन्धितं ज्ञेयमामैर्विदलितैर्यवैः।" इति। पलाशनिर्दाहरसस्तु- पूर्णवीर्यस्याजन्तुजग्धस्यैकस्य पलाशवृक्षस्याधः खानयित्वा प्रधानं मूलं छित्त्वा तदधः कुम्भमेकं सन्निवेश्य उपरि परितो वृक्षं गोमयज्वाला दातव्या तया यः स्वरसः कुम्भे पतति स एव ज्ञेयः। अत्र तुषोदकपलाशनिर्दाहरसयोः मिलित्वा आढको ग्राह्यः। तेन च प्रत्येकं कर्षमितानि मनःशिलादानि पक्का दर्वीप्रलेपं लेहवत् कृत्वा तेनैव लेपो देय इति परिपाटी ॥ ८—१६ ॥

पर्णानीति। चतुरंगुलस्य स्वर्णालोः काकमाच्याः तथा अश्वहनस्य कर-

वीरस्य कोमलपत्राणि तक्रेण पिष्ट्वा तैलाक्तगात्रस्य उद्वर्तनं कुर्य्यादित्यर्थः। वातहरलेपमाह कोलमिति। कोलं शुष्कबदरम्। अतसी 'तिसि' इति भाषा। तैलफलानि तिलैरण्डादीनि। शताह्वा शलुफा। अम्लं काञ्जिकम्। तेन पिष्ट्वा। उष्णीकृत्य लेपो देयः। आनूपेति। आनूपपिशितं वराहादिमांसम्। मत्स्यपिशितमित्यनेन कूर्मादिमांसमपि युक्तत्वाद् ग्राह्यम्। तैश्च वेशवारीकृतैः प्रदेहः कार्य्यः। वेशवारलक्षणन्तु "निरस्थि पिशितं पिष्टं स्विन्नं गुडघृतान्वितम्। कृष्णामरिचसंयुक्तं वेशवार इति स्मृतः" इति। स्नेहैरिति। चतुर्भिः स्नेहैः घृततैलवसामज्जभिः। तक्रेणेति। सक्षारं यवक्षारं प्रक्षिप्य जठरे अर्तिं शूलमित्यर्थः। अत्र यवचूर्णं तक्रेण पक्त्वा यवक्षारं प्रक्षिप्य उष्णेन तेन प्रदेहः कार्य्यः। कुष्ठमिति। कुष्ठादीनि काञ्जिकेन पिष्ट्वा तैलं सम्मिश्र्य कदुष्णेन तेन लेपो विधेयः। वातरक्तहरं लेपमाह उभे इति। शताह्वाद्वयं शलुफा मधुरिका च। मधुकं यष्टीमधु। मधूकं मधूकपुष्पम्। कशेरुकमिति 'कालकेशुर' इति जलजः कन्दविशेषः। विदारी भूमिकूष्माण्डः। सितोपला शर्करा। राम्नामिति। बलाद्वयं पीतबला महाबला च। अत्र मानानुक्तत्वाद् घृतप्रस्थः चतुर्गुणेन पयसा पादिकेन च राम्नादिना कल्केन पक्तव्यः। मधुशेषो मधूच्छिष्टस्तु घृतात् पादिकः प्रक्षेप्य इत्यवधातव्यम्। वात इति। सरक्ते वाते वातरक्तव्याधावित्यर्थः। शिरोर्तिहरं प्रदेहमाह नतोत्पलमिति। नतं तगरपादिका तदभावे 'शियलीछोपडो' ग्राह्यः। उत्पलं नीलोत्पलम्। प्रपौण्डरीकमिति। प्रपौण्डरीकं पुण्डरिआकाष्ठम्। कमलोत्पले इति तयोः किञ्जल्कः। लोहोऽगुरुः। एडका 'होगला' इति भाषा। पद्मकं पद्मकाष्ठम्। चोरकश्चोरपुष्पी। अत्र प्रपौण्डरीकादिश्चोरकान्त एको योगः। राम्नेति। नलदं जटामांसी। पार्श्वरुजासु पार्श्ववेदनासु। निर्वापणयोगमाह शैवालेति। निर्वापणो दाहप्रशमनः। तुंगं पुन्नागः। अमृणालमुशीरम्। कालीयकं 'कालिया' काष्ठम्। चन्दनमत्र दाहप्रशमकत्वात् श्वेतमेव ग्राह्यम्। सितेति। सिता शर्करा। लता मञ्जिष्ठा। ऐन्द्री गोडुम्बा। नलिनमिति पद्मकिञ्जल्कः। यवासो दुरालभा। जलं बालकम्। शैलेयमिति। शैलेयं शैलजः। चण्डा शंखपुष्पी। त्वक् गुडत्वक् विषहरलेपमाह विषमिति। शिरीषः 'फुलकडइ' इति ख्यातः। सिन्धुवारो निर्गुण्डी। शिरीषेति। लामज्जकमुशीरम्। हेम नागकेशरपुष्पम्। प्रघर्षः अवगुण्डनम्। पत्रेति। पत्रं तेजपत्रम्। अम्बु बालकम्। अभयमुशीरम्। चन्दनमत्र श्वेतम्। निगदव्याख्यातमन्यत्॥ १७—२९॥

अध्यायं समापयति तत्र श्लोक इति॥ ३०॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकतिप्पणयां सूत्रस्थाने आरग्वधीयो नाम तृतीयोऽध्यायः।

चतुर्थोऽध्यायः ।

वक्तव्ये भेषजचतुष्के आद्ये भेषजं निर्दिश्य द्वितीयऽन्तःपरिमार्जनं भेषजं तृतीये च बहिःपरिमार्जनमुक्ताऽधुना उभयपरिमार्जनं भेषजं विवक्षुरध्यायान्तरमारभते अथात इत्यादिना। विरेचनानां शतं विरेचनशतं षड्विरेचनशतान्याश्रित्य प्रवृत्तोऽध्यायः षड्विरेचनशताश्रितीयः। इह अस्मिन् तन्त्रे। विरेचनशतान्यत्र शरीरमलविरेचनाद् वमनविरेचने उभे एव विरेचनाख्यां लभते। यद् वक्ष्यतीहैव कल्पे "उभयं वा दोषमलविरेचनाद् विरेचनशब्दं लभते" इति। तेन समासतो वमनविरेचनयोः षट्शतानि योगानां भवन्तीत्यर्थः। विरेचनाश्रयाः वमनविरेचनयोराश्रयाणां भेषजानां संख्या क्षीरादिभेदेन षट्। पञ्चकषायशतानि कषायशब्देनात्र लवणवर्जानां मधुरादिपञ्चरसानामस्मिन तन्त्रे परिग्रहः क्रियते इति, तदाश्रयभूतत्वेन भेषजद्रव्याण्यपि कषायशब्देन निर्दिश्यन्ते। तेषां पञ्चशतानीत्यर्थः। पञ्चकषाययोनय इति लवणवर्जेन मधुरादिपञ्चरसेनेत्यर्थः। कषायकल्पनं कषायाणां निर्माणविधिः स्वरसादिभेदेन। एतानि पञ्चकषाशतानि अभिसमस्य पञ्चाशन्महाकषायेषु अन्तर्भवन्तीत्याह पञ्चाशदिति। संग्रहः उद्देशः ॥१—३॥

उद्देशक्रमेण समासार्थं विवृणोति षडिति। इह अत्राध्याये। कल्पोपनिषदि कल्पस्थानाख्ये अत्रैव ग्रन्थे। समासतः षड्विरेचनशतानि प्रतिपादयति त्रयस्त्रिंशदिति। फलेषु मदनफलेषु त्रयस्त्रिंशद् योगशतञ्च त्रयस्त्रिंशदधिकं शतमित्यर्थः। जीमूतकः पीतपुष्पो घोषकभेदः। इक्ष्वाकुस्तिक्तालाबुः। धामार्गवो घोषकभेदः 'तितधूमा' इति वंगे। कुटजश्चात्रेन्द्रयवः। कृतवेधनं श्वेतपुष्पो घोषकभेदः। श्यामा श्यामामूला त्रिवृत्। त्रिवृदित्यरुणमूलेति भेदः। अपरे दश दशाधिकं शतमित्यर्थः। चतुरंगुलं स्वर्णालुः। महावृक्षः स्नुही। सप्तला चर्मकषा। शंखिनी यवतिक्ता 'महातिता' 'कालमेघ' इति च वंगीयाः। द्रवन्ती लघुदन्ती। षण्णां विरेचनाश्रयाणां विवृतिमाह षडिति। सामान्येन क्षीरादिषु षट्स्वाश्रयेषूक्तेष्वपि अत्र मदनस्य फलं जीमूतकस्य फलं पुष्पञ्च इक्ष्वाकोः प्रवालं फलञ्च धामार्गवस्य फलं पुष्पं प्रवालञ्च कुटजस्य फलं कृतवेधनस्य फलं पुष्पञ्च श्यामात्रिवृतोर्मूलं चतुरंगुलस्य फलमज्जा लोध्रस्य मूलत्वक्, महावृक्षस्य क्षीरं सप्तलाया मूलं शंखिन्या फलं दन्तिद्रवन्त्योश्च मूलं विरेचनार्थमादेयानीत्यवधेयम् ॥ ४—६ ॥

के च कषाययोनय इत्याह पञ्चेति। लवणस्य स्वरसादिकषायासम्भवान्न तस्य कषाययोनित्वं वर्तत इत्यर्थः। कषायकल्पनमाह पञ्चविधमिति। स्वरसादीनां लक्षणान्याह यन्त्रेति। यन्त्रप्रपीडनात् शिलादिषु पिष्ट्वा वस्त्रे बद्ध्वा निष्पीडनाद् अथवा तिलपीडकादियन्त्रैः

प्रपीडनात्। रसपिष्टानां तद्रसेनैव पिष्टानाम्। क्वथितं परिभाषामानेन जलेन श्रृतम्। आपोथितात् कुट्टितात्। मृदितं हस्तादिनेति शेषः। तेषामिति यथापूर्वं पूर्वपूर्वक्रमेण बलाधिक्यं फाण्टाच्छीतस्य ततः श्रृतस्य ततः कल्कस्य ततोऽपि स्वरसस्य अधिकबलत्वं ज्ञेयमित्यर्थः। अत इति। अतः अस्मात पूर्वपूर्वस्य बलाधिक्यात् व्याध्यातुरबलापेक्षिणी व्याधिबलमातुरबलञ्चापेक्षते। उत्तमे व्याधिबले चातुरबले च स्वरसकल्पना हीने च फाण्टादिकल्पना हीनोत्तमे च कल्कादिकल्पना इत्यर्थः। एवं न सर्वाणि यानि कानि च सर्वत्र यत्र कुत्र वा उपयुज्यन्ते इत्याह न त्वेवमिति ॥ ७—८ ॥

महाकषायानाह पञ्चाशदिति। जीवनीयः जीवनीशक्तिवर्धकः। बृंहणीयः पुष्टिविधायकः। लेखनीयः ईषच्चर्मविदारकः। भेदनीयः विरेचकः। सन्धानीयः संयोजकः। दीपनीयोऽग्निवर्धकः। बल्यः बलोपधायकः। वर्ण्यः वर्णस्यौज्ज्वल्यापादकः। कण्ठ्यः वागिन्द्रियशोधकः। हृद्यः मुखास्वादवर्धकः रुचिकारक इत्यर्थः। तृप्तिघ्नः अभक्तच्छन्दनाशकः। स्नेहोपग इति स्नेहानां सर्पिरादीनां स्नेहनक्रियासु सहचरत्वेन गच्छति। पुरीषविरजनीयः शकृतो यथावद्वर्णकारकः। निग्रहणः रोधकः। उदर्दः शीतपित्तभेदः। शोणितास्थापनः आघातादिनाऽतिप्रसृतस्य शोणितस्य वेगं रुणद्धि इत्यर्थः। वेदनास्थापनः वेदनानाशकः। संज्ञास्थापनः यथावज्ज्ञानं सम्पादयतीत्यर्थः। प्रजास्थापनः बन्ध्यादिदोषानपहृत्य प्रजां जनयतीत्यर्थः। वयःस्थापनः तारुण्यादिवयो रक्षतीत्यर्थः। ततः कषायपञ्चशतानि निर्दिशति तेषामिति ॥ ९ ॥

तेषु यथाक्रमं जीवनीयमहाकषायान्तर्गतान् दशकषायानाह जीवकेति। जीवकर्षभकौ तु साम्प्रतं काकोलीक्षीरकाकोल्याविति वणिग्द्रव्येषु परिचीयेते। न तु तौ तथा। तयोर्लक्षणन्तु—"जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ। रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ ॥ जीवकः कूर्चकाकार ऋषभो वृषशृङ्गवत्।" इति। मेदामहामेदे च आर्द्रककन्दसदृशौ हिमवत्प्रभवौ कन्दाविशेषौ। यदुक्तम्—"शुक्लार्द्रकनिभः कन्दो लताजातः सुपाण्डुरः। महामेदाभिधो ज्ञेयो मेदालक्षणमुच्यते। शुक्लकन्दो नखच्छेद्यो मेदो धातुमिव स्रवेत्। यः स मेदेति विज्ञेयः ×× इति।" काकोलीक्षीरकाकोल्यौ तु शतावरीसदृशकन्दविशेषौ हिमवत्प्रभवौ। तयोर्लक्षणन्तु—"पीवरीसदृशःकन्दः सक्षीरः प्रियगन्धवान्। सा प्रोक्ता क्षीरकाकोली काकोलीलिङ्गमुच्यते। यथा स्यात्क्षीरकाकोली काकोल्यपि तथा भवेत्। एषां किञ्चिद् भवेत् कृष्णा भेदोऽयमुभयोरपि" इति। मुद्गपर्णी 'मुगानी' इति माषपर्णी 'माषानी' इति बंगे परिचीयेते। जीवन्ती स्वर्णवर्णाभः शुकविशेषः

"शालिकठेंगा" इति वंगीयाः। मधुकं यष्टीमधु। (१) क्षीरिणीति क्षीरिणी स्वर्णक्षीरी। राजक्षवको दुग्धिका। वाट्यायनी श्वेतबला। भद्रौदनी पीतबला। भारद्वाजी वनकार्पासी। पयस्या क्षीरविदारी। ऋष्यगन्धा वृद्धदारकः। (२) मुस्तेति। कटुरोहिणी कटुकी। चिरविल्वः करञ्जः। हैमवती श्वेतवचा॥ (३) सुवहेति। सुवहा त्रिवृत्। उरुवुकः एरण्डः। अग्निमुखी भल्लातकः। चित्रा दन्ती। शंखिनी यवतिक्ता। शकुलादनी कटुकी। स्वर्णक्षीरी तु "हेमवर्णं पयस्तस्या हिमवद्भूमिसम्भवा। सा नागजिह्विकाकारा तन्मूलं वणिजौषधम्॥" इति लक्षणा 'चोक्' इति हिन्दीभाषा॥ (४) मधुकेति। मधुपर्णी गुडुची। अम्बष्ठकी पाठा 'आगनति' इति भाषा। समंगा वराहक्रान्ता। मोचरसः शाल्मलीवेष्टकः। कट्फलं 'कायछाल' इति लोके। (५) शृङ्गवेरः शुण्ठी। अम्लवेतसः 'थैकड' इत्युत्तरवंगीयः फलविशेषः। अजमोदा यमानी। (६) इति षट्कः कषायवर्गः॥ १०॥

चतुष्कं कषायवर्गमाह ऐन्द्रीति। ऐन्द्री गोरक्षकर्कटी। ऋषभो शूकशिम्बी। अतिरसा शतावरी। ऋष्यप्रोक्ता माषपर्णी। पयस्या विदारी। स्थिरा शालपर्णी। रोहिणी हरीतकी। बला पीतपुष्पा वाट्यालकः। अतिबला तु श्वेतपुष्पा। (७) चन्दनेति। तुंगः पुन्नागः। पद्मकः पद्मकाष्ठम् केचित् 'पाइया' इति वंगे प्रसिद्धं काष्ठं पद्मगन्धत्वाज्जिघृक्षन्ति। उशीरं वीरणमूलम्। सिता गोरोचना। लता मञ्जिष्ठा। (८) सारिवेति। कैटर्य्यं कट्फलम्। हंसपादी मण्डूकपर्णी 'थान्कुनि' इति भाषा (९) आम्रेति। आम्रातकः 'आमड़ा' इति भाषा। निकुचं 'वनकाँठाल' इति लोके। करमर्दो 'वैंचि' इति भाषा। वृक्षाम्लं तिन्तिडी। कुवलं वृहद्बदरम्। बदरन्तु स्वल्पम्। मातुलुंगः बीजपूरकः 'विजौरा' इति हिन्दीभाषा 'बोनालेबु' इति वंगे स च दीर्घः नतोन्नतकायः मांसलः बीजबहुलश्च उत्तरपूर्ववंगे सर्वत्रोपलभ्यते। (१०) इति चतुष्कः कषायवर्गः॥ ११॥

नागरेति। मूर्वा सूचीमुखी 'कालकोङर' इति भाषा। (११) कुटजेति। अतिविषा 'आतइ' इति भाषा। धन्वयासको दुरालभा। (१२) खदिरेति। अरुष्करो भल्लातकः। आरग्वधः स्वर्णालुप्रवालम। जातिप्रवालः मालत्या नवीनं पत्रम् (१३) चन्दनेति। नलदं जटामांसी। कृतमालः स्वर्णालुप्रवालः। नक्तमालः करञ्जबीजम्। (१४) अक्षीवेति। अक्षीवः शोभाञ्जनः। गण्डारः शालिञ्चः। केवूकः 'केउताड़ा' इति भाषा। किणिही अपामार्गः। निर्गुण्डी निसिन्दारः। श्वदंष्ट्रा गोक्षुरः। वृषपर्णिका भार्गी। आखुपर्णिका 'इन्दुरकाना' इति भाषा। (१५) हरिद्रेति। सुवहा रास्ना। पालिन्दी श्यामालता। कतकः जलप्रसादनफलविशेषः 'निर्मली' इति भाषा। सिन्धुवारः निसिन्दारः।

श्लेष्मातकः बहुवारः । (२६) इतिषट्कः कषायवर्गः ॥ १२ ॥

वीरणेति । वीरणमुशीरम् । इक्षुबालिका 'खागड' इति भाषा । दर्भः उलपः । गुन्द्रा गुडुची । इत्कटः 'ओकडा' इति भाषा । कत्तृणं गन्धतृणम् । (१७) महौषधं शुण्ठी । किराततिक्ता चिरता । (१८) जीवकेति । वृक्षरुहा रास्ना । जटिला उच्चटा । कुलिंगः शिवलिंगी । (१९) कुष्ठेति । पलवालुकः 'तेजबल' इति भाषा । काण्डेक्षुः 'नटा' इति भाषा । इक्षुरकः कोकिलाक्षः । वसुकः वकपुष्पम् । (२०) इति चतुष्कः कषायवर्गः ॥ १३ ॥

मृद्वीकेति । मृद्वीका द्राक्षा । मधुपर्णी गुडुची । (२१) शोभाञ्जनेति । वृश्चीरः श्वेतपुनर्नवा । पुनर्नवात्र रक्ता । (२२) मध्विति । कोविदारः रक्तकाञ्चनारः । कर्वुदारः श्वेतकाञ्चनारः । नीपः कदम्बः । विदुलः अम्बुवेतसः । विम्बी ओष्ठोपमफला 'तेलाकुचा' इति बंगे । शणपुष्पी घण्टारवा । सदापुष्पी अर्कः । प्रत्यक्पुष्पी अपामार्गः । (२३) द्राक्षेति । काश्मर्य्यं गाम्भारीफलम् । परुषकं 'फालसा' इति भाषा । कुवलं वृहद्बदरम् । कर्कन्धुः क्षुद्रावदरी । पीलुः अश्वगोडः । (२४) त्रिवृदिति । शतपुष्पा शताह्वा । (२५) रास्नेति । अग्निमन्थो गणिकारिका । (२६) ज्योतिष्मतीति । ज्योतिष्मतीलतापुटकी । क्षवकः 'हाँचुटी' इति लोके । श्वेता श्वेतापराजिता । महाश्वेता श्वेतापामार्गः । (२७) इति सप्तकः कषायवर्गः ॥ १४ ॥

जम्ब्विति । मृत्सौराष्ट्री मृत्तिका । (२८) नागरेति । नागरं शुण्ठी । ह्रीवेरं बालकम् । (२९) शटीति । वृक्षरुहा वन्दाकः । कुलीरशृंगी कर्कटशृङ्गी । (३०) इति त्रिकः कषायवर्गः ॥ १५ ॥

प्रियंग्विति । कट्वंगः श्योनाकः । पद्मा मार्गी । (३१) जम्ब्विति । शल्लकीत्वक् शिल्हकः । कच्छुरा दुरालभा । श्रीवेष्टकः नवनीतखोटो । तिलकणा मृदिततिलतण्डुलानि । (३२) जम्ब्वाम्रेति । कपीतनः आम्रातकः । अश्मन्तकः 'लोहाचुर' इति भाषा । सोमवल्कः विट्खदिरः । (३३) पद्मेति । सौगन्धिकः जलजपुष्पविशेषः 'सुँदी' इति भाषा । (३४) वृक्षादनीति । वृक्षादनी विदारी । वशिरः सूर्य्यावर्तः । (३५) इति पञ्चकः कषायवर्गः ॥ १६ ॥

द्राक्षेति । शृंगी कर्कटशृंगी । तामलकी भूम्यामलकी । (३६) शटीति । चण्डा चोरपुष्पी । (३७) पाटलेति । काश्मर्य्यं गाम्भारी । (३८) शारिवेति । पाठा अम्बष्ठा 'आगनति' इति भाषा (३९) द्राक्षेति । फल्गुः काष्ठोदुम्बरिका । (४०) इति पञ्चकः कषायवर्गः ॥ १७ ॥

लाजेति । मधूकं 'महुआ' इति भाषा । (४१) तगरेति । तगरः पिण्डतगरः । भूतीकं यमानी (४२) तिन्दुकेति । तिन्दुकः 'गाव' इति भाषा । कदरः श्वेतखदिरः । अश्वकर्णः शालविशेषः । असनः

पीतशालः । अरिमेदा विट्खदिरः । (४३) विदारिगन्धेति । विदारिगन्धा शालपर्णी । (४४) पिप्पलीति । अजमोदा यमानी । अजगन्धा वन्ययमानी । अजाजी जीरकम् । गण्डीरः शालिश्वः । (४५) इति पञ्चकः कषायवर्गः ॥ १८ ॥

मधुकेति । रुधिरं कुंकुमम् । मृत्कपालः दग्धमृत्कपालः । (४६) शालेति । तुंगः पुन्नागः । वञ्जुलः वेतसः । (४७) हिंगुनिर्यासेति । कैटर्यः महानिम्बः । चोरकः चोरपुष्पी । वयःस्था ब्राह्मी । गोलोमी भूतकेशी । जटिला जटामांसी । पलंकषा गुग्गुलुः । अशोकरोहिणी कटुकी । (४८) ऐन्द्रीति । ऐन्द्री गोरक्षकर्कटी । शतवीर्या दूर्वा । सहस्रवीर्या श्वेतदूर्वा । अमोघा पाटला । अव्यथा आमलकी । शिवा हरीतकी । अरिष्टा कटुरोहिणी । वाट्यपुष्पी बला । विष्वक्सेनकान्ता प्रियंगुः । (४९) अमृतेति । युक्ता राम्ना । अभया हरीतकी । धात्री आमलकी । अमृता गुडुची । अतिरसा शतावरी । मण्डुकपर्णी 'थानकुनि' इति भाषा । स्थिरा शालपर्णी । (५०) इति पञ्चकः कषायवर्गः ॥ उपसंहरति इति पञ्चकषायेति । अभिसमस्य संक्षिप्य ॥ १९-२० ॥

नहीत्यादि । विस्तरस्य अतिरिक्तवाक्यस्य । बहुप्रलापे प्रमादोऽवश्यम्भावीति न तत् प्रमाणं भवितुमर्हतीत्यर्थः । न चापीति । अतिसंक्षिप्तमर्थं नाल्पबुद्धयो ग्रहीतुं समर्था इत्यर्थः । सालक्षण्यमुपमानप्रमाणम् । सालक्षण्यादित्रिविधप्रमाणज्ञो हि बुद्धिमान् इति कथ्यत इति भावः ॥ २१ ॥

नन्वत्र प्रतिज्ञाहानिर्भवति इति शिष्याणां शंकां निवेदयति एवंवादिनमिति । तानि तान्यंगानि महाकषायान्तर्भूतानि औषधद्रव्याणि संप्लवन्त पुनरप्युल्लिख्यन्त इति औषधनामगणनातो न पञ्चशतसंख्या पूर्यत इति प्रतिज्ञाहानिः। उत्तरयति नैतदेवमिति । यथा ह्येक एव मानवो द्रव्यं वहन् वाहकः सन्देशं वहन् दूत इति कार्यान्तरं च कुर्वन् अन्यां संज्ञां लभते, तथैव एकमेव कषायत्वेन निर्दिष्टं द्रव्यं कासोपशमकत्वेन कासहरमिति स्तन्यवर्धकत्वेन स्तन्यजननमिति पृथक्संज्ञां लभमानं पृथक्त्वेन पृथगिति परिचीयत इति न दोष इति निर्गलितार्थः । यद्येकेनैव द्रव्येण बहु कर्म स्यात तदा तदोपदेशः तदायत्तीकरणञ्च सुखेन भवितुमर्हत इत्याह-यदि चैकमिति । उपधारयितुमायत्तीकर्तुम् । निगदव्याख्यातमन्यत् ॥ २२-२३ ॥

अध्यायार्थं निवेदयति तत्र श्लोका इति ॥ २४-३० ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पणयां सूत्रस्थाने षड्विरेचनशतांश्रितीयो नाम चतुर्थोऽध्यायः ।

इति भेषजचतुष्कः ।

पञ्चमोऽध्यायः ।

आयुर्वेदस्य प्रयोजनन्तु व्याधितस्य व्याधिपरिमोक्षः स्वस्थस्य च स्वास्थ्यरक्षणमिति आद्येन भेषजचतुष्काख्येन अध्यायचतुष्टयेन व्याधिपरिमोक्षणार्थं भेषजसूत्रं निदिश्यावसरवशात् स्वास्थ्यरक्षणाय स्वस्थवृत्तचतुष्काख्यमध्यायचतुष्टयमारिरिप्सुरादौ शरीरस्याहारमूलत्वाद् आहारस्य च मात्राधीनत्वान् मात्राशितीयं नामाध्यायान्तरमारभते अथात इत्यादिना । मात्रया अशितं तदधिकृत्य प्रवृत्तोऽयमध्याय इत्यर्थः । मात्राशी स्यादिति आरोग्येप्सुरिति शेषः । ननु कीदृशमस्या मानमित्याह आहारेति । मात्रायास्तु निर्दिष्टं मानं न वर्णते सा च सर्वदा अग्निबलमपेक्षते । यादृग् यस्याग्निबलं मात्रा तस्य तदनुसारिणी स्यादित्यर्थः । अस्यैव विवृतिमाह यावद्धीति । हि यतः यावत् परिमाणमस्याशनं खाद्यादिकम् अशितं भक्षितं प्रकृतिं दोषत्रयस्य साम्यावस्थामनुपहत्य अविचाल्य यथाकालं यथासमयम् उत्तरखाद्यग्रहणात् प्रागेवेत्यर्थः । जरां पाकं गच्छति तस्य जनस्य तावदेव मात्रायाः प्रमाणं भवतीति वेदितव्यम् ॥ १-४ ॥

ननु गुरौ द्रव्ये मात्रापेक्षा युज्यत एव, तद्धि तूर्णं जरां नाप्नोतीति । तद्विपर्यये लघौ तु मात्रापेक्षा नैव युक्ता नेत्याह तत्रेति । तत्र तेषु भक्ष्यद्रव्येषु । शालिषष्टिकौ लघुत्वेनोपदिष्टौ शूकधान्यभेदौ । लावः 'भाडइ' इत्याख्यः पक्षिविशेषः । कपिञ्जलः गौरतित्तिरिः । एणादयो मृगविशेषाः । एते च मांसवर्गेषु लघुत्वेनोपदिष्टाः । पिष्टविकृतिः तण्डुलचूर्णादिकृतान्नम् । इक्षुविकृतिर्गुडादिः । क्षारविकृतिः कूर्चिकाकिलाटादिः । आनूपपिशितं वराहादिमांसम् । औदकपिशितं मत्स्यादिमांसम् । ननु चेत सर्वेषामेव द्रव्याणामभ्यवहारे मात्राऽपेक्ष्या स्यात्तर्हि द्रव्ये गुरुत्वलघुत्वबुद्धिर्निरर्थिका स्यात । यद्धि द्रव्यं तूर्णमेव न पच्यते तदेव गुरु विपर्य्ययश्च लघु परन्तु मात्रावद्भोजने कृते सर्वमेवान्नं समकालमेव पाकं गच्छेदिति द्रव्ये गुरुत्वलघुत्वसंज्ञा निरर्थिकैव स्यात्-नेत्याह न चैवमिति । अयमर्थः-न केवलं स्वल्पास्वल्पकालाजरागमनमेव गुरुत्वलघुत्वयोर्भेदः, यत्तु-द्रव्यं प्रकृतितो लघु तद्धि वाय्वग्निगुणबाहुल्यात् पाचकाग्निवर्धकं स्यात्, आकण्ठतो भुक्तेऽपि स्वल्पायैव दोषाय भवेत् । गुरुद्रव्यन्तु पृथिवीजलगुणबाहुल्यात् पाचकाग्निप्रत्यनीकं स्यात् आतृप्तितो भोजने तन्नाशकं भूत्वा अतिमात्रदोषायैव भवेदिति तयोर्भेदो दर्शनीयो भवति । सौहित्योपयुक्तानि आतृप्तितो भुक्तानि । अग्निसन्धुक्षणस्वभावानि तत्सामान्यादग्नेर्बलवर्धकानि । असामान्यात् विशिष्टगुणवत्त्वात् । अन्यत्र व्यायामाग्निबलादिति व्यायामेन यस्याग्निबलं विशेषतः सन्धुक्षितं तस्य जीविकार्थं सदैव परिश्रमं कर्तुर्वाहकादेः गुरूणां सौहित्येऽपि न

तद् दोषलं भवतीत्याशयः ॥ ५-६ ॥

ननु मात्रा केवलमग्निबलमेवापेक्षते न तु द्रव्यम्, नेत्याह सैषेति। सा एषा मात्रा तथाभूता अग्निबलापेक्षिणी भवती सती अपि द्रव्यं न अपेक्षते इति न अपि तु द्रव्यमपेक्षत एवेत्यर्थः। किन्तत्र प्रमाणमित्याह द्रव्यापेक्षयेति। द्रव्यमपेक्षैव गुरु-गुरुतरादिभेदेन त्रिभागसौहित्यम् आतृप्तितो भोजनमानस्य त्रिचतुर्थांशम् अर्धसौहित्यं तन्मानस्यार्धं वा अग्नेर्युक्तयर्थं यथावदग्निबलरक्षणाय उपदिश्यते—आयुर्वेदे भोक्तुमिति शेषः। वदयति चात्र "गुरूणामल्पमादेयं लघूनां तृप्तिरिष्यते" इति। सुश्रुतेऽपि "गुरूणामर्धसौहित्यं लघूनां तृप्तिरिष्यते" इति। वृद्धजीवकीये च "लघूनां नातिसौहित्यं गुरूणामल्पशस्तया" इति। अतिसौहित्यं तृप्तिमतिक्रम्य कण्ठभोजनमित्यर्थः। अतो द्रव्यमग्निबलं च वीक्ष्य मात्रावद् भोजनं भोक्तुरुपकाराय सम्पद्यत इत्याह मात्रावद्धीति। प्रकृतिमनुपहत्य विकारमनुत्पाद्य इत्यर्थः। उपयोक्तारं भोक्तारम् ॥ ७-८ ॥

भवति चात्रेति। अयं ह्यायुर्वेदविदां संहिताकाराणां समयो दृश्यते यत् पूर्वोक्तं गद्योक्तमर्थं व्यक्तिव्यवसायार्थं पुनरपि पद्यैरभिदधन्तीति। ते च श्लोकाः प्रायः पूर्वाचार्यैरभिमता इति भवति चात्रेति वाक्यविन्यासेन तान् न्यवेदयन्। अतश्चापि नात्र द्विरुक्तिशंका कार्या वदयति हि "पूर्वोक्तो यः पुनः पद्यैरर्थः समनुगीयते। तद्व्यक्तिव्यवसायार्थं द्विरुक्तं तन्न गर्ह्यते" इति। गुर्विति। तस्माद् यतो मात्राद्रव्यमपेक्षते अतः पिष्टमयादीनि द्रव्यगुरुद्रव्याणि भुक्त्वान् न खादेदिति योजना। बुभुक्षितः क्षुधितः मात्रामनुसृत्येति शेषः। गुरु द्रव्यगुरु पृथिवीसोमगुणबहुलमित्यर्थः। पिष्टमयादीनां गुरुत्वेऽपि विशेषतोऽहितकारित्वात् पृथगुल्लेखः। पिष्टमयं द्रव्यं तण्डुलादिचूर्णेन निष्पन्नं पिष्टकादिकम्। तण्डुलान् अपक्वानित्यर्थः। पृथुकान् चिपिटकान्। जातु कदाचित्। वल्लुरं शुष्कमांसम्। शुष्कशाकानि शुष्कपटोलफलादीनि। शालुकं जलजसौगन्धिकादिकन्दः। बिसं मृणालम्। नाभ्यसेद् न नित्यमुपयुञ्ज्यात्। कृशं मासं व्याध्यादिना मांसक्षीणस्य जन्तोर्मांसम्। कूर्चिकस्तक्रसहितपक्वं क्षारं 'छाना' इति भाषा। किलाटः घनीभूतं क्षारम् "मोया" इति भाषा। आमिषं मांसम्। यवकः वन्ययवः। शीलयेद् अभ्यसेत्। नित्यसेव्यत्वेनोद्दिष्टानि द्रव्याण्याह षष्टिकानिति। षष्टिको ग्रीष्मोद्भवो धान्यविशेषः। शालिधान्यन्तु हैमन्तिकमकण्डनात् शुक्लतण्डुलमिति लक्षणम्। आन्तरीक्षं पय इत्यविशेषेऽपि तत्र गांगमेवादेयम्। जांगलं मांसामिति शेषः। नित्यप्रयोगे सामान्यं विधिमाह तत्रेति ॥ ९-१३ ॥

स्वस्थवृत्तानुकूलान्याहारसूत्राणि निवेद्य विहारसूत्राण्यारभते

श्रत ऊर्ध्वमिति । सौवीरमञ्जनं 'सुर्मा' इति भाषा । पञ्चरात्रे पञ्चमदिवसे अष्टरात्रे अष्टाहे वा । कफस्याधिक्ये पञ्चाहे अन्यथा अष्टाहे रसाञ्जनप्रयोगेण नेत्रं स्राव्यमित्यर्थः । कस्मादित्याह चक्षुरिति । चक्षुषस्तेजोमयत्वाद् विशेषतस्तद्विरोधिश्लेष्मतो भयं सदव वर्तत इत्यन्तरान्तरा सञ्चितः कफो रसाञ्जनप्रयोगेण स्राव्य इत्यर्थः । स्राव्याञ्जनप्रयोगस्य विशेषविधिमाह दिवेति । तत्स्राव्यं तीक्ष्णमञ्जनम । ध्रुवं निश्चितम । नेत्रविरेचनस्य श्लेष्महरत्वात् तद् दृष्टिं प्रसादयत्येवेति दृष्टान्तेनार्थमिमं द्रढयति यथाहीति । मलिनां मलविशिष्टानां सुवर्णादीनां तैलचेलकचादिभिः तैलं प्रलिप्य चेलेन वस्त्रखण्डेन कचादिभिः वराहलोमकूर्चादिभिः धौतानां यथा निर्मला शुद्धिः । आश्च्योतनादिभिरित्यादिना पुटपाकादीनां ग्रहणम् । आश्च्योतनं नेत्रे द्रवौषधबिन्दुदानम ॥ १४—१६ ॥

धूमपानविधिमाह हरेणुकामिति । हरेणुका रेणुका । पृथ्वीका कृष्णजीरकम् । नखं नखी । ह्रीवेरं बालकम् । चन्दनमत्र श्वेतं ग्राह्यम । उशीरं वीरणमूलम । पद्मकं पद्मकाष्ठम् । ध्यामकं गन्धतृणम । मधुकं यष्टीमधु । मांसी जटामांसी । वन्यं कैवर्तमुस्तकम । न्यग्रोधो वटः । अश्वत्थः 'नाइकड़' इति वंगे । प्लक्षः चलदलः 'पाकुर' इति लोके । सर्जरसः धूपः । शैलेयः शैलजः । उत्पलं नीलोत्पलम । श्रीवेष्टकं नवनीतखोटी । शल्लकी शिलारसः । शुकवर्हः ग्रन्थिपर्णी 'गेठेला' इति भाषा । शरेषीका शरस्य पुष्पदण्डः । यवसन्निभां यववन् मध्ये स्थूलाम् । अंगुष्ठसम्मिताम् अंगुष्ठपरिणाहां वर्तिमिति योजना । अष्टांगुलसम्मष्टांगुलदीर्घाम् । विगर्भामिति शुष्कायां वर्त्यां गर्भेषीकां निष्काष्येत्यथः धूमनेत्रार्पितां धूमपानार्थं व्यवह्रियमाणे वक्ष्यमाणपरिमाणे नले निविष्टाम् । सुखां सुखकरीम् । स्वस्थवृत्तमभिप्रेत्य धूमवर्तिर्हि त्रेधा भिद्यते—प्रायोगिकी, स्नैहिकी, शिरोविरेचनिकी चेति। तासु प्रायोगिकीं वर्तिं निवेद्य स्नैहिकीमाह वसेति । युक्तियुक्तैरिति यमभिप्रेत्य वर्तिः कार्य्या तस्य प्रकृत्यादिकं विचार्य्य तत्प्रत्यनीकैर्द्रव्यैरित्यर्थः । वरौषधैः श्रेष्ठौषधैः । मधुरकैर्मधुरगणोक्तैः । शिरोविरेचनिकीमाह श्वेतेति । श्वेता श्वेतापराजिता । ज्योतिष्मती लतापुटकी । गन्धाः गन्धद्रव्याणि । आद्यशब्देन त्वगेलादीनां परिग्रहः ॥ २०-२६ ॥

धूमपानगुणानाह गौरवमिति । गौरवं शूलं शिरस एव । गलग्रहः श्लेष्मणा गलोपरोधः । स्रोतोघ्राणाक्षिदोषजः आस्राव इति योजना । स्रोतोदोषजः—कर्णास्यादिगतोर्ध्वजत्रुगस्रोतोदुष्ट्या जात इत्यर्थः । क्रिमयः शिरोगता दन्तगताश्च । श्लेष्मप्रसेकस्तु "श्लेष्मणोऽतिप्रसेकेन वायुः श्लेष्माणमस्यति ।" इति वक्ष्यमाणलक्षणः । वैस्वर्य्यं

स्वरभेदः। खालित्यमिन्द्रलुप्तम्। पिञ्जरत्वं केशवैवर्ण्यम्। पतनं च्युतिः केशानाम्। कपालानां शिरोऽस्थ्नाम्। ऊर्ध्वजत्रुजाः शालाक्यतन्त्रोक्ताः सर्वे व्याधयः। जत्रु नाम अक्षकास्थ्नोः सन्धिः। एतेनैव शिरोगतस्यापि ग्रहणात् पुनरपि तस्योल्लेखः शिरोगतानामुपक्रमवैशिष्ट्यं धूमस्यावेदयितुमित्यर्थः॥ २६-३२- ॥

प्रायोगिकधूमपानस्य युक्तकालानाह प्रयोगपाने इति। प्रयोगपाने प्रायोगिकधूमपाने। एषु वक्ष्यमाणकालेषु। के ते काला इत्याह स्नात्वेति। समुल्लिख्य वमित्वा। क्षुत्वा छिक्कान्ते। नावनान्ते नस्यकर्मान्ते। ऊर्ध्वजत्रुजारोगा इति च्छेदः। यदाह भेलः—"अष्टौ धूमस्य कालाः स्युर्यस्यान्ते यं प्रशंसति। उत्थितस्यैव शयनाद् दन्तप्रक्षालने कृते॥ जलक्रीडानिवृत्तस्य तथा भुक्तवतोऽशनम्। क्षुतोच्चारव्यवायान्ते भुक्तवान्तकृतस्तथा" इति ॥ -३२-३५ ॥

धूमपानक्रममाह तस्येति। तस्य धूमस्य आपानाः आपीयन्ते इत्यनट् कर्मणि। मुखेन नासिकया वा धूमाकर्षणानि। एवमेकस्मिन् काले त्रयस्त्रय आपानाः त्रिः त्रिवारम्। एवं त्रिवारं धूममाकृष्य त्यक्त्वा च क्षणं विश्रम्य पुनस्त्रिकारं पिबेत् एवं त्रिकृत्वः पिबेदित्यर्थः। तत्रापि कालवैशिष्ट्यमाह परमिति। परं परन्तु अह्नः कालेषु पूर्वमध्यसायाह्नेषु कालेषु मध्ये बुद्धिमान् बुद्धिपूर्वकं पित्तस्य मध्याह्नकालं वर्जयित्वेत्यर्थः। द्विकालगामी प्रातः सायाह्ने च कफवातयोः काले धूमपः स्यात् प्रयोगे इति च्छेदः। पित्ते धूमपाननिषेधन्तु परमितो वक्ष्यति। स्नैहिकधूमविषये एकं कालं सायाह्नमित्यर्थः। तस्य वातकालत्वात्। वैरेच्यन्तु धूमं दोषसञ्चयमभीक्ष्य त्रिवारं चतुर्वारं वा पिबेत् ॥ ३६-३७- ॥

धूमपानस्य सम्यगसम्यक्पानलक्षणान्याह हृत्कण्ठेति। शिरसो लघुत्वम्। यथेरितानामूर्ध्वजत्रुगतानां दोषाणां शमः शान्तिः। मूकत्वं स्वररोधः। अकाले पीतस्य अतिपीतस्य च जनस्य। तत्प्रतीकारं दोषभेदेनाह तत्रेति। तत्र धूमजे उपद्रवे यदि वायुः पित्तानुगः पित्तस्य प्राधान्यं वायोश्चानुबन्धता स्यात् तदा सर्पिषः पानं स्नैहिकं नावनादिकं स्यादित्यन्वयः। रक्तपित्ते रक्ते च पित्तानुगे शीतं पानादिकं, श्लेष्मपित्ते कफे च पित्तानुगे विरुक्षणं पानादिकं स्यादिति योजना। अकाले पानं व्याचिख्यासुः धूमानर्हानाह परन्त्विति। तु भिन्नक्रमे परमतः परम्। रक्ती स्रातसा रक्तस्रावशीलः। आमे आमाजीर्णे। पित्ते पित्तस्य काले पित्तप्राबल्ये च। क्षते उरःक्षते। स्नेहं माक्षिकञ्च पीत्वेत्यन्वयः। एषु अकालेषु मानवानां सामयिकावस्थासु इत्यर्थः। धूमविभ्रमात् अकाले धूमपानात्॥ -३७-४५ ॥

धूमपानप्रकारमाह धूमयोग्य इति। धूमयोग्यः पूर्वोक्तविरिक्तादि-

वर्जितः । शिरोघ्राणाक्षिसंश्रये दोषे यदाहि दोषा शिरआदिषु स्थानसंश्रयं कृत्वा विकारान् जनयन्ति इत्यर्थः । घ्राणेन नासिकया धूमं पिबेदित्यन्वयः । कण्ठस्थे तु दोषे आस्येन मुखेन । अत्र कण्ठ इत्येकदेशग्रहणेन सर्वेषामेव मुखरोगाणां ग्रहणं भवति । घ्राणेन नासिकया धूमं पिबन् मुखेन धूमं वमेत् परित्यजेत् । परन्तु मुखेन धूममाकृष्य न कदापि नासिकया उद्वमेत् इत्याह आस्येनेति । कस्मात् ? हि यतः प्रतिलोमं गतो धूमो हि निश्चितं चक्षुषी हिंस्यात् । नासया धूमपानस्य विधिमाह ऋज्वंगेति । अंगं चक्षुषी च ऋजु कृत्वा सूपविष्टः नासाया एकं छिद्रं पिधाय अपरे छिद्रे धूमनेत्रं संयोज्य धूममाकर्षेदित्यर्थः । त्रिपर्य्ययं त्रिरावृत्तिकालं यावत् तथा उपविष्टः सन् पिबेदित्यन्वयः ॥ ४६-५० ॥

धूमनेत्रमानादिकमाह-चतुर्विंशतिकमिति । विरेचने वैरेचनिकधूमपानार्थम् । नेत्रं नलिका । स्वांगुलिभिः पातुरंगुलिमानेन चतुर्विंशतिकं चतुर्विंशत्यंगुलायामम् । नेत्रमिष्यते इत्यन्वयः । स्नेहे स्नैहिके धूमे । प्रयोगे प्रायोगिके । अध्यर्धमिति प्रथममानापेक्षया तेन षट्त्रिंशदंगुलायाममित्यर्थः । यदुक्तं जतुकर्णेन "सार्धस्त्र्यंशयुतः पूर्णो हस्तः प्रायोगिकादिषु" इति । तस्य संस्थानमाह ऋजुवृत्ति । त्रिकोषाफलितं त्रिभंगं तिसृभिर्नलिकाभिःकृतमित्यर्थः । कोलास्थ्यग्रप्रमाणितम् अग्रे कोलास्थिमितछिद्रम् । वस्तीति वस्तिनेत्रसमं सुवर्णरूप्यादिकं द्रव्यं निर्माणद्रव्यं यस्य तत् । धूमनेत्रं धूमपानार्थं नलिका । तादृशधूमनेत्रप्रयोजनमाह दूरादिति । दूरात् हस्तादिमितप्रदेशाद् विनिर्गत आगतः । एतेन दूरादागच्छन् धूमः नोत्तापादिना मुखनासं बाधते इत्याशयः । पर्वच्छिन्न इति नेत्रस्य त्रिपर्वत्वात् प्रतिपर्वं बाधां प्राप्य धूमस्तीक्ष्णतां जहातीत्यर्थः । नाडीतनूकृतः सूक्ष्मछिद्रैरागमनात् ह्रस्वीकृतः । इन्द्रियं मुखनासं न बाधते उत्तापादिनेत्यर्थः । धूमपानस्य मात्रां विवक्षुर्योगायोगातियोगानां लक्षणान्याह यदेति । तनुतामल्पताम् । स्वरोऽविशुद्धः कफाक्रान्त इवेत्यर्थः । स्तिमितः द्रवापूरित इव गुरुः । अधिकं रक्तं स्रवते मुखनासाभ्यामिति शेषः ॥ ५१—५५ ॥

स्वस्थवृत्तमभिप्रेत्य नावनविधिमाह वर्षे वर्षे इति । वर्षे वर्षे प्रतिवर्षं प्रावृडादिषु त्रिषु कालेषु ना नरः अणुतैलमाचरेत् नावनविधिना स्वीकुर्य्यात् । दुर्दिने नावनं निषिद्धमित्याह गतमेघ इति । नावनगुणानाह नस्यकर्मेति । उपहन्यते दोषैरिति शेषः । प्रलुञ्च्यन्ते स्वयं पतिता भवन्ति । कण्डराः स्थूलाः स्नायवः । जीर्यतः जरां गच्छतः अप्यर्थोऽयं चशब्दः । उत्तमांगे शिरसि बलं न लभते तस्य बलीपलितदन्तपतनादिकं न भवतीत्यर्थः ॥ ५६—६२ ॥

अणुतैलनिर्माणविधिमाह चन्दनेति । ह्रीवेरं बालकम् । अभय-

मुशीरम् । वन्यं कैवर्तमुस्तकम् । त्वक् गुडत्वक् । सारिवा अनन्तमूलम् । स्थिरा शालपर्णी । सुराह्वं देवदारु । हरेणु रेणुका । व्याघ्री कण्टकारी । सुरभी शूकशिम्बी । शतगुणे तैलादित्यर्थः । माहेन्द्रे अम्भसि वृष्टिजले । तेन दशगुणेन कषायेन । सकृत्पाकार्थं मानमेतत् । दशकृत्वो दशवारान् तैलं पाचयेत् । समांशं समपरिमितम् । तत्र काथ्यमानं तैलाच्चतुर्गुणम् । यदुक्तं "तैलाच्चतुर्गुणं काथ्यम्" इति । स्निग्धस्विन्नोत्तमांगस्य आदौ घृतादिनाभ्यंगादिना स्निग्धं पश्चात् स्विन्नमुत्तमांगं यस्य तस्य । पिचुना तुलकेन तैलं गृहीत्वा तद्धारया त्रिभिर्नावनैरेवमहःसु वारत्रयं नस्यं दद्यादित्यर्थः । त्र्यहाद् एकाहान्तरितं कृत्वा एवं सप्ताहं सप्तदिनानि एकस्मिन्नृतौ दद्यादित्यर्थः ६३-७०

दन्तधावनविधिमाह आपोथिताग्रमिति । आपोथिताग्रं कुट्टिताग्रम् । द्वौ कालौ प्रातः सायञ्च । दन्तपवनं दन्तशोधनार्थं वृक्षशाखाग्रं 'दातन' इति भाषा । भक्षयेत् तत्कूर्चेन दन्तान् परिष्कुर्य्यादित्यर्थः । दन्तमांसान्यबाधयन् इति दन्तपवनकूर्चेन तथा दन्ता निर्घर्षणीया यथा न दन्तमांसं पीड्यते न वा ततो रक्तं स्रवेदित्यर्थः । कषायकटुतिक्तकमिति विशेषणात् करञ्जादिशाखाग्रमेव ग्राह्यमित्याह करञ्जेति । ककुभोऽर्जुनः असनः पीतशालः । एवंविधाः कषायकटुतिक्ताः बब्बुलनिम्बादयः । सुश्रुतस्त्वत्र मधुरस्याप्युपयोगमाह यथा-"कषायं मधुरं तिक्तं कटुकं प्रातरुत्थितः । निम्बश्च तिक्तके श्रेष्ठः कषाये खदिरस्तथा मधूको मधुरे श्रेष्ठः करञ्जः कटुके तथा ।।" इति (चि २४ अ)। जिह्वानिर्लेखनमाह सुवर्णेति । त्रपु सीसकम् । रीतिः पित्तलम् । अतीक्ष्णानि यथा जिह्वा आहता न भवेत् तथा कुण्ठधाराणि । अनृजूनि धनुर्वक्राणि । यच्च मलं जिह्वामूलगतं तच्च निष्कृष्येति शेषः । तेन जिह्वानिर्लेखनेन ।। ७१—७५ ।।

ताम्बूलभक्षणविधिमाह धार्याणीति । जातीफलं 'जायफल' इति भाषा । कट्टुकफलं प्रियंगुफलम् । पूगफलं गुवाकः । ताम्बूलस्य शुभं पत्रं न कीटदष्टं न वा पूतितां गतमित्यर्थः । तदात्वे तु नेदानीन्तनवत ताम्बूलभक्षणे खदिरचूर्णयोः प्रयोगआसीदित्यनेनानुप्रीयते । तयोर्व्यवहारस्तु वृद्धवाग्भटसमय एव दृश्यते-यथा—"द्विपत्रमेकं पूगश्च सचूर्णखदिरश्च तत ।।" इति (सू ३ अ) ।। ७६—७७ ।।

तैलगण्डूषफलमाह हन्वोर्बलमिति । वदनोपचयः मुखस्य पूर्णता बलिराहित्यमित्यर्थः । न शूल्यन्ते न दन्तशूलाक्रान्ता भवन्तीत्यर्थः । अम्लेन अम्लभक्षणेन न हृष्यन्ते न दन्तहर्षाक्रान्ता भवन्ति । परान् खरान् अतिकठिनानपि भक्ष्यान् भक्षयन्ति दन्तैः सञ्चूर्ण्य भक्षयितुं शकनुवन्तीत्यर्थः । शिरोऽभ्यंगगुणानाह नित्यमिति । नित्यं प्रत्यहम् । खालित्यमिन्द्रलुप्तम् । पालित्यं केशानामकालपक्वता ।

केशप्रपतनाद् विरलकेशता भवतीत्यर्थः। शिरःकपालानां शिरसोऽस्थामित्यर्थः। अमलं निर्मलम्। सुत्वगिति सु मनोरमा त्वग् यस्य तत्। सुखमनायासेन। कर्णे स्नेहसेचनगुणानाह नेति। वातोत्थाः कर्णरोगा इत्यन्वयः। मन्याहनुग्रहः मन्याग्रहो हनुग्रहश्च। उच्चैः श्रुतिः मृदुशब्दाश्रवणम्। बाधिर्यं सर्वविधशब्दाश्रवणम्॥ अंगे तैलाभ्यंगगुणानाह स्नेहेति। यथा हि मृत्कुम्भः तैलाभ्यंगाद् दृढः क्लेशसहश्च भवति, यथा च चर्म स्नेहमर्दनात्, यथा वा अक्षः शकटः उपांगाद धुरादौ स्नेहलेपनात्, तथा शरीरमपि अभ्यंगाद् दृढं सुत्वक् प्रशान्तमारुताबाधं प्रशान्ता मारुतस्य आबाधा यत्र तत् क्लेशादिसंसहश्च जायते इति योजना। अभ्यंगस्य वातविकारनाशित्वे हेतुमाह स्पर्शने इति। स्पर्शने त्वगिन्द्रिये वायुरधिकं यथा वक्ष्यति शारीरे "एकैकाधिकयुक्तानि खादीनामिन्द्रियाणि तु" इत्यादि प्रकरणेन। त्वगाश्रितं त्वग्गतम्। अभ्यंगश्च त्वच्यस्त्वचो हिताय भवतीत्यर्थः। शीलयेत् नित्यमभ्यसेत्। विकारं वायोर्विकारम्। बलकर्मणि बलसाध्ये कार्ये कृते इत्यर्थः। सुस्पर्शांगइति यस्यांगस्पर्शेन सुखानुभवो भवतीत्यर्थः। उपचितांगः पुष्टांगः। अभ्यंगनित्यत्वात् प्रत्यहमंगे तैलमर्दनात्। अल्पजरः जरा तस्यांगे बलं न लभते बल्यादिरहित इत्यर्थः॥ ७८—८६॥

पादाभ्यंगगुणानाह खरत्वमिति। खरत्वं कर्कशत्वम्। स्तब्धता अक्रियता। श्रमः स्वल्पपादव्यायामेन श्रान्तिबोधः। सुप्तिः स्पर्शज्ञानाभावः। दृष्टिः प्रसादं लभते यदुक्तं शालाक्ये—"त्रिफला घृतं मधुयवाः पादाभ्यंगः शतावरीमुद्गाः। चक्षुष्यः संक्षेपाद् वर्गः" इति। वृद्धवाग्भटे चोक्तम्—'द्वे पादमध्ये पृथु सन्निवेशे सिरे गते ते बहुधा च नेत्रे। ता अक्षणोद्वर्तनलेपनादीन् पादप्रयुक्तान् नयनं नयन्ति॥" इति (उ० १० अ०) पादयोः स्फुटनं पाददारी। शिरास्नायुसंकोचः बाह्यतः सिरादेः संकुच्यपिण्डितता॥ ९०—९२॥

सम्मार्जन्यादिना संवाहनेन च शरीरपरिमार्जनगुणानाह दौर्गन्ध्यमिति। गौरवं कायस्य गुरुताबोधः। बीभत्सान्यकारजनकत्वम्। स्नानगुणानाह पवित्रमिति। शरीरबलसन्धानं शरीरबलवर्धनम्। ओजस्करम् ओजोवर्धकम्। धौतवस्त्रपरिधानगुणानाह काम्यमिति। काम्यं कमनीयता। श्रीमत्पारिषदं श्रीमतां धनवतां परिषत्सु मण्डलीषु हितम्। शस्तं मंगल्यम्। गन्धमाल्यधारणगुणानाह वृष्यमिति। सौमनस्यं मनसः प्रीतिप्रदम्। रत्नाभरणधारणगुणानाह धन्यमिति। धन्यं धनाय हितम्। व्यसनं सर्पभूतग्रहादिनिमित्ता विपत् तस्य सूदनं नाशकम्। श्रीमत्प्रशस्तसौन्दर्य्यापादकम्। पादादिधावनगुणानाह मेध्यमिति। मलमार्गाणां गुदलिंगादीनाम्।

शौचाधानं शुचित्वसम्पादनं मृज्जलादिभिर्धावनमित्यर्थः। अभीक्ष्णशः पुनः पुनः प्रतिमलमूत्रादित्यागे इत्याशयः। केशादीनां छेदनगुणानाह पौष्टिकमिति। पौष्टिकं पुष्टिवर्धनम्। शुचि पवित्रम्। रूपविराजनं रूपप्रकाशकम्। कल्पनं नरसुन्दरेण यथा कालं छेदनम्। यदुक्तं "त्रिःपक्षान्निर्वपेत्" इति। संप्रसाधनन्तु केशस्य कंकतिकादिभिः मलं संशोध्य साधु बन्धनम् श्मश्रुगुम्फादीनां च सुन्दरतापादनम्। नखस्य च अलङ्कादिना रञ्जनम्। आदिपदेन कक्षलोमादीनां परिग्रहः क्रियते। पादत्रपरिधानगुणानाह चक्षुष्यमिति। चक्षुष्यं चक्षुषोर्हितम्। पराक्रमे अधिकभ्रमणे सुखं सुखकरम्। व्यसनं पादयोराघातादिना विपत्। छत्रधारणगुणानाह ईतेरिति। ईतिर्विधमनम् आकस्मिकविपद्वारणम्। गुप्त्यावरणशंकरमिति गुप्तिः शिरआदीनां लोष्ट्राद्याघातादक्षणम् आवरणं सूर्यकिरणादिभ्य इत्यर्थः। शंकरं मंगलकरञ्चेत्यर्थः। दण्डधारणगुणानाह स्खलत इति। स्खलतः पादभ्रंशात् भूमौ पततः जनस्य संप्रतिष्ठानं पतनवारकम्। अवष्टम्भनमाश्रयः ॥६३—१०१॥

यथा हि नागरिकैर्नगरस्य हिताय रथिभिश्च रथरक्षणाय प्रयतितव्यं वयोरुपघाते नागरिकादेरपि हानिर्जायेत तथैव शरीरिभिरपि स्वशरीररक्षायामवहितैर्भवितव्यमित्याह नगरीति। नगरी नगरवासी मानवः। कृत्येषु आहार विहारादिषु। कर्तव्यत्वेनात्र प्राचीनसंवादमाह भवति चात्रेति। वृत्त्युपायान् जीविकार्थं कर्तव्यान् धर्माविगर्हितान् स्वस्वजात्युक्तान् इत्यर्थः। शमं निवृत्तिम् ॥१०३—१०४॥

अध्यायं समापयति तत्र श्लोकाइति। निगदव्यख्यातमन्यत् ॥ ॥ १०५—१११ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पणयां श्लोकस्थाने मात्राशितीयो नाम पञ्चमोऽध्यायः ॥

षष्ठोऽध्यायः ॥

सत्स्वपि भोजनादिषु मात्रावत्सु ऋत्वसात्म्याहारविहारौ हितावपि न हिताय सम्पद्येते इति स्वस्थवृत्तमभिप्रेत्य ऋतुचर्य्यां व्याचिख्यासुरध्यायान्तरमारभते अथात इत्यादिना। सम्यज्ज्ञानपूर्वकमृतुसात्म्याहारविहारं कुर्वत एव स्वास्थ्यमनुवर्तत इत्याह तस्येति। यस्य चेष्टाहारव्यपाश्रयं कर्मेति शेषः। ऋतुसात्म्यमृत्वनुकूलं विदितं ज्ञातं तस्य अशिताद्यात् खादितादिभेदेन चतुर्विधादाहारात् बलं वर्णश्च वर्धते स्वास्थ्यमनुवर्तते इत्यर्थः ॥ १—३ ॥

ऋतुज्ञानमन्तरेण तत्सात्म्यज्ञानं न सम्भवतीति कृत्वा आदावृतून् विभजते इहेति। इह अस्मिन् भारते वर्षे अन्यत्र षड्ऋतुविभागो नैवंविधो वर्तत इति ज्ञेयम्। षड्ऋतुसमुदायरूपं संवत्सरं षडंगसमु-

दायं शरीरमिवेति षड्भिः ऋतुभिः षडंगं विद्यात् । तच्च षडंगम आदित्यस्य सूर्यस्य उदगयनम् उत्तरायणम् । तस्यैव सज्ञान्तरम् आदानं शिशिरादीन् ग्रीष्मान्तान् शिशिरवसन्तग्रीष्मान् त्रीनृतून् व्यवस्येत् जानीयात् । वर्षाशरद्धेमन्तान् पुनर्दक्षिणायनमादित्यस्य, तस्यैव संज्ञान्तरं विसर्गं व्यवस्येदित्यन्वयः ॥ ४ ॥

आदानविसर्गाविति संज्ञाकरणतात्पर्य्यं विवक्षुः विसर्गस्तु बलवर्धकत्वात् स्वास्थ्यानुकूल इति क्रमं हित्वा आदौ विसर्गं व्याचष्टे विसर्ग इति । विसर्गे विसर्गाख्येषु ऋतुषु । इतरे अतिरुक्षा इत्यर्थः । सोमः शिशिरकरश्चन्द्रः । अव्याहतबलमिति प्रतिकूले सूर्ये कालप्रभावात् प्रतिहतप्रतापे शशिनो बलाधिको भवतीत्यर्थः । शश्वत् उत्तरोत्तरम् । जगत् पृथिवीस्थं वस्तुजातम् आप्याययति पोषयति तेषां बलाधिक्यमापादयतीत्यर्थः । सौम्यः सोमगुणबहुलः । पुनः पक्षान्तरे सूर्यस्य अव्याहतप्रतापाद् आदानमाग्नेयमग्निगुणबहुलं भवतीति शेषः। तौ एतौ वाय्वर्कौ वायोः रौक्ष्यादर्कस्य चौष्ण्याद् आदान कर्तारौ । सोमश्च सोमगुणाधिक्याद् विसर्गकर्ता इति पृथङ्निर्देशः । कालस्वभावमार्गपरिगृहीताइति कालस्वभावेन पृथङ्मार्गमाश्रिताः । इह हि भारते सूर्याचन्द्रमसोरुत्तरायणे मनाक्समीपवर्त्तित्वात्तौ अधिकतरं औष्ण्यं शैत्यञ्च वितरतः पुनर्दूरवर्तित्वाद् दक्षिणायने ततोऽल्पतरमिति ज्ञेयम् । तौ हि कालस्वभावेन संवत्सरात् दक्षिणे मकरक्रान्तिं यावत् उत्तरे च कर्कटक्रान्तिं यावद् गच्छतः । एवं तौ कालस्वभावादेव मार्गं परिगृह्णीतः इति सूर्य्यस्योत्तरायणशेषे औष्ण्याधिक्यम् एवं दक्षिणायन शेषे च औष्ण्याल्पता स्यात् । एवं चन्द्रमसोऽपि गतिभेदेन स्यात् । वायोरपि कालस्वभावेनैव उत्तरादिदिक्चतुष्टयात् प्रवहणेन रौक्ष्याधिक्यमल्पता वा स्यात् इति तात्पर्यम् । तत्र वर्षादिहेमन्तेषु प्रायशो वायोः पूर्वोत्तराभ्यां दिग्भ्यां प्रवाहात् तस्य स्निग्धत्वं शिशिरादिषु ग्रीष्मान्तेषु च प्रायः पश्चिमदक्षिणवाहित्वेन च तस्य रौक्ष्यं ज्ञेयम् । यदुक्तं सुश्रुते वातगुणप्रकरणे–"पूर्वः सुमधुरः स्निग्धः" इति "दक्षिणो मारुतः××विशदोरूक्षः परुषः" इति "पश्चिमो मारुतः × × शोषणस्तु शरीरिणाम्" इति "उत्तरो स्निग्धः" इति च । एवमर्कादीनां सर्वेषामेव कालस्वभावादेवास्मिन् भारते पृथङ्मार्गपरिग्रहो युज्यत एवेत्यर्थः । तथैव पृथङ्मार्गपरिग्रहादेव ते कालादीनां निर्वृत्तिप्रत्ययभूताः उत्पत्तेः कारणस्वरूपाः इत्युपदिश्यन्ते पूर्वाचार्य्यैरिति शेषः । अत्र कालपदमृतोर्विशेषणम् । नाऋर्या आर्तवव्यवच्छेदार्थमित्यर्थः । न खल्वखण्डकालस्य नित्यत्वेन निर्वृत्तिः सम्भवति । रसादीनां निर्वृतिः क्रमशो दर्शयिष्यते ॥ ५ ॥

अर्थमेनं विशदयति तत्रेति । तत्र आदानकाले भाभिः उत्तरा-

यणत्वात्तीक्ष्णाभिरित्यर्थः । जगतः स्नेहमाददानः तीक्ष्णैः किरणैः स्नेहांशं वाष्पीकृत्योर्ध्वं प्रेरयन्त इत्यर्थः । तीव्ररुक्षा अतिरुक्षा वायवश्च स्नेहं शोषयन्तः अतिरुक्षत्वात् जगतः स्नेहांशान् आकर्षन् अन्यत्र क्षिपन्त इत्यर्थः । यथाक्रमं शिशिरे तिक्तरसं वसन्ते कषायं रसं ग्रीष्मे च कटुकं रसमभिवर्धयन्तः आहारेषु तत्तद्रसवद्द्रव्याधिक्यं जनयन्त इत्यर्थः । तत्र नराणां रवितापाद् रूक्षवायुसंसर्गाच्च शरीरस्नेहसंक्षयात् तथा तिक्तादिकर्शकद्रव्याभ्यवहारबाहुल्येन दौर्बल्याधिक्यं भवतीति ज्ञेयम् ॥ ६ ॥

एवं विसर्गे नृणां बलोपचयं प्रतिपादयति वर्षेति । दक्षिणाभिमुखे इति यद्यपि वर्षासु सूर्यस्य विषुवरेखात उत्तरवर्तित्वेन नोष्णतायां अतिह्रासः सम्भवति तथापि अत्युष्णस्वभावात् क्रमशो हीनो भवतीत्यर्थः । कालेति । कालमार्गेण कालानुसारिदक्षिणमार्गपरिग्रहेणेत्यर्थः । मेघेन सदैवाम्बरानद्धतया अर्ककिरणप्रतिरोधकेन इत्यर्थः । वातेन च स्निग्धशीतेन वर्षया सदैव धारापातेन अभिहतः व्याहतः प्रतापः उष्णता यस्य तस्मिन् तथाभूते अर्के सति । अव्याहतबले शशिनि तत्प्रत्यनीकस्य सूर्यस्य तापह्रासादित्यर्थः । जगति पृथिवीस्थद्रव्यसमूहे । महेन्द्रसलिलेन वृष्टिजलेन प्रशान्तः सन्ताप उष्मा यस्य तथाभूते सति । यथाक्रममिति वर्षायामम्लस्य शरदि लवणस्य हेमन्ते च मधुरस्य चातिवृद्धिर्भवतीत्यर्थः । अत्र हि विसर्गे स्निग्धवातादिसंसर्गात्तथा गुरुत्वाद् बृंहणानां मधुरादीनां रसानामुपयोगबाहुल्यमेव मानवानां बलाभिवृद्धिकारणं भवतीति ज्ञेयम् ॥ ७ ॥

अत्र सबल्यदौर्बल्ययोः प्रकर्षापकर्षावृतुभेदात् समासतो निर्विवेदयिषुः प्राचां संवादमाह भवति चात्रेति । विसर्गादानयोरादावन्ते च विसर्गस्यादौ वर्षायाम् आदानस्य चान्ते ग्रीष्मे नृणां दौर्बल्यं चरमदौर्बल्यं विनिर्दिशेदिति सम्बन्धः । तयोर्मध्ये शरदि वसन्ते च मध्यबलं शरदि आरोहप्रथया वसन्ते चावरोहप्रथया ज्ञातव्यम् । विसर्गस्यान्ते हेमन्ते आदानस्य चाग्रे शिशिरे श्रेष्ठमुत्तमबलं विनिर्दिशेत् नृणामिति शेषः । एतेनादानस्यान्तिमे भागे ग्रीष्मे मानवानां चरमदौर्बल्यमायाति ततः क्रमशो विसर्गे वर्षादितः बललाभः तस्य शेषे हेमन्ते च चरमबललाभः तत आदानप्रथमात् शिशिरात् क्रमशो बलक्षयः स्यादित्यर्थः ॥ ८ ॥

ऋतुविभागान् व्याख्याय तत्र तत्र ऋतौ ऋतुसात्म्यान् आहारविहारान् विवक्षुरुत्तमबललाभकालात् हेमन्तादारभते शीत इति । शीते शीतप्रधाने काले बलिनां विसर्गान्तिमस्वभावाद् उत्तमबलवतां बली पक्ता जाठराग्निः । पुनश्च शीतानिलस्पर्शसंरुद्ध इति शरीरोष्मा हि सतत बहिर्निर्गच्छत्स्वभावोऽपि शीतानिलस्पर्शेन संरुद्धः कुम्भकार-

पयनन्यायेन बहिर्निर्गन्तुमसमर्थोऽन्तर्ज्वालाधिक्यमापादयन् इत्यर्थः। मात्राद्रव्यगुरुत्वम इति मात्रातो द्रव्यतश्च गुरोर्द्रव्यस्य पाके योग्यो भवतीति शेषः। स तादृग् बलवान् पाचकाग्निः यदा युक्तं परिमितम् इन्धनमाहाररूपं न लभते तदा रसमिति देहधातुं हिनस्ति शोषयति। ततः धातुक्षयात् वायोः प्रकोपः। प्रकोपे हेत्वतरं दर्शयति शीते इति। शीतो हि वायुः शीतगुणसामान्याद् हेमन्ते वर्धमानः प्रकुप्यति। यदुक्तं "सामान्यं वृद्धिकारणम्" इति। तुषारसमये शीताधिके इत्यर्थः। ऋतुव्यापदि शीतालपतायां नेयं व्यवस्था युक्तियुक्ता इति ज्ञापयितुं तुषारसमये इत्युक्तम। स्निग्धानि इति अतिस्निग्धत्वेन मधुररसस्य परिग्रहः क्रियत इति मधुराम्ललवणान् स्निग्धान् रसानुपयोजयेदिति सम्बन्धः। मेद्यानां मेदोबहुलानां मांसानाम्। मेध्यानामिति पाठे पवित्राणामुच्चवर्णैर्भक्ष्याणामित्यर्थः। औदकं मांसं मत्स्यादि। आनूपन्तु वराहादि। विलेशयानां शशकशल्लकयादीनाम्। प्रसहानांमुत्क्रोशादीनाम्। भूतानि मांसानि। सीधुर्मद्यविशेषः 'भिनिगार' इति पाश्चात्याः। अनुपानार्थं मद्यादीनामन्यतमं गृह्णीयादित्यर्थः। एतदनुपानं मांसाशिनामेव ज्ञेयम्। गोरसान् क्षीरं क्षीरविकृतिश्च। इक्षुविकृतीर्गुडादयः। नवोदनं नूतनतण्डुलकृतान्नम्। उष्णं तोयमभ्यस्यतः स्नानपानादौ सातत्येनाभ्यवहरतः। हेमन्तसात्म्यान् विहारानाह अभ्यंगेति। उत्सादनं हरिद्रादिचूर्णेन शरीरघर्षणम्। जेन्ताकः उष्णगृहे वासरूपः स्वेदः। आतपं रौद्रम तच्च पृष्ठेन भजेदित्यर्थः। भूमिगृहं भूमेरभ्यन्तरस्थं गृहम्। गर्भगृहमपरैर्गृहैरावेष्टितं गृहम्। संवृतमुष्णेन वस्त्रादिना वृतम्। प्रावारः स्थूलं कार्पासवस्त्रम्। अजिनं सलोमचर्मनिर्मितमाच्छादनम्। कौषेयं कोषकारसूत्रनिर्मितं 'रेशम' इति भाषा। प्रवेणीकुत्थके कम्बलविशेषौ। गुरूष्णवासा गुरु च उष्णं च वासो यस्य सः। गुरुणा घनेन अगुरुणा घृष्टागुरुपंकेन दिग्धांगः लिप्तांगः। समदमन्मथः जातकामः। उदमन्थम् उदकप्रधानं मन्थम्। मन्थश्च "शक्तुभिःसर्पिषाभ्यक्तैः शीतवारिपरिप्लुतैः। नात्यच्छो नातिसान्द्रश्च मन्थ इत्यभिधीयते।" जलप्रधानो मन्थः शीतेऽव्यवहार्य्यः। इक्षुदाडिमादिरसकृतमन्थस्तु सेव्य इत्यर्थः॥ १८॥

शिशिरचर्य्यामाह हेमन्ते इति विशेषणम् आधिक्यम्। शिशिरे रौक्ष्यम् आदानजम् आदानारम्भात् शीतश्च मेघमारुतवर्षजम् आधिक्येन भवतः। निवातं बहिर्वातप्रवेशायोग्यम्। शिशिरे वर्ज्यान्याह कट्वितिः॥ १९—२१॥

वसन्तचर्य्यामाह वसन्त इति। निचितः शीतवातादिना सञ्चितः। दिनकृद्भाभिः सूर्य्यकिरणैः पूर्वस्मात तीक्ष्णैरित्याशयः। ईरितः

प्रकुपितः। कायाग्निं जाठराग्निं बाधते तत्प्रत्यनीकत्वादित्यर्थः। रोगान् श्लैष्मिकानित्यर्थः। वमनादीनि श्लेष्महराणि कर्माणि। गुर्वादिवर्जनं पुनः श्लेष्मसञ्चयभयादित्यर्थः। सुखाम्बुना ईषदुष्णेन जलेन शौचविधिं स्नानादिकम्। शीलयेत् नित्यं कुर्यात्। कुसुमागमे वसन्तकाले। शरभैणौ मृगविशेषौ। तयोः शशस्य च मांसम्। लावः 'भारइ' इति भाषा। कपिञ्जलो गौरतित्तिरिः। निगदं दोषरहितम्। सीधुमिक्षुरसकृतं मद्यम्। माध्वीकं मधूकपुष्पोद्भवं मद्यम्। अनुभवेदित्युक्त्या न मैथुननिषेधः नापि च शिशिरवदतिसेवा इति ज्ञेयम्॥ २२—२६॥

ग्रैष्मिकविधिमाह मयूखैरिति। मयूखैः तीक्ष्णैः किरणैः। स्निग्धं स्नेहयुक्तम्। पेपीयते अत्यर्थमाकर्षति वाष्पीकृत्योर्ध्वं नयतीत्यर्थः। भजन् भोजनं कुर्वन्। न सीदति न रोगभाक् न वा दुर्बलो भवतीत्यर्थः। सुबहूदकं मद्याच्चतुर्गुणमष्टगुणं वा जलं संमिश्र्य मांससात्म्यो अनुपिवेदित्यर्थः। दिवा शीतगृहे रौद्रादिसम्पर्करहिते सर्वनिम्नतले हर्म्ये। निशि च हर्म्यमस्तके चन्द्रांशुशीतले इति निरावरणे इत्यर्थः। प्रवाते प्रवहमानवाते। चन्दनोदकशीतलैरिति चन्दनोदकं तालवृन्ते संसिच्य शीतलीकृत्येत्यर्थः। व्यजनैः तालवृन्तादिभिः। पाणिसंस्पर्शैः श्यामांगनाया इति शेषः। आस्यां भजेत् उपविष्टस्तिष्ठेत्। मणिभिः चन्द्रकान्तादिभिः। शीतानीति काननादित्रयाणां विशेषणम्॥ २७—३२॥

वार्षिकं विधिमाह आदानेति। आदानदुर्बले आदानस्यान्तिमे ऋतौ दौर्बल्याधिक्यं भवतीति प्रागेवोक्तम्। देहदौर्बल्याज्जाठराग्निरपि दुर्बलो भवति एककारणत्वात्। पुनरपि अनिलादीनां दोषत्रयाणां दूषणैः बाध्यते आक्रम्यते। दोषत्रयप्रकोपे हेतुमाह भूवाष्पादिति। भूवाष्पो हि प्रभावादेव दोषत्रयं प्रकोपयति। मेघनिष्यन्दश्च शैत्याद् वातकफप्रकोपकः। जलस्य च अम्लाद् विपाकात् पित्तस्य कोपः। पवनादयः क्षुभ्यन्ति इत्युक्त्या पवनस्य प्राधान्यं निर्दिशति। साधारणो विधिः त्रिदोषहरं विधानम्। अवश्यायं शिशिरम्। वर्षासु वातैः सततप्रवहमानप्राग्वातैर्वर्षया वृष्टिधारया च आकूले अत एव विशेषशीते अहनि दिवसे अनिलशान्तये व्यक्ताम्ललवणस्नेहं भोज्यं भोक्तव्यम्। अग्निं संरक्षणवता पुनरपि गुर्वादिभोजनेन यथा अग्निर्मन्दतरो न भवेत्तथा कुर्वतेत्यर्थः। संस्कृतैः यूषैः मुद्गादियूषैः। अनुपानार्थं क्षौद्रान्वितमल्पं तप्तशीतं माहेन्द्रं वृष्टिजलं कौपं सारसं वा अम्बु मांससात्म्यो वा अल्पं माध्वीकारिष्टं पिबेत्। प्रघर्षः तण्डुलचूर्णादिना शरीरघर्षणम्। उद्वर्तनम् उत्सादनम्। क्लेदि पंकादियुक्तं सद्वासिक्तं वा तद्वर्जितं स्थानं भजेत् शुष्के पक्वेष्टकानिर्मिते वा स्थाने वसेदित्याशयः॥ ३३–४०॥

शारदविधानमाह वर्षाशीतेति। वर्षाकालीनशीतेनाभ्यस्ताङ्गानां नृणां सहसा अर्करश्मिभिः शरदि नभसो वैमल्यात् सूर्यकिरणानि हि खरतराणि भवन्ति तैः तप्ताङ्गानामाचितं सञ्चितं पित्तं प्रायः ऋतुसात्म्याहारविहाराणां

हि न पित्तसञ्चयो भवतीति न सर्वत्र पित्तप्रकोपो भवेदित्याह प्राय: इति। सुप्रकांक्षितै: विशेषत: क्षुद्वद्भि:। घनात्यये शरदि। धाराधरात्यये गतमेघे प्रव्यक्ते शरदि इत्यर्थ:। उरभ्रो मेष:। अवश्यायं शिशिरम्। दिवेति अत्र सूर्य्याचन्द्रमसोरुल्लेखादेव दिवारजन्यो: परिग्रहेऽपि तयो: पुनरुल्लेख: सर्वं दिवसं सर्वां वा रजनीं व्याप्य गतमेघत्वं ज्ञेयम्। कालेन शरत्कालेन तत्स्वभावेन पक्वं निर्दोषं वर्षाजलस्य नानादोषसंमिश्रणादामत्वम्। हंसोदकमिति शारदोदकस्य संज्ञा। अत्र स्नानमिति उद्धृतजलेन बोद्धव्यम्। अवगाहशब्दाज्जले प्रविश्य स्नानमिति न पुनरुक्ति:। प्रदोषे निशामुखे ॥ ४१–४८ ॥

ऋतुसात्म्यमुपसंहरति इत्युक्तमिति। ऋतुसात्म्यप्रसंगेन प्रतिपुरुषसात्म्यमोकसात्म्यसंज्ञमाह उपशेते इति। औचित्यान् नित्याभ्यासादित्यर्थ:। उपशेते अपथ्यमपि नित्याभ्यवहाराद् विकारं नोत्पादयति इत्यर्थ:। देशसात्म्यमामयसात्म्यञ्च व्याचष्टे देशानामिति। देशानामानूपादीनां गुणै: स्नेहगुरुत्वादिगुणै: विपरीतगुणं रौक्ष्यलघुत्वादिगुणयुक्तमाद्यमाहारमौषधञ्च चेष्टितं विहारञ्च सात्म्यमिच्छन्ति। एवमामयानामपि ज्ञेयम्। अत्रामयपदेन तेषां हेतवोऽपि ग्राह्या:। यदुक्तं वृद्धवाग्भटेन—"हेतुव्याधिविपरीतैर्विपरीत्यर्थकारिभिश्च औषधाहारविहारै: सुखानुबन्ध:। स च व्याधिसात्म्यसंज्ञ:" इति ॥ ४९—५० ॥

अध्यायं समापयति तत्र श्लोक इति। अतिरोहितार्थमन्यत् ॥ ५१ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थानें तस्याशितीयो नाम षष्ठोऽध्याय: ॥

सप्तमोऽध्याय: ॥

वक्तव्ये स्वस्थवृत्तचतुष्के प्रागध्यायद्वितयेनाहाराश्रितं स्वस्थवृत्तं निरवशेषतो विहाराश्रितञ्च किञ्चित् निवेद्य विहारात्मकमन्यदपि स्वस्थवृत्तं विवक्षुरध्यायान्तरमारभते अथात इत्यादिना। तत्रादावाहारादनन्तरं शरीरचेष्टाश्रयौ कर्तव्याकर्तव्यौ निवेदयति न वेगानिति। जातान् उदीर्णान् सद्य उपस्थितान् इत्यर्थ:। रेतस इति शुक्राधाराच्च्युतस्येत्यर्थ:, नतु कामस्य तस्य तु स्त्रीभोगेति परस्ताद् धारणीयत्वेन वर्णितत्वात्। वातस्य अधोवातस्य। वाष्पस्य नेत्रजलस्य। श्रमेण नि:श्वासस्य श्रमजक्षुद्रश्वासस्य ॥ १–४ ॥

प्रकरणगतत्वाद् यद्वेगधारणेन ये व्याधय: स्युर्ये च तेषामुपक्रमास्तान् यथाक्रमं निवेदयति एतानिति। चिकित्सार्थं चिकित्सासूत्रमित्यर्थ:। मूत्रवेगधारणाद् व्याधीन् उपक्रमञ्चाह वस्तीति। वस्तिपदेनात्र मूत्राधार एव लक्ष्यते, न तु मूत्राशय:। मेहनं मेढ्रम्। विनामो नलगात्रता कटिवक्रतेत्यर्थ:। वंक्षणानाह: वंक्षणौ वस्तेरुभयपार्श्वौ तत्र आनाह: बन्धनवत्पीडा। सर्पिषश्चावपीडकमिति–प्राग्भक्तं ह्यस्तनेऽन्ने जीर्णे च घृतस्य श्रेष्ठया मात्रया पानम्। प्राग्भक्तस्नेहे योजना ह्यस्तनेऽन्ने जीर्णे च घृतस्योत्तमया मात्रया पानमुभय-

मेतद् अवपीडकमुच्यते यदुक्तवृद्धवाग्भटे—"मूत्रजेषु तु पाने च प्राग्भक्तं शस्यते घृतम् । जीर्णान्तिकं चोत्तमया मात्रया योजनाद्वयम् ॥ अवपीडकमेतच्च संज्ञितम्" इति ॥ त्रिविधं वस्तिकर्म आस्थापनमनुवासनमुत्तरवस्तिश्चेति । मलवेगस्य धारणफलं तत्क्रमश्चाह पक्वाशयेति । अत्र पक्वाशयपदेन पक्वाशयैकदेशस्य स्थूलान्त्रस्य ग्रहणम् । अथवा सर्वमेव पक्वाशयस्थानं गुदास्थिविवरं व्याप्य शूलं भवति । वातवर्चोनिरोधनम् अधोवातस्य मलस्य चाप्रवृत्तिः । पिण्डिकेति जंघामध्ये यत्स्थूलं मांसपिण्डं तस्य संज्ञा, तस्य उद्वेष्टनं रज्ज्वादिवेष्टनवत् पीडा । आध्मानं वायुनोदरपूर्त्तिः । अवगाहोऽत्र अवगाहस्वेदः । वर्त्तयः फलवर्तयः । प्रमाथि वातवर्चोऽनुलोमनम् ॥ ५–९ ॥

सोपक्रमं शुक्रवेगनिरोधजमाह मेढ्रे इति । अंगमर्दः गात्रवेदना । विबद्धं मूत्रमिति मूत्रस्य विबन्ध इत्यर्थः । अभ्यङ्गो वाय्वनुलोमकतैलादिना मेढ्रादिष्वित्यर्थः । अवगाहो वाय्वनुलोमककषाये उष्णे आनाभिमज्जनम् । वातनिग्रहजं सोपक्रममाह वातेति । वातादीनां सङ्गः विबद्धता । ध्मानमुदराध्मानम् । रुजा जठरे इति योजना । क्लमोऽनायासकृतः श्रमः । वातानुलोमनमिति स्नेहस्वेदादि सर्वत्रान्वीयते । क्लीवाक्लीवयोर्वातुकञ्च इति शब्दस्मृतेरनुशासनात् क्लीवैकत्वम् । शस्तं हितम् ॥ १०–१३ ॥

छर्दिनिग्रहजं सोपक्रममाह कण्डूविति । कोठो वरटीदष्टसंकाशः शोथः । व्यंगः कपोले श्यावमण्डलोत्पत्तिः । हृल्लासो विवमिषा । भुक्त्वा प्रच्छर्दनं कफोत्क्लेशिभोज्यं भुक्त्वा ततो वामकयोगेन वमनम् । छिक्काया वेगधारणफलं सप्रतिकारमाह मन्यास्तम्भ इति । अर्दितमन्यास्तम्भौ वातव्याधिषूद्दिष्टौ । अर्धावभेदकः अर्धशिरसि वेदनाविशेषः । इन्द्रियाणामूर्ध्वजत्रुगाणामित्यर्थः । क्षवथुश्छिक्का । ऊर्ध्वजत्रुके जत्रोरत्नकास्थिसन्धेरूर्ध्वमाश्रिते व्याधौ । वातघ्नमिति सर्वत्र स्वेदादिष्वन्वीयते । नावनं नस्यम् । आद्यं भोज्यम् । औत्तरभक्तिकं भोजनानन्तरम् । घृतं घृतपानम् । उद्गारनिरोधजं सोपक्रममाह हिक्केति । हृदयोरसोः हृत्पिण्डफुप्फुसयोः । विबन्धो बन्धनवत् पीडा 'खिलधरा' इति वंगीयाः । जृम्भावेगरोधजं सप्रतिकारमाह विनामेति । आक्षेपः मुहुर्मुहुरंगानामाक्षेपणम् । संकोचः अंगानां वक्रता । सुप्तिः स्पर्शज्ञानहीनता । कम्पस्तु सर्वशरीरस्य । प्रवेपनन्तु शिरस एवेति भेदः । क्षुद्वेगधारणजं सोपक्रममाह कार्श्यमिति । भ्रमः शिरोघूर्णनम् । पिपासानिग्रहजं सभेषजमाह कण्ठास्येति । तर्पणं द्रवेणालोडिता लाजशक्तवः । अश्रुवेगनिरोधजमाह प्रतिश्याय इति । भ्रमश्चक्रारूढस्येव शरीरघूर्णनम् । निद्रावेगविधारणजानाह जृम्भेति । अक्षिगौरवम् अक्ष्णोरुन्मीलने गुरुताबोधः । संवाहनं पाणिना पादादिषु सुखमुन्मर्दनम् । श्रमजश्वासनिरोधजमाह गुल्मेति । सम्मोहो मूर्छा ॥ १४–२५ ॥

अधारणीयवेगसाहचर्य्येण धार्य्यान् वेगानाह इमानिति । इह अस्मिन् जन्मनि प्रेत्य परस्मिंश्च । अशस्तानामिति साहसादिषु सर्वत्रान्वीयते । साहसः

शक्त्यतिरिक्त: श्रम:। यद्यप्यशस्तेषु मनोवाक्कायकर्मसु सर्वेषामेव साहसादीनामन्तर्भावो भवति तथापि तेषां प्रभूतानिष्टजनकत्वेन पृथङ्निर्देशो न दोषावहो भवति। अहितमनोवाक्कायजव्यापाराणां प्रज्ञापराधाख्यानां सर्वव्याधिनिदानत्वेन तेषां वेगा धारणीया एवेति बोध्यम्। लोभ: परद्रव्यादिग्रहणेच्छा। शोक: धनबान्धवादिक्षयजन्यं मनोदैन्यम्। भयम् अहितं मे भवेदित्याशंका। क्रोध: परपीडायामुत्तेजना। द्वेष: परापकारेच्छा। मान: अहङ्कार:। जुगुप्सितं परनिन्दनम्। नैर्लज्जं लज्जाभाव:। ईर्ष्या परोन्नत्यसहिष्णुता। अतिराग: अत्यासक्ति:। अभिध्या परस्वविषयकस्पृहा। परुषस्य कर्कशस्य। अतिमात्रस्य मात्रातिरिक्तस्य। सूचकस्य परानिष्टाभिधायकस्य। अनृतस्य मिथ्याया:। अकालयुक्तस्य यदा यद्वाक्यमप्रयोज्यं तत्कथनस्य। परपीडा—परदु:खनिमित्तीभूता। देहप्रवृत्तिरात्मकर्म। स्त्रीभोगेत्यादि तस्यैव विवरणम्। स्त्रीभोग: परदारगमनम्। स्तेय: परद्रव्यग्रहणं विनानुमत्या। हिंसा अविधिपूर्वकं प्राणिहननम्। विपापत्वात् विगतपापत्वात्। पुण्यशब्द: पुण्यात्मा इति ख्यात:। चिनोति उपार्जयति॥ २६-३०॥

विहारान्यतमस्य व्यायामस्य विधानमाह—शरीरेति। या चेष्टा शरीरक्रिया स्थैर्य्यात्मबलवर्धिनी शरीरस्य स्थैर्य्यं पेशीनां दृढतामित्यर्थ:, आत्मबलं शरीरबलञ्च वर्धयति सा देहव्यायामसंख्याता देहस्य व्यायाम इति संज्ञिता, तां मात्रया अन्यूनेनानधिकेन च प्रमाणेन समाचरेत् कुर्यात्। तस्य गुणानाह लाघवमिति। लाघवं शरीरलघुत्वं शरीरवहने लघुताबोध इति यावत्। स्थैर्य्यं शरीरपेशीनां स्थिरता। कष्टेऽपि नोद्विजत इत्याह दु:खेति। दोषक्षय: शरीरदुष्टिकर्तृणां द्रव्याणां क्षय:। अग्निवृद्धि: जाठराग्निवृद्धि: तयैव लाघवदोषक्षयादिकं भवति। व्यायामादिति मात्रावद् व्यायामादित्यर्थ:। व्यायामातियोगदोषानाह श्रम इति। क्लमस्तु मनसो दौर्बल्यम् श्रम: शरीरस्य। प्रतामक: श्वासविशेष:। व्यायामतुल्यत्वेनान्येषामपि नित्याभ्यस्तानां विषयाणामतियोगं निषेधति व्यायामेति। भाष्यं प्रलपनम्। अध्वा पादेन भ्रमणम्। ग्राम्यधर्म्म: मैथुनम्। प्रजागर: रात्रिजागरणम्। उचितान् नित्याभ्यस्तानपि नातिमात्रया सेवेत। तत्र कुफलमाह एतानिति। अन्यान् आहारविहारान्। गज इति। यथा हि गज: वृहत्काय: सबलोऽपि क्षुद्रकायं सिंहमाकर्षन् तेनैव विदारितकुम्भो विनश्यति तथैव व्यायामादीन् अतिमात्रया सेवमानो जन: सहसा उर:क्षतादिनाक्रान्तो विनश्यतीत्यर्थ:॥ ३१-३३॥

ननु सहसाभ्यस्तकर्मत्यागेन अस्वास्थ्याशंका वर्तत एवेति क्रमपूर्वकं तत्त्यागं निवेदयति उचितादिति। उचितादभ्यस्तादहितकरादाहारविहारात् क्रमश: क्रममाश्रित्य शनै: शनैर्नैकदेत्यर्थ: विरमेत्। तेनैव क्रमेण हितं सेवेत। सहसा परित्यागे अहितस्यापि सात्म्यतया तत्त्यागाद् हानि: स्यादिति भाव:। कश्च तत्र क्रम इत्याह प्रक्षेपोपचये इति। ताभ्यां अहितहिताभ्यां साधनाभ्यां प्रक्षेपोपचये अहितेन दोषप्रक्षेपकर्मणि परित्यागविषये इत्यर्थ:।

हितेन गुणोपचयकर्मणि क्रमः पादांशिको भवेत्। अयमर्थः—आदौ चतुर्थांशमहितं विहाय तावन्मानं हितं सेवेत। ततस्तदभ्यासे जाते अर्धांशमहितमपरार्धञ्च हितं सेव्यम्। तदभ्यासात् परमंशत्रयमहितं त्यक्त्वा तत्परिमितं हितं सेव्यं भवेत्। ततस्तु साकल्येनाहितत्यागः। अत ऊर्ध्वं कृत्स्नाहितापचये पुनरेकान्तरम् एकैकस्याह्नोरन्तरं कृत्वा सेव्यम्। एकस्मिन् दिने साकल्येनाहितपरित्यागः परदिने तुर्य्यांशमहितं सेव्यम्। ततो द्व्यन्तरं दिवसद्वयानन्तरं, ततस्तु त्र्यन्तरं दिनत्रयानन्तरं कृत्वा तथैवाहितं सेव्यं भवेत्। त्रिषु दिवसेष्वपि अभ्यस्ताहितानामनभ्यवहारेण चेत् न काप्यावाधा स्यात्, तर्हि सर्वथाऽहितपरित्यागो विधेय इति। तेन किं स्यादित्याह क्रमेणेति। एवंक्रमेण दोषा अपचिता गुणाश्चोपचिताः सन्तः ते दोषा अपुनर्भावं पुनरनुत्पत्तिं यान्ति प्राप्नुवन्ति। गुणाश्च अप्रकम्प्याः स्थिरा भवन्तीति योजना ॥३४–३८॥

ननु समप्रकृतिकानामेव मानवानामेतानि विधानानि स्वस्थवृत्तेरुपयोगीनि भवितुमर्हन्ति विषमप्रकृतिका अपि मानवा बहुशो दृश्यन्ते इति तेषां हितं स्वस्थवृत्तं विवक्षुर्मानवानां प्रकृतिभेदतो भेदानाह समधिष्ठेति। गर्भादि शुक्रशोणितसंयोगात् प्रभृति। वातलाः वातप्रधानाः। एवं पित्तलाः श्लेष्मलाश्च विषमधातवः। पूर्वे समधातवः पुरुषाः। वातलाद्याः जन्मादिविषमधातवः। सदातुराः स्फुटितकरचरणादिमत्त्वाद् रोगिण एव भवन्ति। हि यतः एषां दोषानुशयिता सदैव विकारानुबन्धः देहप्रकृतिः देहस्य स्वभाव उच्यते। अतस्तेषां विषमधातूनां विपरीतगुणः तत्तद्दोषप्रत्यनीको विधिः आहारविहारनियमः स्वस्थवृत्तेर्हितो भवतीति शेषः। समधातोस्तु सात्म्यं नित्यं द्रव्याभ्यवहारः समसर्वरसं सर्वरससाम्येन प्रशस्यते ॥ ३९—४२ ॥

मलवहस्रोतसां संशुद्धिरपि स्वास्थ्यानुबन्धेऽन्यतम उपाय इति मलायनेषु मलस्याधिक्यमल्पतां वा निवेदयति द्वे अध इति। अध इति शरीरस्याधःप्रदेशे द्वे खे छिद्रे मलमूत्रमार्गरूपे। सप्त च शिरसि खानि चक्षुकर्णनासिकासु द्वे द्वे एकञ्च मुखमिति सप्तच्छिद्राणि स्वेदमुखानि द्विविधस्वेदनिर्गमद्वाराणि यानि शरीरं व्याप्य असंख्येयानि वर्तन्ते। येभ्योऽन्नमलरूपस्य जलमयस्य मेदोमलस्य च स्नेहमयस्य च निर्गतिर्भवेत् तानि। एतानि मलायनानि अन्नमलानां धातुमलानाञ्च बहिर्निर्गममार्गाः तानि मात्राधिकैर्दुष्टैर्हीनातिरिक्तरूपैर्मलैर्बाध्यन्ते पीड्यन्ते। तेषां मलायनानां गुरुत्वेन वृद्धिं लाघवाच्च क्षयं एवमतीव संगात् क्षयम् उत्सर्गादतिप्रवृत्तेश्च वृद्धिं बुध्येत। तान् मलक्षयवृद्धिजनितान् व्याधीन् दोषलिंगैरादिश्य तत्तद्दोषलक्षणैस्तत्तद्दोषजान् निरूप्य व्याधिहेतुप्रतिद्वन्द्वैः व्याधिप्रत्यनीकैः हेतुप्रत्यनीकैर्हेतुव्याधिप्रत्यनीकैश्च उपाचरेत्। अत्र प्रतिद्वन्द्वैरिति विपरीतार्थकारिणामपि परिग्रहः स्यात्। साध्यानिति नत्वसाध्यानामुपचारः स्यादिति ज्ञेयम्। विषमेति। विषमस्वस्थवृत्तानामित्यनियतस्वस्थवृत्तानां ये सदैव स्वस्थवृत्तमनुसृत्य वर्तन्ते तेषामित्यर्थः। एते मलजास्तथा अपरे दोषजा रोगा जायन्ते तस्माद्

अनातुर: स्वस्थ: आतुर्य्यात्प्रागेव स्वस्थवृत्तपरो भवेत् विकाराणामनुत्पत्तिमभिसन्धायेति शेष: ॥ ४२—४५ ॥

नन्वृतुस्वभावादेव प्राणिनां दोषसञ्चयप्रकोपौ भवेतामतस्तस्य का गतिरित्याह माधवप्रथम इति । माधवप्रथमे माधवस्य वैशाखस्य प्रथमे पूर्वे चैत्रे मासीत्यर्थ: । नभस्य भाद्रपदस्य प्रथमे श्रावणे । सहस्य पौषस्य प्रथमे अग्रहायणे दोषसञ्चयं हारयेत् वमनादिना नि:सारयेत् । तद्यथा शीते निचितं कफं चैत्रे वमनेन, ग्रीष्मे सञ्चितं वातं श्रावणे वस्तिना, शरदि च पित्तं अग्रहायणे विरचनेन नि:सारयेत् । पुनरपि विकारनिरोधाय स्वस्थस्य शोधनार्थं क्रममाह स्निग्धस्विन्नेति । आदौ स्निग्धं तत: संस्वेद्य वमनेनोर्ध्वं विरेचनेन च अधोदोषान् निर्हृत्य ततो वस्तिकर्म निरूहमनुवासनीयञ्च कुर्य्यात् । तत ऊर्ध्वजत्रुगतदोषनिर्हरणाय नस्तकर्म्म नावनं शिरोविरेचनं कुर्य्यादित्यन्वय: । यथाक्रमं क्रममनुसृत्य यत्परं यत्कर्तव्यं तत्क्रममनुसृत्येत्यर्थ: । यथायोगमिति पञ्चसु कर्मसु यस्य यद् युज्यते तदनुसारमित्यर्थ: । अत ऊर्ध्वं सिद्धानि असकृत्परीक्षया नियतफलप्रदानि रसायनानि वृष्ययोगांश्च सिद्धान् प्रयोजयेत् । तथा तेन प्रकारेण धातुषु प्रकृतिस्थेषु समेष्वित्यर्थ: । उपसंहरति विधिरिति । निजानां दोषजानाम् । निजानामितिच्छेद: ॥ ४६-५० ॥

दोषजानामनुत्पत्तौ विधिं निवेद्यागन्तूनामपि अनुत्पत्तौ क्रमं निवेदयति इतरेषामिति । इतरेषामागन्तूनाम् । तेषां निदानतत्त्वमाह ये इति । भूता: प्राणिन: ग्रहादयश्च । विषमत्र स्थावरम् , जंगमस्य भूतग्रहणेनैव लाभात् । प्रज्ञातेष्वपराध्यति धीधृतिस्मृतिविभ्रंशादेव जायते इत्यर्थ: । मानसव्याधयोऽपि प्रज्ञापराधादेव जायन्ते इत्याह इर्ष्येति । तेषामनुत्पत्तिक्रममाह त्याग इति । प्रज्ञापराधानां त्याग: यथा धीधृतिस्मृतीनां विभ्रंशो न भवेत् तथाकरणम् । इन्द्रियोपशम: इन्द्रियवृत्तीनां निग्रह: । स्मृति: भावानां स्वभावस्मरणम् । देशकालात्मविज्ञानम् एवंदेशे एवंकाले एवंभूतेन मयैतदाचरणीयं नवेति विशिष्टज्ञानम् । सद्वृत्तस्य इन्द्रियोपक्रमणीये वक्ष्यमाणस्य अनुवर्तनं यथावत्पालनम् ॥ ५१—५३ ॥

उपसंहरति प्राज्ञ इति । प्राज्ञ: आप्तोपदेशाद् विशुद्धप्रज्ञ: । यदात्मन: हितं विद्यात्तदेव कुर्य्यात् । तत्र हेतुमाह आप्तोपदेश इति । आप्तोपदेश: आप्तानां भ्रमप्रमादविप्रलिप्साविरहितानां पुरुषाणामुपदेश: इदं हितमिदमहितमित्युपदेश: प्रज्ञानां धीधृतिस्मृतीनां प्रतिपत्तिराश्रय एव मानवं हिताय प्रवर्तयति निवर्तयति चाहितात् इति विकाराणामनुत्पत्तौ उत्पन्नानाञ्च तेषां प्रशमाय कारणं भवतीति शेष: ॥ ५४-५५ ॥

ननु संसर्गजा दोषगुणा भवन्तीति हितसेविनोऽपि संसर्गवशादहितं सेवन्त इति वर्ज्यसेव्यसंगानाह पापवृत्तेति । पापवृत्तवच: सत्वा: येषामाचरणं वाक्यं मनश्च सदैव पापकर्मणि आसक्तानि भवन्ति । सूचका: कर्णेजपा: । मर्मोपहासिन: ये ह्युपहासच्छलेन परान् मर्मणि पीडयन्ति ते । परस्य वृद्धि-

मुन्नतिं ये द्विषन्ति ते परवृद्धिद्विषः। शठो वञ्चकः "प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम्। व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधैः॥" इति लक्षणः। परापवादरतयः अन्येषां निद्रावादे येषां रतिर्वर्तते ते। रिपुसेविनः कामक्रोधादिरिपुवशगाः। निर्घृणा निर्लज्जाः। त्यक्तधर्म्माणो नास्तिका एव। परिवर्ज्याः संगित्वेनेति शेषः। सेव्यसंसर्गानाह बुद्धीति। बुद्ध्याद्युपलक्षणैर्बुद्धाः पण्डिताः। वृद्धोपसेविनः विद्वत्संसर्गिणः। गतव्यथा निर्जितदुःखाः दुःखेऽप्यनुद्विग्नमानसा इत्यर्थः। सर्वभूतानां सम्बन्धे सुमुखाः प्रियंवदाः न कदापि कमपि कटु भाषन्ते इत्यर्थः। संशितव्रता व्रतभक्तत्वान् नित्यं तदाचरणशीलाः। प्रशान्ता निगृहीतेन्द्रियाः। सन्मार्गवक्तारः सत्पथोपदेशकाः॥ ५६-५६॥

उपसंहरति आहारेति। प्रेत्य परलोके इहास्मिन् जन्मनि सुखार्थी सुखलिप्सुः॥ ६०॥

हितप्रसंगाद् दधिभोजनविधिमाह न नक्तमिति। अत्र नभा नक्तमुष्णस्य च दध्नः भोजननिषेधे तात्पर्य्यं क्रियान्वयित्वात्। घृतशर्करादिराहित्येषु विशेषणान्वयित्वेन न साकल्येन भोजननिषेधः परन्तु शर्करादियुक्तं दधि भोक्तव्यमिति विधिः। यदुक्तं वृद्धवाग्भटेन—"नैवाद्यान्निशि नैवोष्णं वसन्तोष्णशरत्सु च। नामुद्गसूपं नाक्षौद्रं नाघृतं नासितोपलम्। शचानामलकं नापि नित्यं नोमन्दमन्यथा।" इति (सू० ६ अ०) विधेश्चास्यार्थवादमाह अजद्मीति। केचित् पाठमिममनार्षं प्राहुः। विधिं हित्वा दधिभोजने दोषानाह ज्वरेति॥ ६१-६२॥

अध्यायार्थं समासतो विनिवेद्याध्यायं समापयति तत्र श्लोका इति॥ ६३-६६॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने नवेगानधारणीयो नाम सप्तमोऽध्यायः॥ ७॥

अष्टमोऽध्यायः॥

अथ स्वस्थवृत्तचतुष्कमुपसंजिहीर्षुः अस्वास्थ्यस्य प्रधानतमं कारणमसात्म्येन्द्रियार्थसयोगं व्याख्यातुकामं प्रति कानि तानीन्द्रियाणि, के वा तेषामर्थाः इत्यादि प्रश्नाः स्वत एव समुद्भवन्ति इति तदुत्तरं विवक्षुः अनुपतप्तानाञ्चेन्द्रियाणामनुपतापाय सद्वृत्तमाचरणीयमिति अखिलेन सद्वृत्तमुपदिदिक्षुरध्यायान्तरमारभते अथात इत्यादिना। इन्द्रियाणामुपक्रमणं व्याकरणमधिकृत्य प्रवृत्तोऽयमध्याय इति इन्द्रियोपक्रमणीयः॥ १-२॥

इहेति। इह अस्मिन् तन्त्रे आयुर्वेदे इत्यर्थः। इन्द्रियाधिकारे इन्द्रियव्याकरणप्रकरणे। एतत् सर्वं पञ्चपञ्चैव भवतीत्युद्देशः। ननु मनसोऽपि इन्द्रियत्वं कथं नोक्तं तत्र "मधुरो रसः षडिन्द्रियप्रसादनः" (सू०२६अ०) इत्यनेन स्वयमेवाग्रे निवेदयिष्यतीत्याह अतीन्द्रियमिन्द्रियातिक्रान्तमिन्द्रि-

यातिरिक्तं वा। इन्द्रियाणि हि भौतिकान्यस्मिन् तन्त्रे वर्ण्यन्ते न खलु मनो भौतिकमाहंकारिकमेव तदिति तस्येन्द्रियातिक्रान्तत्वं स्फुटमेव। यच्चोक्तं वृद्ध-वाग्भटेन "अतीन्द्रियं तु मनः सर्वार्थैरन्वयात् तद्योगेन पञ्चेन्द्रियाणामर्थ-प्रवृत्तेः बुद्धिकर्मेन्द्रियोभयात्मकत्वाच्च" इति। "अतीन्द्रियमित्यतिक्रान्तेन्द्रिय-स्वरूपत्वम्" इतीन्दुव्याख्या। अथवा अतीन्द्रियमतिरिक्तमिन्द्रियमित्यथः। नेदं हि केवलं बुद्धीन्द्रियं कर्मेन्द्रियं वा उभयार्थसंसर्गादुभयेन्द्रियप्रयोजकत्वाच्च उभयेन्द्रियमित्यतः पञ्चज्ञानेन्द्रियात् कर्मेन्द्रियाच्चातिरिक्तमिति तात्पर्यम्। शारीरे "मनोदशेन्द्रियाण्यर्थाः" इत्युक्त्या उपादानभेदेन पार्थक्यम् इन्द्रिय-कार्यकरत्वाच्चेन्द्रियत्वञ्चास्य स्पष्टीभविष्यति। सत्त्वं चेत इति तस्य पर्य्यायौ इन्द्रियलक्षणमाह तदर्थेति। तेषां इन्द्रियाणाम् अर्थसम्पत् प्रकृष्टं रूपादि आत्मसम्पत् प्रवृत्त्यादि तयोरायत्ता चेष्टा यस्य तद् इन्द्रियम्। रूपादीनां प्रवृत्त्यादीनाञ्चासद्भावेन खल्विन्द्रियाणां चेष्टा भवतीत्यर्थः। मनसो लक्षण-माह चेष्टेति। इन्द्रियाणां चक्षुरादीनां या चेष्टा तस्याः प्रत्ययभूतमसाधारणं कारणं मन इत्यर्थ। मनः पुरःसराण्येवेन्द्रियाण्यर्थग्रहणसमर्थानि भवन्तीति नियमात्। नखल्वन्यासक्ते चेतसि अक्ष्णोः समीपस्थमपि वस्तुजातं पश्य-तीति सर्व एव जानन्ति। यद् वक्ष्यति शारीरे "सति ह्यात्मेन्द्रियार्थानां सन्निकर्षे न वर्तते। वैधृत्यान्मनसो ज्ञानं सान्निध्यात् तच्च वर्तते॥" इति॥३-४॥

तच्च मनः एकमनेकं वेति संशयं निराकरोति। कुतः पुनः संशयः? दीर्घशष्कुलीभक्षणादौ एकदैव सर्वेन्द्रियप्रवृत्तिदर्शनात् पृथगिन्द्रियसंसर्गाद् अनेकमेवेति संशयः॥ स्वार्थेति। स्वार्थेषु चिन्त्यविचार्य्यादिषु इन्द्रियार्थेषु रूपादिषु च संकल्पस्य मनःकार्यस्यालोचनस्य व्यभिचरणात् नैकान्तिकत्वा-देकस्मिन् वस्तुनि कदाचित् प्रवृत्तिः कदाचिदप्रवृत्तिर्वेति दर्शनात् एकस्मिन्नेव गीतादौ कदाचित् प्रवृत्तिः कदाचिद्वा निवृत्तिरिति दर्शनादित्यर्थः। रजस्तमः-सत्त्वगुणयोगाच्च एकस्मिन्नेव मानवे कदाचित् सत्त्वबाहुल्यात् सात्त्विक-क्रियासु प्रवृत्तिः, कदाचिद्वा रजसः आधिक्यात् राजसिककार्ये प्रवृत्तिः, कदा वा तमोबहुलतया तामसी प्रवृत्तिर्भवतीति दर्शनात् एकस्मिन्नेव पुरुषे सत्त्वं मनः अनेकमनेकावस्थं स्यादिति शेषः। अनेकावस्थस्यापि तस्य न अनेकत्वं बहुत्वं भवतीति शेषः। हि यतः अणुसूक्ष्ममेकञ्च मनः एककालमेकदैव अनेकेषु अर्थेषु न प्रवर्तते। एकत्वेनैवेदं एकदैव बहुविषये प्रवर्तितुं शक्नोती-त्यर्थः। यदुक्तं वैशेषिके "प्रयत्नायौगपद्याज्ज्ञानायौगपद्याच्चैकम्" इति। एकदा नानाविषयसंसर्गाभावादर्शनात्तदेकमेवेत्यर्थः। तस्मादेकदा अनेकविषये प्रवर्तनाभावात् एककाला सर्वेन्द्रियप्रवृत्तिर्न भवतीति शेषः॥ दीर्घशष्कु-लीभक्षणादौ शतावधानिनाञ्च ज्ञाने एकदैव सर्वेन्द्रियप्रवृत्तिदर्शनन्तु उत्पल-शतपत्रभेदवद् भ्रम एव। यथा ह्येक एव पुरुषः कार्यान्तराणि कुर्वन् अनेकां संज्ञां लभते तद्वद् एकमेव मनः नानाविधार्थग्रहणे नानावस्थं भवत् सात्त्विक-राजसतामसादीन् गौणान् नामविशेषांश्च गृह्णाति, न तेनास्यैकत्वं व्याहन्यते

इति तात्पर्य्यम्। इत एवाह यद्गुणमिति। सत्त्वं मनः अभीक्ष्णं बाहुल्येन यद्गुणं यद्गुणबहुलं सात्विकं राजसं तामसं वा पुरुषमनुवर्त्तते तत्सत्त्वं सात्त्विकं राजसं तामसं वा मनो मुनयो बाहुल्यानुशयात् तत्तद्गुणबाहुल्यात् उपदिशन्ति ॥ ५-६ ॥

मनसः इन्द्रियाणां चेष्टाप्रत्ययभूतत्वं विवृणोति मन इति। पञ्चपञ्चकं व्याचष्टे तत्रेति। खमाकाशम्। ज्योतिरग्निः। बाह्यतो दृश्यं चक्षुरादिकमिन्द्रियाणामधिष्ठानमेव न त्विन्द्रियमित्याह पञ्चेन्द्रियाधिष्ठानानीति। तत्त्वप्रत्यक्षमिति निवेदयिष्यत्यग्रे। अत्र शब्दादयो यथाक्रमं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणेन्द्रियाणां विषयाः। चक्षुर्बुद्धिः घटमहं पश्यामीत्यध्यवसानम्। एवं श्रोत्रबुद्ध्यादयो ज्ञातव्याः। ताः पञ्चेन्द्रियबुद्धयः इन्द्रियेन्द्रियार्थसत्त्वात्मसन्निकर्षजाः। अत्र सत्त्वपदेनान्तःकरणत्रयं मनोऽहंकारबुद्धयो लक्ष्यन्ते। एतेषां सन्निकर्षादेव बुद्ध्युत्पत्तिर्भवतीत्यर्थः। एतेषां षण्णां सन्निकर्षादेव ज्ञानं भवति नान्यथा। सन्निकर्षोऽयं कुत्र विप्रकृष्टवृत्त्या कुत्र वा सन्निकृष्टवृत्त्या भवति। तेषु श्रोत्रं चक्षुश्च विप्रकृष्टवृत्त्या गृह्णीत इतराणि च सन्निकृष्टवृत्त्या। यदुक्तं वृद्धजीवकीये—"मनः षष्ठानामिन्द्रियाणां त्रीणि त्रीणि च विप्रकृष्टसन्निकृष्टवृत्तीनि। मनः चक्षुः श्रोत्रं विप्रकृष्टवृत्तीनि घ्राणं रसनं त्वगिति सन्निकृष्टवृत्तीनि। तत्सर्वं स्पर्शनलक्षणमाहुः। तद्यथा पुरुषः सर्वतो गवाक्षं प्रासादमधिरूढस्तांस्तानर्थान् गवाक्षैरालोचयति, एवमयमात्मा शरीरस्य इन्द्रियैरनुपहतैः मनःपुरःसरैः।" इति। ताश्च बुद्धयः क्षणिकाः निर्विकल्पकाः प्रकारताविशेष्यतादिशून्या इत्यर्थः। निश्चयात्मिकाः सविकल्पकाः प्रकारतादिविशिष्टाः। यथा हि किमपि वस्तु चकितं दृष्ट्वा किमपि दृष्टं मयेति प्रकारतादिविहीनं ज्ञानं भवति तज्ज्ञानं क्षणिकम्। तस्यैव विशेषतो दर्शनेन एवंप्रकारकमिदं द्रव्यमिति प्रकारतादिविशिष्टा बुद्धिर्निश्चयात्मिका भवति ॥ ७-१२ ॥

मन इति। मनोऽर्थः चिन्त्यादिकः। यद् वक्ष्यति "चिन्त्यं विचार्य्यमूह्यञ्च ध्येयं संकल्प्यमेव च। यत्किञ्चिन्मनसो ज्ञेयं तत्सर्वं ह्यर्थसंज्ञकम्।" इति (शा० १ अ०) बुद्धिः साहंकारा। आत्मा च देहातिरिक्तः पुरुषः। इत्येते पदार्थाः अध्यात्मद्रव्यगुणसंग्रह इति आत्मानमधिकृत्य एतानि द्रव्याणि गुणाश्च वर्तन्ते तेषां संग्रहः। एष एव शुभे प्रवृत्तिहेतुरशुभे च निवृत्तिहेतुर्भवति। मनः संकल्पितमर्थं शुभं ज्ञात्वा तत्र प्रवर्तते अशुभाच्च निवर्तते इत्यर्थः। अत्र मनः आत्मा च द्रव्यं, बुद्धिर्मनोऽर्थश्च गुणाः। नन्वात्ममनसोरतीन्द्रिययोः कथं द्रव्यत्वसिद्धिरित्याह द्रव्याश्रितमिति। तयोः क्रियादर्शनात् क्रियायाश्च द्रव्याश्रितत्वात् तयोर्द्रव्यत्वं सिध्यतीत्यर्थः ॥ १३ ॥

तत्रेति। तत्र तेषु इन्द्रियादिषु मध्ये अनुमानगम्यानाम् अतीन्द्रियत्वाद् दर्शनादिक्रिया करणत्वेन अनुमानेन ज्ञातव्यानामिन्द्रियाणां चक्षुरादीनां पञ्चमहाभूतविकारसमुदायात्मकानां प्रत्येकमपीन्द्रियं पञ्चमहाभूतात्मक-

मित्यर्थः। सतामपि विशेषेणाधिक्येन चक्षुषि तेजः, श्रोत्रे खं, घ्राणे क्षितिः, रसने आपः, स्पर्शने चानिलो वर्तत इत्युपदिश्यते। यद् वक्ष्यति "एकैकाधिकयुक्तानि खादीनामिन्द्रियाणि तु। पञ्चकर्मानुमेयानि" इति (शा०१ अ०)। यदिन्द्रियं तत्र तेषु मध्ये विशेषाद् यदात्मकं यद्भूताधिक्यं यत्र वर्तते तदात्मकमेवार्थं तद्भूतमयो योऽर्थः तमनुधावति ग्रहीतुं प्रयुज्यते इत्यर्थः। अत एव श्रवणेन्द्रियं शब्दमेव, स्पर्शनेन्द्रियं स्पर्शमेव, दर्शनेन्द्रियं रूपमेव, रसनेन्द्रियं रसमेव, घ्राणेन्द्रियं गन्धमेव, गृह्णाति न त्वन्यम्। तत्स्वभावाद् एकोपादानत्वात्। नन्वेकोपादानत्वमन्यस्मिन्नपि द्रव्ये वर्तते कथं न तेन ग्रहणं भवतीत्याह विभुत्वाच्चेति। इन्द्रियाणां विभुत्वेनैव तत्तदर्थग्रहणे सामर्थ्यं वर्तत इति भावः॥ १४॥

विकारोत्पादे इन्द्रियार्था अपि हेतवो भवन्ति तदर्थानां विषमयोगादिन्द्रियाण्युपहन्यन्ते ततश्च तानि बुद्ध्युपघाताय सम्पद्यन्ते इति प्रतिपिपादयिषुराह तदर्थेति। तदर्थानां शब्दादीनामतियोगायोगमिथ्यायोगानां व्यावृत्तिः सौत्रीये एकादशाध्याये शारीरे च प्रथमाध्याये द्रष्टव्या। समासतस्तु इन्द्रियाणां हणसामर्थ्यातिरिक्तस्यार्थस्येन्द्रियेण योगोऽतियोगः, सर्वथा योगाभावः ईषद्योगो वाऽयोगः, विकृतादिदुष्टस्यार्थस्य योगो मिथ्यायोग इत्युच्यते। एतैस्त्रिभिः कारणैर्मनःसहितमिन्द्रियमाबाध्यते। ततश्च तत् स्वां बुद्धिमपि दूषयतीत्यर्थः। यथा ह्यतिमात्रतीक्ष्णतेजःपदार्थादिदर्शनाद् दर्शनेन्द्रियोपघातात् सर्वथा चक्षुर्बुद्धिर्नश्यति तद्वत्। समयोगान् मात्रावदर्थग्रहणाद् बुद्धिमाप्याययति तर्पयति। एवं मनोऽर्थानामतियोगादितो मनो व्याहन्यते, ततश्च मनोबुद्धिरपि विकृतिं गच्छतीत्याह मनस इति। चिन्त्यमित्यनेन विचार्य्योह्यादिकं ग्रहीतव्यम्। त एवेत्यनेन चिन्त्यं विचार्य्यमूह्यं ध्येयं संकल्प्यमिति सर्व एव मनसोऽर्थाः प्रत्येतव्याः तत्र तेषां समयोगो मनसस्तद्बुद्धेश्च प्रकृतिहेतुः नातिमिथ्यायोगाश्च विकृतिहेतवो ज्ञेयाः॥ १५-१६॥

अतः स्वस्थवृत्तानुपालने इन्द्रियादीनां प्रकृतिहेत्वनुबन्ध एवोपपादनीय इति तदुपायान् निर्वक्ति तत्रेति। अनुपतप्तानां प्रकृतिस्थानाम्। प्रकृतिभावे यथा प्रकृतौ तिष्ठेत् तत्कर्तुमित्यर्थः। के ते हेतव इत्याह तद्यथेति। सात्म्येन्द्रियार्थसंयोगेन इन्द्रियार्थानां समयोगेन एष प्रथमो हेतुः। द्वितीयस्तु बुद्ध्या सम्यगवेद्यावेद्य कर्मकरणेन प्रज्ञापराधविरहितेनेत्यर्थः। तृतीयस्तु देशादिगुणविपरीतोपसेवनेन देशसात्म्यानां कालसात्म्यानामोकसात्म्यानाञ्चोपसेवनेनेत्यर्थः। तेन च व्याधेस्त्रिविधमात्रकारणानामसात्म्येन्द्रियार्थसंयोगप्रज्ञापराधपरिणामरूपाणामनुपसेवनात् सदैव स्वास्थ्यमनुवर्तते। तस्मात् स्मृतिमास्थाय धर्मशास्त्रमनुसृत्य सद्वृत्तं धर्मशास्त्रनिर्दिष्टं सताऽनुष्ठेयं देहवाङ्मनःप्रवृत्तिरूपमाचरणम्॥ १७॥

किन्तत् सद्वृत्तमित्याह तद्यथेति। अग्निमुपचरेत् आहुत्यादिना

नित्यं पूजयेत्। द्वौ कालौ प्रातर्मध्याह्ने च उपस्पृशेत् स्नायात्। मलायनेषु गुदोपस्थरोमकूपादिषु। पक्षस्य मध्ये त्रिः त्रिकृत्वः केशादीन् संहारयेत् अत्यंशं छिन्द्यात् सर्वथाकल्पने प्रसाधितकेश इत्युपरिष्टनं सद्वृत्तमनर्थकं स्यात्। अनुपहतवासा इति छिन्नवस्त्रं न परिधायेत्यर्थः। सुमनःसुगन्धिः पुष्पमाल्यादिधारणेन साधुगन्धविशिष्टः। प्रसाधितकेशः कंकतिकादिना सुमार्जितकेशः। धूमपः प्रायोगिकधूमपायी। पूर्वाभिभाषी प्रागेव सम्भाषणशीलः सुमुखो मधुरभाषी। दुर्गेषु दुर्गतपतितेषु अभ्युपपत्ता उद्धर्ता। यष्टा यजनशीलः। बलीनां गृहस्थकर्तव्यत्वेन विहितानां ब्रह्मादिबलीनां उपहर्ता प्रदाता। बलयो यथा—ब्रह्मबलिः विश्वदेवबलिः धन्वन्तरिबलिः शक्रबलिः यमबलिः वरुणबलिः सोमबलिः धातृविधातृबलिः अर्यमबलिः नक्तम्बरबलिः भूतबलिः पितृबलिश्चेति तान् गृहे उपहृत्य बहिश्चतुष्पथादौ श्वकाकबलिं दद्यात्। काले हितमितमधुरार्थवादीति यथाकाले हितं मितं मधुरञ्चार्थं ब्रूयादित्यर्थः। वश्यात्मा जितेन्द्रियः अत्रात्मशब्द इन्द्रियार्थवाची। हेतावीर्षुः इति कस्यचिदुन्नति हेतावीर्षावान् भवेत् स यथा उन्नतिमाप तथा कर्तुं प्रयतेत इत्यर्थः। न तु फले ईर्षुः स्यात् कथमयमुन्नतोऽभवदिति तं प्रति ईर्षां न कुर्यात्। ह्रीमान् अपकर्मणि लज्जाशीलः स्यात्। आस्तिकः ईश्वरे वेदे चास्थावान्। विनयेति विनयादिभिर्गुणैर्वृद्धानां श्रेष्ठानां सिद्धानामाचार्याणाञ्च उपासिता सेवाकर्ता। अत्राभिजनो विशुद्धं कुलम्। छत्रीति छत्रदण्डपादुकायुक्तः मौनी अजल्पन् इत्यर्थः। मौलीति पाठेतु शिरस्त्राणसमन्वितः। युगमात्रदृक् सम्मुखवर्तिहस्तचतुष्टयमितभूमिद्रष्टा च सन् विचरेत् पथि गच्छेत्। कुचेलं छिन्नमलिनवस्त्रखण्डम्। अमेध्यमपवित्रम्। कुचेलादितुषान्तानामुत्करः स्तूपः तेषां भस्मादिभूमीनाञ्च परिहर्ता पादेन नाक्रमणकर्ता स्यादित्यन्वयः। प्राक् श्रमादिति श्रमाधिक्यात् प्रागेव व्यायामं वर्जयेदित्यर्थः। दीनानां दरिद्राणामभ्युपपत्ता पालयिता। सत्यसन्धः सत्यपालनतत्परः स्थिरप्रतिज्ञ इति यावत्। शमप्रधानः अविरोधशीलः। अमर्षघ्नः सामादिभिः परक्रोधनिग्रहचतुरः। प्रशमगुणदर्शी शान्तिप्रिय इत्यर्थः। रागद्वेषहेतूनां हन्तेति रागद्वेषयोस्तु सुखदुःखबुद्धिरेव हेतुर्भवति। अतः सुखदुःखबुद्धिः यत्र तत्रैव परित्यजेदित्यर्थः॥ १८॥

नानृतं ब्रूयादिति। यच्चानृतं स्वस्य परस्य वाऽहिताय भवेत् तस्यैव वर्जनं कुर्य्यात्। कानिचिदनृतानि तु न पातकानि भवन्ति यच्चोक्तं "न नर्मयुक्तं वचनं हिनस्ति न स्त्रीषु राजन् न विवाहकाले। प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि" इति। अन्यस्वं परकीयं किञ्चिदपि द्रव्यं नाददीत तदगोचरेणेति भावः। रोचयेद् अभिकांक्षेत्। न पापेऽपि पापी स्यादिति असौ पापाचार इति न तं प्रति पापकर्म कुर्यादित्यर्थः। अन्यरहस्यम् अन्यस्य गोपनीयं किञ्चिन् नागमयेत् न प्रकाशयेत्। नरेन्द्रद्विष्टैः राजशत्रुभिः। क्षुद्रैः कृपणैः। दुष्ट्यानानि भग्नरथमत्तहस्त्यादीनि। जानु-

सममाजानूच्चं यत्र पादं प्रलम्ब्यैवोपवेष्टुमर्हतीत्यर्थः। कठिनं काष्ठाच्छादनमात्रम्। यदुक्तं भेले "वर्जयेद् विषमं दुःखमासनं पादलम्बनम्" इति (सू० ८ अ०)। नानास्तीर्णमिति। अनास्तीर्णमप्रसारितम्। अनुपहितमुपधानरहितम्। अविशालं स्वप्रमाणापेक्षया ह्रस्वम्। असमं नतोन्नतम्। शयनं प्रपद्येत तादृश्यां शय्यायां शयीत। जलोघवेगं तीव्रवेगान्वितं जलं निर्झरादेरित्यर्थः। कूलच्छायां कूलस्य शरीरस्य च्छायां अन्यस्येति शेषः। नोपासीत न स्वशरीरे पातयेदित्यर्थः। शरीरच्छायाग्रहणनिषेधो यथा कर्मलोचने—"दीपखट्वातनुच्छायाछिन्नकेशनखादिकम्। अजमार्जारश्वरेणुश्च हन्ति पुण्यं पुराकृतम्" इति। अग्न्युत्पातमभितः आग्नेयपर्वतादिसमीपे। न शब्दवन्तं मारुतं मुञ्चेदित्यत्र स्वयमागतवेगमधोवातं निरोद्धुं नोपदेश इति ज्ञेयम्। केऽपि कृत्रिमप्रयत्नेन शब्दवन्तमधोवातं मुञ्चन्तीति तेषां प्रतिषेधोऽत्र कृतः। अधोवायोर्वेगधारणस्य सर्वथा प्रतिषिद्धत्वादिति सुधीभिर्विभाव्यम्। कुष्णीयाद् अंगुल्या विघट्टयेत्। विघट्टयेत् किट्किटायेत। अस्थीनि एकेनास्थाऽपरमस्थि स्वशरीरस्येति शेषः। विलिखेत् नखादिना रेखापातनं कुर्यात्। छिन्द्यान्नखैरिति शेषः। मृद्नीयात् करेणेति शेषः। ज्योतींषि सूर्यादयः अत्युज्ज्वलपदार्थाः। न हुं कुर्याच्छवमिति शवं दृष्ट्वा घृणया हुंकरणमकर्तव्यमित्यर्थः। अत्र च स्मृतावर्थवादो यथा—"यः शवं हुंकरोति तेन सोमो बहिर्निरस्तो भवति" इति। चैत्यस्य देवायतनस्य ध्वजः पताका। अशस्तस्य अपवित्रस्य। चण्डालादेश्छायां नाक्रमेत् पद्भ्यामिति शेषः। क्षपासु रात्रिषु, अमरसदनं देवमन्दिरम्। चैत्यं ग्राम्यपूज्यवृक्षम्। चत्वरमंगनम्। आसेवेत निद्रार्थमिति शेषः। एकः एकाकी। अवरान् गुणतो हीनान् उपासीत सेवेत। जिह्मं खलं न रोचयेत् न तत्कार्य्ये प्रीतिं प्रदर्शयेत्। अनार्यमधार्मिकम्। साहसं यथा—"मनुष्यमारणं स्तेयं परदारानिमर्षणम्। पारुष्यमनृतञ्चैव साहसं पञ्चधा स्मृतम्" इति। अतिशब्दः स्वप्नादिषु सर्वत्र योजनीयः। चिरं दीर्घकालं व्याप्य ऊर्ध्वजानुः जानुनी ऊर्ध्वे कृत्वा न तिष्ठेत् उत्कटुकासनं परिहरेदित्यर्थः। व्यालान् क्रूरान् सर्पादीन्। उपसर्पेत् समीपं गच्छेत्। दंष्ट्रिणो व्याघ्रादीन् विषाणिनो महिषादीन्। पुरोवातं सम्मुखागतं वायुम्। अवश्यायं हिमम्। अतिप्रवातम् अतिरिक्तं पूर्वं वायुम्। कलिं युद्धं विवादं वा। अनाप्लुतवदनोऽधौतमुखः। उपस्पृशेत् स्नायात्। स्नानशाट्या स्नानवस्त्रेण। उत्तमांगं मस्तकम्। नोपस्पृश्येति पूर्वपरिहितं वस्त्रं स्नानकाले परिहाय स्नानान्ते तदेव न परिदध्यात्। वाससीति उत्तरीयेण सह वाससी द्विवचनम्। न पूज्येति पूज्यान् वामतः कृत्वा अमांगल्यानि च दक्षिणतः कृत्वा गच्छेदित्यर्थः॥ १६॥

नारत्नपाणिरित्यादीनाम् अन्नमाददीत इत्यनेनान्वयः। नारत्नपाणिरिति पाणौ रत्नं न विधार्य्येत्यर्थः। न उपहतवासाः न छिन्नं वस्त्रं परिधाय। अजपित्वा इष्टमन्त्रादिकमिति शेषः। देवताभ्योऽहुत्वा देवतामुद्दिश्याग्नौ

भोज्याग्रभागं न हुत्वा। पितृभ्योऽनिरूप्य पितॄन् उद्दिश्य संस्तरे न निर्वप्य। उपाश्रितेभ्यः पुत्रजायावन्ध्वादिभ्यः। अपुण्यगन्धः सुरभिणा गन्धेन नानुलिप्तः। अशुद्धमुख अनाचम्य दन्तादीन् अपरिशोध्य च। नाभक्तेति अभक्ताः अतद्भक्ताः अशिष्टाः अधीराः अशुचयः क्षुधिताः परिचरा सेवका यस्य स तथाविधः। अमेध्यासु अपवित्रासु पात्रीषु निषिद्धभोजनपात्राणि यथा धर्मशास्त्रे "न लौहे मृन्मये पात्रे भिन्नेऽश्नीयात् करेऽम्बरे" इति। आकीर्णे जलादिभिर्निरवकाशे देशे इत्यर्थः। कुत्सितं रूपगन्धभोज्यत्वादिभिर्निन्दितम्। प्रतिकूलोपहितं शत्रुभिर्दत्तम्। पर्य्युषितं व्युष्टम्। हरितकमार्द्रकादि। सक्तून् यवादिसक्तून् एकान् इतरद्रव्याद्यमिश्रानित्यर्थः। द्विः एकस्मिन् दिवसे वारद्वयम्। उदकान्तरितान् जलरहितान् शुष्कानित्यर्थः। द्विर्जैश्छित्वा मुखे प्रक्षिप्य चर्वयित्वा भक्षयेत् शक्तून् इत्यन्वयः। वेगितः मलमूत्रादिवेगयुक्तः। वाय्वादीनां प्रतिमुखमभिमुखम् इत्यर्थः। न जनवति जनसमागमे स्थाने न वाऽन्नकाले मूत्रयेदित्यन्वयः। नन्वन्नकाले मूत्रत्यागनिषेधान् मूत्रवेगरोधः स्यात् स च नेष्टः अतः भोजनात् प्रागेव मूत्रयेदथवा सञ्जाते मूत्रवेगे भोजनं त्यक्त्वा मूत्रयेत्। न जपहोमेति। ननु जपादिकाले श्लेष्मसिंघाणकस्य त्यागनिषेधात् किं तद्गलाधःकरणं कुर्वीत इति चेन्न। निषेधविधेरस्य प्रयोजनन्तु नाशुचिर्जपादिकं कुर्य्यादिति तेन सत्यावश्यके सिंघाणकत्यागे पुनराचम्य शुचिर्भूत्वा जपादिकं कुर्य्यादित्यर्थः॥ २०—२१॥

न स्त्रियमवजानीतेति दुर्बलेति नावज्ञां कुर्वीत। नातिविश्रम्भयेत् नितरां चञ्चलस्वभावेति नात्यर्थं तां विश्वसेत्। गुह्यं गोपनीयं किञ्चित्। नाधिकुर्यात् दासीवत् सदैवाज्ञाकरीं कुर्य्यात्। मैथुनविधिमाह न रजःस्वलामित्यादिना व्यवायं गच्छेदित्यन्तेन। अमेध्यामपवित्राम्। अशस्तां संक्रामकव्याध्याक्रान्ताम्। अनिष्टाचाराम् अनीप्सितचरित्राम्। अनिष्टोपचारामनीप्सितव्यवहाराम्। अदक्षिणामननुकूलाम्। अन्ययोनिं पश्वादियोनिम् अयोनाविति कृत्रिमेनोपायेन हस्तादिनेत्यर्थः। चैत्येति—चैत्यादिषु औषध्याद्यालयेषु इत्यर्थः। अति प्रमाणातिरिक्तमित्यर्थः। अजग्धभेषजः वृष्यौषधासेवी। अप्रणीतसंकल्पः अकामः। अनुपस्थितप्रहर्षः अजातध्वजोच्छ्रायः। अरहसि प्रकाश्यस्थाने। सतः साधून् परिवदेत् निन्देत्। अभिचारकर्म परमारणादिकर्म। चैत्यस्य देवायतनस्य वृक्षस्य। पूज्यस्य देवतादेः पूजाम्। अध्ययनविधिमाह न विद्युत्स्विति। अनार्त्तवीषु वर्षाशरद्धेमन्तातिरिक्तकालभवासु यदुक्तं सुश्रुते—"नाकालविद्यत्स्तनयित्नु घोषे" इति (सू० १ अ०) अभ्युदितासु प्रदीप्तासु। महाग्रहोपगमने चन्द्रसूर्य्यग्रहणे। नष्टचन्द्रा तिथिः भाद्रपदचतुर्थी। तान्तं प्लुतस्वरेणेत्यर्थः। नातिक्लीवमभिन्निनम्॥२२—२४॥

नातिसमयमिति। अतिसमयमतिक्रान्तकालं कार्य्यमिति शेषः। न जह्यात् पुनरपि अन्यदा तत्कुर्य्यादित्यर्थः। अभ्यवहारो भोजनम्। न मद्येत्यत्र प्रसंगशब्दो मद्यादित्रयेण युज्यते तत्र रुचिरासक्तिर्यस्य स तथा-

विध: । अहंमानी अहंकृत: । अदक्षिण: अननुकूल: । दक्षिणान् अनुकूलान् स्वपक्षीयान् इत्यर्थ: । गणान् जातिं समाजं वोल्लिख्य अधिक्षिपेत् कुत्सां कुर्यात् । कृच्छ्रे विपदि द्वितीय: सहाय इत्यर्थ: । बहि: कुर्यात् तेन सह भेदमापादयेदित्यर्थ: । अत्युच्छ्रितम् अत्युत्तेजितं सत्त्वं मनो यस्य तथाविध: । नाभृतभृत्य: इत्यादीनां पदानां स्यादिति पूर्वेणान्वय: । अविश्रब्धस्वजन: य: स्वजनानपि न विश्वसिति । दु:खयतीति दु:खं दु:खप्रदं शीलादिकं यस्य स: । शीलं चरित्रम् आचार: आचरणम् उपचारो व्यवहार: । सर्वविश्रम्भी य: सर्वानेव विश्वसिति । तद्विपरीत: सर्वाभिशंकी सर्वकालविचारी अत्रेदं कर्तव्यं नवेति सदैव वितर्कशील: ॥ २५—२६ ॥

न कार्यकालमिति । बुद्धीन्द्रियाणां बुद्धेरिन्द्रियाणाञ्च अतिभारमादध्यात् तान्यतिरिक्तं विषमं वा परिचालयेदित्यर्थ: । दीर्घसूत्री धीरक्रिय: क्रोधहर्षौ अनु क्रोधपूर्वकं हर्षपूर्वकं वा किमपि कार्य्यं न विदध्यात् । शोकम् अनु शोकेन सहेत्यर्थ: । सर्वदा शोकाक्रान्तो न स्यादिति तात्पर्य्यम् । सिद्धौ कार्य्ये सिद्धे उत्सेकमानन्दातिशय्यं गच्छेत् प्राप्नुयात् । प्रकृतिमभीक्ष्णं स्मरेदिति पुन: पुन: द्रव्याणां प्रकृतिस्मरणात् मुक्तेरद्वितीय उपायस्तत्त्वस्मृतिरुदेति यद् वक्ष्यति "निमित्तरूपग्रहणात्" इत्यादिना शारीरे । हेतुप्रभावनिश्चित: 'कारणगुणा: कार्य्यगुणानारभन्ते' इति न्याये दृढमास्थावान् । हेत्वारम्भनित्य: सदैव शुभे च हेतौ कर्म्मारम्भशील: । उत्तमाज्यं गव्यं घृतम् । अक्षतं लाजा: । अग्निर्मे इत्यादिकमाशीर्मन्त्रम् । आपो हिष्ठेत्यादिना वैदिकमन्त्रेण अप: स्पृशेत्, आपो मार्जनं कुर्वीत । उपस्पर्शनविधानं यथा दक्षस्मृतौ—

प्रक्षाल्य पाणिपादौ च त्रि: पिवेदम्बुवीक्षितम् ।
संवृत्यांगुष्ठमूलेन द्वि: प्रमृज्यात् ततो मुखम् ॥
संहत्य तिसृभि: पूर्वमास्यमेवमुपस्पृशेत् ।
अंगुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् ॥
अंगुष्ठानामिकाभ्याञ्च चक्षु:श्रोत्रे पुन: पुन: ।
नाभि: कनिष्ठांगुष्ठेन हृदयन्तु तलेन वै ॥
सर्वाभिश्च शिर: पश्चाद् बाहू चाग्रेण संस्पृशेत् ॥" इति ॥

मूर्धनि खानि शिर:स्थचक्षु:श्रोत्रघ्राणमुखानि । निगदव्याख्यातमन्यत् ॥ २७—२८ ॥

अध्यायं समापयति तत्र श्लोका इति ॥ २९—३३ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने इन्द्रियोपक्रमणीयो नामाष्टमोऽध्याय: ॥

इति स्वस्थवृत्तचतुष्कव्याख्या समाप्ता ।

नवमोऽध्यायः ॥

स्वस्थहिताय स्वस्थवृत्तचतुष्कमभिधाय साकल्येन पुनः स्वस्थातुरहिताय अध्यायचतुष्टयेन निर्देशचतुष्कमारिरिप्सुस्तत्रारोग्यस्य प्रधानमुपायं चतुष्पादं सामान्यतोऽभिधातुमध्यायान्तरमारभते अथात इत्यादिना । स्वस्थातुरहितं निर्दिशतीति निर्देशचतुष्कम् । खुड्डाकशब्दोऽयमल्पार्थवाची । अध्यायस्यास्य खुड्डाकचतुष्पादत्वमनन्तरान् महतश्चतुपादादल्पत्वेन ज्ञेयम्।१–२।

के ते चत्वारः पादा इत्याह भिषगिति । भिषक् चिकित्सकः । द्रव्याणि तदर्थं संगृहीतानि भेषजानि । उपस्थाता सेवकः शुश्रूषक इत्यर्थः । गुणवत् वक्ष्यमाणषोडशगुणसम्पन्नो विकारशान्तये ज्ञेयम् । विकारलक्षणमाह—विकार इति । धातूनां त्रिदोषाणां सप्तधातूनां मलानाञ्चेत्यर्थः । त्रिविधमेतत् शरीरधारकत्वाद् धातुसंज्ञां लभते यदुक्तं सुश्रुते—

"नर्ते देहः कफादस्ति न पित्तान्न च मारुतात् ।
शोणितादपि वा नित्यं देह एतैस्तु धार्य्यते ॥" इति (सू०२१अ०)

वक्ष्यति चेहैव—"ते सर्व एव धातवो मलाख्याः प्रसादाख्याश्च" इति (सू० २८ अ०) वैषम्यं न्यूनाधिक्यम् । तेषां यथास्वमानान्न्यूनत्वे आधिक्ये वा विकारोत्पत्तिर्भवत्येवेत्यर्थः । एषामसाधारणकारणतया कार्य्यकारणयोरैक्यमुपचारात् । वस्तुतस्तु धातुवैषम्यादेव व्याध्युत्पत्तिर्भवति न च धातुवैषम्यमेव व्याधिः । स च दुःखेनाभिन्न इत्याह सुखसंज्ञकमिति । धातुवैषम्ये सर्वत्रैव दुःखोत्पत्तिर्भवत्येव । ननु न्यच्छतिलकालकादिषु व्याधिषु दुःखाभावदर्शनात् तत्राव्याप्तिरिति चेन्न । तत्रापि शरीरस्य वैवर्ण्यादिना मानसं दुःखं भवत्येव । अतएवायुर्वेदसम्मतविकाराणां स्वयं वेद्यत्वं वर्तत एव । अवेद्यत्वे नासौ व्याधिर्भवितुमर्हति ॥ ३—४ ॥

विकारलक्षणं निवेद्य चतुष्पादस्य चिकित्सांगतया चिकित्सालक्षणमाह चतुर्णामिति । धातुवैकृते धातुवैषम्ये सति व्याध्युत्पत्तावित्यर्थः । शस्तानां गुणवत्त्वेन प्रशस्यानां चतुर्णां भिषगादीनां धातुसाम्यार्था धातूनां साम्याय प्रवृत्तिः क्रिया चिकित्सेत्यर्थः । तेषां चतुष्पादानां गुणान् विवक्षुः प्रधानत्वादादौ भिषजां गुणानाह श्रुत इति । श्रुते आयुर्वेदतन्त्रे पर्यवदातत्वं निष्णातत्वं पारंगतत्वमित्यर्थः । बहुशो बहुवारं दृष्टकर्मता रोगप्रत्यभिज्ञाने, भेषजविनिर्माणे, शस्त्रादिप्रणिधाने, निखिलोपक्रमे च यत् यत् कर्म कर्तव्यं तत् सर्वं बहुशो दृष्ट्वा लब्धज्ञान इत्यर्थः । दाक्ष्यं क्रियाकुशलता । शौचं शुचिता एतच्चतुष्टयं प्रधानतो वैद्यगुणं भवति । भेषजगुणानाह—बहुतेति । बहुता प्राचुर्यम् । तत्र कर्मणि योग्यत्वं यत्र च व्याधौ यानि द्रव्याण्यपेक्ष्यन्ते तान्येवेत्यर्थः । अनेकविधकल्पना चूर्णकल्कमोदकादिभावेन नानाविधा कल्पना । सम्पत्सुदेशजातत्वं सुकालाहृतत्वं सम्यग्रक्षितत्वमित्यादिसर्वविधगुणसम्पत् । सेवकगुणानाह उपचारेति । उपचारज्ञता सेवाकुशलता । भर्तरि

सेव्ये रोगिणि । शौचमित्यमालिन्यं मलिने हि सेवके रोगिण्यपि तन्मल-सम्पर्को भवितुमर्हेदित्याशय: । रोगिगुणानाह स्मृतिरिति । स्मृतिमानेव स्वव्याधेरितिवृत्तं ज्ञापयितुं समर्थ इति स्मृतिरपि रोगिगुणत्वेन परिगृहीता । निर्देशकारित्वं भिषगुपदेशमनुसृत्य कर्मकरत्वम् । अभीरुत्वं महत्यपि व्याधौ भीत्यभाव: । भीरोर्हि स्वल्पेऽपि व्याधौ भीतिवशाद् ओज:क्षयो भवति। ज्ञापकत्वं यथावद् भिषजे वेदनानां निवेदकत्वम् ॥ ५—६ ॥

कारणमिति । एतत् षोडशगुणं पादचतुष्टयं सिद्धौ विकारनिवृत्तौ कारणं भवतीति शेष: । परन्तेषु भिषज एव प्राधान्यं हेतुगर्भविशेषणैराख्याप-यति विज्ञातेति । विज्ञाता व्याधे: शासिता कर्तव्याकर्तव्येषु । योक्ता भेषजा-दीनां प्रयोगकर्ता । अर्थमिमं दृष्टान्ताभ्यां समर्थयति—पक्ताविति । पक्तौ पाकक्रियायाम् । इन्धनं दाह्यं काष्ठम् । विजेतु: सेनानायकस्य । चमू: सैन्यानि प्रहरणानि शस्त्राणि । पुनश्च व्यतिरेकदृष्टान्तेन तमर्थं द्रढयति मृद्दण्डेति । मृद् घटोपादानं, दण्ड: कुलालचक्रभ्रामक: । चक्रं घटनिर्माणयन्त्रम् । सूत्रं घटकपालच्छेदार्थं गुण: । आदिपदेन सलिलादे: परिग्रह: । गुणं घटाद्युत्पा-दनरूपम् नावहन्ति न क्रियासम्पादकं भवन्तीत्यर्थ: । पुनर्वैद्यस्य प्राधान्यं समर्थयति गन्धर्वेति । उपायप्रतीक्षिण: चिकित्स्यमानस्य जनस्येत्यर्थ: । उपायशब्दश्चिकित्सावाची यद् वक्ष्यति—"उपाय: पुनर्भिषजादीनां सौष्ठव-मभिसन्धानञ्च सम्यक्" इति (वि० ८ अ०) । एतेन सत्यपि गुणवति पादत्रये इति ज्ञेयम् । सुदारुणा विकारा: यदाशु गन्धर्वपुरवत् नाशं यान्ति इतरे केचन अज्ञभिषजोपक्रान्ता इत्यर्थ: । आशुवृद्धिं यान्ति अत्र ज्ञाज्ञौ भिषजौ कारणे भवत इति शेष: । विदुषा भिषजोपक्रान्ता विकारा नाशं यान्ति अज्ञेन च वृद्धिं यान्तीत्यर्थ: । गन्धर्वपुरमपि क्षणाददर्शनं यातीति प्रवाद: । अत: आत्माहुत: आत्मनैव आत्मन: अग्नावाहुतिदानं वरं मनाक्प्रियं न तु अज्ञेन प्रवर्तिता चिकित्सा ॥ १०—१५ ॥

अज्ञं भिषजं निन्दति पाणीति । यथा अचक्षुरन्ध: पाणिचारात् पाणिना मार्गं परामृश्य भीतभीतवद् गच्छति तथा अज्ञ: मारुतवशा नौरिव कर्मसु चिकित्सासु चरति। यथा वातवेगेन विज्ञकर्णधारविहीना नौका पथि अपथे वा गच्छति तथैव मूर्खो वैद्यश्चिकित्सति तेन व्याधेर्गतिपरिवर्तनं भवि-तुमर्हति न वेति विचारयितुमशक्यत्वादिति भाव: । पुनश्च स यदृच्छया समापन्नं स्वयमेवोपशान्तव्याधिकं नियतायुषं कमपि रोगिणमुत्तार्य निरुजं कृत्वा भिषङ्मानी प्राज्ञो भिषगहमित्यहंकृत: सन् अनियतायुषामिति येषां सम्यक् चिकित्सया फलं भवेत् तादृशो शतं जनं निहन्ति चिकित्साव्यपदे-शेनेति शेष: । आचार्यमाठरेणापि सांख्यकारिकाव्याख्यायां मूर्खवैद्यवर्णनायां एतत्समार्थकौ द्वौ श्लोकौ प्राह यथा—

"यानि कानि च मूलानि येन केन च पेषयेत् ।
यस्मै कस्मै च दातव्यं यद्वा तद्वा भविष्यति ॥

वैद्यवैद्य नमस्तुभ्यं क्षपिताशेषमानव ।
त्वयि विन्यस्तभारोऽयं कृतान्तः सुखमेधते ॥" इति ॥१६-१७॥

अतएवायुर्वेदज्ञाने सम्यक् प्रयतितव्यं भिषजेत्याह तस्मादिति । शास्त्रे आयुर्वेदग्रन्थपाठे, अर्थविज्ञाने तदर्थबोधे, प्रवृत्तौ स च विधिः कुत्र प्रयोक्तव्य इति बुद्ध्वा कर्मकरणे, कर्मदर्शने पुनः पुनः कर्म कृत्वा कर्मफलदर्शने एतच्चतुष्टये युक्तः सम्यग् विबुद्धः भिषक् प्राणाभिसरः प्राणान् अभि सर्वतोभावेन लक्ष्यीकृत्य सरति गच्छति चिकित्सतीति अन्वर्थसंज्ञया उच्यते । हेताविति । हेतौ रोगाणां निदाने लिंगे व्याधिलक्षणे प्रशमने व्याधिनिग्रहे अपुनर्भवे उपशान्तानां व्याधीनामपुनरुत्पत्तौ एतच्चतुर्विधं ज्ञानम् । यथाहि भीरोर्हस्तगतमुत्तममपि शस्त्रं यथा वा मूर्खस्य गृहगतं शास्त्रं यथा वा मद्यभाण्डगतं गंगाजलं पात्रदोषाद् दुष्टं भवति तथा आयुर्वेदजिज्ञासुः स्वां प्रज्ञां विशोध्य तज्ज्ञानं लभेत इत्याह शास्त्रमिति । वैद्यगुणानाह—विद्येति । विद्याशास्त्रज्ञानं वितर्कः ऊहापोहविचारः विज्ञानमननुभूतविषये बुद्धेः प्रसारः, तत्परता दक्षता तत्रासाधारणी श्रद्धा वा । क्रिया बहुशः कर्मकरणम् ॥ विद्येति विद्या आयुर्वेदज्ञानम् । मतिः यथार्हे क्षेत्रे प्रयोगबुद्धिः । कर्मदृष्टिः चिकित्साकर्मणि सततसावधानता । अभ्यासः पुनः पुनः कर्मकरणेन चिकित्सापटुत्वम् । सिद्धिः प्रायः सर्वत्रैव रोगापनयनम् । अतएव आश्रयः पीडितानां जनतानामाश्रयस्वरूपः । सद्भूतं सम्यङ्निरुक्तं वैद्यशब्दमर्हेत् वैद्यशब्दभाग्भवितुं योग्यो भवेदित्यर्थः ॥ १८-२३ ॥

शास्त्रमिति । शास्त्रं शास्त्रार्थज्ञानं प्रकाशार्थं ज्योतिरालोकस्वरूपम् । आत्मनो वैद्यस्य बुद्धिः दर्शनं दर्शनेन्द्रियस्वरूपम् । यथाहि सम्यगालोकिते देशे प्रत्यक्षत उपलभ्य कर्मकरणं नोपालम्भाय भवेत् तथैव स्वबुद्ध्या शास्त्रार्थमवगम्य चिकित्सन् वैद्यो नोपालम्भभाग्भवतीत्याशयः । त्रयः पादाः द्रव्यातुरोपस्थातारः । निर्गुणे वैद्ये सम्यग्गुणवन्तोऽप्येते निरर्थका भवन्त्यतः वैद्यगुणमेव तेषु प्रधानमिति तदाहरणे नूनं वैद्यैर्यतितव्यमित्याशयः । चतुर्विधां वैद्यवृत्तिमाह मैत्रीति। मैत्री सर्वभूतेषु मित्रवद् व्यवहारः । आर्त्तेषु रोगिषु कारुण्यं सदयव्यवहारः । शक्ये साध्यव्याधिते व्याधिनिराकरणेन प्रीतिः सन्तोषः प्रकृतिस्थेषु स्वस्थेषु च उपेक्षणं तत्र न किञ्चित् कर्तव्यमस्तीत्युपेक्षा ॥ २४-२६ ॥

अध्यायार्थमुक्तोपसंहरति तत्र श्लोकाविति। ब्राह्मी बुद्धिः मैत्र्यादिका। अतिरोहितार्थमन्यत् ॥ २७-२८ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां
चरकटिप्पण्यां सूत्रस्थाने खुड्डाकचतुष्पादो नाम
नवमोऽध्यायः ॥ ६ ॥

सेव्ये रोगिणि । शौचमित्यमालिन्यं मलिने हि सेवके रोगिण्यपि तन्मल-सम्पर्को भवितुमर्हेदित्याशय: । रोगिगुणानाह स्मृतिरिति । स्मृतिमानेव स्वव्याधेरितिवृत्तं ज्ञापयितुं समर्थ इति स्मृतिरपि रोगिगुणत्वेन परिगृहीता । निर्देशकारित्वं भिषगुपदेशमनुसृत्य कर्मकरत्वम् । अभीरुत्वं महत्यपि व्याधौ भीत्यभाव: । भीरोर्हि स्वल्पेऽपि व्याधौ भीतिवशाद् ओज:क्षयो भवति। ज्ञापकत्वं यथावद् भिषजे वेदनानां निवेदकत्वम् ॥ ५—६ ॥

कारणमिति । एतत् षोडशगुणं पादचतुष्टयं सिद्धौ विकारनिवृत्तौ कारणं भवतीति शेष: । परन्तेषु भिषज एव प्राधान्यं हेतुगर्भविशेषणैराख्याप-यति विज्ञातेति । विज्ञाता व्याधे: शासिता कर्तव्याकर्तव्येषु । योक्ता भेषजा-दीनां प्रयोगकर्ता । अर्थमिमं दृष्टान्ताभ्यां समर्थयति—पक्ताविति । पक्तौ पाकक्रियायाम् । इन्धनं दाह्यं काष्ठम् । विजेतु: सेनानायकस्य । चमू: सैन्यानि प्रहरणानि शस्त्राणि । पुनश्च व्यतिरेकदृष्टान्तेन तमर्थं द्रढयति मृद्दण्डेति । मृद् घटोपादानं, दण्ड: कुलालचक्रभ्रामक: । चक्रं घटनिर्माणयन्त्रम् । सूत्रं घटकपालच्छेदार्थं गुण: । आदिपदेन सलिलादे: परिग्रह: । गुणं घटाद्यत्पा-दनरूपम् नावहन्ति न क्रियासम्पादकं भवन्तीत्यर्थ: । पुनर्वैद्यस्य प्राधान्यं समर्थयति गन्धर्वेति । उपायप्रतीक्षिण: चिकित्स्यमानस्य जनस्येत्यर्थ: । उपायशब्दश्चिकित्सावाची यद् वक्ष्यति—"उपाय: पुनर्भिषजादीनां सौष्ठव-मभिसन्धानञ्च सम्यक्" इति (वि० ८ अ०) । एतेन सत्यपि गुणवति पादत्रये इति ज्ञेयम् । सुदारुणा विकारा: यदाशु गन्धर्वपुरवत् नाशं यान्ति इतरे केचन अज्ञभिषजोपक्रान्ता इत्यर्थ: । आशुवृद्धिं यान्ति अत्र ज्ञाज्ञौ भिषजौ कारणे भवत इति शेष: । विदुषा भिषजोपक्रान्ता विकारा नाशं यान्ति अज्ञेन च वृद्धिं यान्तीत्यर्थ: । गन्धर्वपुरमपि क्षणादर्शनं यातीति प्रवाद: । अत: आत्माहुत: आत्मनैव आत्मन: अग्नावाहुतिदानं वरं मनाक्प्रियं न तु अज्ञेन प्रवर्तिता चिकित्सा ॥ १०—१५ ॥

अज्ञं भिषजं निन्दति पाणीति । यथा अचक्षुरन्ध: पाणिचारात् पाणिना मार्गं परामृश्य भीतभीतवद् गच्छति तथा अज्ञ: मारुतवशा नौरिव कर्मसु चिकित्सासु चरति। यथा वातवेगेन विज्ञकर्णधारविहीना नौका पथि अपथे वा गच्छति तथैव मूर्खो वैद्यश्चिकित्सति तेन व्याधेर्गतिपरिवर्तनं भवि-तुमर्हति न वेति विचारयितुमशक्यत्वादिति भाव: । पुनश्च स यदृच्छया समापन्नं स्वयमेवोपशान्तव्याधिकं नियतायुषं कमपि रोगिणमुत्तार्य निरुजं कृत्वा भिषङ्मानी प्राज्ञो भिषगहमित्यहंकृत: सन् अनियतायुषामिति येषां सम्यक् चिकित्सया फलं भवेत् तादृशो शतं जनं निहन्ति चिकित्साव्यपदे-शेनेति शेष: । आचार्यमाठरेणापि सांख्यकारिकाव्याख्यायां मूर्खवैद्यवर्णनायां एतत्समार्थकौ द्वौ श्लोकौ प्राह यथा—

"यानि कानि च मूलानि येन केन च पेषयेत् ।
यस्मै कस्मै च दातव्यं यद्वा तद्वा भविष्यति ॥

वैद्यवैद्य नमस्तुभ्यं क्षपिताशेषमानव ।
त्वयि विन्यस्तभारोऽयं कृतान्तः सुखमेधते ॥" इति ॥१६-१७॥

अतएवायुर्वेदज्ञाने सम्यक् प्रयतितव्यं भिषजेत्याह तस्मादिति । शास्त्रे आयुर्वेदग्रन्थपाठे, अर्थविज्ञाने तदर्थबोधे, प्रवृत्तौ स च विधिः कुत्र प्रयोक्तव्य इति बुद्ध्वा कर्मकरणे, कर्मदर्शने पुनः पुनः कर्म कृत्वा कर्मफल-दर्शने एतच्चतुष्टये युक्तः सम्यग् विबुद्धः भिषक् प्राणाभिसरः प्राणान् अभि सर्वतोभावेन लक्ष्यीकृत्य सरति गच्छति चिकित्सतीति अन्वर्थसंज्ञया उच्यते । हेताविति । हेतौ रोगाणां निदाने लिंगे व्याधिलक्षणे प्रशमने व्याधि-निग्रहे अपुनर्भवे उपशान्तानां व्याधीनामपुनरुत्पत्तौ एतच्चतुर्विधं ज्ञानम् । यथाहि भीरोर्हस्तगतमुत्तममपि शस्त्रं यथा वा मूर्खस्य गृहगतं शास्त्रं यथा वा मद्यभाण्डगतं गंगाजलं पात्रदोषाद् दुष्टं भवति तथा आयुर्वेदजिज्ञासुः स्वां प्रज्ञां विशोध्य तज्ज्ञानं लभेत इत्याह शास्त्रमिति । वैद्यगुणानाह—विद्येति । विद्याशास्त्रज्ञानं वितर्कः ऊहापोहविचारः विज्ञानमननुभूतविषये बुद्धेः प्रसारः, तत्परता दक्षता तत्रासाधारणी श्रद्धा वा । क्रिया बहुशः कर्मकरणम् ॥ विद्येति विद्या आयुर्वेदज्ञानम् । मतिः यथार्हे क्षेत्रे प्रयोगबुद्धिः । कर्मदृष्टिः चिकित्साकर्मणि सततसावधानता । अभ्यासः पुनः पुनः कर्मकरणेन चिकित्सापटुत्वम् । सिद्धिः प्रायः सर्वत्रैव रोगापनयनम् । अतएव आश्रयः पीडितानां जनतानामाश्रयस्वरूपः । सद्भूतं सम्यङ्निरुक्तं वैद्यशब्दमर्हेत् वैद्यशब्दभाग्भवितुं योग्यो भवेदित्यर्थः ॥ १८-२३ ॥

शास्त्रमिति । शास्त्रं शास्त्रार्थज्ञानं प्रकाशार्थं ज्योतिरालोकस्वरूपम् । आत्मनो वैद्यस्य बुद्धिः दर्शनं दर्शनेन्द्रियस्वरूपम् । यथाहि सम्यगालोकिते देशे प्रत्यक्षत उपलभ्य कर्मकरणं नोपालम्भाय भवेत् तथैव स्वबुद्ध्या शास्त्रार्थमवगम्य चिकित्सन् वैद्यो नोपालम्भभाग्भवतीत्याशयः । त्रयः पादाः द्रव्यातुरोपस्थातारः । निर्गुणे वैद्ये सम्यग्गुणवन्तोऽप्येते निरर्थका भवन्त्यतः वैद्यगुणमेव तेषु प्रधानमिति तदाहरणे नूनं वैद्यैर्यतितव्यमित्याशयः । चतुर्विधां वैद्यवृत्तिमाह मैत्रीति । मैत्री सर्वभूतेषु मित्रवद् व्यवहारः । आर्त्तेषु रोगिषु कारुण्यं सदयव्यवहारः । शक्ये साध्यव्याधिते व्याधिनिराकरणेन प्रीतिः सन्तोषः प्रकृतिस्थेषु स्वस्थेषु च उपेक्षणं तत्र न किञ्चित् कर्तव्य-मस्तीत्युपेक्षा ॥ २४-२६ ॥

अध्यायार्थमुक्तोपसंहरति तत्र श्लोकाविति । ब्राह्मी बुद्धिः मैत्र्यादिका । अतिरोहितार्थमन्यत् ॥ २७-२८ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां
चरकटिप्पण्यां सूत्रस्थाने खुड्डाकचतुष्पादो नाम
नवमोऽध्यायः ॥ ६ ॥

दशमोऽध्यायः ॥

पूर्वाध्याये षोडशकलं भेषजं व्याधिपरिमोक्षायालमिति समासतः प्रतिपादितं तत्र बहुधा शंका वर्तत इति तमेवार्थं व्यासतो व्याचिख्यासुरध्यायान्तरमारभते अथात इत्यादिना। व्यासतो व्याख्यानादध्यायस्यास्य महाचतुष्पाद इति संज्ञा। चतुष्पादमिति। आरोग्याय कारणत्वाद् वैद्यानामपि भेषजत्वं सिध्यति। षोडशकलं षोडशगुणसम्पन्नम्। युक्तियुक्तं यथावत् प्रयुक्तम्। आरोग्याय व्याधिपरिमोक्षाय अलं समर्थं स्यादिति शेषः ॥१-३॥

सिद्धान्तेऽस्मिन् मैत्रेयः शंकां प्रदर्शयति नेति। मैत्रेय इति। किं कारणमिति युक्तियुक्तं भेषजं कथं नारोग्याय प्रभवति इत्याह दृश्यन्त इति। सर्वत्रैव एवमुपलभ्यते विद्यादिषोडशगुणसम्पन्नवैद्यादिपादचतुष्टयेनोपचरितोऽपि कश्चिन्म्रियते कश्चिदारोग्यं वा लभते। दृष्टान्तैरर्थमिमं द्रढयति तद् यथेति। श्वभ्रे जलमात्रहीने गर्ते। पांशुधाने स्तूपीकृतधूलिराशौ। अयमर्थः-यथाहि अन्यस्मात् कारणात् परिपूर्णे सरसि प्रसिक्तमञ्जलिमितं जलं न तस्योत्कर्षाय भवेत् अतोऽकिञ्चित्करं स्यादेव तथैव अन्यैः कारणैरपगतव्याधौ रोगिणि भेषजप्रयोगो धूलिराशौ धूलिमुष्टिनिक्षेपवद् अकिञ्चित्करः स्यात्। पुनर्जलमात्रहीने गर्ते प्रसिक्तमल्पमुदकं तं जलपूर्णं कर्तुमक्षममित्यकिञ्चित्करं भवेत् तथैव मरिष्यति व्याधिते भेषजप्रयोगः प्रवहमानायां नद्यां प्रवाहरोधाय धूलिमुष्टिनिक्षेपवत् अकिञ्चित्कर एव। पुनरप्यकिञ्चित्करत्वे हेत्वन्तरं दर्शयति तथाऽपरे इति। पत्रचिकित्सायां उपकरणोपस्थात्रोरभावादपि मूर्खवैद्येनोपक्रान्ता अहिताशिनोऽपि केचिन् म्रियन्ते केचिच्च जीवन्तीति दृश्यते। उभयदर्शनात् सिद्धान्तमाह अत इति। प्रतिकुर्वन् यथावच्चिकित्सन् सिध्यति आरोग्यं लभते। अप्रतिकुर्वन् अगुणवच्चतुष्पादेनोपक्रान्तः साकल्येन वा कामपि चिकित्सामकुर्वन्। अतश्चिकित्सायाश्चिकित्सायाश्च साम्यं दृश्यते। मानवो हि अदृष्टवशादेव जीवति म्रियते वेति चिकित्सा सर्वथा निरर्थिकेति शंका ॥ ४ ॥

शंकां परिहरति मैत्रेयेति। आतुराः व्याधिताः चिकित्सिता अपि म्रियन्ते इति यदुक्तं त्वया तदनुपपन्नं न साधूपपद्यते। कथमित्याह न हीति। हि यतः व्याधिश्चेत् साध्यो भवेत् तर्हि कथमपि भेषजमकारणं भवितुं नार्हति। ये पुनर्भेषजाप्रयोगेणैव आरोग्यं लभन्ते तेषां भेषजप्रयोगे किमपि आरोग्ये वैशिष्ट्यं नास्ति इति न तेषाम् आरोग्ये नूनं किमपि वैशिष्ट्यं भवेदेवेत्यर्थः। अर्थमेतं दृष्टान्तेनोपपादयति यथा हीति। यद्यपि भेषजप्रयोगप्रयोगाभ्यां तुल्यमेवारोग्यं फलं भवति तथापि तयोरारोग्यलाभयोः किञ्चिद् वैशिष्ट्यं वर्तत इति पतितं पुरुषमुत्थापयन्ननुत्थापयँश्च सर्वं एव परीक्षितुं शक्नोतीत्याशयः। पतितो ह्यनाहते मर्मणि स्वयमेवोत्थातुं शक्योऽपि उत्थानायान्यस्य सहायतां लभमानो न चिरमेव अक्लेशेनैव उत्थातुं शक्यो

विना साहाय्येन तु चिरेण, बहुक्लेशेनैवेति विशेषः चिकित्सिताचिकित्सितयोरिति ज्ञेयम्। चिकित्सायामचिकित्सायां वा मरणसाम्ये उत्तरयति ये चातुरा इति। केवलाद्भेषजादिति सम्पूर्णभेषजप्रयोगादपीत्यर्थः। तत्र हेतुमाह न चेति। सर्व एव व्याधिताः भेषजोपपन्ना सम्यक्चिकित्सिताः न समुत्तिष्ठेरन् आरोग्यं लभेरन्। कथमित्याह नहि सर्वे व्याधय इति। हि यतः सर्व एव व्याधयः उपायसाध्याश्चिकित्सासाध्या न भवन्ति। परन्तु ये उपायसाध्यास्तेषामपि अनुपायेन अचिकित्सया न सिद्धिरारोग्यमस्ति। पुनरसाध्यायामपि चिकित्सा नास्तीत्याह न चासाध्यानामिति। ज्ञानवानपि भिषक् षोडशगुणसम्पन्नोऽपि मुमूर्षुं रोगिणमरोगं कर्तुमलं समर्थः स्यात्। अतः साध्यासाध्यतां परीक्ष्यैव कर्म कर्तव्यमित्याह परीक्ष्येति। तत्र दृष्टान्तमाह यथाहीति। योगज्ञः लक्ष्यभेदकुशलः। इष्वासः शरनिक्षेपकारी। नातिविप्रकृष्टे नातिदूरवर्तिनि महति काये वृहत्काये लक्ष्ये इत्यर्थः। नापराधो भवति लक्ष्यभेदे समर्थो भवति। वीक्ष्य कर्मारभमानः साध्यासाध्यं निरूप्य साध्यं रोगिणं चिकित्सन्। उपसंहरति तस्मादिति। रोगाणां साध्यतासाध्यताभ्यां जन्तवः समुत्तिष्ठन्ते म्रियन्ते च न तु भेषजाभेषजाभ्याम्। साध्योऽपि अप्रतिक्रियमाणोऽसाध्यतामेतीत्यस्ति भेषजापेक्षा इति भावः॥ ५॥

साध्ये व्याधौ भेषजापेक्षा वर्तत इति पुनः समाधत्ते इदञ्चेदञ्चेति। कान्ततमो भवतीति इदञ्चेदञ्च नः प्रत्यक्षं भवतीति योजना। अनातुरेण दोषरहितेन। क्षामं क्षीणम् आप्याययामः वृंहयामः। अपतर्पयामः लंघनादिभिः कर्शयामः। मूलविपर्य्ययेण निदानवैपरीत्येन॥ ६॥

साम्प्रतं साध्यासाध्यचिकित्सायां गुणदोषावाह भवन्तीति। काले प्रागेव साध्यावस्थायामेवेत्यर्थः। अर्थस्य हानिरौषधादिव्ययेन। उपक्रोशं व्याधितस्यात्मीयैः कृतमपवादम्। असंग्रहम् अप्राप्तिम्। साध्यासाध्यविभेदानाह सुखसाध्यमित्यादि। साध्यं हि प्राग्द्वेधा भिद्यते सुखसाध्यं कृच्छ्रसाध्यञ्चेति। यथा असाध्यमपि द्विविधं भवति याप्यमनुपक्रमञ्चेति। पुनः साध्येष्वपि उत्तममध्यमाधमभेदेन त्रयो भेदा भवन्ति निश्चितत्वात्। असाध्यस्तु अनिश्चित एवेति न तत्र तथा भेदाः सन्तीत्याह साध्यानामिति॥७-१०॥

सुखसाध्यस्य लक्षणमाह हेतव इति। हेतवो रोगोत्पादका मिथ्याहारविहारादयः। पूर्वरूपाणि भाविव्याधिबोधकानि लक्षणानि। रूपाणि उत्पन्नव्याधिज्ञापकानि लिंगानि। दूष्याः रसरक्तादिधातवः। तुल्यगुणः दोषेण सह समानगुणः यथा कफदोषो रसश्च दूष्यः एवमादि। प्रकृतिरिति तत्प्रकृतिकस्य तद्दोषजन्यव्याधित्वे दोषः प्रकृतिः स्यात्। कालगुणः शीतोष्णादिः तुल्यः दोषसमानः यथा पैत्तिके व्याधौ कालो ग्रीष्म इति। देशस्तु आतुरः क्षेत्रञ्च दुरुपक्रम इति चिकित्सायामयोग्यः यथा बालवृद्धगर्भिणीनां सर्व एव व्याधयो दुरुपक्रमा भवन्ति यथा वा शीतप्रधाने देशे कफजन्यव्याधिरिति। गतिः ऊर्ध्वमधस्तिर्यक् चानवत्वमचिरोत्पन्नत्वम्। उपद्रवो रोगोत्पादकदोषज-

न्योऽन्यविकार: यथा ज्वरे दाहश्वासादय: । समुत्पत्तौ रोगोत्पत्तौ एको दोष: एकदोषज इत्यर्थ: । देहश्चापि रोगिण: सर्वौषधक्षम: इति सर्वेषामौषधानां वीर्यादिकं सहते इत्यर्थ: । चतुष्पादस्य गुणवच्चिकित्सकादेरुपपत्ति: तत्रोपस्थितिरित्यर्थ: ॥ ११-१३ ॥

कृच्छ्रसाध्यस्य लक्षणमाह निमित्तेति । अयमर्थ:—कालादीनामेकस्यापि साम्ये, दोषदूष्ययो: साम्ये, दोषस्य प्रकृतित्वे, दोषकालगुणयोस्तुल्यत्वे वा, अनधिकोपद्रवयुक्तं वा गर्भिण्यादीनां ये व्याधयो भवन्ति तान्, शस्त्रादिसाध्यं वा अनवं दीर्घकालोत्पन्नं वा कृच्छ्रदेहजमिति यस्मिन् सर्वा: क्रिया न योग्या भवन्ति तद्देहे उत्पन्नं वा, एकमार्गगं पुन: नातिपूर्णचतुष्पादं यत्र भेषजादीनां कस्याप्यगुणवत्त्वं वर्तते । द्विपथं मार्गद्वयगं पुनर्नातिकालं सद्य एवोत्पन्नं वा द्विदोषजञ्च व्याधिं कृच्छ्रसाध्यं विजानीयादिति ॥ १४-१६ ॥

याप्यस्य लक्षणमाह शेषत्वादिति । असाध्यो हि व्याधिर्न कदापि सिध्यति परन्तु तत्र पथ्यसेवया याप्य: कथञ्चित् पालनीय: स्यात् । तत्र हेतुमाह आयुष: शेषत्वादसाध्योऽपि याप्यो भवतीत्यर्थ: । पथ्यसेवया नानाविधभेषजादिप्रयोगेण लब्धमल्पं सुखं यत्र तं पुनरल्पेन हेतुनाऽपचारेण आशुप्रवर्तकं त्वरितं वृद्धिगतं, गम्भीरमन्तर्मार्गगं गम्भीरधातुस्थं वा, बहुधातुस्थं रसरक्तादिबहुधातुगतं नित्यानुशायिनं नित्यमनुशेते निरवच्छिन्नतया वर्तमानमित्यर्थ: । एवम्भूतं द्विदोषजं याप्यं विद्यात् ॥ निष्प्रतिक्रियलक्षणमाह तद्वदिति । क्रियापथमतिक्रान्तं संशोधनादीनां कर्मणामयोग्यम् । सर्वमार्गानुसारिणमिति शाखादिर्बहिर्मार्ग, मर्मसन्ध्यादिकं मध्यमं मार्ग, कोष्ठादिकमन्तर्मार्गञ्चानुसरतीत्यर्थ: । औत्सुक्यमिन्द्रियचाञ्चल्यम् । अरतिरेकधा देहानवस्थानम् । संमोहो मनोऽनवस्थानम् तयोरेकरम् । इन्द्रियनाशनमिन्द्रियैर्विषयग्रहणाभाव: यत्र भवति तत् । अरिष्टं नाम नियतमरणाख्यापकं लिंगं तेन सह वर्तमानं व्याधिं प्रत्याख्येयं विद्यादिति पूर्वेणान्वय: ॥१७-२०॥

एवं व्याधे: साध्यासाध्यतां परीक्ष्य भिषजा चिकित्सा कर्तव्या इत्याह भिषजेति । कर्मसमारम्भ: चिकित्साप्रारम्भ: । अतिरोहितार्थमन्यत् २१-२२

अध्यायार्थमुक्त्वा अध्यायं समापयति तत्र श्लोकाविति ॥ २३-२४॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां
चरकटिप्पणेयां सूत्रस्थाने महाचतुष्पादो नाम
दशमोऽध्याय: ॥ १० ॥

एकादशोऽध्यायः ।

नन्वारोग्यार्थमेते उपष्टम्भाः किमर्थकाः कथं वा सर्वस्वेनापि आरोग्यलाभाय प्रयतन्ते मानवा इति तेषामेषणात्रयं व्याख्यातुकामोऽध्यायान्तरमारभते अथात इत्यादिना । तिस्रः एषणाः=प्राप्तुमिच्छाः अधिकृत्य प्रवृत्तोऽध्यायः तिस्रैषणीयः । एषणात्रयमुद्दिशति इहेति । इह अस्मिन् लोके । अनुपहतं सत्त्वादिकं यस्य तेन । इह अस्मिन् देहे अमुष्मिन् लोके देहान्तरे इत्यर्थः । हितमिच्छता पुरुषेण एषणाः प्रार्थनीया विषयाः पर्येष्टव्या लब्धुमुद्योगः कर्तव्यः । कास्ता इत्याह प्राणैषणेति । एषणात्रयन्तु अनुपदमेव व्याख्यातं भविष्यति ॥ १—३ ॥

तत्र प्राक् प्राणैषणां व्याचष्टे आसामिति पूर्वतरं श्रेष्ठमित्यर्थः । प्राणपरित्याग इति । हि यतः प्राणपरित्यागे प्राणनाशे सर्वत्यागः धर्माधर्माद्युपार्जनं निरर्थकं भवेदित्यर्थः । अतएवादौ प्राणरक्षां विधाय धनधर्माद्युपार्जनं विधेयमित्याशयः । तस्य चोपायमाह—तस्यानुपालनमिति । अनुपालनं विधेयमित्यर्थः । स्वस्थस्य ये खलु स्वस्थास्तैः स्वस्थवृत्तिरनुपालनीया । आतुरस्य च अप्रमादः सावधानता त्वरितमेव व्याधिनिराकरणाय प्रचेष्टा । यथोक्तमिति अस्मिन् तन्त्रे स्वास्थ्यरक्षणाय विकारप्रशमनाय च यद्यद्विधानमुक्तमित्यर्थः । अनुवर्तमानः प्रतिपालयन् ॥ ४ ॥

द्वितीयामेषणां विवेचयति अथेति । प्राणेभ्योऽनन्तरं प्राणान् संरक्ष्येत्यर्थः । नह्यत इति धनं विना दीर्घमायुः क्लेशप्रदमेव स्यादिति भावः । उपकरणानि जीविकार्थं भोगार्थञ्च द्रव्याणि तद्विहीनं जीवनं पापमेव मन्तव्यमित्यर्थः । अनवमतः सम्मानभाजनः सन् दीर्घजीवितं यथा स्यात् तथा जीवति ॥ ५ ॥

तृतीयामेषणां व्याचष्टे अथेति । अत्र परलोकैषणायां संशयः । संशयप्रकारमाह कथमिति । इतः अस्मात् संसारात् च्युताः अपगता मृता इत्यर्थः भविष्यामो नवेति नः पुनर्जन्म भविता नवेति । पुनर्भविष्यामश्चेत् कथं केनोपायेन भविष्यामः । संशये कारणमाह—कुत इति । एके चार्वाकमतानुवादिनः प्रत्यक्षमात्रप्रमाणवादिनः सन्ति ये पुनर्भवस्य परोक्षत्वात् प्रत्यक्षाग्राह्यत्वात् पुनर्न भविष्याम इति निश्चिन्वन्ति—यदुक्तं तैः "यावज्जीवेत् सुखं जीवेदृणं कृत्वा घृतं पिबेत् । भस्मीभूतस्य देहस्य पुनरागमनं कुतः" । इति । अपरे केचिदागमप्रत्ययाद् आप्तोपदेशं प्रमाणमुररीकृत्य पुनर्भवं स्वीकुर्वन्ति परन्तु तत्र कथं भविष्याम इति शंका वर्तत एव श्रुतेर्वेदार्थस्य भेदात् । तेषु केचिन्मातरं पितरं वा जन्मकारणं मन्यन्ते, केचिद्वा स्वभावं केचिद्वा ईश्वरनिर्माणं केचिद्वा यादृच्छिकं जन्म वदन्ति । अतः संशयो भवितुमर्हत्येव ॥ ६ ॥

तत्र संशयं निराकरिष्णुः प्राक् प्रत्यक्षमात्रप्रमाणवादिनां मतमालोच-

यति तत्रेति । विचिकित्सा संशय: । तत्र हेतुमाह प्रत्यक्षमिति । न खलु जागतिकं वस्तुजातं प्रत्यक्षेणैवोपलभ्यते तत्र बहुतरं ह्यप्रत्यक्षं वर्तते, यच्च आगमप्रमाणेन अनुमानेन युक्तिभिर्वा उपलभ्यते । पुन: प्रत्यक्षमात्रप्रमाणवादिनां प्रत्यक्षमपि भवितुं नार्हति इन्द्रियाणामप्रत्यक्षत्वादित्याह यैरेवेति । न खलु कश्चित्तस्य चक्षुरिन्द्रियं प्रत्यक्षं कर्तुमलं भवति अतश्चक्षुषोऽप्रत्यक्षात् तद्दृष्टस्यापि पदार्थस्य ज्ञानं प्रमाणं भवितुं नार्हति इत्याशय: ॥ ७ ॥

नन्वस्ति चेत् पुनर्भव: कथं न दृश्यते इति युक्त्यन्तरेण प्रतिपादयति सतामित्यादि। द्रव्यसत्त्वेऽपि नानाविधात् कारणात् तस्य प्रत्यक्षं न सम्भवति तानि कारणान्याह अतिसन्निकर्षात् अक्ष्णोरतिसामीप्यात् सदपि वस्तु न दृश्यते । अतिविप्रकर्षात् अत्युच्चे आकाशे उड्डीयमान: कपोत: सन्नपि न दृश्यते । आवरणात् प्राकारान्तरितं जनं सन्तमपि न द्रष्टुमलं भवति । करणदौर्बल्यात् नेत्रदोषाद्दूरं समीपं वा किमपि न पश्यति । मनोऽनवस्थानात् अन्यमनस्कतया पुरतो गतोऽपि हस्ती न दृश्यते । समानाभिहारात् समुद्रे पतितं वृष्टिजलं नोपलभ्यते । अभिभवात् अहनि सूर्य्यकिरणाभिभवान् नक्षत्राणि न दृश्यन्ते । अतिसौक्ष्म्यात् अणुद्रव्यं नोपलभ्यते । अत: प्रत्यक्षमात्रप्रमाणपराणां सत्स्वेवैतेषु पदार्थेषु अप्रामाण्यं प्रसज्येत इत्यत: प्रत्यक्षमेवास्तीति वाक्यमप्रमाणमस्ति ॥ ८ ॥

आत्मन: पितृजत्वादिश्रुतयो न प्रमाणं भवितुमर्हन्ति युक्तिविरोधादित्याह श्रुतय इति । कास्ता युक्तय इत्याह—आत्मेति । अयमर्थ:—पुत्रोत्पत्तौ पितुर्मातुर्वा आत्मैव पुत्रशरीरे सञ्चार्यं तमुत्पादयितुं शक्नोति स च सञ्चार: पूर्णतया अंशतो वा भवितुमर्हति । तत्र पूर्णतया सञ्चारे पुत्रोत्पत्त्यनन्तरमेव पितुर्मातुर्वा मरणं भवेत् । न तु तत्तथा, अत: पूर्णतया सञ्चारो न समीचीन: । पुनरतिसूक्ष्मस्यात्मन: अवयवाभावात् अंशतोगमनमपि न युज्यते । ननु पितुर्मातुरात्मा न याति, बुद्धिर्मनो वा यातु तदपि पूर्ववत् न सम्भाव्यते । तयोरपि अतिसूक्ष्मत्वादवयवकल्पना निरर्थिका भवेत् । पूर्णतया गमने च पित्रोर्निर्बुद्धित्वं विमनस्त्वं वा आयास्यति इत्याह बुद्धिरिति । पुनश्च मातापितृकारणत्वे जंगमोत्पत्तौ चतुर्विधा योनिर्भवितुं नार्हति, स्वेदजोद्भिज्जानां मातापितृकारणत्वं नोपलभ्यते इत्याह येषामिति ॥ ९—११ ॥

ननु स्वभावाद् यथा नानाविधेन अमादकद्रव्यसंयोगेन मद्ये मदशक्तिरुद्भवति तथा पृथगचेतनधातुसंयोगाच्चेतनं शरीरं भवतु इत्याशंकां परिहरति विद्यादिति । यदि संयोगे उत्पत्तौ षण्णां रसरक्तादीनां धातूनां स्वलक्षणं चेतनशरीरोत्पत्तिरूपमित्यर्थ: । स्वाभाविकं विद्यात् स्वभावादेव भवतीति जानीयात् तर्हि वियोगे मरणेऽपि तेषां कर्मविभागरूपमेव कारणं स्यात् । यथाहि तन्तुसमूहसंयोगेन पटोत्पत्ति: स्यात् तन्नाशेऽपि तेषां विभाग एव कारणं भवेत् । परन्तु जीवमरणे तेषां धातूनां विभागो न दृश्यते इति तेषां संयोगमात्रं तदुत्पत्तौ कारणं भवितुं नार्हति इत्याशय: । अत्र गर्भोत्पत्तौ

तच्छुक्रस्य कारणताभावात् षण्णां रसरक्तमांसमेदोऽस्थिमज्जानामेव संयोगः कारणं भवति। खण्डिते च गर्भशरीरे एते षडेव धातव उपलभ्यन्त इति शुक्रस्यानुल्लेखः ॥ १२ ॥

परनिर्माणपक्षं विचारयति अनादेरिति। परनिर्मितिरीश्वरेण निर्माणमनादेरात्मनो नेष्यते। अनादित्वात्तस्योत्पत्तिर्न भवितुमर्हति। पर इति अयमर्थः-परशब्देन चेत् परमात्मा बुध्येत तर्हि ओमिति ब्रूमः। महाकाशाद् घटाकाशपटाकाशवद् अग्नेः स्फुलिंगवच्च परमात्मन एकांशविशेषः प्रतिपुरुषगतो जीवात्मा भवतीति तादृशी परनिर्मितिरिष्टैव ॥ १३ ॥

नास्तिक्यबुद्धिं निन्दति नेति। प्रत्यक्षमात्रप्रमाणोपलम्भात् तेषां परीक्षा अन्यत्प्रमाणं नास्ति तेन च परीक्ष्यमपि प्रमेयमपि किञ्चित् वस्तुजातं नास्ति। सर्वमेव प्रत्यक्षग्राह्यं सिद्धमन्यथाऽसिद्धमितिमतवादेन कस्मिन्नपि कार्य्ये कर्त्तुः कारणस्य वा प्रयोजनं नास्ति। देवादयः सर्व एव परोक्षा इति तेऽपि न सन्ति। अत एष नास्तिकग्रहः पातकेभ्यः परं पातकं भवतीति शेषः। अत एतामसमार्गप्रसृतां साधुविगर्हितपथगां बुद्धिं नास्तिक्यबुद्धिं विमुच्य सतां बुद्धिप्रदीपेन प्रमाणैरित्यर्थः। सर्वं यथायथं पश्येत् ॥१४-१६॥

सम्प्रति परपक्षं निरस्य स्वपक्षं स्थापयति द्विविधमित्यादि। सर्वं प्रमाणलभ्यं प्रमेयं वस्तुजातं द्विविधं सच्च असच्च। तत्र सदिति भावपदार्थाः द्रव्यगुणकर्म्मसामान्यविशेषसमवायाः। असदिति अभावः सर्वमेतत् प्रमाणगम्यम्। तेषां चतुर्विधा परीक्षा, परीक्ष्यते निश्चितरूपेण ज्ञायतेऽनयेति परीक्षा प्रमाणमित्यर्थः। कास्ता इत्याह-आप्तोपदेश इत्यादि। विना आप्तोपदेशात् प्रत्यक्षज्ञानमपि भवितुं नार्हति। इन्द्रियैर्गृहीतेऽपि विषये आप्तोपदेशमन्तरेण गवादिज्ञानं न भवितुमर्हति इति दृष्टचरमेव। इत्याप्तोपदेशस्य प्राधान्यात् तस्यैव प्राङ् निर्देशो भवति ॥ १७ ॥

क्रमशस्तानि प्रमाणानि व्याचष्टे आप्ता इति। ये तपोज्ञानबलेन तपस्याप्रभावेण आत्मज्ञानेन च रजस्तमोभ्यां निर्मुक्ताः सत्त्वगुणमात्राश्रयाः पुनरपि येषां तत एव त्रिकालं ज्ञानं भूतभविष्यद्वर्तमानरूपम् अमलं मलरहितम् अव्याहतं च सदा भवेदिति शेषः। ते आप्ताः त एव शिष्टाः अनुशासनकर्तारः त एव विबुद्धाः सर्वज्ञानसम्पन्नाः अतस्तेषां वाक्यं संशयरहितं सत्यं भवति। रजस्तमोराहित्यात्ते असत्यं कथं वक्ष्यन्ति न वक्ष्यन्त्येवेत्यर्थः ॥ १८-१९ ॥

प्रत्यक्षलक्षणमाह आत्मेत्यादि। आत्मन इन्द्रियाणां मनसः अर्थानां विषयाणां सन्निकर्षात् संयोगात् तदात्वे तात्कालिकी या व्यक्ता स्फुटा बुद्धिः निश्चयात्मिकेति यावत्। प्रवर्तते जायते तत् प्रत्यक्षं प्रमाणम्। यत्र घटस्य आत्मनश्चक्षुषोः मनसश्च संयोगात् घटमहं पश्यामीति या निश्चयात्मिका बुद्धिर्भवति तदेव घटस्य चाक्षुषं प्रत्यक्षं भवति। एवमात्मनः सन्निकर्षाभावान्न पश्यति मृतः। चक्षुःसन्निकर्षाभावान्नान्धः किञ्चित् पश्यति। मनः-

सन्निकर्षाभावान्न दृष्टमन्यमनस्केन विषयाभावान्न वायुर्दृश्यो भवति। सन्निकर्षाभावान्नातिसूक्ष्मं दृश्यं भवति ॥ २० ॥

अनुमानं लक्षयति प्रत्यक्षेति। प्रत्यक्षपूर्वं ज्ञानमनुमानम्। यत्र प्रत्यक्षेण हेतूपलम्भात् साध्यमनुमीयते इत्यर्थः। प्रत्यक्षन्तु वर्तमानकालिकमनुमानन्तु त्रैकालिकं भवतीत्याह त्रिकालमिति। पुनश्च तत् त्रिविधं पूर्ववत् शेषवत् सामान्यतो दृष्टञ्चेति। यत्र सजातीयो दृष्टान्तः प्रत्यक्षेणोपलभ्यते तत् पूर्ववदनुमानम्। यथा धूमदर्शनेन वह्नेरनुमानं भवति। यत्र यत्र धूमस्तत्र तत्र वह्निरिति व्याप्तौ तत्सजातीयो दृष्टान्तः महानसादिषु प्रत्यक्षत उपलभ्यत एवेत्येतत् पूर्ववदनुमानम्। एतच्च वर्तमानकालिकं भवति। गर्भदर्शनान् मैथुनानुमानमतीतकालिकमेवंबीजं दृष्ट्वाऽनागतं फलमनुमीयते इत्येतत् भविष्यत्कालिकं भवति। सर्व एते विषया पूर्ववदनुमानेन ग्राह्याः। यत्र च सजातीयो दृष्टान्तः प्रत्यक्षेण नोपलभ्यते तत् सामान्यतो दृष्टम्। यथा इन्द्रियानुमानम्। रूपादिग्रहणरूपकार्यदर्शनाद् यत्र यत्र कार्य्यं तत्सकरणकमिति व्याप्त्या इन्द्रियानुमाने तत्सजातीयो दृष्टान्तो नोपलभ्यते। इन्द्रियाणि ह्यतीन्द्रियाणि भवन्ति। व्यतिरेकमुखेनानुमानं शेषवत् यथा नार्थान्तरः पटस्तन्तुभ्यः संयोगाभावाभावात् इति। अत्र यत्र यत्र संयोगाभावस्तत्र तत्रार्थान्तरत्वमिति व्यतिरेकदृष्टान्तेनानुमीयते इति तत् शेषवद् भवति ॥ २१-२२ ॥

युक्त्याख्यं प्रमाणं प्राग् दृष्टान्तेन बोधयति जलेति। जलादीनामेकस्याप्यभावे न शस्योत्पत्तिर्भवतीति शस्योत्पत्तौ जलादीनां समवेतानामपेक्षा वर्तते न तु व्यस्तानामेषैव युक्तिः। पुनः षड्धातुसंयोगाद् पञ्चमहाभूतशरीरिसमवायात् गर्भोत्पत्तिः। मथ्यमन्थकौ अग्न्युत्पादनार्थं काष्ठखण्डौ तयोर्मन्थानं यथोक्तेन रूपेण भ्रामणं संयुक्ते एतत्त्रये वह्न्युत्पत्तिर्भवति। व्याधिनिवर्हणे व्याधिशमने चतुष्पादसम्पत्षोडशगुणयुक्ताश्चत्वारः पादाः युक्तियुक्ता भवति। इत्युदाहरणचतुष्टयेन युक्तिं विमृश्य पुनस्तल्लक्षणमाह बुद्धिरिति। या बुद्धिः बहुकारणयोगजान् भावान् एतेषां कारणानां योगेन एतदुत्पद्यत इति यथा दण्डसूत्रचक्रसलिलमृत्तिकादियोगेन घट उत्पद्यते यथा वा बिल्वादिदशमूलम् योगेन त्रिदोषं शमयतीत्येवं पश्यति सा युक्तिः त्रिकालाः भूतभविष्यद्वर्तमानकालाः। त्रिवर्गः धर्मार्थकामाः ॥ २३-२५ ॥

उपसंहरति एषेति। एषा प्रत्यक्षानुमानागमयुक्तिरूपा परीक्षा चतुर्विधा अन्या परीक्षा उपमानार्थप्राप्त्यादिका नास्ति तेषान्तु परीक्षाचतुष्टयान्तर्भावादित्यर्थः। परीक्ष्यं प्रमेयं वस्तु द्विविधं सद् आत्मा तदन्यत् समस्तमसत्। तया अनया परीक्षया पुनर्भवः पुनर्जन्म अस्तीति प्रमीयते ॥ २६ ॥

नन्वेषु केन प्रमाणेन पुनर्भवोऽस्तीति प्रमीयते इत्याह तत्रेति। तत्र तेषु प्रमाणेषु मध्ये वेदः आगमप्रमाणत्वेन ग्रहणीयः। अन्योऽपि शास्त्रवादः स्मृत्यादिः वेदार्थानामविरुद्धः परीक्षकैराप्तैर्मन्वादिभिः प्रणीतः शिष्टैः

पण्डितैरनुमतः लोकानुग्रहार्थं जनतानामुपकाराय प्रवृत्तः निर्मितः सोऽपि आप्तागमः। तेन आगमेन उपलभ्यते दानादीनि अभ्युदयं स्वर्गं निश्रेयसं मोक्षञ्च कुर्वन्ति तयोः पुनर्जन्मान्तरीयत्वात् पुनर्भवः स्वीकृत एव। पुनश्च धर्मद्वारेषु धर्मशास्त्रेषु अनतिवृत्तौ अतिरोहितौ सत्त्वस्य मनसो दोषौ रजस्तमोरूपौ येषां तेषां अपुनर्भवो न भवति पुनरुत्पत्तिर्भवत्येव इत्यदोषैः मनोदोषरहितैर्महर्षिभिः उपदिश्यते। न केवलं तेषामुपदेशमात्रं तैश्च महर्षिभिः दिव्यदृष्ट्या दृष्ट्वैव पुनर्भवोऽस्तीति उपदिष्ट इत्याह धर्मेति। धर्मद्वारावहितैः धर्मशास्त्रालोचनापरैः भयरागादिरहितैः ब्रह्मपरैरात्मज्ञानपरैः कर्मविद्भिः तपोयागादिकर्मज्ञैः अनुपहतसत्त्वबुद्धिप्रचारैः विभूत्युपलम्भाद् येषां मनसो बुद्धेश्च प्रचारः क्वाप्युपहतो न भवति एवम्भूतैः पूर्वपूर्वैर्महर्षिभिः मन्वत्रिविष्णुहारीतादिभिः। तेषां चक्षुरतीन्द्रियार्थदर्शित्वेन दिव्यमभूत् तेनैव चक्षुषा तैः पुनर्भवं दृष्ट्वा अस्तीत्युपदिष्टम्। एवमागमप्रमाणेन पुनर्भवस्य सत्ता ज्ञायत इत्यर्थः॥ २७–२९॥

ननु तेषां तथाकथितानामाप्तानामासीत्तत्र कोऽपि स्वार्थस्य गन्धोऽन्यथा पुनर्भवस्थापनाय कथं तेषां शिरःपीडाऽभवदिति विवक्षूणां मुखमण्डनाय पुनर्भवे केभ्यश्चित् प्रत्यक्षोपलब्धेभ्यः कारणेभ्यस्तस्य स्पष्टतोऽनुमानं भवितुमर्हतीत्याह प्रत्यक्षमिति। के च ते हेतव इत्याह मातापित्रोरिति। सु सुन्दरयोः धर्मशीलयोश्च पित्रोः कुत्सितमधर्मशीलञ्चापत्यम्। सोदराणाम् एकस्मिन्नेव कुक्षावुत्पन्नानां वर्णस्वराकृतिमनोबुद्धिभाग्यानां वैशिष्ट्यम्। केषाञ्चिद् राजकुले केषां वा हीनकुले जन्म। केऽप्यैश्वर्यवन्तः केऽपि तेषां दासाः। कस्यायुः सुखकरं कस्य वाऽसुखप्रदम्। कोऽपि दीर्घायुः को वा स्वल्पायुः। यथावत् प्रयत्ने कृतेऽपि न फलावाप्तिः। सद्योजातानां केनाप्यशिक्षितानां बालानां रोदनस्तनपानहासत्रासोत्पत्तिः। कोऽपि सुलक्षणः को वा दुर्लक्षणः। द्वयोः कर्मसामान्येऽपि तयोः फले प्रभूतं पार्थक्यम्। कस्य कस्य कस्मिन् कस्मिन् वा कर्मणि चातुर्यमुपलभ्यते नान्यस्मिन्। कोऽपि पूर्वं जन्म स्मरति अस्मिन कुले जातोऽहमित्यादि। कोऽपि एवं वदति पूर्वं जन्मनि अस्मिन् देशे अमुकस्य पुत्रोऽहमासमिति। सदृशेषु पुरुषेषु केऽपि प्रियाः केऽपि वाऽप्रिया भवन्ति। इत्येते जन्मान्तरानुमाने हेतवो भवन्ति। तैश्च किमनुमीयते इत्याह अतएवेति। स्वकृतमात्मनैव कृतम्। अपरिहार्यं यस्य कर्मणः फलमवश्यं भोक्तव्यं न केऽपि तत्परिहातुं शक्नुवन्तीत्यर्थः। अविनाशि विना भोगेन न नश्यतीत्याशयः। पौर्वदेहिकं जन्मान्तरकायसम्भवम्। आनुबन्धिकं जन्मजन्मनि अनुबध्नातीत्यर्थः। यद्दैवसंज्ञकं कर्म तस्यैव एतत् मातापित्रोर्विसदृशापत्यादिकम्। इतश्चेति। इतः अस्मिन् जन्मनि कृतस्य कर्मणः फलं तु अन्यदित्यव्ययो भिन्नार्थकः परस्मिन् जन्मनि भविष्यतीति योजना। दृष्टान्तद्वारेण विषयोऽयं परिष्क्रियते फलादिति। यथा हि फलदर्शनेन बीजमनुमीयते बीजदर्शनाद्वा

फलमनुमीयते तथैव दास्यैश्वर्य्यादिदर्शनाज्जन्मान्तरीयं कर्मानुमीयते ॥३०-३१॥

युक्त्याख्यप्रमाणेनापि परलोकं प्रमाणयति युक्तिश्चैषेत्यादि। गर्भजन्मनि पञ्चमहाभूतातिरिक्तस्यात्मनोऽपि सत्ता वर्तत इति जन्मान्तरादागतमात्मानमन्तरा न गर्भजन्म भवतीति परलोकसिद्धि:। यत्रापि क्रिया भवति तत्रैव कर्तृकरणसंयोगो नूनं स्यादिति गर्भोत्पत्तौ आत्मन: कर्तृत्वं युक्त्या निरूप्यते। इहाकृतस्यापि यत्फलं दृश्यते तत्कृतस्यैव फलं नाकृतस्येति युक्त्या जन्मान्तरकृतस्यैव फलं निश्चीयते। तत्रैव दृष्टान्तमाह नांकुरोत्पत्तिरित्यादि। कर्मसदृशं फलं स्यादिति युक्त्या प्रवरावरकुलजन्मनि जन्मान्तरकृतं शुभाशुभं कर्मैव कारणं निर्धार्य्यते। तत्र च दृष्टान्तमाह नान्यस्मादित्यादि ॥ ३२ ॥

अथ परलोकैषणां निगमयति एवमित्यादि। पुनर्भवे पुनर्जन्मन्युपदिष्टे सिद्धे इत्याशय:। धर्मद्वारेषु धर्मप्राप्त्युपायेषु वक्ष्यमाणगुरुशुश्रूषादिषु अवधीयेत सावधाना: भवेयुरित्यर्थ:। धर्मानुशासनमनुसृत्यैव गुरुशुश्रूषादिकं कर्तव्यमित्याशय:। अनभिध्यायां विषयस्पृहात्यागे। मन:समाधौ रजस्तमोभ्यां परावृत्य निर्मले सत्त्वे अवस्थाने। स्वर्ग्याणि स्वर्गप्राप्तिसाधनानि। नैतानि केवलं परलोकहितानि इह च वृत्तिपुष्टिकराणि भवन्ति ॥३३॥

अत्र तिस्रैषणीयप्रसंगात् कानिचित् त्रिकाणि व्याचिख्यासु: तान् उद्दिशति अथ खल्विति। तांश्च त्रिसंख्यावच्छिन्नान् विषयानुद्दिशति त्रय इति। उपस्तम्भा: शरीरधारका:। उद्देशक्रमागतान् विषयान् निर्दिशति त्रय उपस्तम्भा इति। तत्राहारस्योपस्तम्भकत्वमत्रैव वक्ष्यति, यथा—

"प्राणा: प्राणभृतामन्नमन्नं लोकोऽभिधावति।
वर्ण: प्रसाद: सौस्वर्यं जीवितं प्रतिभासुखम्।
तुष्टि: पुष्टिर्बलं मेधा सर्वमन्ने प्रतिष्ठितम् ॥" इति (सू० २७ अ०)

पुनश्च "यदन्नं देहधात्वोजोबलवर्णादिपोषकम्" इति। अत्र यत्किञ्चित् शरीरेण येन केनापि स्रोतसा आह्रियते तस्यैवाहारसंज्ञा भवति। तेन नि:श्वासवाय्वभ्यंगादीनामपि परिग्रह: स्यात्। तेषां सर्वेषामेव शरीरोपचयकरत्वात्। स्वप्रस्याप्युपस्तम्भकत्वमत्रैव वक्ष्यति, यथा—"देहवृत्तौ यथाहारस्तथा स्वप्न: सुखो मत:। स्वप्नाहारसमुत्थे च स्थौल्यकार्श्ये विशेषत: ॥" इत्यादिना (सू० २१ अ०)। ब्रह्मचर्यस्यापि युक्तियुक्तस्य शरीरपोषकत्वं भवति। अत्र युक्तियुक्तमिति विशेषणेन नाष्टविधमैथुनवर्जनरूपं नैष्ठिकं ब्रह्मचर्य्यमभिप्रेतम्। तेन विधिपूर्वकमैथुनगमनेऽपि न ब्रह्मचर्यहानिर्भवति। यदुक्तं धर्मशास्त्रे—

"निशास्वष्टासु चान्यासु स्त्रियो रात्रिषु वर्जयन्।
ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन् ॥" इति (मनु:)

अत: सद्वृत्तोपदिष्टमैथुनविधिमनुसृत्य (सू० ६ अ०) स्त्रीगमनमपि ब्रह्मचर्यपदेनाभिप्रियते। नन्वेतेषु युक्तियुक्तेषूपसेवितेष्वपि अन्तरा मरणं

दृश्यत इत्याह यावदायुषः संस्कारमिति। आयुषोऽनुबन्धं यावदित्यर्थः। अल्पायुष्ट्वञ्च जन्मान्तरीयकर्मफलादपि भवतीति यावत्तस्यायुर्वर्तते तावदेभिर्युक्तियुक्तैराहारादिभिर्जीवतीत्याशयः। ननु कः खल्वस्यायुषः संस्कार इत्याह संस्कारः स इति। हितमुपसेवमानस्य जनस्य यः खल्वायुषोऽनुबन्धइह अस्मिन् आयुर्वेद उपदेक्ष्यते स एव आयुषः संस्कार इति योजना ॥ ३४–३५ ॥

त्रिविधं बलं व्याचष्टे त्रिविधमित्यादि। सहजं नाम जन्मन आरभ्य केचिद् बलवन्तः स्युः। तत्र शीतप्रधानदेशीयानां प्रायः सहजं बलं स्यात्। पुनश्च गर्भाधानविशेषनियमाच्च बालं वृहत्कायमोजस्विनमपि कर्तुं पार्यते तच्च जातिसूत्रीये शारीरे द्रष्टव्यम्। कालजं पुनरादानविसर्गकालभेदात् सबलता दौर्बल्यञ्च भवितुमर्हति पुनश्च बालादिवयोभेदेनापि बलभेदो भवतीत्याह कालकृतमिति। युक्तिकृतन्तु आहारविहाराभ्यां व्यायामादिना च लभ्यमित्याह युक्तिकृतमिति ॥ ३६ ॥

क्रमगतत्वात् रोगस्य त्रीण्यायतनानि व्याचक्षते त्रीणीत्यादि। अर्थानां शब्दस्पर्शरूपरसगन्धानामिन्द्रियार्थानाम्। कर्मणः वाक्यस्य मनसः शरीरस्य च कार्य्यस्य। कालस्य शीतोष्णवर्षलक्षणानां षण्णामृतूनाम्। अतिमात्रप्रभावतां सूर्यादीनाम्। अतिसूक्ष्माणां सूक्ष्मसूच्यादिपाशादीनाम्। अतिविप्रकृष्टानां सुदूरवर्तिनां क्षुद्रनक्षत्रादीनाम्। रौद्राणामुग्राणाम्। भैरवाणां भयानकानाम्। बीभत्सानां घृणाजनकानाम्। स्तनितं मेघगर्जनम्। पटहो ढक्का। उत्क्रुष्टमाक्रन्दनम्। परुषः कर्कशः। इष्टविनाशः पुत्रस्ते मृत इतिवत्। इष्टोपघातो वाणिज्यतरी ते निमग्ना इतिवत्। इष्टप्रधर्षणः पुत्रस्ते सभायां निर्जित इतिवत्। अभिष्यन्दी आस्रावकरः कटुकादिगन्धः। अमेध्यः अपवित्रः। कुणपः शवगन्धः। विषपवनगन्धस्तु शालपुष्पादिगन्धवाहिपवनगन्धः। रसविमाने वक्ष्यमाणेष्वष्टसु आहारविधिविशेषायतनेषु राशिस्तु रसातियोगेऽन्तर्भवति। शिष्टाः सप्त तु मिथ्यायोगेषु इत्याह राशिवर्जेष्विति। स्नानादीनामननुपूर्व्या उपसेवनं यत्र स्नानादिकं निषिद्धं तत्र तस्य करणमित्यर्थः। विषमस्थानम् उत्कटुकासनादिकम्। अशुचिभूतानां पिशाचादीनाम् ॥३७॥

ननु पञ्चेन्द्रियाणां पृथगर्थग्रहणात् कथमेकविधोऽसात्म्येन्द्रियार्थसंयोगः स्यादिति शंकां निराकुर्वन् आह तत्रैकमित्यादि। इन्द्रियाणां मध्ये एकं स्पर्शनेन्द्रियं न त्वन्यानीन्द्रियाणि इन्द्रियव्यापकं सर्वेषामेवेन्द्रियाणां व्यापकम् अर्थान् स्पृष्ट्वैवेन्द्रियाण्यर्थग्रहणसमर्थानि भवन्ति इत्यर्थः। पुनश्च तत् चेतःसमवायि मनसा सह सम्बन्धि भवति। मनःसम्बन्धमन्तरा अर्थग्रहणाभावात्। अतश्चेतोऽपि व्यापकं भवति। स्पर्शनव्याप्तेः अर्थग्रहणे चेतसाऽपि स्पर्शनस्य व्याप्तिर्भवतीति मनोऽपि सर्वेन्द्रियव्यापकं भवतीत्यर्थः। तस्मात् चेतसः स्पर्शनेन्द्रियस्य व्यापकत्वात् व्यापकस्पर्शकृतः व्यापकेन चेतसा स्पर्शेन च कृतः त्वङ्मनःसंयोगाज्जात इत्यर्थः। सर्वेन्द्रियाणां यो

भावविशेष: अर्थानामनुभव इत्यर्थ: । त्वङ्मन:संयोगादेवार्थानां ज्ञानं भवति यदुक्तं तार्किकै: "द्रव्याश्रये त्वचो योगो मनसा ज्ञानकारणम्" इति । स एव अनुपशयात् दु:खानुबन्धिविकारहेतुसामान्यात् पञ्चविध: विकल्प: पञ्चेन्द्रियज्ञानभेदात् त्रिविधविकल्पोऽयोगातियोगमिथ्यायोगभेदात् असात्म्येन्द्रियार्थसंयोग एकविधो भवति तत्संज्ञां लभत इत्यर्थ: । उपशयार्थश्च हेतुव्याधिविपरीतविषयश्च सात्म्यार्थो भवतीति शेष: । अत: शब्दादीनां विषयाणां नातिमिथ्यायोग एव व्याधीनां कारणमसात्म्येन्द्रियार्थसंयोग: तेषां समयोगस्तु सात्म्यार्थ: स्यात् ॥ ३८ ॥

कर्मणोऽयोगादिकं व्याचक्षते कर्मेत्यादि । वाक्यस्य मनस: शरीरस्य च या प्रवृत्तिश्चेष्टा सैवात्र कर्मशब्देनाभिधीयते । तेषामतियोगस्तु अतिभाषणमतिचिन्तनमतिव्यायामश्च भवतीत्याह तत्रेति । सर्वशोऽप्रवृत्तिर्वाङ्मन:शरीराणामिति शेष: । मिथ्यायोगकथने शरीरस्य प्राधान्यात् तस्यैव मिथ्यायोगं प्रागाह वेगधारणेति । वेगधारणमुदीर्णानां मलमूत्रादीनामित्यर्थ: । उदीरणन्तु तेषामेवानुदीर्णानाम् । विषमं यथा स्यात् तथा स्खलनं पादादीनां चलनम् । विषयपतनं नतोन्नतभावेन भूमौ पतनम् । विषमांगप्रणिधानं कस्यचिदंगस्य नतोन्नतभावेन स्थापनम् । अंगप्रदूषणं विषादिना । अवमर्दनं पादादिना । प्राणोपरोध: असात्म्या प्राणायामकरणम् । संक्लेशनम् आतपादिना । वाङ्मिथ्यायोगमाह सूचकेति । सूचकं वचनं परापकारार्थम् । अबद्धं निरंकुशम् । अनुपचारमव्यवहारिकम् । परुषं श्रुतिकठोरञ्च वचनम् । मिथ्यादर्शनं हितेऽहितबुद्धिरहिते च हितबुद्धि: । समासत: कर्मणां मिथ्यायोगमाह संग्रहेणेति । अनुपदिष्टमिहानुल्लिखितम् । उपसंहरति इतीति । त्रिविधविकल्पं अयोगातियोगमिथ्यायोगभेदेन वाङ्मन:शरीरभेदेन च प्रज्ञापराध इति व्यवस्येत् अभिदध्यात् ॥ ३९-४१ ॥

परिणामं व्याचष्टे शीतेति । तत्र हेमन्त: शीतश्च शीतलक्षण: । ग्रीष्मवसन्तावुष्णलक्षणौ । वर्षा शरच्च वर्षलक्षणे भवत: । इति संवत्सरस्त्रिलक्षणो भवति । अतिमात्रस्वलक्षणास्तु शीते शीताधिक्येन उष्णे च काले अत्यौष्ण्येन वर्षायाञ्चातिवृष्ट्या भवति । हीनस्वलक्षणश्च तत्तत्काले शीतादीनामल्पतया भवति । मिथ्यायोगश्च विपरीतलक्षणेन शीते उष्णतया उष्णे शीतप्रादुर्भावेन वर्षायां वा शीतप्रादुर्भावेन भवति । अस्यैव स्वसम्मता संज्ञा परिणाम इति । त्रीण्यायतनान्युपसंहरति इत्यसात्म्येति । समयोगयुक्तास्त्वेते प्रकृतिहेतव आरोग्यकारणं भवति ॥ ४२-४३ ॥

विकाराणामारोग्यस्य चायतनानि व्याख्याय सर्वेषामेव भावानां पदार्थानां भावाभावयोरुत्पत्तिविनाशयो: त एव समादियोगा आयतनानि भवन्तीत्यतिदिशति सर्वेषामित्यादि । तमेवार्थं समर्थयति यथास्वेति । हि यत: भावाभावौ उत्पादविनाशौ यथास्वयुक्त्यपेक्षिणौ भवत इति शेष: । तत्तद्द्रव्यस्य यथा स्वा युक्ति: सकारणयोग: तमपेक्षत इत्याशय: ॥ ४४ ॥

क्रमागतत्वात् त्रीन् रोगान् व्याचष्टे त्रयो रोगा इत्यादिना। निजः देहधातुवैषम्यजः। आगन्तुस्तु भूतादिसमुत्थः। मानसस्तु इष्टस्यालाभाद् अनिष्टस्य चागमनाद् भवति। प्रसंगादत्र मानसव्याधिक्रमोऽपि निवेद्यते तत्रेत्यादि। मानसव्याधिपरीतेनापीत्यपि शब्दान् मानसव्याधेरुत्पत्तेः प्रागपि अनुष्ठेयमाह परन्तु व्याध्याक्रान्तेनापि तथाऽनुष्ठिते तद्व्याधिनिवारणं भवतीत्युन्नेयम्। धर्मार्थकामानामहितानामुपसेवनाद् विना मानसो व्याधिर्न भवतीत्याह न हीति। तस्मात्तन्निवारणाय किं कर्तव्यमित्याह तस्मादिति। आत्मादिज्ञाने प्रयतितव्यमिति आत्मज्ञानं कोऽहं किं मे हितमहितं वेति। देशज्ञानं पुनरस्मदध्युषितो देशः किंविधः तत्र किं वा हिताहितमिति। कुलज्ञानं तु किं मे ओकसात्म्यम् इत्यादि। कालज्ञानञ्च विभिन्ने ऋतौ वयसि वा किं हिताहितं भवतीति। बलज्ञानञ्च मदीयबलानुरूपं किं कर्तव्यमकर्तव्यं वेति। बलशब्दोऽत्र शरीरवाचकः शक्तिस्तु सामर्थ्ये। तमेवार्थं श्लोकेनाह भवति चात्रेति ॥ ४५–४७ ॥

त्रीन् रोगमार्गान् व्याचष्टे त्रय इत्यादि। ते च बाह्यमध्यमान्तरभेदात् त्रिधा भवन्ति। तत्र शाखा बाह्यो रोगमार्गः, मर्मास्थिसन्धयो मध्यमो मार्गः। कोष्ठश्चान्तरो रोगमार्ग इत्याह शाखेति। शाखां निर्वक्ति तत्रेति। अत्र त्वगिति त्वग्गतो रसधातुः। हृदयगतपोषकरसस्य मर्मगतत्वान् मध्यमरोगमार्गत्वमिति रस इति वक्तव्ये त्वगिति कथनम्। एवमेकस्यैव पदार्थस्य स्थानभेदेन विभिन्नमार्गत्वं स्यात्, यथा शाखागतरक्तादेः बाह्यमार्गत्वं यकृदादिगतस्य चान्तरमार्गत्वम्। शिरोगतमज्ञः मस्तुलुंगापरपर्यायस्य मध्यममार्गत्वमिति। कोष्ठशब्देन प्राधान्येन महास्रोतो गृह्यते। गलविवरादारभ्य गुदपर्यन्तं यत्स्रोतोऽस्ति तस्यैवेह महास्रोतः संज्ञा भवति। तच्च त्रिधा विभक्तम् आमाशयः पक्वाशयः आमपक्वाशयश्चेत्याह आमपक्वाशय इति। मार्गत्रयगतानां रोगाणां समासतो नामान्याह तत्रेत्यादि। अत्र गण्डो गलगण्डः। पिडकाः कच्छपिकादयः। अलजी प्रमेहपिडकाभेदः। अपची कक्षादिषु पाकविशिष्टाग्रन्थिमाला। चर्मकीलः त्वग्गतो मांसांकुरः। अधिमांसस्तु मांसप्रदोषजः कस्मिंश्चिद् बाह्यावयवे असाम्ना मांसोच्छ्रायः। यदुक्तं सुश्रुते—"अधिमांसार्बुद ..... गण्डमालाप्रभृतयो मांसप्रदोषजाः" इति (सू० २४ अ०)। अत्र शाखानुसारिणो विसर्पादयः बाह्यमार्गजाः कोष्ठगताश्च विसर्पादयः अभ्यन्तरमार्गजा भवन्तीत्याह विसर्पश्चेति। तत्र चार्शसः बाह्यायां बलौ जातस्य शाखानुसारित्वं तृतीयायां तु आन्तरमार्गजत्वं ज्ञेयम् ॥ ४८–४९ ॥

भिषक्त्रैविध्यमाह त्रिविधा इत्यादि त्रयाणां तेषां लक्षणानि विवक्षुरादौ छद्मचराणां लक्षणान्याह वैद्येति। वैद्यस्य भाण्डैरौषधाधारपात्रैः औषधैः पुस्तैः पुस्तकैः एतानि लब्ध्वा इत्याशयः। पुनः पल्लवैरवलोकनैः पल्लवग्राहितया तत्कार्येषु कस्यचित् कदाचिद् दर्शनैरेतैः साधनैरेतानि संगृह्य

तदधिकारितया ये भिषक्शब्दं लभन्ते न तु शास्त्रज्ञानैर्नवा यथावत्कर्मदर्शनैरित्याशय: । ते अज्ञा: मूर्खा: प्रतिरूपका: छद्मचरा इत्यर्थ: । भिषग्वेशधरा अपि न तु ते भिषज इत्यर्थ: । सिद्धसाधितानां लक्षणान्याह श्रीयश इति । अतद्विधा: वैद्यगुणविहीना अपि ये श्रीयशोज्ञानसिद्धानां श्रिया अर्थसम्पत्त्या यशसा ज्ञानेन च सिद्धानां वैद्यानां व्यपदेशात् स्वरूपमाच्छाद्य छलं पुरस्कृत्येत्यर्थ: । वैद्यशब्दं लभन्ते वैद्यगुणविहीना अपि ये नानाविधैरुपायै: अदृष्टवशात् पीयूषपाणित्वख्यात्या यश: सम्पत्तिञ्च लब्ध्वा ज्ञानिनो वैद्यान् व्याजेनानुकुर्वन्ति त एव सिद्धसाधितशब्दवाच्या भवेयुरित्याशय: । यथार्थवैद्यानां लक्षणान्याह प्रयोगेति । प्रयोगश्चिकित्साचातुर्य्यम् । सुखप्रदा आरोग्यदा: । जीविताभिसरा: प्राणाभिसरा: । तल्लक्षणन्तु ऊनत्रिंशदध्याये सौत्रीये द्रष्टव्यम् ॥ ५०–५३ ॥

औषधत्रैविध्यं व्याचष्टे त्रिविधमित्यादि । तत्र दैवव्यपाश्रय इति दैवम् अदृष्टं तदाश्रित्य तज्जननेन यद्व्याधिप्रत्यनीकं भवति तदौषधं बलिमंगलजपहोमादिकं दैवव्यपाश्रयं भवति । तच्च कर्मजानां व्याधीनां कृते । युक्तिव्यपाश्रयन्तु दोषजादीनां सत्त्वावजयश्च मानसव्याधीनां कृते भवतीति शेष: । पुन: शारीराणां युक्तिव्यपाश्रयं भेषजं त्रिविधं भवतीत्याह शरीरदोषेत्यादि । तत्रान्त:परिमार्जनमाह यदिति । बहि:परिमार्जनमप्यभ्यंगादिवीर्यं शरीरान्त:प्रविशत्येवेति अत्रान्त:शरीरं कोष्ठमित्यर्थ: । शस्त्रकर्मणि भेदनदारणयो: प्रायोऽनन्यत्वात् शल्यतान्त्रिका: पृथग्दारणं न पठन्ति । अत्र चकारात् अग्निकर्मणोऽपि ग्रहणं भवति ॥ ५४–५५ ॥

वैद्यभेदप्रसंगादातुरस्यापि द्वैविध्यमाह प्राज्ञ इति । प्राज्ञ: शरीरहिताहितज्ञ: । बाल: मूर्ख: शरीरहिताहितज्ञानविहीन इत्यर्थ: । मुष्णाति चोरयति नाशयतीत्यर्थ: । गोधेति बलीयसा व्याघ्रादिना आकृष्यमाणा लांगूलबद्धा परस्परलांगूलाभ्यां बद्धा ॥ ५६–६३ ॥

अध्यायार्थं निवेदयति तत्र श्लोकाविति । निगदव्याख्यातमन्यत् ६४-६५

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां
चरकटिप्पण्यां सूत्रस्थाने तिस्रैषणीयो
नामैकादशोऽध्याय: ॥ ११ ॥

द्वादशोऽध्याय: ।

पूर्वाध्याये रोगाणां स्वरूपमार्गादिकमभिहितम्, अतिविस्तरत्वात्तेषामसाधारणकारणानां दोषाणां विवृतिर्नोक्ता । साम्प्रतमवसरसंगत्या दोषानभिधातुमध्यायान्तरमारभते अथात इत्यादिना । तेषु दोषेषु वातपित्तकफेषु अतिबलवत्त्वात् सर्वदोषपरिचालकत्वाच्च वायोरेव प्राधान्यं वर्तत इति तत्कलाकलाज्ञानमधिकृत्य प्रवृत्तोऽयमध्याय इत्यस्य वातकलाकलीय इति

संज्ञा भवति। कला अंशः वातस्य कलाकलातोऽशांशतोऽधिकृत्य प्रवृत्तः वातकलाकलीयस्तम् ॥ १-२ ॥

किमस्य कलाकलाज्ञानमित्याह वातेत्यादि। किमस्यांशांशतो ज्ञानमिति प्रश्नद्वारेणोद्दिशति किंगुणो वायुरित्यादिना। प्रकोपणमिति प्रकोपहेतुः। असंघातमपिण्डितम् अकठिनमिति यावत्। अनवस्थितं चञ्चलमित्यर्थः। अनासाद्य अप्राप्य प्रकोपणप्रसादनानि प्रकोपे प्रशमने च कारणभूतानि द्रव्याणि। अप्रकुपितस्य प्रकृतिस्थस्य अशरीरचरस्य पृथिव्यां प्रवहमाणस्य ॥ ३ ॥

प्रश्नानामेषामुत्तरं महर्षिभिः पृथक् खण्डशो निरूपितम्। तत्र प्रथमप्रश्नस्योत्तरं कुशः प्राह अथेति। सांकृत्यायनः सांकृतिगोत्रजः। रूक्षः स्नेहशून्यः। दारुणः तीक्ष्णत्वेन भयानकः। विशदोऽपिच्छिलः ॥ ४ ॥

प्रकोपणमाह कुमारशिराः तच्छ्रुत्वेति। भरद्वाज इति गोत्रनाम। एवगुणै रूक्षादिषड्गुणैः। कथं प्रकोपयतीत्याह समानेति। समानगुणाभ्यासः समगुणद्रव्याणां सातत्येनोपयोगः। यदुक्तं "सर्वदा सर्वभावानां सामान्यं वृद्धिकारणम्" इति (सू० १ अ०) ॥ ५ ॥

प्रशमनान्याह कांकायनस्तच्छ्रुत्वेति। वाह्लीकभिषगिति वाह्लीकदेशवासी भिषगित्यर्थः। प्रशमने हेतुमाह प्रकोपणेति। विपर्यस्तं द्रव्यं ह्रासहेतु भवति यदुक्तं "ह्रासहेतुः विशेषश्च" इति ॥ ६ ॥

कथञ्चैनमसंघातमित्यादिशंकायाः परिहारमाह वडिशस्तच्छ्रुत्वेत्यादिना। अथमर्थः—यानि वातप्रकोपकद्रव्याणि तानि रूक्षादिवातसमानगुणानि शरीरस्यापि रूक्षत्वादिकं शौषिर्य्यञ्च सम्पादयति तथाविधे शरीरे सञ्चरन् वायुरपि समानगुणेन आप्यायितो भवति अवकाशबहुलञ्च शरीरमाधिक्येन व्याप्नोति इति तस्य प्रकोपो भवति यदुक्तं सुश्रुते—"देहे रिक्तानि स्रोतांसि पूरयित्वाऽनिलो बली" इति (नि० १ अ०)। पुनश्च वातप्रशमकानि हि स्निग्धत्वादिगुणात् शरीरस्य स्निग्धत्वादिकं घनत्वञ्चापादयन्ति इति तथाविधे शरीरे घनत्वेन स्तोकावकाशे सञ्चरन् विरुद्धगुणसंसर्गादवकाशाल्पत्वाच्च प्रशान्तिमापद्यत इति ॥ ७ ॥

यथाक्रमं कानि वास्य कुपिताकुपितस्येत्यादिप्रश्नस्योत्तरमाह वार्यविदो राजर्षिस्तच्छ्रुत्वेत्यादिना। अनपवादम् अगर्हणीयं प्रशस्यमित्यर्थः। तेषां वायुकर्मणामवयवान् पृथगंशान्। न खल्वदृष्टिगोचरस्याव्यक्तस्यास्य कार्याणि सर्वत्र प्रत्यक्षेणैव प्रमाणेन साधयितुं शक्यत इति त्रिविधैरेव प्रमाणैः साधनं युज्यत इत्याह प्रत्यक्षेति। अकुपितस्य शरीरचरस्य वायोः कर्म्माण्याह वायुरित्यादि। तन्त्रयन्त्रधरः तन्त्रस्य शरीरस्य सर्वयन्त्राणां धारक इत्यर्थः। वायुर्हि धमनीमार्गेण सर्वशरीरे सञ्चरन् शरीरे तावतीः क्रियाः सम्पादयति इति शरीरयन्त्राणां पोषणे तस्यैव प्रधानकृतित्वमस्तीत्याशयः। विभिन्नस्थानगतस्य नानाक्रियावतोऽस्य एकत्वेऽपि पञ्चप्राणादिभेदेन विभिन्न-

तामाह प्राणेति । उच्चावचानां स्थूलसूक्ष्माणां चेष्टानां शारीरक्रियाणाम् । एतेन शरीरस्य सर्वा: क्रिया: वातमन्तरेण न सम्पाद्यन्ते इति बोधयति । मनसो विषयाग्रहणग्रहणयो: स एव कारणमित्याह नियन्तेति । नियन्ता नियमनकर्ता द्विष्टादर्थादिति शेष: । प्रणेता प्रकर्षेण नयनकर्ता ईप्सितार्थ-इति शेष: । सर्वेन्द्रियाणां ज्ञानेन्द्रियाणामन्तर्मुख्या धमन्या सञ्चरन् कर्मेन्द्रि-याणां बहिर्मुख्या च उद्योजक: विषयै: सह सन्निकर्षकर्ता आत्मन: प्रवृत्ति-निवृत्तिभ्यां विषयसन्निकर्षं करोतीत्याशय: । सर्वेन्द्रियार्थानां शब्दस्पर्शादीना-मभिवोढा गृहीतविषयाणीन्द्रियाणि तु वायुनैव स्ववहस्रोतोभि: हृदयमभि-वहन् आत्मबुद्ध्यादिसन्निकर्षं प्रापयतीत्यर्थ: । सर्वशरीरधातूनां त्रयोदश-संख्यकानां दोषधातुमलरूपाणां देहधातूनां व्यूहकर: यथावत् सन्निवेश-कर्ताऽसौ अन्नरससञ्चालनादिद्वारेण । शरीरस्य सन्धानकर: संयोजक: । वाच: प्रवर्तक इति आत्मप्रवृत्तिवशाद् वायुरेव वाचं प्रवर्तयति यदुक्तं शिक्षा-ग्रन्थे "मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्" इति । शब्दस्पर्शयो: प्रकृतिरिति वाय्वाकाशबाहुल्यात् कारणम् । श्रोत्रस्पर्शनयोरिन्द्रिययोर्मूल-मिति इन्द्रियाणां पाञ्चभौतिकत्वेऽपि विशेषत: श्रोत्रे आकाशभूतस्य स्पर्शे च वायुभूतस्य बाहुल्यात् तद्भूतद्वयप्रधानस्य वायोस्तयोर्मूलत्वं युज्यत एव । प्रागेवोक्तम्—"पञ्चमहाभूतविकारसमुदायात्मकानामपि सतामिन्द्रियाणां तेज-श्चक्षुषि खं श्रोत्रे क्षितिर्घ्राणे आपो रसने अनिलं स्पर्शने विशेषेणोपपद्यते" इति (सू० ८ अ०) । हर्षोत्साहयोर्योनिरिति-मनसो नियन्तृत्वेन प्रणेतृत्वेन च मनोगुणयोस्तयो: कारणं भवत्यसौ । अग्ने: पाचकाग्ने: समीरण: प्रधम-नेनोद्दीपक: । दोषसंशोषण: आवाधकरान् शरीरक्लेदरूपमलान् संशोषयति । मलानां स्वेदमूत्रपुरीषादीनां बहि:क्षेप्ता बहिर्नि:सारक: । स्थूलाणुस्रोतसां शिराधमनीस्रोतसां भेत्ता गर्भशरीरे वाय्वन्तरीक्षगुणबाहुल्यात् शौषिर्य-करत्वेन शरीरस्य । गर्भाकृतीनां कर्ता शुक्रशोणितसंयोजनान् मातुरन्नरसवाह-कत्वाच्च । आयुषोऽनुवृत्तिप्रत्ययभूत: अन्नरसवहनेन स्वाभाविकापचयं निवार्य उपचयेन धातुसाम्यमापादयन् । वक्ष्यति च (सू० २८ अ०) "विविध-मशितपीतलीढखादितं.....यथास्वेनोष्मणा विपच्यमानं.....केवलं शरीरं बलवर्णसुस्वायुषा योजयति ।" इति प्रकृतिभूतस्य वायोरेतावत्कर्म-करणादपि आयुषो अनुवृत्तिर्भवत्येवेति तत्कारणता युज्यत इत्याशय: ॥

प्रकृतिभूतस्यास्य कर्माणि निवेद्य विकृतस्यापि कर्माण्याह—कुपित इति । नानाविधै: सामान्यजैर्नानात्मजैश्च विकारैर्व्याधिभि: । व्याहर्षयति दु:खयति । विकृति: खञ्जखुब्जत्वादिना गर्भस्यैव । अतिकालं दशमं मास-मतिक्रम्यापीत्यर्थ: । प्राणान् उपरुणद्धि मारयतीत्यर्थ: ॥

विकृताविकृतस्य शरीरचरस्य वायो: कर्माणि कात्स्न्र्येन निवेद्य अशरीरचरस्य वायो: कर्माणि निविवेदयिषु: प्राक् प्रकृतिभूतस्य तस्य कर्माण्याह प्रकृतिभूतस्येति । धरणीधारणं वायुमण्डलेनैव महाकाशे धरणी

धार्यते। ज्वलनोज्ज्वलनमिति विना वातसहायादग्निरपि न ज्वलति। आदित्यादीनां सन्तानेन सन्तत्या गतिविधानम्। अपां विसर्गः वृष्टिरूपेण मेघात्। स्रोतसां नदीनां प्रवर्तनम्। अभिनिर्वर्तनमुत्पत्तिः। उद्भेदनमंकुरोत्पत्तिः। धातूनां पृथिवीस्थकार्यद्रव्याणाम्। तेषां धातूनामेव मानं परिमाणं संस्थानमाकृतिस्तयोर्व्यक्तिरभिव्यञ्जनम्। बीजाभिसंस्कारः बीजानामुद्भिद्बीजानामभिसंस्कारः परिणामेनोत्पादनशक्तिजननम्। अविक्लेदोपशोषणे इति। अविक्लेदः पृथिव्याः वर्षादिजन्यस्य क्लेदस्य राहित्यम् उपशोषणञ्चार्द्रद्रव्याणामिति शेषः। अवैकारिकविकारश्चेति अवैकारिकाणां विकृतिमनापन्नानां फलादीनां विकारः विकृतिसम्पादनं पूतिभावनयनमित्यर्थः॥

प्रकृतिभूतस्य कर्माण्युपदिश्य विकृतस्यास्य कर्माणि निवेदयति प्रकुपितस्येत्यादिना। शिखरिशिखरावमन्थनं पर्वतशृंगभंगः। अनोकहानां वृक्षाणाम्। उन्मथनं भंग उत्पाटनं वा। सागराणामुत्पीडनं तरंगाकुलितत्वेति भावः। सरसां सरोवराणामुद्वर्तनं तीरमतिक्रम्योर्ध्वगमनम्। प्रतिसरणं प्रतिस्रोतोगतिः। अम्बुदानां मेघानामाधमनं चतुर्दिक्षु विक्षेपः। विसर्गः दृष्टिधाराभिर्विसर्जनम्। निह्रादो मेघनिर्घोषः। अशनिः वज्रपातः। व्यापादनं मिथ्यातिहीनयोगः। असंघातः छिन्नभिन्नीकरणम्। भूतानां प्राणिनामुपसर्गः जनपदोध्वंसनीयव्याधिसृष्ट्या। भावानां सतां पदार्थानामभावकरणं विलोपः। चतुर्युगान्तकराणां प्रलयभवानाम्। विसर्गः सृष्टिः। वायोः स्वरूपवर्णनेन तं स्तौति सहीति। प्रभवः सर्वद्रव्याणां कारणम्। अव्ययः अपरिवर्तनशीलः। मृत्युर्यम इत्यादयोऽस्य संज्ञा। भावानां शरीरिणां सर्वतन्त्राणां सर्वशरीराणां विधाता स्रष्टा। लोकानां भूमण्डलानां क्रान्ता चरणशीलः। भगवान् षडैश्वर्यसमन्वितः॥ ८॥

ननु भवतु बहिश्चरो वायुर्नानागुणः परन्तु आयुर्वेदे तद्वर्णनमप्रासंगिकमिति प्रश्नं मरीचिराह तच्छ्रुत्वेति। भिषग्विद्यायामायुर्वेदे। तदुत्तरमाह वार्यविदः भिषगिति। वायोरतिबलवत्त्वं द्राक् कार्यकारित्वञ्च प्रतिपादयितुं बाह्यवायोरुल्लेखो युज्यते। पुनश्च बहिश्चरवायुरेव शरीरचरवायोः पोषक इति तत्कार्य्यदर्शनेन शरीरेऽपि स भावाभावकरो भवति इति प्रतिपादनमप्यन्यतम उद्देश्य इति भावः। वर्चस्वित्वाय ओजस्वित्वाय॥ ९-१०॥

पुनश्च मरीचिः शरीरगतस्य पित्तस्यैव शुभाशुभकारित्वं प्रतिपादयति अग्निरेवेति। अग्निरत्रोष्मस्वरूपो ज्ञातव्यः। न खलु देहाग्नयः उष्मण ऋते स्वरूपेणावतिष्ठन्ते ज्वालाभस्मकारित्वादिरहितत्वात्। अन्यथा देहं दहेत्। पक्तिमपक्तिन्तु पाचकाग्नेः। स च न पित्तादभिन्नः पित्तेनापि वह्नेर्मान्द्यं भवतीति प्रतिपादनात् पित्तहरस्यापि सर्पिषश्च पाचकाग्निवर्धकत्वात्। अतएव वृद्धवाग्भटः प्राह—"तत्र यदामाशयपक्वाशयमध्यस्थं पञ्चमहाभूतात्मकत्वेऽपि तेजोगुणोत्कर्षात्तपितसोमगुणं ततश्च त्यक्तद्रवस्वभावं सहकारिकारणैः वायुक्लेदादिभिरनुग्रहाद्दहनपचनादिक्रियया लब्धाग्निशब्दं पित्तमन्नं पचति"

इति (सू० १६ अ०)। भेलोऽपि तस्य स्थानं संस्थानं परिमाणञ्च निर्दिदेश। तत्राऽप्यस्य पित्ताद् भेद एव प्रदर्शित: एतद्विस्तरस्तु मदीये शारीरविनिश्चये द्रष्टव्य:। दर्शनमदर्शनञ्चालोचकपित्तस्य। मात्रामात्रत्वमप्युष्मणो भ्राजकपित्तस्य। प्रकृतिविकृतिवर्णौ तु रञ्जकपित्तस्य तद्वैगुण्यादेव शरीरे हि पाण्डुत्वादिकं भवति। शौर्यादिकञ्च साधकपित्तस्यावगन्तव्यम्॥ ११॥

काप्यस्तु श्लेष्मण एव शुभाशुभकरत्वमाह सोम एवेति। सोमोऽत्र कफ:। तत्र दाढर्यं शैथिल्यं श्लेषकस्य उपचयकार्श्यत्वादिकन्तु अवलम्बकस्य ज्ञानाज्ञानादिकन्तु तर्पकस्य। आमाशयगतस्य क्लेदकस्य जिह्वागतस्य च बोधकस्य काय्यार्कार्याणि तु नोदाहृतानि प्रसिद्धत्वात्। अत्र केचित् सोमशब्दस्य जलदेवतार्थत्वं चन्द्रार्थत्वं वाऽभीप्सन्ति। न जाने मानवशरीरेऽस्मिन् तयोर्देवयो: किं कृतित्वं वर्तते। उत्तरेऽप्यत्राचार्य एव "सर्व एव खलु वातपित्तश्लेष्माण:" इत्युक्त्वा सोमाग्न्यो: श्लेष्मपित्तत्वमेव जगौ॥ १२॥

स्वसम्मतिं प्रदर्शयतां महर्षीणां वचनेषु या त्रुटिरासीत् तत्परिजिहीर्षु: भगवत: पुनर्वसो: समाधानमाह तच्छ्रुत्वेति। ऐकान्तिकवचनाद् एकत्र सावधारणवाक्यात् यथा वायुरेव अग्निरेव सोम एवेति। नि:श्रेयसेन मोक्षेण। त्रिवर्गसाधनयैव चतुर्वर्गसाधनं भवति। इह त्रिवर्गेण अमुष्मिंश्च लोके मोक्षेणेति तात्पर्य्यम्। लोकोऽत्र भुवनम्। ऋतव: शीतोष्णवर्षलक्षण:। उपघातकाले प्रलयकाले॥ १३-१४॥

तमेवार्थं श्लोकेन प्राह भवति चात्रेति॥ १५॥

अध्यायार्थं निवेद्य तं समापयति तत्र श्लोकाविति सुगमन्यत्॥ १६-१७॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने वातकलाकलीयो द्वादशोऽध्याय:॥ १२॥

इति निर्देशचतुष्कव्याख्या समाप्ता।

—:०:—

त्रयोदशोऽध्याय:।

स्वस्थातुरहितं निर्देशचतुष्कमध्यायचतुष्टयात्मकमभिधाय तदर्थमेव भेषजकल्पना वक्तव्या भवतीत्यध्यायचतुष्टयेन कल्पनाचतुष्कमभिधातुमिच्छुस्तत्र भेषजकल्पनाया: सर्वव्याधीनामपकर्षणं प्रकृतिविघातो निदानपरिवर्जनञ्चेति त्रिविधानां भेषजानामाद्यकर्तव्यत्वेन प्रकुपितानां दोषाणां संशोधनमेवापकर्षणमिति तदेव कल्पनाचतुष्केन वक्तव्यमिति संशोधनस्यापि प्राक्कर्म स्नेहनं विवक्षुरध्यायान्तरमारभते अथात इत्यादिना। ननु चतुष्केऽस्मिन् संशोधने वक्तव्ये तत्र वस्तेरवर्णनात् प्रतिज्ञा सा दोषवती स्यादिति चेन्न वस्तौ वर्णनीयेऽपि तत्र बहुवक्तव्यत्वान्नात्रोक्तेति नैष दोष:॥ १-२॥

तत्राग्निवेशप्रश्नप्रकारं प्रदर्शयति सांख्यैरिति । सम्यक् ख्यायते वस्तुतत्त्वज्ञानमनया इति संख्या तत्त्वज्ञानं तद् विदन्तीति सांख्या आत्मतत्त्वविदस्तैः । संख्यातैर्विश्वविख्यातैः संख्येयैः विद्वत्सु च परिगणनीयैः देशप्रसिद्धैर्न ह्यविद्भिः सहासीनमित्यन्वयः । एवं विशेषणेन पुनर्वसोरपि तत्सदृशत्वं संशयनिराकरणयोग्यत्वञ्च सूच्यते । के ते संशया इत्याह कियोनय इत्यादि । योनिरुत्पत्तिकारणम् । कालानुपाने स्नेहपाने कः कालः पानानन्तरञ्च किं पातव्यम् । विचारणायुक्तिवशेन विविधप्रकारेण निष्पत्तिः । कति मात्रा तस्य कया मात्रया पानं युक्तं भवति । कथंमानाः ताश्च मात्राः केन प्रमाणेन भवन्ति ? का च मात्रा केषु व्याधितेषु । स्नेहने प्रकर्षः कतिकृत्वः स्नेहं पीत्वा प्रकृष्टं स्निग्धं भवतीत्याशयः । पानादिति । पानात् स्नेहपानात् प्रथमं जीर्णे च स्नेहे हिताहितं किं भवतीति शेषः । अच्छे केवले संशोधने च स्नेहे का वृत्तिः कथं वर्तितव्यमित्यर्थः । केषु मानवेषु विचारणा युक्तिवशात् खाद्यमिश्रः स्नेहः केन विधिना प्रयोक्तव्यः ॥ ४–८ ॥

प्रश्नानामेषामुत्तरमाचार्यः प्राह अथेत्यादि । स्नेहानां योनिमाह स्नेहानामिति । स्थावरेभ्यः उद्भिद्बीजेभ्यस्तथा जंगमेभ्यः प्राणिभ्यः जाताः स्नेहाः स्थावरजंगमसंज्ञिता भवन्तीत्याह स्थावरेति । तत्र स्थावरसंज्ञितानाह तिल इति । पिथालः 'चिरौञ्जी' इति भाषा । अभिषुकः 'पिस्ता' इति ख्यातः फलबीजमज्जा । चित्रा दन्तीबीजम् । अतसी 'तिसि' इति वंगीयाः । आरुकं हिमाचलसम्भवफलबीजमज्जा । निकोठकः अंकोठफलम् । अद्वोडः 'अखरोट' इति भाषा । करञ्जः गोकरञ्जबीजम् । परिशेष्यात् निम्बादिबीजमप्यत्र ग्राह्यम् । स्नेहाशयाः स्नेहस्याधिकरणानि । जांगमानाह मत्स्येति । आमिषं मांसम् । वसा मेदोधातुपरिणतिः 'चर्बी' इति भाषा । मज्जा तु जीवानामस्थ्यन्तर्गतः स्नेहः । मस्तिष्कस्यापि मज्ञोऽन्तर्भावः यदुक्तं वृद्धवाग्भटे "तदेव शिरसि कपालप्रतिच्छन्नं मस्तिष्काख्यं मस्तुलुंगाख्यञ्च स्थूलास्थिषु मज्जा" इति (शा० ५ अ०) ॥ ९–११ ॥

स्थावरस्नेहेषु तैलाख्येषु तिलतैलस्य प्राधान्यमाह सर्वेषामिति । बलवर्धकादिविशेषगुणत्वात् । ऐरण्ड्यम् एरण्डबीजभवं तैलं विरेचने विशिष्यते इति सम्बन्धः । कति स्नेहा इति प्रश्नस्योत्तरमाह सर्पिरिति । सर्वस्नेहोत्तमा सर्वेषु स्नेहनद्रव्येषु तैलादिव्यतिरिक्तेषु दधिक्षीरादिषु उत्तमाः । एभ्यः सर्पिरादिभ्यः । संस्कारस्यानुवर्तनात् संस्कारं पुरस्कृत्य तच्च समानगुणकं श्लेष्माणमपि शमयति । यद् वक्ष्यति—

"नान्यः स्नेहस्तथा कश्चित् संस्कारमनुवर्तते ।
यथा सर्पिरतः सर्पिः सर्वस्नेहोत्तमं मतम् ॥" इति (नि० १ अ०)

॥ १२–१३ ॥

स्नेहगुणानाह घृतमित्यादि । हितं सामान्याद् वसादीनां वर्धकम् । निर्वापणं दाहप्रशमनम् । स्वरस्य शरीरवर्णस्य च निर्मलीकरणमित्याह

स्वरेति । तैलगुणानाह मारुतघ्नमिति । त्वच्यं त्वच: कोमलतौज्ज्वल्यसम्पादकम् । उष्णं वीर्यत: । स्थिरकरं शरीरदार्ढ्यसम्पादकम् । योनिविशोधनमुत्तरवस्तिप्रयोगे । वसाया गुणानाह विद्धेति । पौरुषोपचये शुक्रवर्धने स्नेहे स्नेहनकर्मणि । व्यायामे श्रमखिन्नदेहे । मज्जगुणानाह बलेति ॥ १४-१७ ॥

पृथक् स्नेहपानकालानाह सर्पिरिति । माधवे ग्रीष्मे । कालेष्वेतेष्वपि नात्युष्णशीते पातव्यमित्यर्थ: । तत्रापि दोषभेदेन कालभेदानाह वातेति । वाताधिके पित्ताधिके च रात्रौ यदा मनागुष्णता भवेत्तदा पिबेत् अत्युष्णे दोषश्रवणात् । श्लेष्माधिकस्तु दिवा यदा शैत्याधिक्यं भवति तदा । उक्तकालविपर्यये दोषानाह अत्युष्ण इति । आनाहो विड्विबन्ध: ॥ १८-२१ ॥

स्नेहपानानुपानमाह जलमिति । स्नेहस्य प्रविचारणामाह ओदन इति । ओदनादिकन्तु प्रभूतस्नेहसंसृष्टं कर्तव्यमन्यथा स्नेहनं तैर्न भवितुमर्हति । ओदन: घृतान्नपलान्नादिक: । विलेपी विरलद्रवा घृतादिसंयुक्ता यवागू: । यवागूशब्देनात्र पेया मण्डो वा ग्राह्य: । रसो मांसरस: । सूपो विदलयूष: स्नेहसंस्कृत: । खडयूषस्तु "तक्रकपित्थचांगेरी मरिचाजाजीचित्रकै: । सुपक्व: खडयूषोऽयम्" इति लक्षण: । काम्बलिकस्तु—"दध्यम्लो लवणस्नेहतिलमाषविपाचित:" इति लक्षण: । तिलपिष्टं तिलशष्कुल्यादिकम् । मद्यन्तु स्निग्धोपदंशयुक्तं विद्यात् अनुपदंशस्य रूक्षत्वात् । भक्ष्यमितरस्नेहयुक्तं खाद्यम् । अभ्यञ्जनमभ्यंग: । वस्त्यादीनां सर्वेषां स्नेहयुक्तत्वं ज्ञेयमन्यथा स्नेहनासम्भवात् ॥ २२-२५ ॥

अच्छपानगुणानाह अच्छेति । अच्छपेय: द्रव्यान्तरासंयोगेन केवलं पेय: । प्राथमकल्पिक: श्रेष्ठ इत्यर्थ: । पुना रसभेदयोगेन प्रविचारणाया भेदमाह रसैरिति । समासव्यासयोगिभि: समासेन मिलितेन मिश्ररसेन व्यासेन पृथग्रसेन युञ्जन्तीति तै: । अत्र व्यासयोगेन पृथक् षट्प्रकारत्वं समासेन मिश्ररसेन च सप्तपञ्चाशद्विधत्वं ज्ञेयम् । ओकर्तुव्याधिपुरुषान् जानता इत्यनेन तत्तत्सात्म्यमभिसमीक्ष्येत्यर्थ: । तेन येषां यादृशी ओकसात्म्यता ऋतुसात्म्यता व्याधिसात्म्यता पुरुषसात्म्यता वा भवेत् तेषां तथैव रसमिश्रणेन प्रविचारणा कर्तव्येत्याशय: ॥ २३-२८ ॥

स्नेहस्य मात्राप्रमाणमाह अहोरात्रमिति । स्नेहमात्रा तु त्रिविधा भवति प्रधाना मध्या ह्रस्वा चेति । सा च पातुर्जरणशक्त्या निर्णेया । या मात्रा षष्टिनाडिकात्मकेनाहोरात्रेण जीर्णतामेति सा प्रधाना, या च कृत्स्नेनाह्ना त्रिंशन्नाडिकात्मकेन सा मध्यमा या च पञ्चदशनाडिकात्मकेनाहार्धेन जीर्यति सा तु ह्रस्वा मात्रा इत्याशय: ॥ २९-३० ॥

कस्य का मात्रा प्रयोज्या इति उत्तममात्राप्रयोगस्थानान्याह प्रभूतस्नेहेति । प्रभूतस्नेहनित्या: ये प्रभूतं स्नेहं नित्यमुपयुञ्जन्ति ते क्षुत्पिपासासहा: अग्ने: प्रभूतबलत्वेन सततं क्षुधया पिपासया वा क्लेशमनुभवन्त:।

पावको जाठराग्निः उत्तमबलस्तीक्ष्णः । ये च बले शरीरबले उत्तमः । बलवन्त इत्यर्थः । कृच्छ्रमूत्रा मूत्रकृच्छ्रिणः ॥ ३१-३२ ॥

उत्तममात्रया स्नेहपाने गुणानाह तस्या इति । विकारान् पूर्वोक्तान् गुल्मादीन् दोषानुकर्षिणी मार्गाणां स्नेहनेन तत्संसक्ता दोषा आदौ स्निग्धास्ततः स्विन्नाः विनायिताः कोष्ठमायान्तीति स्नेहस्यापि दोषानुकर्षकत्वं युज्यते । तत्र हेतुगर्भं विशेषणमाह सर्वमार्गानुसारिणीति । सर्वमार्गाः सर्वस्रोतांसि । पुनर्नवकरी मार्गशोधनेन यथावत् पुष्टा धातवः पुनर्नवीनतां यान्तीत्याशयः । इन्द्रियचेतसामपि स्रोतसामतीन्द्रियत्वेऽपि तैरेव द्वारैराहारस्य भौतिकांशास्तेषां पुष्टिं विदधतीति स्रोतःशोधनेन तेषामपि नवत्वं भवितुमर्हति ॥३३-३४॥

मध्यममात्राप्रयोगस्थानान्याह अरुष्कास्फोटः अरुः व्रणं कुर्वन्तीति अरुष्काः ये आस्फोटाः अग्निदग्धनिभाः विस्फोटा इत्यर्थः । पिडकाः प्रमेहपिडकाः शराविकादयः । प्रमीढाः प्रमेहग्रस्ताः । नातिबह्वाशिन इति वह्नेर्मध्यबलत्वज्ञापकम् । मृदुकोष्ठस्य लक्षणं निवेदयिष्यत्यग्रे । मात्राया अस्या गुणानाह मात्रेति । मन्दविभ्रंशा स्वल्पव्यापत् । शोधनांगे स्नेहने एषैव मात्रा युज्यत इत्याह शोधनेति । ह्रस्वमात्रा प्रयोगस्थानान्याह ये त्विति । सुकुमाराः क्लेशासहिष्णवः । सुखोचिताः सुखे अभ्यस्ताः संसारयात्रायां येषां कालाः सुखसातत्येनैव यान्ति ते । बले अवरा दुर्बला इत्यर्थः । तस्या गुणानाह परिहारे सुखासुखेनैव परित्यक्तुं शक्यत इत्यर्थः । निरावाधा व्यापत्तिरहिताः । चिरं दीर्घकालम् अनुवर्तते दीर्घकालानुवर्तनेऽपि न दोषलं भवति ॥ ३५-४० ॥

स्नेहेषु कश्च केषां हित इति प्रश्नस्योत्तरमाह वातेति । वातपित्तप्रकृतयो वातप्रकृतयः पित्तप्रकृतयश्च । वातपित्तविकारिणो वातविकारिणः पित्तविकारिणश्च । चक्षुःकामाः चक्षुषो बलमभीप्सवः । आयुःप्रकर्षकामाः दीर्घायुष्ट्वकामाः । प्रजाकामाः गुणवत्सन्तानकामाः । सौकुमार्यं देहस्य सुकुमारता । दाहादिभिरार्ताः पीडिताः ॥ ४१-४३ ॥

स्नेहनार्थं यत्र तैलं प्रयोज्यं तदाह प्रवृद्धेति । वातप्रकृतयो ये वातव्याधिभिराविष्टाः ते । एतेन वातप्रकृतीनां श्लेष्मपित्तजव्याधौ घृतपानं प्रागुपदिष्टम् । तनुत्वं कृशत्वम् । क्रूरकोष्ठाः इति तस्य लक्षणं व्याख्यास्यतेऽग्रे । नाडीभिः नाडीव्रणैः । तैलोचिताः तैलसात्म्याः वंगीयादयः ॥ ४४-४६ ॥

वसापानयोग्यानाह वातातपेति । वातातपसहाः ये च प्रभूतं वातमातपञ्च सहन्ते ते । भाराध्वकर्शिताः अतिभारवहनेन अतिपथपर्यटनेन च ये क्षीणाः । निस्फीतशब्दोऽयं क्षीणार्थकः । अस्थ्यादिषु तीव्रवेदनावन्त इत्यस्थीत्याह । खानि स्रोतांसि । वसासात्म्याः पाश्चात्याः । मज्जपानयोग्यानाह दीप्तेति । घस्मराः महाशनाः ॥ ४७-५० ॥

स्नेहप्रकर्षमाह स्नेहनस्येति । सप्तरात्रत्रिरात्रकाविति त्रिरात्रादारभ्य सप्तरात्रं यावदित्यर्थः । एतेन कोष्ठबलाबले वीक्ष्य मृदुकोष्ठः त्रिरात्रेण क्रूर-

कोष्ठश्च सप्तरात्रेण स्निग्धो भवतीत्याशय:। सप्तरात्रात् परं स्नेहस्य सात्म्यीभावान्नात: परं स्नेह: प्रयोज्य इति भाव:। यद् वक्ष्यति—

"त्र्यहावरं सप्तदिनं परन्तु स्निग्धो नर: स्वेदयितव्य इष्ट:।
नात: परं स्नेहनमादिशन्ति सात्म्यीभवेत् सप्तदिनात् परन्तु॥

इति (सि० १ अ०) ॥ ५०–५१ ॥

के स्नेह्या इत्यस्योत्तरमाह स्वेद्या इति। स्वेद्या: यत्र स्वेदनमभीप्सितम्। शोधयितव्या: वमनविरेचनादिना। चिन्तका: येषां मानसिक: श्रमो बाहुल्येन भवति ते। अस्नेह्यानाह संशोधनेति। येषां रूक्षणं लंघनबृंहणीये सौत्रीये वक्ष्यते ते संशोधनादृते अस्नेह्या: कर्तव्ये संशोधने तत्रापि स्नेहनं कर्तव्यमेव। अभिष्यण्णाननगुदा:। येषां मुखतो गुदतश्च किञ्चित् स्रवति प्रसेकार्ता: अतिसारिणश्चेत्यर्थ:। नित्यं स्वभावत:। जठरामगरार्दिता: उदरिण: आमोदकारिण: गराक्रान्ताश्च। गरो विषभेद: तल्लक्षणं तु वक्ष्यति यथा—"गरसंयोगजं चान्यद् गरसंज्ञं गदप्रदम्।

कालान्तरविपाकित्वान्न तदाशु हरत्यसून्॥" इति (चि०२३अ०)

प्रतान्ता: श्रान्ता:। स्नेहग्लाना: येषां स्नेह: पीडायै भवेत् ते। वर्तमानेषु सद्य:कर्तव्येषु ॥ ५२–५६ ॥

स्नेहस्य योगायोगातियोगलक्षणान्याह पुरीषमिति। ग्रथितं कठिनम्। रूक्षं स्नेहरहितम्। अप्रगुणो नानुलोम:। पक्वा जाठराग्निश्च मृदु:। सम्यक्स्निग्धलक्षणमाह वातेति। असंहतमकठिनम्। वर्च: पुरीषम्। अतिस्निग्धलक्षणमाह पाण्डुतेति। पाण्डुता त्वचामिति शेष:। जाड्यं जडता इन्द्रियाणामिति शेष:। तन्त्री तन्द्रा। उत्क्लेशो विवमिषा ॥ ५७–५९ ॥

पानात् प्रथमं पीते जीर्णे च किं हितमहितं वेति प्रश्नस्योत्तरं विवक्षु: प्राकपानात् प्रथमं पथ्यमाह द्रवोष्णमिति। अभिष्यन्दि धातुमलस्रोतसामतिक्लिन्नतापादकं तद्विपर्यस्तमनभिष्यन्दि। असंकीर्णमविरुद्धभोजनम्। श्व: परदिने। संशमनपानकालमाह पिवेदिति। अन्नकाले मध्याह्नसमये। प्रकांक्षितो बुभुक्षु:। शुद्ध्यर्थं विरेचनस्नेहपानकालमाह शुद्ध्यर्थमिति। नैशे आहारे जीर्णे इति प्रातस्तदवस्थायामित्यर्थ:। पानकाले जीर्णेऽपि पथ्यमाह उष्णोदकेति। उष्णोदकोपचारी पानशौचादिषु उष्णोदकाभ्यवहारी। ब्रह्मचारी संयतेन्द्रिय:। क्षपाशय: रात्रिजागरणवर्जित:। उदीर्णान् जातवेगान्। अप्रवातं प्राग्वातरहितं प्रकृष्टवातरहितं वा प्रवाते निवातैकदेशे इत्याशय:। स्नेहं पीत्वेति पानानन्तरं स्नेहे जीर्णे इत्यर्थ:। प्रतिभुञ्जान इति पानमात्रे तद्दिने च एते नियमा: पालनीया इत्यर्थ:। नियमापालने दोषानाह स्नेहेति। मिथ्योपचार: उपचारश्चिकित्सा तस्य अयथावत्प्रयोगान्नियमाभावाच्च। चिकित्सैव भवति तस्य उपचारसंज्ञा मिथ्या भवति इति ॥ ६०–६४ ॥

के मृदुक्रकोष्ठा इत्यस्योत्तरमाह मृद्विति। अच्छोपसेवया केवलस्नेहपानेन न तु विचारणया। मृदुकोष्ठस्तु गुडादिपानेनैव विरिच्यते।

मस्तु वस्त्रप्रस्रुतस्य दध्नो जलम् । कृशरा तिलतण्डुलमाषमिश्रा यवागूः । काश्मर्यं गाम्भारीफलम् । पीलुः 'अखरोट' इति भाषा । क्रूरकोष्ठलक्षणमाह विरेचयन्तीति । एतानि गुडादीनि । तस्याऽविरेचने कारणमाह भवतीति । ग्रहणी आमाशयपक्वाशयमध्यस्थः आमान्नगतिरोधकः आमाशयात् पक्वाशयप्रवेशद्वारिसंसृष्टः कलामयो यन्त्रविशेषः । सा च अत्युल्बणानिला तत्र च वातप्राधान्येन अन्नं प्रायशो रूक्षं भवति इति तस्य शकृतो रूक्षत्वं कठिनत्वं च जायते इत्याशयः । मृदुकोष्ठस्य स्वल्पायासेन विरेचने हेतुमाह उदीर्णेति । ग्रहण्यां पित्ताधिक्यात् अन्नमपि सरं भवति स्वल्पेन कफेन च स्निग्धं भवति इति शकृदप्यस्य स्निग्धसरत्वाभ्यां स्वल्पायासेनैव विरेति इति भावः ॥ ६५–६६ ॥

स्नेहव्यापदमाह उदीर्णेति । उदीर्णपित्ता इत्यनेनाग्नेस्तीक्ष्णत्वं सूचयति । अत्र स्नेह इत्यल्पमात्रिको ज्ञेयः । अग्नितेजसा जाठराग्निबलेन । स जाठराग्निः । स्नेहदाहेनाग्निर्बली भवत्येव । अतः स ओजः प्रक्षारयन् स्वस्थानात् सञ्चालयन् । क्षरसञ्चालने इति धातुः । स्नेहाग्निः स्नेहसमिद्धोऽग्निः । उत्तमामत्यधिकाम् । सोपसर्गां मूर्छाद्युपसर्गसहिताम् । नालं न समर्थः । शीतलेन जलेनैव तस्य प्रशान्तिर्भवतीत्याह स चेदिति । कक्षमध्यगः शुष्कवनमध्यगः । आशीविषः सर्पः । स्नेहाजीर्णे या तृष्णा भवति तत्प्रतीकारमाह अजीर्ण इति । उल्लिखेत् छर्दयेत् ॥ ७०—७३ ॥

पुनरपि व्यापद आह नेति । सामे पित्ते आमसंसृष्टे पित्ते केवलमसंस्कृतं सर्पिः विशेषतो न पिबेत् । हि यतः सर्वं तद् आमपित्तसहितमामं सर्पिः देहे अनुचरेत् देहस्रोतःसु अनुचर्य्य संज्ञावहस्रोतांस्यवरुध्य संज्ञां हृत्वा मारयेत् पीतसर्पिष्कमिति शेषः । स्नेहविभ्रमात् स्नेहस्यायथावत् प्रयोगात् तन्द्रादयो जायन्ते इति योजना । तत्प्रतीकारमाह तत्रेति । उल्लेखनं वमनम् । कालप्रतीक्षणम् उपवासेन इत्यर्थः । स्रंसनं विरेचनम् । मिथ्योपचाराद् यथोक्तविधिमतिक्रम्य स्नेहपानादित्यर्थः । अतिसेवितः मात्राधिकः ॥७४–७६॥

अच्छे संशोधने च का वृत्तिरिति प्रश्नस्योत्तरं विवक्षुः संशोधनस्नेहपानवृत्तिमाह स्नेहादिति । स्नेहात् त्रिरात्रोपरतः स्नेहनीयस्नेहपानात् त्रिरात्रात् परमित्यर्थः । प्रस्कन्दनं वैरेचनिकं स्नेहम् । अत्र स्नेहत्यागादनन्तरं त्रिरात्रं का वृत्तिरित्याह स्नेहवदिति । रसौदनं मांसरसौदनम् । वामनीयं स्नेहन्तु एकरात्रात्परं पातुमुपदिशति एकाहेति । तद्वद् भुक्त्वा रसौदनमेकदिनं भुक्त्वेत्यर्थः । असंशोधनीये वृत्तिराह स्यादिति । असंशोधनार्थीये स्नेहनीये अच्छपाने इत्यर्थः । विरिक्तवदिति विरिक्तस्य यथा उपचारः कर्तव्यत्वेन उपकल्पनीये वक्ष्यति तद्वदित्यर्थः ॥ ८०—८१ ॥

विचारणा केषु योज्या इति प्रश्नस्योत्तरमाह स्नेहद्विष इति । स्नेहद्विषः अच्छस्नेहपानं येषां न सात्म्यम्, स्नेहनित्याः ये प्रत्यहं प्रभूतं स्नेहमभ्यवहरन्ति ते । सा च केन विधिना योज्येति प्रश्नस्योत्तरं

विवक्षु: विचारणार्थं केचिद् योगा: निर्दिश्यन्ते लावेत्यादिना । रसा: एषां मांसानां रसा: । यवेति यवादीन् एकत्र पक्त्वा रस: कार्य इत्यर्थ: । स्नेहयन्तीति । सस्नेहफाणितां स्नेहेन फाणितेन द्रवगुडेन च जग्धा: भक्षिता: । कृशरा तिलमाषविदलतण्डुलकृता यवागू: । बहुस्नेहा: प्रभूतस्नेहेन सन्तलिता: । तिलकाम्बलिकास्तु पृथग्योग: तिलप्रधाना दध्यम्ललवणस्नेहतिलमाषसमन्विता यवागू: तिलकाम्बलिक इत्युच्यते । फाणितमिति अत्र फाणितादिकं सहपानं सुरया सह भृतै: शूल्यपक्वैर्मांसैश्च ज्ञेयम् । जीर्णेऽस्मिन् भोजनमश्नीयादिति योजना । तैलमिति तैलं वसां मज्जानं वा सुराया मण्डेन उपरितनेनाच्छेन भागेन इत्येको योग: । सफाणितमिति द्वितीय: । पात्रे स्नेहप्राधान्याद् घृतं शाणमितं शर्करां च गृहीत्वा पात्रमुखं निर्मलेन पटेनाच्छाद्य गोदोहनेन प्रसृतं क्षीरं धारापातेन यावदुष्णं तिष्ठति तदैव पेयमित्याह धारोष्णमिति । दध्न: सरमिति द्वितीयो योग: । पाञ्चप्रसृतिकीति । पायस इति द्वितीयो योग: । पाञ्चप्रसृतिकीमाह सर्पिरिति । पेया पातव्या ॥८२-९०॥

विचारणानां केषुचिद् व्याधिषु वैशिष्ट्यमाह ग्राम्येति । ग्राम्य छागादिकम् । आनूपं महिषादिकम् । औदकं मत्स्यादिकम् । तेषु स्नेहनक्रममाह स्नेहैरिति । यथास्वमविकारिभि: तत्तद्व्याधिहरैर्भेषजै: सिद्धै: । कानि तानि भेषजानीत्याह पिप्पलीति । द्राक्षेत्यादि स्नेहसाधनक्रमो यथा- अत्र द्राक्षादीनां क्वाथ: अम्लं दधि च मिलित्वा चतुर्गुण: क्वाथ: व्योषश्च पादिक: कल्क: । स्नेहं साधयेदित्यन्वय: । तं स्नेहं पीत्वा नर: स्निह्यति । यवेति । अत्र यवकोलकुलत्थानां क्वाथ: क्षीरं दधि सुरा च प्रत्येकं स्नेहसमम् । क्षारो यवक्षार: कल्क: पादिक: । तैलेत्यादि चतु:स्नेहा: । चतुर्गुणेन वदरादिक्वाथेन पाचनीया:-अकल्कोऽयं चतु:स्नेह: ॥ ९१—९५ ॥

यावता स्नेहेन शरीरं स्निह्यति तच्च दृष्टान्तद्वारेण प्रतिपादयति गृह्णातीति । यथाहि वस्त्रं यावताऽम्बुना सिक्तं भवति तावन्मानमेव गृह्णाति अधिकं यदम्बु स्यात् तद्यथा प्रस्रवति तथैव स्नेह: यथाग्नि अग्निबलानुसारेण जीर्यति अधिकस्तु स्रवति गुदादिद्वारेण नि:सरतीत्यर्थ: । ननु तर्हि एकदैव तावान् स्नेह: पातव्य: यावता शरीरं पूर्णतया स्निह्यति अलं त्रिरात्रादुपसेवयेत्याह यथेति । त्वरितसेवित: एकदैवातिमात्रया सेवित: । सम्यक् न स्नेहयित्वा स्रवेदित्याशय: ॥ ९६—९७ ॥

अत: सुगममेकं योगमाह लवणेति । तत् लवणम् । अभिष्यन्दि दोषधातुमलस्रोतसां क्लेदकम् । व्यवायि अखिलं देहं व्याप्य जरां गच्छति । सूक्ष्मं सूक्ष्मस्रोतोगम । कर्तव्ये संशोधने स्नेहादे: पूर्वापरीभावं दर्शयति स्नेहमिति । इतरत: वमनादिषु पञ्चसु अन्यत् । प्रयोज्यमिति शेष: ॥९८-९९॥ अध्यायोपसंहृतावध्यायार्थं ब्रूते तत्र श्लोक इति । निगदव्याख्यातमन्यत् ।१००।

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने स्नेहाध्यायो नाम त्रयोदशोऽध्याय: ॥ १३ ॥

चतुर्दशोऽध्यायः ।

पूर्वाध्याये "स्नेहमग्रे प्रयुञ्जीत ततः स्वेदमनन्तरम्" इति क्रियाक्रमः प्रदर्शितः, अतस्तत्संगतिवशात् स्नेहाध्यायं निरूप्य स्वेदाध्यायो वक्तव्य इत्यध्यायान्तरमारभते अथात इत्यादिना । तत्रादावध्यायस्यास्य प्रयोजनमाह अतः स्वेदा इति । अत्र वातकफात्मका इति वातात्मकाः कफात्मका वातकफात्मकाश्च बोध्याः । एतेन केवलपित्ते स्वेदनिषेधः सूचितः । अस्वेद्यानां वातकफात्मकानामपि वारणार्थमाह स्वेदसाध्या इति । यथावदिति विधिमनतिक्रम्येत्यर्थः ॥ १–३ ॥

स्वेदफलमाह स्नेहपूर्वमिति । प्राक् स्नेहः प्रयोज्यः ततः स्वेदप्रयोगेण वायाववर्जिते प्रकृतिस्थे अनुलोमीकृते इत्यर्थः । न सज्जन्ति न प्रतिरुध्यन्ते स्रोतसां विवृतमुखत्वात् । वातजन्यस्तम्भादिनाशाय स्नेहस्वेदयोः प्रयुक्तयोः साफल्यं दृष्टान्तद्वारेण दर्शयति शुष्काणीति । शुष्काणि चयापचयविहीनानि मृतानीत्यर्थः । यथान्यायं यथायोग्यम । यत्र यथा वक्रता ऋजुता वा आसीत् तत्र तथैव नमयितुं शक्यते इत्याशयः ॥ ४–५ ॥

स्वेदफलमाह रोगेति । रोगमृतुं व्याधितञ्चापेक्ष्यत इति रोगर्तुव्याधितापेक्षः । नात्युष्णः नातिचण्डतापः तेन स्फोटोत्पत्तिरपि भवितुमर्हति । नातिमृदुरिति अतिमृदोरपार्थकत्वात् । द्रव्यवान् स्निग्धरूक्षादिद्रव्यसंयोगकृतः । देशे व्याधितप्रदेशे । तस्य त्रिविधा मात्रा कुत्र च का मात्रा प्रयोज्या इत्याह व्याधाविति । महाबले व्याधौ शरीरे च महाबले शीते च काले इत्यर्थः । एवं दुर्बले मध्यमे चेति पदद्वयं त्रिभिः सार्धमन्वेयम् । दोषभेदेन स्वेदभेदमाह वातेति । तत्र वातश्लेष्मणि संसर्गे स्निग्धरूक्षः स्निग्धेन रूक्षेण च द्रव्येण कृतः । वाते तु स्निग्ध एव, श्लेष्मणि च रूक्ष एव स्वेदः प्रयोज्य इत्यर्थः । इत्युत्सर्गविधिमभिधायाऽपवादविधिमाह आमाशयेति । अत्रामाशयपदेन सर्वाण्येव कफस्थानानि उरःशिरोग्रीवापर्वाणि ग्राह्याणि । एवं पक्वाशयपदेन सर्वाण्येव वातस्थानानि वस्तिः पुरीषाधानं कटिः सक्थिनी पादावस्थीनि च ग्रहणीयानि । कफस्थानगते वायौ रूक्षस्वेदः वातस्थानगते च कफे स्थानप्राधान्यात् स्निग्धः स्वेदः कर्तव्यः इति विशेषविधिः ॥ ६–९ ॥

शरीरावयवभेदेन स्वेदविशेषमाह वृषणाविति । वृषणौ कोषौ अत्र चण्डस्वेदेन शुक्रवहस्रोतसां मूलत्वात् शुक्रक्षयो भविता । हृदयमित्युरःप्रदेशः । तत्रौजसः स्थानत्वादोजःक्षयः । दृष्टी च नेत्रद्वयम् । तत्रालोचकपित्तप्रकोपाद् आन्ध्यमिति स्थानत्रये स्वेदनिषेधः । आत्ययिके तु स्वेदसाध्ये व्याधावतिमृदुस्वेदः कर्तव्य इत्याशयः । वंक्षणौ नाभेरधः कुक्षेः पार्श्वद्वयम् । मध्यभागस्य वस्तिशीर्षसंज्ञत्वम् । प्रतिषिद्धस्वेदे चक्षुरादौ स्वेदविधिमाह सुशुद्धैरिति । सुशुद्धैरलक्तकैः लाक्षारसरञ्जिततूलकैः गोधूमानां पिण्ड्या वा पद्मादिजलजैः पत्रैश्चक्षुषी आवृत्य स्वेदः कर्तव्य इत्यर्थः । मुक्तावल्यादि-

शीतैर्द्रव्यैर्हृदयप्रदेशे स्विद्यत: पुरुषस्य हृदयं पर्य्यायेण स्पृशेदिति हृदय-स्वेदविधिमाह मुक्तेति। जलजै: पद्मोत्पलादिपत्रै: । एवं वृषणस्वेदेऽपि कर्तव्यमित्युन्नेयम ॥ १०-१२ ॥

अतिस्वेदवारणाय स्वेदनिवृत्तिविषयमाह शीतेति। यत्र शीतवारणाय शूलोपरमाय च स्वेद इष्टस्तत्र तयोरुपरमे स्वेदाद् विरति: कर्तव्या, एवं स्तम्भादावपि ज्ञेयम्। स्वेदे स्वेदप्रादुर्भावे। मार्दवे तत्प्रदेशस्य मृदुतायामित्यर्थ:। स्वेदातियोगलक्षणमाह पित्तेति। शरीरसदनमंगस्यावसाद:। स्वरस्याङ्गस्य च दौर्बल्यं स्वरांगदौर्बल्यम्। तस्य चिकित्सामाह उक्त इति। ग्रैष्मिकविधौ मधुरस्निग्धशीतल एव व्यवहार्य: ॥ १३-१५ ॥

अस्वेद्यानाह कषायेति। कषायस्य स्तम्भादिकरत्वात् कृते स्वेदे विरुद्धक्रियासमावेशात् शरीरमुपहन्येत इति कषायनित्यानां स्वेदनिषेध:। तत्र स्वेदसाध्ये व्याधौ सञ्जाते कषायं सर्वथा परित्यज्य कर्तव्यम्। मद्यनित्यानां पित्ताधिक्यात् स्वेदोऽहितायैव भवेत्। गर्भिण्या: गर्भस्राव:। रक्तपित्तिनां रक्तातिप्रवृत्ति:। रूक्षाणां स्वेदाद्देहभेद: स्यात्। अत्र मधुमेहशब्देन सर्वमेहानां ग्रहणम्। यदुक्तं वृद्धवाग्भटे (सू० २६ अ०) "मेहिन: पित्तपीडितान्" इति। विदग्धेति। ब्रध्नशब्दोऽत्र गुदवाची यदुक्तं तत्रैव-"भ्रष्टदग्धगुदग्लानिक्रोधशोकभयार्दितान्" इति। भ्रष्टगुदश्चात्र वलिपाकेन पतितगुदवलिर्ज्ञातव्य: नतु गुदभ्रंशपीडित: तत्र तु स्वेदविधानात्। यदुक्तं सुश्रुते—"गुदभ्रंशे गुदं स्विन्नं स्नेहाभ्यक्तं प्रवेशयेत्" इति (चि० २० अ०) दग्धगुदस्तु क्षारादिप्रयोगेण। नष्टसंज्ञानां मूर्छायाद्यार्तानाम्। उदरिणामुदकप्रादुर्भाव: । क्षतानासुर:क्षताक्रान्तानामतिरक्तप्रवृत्ति: । आढ्यरोगिणां वातशोणितिकानाम्। अतिविशुष्काणामतिमांसक्षीणानाम्। तैमिरिकाणां श्लैष्मिकाणामपि ज्ञेयम् ॥ १६-१९ ॥

स्वेद्यानाह प्रतिश्याय इति। अलाघवे लघूनामप्यंगानामलघुत्वे। गलग्रहे गलरोधे। विनामके वातजन्यनतगात्रतायाम्। शुक्राघाते स्रोतोरोधजन्यशुक्रच्युतिरोधे। विजृम्भके जृम्भाधिक्ये। पार्श्वादीनां वेदनास्तम्भादिभिराक्रमणे। अंगमर्दके शरीरवेदनायाम्। संकोचादय: सुप्त्यन्ता: वातजन्या ज्ञातव्यास्तेन श्लेष्मजन्यालघुत्वेन न गौरवस्य द्विरुक्ति: स्यात्। विकारेषु वातश्लेष्मात्मकेष्विति शेष: ॥ २०—२४ ॥

स्वेदद्रव्याण्याह तिलेति। अम्लं काञ्जिकम्। पिण्डस्वेद: संकरस्वेद:। सिकता वालुका। पांशुस्तु धूलि:। करीषं शुष्कगोमयम्। अत्र गोखरादिपुरीषादिभि: आयसपुटकान्तै: द्रव्यै: श्लैष्मिकान् स्वेदयेत्। पूर्वैस्तिलादिमांसान्तैश्च द्रव्यैर्वातिकान् पिण्डस्वेदेन स्वेदयेदित्यर्थ:। तान्येव द्रव्याणि प्रस्तरस्वेदेऽपि दोषभेदेन प्रयोज्यानीत्याह द्रव्याणीति ॥ २५—२७ ॥

भूगृहादिस्वेदेषु न किमपि द्रव्यमपेक्ष्यते तानि च गृहाणि अंगारतप्तान्येवैषामुपकरणानीत्याह भूगृहेष्विति। नाडीस्वेदद्रव्याण्याह ग्राम्येति।

ग्राम्यमजादि । आनूपं वराहादिकम् । औदकं मत्स्यादिकम् । वस्तिशिरः छागशीर्षम् । वराहस्य च मध्यं मध्यकायः तेषां पित्तं रक्तञ्च । स्नेहवन्ति तैलफलानि तिलाश्च तण्डुलाश्चेति स्नेहवत्तिलतण्डुलास्तान । वारुणेत्य- पराणि पत्रात्मकानि नाडीस्वेदद्रव्याण्याह । वारुणः वरुण एव । अमृतकं गुडुची । शिग्रु मधुशिग्रु । अश्मन्तकः 'लोहाचुर' इति भाषा । शैरीयो नील- भिण्टी । सुरसार्जकौ तुलसीभेदौ भूतीकं यमानी । पञ्चमूलन्तु महत् वात- श्लेष्महरत्वात् । नाडीस्वेदद्रव्यैः जलकोष्ठकस्वेदोऽपि कर्तव्य इत्याह एत एवेति । निर्यूहाः क्वाथाः । घृतक्षीरादिकोष्ठास्तु उष्णाघृतक्षीरादिभिः पूर्णे कोष्ठे भवन्तीत्याह स्वेदनार्थमिति ॥ २८—३४ ॥

उपनाहस्वेदद्रव्याण्याह गोधूमेति । गोधूमशकलैः गोधूमचूर्णैः अम्ल- संयुतैः काञ्जिकेन पक्वैः । किण्वं सुराबीजं 'वाखर' इति भाषा । गन्धैः सर्वगन्धद्रव्यैः । शतपुष्पा 'सुलफा' इति भाषा । उमा अतसी । उपनाह- स्वेदस्तु उष्णोष्णेन वातहरादिद्रव्येण प्रदिह्य अंगानि अपूतिभिश्चर्मादिभिः बद्ध्वा स्वेदनम् । तत्र बन्धनद्रव्याण्याह चर्मभिरिति । अपूतिभिः क्षारादि- प्रलेपेन निराकृतपूतित्वैः उष्णवीर्यैरिति आनूपादिप्राणिजैः । तदलाभे तु कौशेयाविकशाटकैः कौशेयवस्त्रैराविकवस्त्रैश्चोपनद्धव्यः । ननु तथा-बद्ध्वा कियत्कालं यापयेदित्याह रात्राविति । विदाहपरिहारार्थं सर्वदा बद्धतया तत्र चर्मणि दाहो भवेत् तत्परिहारायेत्यर्थः । चतुःप्रहराधिकं बद्ध्वा न तिष्ठे- दिति भावः । तुः पक्षान्तरे शीतले काले तदतिरिक्तमपि कालं यापयेदित्याह प्रकर्षः उक्ताद्बन्धनकालादधिकमपि कालं यापयेदित्याशयः ॥ ३५—३८ ॥

स्वेदानां त्रयोदशविधानां नामान्याह संकर इति । सङ्करादिसंज्ञा आयुर्वेदपरम्परा प्रसिद्धा । तान् क्रमशो व्याचिख्यासुरादौ सङ्करस्वेदमाह तत्रेति । तत्र तेषु स्वेदेषु मध्ये वस्त्रान्तरितैः वस्त्रेण पोट्टलीं कृत्वेत्यर्थः । यथोक्तैः पूर्वोक्तैस्तिलमाषादिभिः स्वेदनद्रव्यैः । ताश्च पोट्टल्यः अग्नावुत्ताप्य प्राक्स्विन्नैर्वा द्रव्यैः पोट्टलीं कृत्वा स्वेदनमेव सङ्करस्वेदः । तन्त्रान्तरे त्वस्य पिण्डस्वेदसंज्ञा ॥ ३९—४१ ॥

प्रस्तरस्वेदमाह शूकेति । शूकधान्यं धान्यगोधूमादिकम् । शमीधान्यं मुद्गमाषादिकम् । पुलाकस्तुच्छधान्यं तेषाम् । वेशवारः—"निरस्थि पिशितं पिष्टं स्विन्नं गुडघृतान्वितम् । कृष्णामरिचसंयुक्तं वेशवार इति स्मृतः" इति लक्षणः । पायसः पयस्तण्डुलाभ्यां पक्वः । कृशरा तिलमाषतण्डुलकृता । उत्कारिका माषादिकृता आखूत्करवत् पक्वा । तेषां सम्यक्स्विन्नानामुष्णो- ष्णानामिति शेषः । प्रस्तरे प्रकृष्टे स्तरे कस्मिंश्चित् किलिञ्जे स्थूलतया विस्तीर्णे इत्यर्थः । कौषेयादिवस्त्रैराच्छादिते । उत्तरप्रच्छदस्तु शय्योपर्यास्त- रणम् । पञ्चाङ्गुलस्य एरण्डस्य पत्रैर्वाच्छादिते वा स्वभ्यक्तगात्रः शयित्वा यः स्वेदो लभते स प्रस्तरस्वेदः । यदुक्तं वृद्धवाग्भटे—"यथार्हस्वेदद्रव्याणि पिहितमुखायामुखायां सम्यगुपस्वेद्य निवातशरणशयनस्थे किलिञ्जे प्रस्तीर्य

शैत्येन प्रतिहतश्चक्षुषो: स्थानसंश्रयं कृत्वा तं नाशयतीति भाव:। यदुक्तं शालाक्ये—"शीतसात्म्यां नृणां दृष्टिमाहुर्नयनचिन्तका:" इति। "उष्णाभितप्तस्य जले प्रवेशात्.....नेत्रे विकारान् जनयन्ति दोषा:।" इति च ॥४६॥

अश्मघनस्वेदमाह शयानस्येति। घनां दृढाम्। अश्ममयीं पर्वतगात्रवन् निविडावयवाम्। एताभ्यां प्रज्वालितैर्दारुभिरुपतप्तायामपि नेयं विदार्णा चटिता वा भवतीति ज्ञेयम्। व्यपोह्य दूरीकृत्याङ्गारानिति सम्बन्ध:। प्रोद्य सुधौतां कृत्वा। संस्तर: शय्या। रौरवादयो वस्त्रविशेषा:॥ कर्षूस्वेदमाह कर्षूस्वेद इति। कर्षू: यज्ञे अग्न्याधानार्थ: खातविशेष:। सा च वितस्त्यायता स्यात्। तत्साम्यात्कर्षूरिह वितस्त्यायत: अंगारधानिकावत् कृत: खातो मन्तव्य:। शयनस्य शयनखट्वाया इत्यर्थ:॥ कुटीस्वेदमाह अनत्युत्सेधेति। अनत्युत्सेधविस्तारामिति मध्यमप्रमाणाम्। ताञ्च अष्टारत्निविस्तारोच्चां कारयेत्। अलोचनां गवाक्षादिरहिताम्। "तुन्दुर" इति ख्यातकोशकीटस्वेदनगृहवदस्या आकृतिर्भवेत्। घनभित्तिं प्रशस्तभित्तिम्। कुष्ठाद्यैर्वातहरैर्द्रव्यै:। प्रलेपयेदन्तर्भित्तिमिति शेष:। मध्ये प्रावारादिभि: शय्यां कृत्वा समन्ततो भित्तिसमीपे हसन्तिका अंगारधानिका: ज्वलदंगारपूर्णा: विगतधूमा: स्थाप्या इत्यर्थ:॥ ४७–५४॥

भूस्वेदमाह य एवेति। अश्मघनस्वेदे यथा शिला उपतापया तथैव भूरेवोपतप्तव्या भवतीति विशेष:। कुम्भीस्वेदमाह कुम्भीमिति। अयमर्थ:—वातहरदशमूलादिक्वाथपूर्णमेकं घटं भूमौ त्रिभागमर्धभागं वा निखात्य तदुपरि सूक्ष्मबहुच्छिद्रमेकं शयनमासनं वा संस्थाप्य तदुपरि तनुवस्त्रावृतं स्वभ्यक्तं स्वेद्यं शाययित्वा उपवेश्य वा तस्मिन् घटे अत्युत्तप्तां शिलां लोहगुडिकां वा प्रक्षिपेत्। तेन च क्वाथोऽसौ वाष्पीभूय तं स्विद्यति इति। कूपस्वेदमाह कूपमिति। शयनविस्तारं खट्वाविस्तारमितव्यासम्। वेधत: गम्भीरतो द्विगुणं व्यासद्विगुणम्। करीषै: शुष्कगोमयै:। दग्धपूरिते ज्वलितैर्विगतधूमै: तै: पूरिते। सुसंस्तीर्णे शयनखट्टया आवरिते इत्यर्थ: कूपोपरि खट्टां पातयित्वा इति निष्कर्ष:। नाऽत्र:॥ होलाकस्वेदमाह धीतिकामिति। धीतिका गोमयादिनिर्मितो दण्ड: स च शुष्को धीतिकेत्युच्यते 'नोंदा' इति वंगीया:। यथोक्तानां हस्त्यादीनाम्। शयनान्त:प्रमाणेन शयनखट्टाया: प्रमाणं व्याप्येत्यर्थ:। यथोक्तां नातिसान्द्रपरिच्छदाम्। अनग्निगुणसंश्रयं स्वेदं विवक्षुरग्निगुणसंश्रयं स्वेदमुपसंहरति इतीति॥ ५५–६३॥

अनग्निस्वेदमाह व्यायाम इति। व्यायाम: श्रमजनकं कर्म। उष्णसदनं स्वभावत उष्णं गृहम्। गुरुभि: प्रावारकम्बलादिभि: प्रावरणम्। बहुपानं बहुमद्यपानम्। उपनाह: अगुर्वादिभि: स्थूलो लेप:। आहवो युद्धम्। अग्निगुणात् साक्षादग्निसम्बन्धात्। पुनश्च भेदप्रकृत्यन्तरेण स्वेदभेदानाह इत्युक्त इति। द्वन्द्वं परस्परविरुद्धं युग्मम्। स्वेदानन्तरकर्तव्यमाह स्निग्ध इति। अतिरोहितार्थमन्यत्॥ ६४–६७॥

अध्यायं समापयितुकामोऽध्यायार्थं श्लोकैर्निर्दिशति तत्र श्लोका इति ॥ ६८-७१ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने स्वेदाध्यायो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः ।

स्नेहस्वेदानन्तरं हि वमनादिशोधनकर्म्मणां प्रवृत्तिः तेषां तु बहुव्यापत्तिमत्त्वेन तत्कर्मचिकीर्षुभिर्भिषग्भिरादौ तेषां पूर्वपश्चात्कर्मणो यौगिकानि द्रव्याणि उपकल्पनीयानि भवन्तीति तानि व्याचिख्यासुरध्यायान्तरमारभते अथात इत्यादिना । शोधनार्थामुपकल्पनामधिकृत्य प्रवृत्तोऽध्याय उपकल्पनीयः ॥ १-२ ॥

इहेति । राजमात्रं राजतुल्यमित्यर्थः । विपुलद्रव्यं धनवन्तम् । सम्भृतसम्भारं संगृहीतद्रव्यसमूहम् । सम्भाराः तत्कर्मोपयोगीनि द्रव्याणि । ननु तानि किमर्थं संगृह्यन्ते इत्याह सम्यगिति । सम्यगगच्छत्यौषधे औषधप्रयोगस्य समयोगे । प्रतिभोगार्थाः संसर्जनार्थाः । व्यापन्ने अयोगातियोगे तु व्यापदः परिसंख्याय भेदेन निश्चित्य । ननु कर्मकरणात् प्रागेव कथं ते संग्राह्या इत्याह न हीति । काले प्रयोगकाले सन्निकृष्टे आगते सति आपदि प्रादुर्भूतायां क्रयाक्रये क्रयविक्रयापने सत्यपि आशु औषधानां सम्भरणं संग्रहो न सुकरं स्याद् अत आदौ आवश्यकानि द्रव्याण्युपकल्पनीयानि भवन्ति इत्याशयः ॥ ३ ॥

अत्र शङ्कते अग्निवेश इत्येवमिति । शङ्काप्रकारमाह नन्विति । ज्ञानवता चिकित्साशास्त्रपारगेण । प्रतिविधातव्यं प्रयोक्तव्यम् । एकान्तेन निश्चितमेव सिध्येत् न व्यापत्तिं गच्छेदित्यर्थः । अयमर्थः—चिकित्सको हि सर्वथा शास्त्रमधीत्य कर्म चोपास्य उभयज्ञश्चेच्चिकित्सामारभेत तदा कुतो व्यापत्तेराशंका । भेषजे यथावत्प्रयुक्तेऽपि यदि कदाचित् सिध्येत् कदाचिद्वा व्यापत्तिमद् भवेत् तर्हि शास्त्रज्ञानमप्यज्ञानेन समं स्यात् इति ॥ ४ ॥

शंकामेतां निरस्यति तमुवाचेति । अस्मद्विधैर्योगदर्शिभिस्त्रिकालज्ञैरित्यर्थः । प्रयोगसौष्ठवं व्यापद्विरहितत्वेन औषधानां प्रयोगमित्यर्थः । उपदेष्टुं शक्यमित्यन्वयः । ननु भवदुपदेशेनैव सर्वे तथा प्रतिविधातुं शक्नुवन्तीति नेत्याह नहीति । एवमुपदिष्टमपि शास्त्रमुपधारयितुं सम्यगध्येतुं प्रतिपत्तुमवबोद्धुं प्रयोक्तुं तदनुसारेण च कर्म कर्तुं य उत्सहेत शक्नुयात् एवं कश्चिन्नास्तीत्यर्थः । तत्राशक्यतायां को हेतुरित्याह सूक्ष्माणीति । दोषादीनामवस्थान्तराणि हि सूक्ष्माणि एतेषां विभिन्नास्ववस्थासु भेदनिर्णयः सूक्ष्मत्वेन न सुगमो भवतीत्यर्थः । एतेषां पृथग भेदः परीक्षापार्थक्यञ्च विमानस्थाने स्वयमेवाचार्यः निगदतो व्याकरिष्यतीति वयमिहोदास्महे । अतो यत्र तीक्ष्ण-

शैत्येन प्रतिहतश्चक्षुषो: स्थानसंश्रयं कृत्वा तं नाशयतीति भाव:। यदुक्तं शालाक्ये—"शीतसात्म्यां नृणां दृष्टिमाहुर्नयनचिन्तका:" इति। "उष्णाभितप्तस्य जले प्रवेशात्.....नेत्रे विकारान् जनयन्ति दोषा:।" इति च ॥४६॥

अश्मघनस्वेदमाह शयानस्येति। घनां दृढाम्। अश्ममयीं पर्वतगात्रवन् निविडावयवाम्। एताभ्यां प्रज्वालितैर्दारुभिरुपतप्तायामपि नेयं विदीर्णा चटिता वा भवतीति ज्ञेयम्। व्यपोह्य दूरीकृत्याङ्गारानिति सम्बन्ध:। प्रोच्य सुधौतां कृत्वा। संस्तर: शय्या। रौरवादयो वस्त्रविशेषा:॥ कर्षूस्वेदमाह कर्षूस्वेद इति। कर्षू: यज्ञे अग्न्याधानार्थ: खातविशेष:। सा च वितस्त्यायता स्यात्। तत्साम्यात्कर्षूरिह वितस्त्यायत: अंगारधानिकावत् कृत: खातो मन्तव्य:। शयनस्य शयनखट्वाया इत्यर्थ:॥ कुटीस्वेदमाह अनत्युत्सेधेति। अनत्युत्सेधविस्तारामिति मध्यमप्रमाणाम्। ताञ्च अष्टारत्निविस्तारोच्चां कारयेत्। अलोचनां गवाक्षादिरहिताम्। "तुन्दुर" इति ख्यातकोशकीटस्वेदनगृहवदस्या आकृतिर्भवेत्। घनभित्तिं प्रशस्तभित्तिम्। कुष्ठाद्यैर्वातहरैर्द्रव्यै:। प्रलेपयेदन्तर्भित्तिमिति शेष:। मध्ये प्रावारादिभि: शय्यां कृत्वा समन्ततो भित्तिसमीपे हसन्तिका अंगारधानिका: ज्वलदंगारपूर्णा: विगतधूमा: स्थाप्या इत्यर्थ:॥ ४७–५४॥

भूस्वेदमाह य एवेति। अश्मघनस्वेदे यथा शिला उपतप्या तथैव भूरेवोपतप्तव्या भवतीति विशेष:। कुम्भीस्वेदमाह कुम्भीमिति। अयमर्थ:—वातहरदशमूलादिक्काथपूर्णमेकं घटं भूमौ त्रिभागमर्धभागं वा निखात्य तदुपरि सूक्ष्मबहुच्छिद्रमेकं शयनमासनं वा संस्थाप्य तदुपरि तनुवस्त्रावृतं स्वभ्यक्तं स्वेद्यं शाययित्वा उपवेश्य वा तस्मिन् घटे अत्युत्तप्तां शिलां लौहगुडिकां वा प्रक्षिपेत्। तेन च क्काथोऽसौ वाष्पीभूय तं स्विद्यति इति। कूपस्वेदमाह कूपमिति। शयनविस्तारं खट्वाविस्तारमितव्यासम्। वेधत: गम्भीरतो द्विगुणं व्यासद्विगुणम्। करीषै: शुष्कगोमयै:। दग्धपूरिते ज्वलितै: विगतधूमै: तै: पूरिते। सुसंस्तीर्णे शयनखट्टया आवरिते इत्यर्थ: कूपोपरि खट्टां पातयित्वा इति निष्कर्ष:। नाऽत्र:॥ होलाकस्वेदमाह धीतिकामिति। धीतिका गोमयादिनिर्मितो दण्ड: स च शुष्को धीतिकेत्युच्यते 'नोंदा' इति वंगीया:। यथोक्तानां हस्त्यादीनाम्। शयनान्त:प्रमाणेन शयनखट्टाया: प्रमाणं व्याप्येत्यर्थ:। यथोक्तां नातिसान्द्रपरिच्छदाम्। अनग्निगुणसंश्रयं स्वेदं विवक्षुरग्निगुणसंश्रयं स्वेदमुपसंहरति इतीति॥ ५५–६३॥

अनग्निस्वेदमाह व्यायाम इति। व्यायाम: श्रमजनकं कर्म। उष्णासदनं स्वभावत उष्णं गृहम्। गुरुभि: प्रावारकम्बलादिभि: प्रावरणम्। बहुपानं बहुमद्यपानम्। उपनाह: अगुर्वादिभि: स्थूलो लेप:। आहवो युद्धम्। अग्निगुणात् साक्षादग्निसम्बन्धात्। पुनश्च भेदप्रकृत्यन्तरेण स्वेदभेदानाह इत्युक्त इति। द्वन्द्वं परस्परविरुद्धं युग्मम्। स्वेदानन्तरकर्तव्यमाह स्निग्ध इति। अतिरोहितार्थमन्यत्॥ ६४–६७॥

अध्यायं समापयितुकामोऽध्यायार्थं श्लोकैर्निर्दिशति तत्र श्लोका इति ॥ ६८-७१ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने स्वेदाध्यायो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः ।

स्नेहस्वेदानन्तरं हि वमनादिशोधनकर्म्मणां प्रवृत्तिः तेषां तु बहुव्यापत्तिमत्त्वेन तत्कर्मचिकीर्षुभिर्भिषग्भिरादौ तेषां पूर्वपश्चात्कर्मणो यौगिकानि द्रव्याणि उपकल्पनीयानि भवन्तीति तानि व्याचिख्यासुरध्यायान्तरमारभते अथात इत्यादिना । शोधनार्थामुपकल्पनामधिकृत्य प्रवृत्तोऽध्याय उपकल्पनीयः ॥ १-२ ॥

इहेति । राजमात्रं राजतुल्यमित्यर्थः । विपुलद्रव्यं धनवन्तम् । सम्भृतसम्भारं संगृहीतद्रव्यसमूहम् । सम्भाराः तत्कर्मोपयोगीनि द्रव्याणि । ननु तानि किमर्थं संगृह्यन्ते इत्याह सम्यगिति । सम्यग्गच्छत्यौषधे औषधप्रयोगस्य समयोगे । प्रतिभोगार्थाः संसर्जनार्थाः । व्यापन्ने अयोगातियोगे तु व्यापदः परिसंख्याय भेदेन निश्चित्य । ननु कर्मकरणात् प्रागेव कथं ते संग्राह्या इत्याह न हीति । काले प्रयोगकाले सन्निकृष्टे आगते सति आपदि प्रादुर्भूतायां क्रयाक्रये क्रयविक्रयापने सत्यपि आशु औषधानां सम्भरणं संग्रहो न सुकरं स्याद् अत आदौ आवश्यकानि द्रव्याण्युपकल्पनीयानि भवन्ति इत्याशयः ॥ ३ ॥

अत्र शङ्कते अग्निवेश इत्येवमिति । शङ्काप्रकारमाह नन्विति । ज्ञानवता चिकित्साशास्त्रपारगेण । प्रतिविधातव्यं प्रयोक्तव्यम् । एकान्तेन निश्चितमेव सिध्येत् न व्यापत्तिं गच्छेदित्यर्थः । अयमर्थः—चिकित्सको हि सर्वथा शास्त्रमधीत्य कर्म चोपास्य उभयज्ञश्चेच्चिकित्सामारभेत तदा कुतो व्यापत्तेराशंका । भेषजे यथावत्प्रयुक्तेऽपि यदि कदाचित् सिध्येत् कदाचिद्वा व्यापत्तिमद् भवेत् तर्हि शास्त्रज्ञानमप्यज्ञानेन समं स्यात् इति ॥ ४ ॥

शंकामेतां निरस्यति तमुवाचेति । अस्मद्विधैर्योगदर्शिभिस्त्रिकालज्ञैरित्यर्थः । प्रयोगसौष्ठवं व्यापद्विरहितत्वेन औषधानां प्रयोगमित्यर्थः । उपदेष्टुं शक्यमित्यन्वयः । ननु भवदुपदेशेनैव सर्वे तथा प्रतिविधातुं शक्नुवन्तीति नेत्याह नहीति । एवमुपदिष्टमपि शास्त्रमुपधारयितुं सम्यगध्येतुं प्रतिपत्तुमवबोद्धुं प्रयोक्तुं तदनुसारेण च कर्म कर्तुं य उत्सहेत शक्नुयात् एवं कश्चिन्नास्तीत्यर्थः । तत्राशक्यतायां को हेतुरित्याह सूक्ष्माणीति । दोषादीनामवस्थान्तराणि हि सूक्ष्माणि एतेषां विभिन्नास्ववस्थासु भेदनिर्णयः सूक्ष्मत्वेन न सुगमो भवतीत्यर्थः । एतेषां पृथग्भेदः परीक्षापार्थक्यञ्च विमानस्थाने स्वयमेवाचार्यः निगदतो व्याकरिष्यतीति वयमिहोदास्महे । अतो यत्र तीक्ष्ण-

बुद्धेरपि बुद्धि: पर्याकुला भवेत् तस्य निगदत उपदेश एव वरं भवति यथा त्रिविधशिष्यबुद्धिवेद्यं शास्त्रं भवेत् । सिद्धिषु सिद्धिस्थानाख्ये ग्रन्थे । उत्तरकालं परस्तात् ॥ ५ ॥

इत: परस्ताद् अध्यायप्रकृतार्थमारभते इदानीमिति । तत्र प्राग् आतुरागारं वर्णयति दृढमिति । दृढं न यं सहसा प्रकम्पयितुं शक्यते तादृशम् । निवातं प्रवातैकदेशमिति यत्र सम्यक्तया वायु: सञ्चरति आतुरस्थानं तु बाह्यवायुसम्बन्धरहितं स्यात् तमित्यर्थ: । सुखप्रविचारमिति सर्वत्र कक्षे कक्षे सुखेन गतायातयोग्यम् । अनुपत्यकमसमीपस्थम् यथा तत्र धूमादीनां प्रवेशो न भवेत् तथानिर्मितमित्यर्थ: । अनिष्टानां शब्दादीनां यत्र प्रवेशो भवितुं नार्हति तथैव कर्तव्यमित्याह अनभिगमनीयमिति । अत्र भवने पञ्च कक्षा: स्यु: कूपश्चैक: । आतुरशयनगृहसमीप एव उदूखलमुषलस्थानमेकस्यां कक्षायामौषधपेषणादियन्त्राणि स्यु: । तस्यैव संज्ञा उदूखलमुषलस्थानम् । एकत्र च कक्षे स्नानार्थद्रव्याणि आहृतानि स्यु: । एकत्र च वर्च्च:स्थानं मूत्रोच्चारादित्यागस्थानम् । अपरस्मिन् महानसं पाकशाला भवेत् । उदपानमेक: कूपोऽपि भवनसन्निकृष्टो भवेत् । वास्तुविद्याकुशल: भवननिर्माणचतुर: उपकल्पयेत् निर्मीयात् ॥ ६ ॥

तत्र च भवने अपरे ये सम्भारा: सन्निवेशनीयास्तान् व्याचिकीर्षु: प्राक्परिचारकानाह । शीलेति । ते शीलादिगुणसम्पन्ना: स्यु: । शीलं सुचरित्रम् । शौचमन्तर्बहि:शुद्धि: । आचार: व्यवहार: । दाक्ष्यं दक्षता । प्रादक्षिण्यमनुकूलता । शीलादिभिरुपपन्नान् । उपचार: आतुरसेवा पर्यवदातान् निष्णातान् । संवाहक: अङ्गसेवक: । परिचारकास्तु विभिन्नक्रियासु विभिन्ना: स्यु: परन्तु सर्वेऽपि सर्वकर्मसु अप्रतिकूलान् योग्यान् भवेयु: । तथेति सुहृद्गुणानाह । ते च गीतादिषु कुशलान् अभिप्रायज्ञान् आतुराभिप्रायमिङ्गितेन बोद्धुं योग्यान् । उल्लापकं नर्मवाक्यं तत्कुशलान् "भाँड" इति प्रसिद्धान् । देशकालविद: यस्मिन् देशे यस्मिंश्च काले यथा कर्तव्यं तद् जानन्ति ये ते । परिषद्यान् सभासदश्च । सर्वत्रैवोपकल्पयेदिति योजना दोग्ध्रीं दुग्धवतीञ्च गाम् । सुप्रतिविहितेति-सुप्रतिविहितं सम्यक् अवचारितं तृणं खाद्यं शरणमावासस्थानं पानीयं जलञ्च यस्यास्ताम् । अन्यथा तस्या: दुग्धं न गुणवद् भवेदित्यर्थ: । शीलवतीं न चण्डाम् । पात्री स्वल्पजलपात्रम् । आचमनीयं निष्ठीवनपात्रम् स्वल्पं 'पिक्दानी' इति भाषा । उदकोष्ठ: वृहज्जलाधार: 'टब' इति पाश्चात्या: । मणिकं मृदादिनिर्मितो वृहज्जलाधारविशेष: 'नाला' इति वंगे । पिठरं स्थाली । पर्योग: कुण्डम् । कट: आस्तरणविशेष: 'मादुर' इति भाषा । उदञ्चनं पिधानपात्रम् । परिपचनं पाकस्थाली । मन्थानदण्ड: दध्यादिमन्थनार्थं यन्त्रविशेष: । चेलं वस्त्रम् । ऊर्णा मेषादिलोम । शयनासनानि किम्भूतानीत्याह उपन्यस्तेति । उपन्यस्तौ समीपस्थौ भृङ्गार: गडुक: प्रतिग्राह: पतद्ग्रहश्च वमनादिधारणार्थपात्रविशेष: 'डाबर' इति भाषा

येषां तानि । आस्तरणं शय्याया निम्नास्तरणम् । उत्तरप्रच्छदः उपर्य्यास्तरणम् । उपधानं शिरोधानं 'तकिया' इति भाषा । सोपाश्रयाणीति उपाश्रयः उत्तानपूर्वकायस्य निषण्णाय आश्रयविशेषः तेन सह वर्तनानानि सर्वत्रैव शय्यायामासने वा एवं पूर्वकायनिषण्णायाश्रयः कर्तव्यः । पुनश्चैतानि यथा संवेशनादिकर्मणामुपचारे यथा सुखं भवति तादृक्कर्तव्यानि । औषधपेषणार्थं दृषदश्चाह सुप्रक्षालितेति । उपधानाः शिलापुत्रकाः 'लोढ़ा' इति भाषा । ताश्च श्लक्ष्णा मसृणाः, खराः कर्कशाः मध्यमाश्च नातिश्लक्ष्णा नातिखराश्च भवेयुः । धूमनेत्रं धूमपानार्थं नलिका । वस्तिनेत्रं वस्तिसहितं नेत्रमनुवासननिरूहार्थम् । उत्तरवस्तिकमुत्तरवस्त्यर्थं यन्त्रम् । कुशहस्तकं सम्मार्जनी । तुला घनद्रव्यमानाय । मानभाण्डन्तु द्रवद्रव्यमानाय । इन्धनं पाकार्थं काष्ठम् । सीधुः मद्यविशेषः । सौवीरकतुषोदकौ यवकृतसन्धानविशेषौ । मैरेयन्तु "मैरेयं धातकीपुष्पगुडधान्याम्लसंहितम्" इति लक्षणो सन्धानविशेषः । मेदको जालीनाम्नी सुरा । दधिमण्डः मस्तुः । उदस्वित् तक्रम् । काश्मर्यं गाम्भारीफलम् । परुषकं 'फालसा' इति भाषा । प्रतिभोगार्थं शोधनानन्तरमाबललाभात् पथ्यार्थम् ॥ ७ ॥

उपकल्पनीयानि द्रव्याणि संगृह्य ततस्तस्य पञ्चकर्मक्रमं निर्विवेदयिषुराह तत इति । ततः संगृह्याणि संगृह्य । यथोक्ताभ्यां पूर्वपूर्वाध्याये उपदिष्टाभ्याम् । यथार्हं यः पुरुषो यथा स्नेहयितव्यो यथा वा स्वेद्यस्तद्योग्यं यथा स्यात् तथा । एतस्मिन् अन्तरे स्नेहस्वेदक्रियावसरे । अभ्यागच्छेदाक्रमेत् । उपावर्तयितुं शमयितुम् । ततोऽपि पुनः स्नेहस्वेदाभ्यामुपपादयेदित्याह तावन्तमिति । तथाविधेनेति स्नेहस्वेदाभ्यामित्यर्थः ॥ ८ ॥

स्नेहस्वेदानन्तरं वमनविधिमाह तत इति । अनुपहतमानसमविकृतमनस्कम् । सुखोषितमिति रात्रौ सुसुप्तमित्यर्थः । सुप्रजीर्णमक्तं नैशे आहारे जीर्णे सतीत्यर्थः एतेन प्रातरभुक्तस्यैव वमनौषधपानं कर्तव्यमिति ज्ञेयम । ब्राह्मणान् स्वस्तिवाचनं कारयित्वेति योजना । प्रयुक्ताभिराशीभिः कल्पस्थानोक्तैर्ह्यरुद्रेन्द्रेत्यादिभिः मन्त्रैरभिमन्त्रिताम् । मध्वादीनां प्रक्षेपो विरुद्धोऽपि वामकौषधत्वेन जीर्णतां न गमिष्यतीति न दोषः ॥ ९ ॥

ननु मदनफलकषायस्य का मात्रा पेया इत्याह मदनफलेति । सर्वेषामेव शोधनद्रव्याणां मात्रा तु प्रतिपुरुषमपेक्ष्य कल्पनीया । न खलु क्षीणबलवतोः न वा मन्ददीप्ताग्न्योरेका मात्रा भवितुमर्हति इत्याह यावद्धीति । यत्प्रमाणौषधसेवनेन पूर्णतया दोषनिर्हरणं भवति नातियोगोऽयोगो वा भवति तावदस्य मात्राप्रमाणं वेदितव्यं भवति ॥ १० ॥

प्रधानकर्मणो विधानमुक्त्वा पश्चात्कर्मणो विधिमाह पीतवन्तमिति । अनुकांक्षेत् समीक्ष्यमानोऽपेक्षेत । का सा परीक्षा इत्याह तस्येति । अयमर्थः—स्रोतःस्ववलोना दोषाः यदा प्रविलयमागतास्तदा स्वेदप्रादुर्भावं तत्स्थानान् महास्रोतः प्रति प्रचलितास्तु रोमहर्षं जनयन्ति । आमाशय-

स्थानसमाध्मापनेन च ते तत्रागता इति विज्ञानीयात् । कुक्षिशब्दस्योदरवाचित्वेऽप्यत्र तेन तस्यैकदेश आमाशय एव प्रतीयते । वमननिर्हरणीया: श्लेष्माणस्तु तत्रैव प्रत्यागच्छेयु: कफस्रोतोमूलत्वात् । ततो जातायां विवमिषायां वमनकर्मयोग्यमासनमधितिष्ठेत् । किम्भूतमासनमित्याह जानुसममिति जानुसमं जानुसमोच्चम् । असंबाधं मत्कुणादिविरहितम् । सोपाश्रयं पृष्ठाश्रययुक्तम् । प्रतिग्रहान् वमनद्रव्यधारणार्थं पतद्ग्रहान् 'डावर' इति भाषा । उपचारयेत् समीपं रक्षेत् । ललाटेति–अलज्जाविषयेषु सुहृत्सु एको ललाटमग्रहस्तेन धारयेत् एकश्च उभयाग्रपाणिना पार्श्वे गृह्णीयात् । अपरश्च नाभिमस्यावपीडयेत् । कश्चित् पृष्ठवंशमस्य मर्दयेत् । तत्रातुरकर्तव्यमाह अथैनमिति । उपवेगं वेगागमनकाले । विवृतेति मुखं व्यादाय । उदीर्णान् वेगान् नातिमहता श्रमेण उदीरयन् ग्रीवामूर्धशरीरमित्यूर्ध्वकायमित्यर्थ: । किञ्चिदवनम्य सुखं प्रवर्तयस्वेति योजना । अनागते वेगे किं कर्तव्यमित्याह अप्रवृत्तानिति । सुपरिलिखितनखाभ्यां परित्याज्यं नखांशं सम्यक् छित्त्वा मसृणञ्च कृत्वा अंगुलिभ्यां मध्यमानामिकाभ्यां तर्जनीमध्यमाभ्यां वा । अथवा उत्पलनालै: कण्ठमिति उपजिह्विकासमीपमित्यर्थ: । तत्र शनैरेवं स्पर्शेन वमनवेग उदीर्णो भवतीत्यर्थ: । वमनान्तरकर्तव्यमाह ततोऽस्येति । वेगान् वमनवेगनि:सृतानि द्रव्याणि प्रतिग्राहगतान् पतद्ग्रहपतितानि । तत्परिमाणत एव वमनस्यायोगादिकं ज्ञायते पुनरयोगादिकं ज्ञात्वैव तत्र कर्तव्याकर्तव्यमध्यवसितव्यमिति वान्तद्रव्यस्य मानसंस्थानादिकं नूनं द्रष्टव्यं भिषजा इत्याह वेगविशेषेति ॥ ११–१२ ॥

तत्र वमनस्यायोगयोगातियोगलक्षणान्याह तत्रामूनीति । अप्रवृत्ति: कुतश्चिदिति वामकौषधस्याप्यप्रवर्तनम् । केवलस्य कृत्स्नस्यौषधस्य वा विभ्रंशो निर्गमनम् । वेगानां विबन्ध: किञ्चित्प्रवृत्त्यनन्तरं वेगाभाव: । त्रयमेतद् अयोगस्य लक्षणम् । योगलक्षणमाह काले इति । काले मुहूर्तात् परमित्यर्थ: । अनतिमहती व्यथा वमनकाले नातिवेदनानुभव: । यथाक्रममिति आदावौषधं तदनु श्लेष्मा तदनु पित्तं तदनु वायु: । स्वयञ्चावस्थानं विना भेषजेन स्वयमेव निवृत्ति: । त्रयमेतद्योगलक्षणम् । तत्रापि वान्तद्रव्यप्रमाणेन तीक्ष्णयोगो मध्ययोगो मृदुयोगश्चानुमेया इत्याह योगेनेति । अतियोगलक्षणमाह योगाधिक्येनेति । वान्तद्रव्येण सह फेनिलद्रव्यस्य रक्तस्य चन्द्रिकोपगतस्य द्रव्यस्यागमनमतियोगलक्षणमित्यर्थ: अयोगातियोगजन्यानुपद्रवानाह तत्रेति । आध्मानमत्र प्रत्याध्मानं ज्ञेयम् आमाशये समुन्नद्धोदरता अनिलसङ्गश्च तत्र भवति । परिकर्तिका चात्र कण्ठक्षणनं ज्ञेयम् । उरसि कण्ठे च सदाहं कर्तनवत् पीडा भवतीति अस्या: परिकर्तिकेति संज्ञा । परिस्रावश्चात्र श्लेष्मप्रसेक: सवेदनोऽस्य श्लेष्मा मुखात् परिस्रवतीति चास्य परिस्राव इति संज्ञा । हृदयोपसरणन्तु प्रधानमर्मसन्तापात् वेदनाभिरत्यर्थं पीड्यमान: दन्तान् किट्किटायते उद्गताक्षो जिह्वां दशति विचेताश्च भवति ।

अङ्गग्रहः वेदनास्तम्भादिभिः शरीराक्रमणम् । जीवादानं वमनातियोगे शोणितष्ठीवनं शोणितच्छर्दनं वा । ततो जिह्वानिःसरणमन्तःप्रवेशो वा अक्ष्णोः व्यावृत्तिः हनुसंहननं हिक्का विसंज्ञा चेत्यादिलक्षणानि भवन्ति । विभ्रंशोऽत्र स्वरविभ्रंशो ज्ञातव्यः । स्तम्भो जिह्वादीनाम् । क्लमः श्रान्ति-बोधः ॥ १३ ॥

सम्यग्योगेन वमनोत्तरं कर्माह योगेनेति । योगेन नातियुक्त्याऽयुक्त्या वा । आश्वास्य विश्रम्य । धूमपानन्तु स्नैहिकादिकं सामर्थ्यतः यस्य यद् युज्यते तस्य त्रिविधेषु धूमेषु अन्यतमं पाययित्वा । उपस्पर्शयेत् आचामयेत् । अत्यासनम् उपविश्यातिकालमवस्थानम् । अतिस्थानन्तु दण्डायमानो भूत्वेति भेदः । अतिचंक्रमणम् अतिभ्रमणम् । अवश्यायः शिशिरः । यानयानं हस्त्यादियानेन भ्रमणम् । ग्राम्यधर्मो मैथुनम् । एतान् भावान् उच्चैर्भाष्यादिकान् उदीरणान्तान् ॥ १४—१५ ॥

ततोऽस्य पथ्यक्रममाह अथैनमिति । सायाह्ने परेऽहनि वेति विकल्पो अग्निशुद्धताऽशुद्धतायां ज्ञातव्यः । सुखोदकपरिषिक्तम् ईषदुष्णेनोदकेन स्नातम् । स्ववक्लिन्नां सम्यग्गलिताम् । तनुना द्रवतरेण । तनुस्नेहलवणोपपन्नं स्वल्पस्नेहादियुक्तम् । लावः पक्षिविशेषः । कपिञ्जलस्तित्तिरिः । औदक-लावणिकेन सजलेन सलवणेन च । प्रकृतिभोजनं यथापूर्वं भोजनम् ॥ १६ ॥

वमनान्तरं विरेचनविधिमाह अथैनमिति । एनमातुरं पुनरेव स्निग्धं स्विन्नं च कृत्वा । अनुपहतमानसं केनापि मानसेन व्याधिनाऽनाक्रान्तम् । सुखोषितं सुखस्वप्नेनातिवाहितरात्रमित्यर्थः । सुप्रजीर्णभक्तं नैशे आहारे सम्यग्जीर्णे सतीत्यर्थः । अजीर्णे विरेचननिषेधात् । अक्षमात्रं कर्षमात्रम् । नाद्यत्वे मात्रेयं युज्यते पुरुषाणामल्पबलत्वात् तेन शानमेव परं मानं भवेत् । त्रिवृत्कल्कमरुणमूलत्रिवृत्कल्कं नातिव्यापत्तिकरत्वात् । यथार्हालोडनप्रतिविनीतम् आलोडनद्रव्यादिकन्तु सिद्धिस्थाने द्रष्टव्यम् । दोषेति दोषादीनामवेक्षणे विशेषतो यत्न आधेयः अन्यथा मात्राविभ्रमादयोगातियोगौ भवतः । विरेचनसम्यग्योगात् परमुत्तरं कर्म तु धूमवर्ज्यं वमनोत्तरकर्मवदित्याह सम्यगिति । आबलवर्णप्रतिलाभाद् यावत् पूर्ववत्ततोऽधिकं बलवर्णादिकं लभते तावदित्यर्थः । सुप्रजीर्णभक्तमित्यत्र स्नानानुरोधात् । अजीर्णे ह्यन्ने स्नानं निषिद्धम् । अर्थमिमं समासतः पद्यैराह भवन्ति चात्रेति । ननु शोधनस्य चेदयमेव विधिः स्यात्तर्हि दरिद्राणां तदसम्भाव्यमेव भवति न ते एतान् सम्भारान् आहर्तुं शक्नुवन्तीत्याह दरिद्र इति । ते दुर्लभान् बहुव्ययसाध्यांश्च असंभृत्य असंगृह्यापि विरेकान् पिबेयुरित्याशयः । अर्थमिमं समर्थयति न हीति । परिच्छदशब्देनेह औषधान्नादिकं सर्वमेव लक्ष्यते । क्रियायामस्यां दरिद्रधनिकयोरयमेव विधिभेदो यत् दरिद्रस्त्वापदं प्राप्य सम्भारमसम्भृत्यापि विरेचनं पिबेत् । धनिकस्तु सम्भारं संभृत्येति ॥ १७—२२ ॥

अध्यायार्थं समासतो वक्ति तत्र श्लोका इति । अतिरोहितार्थमन्यत् ॥ २३-२५ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने उपकल्पनीयो नाम पञ्चदशोऽध्याय: ॥१५॥

—:०:—

षोडशोऽध्याय: ।

समासत: संशोधनप्रकारं निवेद्य संशोधनप्रयोजनादिकं पुनर्विवक्षुरध्यायान्तरमारभते अथात इत्यादिना । चिकित्साप्राभृत इति शब्दमधिकृत्य प्रवृत्तोऽध्याय: चिकित्साप्राभृतीय: । संशोधनं चिकित्साकुशलेन विदुषा च भिषजा कारयितव्यमित्याह चिकित्सेति । चिकित्सायां प्राभृत: निष्णात इत्यर्थ: । शास्त्रवान् प्रशस्तशास्त्रकर्मतत्पर: बहुश: कर्मकरणेन कृतयोग्य इत्यर्थ: । योगात् यथावद् योगं प्राप्येत्यर्थ: । सुखमश्नुते आरोग्यं लभते । वैद्यमानी छद्मचर: सिद्धसाधितश्च भिषक् ॥ १—४ ॥

अतो विरेचनस्य योगायोगातियोगलक्षणं विशदं व्याचष्टे दौर्बल्यमिति । दौर्बल्यादिकं शरीरस्य । ग्लानि: क्षीणता । अणुता ह्रस्वता । काले यथासमये वेगानां मलादीनां प्रवर्तनमुत्सर्ग: । कायाग्नेर्जाठराग्ने: अनुवर्धनं क्रमशो वर्धनम् । अयोगजातान् उपद्रवानाह ष्ठीवनमिति । ष्ठीवनं प्रसेक: । हृदयाशुद्धि: हृल्लास: । उत्क्लेशो वमनम् । स्तैमित्यमार्द्रपटावगुण्ठिततत्वमिव । मारुतस्याधोवातस्य निग्रह: अप्रवर्तनम् । अतियोगलक्षणमाह विडिति । परं यथावद् विडादिस्रावादनन्तरम् । मेदोमांसोदकोपममिति मेदोमिश्रं चन्द्रिकोपगतमित्यर्थ: मांसधावनतोयाभं वा । उदकं नि:श्लेष्मपित्तं यत्र जले कोऽपि पित्तादिकृतो वर्ण: पिच्छादिकं वा न दृश्यते तादृशं जलमित्यर्थ: । कृष्णं कृष्णवर्णं घनं च शोणितम् । तृष्यत: तृष्णाक्रान्तस्य । प्रमुह्यत: मोहं गच्छत: । मारुतार्त: रुग्वेपथुतोदखल्ल्यादिना आक्रान्त: ॥५-१०॥

वमनातियोगे वैशेष्यमाह वमने इति । ऊर्ध्वगा ऊर्ध्वजत्रुगता: । वाग्ग्रह: स्वरभेद: । निगमनमाह चिकित्सेति । तस्मादकुशलेन भिषजा प्रयुक्तं भेषजं व्यापत्तिमद् भवतीति । शरणमुपेयात् वमनविरेचनयो: रक्षितारमवगच्छेत् । आयुषा सुखायुषा हितायुषा च सुखेनारोग्येण युञ्ज्यादिति योजना ॥ ११—१२ ॥

ननु क: संशोधनार्ह इत्याह अविपाक इति । अविपाक: अजीर्णता । अरुचि: अभक्तच्छन्दता । पाण्डुता रक्तस्य वर्णवैकृत्या पाण्डुवर्णता । गौरवं गुरुत्वं शरीरस्य । क्लम: विना श्रमेण क्लान्तिबोध: । अरति: कार्ये अनिच्छा । अवसादक: अवसन्नता । श्लेष्मपित्तयो: समुत्क्लेश: उद्गार: । अबुद्धित्वं बुद्धेर्जडता । वृंहणै: पुष्टिकारकैराहारादिभि: तृप्यत: बहुश: प्रयोगेण तृप्तिं गच्छतोऽपि बलवर्णप्रणाश: । इत्युक्तानि बहुदोषस्य सञ्चित-

बहुदोषस्य लिङ्गानि भवन्तीति शेषः। ऊर्ध्वं वमनेन अनुलोमञ्च विरेचनेन। यथादोषमिति श्लेष्मणि वमनं पित्ते च विरेचनम्। यथाबलमिति बलानुसारेण मृदुमध्यतीक्ष्णमात्रया संशोधनं हितं भवेदिति शेषः। संशोधनगुणानाह एवमिति। कायाग्निर्जाठराग्निः। संशोधनमत्र करणेऽनट् अतो वमनादिकरं द्रव्यमित्यर्थः॥ १३—१४॥

ननु लङ्घनपाचनादिभिरेव दोषनिर्जयः स्यात् किमिति बहुव्यापत्तिकरं दुःखदञ्च संशोधनं पिवेदिप्याह दोषा इति। अर्थमिमं दृष्टान्तेन द्रढयति दोषाणामिति। मूले दोषाणामुत्पत्तिस्थाने सञ्चिते च। गतानां नष्टानाम्॥ २०—२१॥

ननु संशोधनेन दोषक्षये तदुपादानकत्वाद् धातुक्षयोऽपि भवितेति क्षयपूरणार्थं पथ्यान्याह भेषजेति। भेषजेन वमनविरेचनोपगेन प्रयुक्तेन क्षयिते धातुक्षयमापन्ने घृतादिभिराहारैः बृंहणं पथ्यम्। हृद्ययूषाः मुद्गादियूषाः। पुनरभ्यंगादिभिरपि बृंहणं कर्तव्यम्। शर्म सुखमारोग्यमित्यर्थः॥२२—२३॥

भवत्यतियोगेऽयोगे वा किं कर्तव्यमित्याह अतियोगेति। अतियोगानुबन्धानाम् अतियोगजन्यानां व्याधीनाम्। मधुरकैः काकोल्यादिभिर्गणैः। अयोगे तु आदौ संस्नेह्य संस्वेद्य च पुनः संशोधयेत्। पूर्वमनुक्रमं पूर्वे प्रयोगे या यास्त्रुटय आसन् ताः परिहर्तुं पूर्वप्रयोगस्मरणमावश्यकं भवति। अमार्गविहिते विधिबहिर्भूतेषु स्नेहनादिषु कर्मसु ये रोगा जायन्ते तेषां साधनं सिद्धिषु सिद्धिस्थानोक्ताध्यायेषु॥ २४—२६॥

विषमदेहधातूनां विकारत्वं तेषां साम्यापादनमेव चिकित्सा इत्यायुर्वेदसमयः। यदुक्तं "विकारो धातुवैषम्यं धातुसाम्यमरोगता" इति। अतो धातुसाम्यार्था का क्रिया कर्तव्या इति प्रतिपिपादयिषुः पूर्वोक्तसाधनप्रसंगादत्रैवाह जायन्त इति। देहधातवः "दोषधातुमलमूलं हि शरीरम्" इति सिद्धान्तात् त्रिविधा दोषाः सप्तविधा धातवः त्रिविधाश्च मला इति त्रयोदशसंख्यका देहधातव इत्युच्यते। ते खलु हेतुवैषम्यादुपादानकारणवैषम्याद् विषमा जायन्ते हेतुसाम्याच्च समा भवन्ति अतस्तेषामुपरमे कोऽपि हेतुर्नास्तीत्याह स्वभावोपरमः सदेति। तेषां स्वत एवोपरतिर्भवतीत्येवं स्वभावः। विनाशहेतुनिरपेक्षतयैवैषां ह्रासो भवति क्षणविध्वंसित्वादिति भावः। एवम्भूते स्वभावे प्रतिपत्तिमाह प्रवृत्तिहेतुरिति। भावानामत्र देहधातूनां प्रवृत्तिहेतुरस्ति उपलभ्यते। तत्र षड्रसादपि आहारात् त्रिधातूनामुत्पत्तिर्भवति। तत्समवायरूपादन्नरसाद् सप्तधातूनामुत्पत्तिर्भवति अतएवाहारवैषम्याद् धातूनामपि वैषम्यं भवति। परन्तु तेषां निरोधे कारणं नास्ति। ननु "मधुराम्ललवणाः वातं शमयन्ति—" इत्यादिस्पष्टवचनाद् वातादिदोषनाशकतया द्रव्याणां सर्वत्रोपदेशो दृश्यते एवेति चेत् कथ्यते। विषमो हि त्रिधातव एकस्य द्वयोर्वा वृद्धया समतां यान्ति। अतो मधुराम्ललवणैः पूर्णतया श्लेष्मवृद्धया अम्ललवणाभ्याञ्च पित्तवृद्धया वर्धितवायोः

समतामेत्य धातुसाम्यमापादयत इति ते रसा: वातं शमयन्तीति कथ्यते एवं पित्ते कफे च वर्धिते शमकत्वं बोध्यम्। षड्रसादाहारात् त्रिधातोरेवोत्पत्तिर्भवतीति क्षणविध्वंसशीलास्ते धातवस्तेन पोष्यन्त इति तेषामुत्पत्तौ हेतुर्दृश्यते न तु विनाशे। विनाशस्तु सर्वभावानां कालवदनवस्थितसर्वधातुपाकत्वात् स्वत एव जायते। अतएव केचित् पण्डिता उत्पत्तिहेतोरप्रयोग एव तेषां निरोधे विनाशे कारणं मन्यन्ते॥ २७—२८॥

एवं व्यवस्थिते आयुर्वेदसिद्धान्ते तत्र शिष्याणां शंकां दर्शयति एवमिति। ननु यदि दोषाणां निरोधे कारणं न स्यात् स्वभावादेव तेषामुपरतिर्भवेत् तदा चिकित्सा निष्णातस्य वैद्यस्य किं कर्म वर्तते? विषमाणां हि धातूनां समीकरणमेव चिकित्सा, चेत्ते धातव: स्वयमेवोपरता भवेयुस्तर्हि भिषक् कान् विषमान् धातून् समीकुरुते। तर्हि चिकित्साशब्दस्य वा कोऽर्थ: कुत्र किमर्थं वा सा प्रयुज्यते इत्यादिसंशयान् प्रकटीकरोति स्वभावोपरमे इत्यादिना॥ २९—३०॥

तत्रोत्तरमाह गुरु: न नाशेति। नाशकारणाभावाद् भावानां पदार्थानां नाशकारणं न ज्ञायते न तु ज्ञानायोग्यतयेति भाव:। तत्र दृष्टान्तमाह नित्यगस्य सातत्येन गच्छत: कालस्य अत्ययकारणमिव। यथा हि कालो निमेषादिरूपेण सदैव गच्छतीति तस्यातीतकालस्य नाशोऽभिधीयते परन्तु नाशशब्दोऽयं भाक्त एव एवं सर्वत्र ज्ञेयम्। नन्वयं घटो विद्यते ततो मुद्गराद्याघातेन नष्ट इति प्रत्यक्षत एवोपलभ्यते तत्कुतस्तेऽयं प्रलापो भावानां नाशकारणं नास्तीति इति चेदुच्यते। सर्व एव भावा: सन्त: न तेषामुत्पत्तिर्विनाशो वा वर्तते मृद्युपादाने घटो वर्तत एव अन्यथा शशविषाणवत्तस्योत्पत्तिर्न सम्भवेत्। एवं भग्ने घटे पुनरुपादाने तस्य लय एव भवतीति तेषामाविर्भावतिरोभावमात्रमस्मत्प्रत्यक्षीभूतं भवति। अयं हि घटभङ्गो घटस्य परिणामरूप एव। शीघ्रगतत्वात् कालो यथा भूत: अतीतो नष्ट इति यावत् स्यात् तथा भावोऽपि क्षणविध्वंसित्वाद् विपद्यते अन्यथा परिणमति अतस्तेषां निरोधे कारणं नास्ति तथा अन्यथाभावेऽपि क्रिया नास्तीत्यर्थ:॥ ३१-३३॥

ननु तर्हि का नाम चिकित्सा इत्याह याभिरिति। न तत्र दोषाणां ध्वंस एव चिकित्सा स्यात्। यद्यपि स्वत एव विषमधातूनामुपरतिर्भवति तथापि क्रियया ते च विषमा: पुनर्भवन्ति इति विषमानुबन्धवशाद् व्याधयस्तिष्ठन्ति तत्र याभि: क्रियाभि: विषमानुबन्धो धातूनामपगत्य समानां धातूनामनुबन्ध: स्यात् ता: क्रिया श्चिकित्सेत्युच्यते इत्यर्थ:। एतदेव भिषजां कर्म। अत: शरीरे कथं केन प्रकारेण धातूनां वैषम्यं न भवेत् समानाश्च धातूनामनुबन्ध: स्यात् इति हेतोर्भिषजा क्रिया क्रियते। अत: स्वभावोपरमेऽपि भिषजां क्रियाणां नैरर्थक्यं न प्रसज्येतेति भाव:। सा च क्रिया विशिनष्टि त्यागादिति। विषमहेतूनां धातूनां वैषम्यापादककारणानां त्याग: धातुसाम्यापादककारणानाञ्च सेवा एव क्रिया सैव चिकित्सेत्यर्थ:। एषा क्रिया भिषजामेवेत्याह

समैस्त्विति । वैद्यस्तु समहेतुप्रयोगेण विषमान् धातून् समान् कुर्वन्ति अतो देहस्य सुखायुर्ददाति तद्द्वारेण चोभयस्य नृलोकस्य अस्य परस्य च लोकस्य धर्मार्थकामानां दाता च स एव भवतीति तात्पर्य्यम् ॥ ३७-३८ ॥

अध्यायार्थं समासतो निवेद्याध्यायं समापयति तत्र श्लोका इति ॥ ३९-४१ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां
चरकटिप्पण्यां सूत्रस्थाने चिकित्साप्राभृतीयो नाम
षोडशोऽध्यायः ॥ १६ ॥
समाप्ता कल्पनाचतुष्का टिप्पणी ॥

—:०:—

सप्तदशोऽध्यायः ।

स्वस्थातुरहिताय कल्पनाचतुष्कमभिधाय साम्प्रतमवसरसङ्गत्या व्याधितस्य व्याधिपरिमोक्षणरूपप्रयोजनं निरवशेषत उपदिदिक्षुस्तत्र व्याधेः प्रकृतिज्ञानमन्तरेण न खलु ततो मुक्तिः सम्भवतीत्यध्यायचतुष्टयेन समासतो रोगप्रकृतिमभिधातुं रोगचतुष्कमारभते । तत्रापि वक्तव्येषु रोगेषु प्रधानमर्माश्रितानामेव प्राधान्यादादौ शिरोहृद्बस्तिगतान् तथागतिभेदैनैव दोषा व्याधीन् जनयन्तीति तान् गतिभेदान् प्राङ्निर्देष्टुकामः कियन्तःशिरसीयं नामाध्यायं प्रक्रमते अथात इत्यादिना । तत्रादौ शिष्यप्रश्नानाह कियन्त इति । कियन्तः कति भेदाः । मानविकल्पजाः न्यूनाधिकपरिमाणेन जाताः । क्षयाः क्षयरोगाः । पिडकाः प्रमेहपिडकादयः । अनघः निष्पापः । दोषसूदनः पापनाशक इत्यर्थः । हुताशवेशस्याग्निवेशस्य । प्रश्नोत्तराण्युद्दिशति दृष्ट्वा इति ॥ १-७ ॥

उद्देशक्रमागतान्युत्तराणि व्यासतो विवक्षुरादौ शिरोगतानाह सन्धारणादिति । सन्धारणान् मलमूत्रादीनामुदीर्णानां वेगनिग्रहात् । मदाद् अतिरिक्तमादकद्रव्यनिषेवनात् । उच्चैर्भाष्यात् अतिचीत्कारात् । अवश्यायः शिशिरः । असात्म्यात् अनभ्यस्ताद् दुष्टाच्च । रजआदयश्चेत्तस्य नासिकायां प्रविशेयुरित्याह रज इति । हरितकमार्द्रकादि । शिरोऽभिघातात् शिरसि केनाप्याघातात् । दुष्टामादिति दुष्टात् पूतिपर्युषितादिदुष्टखाद्यग्रहणेन आमादिति आमखाद्यग्रहणेन आमाजीर्णेन वा । वाष्पनिग्रहात् अश्रुवेगनिग्रहात् । यद्यपि सन्धारणादित्यनेन सर्ववेगसन्धारणं निदानं प्रोक्तं तथापि वाष्पवेगनिग्रहस्य विशेषतः शिरोरोगापादकत्वात् पृथगुक्तिः । मनस्तापात् क्रोधशोकादिना मनोऽभिघातात् । देशविपर्ययस्तु आनूपे जांगललक्षणस्य जांगले वानूपलक्षणस्य प्रादुर्भावः । कालविपर्ययः शीते उष्णवर्षयोः उष्णे च शीतवर्षयोः वर्षायां च शीतोष्णयोराविर्भावः । असृं रक्तम् । प्रायः सर्वस्मिन्नेव शिरोरोगे रक्तदुष्टिर्भवत्येव ॥ ८-११ ॥

शिरस उत्तमांगत्वं प्रतिपादयति प्राणा इति। ननु चेतनेन्द्रियाणां स्थानं खलु हृदयमित्यायुर्वेदसम्मतम्। यद् वक्ष्यति "हृदयं चेतनाधिष्ठानमेकम्" इति "षडंगमंगं विज्ञानमिन्द्रियाण्यर्थपञ्चकम्। आत्मा च सगुणश्चेतश्चिन्त्यञ्च हृदि संस्थितम्॥" इति, "रसधात्वादिमार्गाणां सत्त्वबुद्धीन्द्रियात्मनाम्। प्रधानस्यौजसश्चैव हृदयं स्थानमुच्यते॥" इति अतः शिरसः प्राणस्य इन्द्रियाणाञ्चाश्रितत्वं कथं युज्यते इति चेदुच्यते। आयुर्वेदे हि सर्वेषामेव मर्मणां प्राणाश्रयत्वं प्रतिपादितं तेषामुपघातात् प्राणानामप्युपघातसम्भवात्। नैतेन शिरसश्चेतनाश्रयत्वं सम्भवति। शिरस्तु दशानां प्राणायतनानामन्यतमम्। यद् वक्ष्यति-"दश प्राणायतनानि तद्यथा-मूर्धा कण्ठो हृदयं नाभिः गुदं वस्तिः ओजः शुक्रं शोणितं मांसमिति॥" इति पुनश्चात्र सर्वेन्द्रियाणि सर्वेन्द्रियाधिष्ठानानीत्यर्थो नेयः। अतस्तदुपघाते इन्द्रियोपघातोऽपि न्याय्यः स्यात्। अत आश्रिता इति समानोपघातादाश्रिता इवेत्यर्थः। अतएवास्मिन्नुपहते प्राणोपघातात् इन्द्रियोपघाताच्चोत्तमांगत्वम्॥१२॥

अर्धेति अर्धावभेदको यत्र शिरसोऽर्धं रुज्यते। गलग्रहः स्वरोपघातः रोहिण्यादयोऽपरे गलरोगा वा। अपरे विविधा रोगाः शालाक्यतन्त्रोक्तः नेत्रनासाकर्णाश्रयाः शिरोमुखाश्रयाश्च। तेषूद्दिष्टान् पञ्च शिरोरोगानाह पृथगिति। हेतुलक्षणैरिति हेतुस्तु निदानम्। लक्षणन्तु रूपं रोगनिश्चायकम्। तत्र वातजशिरोरोगनिदानलक्षणान्याह उच्चैरिति। तीक्ष्णपानात् तीक्ष्णमद्यपानात्। प्रजागरो रात्रिजागरणम्। व्यवायादधिकमैथुनात्। वेगनिग्रहान् मलमूत्रादीनामिति शेषः। उपवासात् असति लंघनीये व्याधौ वातव्याधौ वेति शेषः। वाष्पादत्यश्रुपातनात्। भारेण शिरसा भारवहनेन मार्गेण अतिपथपर्यटनेन कर्शनात्। अत्र शिरोगताः शिरा इति वातवाहिन्यो धमन्य इत्यर्थः। निस्तुद्येते सूचीभिरिव विध्येते। घाटा तु अवटुः ग्रीवापृष्ठसन्धिप्रदेशः किञ्चिदुन्नतः। संभिद्यते भेदवत्पीडा भवति। तपतीवातिवेदनमिति वेदनाभिरुपतप्यत इत्यर्थः। बध्येते कर्णोपनाहो भवति। स्वनतः कर्णनादः कर्णक्ष्वेडो वा भवति। अक्षिणी अक्षिबुद्बुदे। निष्कृष्येते स्वकोटराद् बहिष्क्रियेते इव। मुच्यते शिरः इति सम्बन्धः। शिरोधरा मन्या। स्निग्धोष्णं स्नेहसंयुक्तमुष्णं द्रव्यमुपशेते तत्प्रयोगेण शान्तिर्लभते। अतिस्फुरति अत्यर्थं स्पन्दते॥ १३—२१॥

पैत्तिकशिरोरोगनिदानलक्षणे प्राह कट्वम्लेति। अत्रातिरिक्तकटूवम्लादिसेवयेत्यर्थः। शिरसीति शिरोगतासु शिरासु इत्यर्थः। शीतं सुषूयते अत्यर्थं शीतं प्रार्थयतीत्यर्थः। स्वेदश्च शिरसि। कफजशिरोरोगनिदानलक्षणे व्याचष्टे आस्येति। आस्यासुखैः स्वप्नसुखैरिति ये सदैवोपविश्य निद्रया वा सुखमनुभवन्ति तेषां क्रियाभिरित्यर्थः। सुप्तं स्पर्शाज्ञानम्। स्तिमितं जडम्। भारिकं गुरुभारमिव शिरः। त्रिदोषजशिरोरोगलक्षणमाह वातादिति। मदः पूगादिभक्षणजनितमत्तताबत्॥ २२-२६॥

क्रिमिजशिरोरोगनिदानलक्षणे प्राह तिलेति। तिलक्षीरगुडानामतिभोजनात् कुथितद्रव्यभोजनात् संकीर्णभोजनात् समशनात्। दोषलस्य प्रकुपितत्रिदोषस्य। क्लेदो मलम्। संक्लेदात् मलसञ्चयात्। पापकर्मण इति विप्रकृष्टनिदानम्। तिलाद्यपसेवा च सन्निकृष्टनिदानम्। शिरसि जाताः क्रिमयः शिरोरोगं जनयन्तीत्यन्वयः। बीभत्सलक्षणं विकृतलक्षणम्। किन्तदित्याह व्यधेति। व्यधवत् छेदवच्च या पीडा तया कण्ड्वादिभिश्च दुःखितम्। दौर्गन्ध्येनेति स च सदैव दौर्गन्ध्यमनुभवति। क्रिमीणां लक्षणमिति क्रिमिरोगे यानि लक्षणानि भवन्ति तैर्लक्षणैः युक्तं क्रिमिरोगातुरं क्रिमिजशिरोरोगातुरम्॥ २७-२६॥

उद्दिष्टान् शिरोरोगानुक्त्वा हृद्रोगान् विवक्षुः शोकोपवासेत्यादिना वातजहृद्रोगनिदानमाह। उत्तमां श्रेष्ठामतीव कष्टप्रदामित्यर्थः। वेपथुः शरीरकम्पनं हृत्कम्पनं वा। वेष्टनं हृदयसंकोचः। दरो धक्धकायनम्। अत्यादानमतिभोजनं गुरुस्निग्धं च भोजनमित्यर्थः। अचेष्टनं व्यायामाभावः। सुप्तं वेदनाभाववदित्यर्थः। स्तिमितं जडम्। अश्मावृतमिव उरसि प्रस्तरावृते यथा वेदना भवति तथा। हेतुलक्षणसंसर्गात् सर्वेषां दोषजानां हृद्रोगाणां निदानोपसेवया तेषां लक्षणसमुदायाच्च। क्रिमिजहृद्रोगमाह त्रिदोषज इति। मर्मैकदेशे हृदयैकदेशे। ग्रन्थिः दुष्टरसजः। संक्लेदात् पूतिभावात्। तत्र क्रिमिसर्पणात् जातकण्डुं भक्षणाच्च तोदनं छेदनवन्महारुजं हृदयं भवति। शीघ्रकारिणं तूर्णमेव प्राणान्तकारिणम्॥ ३०-४०॥

तृतीयप्रश्नस्योत्तरं "व्याधीनां द्व्यधिका षष्टिः दोषमानविकल्पजा" इति व्याचिख्यासुरादौ त्रयाणामेव दोषाणां समतातिक्रमे मात्रायास्तारतम्येन त्रयोदशप्रकारतामाह द्व्यु ल्वणैः द्वयोर्दोषयोः समयोरत्यधिकवृद्धयोरेकस्य च ततो हीनवर्धनात् त्रयः। एकोल्वणैरेकस्यातिवृद्धत्वाद् द्वयोश्च समयोस्ततो हीनवृद्धत्वात् त्रयः। इति षट् स्युः। तथा हीनमध्याधिकैः एकस्यातिवृद्धिः एकस्य मध्यवृद्धिः एकस्य च हीनवृद्धिरेवं षट् स्युः। समैस्त्रयाणामेव वर्धितानां दोषाणां समतायामेक एवेति सन्निपातास्त्रयोदश भवन्ति। द्व्यु ल्वणैस्त्रयो यथा-वातश्लेष्मोल्वणः वातपित्तोल्वणः पित्तश्लेष्मोल्वणश्चेति। एकोल्वणैस्त्रयो यथा वातोल्वणः पित्तोल्वणः श्लेष्मोल्वणश्चेति। एवं षट्। पुनर्हीनमध्याधिकैः षड् यथा (१) वातवृद्धपित्तमध्यश्लेष्महीनः (२) पित्तवृद्धवातमध्यश्लेष्महीनः (३) श्लेष्मवृद्धवातमध्यपित्तहीनः (४) वातवृद्धकफमध्यपित्तहीनः (५) पित्तवृद्धकफमध्यपित्तहीनः (६) श्लेष्मवृद्धपित्तमध्यवातहीनश्चेति षट्। एकश्च त्र्युल्वणः इति त्रयोदश॥ ४१॥

एवं दोषवृद्धिहेतुकसन्निपातभेदान् प्रदर्श्य संसर्गभेदान् प्रदर्शयति संसर्गे इति। संसर्गे द्विदोषसमवाये नवप्रकारा व्याधयो भवन्ति। तेषां विवृतिमाह षडिति। एकवृद्ध्या एकस्यातिवृद्धितया षट् यथा (१) वात-

श्लेष्मणि वातवृद्ध: (२) तत्र च कफवृद्ध: (३) वातपित्ते वातवृद्ध
(४) तत्र च पित्तवृद्ध: (५) पित्तश्लेष्मणि पित्तवृद्ध: (६) तत्र च
श्लेष्मवृद्धश्चेति षट् भवन्ति । समैरुभयवृद्धया त्रय: इति वृद्धौ संसर्गा तव
भवन्ति । पुनस्तैर्दोषै: वृद्धै: पृथक् एकदोषजास्त्रय इति साकल्येन दोष
वृद्धया पञ्चविंशतिर्व्याधयो भवन्ति । यथा वृद्धैरिति । दोषवृद्धिं पुरस्कृत्य
यथा व्याधय: पञ्चविंशतिर्भवन्ति तथैव दोषक्षयं पुरस्कृत्य पञ्चविंशतिर्भ
वेयु: । एवं पञ्चाशद् व्याधिभेदा: पुनश्चापरविधो भेदो वृद्धिक्षयोभयहेतुक
तेऽपि द्वादश भवन्ति इत्याह वृद्धिक्षयकृत इति । वृद्धिरेकस्य समता चैकस्य
क्षयश्चापरस्येति भेदेन षट् भवन्ति यथा (१) वातवृद्धपित्तसमकफक्षीण
(२) वातवृद्धकफसमपित्तक्षीण: (३) पित्तवृद्धकफसमवातक्षीण: (४)
पित्तवृद्धवातसमकफक्षीण: (५) कफवृद्धवातसमपित्तक्षीण: (६) कफ
वृद्धपित्तसमवातक्षीणश्चेति षट् । द्वन्द्ववृद्धया त्रयो यथा (१) वातपित्तवृद्धया
कफक्षयेण (२) पित्तकफवृद्धया वातक्षयेण (३) वातकफवृद्धया पित्त
क्षयेणेति त्रय: । पुनश्चैकवृद्धया द्वयो: क्षयेण त्रयो यथा-(१) वातवृद्धया
पित्तकफक्षयेण (२) पित्तवृद्धया वातकफक्षयेण (३) कफवृद्धया वात
पित्तक्षयेणेति त्रय: । इति साकल्येन द्वादश एवं कात्स्न्र्येन द्वाषष्टि
दोषभेदेन व्याधयो भवन्ति ॥ ४२-४४ ॥

चिकित्सासौकर्य्यार्थमन्तिमद्वादशविकल्पान् दोषभेदान् रूपसम्प्रा
प्ति: विवृण्वन् प्रागेकवृद्धया एकस्य समतया क्षयेण चैकस्येति षड्
विकल्पानाह प्रकृतिस्थमिति । अत्र मारुतो वृद्धो ज्ञेय: । स्थानात् पित्तस्य
प्रधानस्थानादुत्पत्तिस्थानादन्तर्नाभेरित्यर्थ: । विसर्पति स्थानसंश्रयं करोति
त्यर्थ: । अनवस्थित: कदा भवति कदा वा न । ननु प्रकृतिस्थे पित्ते तत्र
कथं दाहो भवतीति चेत् कथ्यते । यत्रावयवे कुपितो वायु: पित्तं नयति
तत्र साम्यावस्थायामवस्थितमपि पित्तमाकृष्टपित्तसंसर्गाद् वृद्धिं गत्वा दाह
कृद् भवितुमर्हत्येव । अतोऽस्योपक्रमे वायुं प्रशाम्य पित्तस्य स्वस्थानानयन
मेव कार्यं न तु पित्तहरणम् । अतएव हस्तादिदाहे "आलिप्य नवनीतेन
स्वेदो हस्तादिदाहहा ।" इति स्निग्धस्वेदोपदेश: ॥ ४५-४६ ॥

द्वितीयविकल्पमाह साम्ये इति । कर्षेदिति कफस्थानादामाशयादाकृष्य
यत्र यत्र स्थानसंश्रयं कुर्यादित्यर्थ: । अत्र वायुर्वृद्ध इत्याह बलीति । तृतीय
माह यदानिलमिति । स रुणद्धि आवृणोति स्रोतोरोधादिति शेष: । अ
वृद्धं पित्तं प्रकृतिस्थं वायुं रुणद्धि । चतुर्थमाह श्लेष्माणमिति । अत्र पि
वृद्धं समं श्लेष्माणं निपीडयेत् आवृणुयात् । पञ्चममाह प्रवृद्ध इति । अ
प्रवृद्ध: श्लेष्मा समं समीरणं स्रोतोरोधाद् रुन्ध्यात् । शीतकं शीतमित्यर्थ:
षष्ठमाह समीरणे इति । समत्वगमिति सममित्यर्थ: । अत्र कफो वृद्ध: स
पित्तं सन्निरुन्धान: स्रोतसि रुद्ध्वा इत्यर्थ: । शिरोग्रहं शिरोरुजम् ॥४७-५

पुनश्च द्वन्द्ववृद्धया एकस्य च क्षयेण ये त्रयो व्याधयो जायन्ते ता

हीनवातस्येति । अत्र कफपित्ते स्वमानातिस्क्ते ज्ञातव्ये । दूयनं मुखोष्ठतालुषु दाहः । यथोक्तं वृद्धवाग्भटेन "मुखोष्ठतालुषु दाहो दवः" इति (सू.२० अ.) । हृल्लासो विवमिषा । आस्यस्रवणं प्रसेकोऽतिनिष्ठीवनमित्यर्थः । द्वितीयमाह क्षीणपित्तस्येति । मारुतेनवृद्धेन उपसंहितः समवेतो वृद्धः श्लेष्मा । अनवस्थितमिति कदाचित् स्तम्भादिकं भवति कदा वा न । तृतीयमाह हीने कफे इति । समासतः संक्षेपतः । उद्वेष्टनं शरीरमोटनम् । अङ्गमर्दः शरीरवेदना ॥ ५३-५८ ॥

पुनश्चैकवृद्ध्या द्वयोः क्षयेण यानि त्रिविधानि लक्षणानि भवन्ति तान्याह वातपित्तेति प्रथमम् । स्रोतांसि वायोः पित्तस्य च । अपिदधत् संरुध्य । द्वितीयमाह श्लेष्मवातक्षये इति । देहौजः ओजोधातुं स्रंसयत् ओजोविस्रंसनलक्षणं कृत्वा ओजसः सौम्यत्वात् पित्तेन विस्रंसनं सम्भवति । तल्लक्षणञ्चाह सुश्रुतो यथा-

"ओजः सोमात्मकं स्निग्धं शुक्लं शीतं स्थिरं सरम् ।
विविक्तं मृदुमृत्स्नञ्च प्राणायतनमुत्तमम् ॥" इति

तद्विस्रंसनलक्षणन्तु तत्रैव यथा-

"विश्लेषणादौ गात्राणां दोषविस्रंसनं श्रमः ।
अप्राचुर्यं क्रियाणाञ्च बलविस्रंसलक्षणम् ॥" इति (सू. १५ अ०) ।

तृतीयमाह पित्तश्लेष्मक्षये इति । मर्माणि हृदयादीनि ॥ ५९-६१ ॥

एवं द्वादशविधान् मानविकल्पजान् व्याधीन् निगदतो निर्दिश्य पञ्चाशद्विधान् वृद्धिक्षयजान् समासतो वृद्धिक्षयलिङ्गैरवबोद्धुमाह दोषा इति । दोषा हि प्रकृत्यवस्थायां शरीरस्योपादानकारणानि निमित्तकारणानि च भवन्ति । तत्तत्स्थानगता दोषाः क्रियोष्मश्लेषणादिना शरीरं पालयन्ति पुनश्चान्नरसस्वरूपास्ते शरीरं पोषयन्ति इति दोषवृद्धौ शरीरे दोषलिङ्गानि परिस्फुटानि भवन्ति । न खलु निमित्तकारणलिङ्गानि कार्य्ये गच्छन्ति, न खलु कुलालगुणाः घटे संक्रामन्ति, अतो दोषवृद्धौ शरीरे तत्तद्दोषगुणान् वीक्ष्य "कारणगुणाः कार्य्यगुणानारभन्ते" इति न्यायात् शरीरोपादानानि दोषा एव भवन्ति इति विचारविमर्शो मदीये 'आयुर्वेदे शारीरविनिश्चये' द्रष्टव्यम् । प्रवृद्धा इति शरीरे वाताद्युपादानबहुले सति स्वं लिङ्गं रूक्षत्वादिकं यथाबलं विवृद्धिमानमनुसृत्य दर्शयतीत्यर्थः । क्षीणा इति तथाविधे शरीरे क्षीणवाताद्युपादाने तेषां लिङ्गं जहति न प्रकाशयति । समाः समवाताद्युपादाने शरीरे स्वं कर्म वातस्य क्रियादिकं पित्तस्य पचनादिकं श्लेष्मणश्चाश्लेषणादिकं कुर्वते शरीरं पोषयन्ति धारयन्ति यापयन्ति चेत्यर्थः । अतएव क्षयवृद्धिहेतुकान् पञ्चाशद् व्याधीन् वृद्धैर्दोषलिङ्गैः हीनैश्च दोषलक्षणैर्जानीयादित्यर्थः ॥ ६२ ॥

क्षयाः कतीति चतुर्थप्रश्नस्य दशाष्टौ क्षयाः इत्युद्देशो व्यासतो निर्दिशति वातादीनामिति । वातादीनां त्रयाणां रसादीनाञ्च सप्तानां अन्नमलस्य

रसादिषड्धातुमलानां चौजसश्च क्षया इत्यष्टादश संख्यका भवन्ति । सर्व एवैते समवेता देहसंज्ञका भवन्ति । एतदतिरिक्तं किमपि द्रव्यं शरीरे नास्तीति तेषां क्षये शरीरक्षयो व्याधिश्च भवत इति ज्ञेयम् । यदुक्तं सुश्रुते "दोषधातुमलमूलं हि शरीरम्" इति । अत एतत्त्रयं शरीरधारणाद् धातु-संज्ञकं भवति । तत्र दोषा: अन्तर्मुखा धातव:, धातवस्तु व्यवस्थिता-धातव:, मलास्तु बहिर्मुखाधातवो ज्ञेया: । एतैरेव त्रिविधधातुभि: शरीरस्य सन्तत्योत्पत्तिस्थितिलयात् शरीरमिति संज्ञा अन्वर्था भवति । केऽप्यत्र जतुकर्णप्रामाण्याद् इन्द्रियाणामपि पञ्चमलानुक्त्वा तेषां क्षयेण अष्टादश क्षयानाहु: । न तैर्धातुमलानां क्षयो व्याचिख्यासित: । मया तु शरीरोपादानभूतानां दोषाणां धातूनां च दश अन्नमलस्यैक: धातु-मलानां षट् ओजसश्चैक इत्यष्टादश क्षया विवक्षिता: । तत्रेति । अनिला-दीनां दोषाणां क्षयलिङ्गान्यत्रैवाध्याये प्रागेवोक्तानि साम्प्रतं धातूनां मलाना-मोजसश्च क्षयलिङ्गानि क्रमशो निवेद्यन्ते घट्टत इत्यादिना । रसक्षये घट्टते अस्थिसंघर्षात् शब्दायते सन्धिरिति शेष: । उच्चै:शब्दं न सहते । अल्प-चेष्टस्यापि हृदयं द्रवति भृशं धुग्धुगायते । शूलनिखातवद् वेदनाग्रस्तो भवति । ताम्यति तमोग्रस्तं भवति हृदयमित्वन्वय: । रक्तक्षयलिङ्गमाह पर्व-षेति । मांसक्षयलक्षणमाह मांसक्षय इति । मेदोक्षयलक्षणमाह सन्धीनामिति स्फुटनमिति क्रियया सन्धि: पट्पटायते इत्यर्थ: । अक्ष्णो: ग्लानि: अन्त: कोटरप्रविष्टे इवाक्षिणी भवत: । आयास: अनायासकृत: श्रम: । अस्थिक्षय-लक्षणमाह शीर्यन्त इवेति । अस्थीनि शीर्यन्त इव शीर्णानि भवन्तीव । न खल्वस्थ्नां घनतमानां शीर्णत्वं सम्भवतीत्याह शीर्यन्त इवेति । मज्जक्षय-लक्षणमाह प्रततमिति । शुक्रक्षयलक्षणमाह दौर्बल्यमिति । दौर्बल्यं मैथुना-शक्तिरित्यर्थ: ॥ ६३—६६ ॥

एवं धातूनां क्षयं निवेद्य मलानां क्षयलक्षणमाह क्षीणे इति । शकृति विष्ठायाम । अत्रान्त्राणीति बहुवचनेनोल्लेखेऽपि स्थूलान्त्रमेव ग्राह्यं मलायन-त्वात् । मूत्रक्षयलक्षणान्याह मूत्रक्षये इति । पिपासा बाधते तं पुरुषमिति शेष: । प्राधान्याद् द्वयोरेवान्नमलयोर्लक्षणानि निवेद्य इतरेषामपि पिण्डीकृत्य क्षयलक्षणान्याह मलायनानीति । मलायनानि मलानां बहिर्निर्गममार्गाणि । तानि नव बहिर्मुखानि स्रोतांसि लोमकूपगतद्विविधस्वेदमार्गाणि ज्ञातव्यानि । एवं मलसञ्चयस्थानानि अन्त:प्रसरणस्रोतांस्यपि अनुमानादिना परीक्ष्य ज्ञातव्यानि इत्याह लक्ष्यन्त इति । लक्ष्यन्ते अनुमानादिना प्रमाणेन बोध्यन्त इत्यर्थ: ॥ ७०—७२ ॥

पारिशेष्यादोज:क्षयलक्षणमाह बिभेतीति । बिभेति असत्यपि भय-हेताविति शेष: । अभीक्ष्णं भृशं यथा स्यात् तथा दुर्बल: हृष्टपुष्टेऽपि देहे बलसाध्ये कर्मण्ययोग्य इत्यर्थ: । दुश्छाय: कान्तिरहितशरीर: । दुर्मना: मनोबलरहित: । क्षाम: सर्वधातुक्षयार्त इव भवति । ननु किन्नामेदमोज:

न खल्विदं दोषे धातौ मले वा निपतति, न वा व्यवच्छिन्ने मृतदेहे उपलभ्यते, दोषधातुमलातिरिक्तस्य शरीरेऽभावादित्याह हृदीति। ओजो हि द्विविधमेकं परमोजः अष्टविन्दुप्रमाणं हृदि तिष्ठति, अपरञ्च सर्वशरीरगं श्लेष्मलमर्धाञ्जलिप्रमाणमिति तयोर्द्वयोरेव संख्यानं कुरुते। यदोजः शुभ्रं तद् हृदि तिष्ठति, यच्च ईषद्रक्तं सपीतकं तदोजः शरीरे तिष्ठति इति ओजः संख्यातं द्वैविध्येनेति शेषः। तस्य नाशात् ना नरो विनश्यति। अस्यैव विवरणमाह प्रथममिति। प्रथमं सर्वसम्पूर्णात् प्रागेव गर्भस्याष्टमे मासि इत्यर्थः। सर्पिर्वर्णमित्यादि परस्यौजसो वर्णादिकमाह। नन्वोजसः पृथग्धातुत्वस्वीकारे अष्टधातुत्वापत्तिः स्यादिति चेत् कथ्यते। अस्य सर्वधातुसारत्वेन सर्वधातुसमुदायरूपत्वेन च नाष्टधातुत्वं स्यात्। यदुक्तं सुश्रुते—"तत्र रसादीनां शुक्रान्तानां धातूनां यत्परं तेजः तत् खल्वोजस्तदेव बलमित्युच्यते" इति (सू० १५ अ०)। परमस्य सर्वधातुपोष्यत्वेऽपि सत्त्वादिगुणबाहुल्यादेव कर्मफलानुपातेन जनानां निरोजस्त्ववद्ओजस्त्वं वा भवतीति दृश्यते। यदुक्तमन्यत्र "भ्रमरैः फलपुष्पेभ्यो यथा संह्रियते मधु। एवमोजः स्वकर्मभ्यो गुणैः संह्रियते नृणाम्॥" इति गुणैः सत्त्वादिगुणैः स्वकर्मभ्यः स्वस्य कर्माण्यनुसृत्य इति ल्यब्लोपे पञ्चमी॥ ७३—७५॥

साम्प्रतमोजःक्षयस्य सामान्यं निदानमाह व्यायाम इति। क्षयहेतव ओजःक्षयहेतवो ज्ञेयाः। यदुक्तं सुश्रुते "अभिघातात् क्षयात् कोपात् शोकाद् ध्यानात् श्रमात् क्षुधः। ओजः संक्षीयते" इति (सू० १५ अ०)। न त्वत्राष्टादशविधक्षयेषु एते हेतवो भवितुमर्हन्ति विशेषत एतेष्वनेक एव वातवृद्धौ हेतवः सन्ति अत एते ओजःक्षयहेतव एव सुश्रुतवाक्यैकवाक्यत्वात्। अल्पप्रमिताशनं युक्तपरिमाणादल्पप्रमितेन स्वल्पमानेनाशनमित्यर्थः। कालो वार्धक्यम्। वातश्चात्र पश्चिमागतः रूक्षत्वात् क्षयकरत्वाच्च। भूतोपघातः ग्रहाद्याक्रमणम्। रूक्षपानं स्निग्धोपदंशवर्जितरूक्षसुरापानम्। कफादीनामतिवर्तनं वमनादिनातिस्रावः॥ ७६—७७॥

कति पिडका इति प्रश्नस्योद्दिष्टस्योत्तरस्य सप्तपिडका माधुमेहिका इत्यस्य विवरणं विवक्षुः पिडकामूलस्य मधुमेहस्य निदानमाह गुरुस्निग्धेति। गुर्वाद्यास्यासुखान्तैरतिमात्रशो भजतामित्यन्वयः। गुरुरत्र द्रव्यगुरुवाची। पानमिति मद्यपानम्। त्यक्तव्यायामानां त्यक्तचिन्तानाञ्च। संशोधनं वमनादिना दोषनिर्हरणम्। तैः श्लेष्मादिभिरतिवृद्धैः। ओज ओजधातुमादाय स्थानाद् आकृष्य यदा वस्तिं मूत्राशयं गच्छति तदा मधुमेहः प्रवर्तते। ओजसो माधुर्यात् मूत्रमस्य मधुवन् मधुरं भवतीत्यस्य मधुमेहसंज्ञा भवति। स च सान्निपातिकानि लिङ्गानि दर्शयति। असाम्ना सहसा क्षयमाप्नोति पुनश्चाप्यायत इत्याह स इति। कृच्छ्रः कृच्छ्रसाध्यः। तज्ज्ञानां पिडकानां नामलक्षणानि निवेदयति उपेक्षयेति। उपेक्षया अचिकित्सया। अवकाशेषु शरीरप्रदेशेषु। के ते सप्त पिडका इत्याह शराविकेति। शराविकालक्षण-

माह अन्तोन्नतेति । शरावगर्भोपमेत्यर्थः । श्यावा कृष्णपीतवर्णा । कच्छपिका लक्षणमाह अवगाढेति । अर्तिर्वेदनामात्रम् । निस्तोदस्तु सूचीविद्धवद्वेदना । कच्छपपृष्ठाभेति मध्योन्नता अन्तर्निम्ना इत्यर्थः । जालिनीलक्षणमाह स्तब्धेति । महाशया बृहद्व्रणस्थाना । सूक्ष्मच्छिद्रा बहुभिः सूक्ष्मैश्छिद्रैरन्विता । शिराजालवती जालवत् शिरासन्तता । सर्षपीलक्षणमाह सर्षपीति । एका महती पिडका बहुभिः सर्षपाभाभिः पिडकाभिश्चिता सर्षपीनाम । अलजीलक्षणमाह दहतीति । उत्थाने उत्पत्तेराद्यभागे तृष्णादिप्रदाहः त्वचञ्च दहति ततोऽनिशं सदैव विसर्पति विवर्धते । अग्निर्दहतीव दुःखा दुःखप्रदा । विनतालक्षणमाह अवगाढेति । एतासां पिडकानां प्रायशो मुखं बहुच्छिद्रयुतं भवतीति विशेषः ॥ ७८—८६ ॥

विद्रधिभेदलक्षणान्याह विद्रधिमिति । कण्डरा स्थूलस्नायुः तद्वत् स्थूला दीर्घा चेति कण्डराभा । अभ्यन्तरविद्रधिनिदानमाह शीतकेति । शीतकान्नम् अत्यर्थं शीतमन्नं पर्युषितं वा । संक्लिष्टभोजनं पथ्यापथ्यभोजनं समशनमित्यर्थः । व्यापन्नबहुमद्यत्वात् दुष्टमद्यस्य बहुपरिमाणेन पानात् । श्रमात् शक्त्यतिरिक्तश्रमात् । जिह्मं वक्रं यथा स्यात् तथा व्यायामात् शयनाच्च । अन्तःशरीरे कोष्ठे कोष्ठांगे वा । मांसासृक् प्रविशति प्रदूषयति । गम्भीरे कोष्ठे तिष्ठतीति गम्भीरस्थः ग्रन्थिर्भवति । कुत्र कुत्र भवतीत्याह हृदय इति । हृदयशब्दोऽयमुरःकोष्ठवाची । तेन हृदये हृद्यन्त्रे फुःफुसे च ज्ञेयम् । क्लोमा तु आमाशयपृष्ठे पृष्ठवंशसंलग्नस्तिर्यक्प्लीहतोऽन्तर्नाभिं यावत् विस्तृतः उदकवहस्रोतसां मूलभूतो यन्त्रविशेषः । यकृत्तु हृदयादधो दक्षिणपार्श्वस्थम् । प्लीहा तु वामपार्श्वे आमाशयसंसक्तः । कुक्षाविति उदरप्राचीरे । वृक्कौ तु वस्तिशिरसोरुपरि त्रिकोणाकारौ ग्रन्थिविशेषौ । नाभ्यामित्यन्तर्नाभ्यां तत्संसक्तायां वपावहायामपि ज्ञातव्यम् । वंक्षणयोरिति नाभेरधः ऊरुसन्धेः समीपस्थयोः कुक्षेरन्तःप्राचीरयोरित्यर्थः । वस्ताविति वस्तिमुखे वस्तिशिरसोरित्यर्थः न खलु मूत्राधारे, तत्र तु मांसाभावात् शोणितालपत्वाच्च जरायुमयत्वेन च विद्रधिर्न सम्भवति । यदुक्तं सुश्रुते—"गुदे वस्तिमुखे नाभ्याम्" इत्यादि । वस्तिमुखे मूत्राशयप्रारम्भे इत्यर्थः । अत्र वस्तिपदेन गुदस्यापि परिग्रहः कर्तव्यो धान्वन्तरीयसंवादात् । लक्षणवर्णनायामपि कृच्छ्रपूतिमूत्रवर्चस्त्वञ्चेत्युल्लेखात् । मूत्राशये विद्रधौ कृच्छ्रपूतिवर्चस्त्वस्यासम्भवात् अत्र गुदस्यापि परिग्रहो न्याय्यो भवति । विद्रधिशब्दस्य निरुक्तिमाह दुष्टेति । दोषभेदेन विद्रधिलक्षणभेदान् स्रावववर्णादिभेदांश्चाह व्यध इति । व्यधः कण्टकादिवेधवद्वेदना । छेदः छुरिकादिभिश्छेदनवत् पीडा । आनाहो विड्विबन्धः बन्धनवत् पीडा वा । शब्दः सशब्दः स्रावनिर्गमः । स्फुरणं स्पन्दनम् । सर्पणं पिपीलिकादिभिरन्तःसर्पणवत् पीडा । मदः पूगादिभक्षणजन्या अनुभूतिरिव । उत्क्लेशो विवमिषा । शीतकं शीतम् । महच्छूलञ्च सर्वास्वेव विद्रधिषु भवति । विद्रध्याः पच्यमानलक्षणमाह

शस्त्रैरस्त्रैश्च भिद्यत इव। उल्मुकैः ज्वलदग्निशिखाभिः 'मशाल' इति भाषा। पुनश्च दोषभेदेन पक्वविद्रधितः स्रावविशेषानाह तन्विति। सर्वत्रैव स्रवतीत्यन्वयः। तनु पत्तलम्। तिलेति तिलाद्युदकसदृशमित्यर्थः। बहलं घनम्॥ ९०–१००॥

अन्तर्विद्रधिस्तु स्थानविशेषेण साध्या असाध्या वा भवति इत्यपरोक्षायाः विद्रध्याः स्थानविशेषविज्ञानाय विशिष्टानि लक्षणान्याह अथासामिति। प्रधानमर्मजायां हृदयगतायाम्। तत्र हृद्धट्टनं प्रमोहश्च स्यातां हृद्यन्त्रगतायां, फुःफुसगतायान्तु तमकः कासश्चेति ज्ञातव्यम्। हृद्धट्टनं हृदयस्य धक्धकायनम्। तमकः श्वासः। गलग्रहः क्लोम्न उदकवहस्रोतसां मूलत्वादुदकाभावेन गलशोषाद् गले विबन्धो भवति। उच्छ्वासोपरोधः श्वासग्रहणासमर्थता तेन च प्लीहाहितीव्रा पीडा भवति न तु प्रश्वासे। कुक्षिपार्श्वान्तरांसशूलं कुक्षेर्यस्मिन् पार्श्वे विद्रधिः भवति तत्पार्श्वे तदन्तरे तन्मध्ये तत्पार्श्वगते अंसे च शूलं भवति। पार्श्वपृष्ठकटिग्रहः यत्पार्श्वस्थे वृक्के विद्रधिर्भवति तस्मिन् पार्श्वे पृष्ठे कट्यां च वेदनाधिक्यं भवति। सक्थिसादः यत् पार्श्वस्थवंक्षणे विद्रधिर्भवति तत्पार्श्वस्थस्य सक्थ्नः अवसादः नेमं पादं प्रसारयितुं शक्नोतीति दृष्टं बहुशः। वस्तिजायामित्यत्र गुदजानामपि परिग्रहो भवेत् कृच्छ्रपूतिवर्चस्त्वलक्षणात्। वस्तिजानान्तु कृच्छ्रमूत्रता पूतिमूत्रता पूयमिश्रमूत्रता च स्याताम्। तस्यामन्तर्विद्रध्यां स्वयं पक्वायामन्तःप्रभिन्नायामास्रावनिर्गमनद्वारमाह पक्वेति। ऊर्ध्वजासु नाभेरूर्ध्वजासु यकृत्प्लीहक्लोमवृक्कहृदयजासु अधोजासु वस्तिगुदवंक्षणकुक्षिजासु। नाभिजासु अन्तर्नाभेरूर्ध्वांशे जातासु मुखेन अधःप्रदेशजासु गुदेनास्रावो निर्गच्छेत्। तासां साध्यासाध्यतामाह तासामिति। हृदयनाभिवस्तिशिरोगतासु परिपक्वासु सतीष्वसाध्या भवन्ति आमावस्थासु च कायचिकित्सासाध्या भवन्ति ताः। यदुक्तं सुश्रुते–"हृन्नाभिवस्तिवर्ज्या ये तेषु भिन्नेषु बाह्यतः। जीवेत् कदाचित् पुरुषः नेतरेषु कदाचन॥" इति। सर्वत्रैव जाता अपि सान्निपातिकी सर्वावस्थायामेव असाध्या ज्ञेया। कुशलमिति शस्त्रक्रियाकुशलमित्यर्थः। आशुप्रतिकारिणमामावस्थायामेव प्रशमयितुं समर्थम्। अचिरस्थितामामावस्थायामेवेत्यर्थः। यदुक्तं सुश्रुते–"नोपागच्छेद् यथा पाकं प्रयतेत तथा भिषक्। पर्य्यागते विद्रधौ तु सिद्धिर्नैकान्तिकी स्मृता॥" इति (चि० १६ अ०)। शस्त्रेति यथा हि शस्त्रक्षते सर्पदष्टे जीवति विद्यदग्निदग्धे च आशुक्रिया कर्तव्या अन्यथा ते प्राणहराः स्युस्तथैव एतद्दृष्टान्तत्रयमाशु कर्तव्यता सूचकमेव ज्ञेयम॥ १०१—१०३॥

पुनरपि प्रमेहपिडकादीनां साध्यासाध्यत्वादिकं विवेचयति भवन्ति चात्रेति। एताः शराविकाद्याः प्रमेहं विनापि दुष्टमेदसो जायन्ते। आसां पूर्वरूपमपि न भवति एकदैव रूपं प्रकाशयतीत्याह तावदिति। सप्तसु पिडकासु शराविकाद्यास्तिस्रः प्रभूतमेदसां सर्षप्यादयश्चतस्रः स्वल्पमेदसां भवन्तीत्याह शराविकेति। पिडकानामरिष्टलक्षणमाह मर्मस्विति। प्रमेहपिडका-

प्रसंगेन इतरासामपि पिडकानां विवृतिं समासत: प्राह अथान्या इति। पाण्डुपाण्डुरशब्दौ पर्यायवाचकावपि लक्षणतस्तयोर्भेदो वर्तते यदुक्तं- "पाण्डुरस्तु रक्तपीतभागी प्रत्यूषचन्द्रवत्। पाण्डुस्तु पीतभागार्ध: केतकीधूलिसन्निभ:।" इति। भस्माभा भस्मवर्णा:। मेचकप्रभा: स्निग्धकृष्णवर्णा:। पिडकानामुपद्रवानाह तृडिति। मांससंकोथ: पूतिमांसता। मर्मरोध: हृदयक्रियारोध:॥ १०४-१११॥

साम्प्रतमन्तिमप्रश्नस्य दोषाणां कतिविधा गतिरित्यस्योत्तरं व्यासत: प्राह क्षय इति। क्षय: यादृशशरीरे यावन्माना दोषा: स्थातव्यास्ततो न्यूनता एव क्षय:। स्थानं यथावन्मानेनावस्थिति:। वृद्धिश्च यथावन्मानातिरिक्तता। गतिरत्र परिणति:। पुनश्च गतिभेदमाह ऊर्ध्वमिति। ऊर्ध्वमित्यूर्ध्वकाये अध इत्यध:काये। तिर्य्यगिति पार्श्वद्वयादिषु। गतिरत्र गमनम्। पुनश्च त्रिविधगतिभेदमाह त्रिविधेति। कोष्ठादिषु चतुर्षु त्रिविधा गति: बाह्याभ्यन्तरमध्यममार्गानुसारित्वेन। अत्र कोष्ठे अन्तर्मार्गानुसारित्वम्। शाखासु बाह्यमार्गानुसारित्वम्। मर्मास्थिसन्धिषु च मध्यममार्गानुसारित्वं ज्ञेयम्॥ ११२-११४॥

कालकृतगतिभेदमाह चयेति। अभ्रागमादिषु वर्षादिषु षट्सु कालेषु ऋतुषु यथाक्रमं पित्तादीनां पित्तकफवातानां चयप्रकोपप्रशमा: भवन्ति। तत्र वर्षासु पित्तस्य चय: शरत्सु प्रकोप:, हेमन्ते प्रशम:, कफस्य च हेमन्ते चय:, वसन्ते प्रकोप:, ग्रीष्मे च प्रशम:, वातस्य तु ग्रीष्मे चय: प्रावृषि प्रकोप:, वर्षायां प्रशमो भवति। एषा चयप्रकोपप्रशमरूपा गतिरिहावस्थाभेद: कालकृत:। पुनश्च तेषां भेदप्रकृत्यन्तरेण द्विविधा गतिरुच्यते गतिश्चेति। प्राकृती वैकृती चेति। इहापि गतिरवस्थाविशेष:। प्राकृतावस्थायामेते शरीरोपचयहेतवो भवन्ति। यदुक्तं सुश्रुते "वातपित्तश्लेष्माण एव देहसम्भवहेतव:" इति (सू० ११ अ०)। तत्र तेषां द्विविधाभ्यामवस्थाभ्यां कर्मभेदान दर्शयति पित्तादिति। उष्मण: उष्मस्वरूपात् पित्तादेव नराणां पक्ति: अन्नादे: पाको भवति इयं हि पित्तस्य प्राकृतिक्यवस्था। पुनस्तेनैव वैकृत्यां नानाव्याधयो जायन्ते। प्राकृतस्तु श्लेष्मा शरीरस्य प्रधानोपादानत्वेन बलमित्युच्यते। स एव विकृत: स्रोतोरोधादिना शरीरस्य मलिनीकरणान मल इत्युच्यते। स एव ओज: अपरमोज: श्लेष्मलं काये भवति प्रकृत्या। स एव वैकृत्या मोहतन्द्रादिकरत्वात् पाप्मा इत्युच्यते। शरीरस्य सर्वा एव चेष्टा प्राकृतेन वातेन भवति, स एव शरीरधारकत्वात् प्राणनत्वाच्च प्राण इत्युच्यते पुनश्च विकृतेन तेनैव आक्षेपकादयो नानाव्याधयो जायन्ते, पुनश्च विकृतेन तेनैव मानव: सहसा उपरुध्यते म्रियते॥ ११५-११८॥

एवं दोषाणां गतिं निर्दिश्य त एव शरीरस्य मूलमिति कृत्वा सदैव तान् हिताहारविहाराभ्यां परिपालयन् मानवो दीर्घमायुराप्तुं शक्नोतीत्याह

नित्येति । नित्यं सततं सन्निहितानि अमित्राणि यस्य तमात्मानं समीक्ष्येति योजना । युक्तोऽवहितः । परिचरेत् हिताहारविहाराभ्यामिति शेषः ॥ ११६ ॥

अध्यायार्थं निवेद्य तं समापयति तत्र श्लोकाविति । निगदव्याख्यातमन्यत् ॥ १२०—१२१ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पणयां सूत्रस्थाने कियन्तःशिरसीयो नाम सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः ।

पूर्वाध्याये प्रधानमर्मत्रयजातान् व्याधीन् समासतो निर्दिश्य रोगचतुष्के वक्तव्येषु नानारोगेषु व्याध्युपादाननिमित्तकारणभूतेषु दोषेषु गतिभेदात् पृथक्स्थानसंश्रयभेदान् नानाविधव्याध्युत्पत्तिकरेषु त्रिविधा एव व्याधयो भवितुमर्हन्तीति शंकां निरस्यन् एक एव शोथ उत्सेधसामान्यान् नानास्थानगतत्वेन नानानिदानोत्पन्नत्वेन च नानालक्षणा व्याधयो भवन्तीति प्रतिपिपादयिषुरध्यायान्तरमारभते अथात इत्यादिना । तत्र शोथानां सामान्यतो भेदानाह त्रय इति । ते पुनर्भेदप्रकृत्यन्तरेण भिन्ना द्विविधा भवन्ति । निजः शारीरदोषसमुत्थः । तत्र वक्तव्ये शोथभेदे आगन्तूनामल्पवक्तव्यत्वात् सूचीकटाहन्यायेन उद्देशक्रमं विहाय प्रागेवागन्तूनां विवरणमाह तत्रेति । छेदनं शस्त्रादिभिः । भेदनं शूलादिभिराशयवेधः । क्षणनं शाखादिषु विद्धकरणम् । भञ्जनमस्थ्नाम् । पिच्छनमतीक्ष्णधारैराघातः । व्यधनमत्र सूच्यादिभिः । भल्लातकपुष्पस्य च रसेन स्पर्शनैः । आत्मगुप्तायाः वानरीफलशूकैः स्पर्शनेन । अहितपत्रादयो वृश्चिकाल्यादीनाम् । विषिणां सविषप्राणिनां स्वेदनादिभिः स्वेदनमिह स्पर्शनम् । दंष्ट्रा तु सूक्ष्माग्रो दन्तभेदः कुक्कुरादीनामिव । दन्तस्तु स्थूलाग्रः गोमनुष्यादीनामिव । सागरवातस्य, हिमस्य करकायाः दहनस्य चाग्नेः संस्पर्शनैः । तेषां लक्षणान्याह ते पुनरिति आदावुत्पत्तिमात्रे हेतुव्यञ्जनैश्छेदनभेदनादिलक्षणैः । यत्र कारणे यानि लक्षणानि भवन्ति यथा छेदने दाहोत्पत्तिः क्रिमिशूकस्पर्शे कण्डुरित्यादि । ननु वातादिदोषेऽपि तान्येव लक्षणानि भवन्तीत्याह निजेति । निजव्यञ्जनैकदेशविपरीतैरिति निजव्यञ्जनानां वातादिलिङ्गानामेकदेशेन विपरीतैः । निजलक्षणे तु प्रागेव वातादिलक्षणानि भवन्ति आगन्तौ तु प्राक्हेतुजलक्षणानि भूत्वा अनन्तरं वातादिलक्षणानि भवन्तीति विशेषः । यद् वक्ष्यति—"आगन्तुर्हि व्यथापूर्वमुत्पन्नो जघन्यं वातपित्तश्लेष्मणां वैषम्यमापादयति निजे तु वातपित्तश्लेष्माणः पूर्वं वैषम्यमापद्यन्ते जघन्यं व्यथामभिनिर्वर्तयन्ति" इति (सू० २० अ०) । तेषां समासत उपक्रमानाह बन्धमन्त्रेति । बन्धः व्रणबन्धनं गोफणादिकम् । मन्त्रन्तु विषादिनिवारकम् ।

अगदो विषापहो योग:। प्रतापनिर्वापणं ज्वालानिवारकं शतधौतघृतादिना सेचनम् ॥ १—५ ॥

निजशोथानां निदानान्याह निजा: पुनरिति। स्नेहादीनां पञ्चकर्मणामयथावत् प्रयोग: अयोगातियोगौ। तेषामेव च मिथ्यासंसर्जनं मिथ्यायोग:। छर्दयादिभिर्व्याधिभिरतिकर्शनै: शरीरक्षयै:। कुष्ठादिव्याधयस्तु शोथलक्षणा एवेति तदुत्पत्तौ शोफप्रवृत्ति:। छर्द्यादिवेगधारणै:। कर्मेति कर्म चात्र पञ्चकर्म। तैरतिकर्षितस्य क्षीणस्य सहसा अक्रमेण अतिगुर्वादिद्रव्याणामुपयोगाद् भक्षणात्। मृदादिभक्षणात्। अतिलवणभक्षणात्। मिथ्योपचारादिति। ननु किन्नामाहारविहारयोर्मिथ्यात्वमिति चेत् कथ्यते। मिथ्या हि नामातस्मिंस्तद्बुद्धिरिति। न खलु किञ्चिद् द्रव्यं गलाध:करणेन तस्याहारत्वं स्यात्, आह्रियते उपचीयते शरीरमनेनेत्याहारशब्दनिरुक्ते:। अतो यत् खलु द्रव्यं गलाध:करणेन न खलु शरीरमुपचीयते परमजीर्णादिभि: शरीरमपचीयत एव तत् कर्म आहारशब्दव्यपदेशान् मिथ्याहारो भवतीति। एवं मिथ्याविहारे तदात्वसुखसंज्ञके ज्ञेयम्। प्रजातानामित्यचिरप्रजातानामित्यर्थ:। उदीर्णदोषत्वादिति एतैर्निदानैर्दोषा उदीर्णा: प्रकुपिता: शोथं जनयन्तीत्यर्थ:॥ ६ ॥

इति सामान्यं निदानमभिधाय दोषभेदेन शोफस्य निदानं लक्षणान्याह अयं त्वत्रेति। तत्र शीतादिविशदान्तगुणवद्द्रव्यभोजनादित्यर्थ:। तान्येतानि द्रव्याणि वाय्वाकाशबाहुल्यात् तत् समानं वायुमधिकतरं जनयन्तीत्यर्थ:। ननु भोजनाच्चेद् वायोरुत्पत्ति: शरीरे स्यात्तर्हि कथमुपवासादिभि: भोजनाभावै: शरीरक्षये तस्य वृद्धिर्भवेदिति चेत्कथ्यते। सर्वेभ्य एव भुक्तद्रव्येभ्यो वातादीनां त्रयाणामेवोत्पत्तिर्भवेदित्यायुर्वेदतत्त्वम्। तान्येव दोषाणां जनकानि, परन्तु वातस्याहारविशेष: एतदतिरिक्त: कश्चिज्जीवितशरीरे वर्त्तते स च बाह्यवायु:। शरीरेणायमाह्रियत इति सोऽप्याहार:, विशेषतस्तु तेन समानत्वाद् वायोरेव समधिका पुष्टिर्भवतीति अनशने पित्तकफक्षयात् श्वासमार्गेण च वायो: पुष्टिसातत्याद् वातस्य वृद्धिर्भवत्येवेति। वातिकशोफस्य लक्षणान्याह स क्षिप्रेति। क्षिप्रोत्थानप्रशम: क्षिप्रं दोषवैगुण्यादाविर्भवति भेषजादिना क्षिप्रञ्च प्रशाम्यतीत्यर्थ:। प्रकृतिवर्ण: शरीरवर्ण इवेत्यर्थ:। चल: विसर्पणशील:। खरेति शोफस्थानस्य लोमत्वं खरादिगुणवद् भवति। भिन्नत्वक् स्फुटितत्वक्। भिन्नलोमा हृष्टरोमा। छिद्यत इव छुरिकादिना। भिद्यत इव आरादिना। पीड्यत इव दण्डादिना ॥७—८॥

पैत्तिकशोफनिदानलक्षणे प्राह उष्णेति। उष्णादीनां भोजनै: अजीर्णे च भोजनै:। उष्यते स्वेदेनारतिना च युक्तो दाह ओष:। दह्यते दाहस्तु सर्वांगीणस्तीव्र: सन्ताप:। दूयते दवस्तु मुखोष्ठतालुषु दाह:। धूप्यते प्रखरसौरकिरणेनेव। उष्मायते उष्माणमुद्वमतीव। स्विद्यते स्वेदयुक्तो भवति। क्लिद्यते इति क्लेदस्तु शोणितस्य कृष्णत्वदौर्गन्ध्यतनुत्वानि, मांसस्य च

कृष्णता दौर्गन्ध्यञ्च । स्पर्शञ्च उष्णञ्च न सुषूयते सहते इत्यर्थः ॥ ६-१० ॥

श्लैष्मिकशोथनिदानलक्षणे व्याचष्टे गुर्विति । कृच्छ्रोत्थानप्रशमः अयञ्च चिरेण जायते चिरेण च प्रशाम्यतीत्यर्थः । पाण्डुः रक्तशून्य इव । श्लक्ष्णः मसृणः । स्तयानः विस्तृतः । शुक्लाग्ररोमा तत्स्थानस्य लोम्नामग्राणि शुक्लवर्णानि भवन्ति । द्विदोषजान् त्रीन् सान्निपातिकं चैकं शोफमाह यथा-स्वेति । उपसंहरति एवमिति । प्रकृतिभिः भेदप्रकृतिभिः ॥ ११-१५ ॥

शिष्यबुद्धिव्यवसायार्थं पुनरपि पद्येन दोषजशोफानां लक्षणान्याह भवन्ति चात्रेति । अत्र पूर्वोक्तातिरिक्तान्यपि लक्षणानि सन्तीति न पुनरुक्तता । यद् वक्ष्यति "गद्योक्तो यः पुनः श्लोकैरर्थः समनुगीयते । तद् व्यक्तिव्यव-सायार्थं द्विरुक्तं तन्न गर्ह्यते ॥" इति (नि० १ अ०) शूयन्ते उत्सेधमन्ति भवन्ति स्वपन्तीव तत्स्थानानि स्पर्शज्ञानहीनानीव भवन्ति । पीडितानि अंगुल्या अवनामितानि । नक्तं रात्रौ प्रणश्यति मनाक् प्रशाम्यति । पित्तशोफ-लक्षणमाह यः पिपासेति । गन्धी दुर्गन्धी । पूर्वमादौ मध्यान् मध्यकायात् प्रशूयते शोफवान् भवति । श्लेष्मशोफलक्षणान्याह शीत इति । सक्तगतिः न विसर्पतीत्यर्थः । नोन्नमति वातशोफवत् आशु नोन्नमतीत्यर्थः । शस्त्रकुश-च्छेदात् त्वक्छेदादिति ज्ञेयम् । मांसादिछेदेन तु शोणितं निर्गच्छत्येव । पिच्छा लसीका ॥ १६—२२ ॥

शोफस्यारिष्टलक्षणान्याह यस्त्विति । पादाभिनिर्वृत्तः आदौ पाद-द्वये सञ्जातः । गुर्वगगः ऊर्ध्वकायगतः स्यात् । जन्तोरिह पुरुषस्य । तस्यैवोर्ध्व-कायस्य गुरुत्वात् । यदुक्तं सुश्रुते "अधोभागो गुरुः स्त्रीणामूर्ध्वं पुंसां गुरु-स्तथा ।" इति । पुनश्च स्त्रीमुखाच्च स्त्रिया मुखे प्रागुत्पन्नः शोथो यदि गुर्व-गगोऽधोभागगतः स्यात् । गुह्यप्रभवः गुह्यांगे जातः । के नाम शोथस्योप-द्रवा इत्याह छर्दिरिति ॥ २३—२५ ॥

उत्सेधसामान्यात् पृथगवयवगता ये च शोथाः संज्ञान्तरेण भाष्यन्ते तान् सदोषलक्षणैराह यस्येति । जिह्वामूले उपजिह्विकाख्यावयवे । यथोक्तैषा मदीये 'शारीरविनिश्चये' "जिह्वायाः मूले श्वासनाड्यवबद्धे द्विधा विभक्ते द्वे उपजिह्विके वर्तेते, ये च श्वासपथे अन्नस्य अन्नमार्गे च श्वासस्य प्रवेशे प्रति-बन्धकीभूते भवतः" इति । तस्यैवावयवस्य शोथः उपजिह्विका नाम व्याधिः । काकले तालुशेषे । यद्यपि काकलोऽयं गलबाह्यप्रदेशे वर्तते, तथापीह तत् समीपवर्त्तित्वेन तालुमूलस्य ग्रहणम् । अवयवस्यास्य गलशुण्डिकाऽपि संज्ञो-पलभ्यते । तस्यैव शोफो गलशुण्डिका नाम व्याधिः । गलबाह्ये मन्यायाम । गलग्रहमाह यस्येति । अन्तर्गले कण्ठे । गलान्तःशोफरूपस्य गलग्रहसंज्ञा ॥

श्लेष्मनिमित्तान् नानास्थानगतान् शोफान् विभिन्नसंज्ञाभिर्निर्दिश्य पित्तनिमित्तान् शोफान् स्वसंज्ञाभिर्निर्वक्ति यस्य पित्तमिति । सरक्तमिति रक्तं संदूष्येत्यर्थः । सर्पति स च शोफः सर्पणशीलः । पिडकाख्यं शोफ-माह यस्य पित्तमिति । त्वचि रक्ते चेति त्वक् रक्तञ्च दूषयित्वेत्यर्थः । तिल-

कादीनाह यस्येति। शोणितं प्राप्य शोणितगतं सत् तच्छोणितं स्वोष्मणा शुष्यति अन्तर्भूतणिजर्थोऽयं प्रयोग: शोषयतीत्यर्थ:, अत्र त्वग्गतं शोणितं ज्ञातव्यम्, तेन शुष्करोणितसंसर्गात् त्वग् विवर्णा भवन्ती तिलकादीन् जनयतीत्यर्थ:। पिप्लु: जटुल:। शंखकनामानमाह यस्येति। शंखयो: कर्णापांगयोरन्तरे किञ्चिदूर्ध्वं शंखयो: स्थानम्। दारुणत्वमस्यानुपक्रमत्वाज्ज्ञेयम्। यद् वक्ष्यति—"त्रिरात्राज्जीवितं हन्ति शंखको नाम नामत:।" इति (सि० ६ अ०)। कर्णमूले हनुसन्धेरध:। अन्ताय दुर्जय: अतिकृच्छ्रसाध्य इत्यर्थ:, न त्वयमसाध्य:। ननु कश्चिदेव विमुच्यते इति स्वयमेव वक्ष्यतीति चेन्न विमुच्यते त्रिदोषोल्वणसान्निपाते कश्चिदेव एतेनोपसर्गेण विमुक्तोऽनाक्रान्तो भवतीत्यर्थ:॥ ३०—३४॥

वातजशोफविशेषानुद्दिशति वात इति। उद्धूय आक्रम्य। पार्श्वमिति वामपार्श्वगतप्लीहानमित्यर्थ:। वातादेव तत्र रक्तसञ्चयाधिक्यात् तस्याभिवृद्धिर्भवतीति ज्ञेयम्। गुल्मस्थाने कोष्ठे यद् वक्ष्यति—"वस्तौ च नाभ्यां हृदि पार्श्वयोर्वा स्थानानि गुल्मस्य भवन्ति पञ्च।" इति (चि० ५ अ०) अत्र वस्ताविति वस्तिप्रदेशे कोष्ठाध: इत्यर्थ:। नाभ्यामिति नाभिप्रदेशे कोष्ठस्य मध्यस्थले इत्यर्थ:। हृदीति कोष्ठोर्ध्वप्रदेशे। वृद्धि: सप्तविधा यदुक्तं वृद्धवाग्भटेन—

"क्रुद्धो रुद्धगतिर्वायु: शोथशूलकरश्चरन्।
मुष्कौ वंक्षणत: प्राप्य फलकोषाभिवाहिनी:।
प्रपीड्य धमनीर्वृद्धिं करोति फलकोषयो:।
दोषास्रमेदोमूत्रान्त्रै: सवृद्धि: सप्तधा गद:॥" इति (नि० ११ अ०)

उदरमाह यस्येति। कुक्षौ उदरे। त्वङ्मांसान्तरमाश्रित इति त्वच: अभ्यन्तरत्वग्रूपाया वपावहाया: मांसस्य चोदरपेश्या अन्तरमवकाशमाश्रित: इत्यर्थ:। आनाहमाह यस्येति। कुक्षिमिति तदेकदेशं स्थूलान्त्रं लक्ष्यते। पुनश्च अधिमांसार्बुदादय: उत्सेधसामान्यात् शोथसंग्रहे निर्देश्या:। अत्रादिपदेन ग्रन्थ्यर्शोगण्डमालादीनां परिग्रह: स्यात्॥ ३५—४०॥

एतान् प्राय: साध्यसम्मतान् व्याधीनभिनिर्दिश्य सन्निपातजमेकं दारुणसम्मतं व्याधिमाह वातपित्तेति। यद्यपि वातिकी श्लैष्मिकी च रोहिणी साध्यसम्मता तथापि सान्निपातिकी सा मरणायैवेति तामेवोद्दिशति। जिह्वामूले गलदेशे श्वासान्ननालीगोजिह्वानामन्तिके इत्यर्थ:। समुच्छ्रिता: सम्यग्वर्धिता: विदहन्त: दूषयन्त: शोणितं मांसं चेति शेष:। यदुक्तं सुश्रुते—"गलेऽनिल: पित्तकफौ च मूर्छितौ पृथक् समस्ताश्च तथैव शोणितम्। प्रदूष्य मांसं गलरोधिनोंऽकुरान् सृजन्ति यान् साशुहरा तु रोहिणी॥" इति (नि० २६ अ०) शीघ्रकारिणं शीघ्रं मारयति प्रशाम्यति वेतीयमस्या: प्रकृति:। कुशलेनानुक्रान्त इति व्याधेरप्येकदोषजत्वे ज्ञेयम्। सान्निपातिकी रक्तजा तु मरणायैव भवेत्। यदुक्तं सुश्रुते—"गम्भीरपाकाऽप्रतिवार्यवीर्या

त्रिदोषलिंगा त्रयसम्भवा स्यात्। स्फोटाचितापित्तसमानलिंगाऽसाध्या प्रदिष्टा रुधिरात्मिकेयम्॥" इति (नि० १६ अ०) ॥ ४१—४३॥

अतः सर्वव्याधीनां साध्यासाध्यत्वभेदेन मृदुदारुणभेदेन च चतुर्विधानां विवृतिं करोति सन्तीति। तत्र दारुणसम्मताः साध्या अचिकित्सया अपचिकित्सया वा मानवं हन्तीत्याह साध्या दारुणसम्मता इति। मृदुसाध्यास्तु यत्नकृतया अयत्नकृतया वा क्रियया सिध्यन्तीत्याह साध्याश्चेति। मृदुसाध्यास्तु न प्रशाम्यन्ति परन्तु सुचिकित्सया मरणरोधो भवतीत्याह असाध्याश्चेति। यात्राकरमायुषः शेषत्वात् क्रियया जीवितानुबन्धकरम्। यदुक्तं सुश्रुते—"यापनीयं विजानीयात् क्रिया धारयते तु यम्। क्रियायान्तु निवृत्तायां सद्य एव विनश्यति। प्राप्ता क्रिया धारयति याप्यव्याधितमातुरम्। प्रपतिष्यदिवागारं विष्कम्भः साधु योजितः॥" इति (सू० २३ अ०)। दारुणासाध्यस्तु न कयापि क्रियया सिध्यन्ति तेषां मरणायैव भवेयुरित्याहसन्तीति॥ ४४—४८॥

एवं विकारेषु चतुर्धाभिन्नेष्वपि तेषामपरिसंख्येया विभेदा भवन्तीत्याह त एवेति। रुजादिभिर्भिद्यमानास्ते व्याधयोऽपरिसंख्येया भवन्ति। रुजाभेदः वेदनाविशेषः। समुत्थानभेदः संप्राप्तिभेदः। स्थानन्तु शरीरावयवान् धातुभेदेनांगभेदेन च। संस्थानमाकृतिः ग्रन्थ्यर्बुदादीनाम्। नामभेदश्च वातव्याधित्वेऽपि अर्दितापतानकादिनामभेदः। ननु तर्ह्यपरिसंख्येयत्वे चिकित्सा कथं भविष्यतीत्याह तेषामिति। तेषामपरिसंख्येयानामपि व्याधीनां व्यवस्थाकरणं चिकित्सोपयोगिकरणं यथाऽस्थूलेषु स्थूलेषु च विकारेषु संग्रहः समस्य कथनं तथा प्रकृतिसामान्यं कारणसमानता च उपदिश्यतेऽस्मिन् रोगचतुष्के इति शेषः। एतेनापरिसंख्येयत्वेऽपि वर्गमधिकृत्य प्रकृतिश्चाधिकृत्य चिकित्सा नासम्भाव्या भवति॥ ४९—५०॥

ननु तथापि व्याधीनां नामग्राहं ग्रहणन्तु भिषजा कर्तव्यमेव। चिकित्सातन्त्रे तेषां प्रत्येकशः संज्ञा नूनमुल्लेख्या भवन्तीति शंकां निरस्यति विकारेति। विकारनामाकुशलः व्याधेः संज्ञां वक्तुमसमर्थः न जिह्रीयात् न लज्जितो भवेत्। कथमित्याह न हीति। हि यतः सर्वविकाराणां नामतो ध्रुवा स्थितिर्नास्ति। व्याधीनां सर्वेषामेव नामतो व्यवस्था स्यादिति न। व्याधिर्हि काले काले परिवर्तनशीलः, य एव व्याधिस्तत्तल्लिंगेन तदात्वे आसीत् स एव विभिन्नलिंगैरुपलभ्यमानोऽद्यत्वे भिन्न एव स्यादिति तस्य संज्ञाऽपि पृथग् भवितुमर्हतीति भावः। पुनश्च एक एव दोषः समुत्थानविशेषतः संप्राप्तिभेदात् स्थानान्तरगतश्च पृथक्स्थानसंश्रयी सन् नानारूपं व्याधिमुत्पादयतीत्याह स एवेति। ननु संज्ञाकरणासमर्थतायां कथं चिकित्सा भाव्येत्याह तस्मादिति। व्याधीनां नामानि यथा तथा वा भवन्तु तेषां कारणभूतेषु दोषेषु अधिष्ठानेषु च संप्राप्तिविशेषेषु च परिज्ञातेषु क्रियाकरणं नासम्भाव्यं भवेदित्यर्थः। यथाऽद्यत्वे बहवो नवीननवीनतरा व्याधय आग-

च्छन्ति पाश्चात्त्यास्तु तेषामागमनमात्रात् संज्ञास्येव कुर्वन्ति न तु तेषां निदानादिज्ञानम्। आयुर्वेदज्ञास्तु तत्र संज्ञाकरणमादौ न प्रयोजनं मन्यन्ते स च केन दोषेण भवन्ति किं वास्याधिष्ठानं संप्राप्तिर्वास्य केत्यनुसन्धाय कर्म कर्तुं प्रभवन्ति। यथाऽद्यत्वे "इन्फ्लुएञ्जा" इति पाश्चात्त्यसंज्ञितो व्याधि:। तत्र ज्वरसंप्राप्तेरेव विशेषतो दर्शनात्स च ज्वर एव व्याधिरिति निश्चीयते। परन्तु तत्र जनपदोध्वंसनीयत्वेन किमपि वैशेष्यमुपलभ्यते। सर्वत्रैवास्मिन ज्वरे श्लेष्मप्राधान्यं वर्तत एव। परन्त्वेकसंज्ञकेऽप्यस्मिन एकश्लेष्मदोषजत्वेन सुखसाध्यत्वं द्विदोषजत्वेन वातश्लैष्मिकपित्तश्लैष्मिकत्वाभ्यां कृच्छ्रसाध्यत्वं क्वचित् वा श्लेष्मोल्वणसान्निपातिकत्वेनासाध्यत्वं वा भवति। इत्येकस्मिन्नेव व्याधौ चिकित्साभेद: सर्वत्रैव दृश्यत इति तेषां नामकरणादेव कश्चिद् युक्ता एका क्रिया भवितुमर्हति। अत एवायुर्वेदे व्याधे: संज्ञाकरणे उदासीनता नासमीचीना भवति। उपसंहरति यो ह्येतदिति। एतत्त्रिविधं विषयं प्रकृत्यधिष्ठानसंप्राप्तिसंज्ञकम्। यथान्यायं विधिमनुसृत्य। अत एवायुर्वेदज्ञा: त्रैकालिकान् व्याधीन चिकित्सतीति शारीरे व्यासत: प्रतिपादयिष्यति॥ ५१—५४॥

पुनश्च विकारप्रकृती: स्तोकं विशिनष्टि नित्या इति। देहे जीवितदेहे इत्याह प्राणभृतामिति। मृतशरीरे तु पञ्चभूतावशेषत्वमेवोपलभ्यते न तु त्रिधातूनां सत्ता। त्रयो वातपित्तकफा नित्या: सततस्थायिनो भवन्ति उपादानकारणत्वेन निमित्तकारणत्वेन च। तस्योत्पत्तौ शुक्रशोणितोपादानभूता एव वातादय: शरीरमारभन्ते पुनश्च अन्नरसोपादानभूता वातादयस्तत्पोषयन्ति इति तस्य शरीरोपादानत्वं सिध्यति। अत एवाह सुश्रुत: "वातपित्तश्लेष्माण एव देहसम्भवहेतव:" इति। एवकारेणात्र अन्येषां व्यवच्छेद: कृत:। पुनश्च ते स्वस्थानस्थिता: क्रियाभिरुष्मभि: श्लेषणैश्च यथाक्रमं धारयन्ति इति तेषां निमित्तकारणत्वमपि समीचीनं भवति यदुक्तं तत्रैव "तैरेवाव्यापन्नैरधोमध्योर्ध्वसन्निविष्टै: शरीरमिदं धार्यतेऽगारमिव स्थूणाभिस्तिसृभिरतस्त्रिस्थूणमाहुरेके" इति (सू० २१ अ०)। अत: प्रकृतिस्था: वातादय: शरीरं जनयन्ति पोषयन्ति धारयन्ति च। विकृता: स्वमानहीना: स्वमानातिरिक्ता वा शरीरं नाशयन्ति यदुक्तं तत्रैव "त एव व्यापन्ना: प्रलयहेतव:" इति। अत एवैषां प्रकृतिर्विकृतिर्वा नूनं भिषग्भिर्ज्ञातव्या इत्याह विकृता इति। बुभुत्सेत ज्ञातुं प्रयतेत इत्यर्थ:॥ ५५॥

ननु दोषाणां विकृतिस्तु सदैव दृश्यते व्याधिरूपेण प्रकृतिस्तु कथं ज्ञातव्या न खलवस्थूलानामेषां माननिर्णय: सुकर इति तेषां प्रकृतिगता: क्रिया उल्लिखति। तेषां प्रकृतिगतानां क्रियाणां न्यूनाधिक्यदर्शनेन वातादीनां धातूनां ह्रासवृद्धी अनुमेये भवत इत्याह उत्साहेति। उत्साह: कार्यैकध्यवसाय:। चेष्टा शरीरे प्रवृत्तिनिवृत्तिजीवनयोनिपूर्विका क्रिया समा- धातुगति: धातुषु रसरक्तादिषु उपादानत्वेन त्रिधातुसाम्येन गमनम्। गति-

मतां बहिर्मुखानां मलानां स्रवणं मोक्षः। यथाकालं यथामानञ्च बहिर्निःसरणम्। अविकारजं प्रकृतिभूतं कार्य्यम्। पक्तिरन्नादीनां पाकः। उष्मा देहगत एव। प्रसादः प्रसन्नता। बन्धः सन्धीनामिति शेषः। धृतिः मनःसंयमः। अधुना एतैर्लिंगैरेव क्षयो वृद्धिर्वा परीक्ष्या भवतीति क्षयलक्षणमाह वात इति। प्राकृतात् प्रकृतिगतात् पूर्वोक्तकर्मणो हानिः वैरोधिकस्य वा वृद्धिः क्षयलक्षणं भवति। वृद्धिलक्षणमाह दोषेति। दोषप्रकृतेः दोषाणां प्रकृतिगतकर्मणां वैशेष्यमाधिक्यं नियतं निश्चितं तेषां वृद्धिलक्षणं भवति। एवंप्रकारेण क्षयवृद्धी परीक्ष्ये भवत इत्यर्थः॥ ५६—६०॥

अध्यायार्थं श्लोकैर्निवेद्य तं समापयति तत्र श्लोका इति। निगदव्याख्यातमन्यत्॥ ६१—६३॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने त्रिंशोथीयो नामाष्टादशोऽध्यायः॥ १८॥

ऊनविंशोऽध्यायः।

पूर्वाध्याये ससंज्ञातिरिक्ता बहवो व्याधयो वर्तन्त इत्युक्तम्। अधुना ससंज्ञकान् व्याधीन् संजिघृक्षुरध्यायान्तरमारभते अथात इत्यादिना। तत्रादौ संख्यातो व्याधीन् उद्दिश्य ततो निर्देशकथनं युक्तं भवतीत्याह इह खल्विति। इह अस्मिन् तन्त्रे। क्षीरदोषा इति दुष्टस्तन्यलक्षणानि। रेतोदोषा दुष्टशुक्रलक्षणानि। पिडका इति प्रमेहपिडकाः। भक्तस्यानशनस्थानानि अरोचका इत्यर्थः। उद्देशक्रमागतान् पुनः क्रमशो निर्दिशति अष्टावुदराणीति। अत्र मूत्राघाताः मूत्रकृच्छ्राणि तानि निदानचिकित्सातस्त्रिमर्मीये चिकित्सिते व्याकरिष्यति। अवसादि जले मज्जनशीलम्। यद्यपि चिकित्सिते अष्टादश कुष्ठान्युक्तानि तथापीह महाकुष्ठमात्रसंख्यानान्न दोषः। उदावर्तस्यापि बहुविधत्वे इह प्राधान्येन षण्णां वेगरोधजानामेव निर्देशः। उपसर्गजा तृष्णा ज्वरादिशारीरव्याध्युपसर्गभूता क्षताद्यागन्तुव्याध्युपसर्गभूता च ज्ञेया। पञ्चभक्तस्यानशनस्थानानीति वातपित्तकफसन्निपातद्वेषजाः। अनभिमते अन्ने सुस्वादावपि अरुचिर्भवेदेव। वातपित्तकफद्वेषायासाः इति पाठस्तु यद्यप्यचिकित्सिते अरुचिक्रमविरोधित्वात्पाठ एव। पूर्वोद्देशमभिसमस्येति कियन्तःशिरसीये उद्दिष्टानि संक्षिप्येत्यर्थः। बीजोपघातादिति शुक्रशोणितसंयोगे बीजभागे दुष्टे सहजं क्लैब्यं भवति। ध्वजभंगादिति ध्वजे शेफसि आघातात्। शुष्काणि अस्रावीणि। आर्द्राणि स्रावीणि। अतत्त्वाभिनिवेशश्चायं मानसदोषः बद्धजीवानां हितेऽहितबुद्धिः अहिते च हितबुद्धिः नित्ये वाऽनित्यबुद्धिः अनित्ये वानित्यबुद्धिरिति॥ १—१२॥

विंशतिः क्रिमिजातय इति। यूकालिक्षेति संज्ञाः पिपीलिकाण्ड-

द्विविधमेवाधिकरणं भवतीत्याह द्विविधमिति। व्यष्टिभावेन च ते विकाराः अपरिसंख्येया भवन्ति प्रकृत्यादीनां विकल्पानामपरिसंख्येयत्वात्। तत्र प्रकृतिः सन्निकृष्टं कारणं वातादिकम् अधिष्ठानं व्याध्युत्पत्तेः स्थानं दूष्य-धातुकोष्ठांगादिकम्, लिंगं रूपम् आयतनं निदानं मिथ्याहारविहारा-दिकम्॥ १-४॥

तत्रागन्तून् व्याधीन् विवृणोति मुखानीति। मुखानि प्राथमिका-हेतवः। एतान् पुरस्कृत्यैवागन्तवो व्याधयो भवन्तीत्यर्थः। नखदशनयोः पतनमिति तैः शरीरे आघात इत्यर्थः। अभिचारः श्येनादियागकृतं मारणा-दिकर्म। अभिषंगः संघर्षो वलिभिः। वधः शस्त्रादिनाघातः। बन्धः शृंखला-दिना। पीडनं लगुडादिना। भूतोपसर्गः पिशाचाद्यावेशः। मुखं सन्निकृष्टं कारणम्। प्रेरणं परम्परासम्बन्धेन कारणम्। अतिवृद्धा अनुकूलैर्हेतुभिर्व-र्धिताः। अनुबध्नन्ति परस्परं संसर्गतामापद्यन्ते। परन्तु परस्परसंसृष्टेऽपि व्याधौ व्याधिनिर्णये स्वस्वलक्षणप्रदर्शनान्न कदापि क्लेशो भवतीत्याह न चेति॥ ५-७॥

ननु सर्वत्रैव यानि खलु लक्षणानि तानि दोषत्रयाणामेवेति कथं निजागन्त्वोः परस्परसंसृष्टयोः पृथक्त्वमवगच्छाम इत्याह आगन्तुर्हि इति। हि यत आगन्तुरादौ पीडादायकरूपो भवति परस्ताद् दोषवैषम्यं तज्जन्यं भवति। निजे तु व्यथोत्पत्तेः प्रागेव दोषवैषम्यं भवतीति तयोर्भेदः। जघन्यं परस्तादित्यर्थः॥ ८॥

नन्वेते दोषा व्याध्युत्पादकत्वेन शरीरमेवाधितिष्ठन्ति अतस्तेषां शरीरे स्थानान्याह तेषामिति। एतत्स्थानकथनन्तु तत्र तत्र ते प्राधान्येनोपलभ्यन्ते इत्यर्थः। परन्तु सर्वमेव शरीरं व्याप्नुवन्तस्तिष्ठन्ति तदुपादानत्वादिति निष्कर्षः। यदुक्तं वृद्धवाग्भटेन—"ते व्यापिनोऽपि हृन्नाभ्योरधो मध्योर्ध्व-संश्रयाः" इति। स्थानविभाग इति यस्मिन् यस्मिन् स्थाने यो यः प्राधान्येन तिष्ठति तस्य विभाग इत्यर्थः। तत्रादौ वातस्थानान्याह—तद्यथेति। वस्तिर्मूत्रा-शयः मूत्रपृथक्करणयन्त्रेण सहैव मूत्राधारः एतेन परिगृह्यते। पुरीषाधान-मुण्डुकः। अत्र सक्थिनीत्यूरुद्वयम्। पादौ तु ऊर्वोरधोभागः। अस्थीनीति धातुषु अस्थ्येव प्राधान्येन वातस्थानम्। सर्व एव धातवोऽन्नरसपोष्याः। अन्नरसस्तु त्रिधातुसमवायरूप इति सप्त धातवो मूलधातुत्रयोपादनका अपि तत्र पृथग् वातादीनां धातूनामाधिक्यं वर्तते इति ज्ञेयम्। यदुक्तं वृद्ध-वाग्भटे—"तत्रास्थनि स्थितो वायुरसृक्स्वेदयोः पित्तम्, शेषेषु च श्लेष्मा। तस्मादेकवृद्धिक्षयकारणत्वमेषाम्" इति (सू० १६ अ०)। ननु वातादयो न खलु धातुपोषका वाक्येनानेन लभ्यते। लघुवाग्भटकारोऽस्य वाक्यस्या-न्यथार्थत्वमाह यथा—"तत्रास्थनि स्थितो वायुः पित्तं तु स्वेदरक्तयोः। श्लेष्मा शेषेषु तेनैषामाश्रयाश्रयिणां मिथः। यदेकस्य तदन्यस्य वर्धनक्षपणौषधम्॥" इति। अत्र धातुमलयोर्वातादयोऽवस्थाय कर्म कुर्वन्ति। एवमाधाराधेयभाव-

रूपा: । पिपीलिकास्तु केशादौ सञ्चरणशीला: क्रिमय: । प्रमेहाणां विंशतिमाह उदकेति । योनिव्यापदां गर्भाशयगतानां व्याधीनां विंशतित्वं संज्ञाभिर्दर्शयति वातिकीति । दोषदूष्यसंसर्गप्रकृतिनिर्देशैरिति संसर्गेण रक्तयोन्यादिषु दोषसंसर्गेण परिप्लुतादिषु च प्रकृतिनिर्देशेन बीजदोषेण सूचीमुख्यादिषु वातिकादिभ्यो भिन्ना: षोडश ज्ञेया: । उपसंहरति केवल इति । केवल: कृत्स्न: अयं प्रागुद्दिष्ट: उद्देश: नाममात्रेण संक्षेपेण अभिधानं यथोद्देशं उद्देशक्रमेण अभिनिर्दिष्ट: विवृत्या कथित इत्यर्थ: ॥ १३—१५ ॥

त एते शारीरा व्याधयो नानाविधा अपि न वातपित्तकफान् विहाय भवन्तीत्याह सर्व एवेति । निजा: शारीरा दोषोत्था इत्यर्थ: । निर्वर्तन्ते उत्पद्यन्ते । वातपित्तकफान् नातिवर्तन्ते वातपित्तकफान् हित्वा न वर्तन्ते । पुनर्वातादीनां स्थानसंस्थानप्रकृतिविशेषान् विभिन्नेषु च व्याधिषु तेषां स्थानादिवैषम्यमभिसमीक्ष्य तदात्मकानपि लोहादिजानपि व्याधीन् तानेव वातादिजानेव उपदिशन्ति ॥ १६ ॥

अर्थमिमं पुन: पद्येन व्याचष्टे—भवतश्चात्रेति । न पृथगित्युक्त्या व्याधीनामेते वातादय उपादानकारणान्येवेति ज्ञातव्यम । क्वचित् तेषां निमित्तकारणत्वेऽपि धातुवैषम्ये तेषामुपादानत्वमेव हेतु: स्यात् अन्यथा दोषवैषम्ये दूष्यवैषम्यं न सम्भवति । आगन्तवस्तु व्याधयस्ततो विशिष्टा भवन्ति । व्याध्युत्पत्तौ दोषवैषम्यनिरपेक्षतया लगुडादिप्रहारेण तेषामुत्पत्ते: । परन्तु आगन्तुव्याधि: निजं शारीरं व्याधिमन्वेति । यदुक्तं "आगन्तुर्हि व्यथापूर्वं जायते जघन्यं निजैर्दोषैरनुबध्यते" इति । प्रवृद्धो निजोऽपि व्याधि: कदाचिदागन्तुं व्याधिमप्यन्वेति । अत: कर्मसमारम्भे चिकित्सासारम्भे अनुबन्धं प्रकृतिञ्च सम्यक् ज्ञात्वा क्रिया कर्तव्या इत्यर्थ: ॥ १७—१८ ॥

अध्यायार्थमाह तत्र श्लोकाविति । अतिरोहितार्थमन्यत् ॥ १९—२० ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थानेऽष्टोत्तरीयो नामोनविंशोऽध्याय: ॥ १९ ॥

विंशोऽध्याय:

व्याधयो हि द्विविधा: संग्रहेण सामान्यजा नानात्मजाश्चेति । तत्र रोगचतुष्के आद्येनाध्यायत्रितयेन सामान्यजान् व्याधीन् निरवशेषतो निर्वेद्यान्तिमेनाध्यायेन व्याधे: सन्निकृष्टान् हेतून् दोषाख्यान् स्थानतो निर्दिश्य तज्जान् नानात्मजान् व्याख्यातुकामोऽध्यायान्तरमारभते अथात इत्यादिना । तत्र प्राङ्मुख्यहेतुभेदाद् व्याधीनां चत्वारो भेदा: प्रोक्ता: चत्वार इति । पुनश्च तत्र सर्वत्रैव पीडाकरत्वं साम्यादेकत्वमपि भवतीत्याह तेषामिति । पुनश्च भेदप्रकृत्यन्तरेण भिनत्ति द्विविधा: पुनरिति । तेषां सर्वव्याधीनां

द्विविधमेवाधिकरणं भवतीत्याह द्विविधमिति। व्यष्टिभावेन च ते विकाराः अपरिसंख्येया भवन्ति प्रकृत्यादीनां विकल्पानामपरिसंख्येयत्वात्। तत्र प्रकृतिः सन्निकृष्टं कारणं वातादिकम् अधिष्ठानं व्याध्युत्पत्तेः स्थानं दूष्य-धातुकोष्ठांगादिकम्, लिंगं रूपम् आयतनं निदानं मिथ्याहारविहारा-दिकम्॥ १-४॥

तत्रागन्तून् व्याधीन् विवृणोति मुखानीति। मुखानि प्राथमिका-हेतवः। एतान् पुरस्कृत्यैवागन्तवो व्याधयो भवन्तीत्यर्थः। नखदशनयोः पतनमिति तैः शरीरे आघात इत्यर्थः। अभिचारः श्येनादियागकृतं मारणा-दिकर्म। अभिषंगः संघर्षो वलिभिः। वधः शस्त्रादिनाघातः। बन्धः शृंखला-दिना। पीडनं लगुडादिना। भूतोपसर्गः पिशाचाद्यावेशः। मुखं सन्निकृष्टं कारणम्। प्रेरणं परम्परासम्बन्धेन कारणम्। अतिवृद्धा अनुकूलैर्हेतुभिर्व-र्धिताः। अनुबध्नन्ति परस्परं संसर्गतामापद्यन्ते। परन्तु परस्परसंसृष्टेऽपि व्याधौ व्याधिनिर्णये स्वस्वलक्षणप्रदर्शनान्न कदापि क्लेशो भवतीत्याह न चेति॥ ५-७॥

ननु सर्वत्रैव यानि खलु लक्षणानि तानि दोषत्रयाणामेवेति कथं निजागन्त्वोः परस्परसंसृष्टयोः पृथक्त्वमवगच्छाम इत्याह आगन्तुर्हि इति। हि यत आगन्तुरादौ पीडादायकरूपो भवति परस्ताद् दोषवैषम्यं तज्जन्यं भवति। निजे तु व्यथोत्पत्तेः प्रागेव दोषवैषम्यं भवतीति तयोर्भेदः। जघन्यं परस्तादित्यर्थः॥ ८॥

नन्वेते दोषा व्याध्युत्पादकत्वेन शरीरमेवाधितिष्ठन्ति अतस्तेषां शरीरे स्थानान्याह तेषामिति। एतत्स्थानकथनन्तु तत्र तत्र ते प्राधान्येनोपलभ्यन्ते इत्यर्थः। परन्तु सर्वमेव शरीरं व्याप्नुवन्तस्तिष्ठन्ति तदुपादानत्वादिति निष्कर्षः। यदुक्तं वृद्धवाग्भटेन—"ते व्यापिनोऽपि हृन्नाभ्योरधो मध्योर्ध्व-संश्रयाः" इति। स्थानविभाग इति यस्मिन् यस्मिन् स्थाने यो यः प्राधान्येन तिष्ठति तस्य विभाग इत्यर्थः। तत्रादौ वातस्थानान्याह—तद्यथेति। वस्तिर्मूत्रा-शयः मूत्रपृथक्करणयन्त्रेण सहैव मूत्राधारः एतेन परिगृह्यते। पुरीषाधान-मुण्डुकः। अत्र सक्थिनीत्यूरुद्वयम्। पादौ तु ऊर्वोरधोभागः। अस्थीनीति धातुषु अस्थ्येव प्राधान्येन वातस्थानम्। सर्व एव धातवोऽन्नरसपोष्याः। अन्नरसस्तु त्रिधातुसमवायरूप इति सप्त धातवो मूलधातुत्रयोपादनका अपि तत्र पृथग् वातादीनां धातूनामाधिक्यं वर्तते इति ज्ञेयम्। यदुक्तं वृद्ध-वाग्भटे—"तत्रास्थनि स्थितो वायुरसृक्स्वेदयोः पित्तम्, शेषेषु च श्लेष्मा। तस्मादेकवृद्धिक्षयकारणत्वमेषाम्" इति (सू० १६ अ०)। ननु वातादयो न खलु धातुपोषका वाक्येनानेन लभ्यते। लघुवाग्भटकारोऽस्य वाक्यस्या-न्यथार्थत्वमाह यथा—"तत्रास्थनि स्थितो वायुः पित्तं तु स्वेदरक्तयोः। श्लेष्मा शेषेषु तेनैषामाश्रयाश्रयिणां मिथः। यदेकस्य तदन्यस्य वर्धनक्षपणौषधम्॥" इति। अत्र धातुमलयोर्वातादयोऽवस्थाय कर्म कुर्वन्ति। एवमाधाराधेयभाव-

सम्बन्धकथनात् सप्तधातुभ्य आधारेभ्यो वातादीनामाधेयानां पार्थक्यं स्पष्टत: सूच्यत एवेति चेदुच्यते। वृद्धवाग्भट्टवचने स्थित इत्यस्य लघुवाग्भटेन धातुदोषयोराश्रयाश्रयिभावसम्बन्धे कल्पितेऽपि न तेन वातादिना धातूत्पादकत्वं प्रतिहन्येत। उपादानस्यापि कार्य्याश्रितत्वात्। तन्तवस्तु पटमाश्रित्यैव वर्तन्ते। यद्यप्युपादानातिरिक्तानां पृथक्पदार्थानामाश्रयाश्रयिभावसम्बन्धो भवितुमर्हति तथाप्यत्र तयोरेकबुद्धिक्षयत्वेन समानतैव तत्रोक्ता। न खल्वाधाराधेययो: पृथक्पदार्थत्वे आधारक्षये आधेयक्षय: आधारोपचये वाधेयोपचय: सम्भवति। आधेयस्य समवायिकारणत्वे सम्भवत्येव। सप्तसु धातुषूपादानत्वेन त्रयाणामेव वातादीनां सद्भावेऽपि अस्थनि वायु: रक्ते च पित्तमन्येषु च श्लेष्मा आधिक्येन वर्तत इत्यस्य वाग्भटवाक्यस्य तात्पर्यम्—"प्राधान्येन व्यपदेशा भवन्ती"ति न्यायादेकस्यैवोल्लेख:। ननु न खल्वार्षे ग्रन्थे कुत्रापि रसादिसप्तधातूनामुत्पत्तिर्वातादिधातुत्रयात् भवतीत्युपलभ्यते न वा कुत्रापि वातादे: सप्तधातूनामुपादानत्वं वर्णितमास्ते इति अनार्षत्वाद् वाग्भटवचनमग्राह्यमिति चेदुच्यते। वाग्भटस्तु चरकसुश्रुतादिकमार्षग्रन्थमेवोपजीव्य स्वसंग्रहं प्रणीतवान् न च तत्र कणामात्रमप्यनार्षवचनं वर्तत इति तेन स्पष्टत उक्तम् यथा—"न मात्रामात्रमप्यत्र किञ्चिदागमवर्जितम्। तेऽर्था: स ग्रन्थबन्धश्च संक्षेपाय क्रमोऽन्यथा॥" इति तद्बोधकं वचनं नूनमार्षे ग्रन्थे चरकसुश्रुतादावासीदेव। कालगौरवादद्यत्वे विलुप्तिं गतम्। किन्तु तत्समानतन्त्रे सम्प्रति स्वण्डिताकारेणोपलब्धे वृद्धजीवकीये तन्त्रे एतदर्थकं वचनमेकं लभ्यते तद्यथा—"वातादीनां धातूनामन्ये धातव आप्यायिता भवन्ति" इति (शा० जाति०)। अत्र धातूनामिति तृप्त्यर्थधातोर्योगे करणे षष्ठी। "तृप्त्यर्थानां वा" इति मुग्धबोधसूत्रम्। आप्यायनस्य तृप्तिविशेषत्वात्। अत एव तट्टीकायां दुर्गादास: प्राह "पूर्तिरिहाप्यायनं अतएव तृप्तिविशेष:" इति। मुद्रिते तस्मिन् तन्त्रे तु केचित् संशोधका: वाक्यमिदमशुद्धं मत्वा "अन्ये धातव आप्यायिता (रो) भवन्ति" इति पाठं चिकीर्षन्ति। सप्त धातव: कथंकारं वातादीन् आप्याययन्ति इति त एव जानन्ति। परन्तु शीलार्थे तृणि षष्ठीनिषेधोऽपि न तै: स्मृत:।

पक्वाशयपदेनात्र महास्रोतस: अधोभाग एव ग्रहणीय:। विशेषेण वातस्थानत्वञ्चास्य तत्रैवाहाराद् वाय्वंशपृथक्करणात्। पित्तस्थानान्याह स्वेद इति। स्वेदोऽत्रान्नमलस्वेदो ज्ञातव्य: तत्रैव पित्ताधिक्यं वर्तते मेदोमलरूपे च स्वेदे श्लेष्मण एव। रसोऽत्र तैजसो ज्ञेय: न त्वाप्य: आप्ये तु श्लेष्मप्राधान्यं वर्तत एव। तैजसाप्ययो: द्विविधयो रसयोर्विवृतिर्मदीये 'शारीरविनिश्चये' द्रष्टव्या। लसीका त्वत्र पित्तेन स्विन्नमांसात् स्रवदुदकं ज्ञेयम्, न तु रसमलरूपा तत्र श्लेष्मण एव प्राधान्यं वर्तते। यदुक्तं डल्हणे—"पित्तेन स्विन्नमांसात् स्रवदुदकं लसीकेत्युच्यते" इति (सू० ११ अ०)। आमाशयोऽत्र नाभिस्तनान्तरस्थितस्यामाशयस्य अधोभाग एव ज्ञेय:, यत्र परिपचनकाले आहारादि-

म्लीभूतात् पित्तस्योत्पत्तिर्भवति। अतएव सुश्रुतः पित्तस्य स्थानमामपक्वाशयमध्यमाह। ऊर्ध्वभागस्य कफस्थानत्वात्। श्लेष्मस्थानान्याह उर इति। अत्रोरःशब्देन फुफ्फुससहितं हृदयं गृह्यते। तत्रैवावलम्बककफस्य स्थानत्वेन तेनैव च सर्वशरीरावलम्बनात् तस्यैव प्राधान्यमस्मिन् तन्त्रे उक्तम्। सुश्रुतस्तु आहारात् श्लेष्मण उत्पत्तिस्थानत्वेन आमाशय एव कफस्य प्रधानस्थानमाह इति न विरोधः। शिरसस्तु तर्पककफरूपस्य मस्तुलुंगस्य स्थानत्वेन कफस्थानत्वम्। ग्रीवाशब्देनात्र तदन्तःकण्ठः परिगृह्यते। पर्वाण्यत्रास्थिसन्धिः तत्र श्लेषककफस्य स्थानत्वात्। आमाशयोऽत्रामाशयस्योर्ध्वभाग एव ज्ञातव्यः। तत्रैवाहारात् कफस्योत्पत्तिर्भवति। यद् वक्ष्यति (चि० १५ अ०)—

"अन्नस्य भुक्तमात्रस्य षड्रसस्य प्रपाकतः।
मधुराद्यात् कफो भावात् फेनभूत उदीर्य्यते॥
परन्तु पच्यमानस्य विदग्धस्याम्लभावतः।
आशयाच्च्यवमानस्य पित्तमच्छमुदीर्य्यते॥
पक्वाशयन्तु प्राप्तस्य शोष्यमाणस्य वह्निना।
परिपिण्डितपक्वस्य वायुः स्यात् कटुभावतः॥" इति।

मेदश्चेति चकाराद् आप्यरसस्य मांसस्य मज्ञः शुक्रस्य च परिग्रहो भवति। प्रागुक्तवृद्धवाग्भटवाक्यैकवाक्यत्वात्। शरीरे श्लेष्मभागस्य प्रभूतमानत्वात् स च उरःस्थेनावलम्बककफेनान्नरससहितेनैव पूर्य्यत इति तन्त्रेऽस्मिन् उरसः श्लेष्मणः प्रधानस्थानत्वं युक्तमेव भवति॥ ६॥

शरीरे एतेषां कर्माणि प्राह सर्वेति। सर्वशरीरचरा इति। ते च वातादयो अन्नरसरूपेणैव शरीरं पोषयन्तीति तेषां सर्वशरीरचरत्वं सिध्यति। असर्वशरीरचरत्वे सर्वांगे व्याध्युत्पादनमसम्भाव्यं भवेत्। न च ते व्याध्युत्पादनायैव तत्र तत्र गच्छन्तीति वाच्यम् तर्हि तेष्वपि चेतनत्वप्रसक्तिः स्यात्। शरीरे यानि खलु कर्माणि भवन्ति आत्मनः प्रवृत्तिनिवृत्तिजीवनयोन्याख्यात् त्रिविधात् प्रयत्नात् भवन्ति न खलु प्रयत्नादृते कापि क्रिया भवति यदुक्तं कर्मलक्षणे "प्रयत्नादिकर्म चेष्टितमुच्यते" इति। अतएवात्मप्रयत्नवशाद् वातदयस्तत्र गन्तुमर्हन्ति नान्यथा। न खलु तत्र व्याध्युत्पत्तौ सुखैषिणो दुखद्वेषिणश्चात्मनः प्रयत्नो भवितुमर्हति। एवं परिस्थितौ शरीरोपादानकत्वेनैव तत्तदवयवपोषणाय आत्मनो जीवनयोनिप्रयत्नवशात्तत्र तत्र गमनं सम्भवति नान्यथा। एवमेव सर्वशरीरपोषकत्वेनैव तेषां सर्वशरीरचरत्वं सर्वस्रोतश्चारित्वञ्च सिध्यति। अकुपिताः प्रकृतिस्थाः शुभान्युपचयादीनि कुपिताः वैषम्यमापन्ना अशुभानि विकारसंज्ञकानि कुर्वन्ति॥ १०॥

तत्र विकारचतुष्के अध्यायत्रयेण सामान्यजानां व्याधीनां विवृतिः समासेनोक्ता अत्र च पृथग्दोषाणां नानात्मजानां व्याधीनां विवरणं चिकीर्षुराह तत्रेति। सामान्यजाः ये च व्याधयः सर्वैरेव दोषैर्भवितुमर्हन्ति ते। नानात्मजाः ये खलु तद्दोषजा एव भवन्ति नान्यदोषजास्ते। तेषां

संख्यानमाह अशीतिरिति । तत्र जातमात्रजानशीतिसंख्यकान् विकारानाह तद्यथेति । नखभेद: नखानां स्फुटनम् । विपादिका पादयो: स्फुटनम् । सुप्तपादता पादयो: स्पर्शज्ञानहीनता । वातखुड्डता गुल्फसंश्रितो वातकण्टक इति व्याधि: । पादभ्रंश: कलायखञ्जता । गुल्फग्रन्थि: गुल्फसन्धेरक्रियता । पिण्डिकोद्वेष्टनं जंघामध्यमांसपिण्डिकायामुद्वेष्टनमिव वेदना । जानुविश्लेष: जानुसन्धे: शिथिलता अकर्मण्यता इति यावत् । पांगुल्यमुभयो: सक्थ्नोरक्रियता । खञ्जत्वन्तु एकपादस्य । गुदार्त्ति: परिकर्तिका । वृषणोत्क्षेप: वृषणफलकोषस्योर्ध्वगमनम् । ऊरुस्तम्भस्तु सामान्येन ऊर्वो: स्तब्धता न तूरुस्तम्भाख्यो व्याधि: तस्य केवलवाताजन्यत्वात् । विड्भेदस्त्वत्र नातिसार: परन्तु वातजन्यमलातिनिर्गम एव । उरादवेष्ट: उदरे आवेष्टनवत् पीडा । हृन्मोह इति इन्द्रियाणां यथावद् विषयाग्रहणम् । हृद्द्रवश्च हृत्पिण्डस्य द्रुतसञ्चालनं धक्धकायनमित्यर्थ: । वक्ष उद्धर्ष इत्यत्र वक्ष:शब्दो बाह्यांगोर:शब्दवाची तेन वक्षसि उर:प्रदेशे उद्धर्षणवद्वेदना । वक्षस: उपरोध: निम्नत्वं मध्योन्नता वा । ग्रीवामन्ययोरेकपर्यायत्वेऽपि पुर:पश्चाद्भेदेन तद्गत: स्तम्भो द्वेधा विभक्त इति न दोष: । कण्ठोद्ध्वंसोऽत्र गोजिह्वाख्यस्य स्वरयन्त्रस्य वेदनाविशेष: इति ज्ञेय: । उत्कासिका इति कार्तिक: । मूकत्वं सर्वथा वचनाभाव: । वाक्संगश्च गद्गदत्वम् । अशब्दश्रवणं कर्णनादकर्णक्वेडौ । उच्चै:श्रुति: अनुच्चशब्दाश्रवणम् । बाधिर्य्यञ्च सर्वथा शब्दाश्रवणम् । वर्त्मशब्दोऽत्रादिपल्लववाची । यद्यपि तिमिरं सर्वैर्दोषैर्जायते तथाप्यत्र विषयाग्रहणजन्यदर्शनाभावस्य केवलवातजन्यत्वेन परिगृह्यते । अक्षिव्युदास: नयनबुद्बुदस्य बहिर्निस्सृति: । भ्रूव्युदासश्च भ्रुवोरुत्क्षेपणमनीहयैव । यद्यपि शिरोरुग् दोषभेदै: पृथग् भवति तथापि "वाताहते नास्ति रुजा" इत्यनुशासनबलादत्र वातिक एव ग्रहणम् । अर्दितादिका: वातव्याधिचिकित्सिते द्रष्टव्या: । तमोऽन्धकारप्रवेश इव । भ्रम: कुलालचक्रारूढस्येव । वेपथु: कम्प: । ग्लानि: शरीरशुष्कता । अनवस्थितत्वं चाञ्चल्यम् । आविष्कृततमास्तदात्वे इति शेष: ॥ ११-१२ ॥

एतेषु विकारेषु वायोरेव स्वलक्षणमुपलभ्यत इति ते वातविकारा एव भवन्तीत्याह सर्वेष्वपीति । आत्मरूपं स्वरूपम् । अपरिणामि स्वभावसिद्धम् । इदञ्च कर्मण: स्वलक्षणं वायो: कार्य्यस्यात्मलक्षणम् । यदिति वायो: स्वलक्षणं तत्कर्मणश्च स्वलक्षणमेतद्द्वयम् । उपलभ्यत तस्मिंस्तस्मिन् विकारे दृष्ट्वा आंशिकोपलम्भेऽपि तज्जत्वं निश्चीयत इत्याह तद्यथेति । एवंलक्षणको वायु: शरीरमाश्रित्य एतल्लक्षणं दर्शयतीत्याशय: । वैशद्यमपैच्छिल्यम् । गतिश्चलत्वम् । अनवस्थितत्वं चाञ्चल्यम् । शरीरमाविशतस्तस्य कर्मण: सलक्षणान्याह एवंविधेति । स्रंस: शैथिल्यम् । भ्रंश: स्वस्थानाच्च्युति: । व्यास: विभाग: । संग: संयोग: । भेद: भेदनवत्पीडा । साद: अवसन्नता । हर्ष: भिन्नभिनायनम् । तर्ष: शुष्कता । वर्त: वर्तुली-

करणम् । चालः स्पन्दनम् । तोदः सूचीविधवत्पीडा । सुषिरत्वं सच्छिद्रत्वम् । वायोरसंघातस्यामूर्तत्वेऽपि संघातावस्थायां तस्य असवर्णौ गृह्येयातामिति तस्यारुणवर्णता कषायरसता च नानुपपन्ना । सुप्तिः स्पर्शाज्ञता । संकोचः ऋज्वंगस्य वक्रीकरणम् । स्तम्भः चलांगस्याचलता ॥ १३—१४ ॥

तस्य चिकित्साक्रममाह तमिति । तं वातव्याधितम् । उपक्रमैः चिकित्साक्रमैः । आस्थापनं कषायवस्तिः । अनुवासनन्तु स्नेहवस्तिः । वस्तेरुपक्रमेषु श्रेष्ठत्वे हेतुमाह तदादित इति । अयमर्थः—आहारात् पक्वाशय एव वायोर्विवेको भवति तत्र च सञ्चीयते ततस्तु तस्यासान्नात्ययवृद्धी पुरस्कृत्यैव वायुर्विकृतो भवति । अतस्तत्रैव सञ्चयस्थाने वातप्रत्यनीकं भेषजं वस्तिद्वारेण प्रविश्य तमुपशामयति । अतः सञ्चयस्थान एव वायावजिते सर्वांगगतोऽपि सः प्रशान्तिमापद्यते । अतो मूलस्थानगतत्वेन वस्तेः सर्वोपक्रमेभ्यः प्राधान्यं वर्तते ॥ १५ ॥

पित्तविकारानाह तद्यथेति । ओषः स्वेदारतिमान् दाहः । ओषः प्रादेशिकः स्वेदरहितोऽन्यर्चिषेव दाहः । दाहः सर्वांगीनस्तीव्रसन्तापः । दवथुः चक्षुरादिष्विन्द्रियेषु दाहः । धूमकः शिरोग्रीवाकण्ठतालुषु धूमायनम् । अम्लकः सान्तर्दाहहृदयशूलोद्गारः । विदाहः पाणिपादांसमूलेषु विविधः सन्तापः । अन्तर्दाहः कोष्ठे दाहः । उष्माधिक्यं शरीरस्य स्वाभाविकोष्णताया आधिक्यम् । अंगावदरणं शरीरावयवस्य विदीर्णता । शोणितक्लेदः शोणितस्य कृष्णतादौर्गन्ध्यतनुत्वानि । मांसक्लेदः मांसस्य कृष्णता दौर्गन्ध्यञ्च त्वगवदारणमत्र बाह्यत्वङ्मात्रस्य विदारणम् । चर्मदलनन्तु षण्णां त्वचां विदारणम् । रक्तपित्तमत्र दोषान्तरासंसृष्टं ज्ञेयम् । हरितहारिद्रत्वं त्वङ्नखनयनाननादीनां बोध्यम् । लोहितगन्धास्यता मुखे रक्तगन्धता । अतृप्तिः पुनः पुनर्भोजनेनापि तृप्तिराहित्यम् । जीवादानं जीवरक्तस्य स्रोतोभ्यश्च्युतिः ॥१६॥

सर्वेष्विति । अपरिणामि नित्यं सदैव वर्तत इत्यर्थः । पित्तस्य स्वलक्षणमाह औष्ण्यमित्यादि । वर्णः शुक्लारुणवर्ज्य इति नीलपीतलोहितहरितादीनां परिग्रहः स्यात् । गन्धश्च विस्रः आमगन्धः । तस्य कर्मस्वलक्षणान्याह तद्यथेति । अत्र कोथानन्तरं कण्डूति पाठः लेखकप्रमादजन्यः नाप्ययं चक्रपाणिना धृतः । कण्डोश्च कफस्यासाधारणलक्षणत्वात् । तेषां पित्तविकाराणां समासत उपक्रमानाह तमिति । तं पित्तविकाराक्रान्तम् । अत्रामाशयमिति आमाशयस्यान्तिमं भागमित्यर्थः । तत्रोत्पन्नेन पित्तेनैवेतरपित्तस्थानपोषणात् सञ्चयस्थाने रिक्ते इतरस्थानगतमपि पित्तं प्रशान्तिमापद्यते । दृष्टान्तेनैतद् विशदीकरोति यथाग्नाविति । व्यपोढे व्यपगते । अग्निगृहमग्निनोक्तम् गृहमित्यर्थः ॥ १७—१६ ॥

नानात्मजान् श्लेष्मविकारानाह श्लेष्मेति । तृप्तिः कोष्ठगौरवादाहारास्पृहा अथवा अनन्नाभिनन्दता तृप्तिरिवारोचकः । तन्द्रा निद्रार्तस्येव विषयाग्रहणम् । स्तैमित्यमार्द्रपटावगुण्ठितत्वमिव । आलस्यं शक्तस्यापि

संख्यानमाह अशीतिरिति । तत्र मातमात्रजानशीतिसंख्यकान् विकारानाह तद्यथेति । नखभेद: नखानां स्फुटनम् । विपादिका पादयो: स्फुटनम् । सुप्तपादता पादयो: स्पर्शज्ञानहीनता । वातखुड्डुता गुल्फसंश्रितो वातकण्टक इति व्याधि: । पादभ्रंश: कलायखञ्जता । गुल्फग्रन्थि: गुल्फसन्धेरक्रियता । पिण्डिकोद्वेष्टनं जंघामध्यमांसपिण्डिकायामुद्वेष्टनमिव वेदना । जानुविश्लेष: जानुसन्धे: शिथिलता अकर्मण्यता इति यावत् । पांगुल्यमुभयो: सक्थ्नोरक्रियता । खञ्जत्वन्तु एकपादस्य । गुदार्त्ति: परिकर्तिका । वृषणोत्क्षेप: वृषणफलकोषस्योर्ध्वगमनम् । ऊरुस्तम्भस्तु सामान्येन ऊर्वो: स्तब्धता न तूरुस्तम्भाख्यो व्याधि: तस्य केवलवाताजन्यत्वात् । विड्भेदस्त्वत्र नातिसार: परन्तु वातजन्यमलातिनिर्गम एव । उरादवेष्ट: उदरे आवेष्टनवत् पीडा । हृन्मोह इति इन्द्रियाणां यथावद् विषयाग्रहणम् । हृद्द्रवश्च हृत्पिण्डस्य द्रुतसञ्चालनं धक्धकायनमित्यर्थ: । वक्ष उद्धर्ष इत्यत्र वक्ष:शब्दो बाह्यांगोर:शब्दवाची तेन वक्षसि उर:प्रदेशे उद्धर्षणवद्वेदना । वक्षस: उपरोध: निम्नत्वं मध्योन्नता वा । ग्रीवामन्ययोरेकपर्यायत्वेऽपि पुर:पश्चाद्भेदेन तद्गत: स्तम्भो द्वेधा विभक्त इति न दोष: । कण्ठोद्ध्वंसोऽत्र गोजिह्वाख्यस्य स्वरयन्त्रस्य वेदनाविशेष: इति ज्ञेय: । उत्कासिका इति कार्तिक: । मूकत्वं सर्वथा वचनाभाव: । वाक्संगश्च गद्गदत्वम् । अशब्दश्रवणं कर्णनादकर्णक्वेडौ । उच्चै:श्रुति: अनुच्चशब्दाश्रवणम् । बाधिर्य्यञ्च सर्वथा शब्दाश्रवणम् । वर्त्मशब्दोऽत्राक्षिपल्लववाची । यद्यपि तिमिरं सर्वैर्दोषैर्जायते तथाप्यत्र विषयाग्रहणजन्यदर्शनाभावस्य केवलवातजन्यत्वेन परिगृह्यते । अक्षिव्युदास: नयनबुद्बुदस्य बहिर्निसृति: । भ्रूव्युदासश्च भ्रुवोरुत्क्षेपणमनीहयैव । यद्यपि शिरोरुग् दोषभेदै: पृथग् भवति तथापि "वातादृते नास्ति रुजा" इत्यनुशासनबलादत्र वातिक एव ग्रहणम् । अर्दितादिका: वातव्याधिचिकित्सिते द्रष्टव्या: । तमोऽन्धकारप्रवेश इव । भ्रम: कुलालचक्रारूढस्येव । वेपथु: कम्प: । ग्लानि: शरीरशुष्कता । अनवस्थितत्वं चाञ्चल्यम् । आविष्कृततमास्तदात्वे इति शेष: ॥ ११-१२ ॥

एतेषु विकारेषु वायोरेव स्वलक्षणमुपलभ्यत इति ते वातविकारा एव भवन्तीत्याह सर्वेष्वपीति । आत्मरूपं स्वरूपम् । अपरिणामि स्वभावसिद्धम् । इदञ्च कर्मण: स्वलक्षणं वायो: कार्य्यस्यात्मलक्षणम् । यदिति वायो: स्वलक्षणं तत्कर्मणश्च स्वलक्षणमेतद्द्वयम् । उपलभ्यत तस्मिंस्तस्मिन् विकारे दृष्ट्वा आंशिकोपलम्भेऽपि तज्जत्वं निश्चीयत इत्याह तद्यथेति । एवंलक्षणको वायु: शरीरमाश्रित्य एतल्लक्षणं दर्शयतीत्याशय: । वैशद्यमपैच्छिल्यम् । गतिश्चलत्वम् । अनवस्थितत्वं चाञ्चल्यम् । शरीरमाविशतस्तस्य कर्मण: सलक्षणान्याह एवंविधेति । स्रंस: शैथिल्यम् । भ्रंश: स्वस्थानाच्च्युति: । व्यास: विभाग: । संग: संयोग: । भेद: भेदनवत्पीडा । साद: अवसन्नता । हर्ष: भिनभिनायनम् । तर्ष: शुष्कता । वर्त: वर्तुली-

करणम्। चालः स्पन्दनम्। तोदः सूचीव्यधवत्पीडा। सुषिरत्वं सच्छिद्रत्वम्। वायोरसंघातस्यामूर्तत्वेऽपि संघातावस्थायां तस्य असवर्णौ गृह्येयातामिति तस्यारुणवर्णता कषायरसता च नानुपपन्ना। सुप्तिः स्पर्शाज्ञता। संकोचः ऋज्वंगस्य वक्रीकरणम्। स्तम्भः चलांगस्याचलता ॥ १३—१४ ॥

तस्य चिकित्साक्रममाह तमिति। तं वातव्याधितम्। उपक्रमैः चिकित्साक्रमैः। आस्थापनं कषायवस्तिः। अनुवासनन्तु स्नेहवस्तिः। वस्तेरुपक्रमेषु श्रेष्ठत्वे हेतुमाह तदादित इति। अयमर्थः—आहारात् पक्वाशय एव वायोर्विवेको भवति तत्र च सञ्चीयते ततस्तु तस्यासाम्ना क्षयवृद्धी पुरस्कृत्यैव वायुर्विकृतो भवति। अतस्तत्रैव सञ्चयस्थाने वातप्रत्यनीकं भेषजं वस्तिद्वारेण प्रविश्य तमुपशामयति। अतः सञ्चयस्थान एव वायाव-जिते सर्वांगगतोऽपि सः प्रशान्तिमापद्यते। अतो मूलस्थानगतत्वेन वस्तेः सर्वोपक्रमेभ्यः प्राधान्यं वर्तते ॥ १५ ॥

पित्तविकारानाह तद्यथेति। ओषः स्वेदारतिमान् दाहः। ओषः प्रादेशिकः स्वेदरहितोऽन्यर्चिषेव दाहः। दाहः सर्वांगीनस्तीव्रसन्तापः। दवथुः चक्षुरादिष्विन्द्रियेषु दाहः। धूमकः शिरोग्रीवाकण्ठतालुषु धूमायनम्। अम्लकः सान्तर्दाहहृदयशूलोद्गारः। विदाहः पाणिपादांसमूलेषु विविधः सन्तापः। अन्तर्दाहः कोष्ठे दाहः। उष्माधिक्यं शरीरस्य स्वाभाविकोष्णताया आधिक्यम्। अंगावदरणं शरीरावयवस्य विदीर्णता। शोणितक्लेदः शोणितस्य कृष्णतादौर्गन्ध्यतनुत्वानि। मांसक्लेदः मांसस्य कृष्णता दौर्गन्ध्यञ्च त्वगवदारणमत्र बाह्यत्वङ्मात्रस्य विदारणम्। चर्मदलनन्तु षण्णां त्वचां विदारणम्। रक्तपित्तमत्र दोषान्तरासंसृष्टं ज्ञेयम्। हरितहारिद्रत्वं त्वङ्नख-नयनाननादीनां बोध्यम्। लोहितगन्धास्यता मुखे रक्तगन्धता। अतृप्तिः पुनः पुनर्भोजनेनापि तृप्तिराहित्यम्। जीवादानं जीवरक्तस्य स्रोतोभ्यश्च्युतिः ॥१६॥

सर्वेष्विति। अपरिणामि नित्यं सदैव वर्तत इत्यर्थः। पित्तस्य स्वलक्षणमाह औष्ण्यमित्यादि। वर्णः शुक्लारुणवर्ज्य इति नीलपीतलोहित-हरितादीनां परिग्रहः स्यात्। गन्धश्च विस्रः आमगन्धः। तस्य कर्मस्व-लक्षणान्याह तद्यथेति। अत्र कोथानन्तरं कण्डूरिति पाठः लेखकप्रमाद-जन्यः नाप्ययं चक्रपाणिना धृतः। कण्डोश्च कफस्यासाधारणलक्षणत्वात्। तेषां पित्तविकाराणां समासत उपक्रमानाह तमिति। तं पित्तविकाराक्रान्तम्। अत्रामाशयमिति आमाशयस्यान्तिमं भागमित्यर्थः। तत्रोत्पन्नेन पित्तेनैवे-तरपित्तस्थानपोषणात् सञ्चयस्थाने रिक्ते इतरस्थानगतमपि पित्तं प्रशान्ति-मापद्यते। दृष्टान्तेनैतद् विशदीकरोति यथाग्नाविति। व्यपोढे व्यपगते। अग्निगृहमग्निनोक्तम् गृहमित्यर्थः ॥ १७—१६ ॥

नानात्मजान् श्लेष्मविकारानाह श्लेष्मेति। तृप्तिः कोष्ठगौरवदाहा-रास्पृहा अथवा अनन्नाभिनन्दना तृप्तिरिवारोचकः। तन्द्रा निद्रार्तस्येव विषयाग्रहणम्। स्तैमित्यमार्द्रपटावगुण्ठितत्वमिव। आलस्यं शक्तस्यापि

कर्मण्यनुत्साह: । मुखस्राव: प्रसेकाधिक्यम् । मलस्याधिक्यमित्यत्र सामान्येन मलशब्दे उक्तेऽपि विशेषपरिग्रहात् रसमल: कफ एव ग्राह्य: । बलासक: नयनशुक्लमण्डलगतो व्याधिविशेष: । यदुक्तं सुश्रुते–"कांस्याभो भवति शिरावृत: सिते यो बिन्दुर्वा स तु निरुजो बलासकाख्य:" इति (उ०४अ०) हृदयोपलेप: उरस: कफपूर्णता । धमनीप्रतिचय: धमनीनां रसवाहिनीनां प्रतिचय: अतिपूरणम् । शीताग्निता अग्नेरतिमन्दता । उदर्द: "शीतपानीयसंस्पर्शात् शीतकाले विशेषत: । सरागकण्डु: शोफ: स्यादुदर्द: स कफोद्भव:" इति लक्षण: । श्वेतावभासता मूत्रपुरीषनखनयनादीनाम् ॥ २० ॥

कफस्यात्मरूपमाह तद्यथेति । मात्स्न्यं मसृणता । तस्य कर्मण: स्वलक्षणमाह एवमिति । सुप्तिरिहाक्रियत्वम् । तस्य समासत उपक्रमानाह तमिति अत्र आमाशय इति आमाशयस्योर्ध्वभागस्तत्रैवाहारात् श्लेष्मोत्पत्ति: स्यात् । यद् वक्ष्यति "अन्नस्य भुक्तमात्रस्य षड्रसस्य प्रपाकत: । मधुराद्यात् कफो भावात् फेनभूत उदीर्य्यते" इति । नन्वत्र फेनभूत इति विशेषणेन नायं कफो धातु: परन्तु तदुपादान एवात्रोत्पद्यते इति चेत् कथ्यते फेनभूत इति अन्येनासंसृष्टस्यैव कफस्य स्वरूपकथनमेव । यदुक्तं वृद्धवाग्भटे निरामकफविवृतौ यथा–"श्लेष्माच्छ: पिण्डितोऽथवा । विशदश्च सफेनश्च धवलो मधुरो रसे" इति (सू० २२ अ०) । अत: सञ्चयस्थानगतस्य कफस्य वमनेन निर्हरणात् शरीरगतस्य कफविकारस्य प्रशान्ति: सम्भवत्येव ॥ २१—२३ ॥

रोगचतुष्कमुपसंजिहीर्षू रोगज्ञानस्य चिकित्साया: प्राग्भावित्वमाह भवन्ति चात्रेति । परीक्षाविधिस्तु विमाने निरवशेषतो निवेदयिष्यते ॥२४–२६॥

अध्यायार्थं निवेद्याध्यायं समापयति तत्र श्लोका इति ॥ २७–२९ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने महारोगाध्यायो नाम विंशोऽध्याय: ॥ २० ॥

इति रोगचतुष्कटिप्पणी समाप्ता ।

एकविंशोऽध्याय: ।

रोगचतुष्के रोगा व्याख्याता:, भेषजचतुष्के च भेषजानि, तयोर्योजनयैव चिकित्सा भवति इति योजनाचतुष्कमुपदिदिक्षुरादावधिकरणत्वेन शरीरे व्याख्यातव्ये शरीरभेदमधिकृत्याध्यायान्तरमारभते अथात इत्यादिना । तत्र चाष्टौ खलु पुरुषाश्चिकित्स्यत्वेन निन्दिता भवन्ति बहुदोषकरत्वादिति तान् व्याचिख्यासुरष्टौनिन्दितीयमारभते । अष्टौ निन्दितानधिकृत्य प्रवृत्तोऽध्याय: अष्टौनिन्दितीय: ॥ १ ॥

तान् निन्दितान् पुरुषानुद्दिशति इहेति । निन्दितानामष्टानां मध्ये

पूर्वाणां षण्णां लोकविगानमात्रं फलम्। अन्तिमयोस्तु चिकित्सायां बहुप्रयोजनकरत्वात्तौ व्यासतो व्याचष्टे तत्रेति। अपरे चिकित्साविषयमधिकृत्येति शेषः। तत्र निन्दाहेतून् दोषान् उद्दिशति अतिस्थूलस्येति। जरोपरोधः जरया अकालजरया उपरोधः आक्रमणम्। तत्रातिस्थौल्यस्य कारणान्याह तदिति। अतिसम्पूरणाद् बृंहणद्रव्याणामत्युपयोगात्। तस्यैव विवृतिर्गुर्वाद्युपयोगः। अव्यवायाद् अशुक्रक्षयात्। हर्षनित्यत्वं सदैव सुखित्वम्। बीजस्वभावात् पित्रोर्मेदस्वित्वेन तद्बीजोत्पन्नसन्तानस्यापि स्थौल्यमायाति इत्यर्थः, तस्य चाष्टौ दोषान् हेतुतो निर्वक्ति तस्येति। इतरे मेदःपरभाविनोऽस्थ्यादयस्त्रयः। सर्वधातुपोषणाभावादेवाल्पायुष्ट्वमित्याह तस्मादिति। मेदसः शैथिल्यादिधर्मात् शरीरे अकालमेव बलिपलितागमनं भवति, तेन च जरयाक्रमणं भवतीत्याह शैथिल्यादिति। मेदसावृतमार्गत्वान् मेदःसञ्चयेन हि शुक्रस्रोतसां मार्गोऽवरुध्यते तस्मात्। धातूनामत्र बलधातूनां रसादीनाम्। मेदसः स्वभावत एव मेदः आमगन्धि भवति तस्मात्। स्वेदाधिक्ये हेतून् दर्शयति मेदस इति। श्लेष्मसंसर्गात् सर्वेषां बलधातूनां त्रिधातुमत्वेऽपि मेदसि श्लेष्मण आधिक्यं वर्तते तस्मात्। यदुक्तं वृद्धवाग्भटे—"त्वत्रास्थनि स्थितो वायुः असृक्स्वेदयोः पित्तम्, शेषेषु च श्लेष्मा" इति (सू० १६ अ०)। श्लेष्मा तु जलभूतप्रधान इति मेदो विष्यन्दि भवति। व्यायामासहत्वात् स्वल्पेनापि व्यायामेन तस्य स्वेदप्रादुर्भावो भवतीति प्रत्यक्षसिद्धम्। तीक्ष्णाग्नित्वादित्यनुपदमेवास्य तीक्ष्णाग्नित्वं प्रतिपादयिष्यति ॥ २–४ ॥

तानेवार्थान् व्यक्तिव्यवसायार्थं श्लोकैराह भवन्ति चात्रेति। सन्धुक्षयति उद्दीपयति। वायुरत्र समानः। कालव्यतिक्रमात् भोजनकालातिक्रमात्। मेदस्विनोऽल्पायुष्ट्वं प्रतिपादयति मेदसीति। विकारान् प्रमेहादीन्। अतिस्थूललक्षणमाह मेदोमांसेति। अथोपचयोत्साह इति न यथायथवत् उपचयः शरीरवृद्धिः उत्साहोऽध्यवसायश्च यस्य सः। शरीरमस्य यथा वर्धते न तथा उत्साहवृद्धिर्भवति, परन्तु यथा यथा शरीरं वर्धते तथा तथा उत्साहह्रासो भवतीत्यनयोरयथात्वं ज्ञेयम्। चलेति चलाः गमनकाले स्पन्दनशीलाः स्फिजादयो यस्य सः। अतिस्थौल्यविवृतिमुपसंहरति इतीति। अत्र निर्दिष्टमिति वाक्यच्छेदः ॥ ५–१० ॥

अतिकार्श्यं विवृणोति वक्ष्यत इति। प्रमिताशनं हीनमात्रभोजनम्। क्रियातियोगो व्यायामाधिक्यम्। वेगविधारणेन निद्रावेगविघातेऽप्यायाते तस्य विशेषहेतुत्वेन पृथगुक्तिः। रूक्षस्योद्वर्तनस्य स्नानस्य चाभ्यासः सततशीलनमिति रूक्षस्योद्वर्तनस्नानस्याभ्यासः। अत्र रूक्षस्योद्वर्तनं स्नानस्येति प्रामादिकः पाठः। प्रकृतिस्तु कस्यचिदाजन्मनः कार्श्यं दृश्यते तच्चास्य प्रकृतितो भवति। विकारानुशयः दीर्घरात्रानुबन्धी विकारः। स चातिकृशः कानि न सहते इत्याह व्यायाममिति। अतिसौहित्यम् आतृप्तितो भोजनम्।

आमयौषधमिति व्याधिवेगं भेषजवेगञ्च । के च व्याधयस्तमाक्रमन्तीत्याह लीहेति । अतिकृशलक्षणमाह शुष्केति । शुष्का: मांसरहिता: स्फिजादयो यस्य स: । धमन्यत्र शिरार्थवाची । मांसराहित्यात् सर्वत्र शिरा: परिस्फुटा भवन्ति । स्थूलपर्व अस्थि अस्य स्थूलं दृश्यत इत्यर्थ: ॥ ११-१५ ॥

अतिस्थूलकृशयोर्निन्दितत्वे हेतुमाह सततेति । कर्षणैर्बृंहणैरिति यथासंख्यं ज्ञेयम् । तत्रातिकृशस्य मनागनिन्दितत्वमाह स्थौल्येति । समोपकरणौ समोपचर्यौ लंघनबृंहणाभ्यामिति शेष: ॥ १६-१७ ॥

प्रसंगवशादनिन्दितपुरुषलक्षणमाह सममांसेति । संहननमाकृति: । समपक्वा समजाठराग्नि: । समजर: यथाकालमस्य जराऽऽगच्छतीत्यर्थ: । तयोर्लंघनबृंहणयोर्भेषजसूत्रमाह गुर्विति । अतर्पणं कर्शनम् । गुरु द्रव्यगुरु । सन्तर्पणं बृंहणम् । अयमर्थ:—सदैव गुरुद्रव्याभ्यवहारात्पक्वा दुर्बल: सन् अपुष्टिकरं द्रव्यं न सम्यक् पचति इति क्रमश: स्थूलस्य कृशत्वं स्यात् एवं कृशस्यापि लघ्वशनेन पुष्टिकरशीलनेन च क्रमश: पुष्टिर्भवेत् । तस्यैव विवृतिं विवक्षुरतिस्थूलस्याहारविहारौ प्राह वातघ्नानीति । माक्षिकस्य मधुन: प्रयोग: सर्वाण्येव मधुमधुराण्यश्नीत । काललोहरज: शोधिततीक्ष्णलौहचूर्णस्य मण्डुरस्य वा मधुना प्रयोग: । अग्निमन्थो गणिकारिका । प्रशातिका 'उडीधान' इति बंगीया: । प्रियंगु: कंगु: । श्यामाकयवकौ तृणधान्यविशेषौ । जूर्णाह्वा 'भुट्टा' इति भाषा । मुकुष्टक: 'मोठ' इति भाषा । चक्रमुद्गका इति पाठान्तरम्, चक्रमुद्गो रक्तमुद्ग: । मधूदकमनुपानार्थं मधुमिश्रमुदकम् । स्थौल्यहरान् विहारानाह प्रजागरमिति । प्रजागर: रात्रिजागरणम् ॥ २०-२८ ॥

कार्श्यहरानाहारविहारानाह स्वप्न इति । स्वप्नो निद्रा । मनसो निर्वृत्ति: सुखम् । शम: शान्ति: । उपचयं पुष्टिम् । स्वप्नप्रसंग: दिवा वा रात्रौ वा नित्यं निद्रासेवा ॥ २९-३४ ॥

स्वप्नप्रसंगान् निद्राया हेतुं हिताहितत्वं भेदांश्च विवक्षुरादौ हेतुमाह यदा त्विति । मनसि क्रियाबाहुल्यात् क्लान्ते सति यदा कर्मात्मान: इतराणि दशेन्द्रियाणि क्लमान्विता: क्लान्तानि मनसा सह नित्यसम्बन्धात् विषयेभ्य: शब्दादिग्रहणरूपेभ्य: कर्मभ्यो निवर्तन्ते न तान् गृह्णन्तीत्यर्थ: तदा बाह्यविषयाग्रहणान् मानव: स्वपिति ॥ ३५ ॥

विधिना सेविताया निद्राया गुणान्, अविधिना च दोषानाह निद्रायत्तमिति । अत्र सुखं पुष्टिर्बलं वृषता ज्ञानं जीवितञ्च विधिवन्निद्राया गुणा इतरे च अविधिसेविताया दोषा: ज्ञातव्या: । न च जीवितं मरणमित्यर्थ: । अयुक्तियुक्ताया: पृथग्दोषानाह अकाले इति । अकाले निद्रोचितकालातिरिक्तकाले । ननु क: खलु निद्राया अकाल इत्याह सुश्रुत:—"विकृतिर्हि दिवास्वप्नो नाम । तत्र स्वपतामधर्म: सर्वदोषप्रकोपश्च तत्प्रकोपाच्च कासश्वास-प्रतिश्यायशिरोगौरवांगमर्दारोचकज्वराग्निदौर्बल्यानि भवन्ति" इति (शा० ४ अ०) । अतिप्रसंगादतिमात्रया सदैवेत्यर्थ: । न च निषेविता

कालेऽपीति शेषः। आगता प्रत्युपस्थिता कालरात्रिः कालः संहारः तदुपलक्षिता रात्रिः कल्पान्तरात्रिरित्यर्थः। तस्या आगमने यथा सर्वप्राणिनो नश्यन्ति तथा अविधिनिद्रासेवा इत्याशयः। सुखायुषी सुखञ्च आयुश्च पराकुर्यात् नाशयेत्॥ यथावत् सेविताया गुणानाह सेवेति। युक्ता यथाकालं यथाप्रमाणञ्च सेविता इत्यर्थः। सत्या बुद्धिः तत्त्वस्मृतिः। सिद्ध्या योगसिद्ध्या मुक्त्या इत्याशयः। तया सह॥ ३६–३८॥

निषिद्धेऽपि दिवास्वप्ने तदपवादमाह गीतेति। गीतादिभिः कर्शिताः श्रान्ताः। अत्र स्त्रीति व्यवाये तात्पर्यम्। क्षता उरःक्षतरोगिणः न तु व्रणिनः। व्रणिनस्तु दिवास्वप्नस्य सर्वथा वर्जितत्वात्। यदुक्तं सुश्रुते "न दिवा निद्रावशगः स्यात्। दिवास्वप्नात् व्रणे कण्डुर्गात्राणां गौरवं तथा। श्वयथुर्वेदना रागः स्रावश्चैव भृशं भवेत्॥" इति (सू० १६ अ०)। क्षीणा धातुक्षीणाः। यानप्रजागरैः यानयानेन रात्रिजागरणेन च क्लान्ताः। रात्रिजागरितानां तदर्धकालं दिवास्वप्नो विहितः। यदुक्तं सुश्रुते "रात्रावपि जागरितवतां जागरितकालादर्धमिष्यते दिवास्वप्नः" इति। दिवास्वप्नोचितानान्तु सहसा परित्यागे दोष एव स्यात् अत एवोक्तमत्र– "उचितादहिताद्धीमान् क्रमशो विरमेन्नरः" इति। अत उचितेऽहितेऽपि दोषः स्वल्पो भवत्येव। सार्वकालिकमिति सर्वस्मिन्नेवर्तौ। इति केषाञ्चित् सार्वकालिकं दिवास्वप्नं विधाय सर्वेषामेव ग्रीष्मे दिवानिद्राऽप्रतिषिद्धेत्याह ग्रीष्मे इति। दिवानिद्रायाः स्निग्धत्वे ग्रीष्मे चादानकालाद्रूक्षशरीराणां सर्वेषां हितत्वं दर्शयति। वर्धमाने मारुते इति तीव्ररूक्षे उपशोषके च वायौ सर्वप्राणिशरीराणि विशेषतो रूक्षाणि भवन्तीत्याशयः। रात्रिसंक्षेपश्च रात्रौ निद्राल्पताहेतोः दिवानिद्रा कर्तव्या॥ ३६—४३॥

ग्रीष्मवर्ज्येषु कालेषु दिवानिद्रायाः कुफलमाह ग्रीष्मेति। सर्वकालेष्वेव केषाञ्चिद् दिवानिद्रा प्रतिषिद्धा तानाह मेदस्विन इति। कदाचन इत्युक्त्या ग्रीष्मेऽप्येषां दिवानिद्रा निषिद्धा ज्ञेया। अहिताया दिवानिद्रायाः फलमाह हलीमक इति। सुखं सुप्यादिति यथासुखं भवति तथा सुप्यात्॥ ४४—४६॥

दिवानिद्राया रात्रिजागरणस्य च गुणानाह रात्राविति। अत्र शरीरस्य तत्कर्तृत्वात्तथागुणमाह न तु निद्राया अद्रव्यभूताया गुणाः सम्भवन्ति। आसीनप्रचलायितम् आसीन एव यत् स्वपनं तस्य गुणमाह अरूक्षमिति। देहयापने यथा आहारस्य प्रयोजनं तथा स्वप्नस्यापि। यथा आहारस्याभावेन कृशता तथा निद्राभावेऽपि कृशता स्यादित्याह देहवृत्ताविति॥ ५०—५१॥

निद्राप्रसंगादनिद्राख्यव्याधेः प्रतीकारमाह अभ्यंगेति। अभ्यंगो वातहरसुगन्धितैलादिना। विशेषतः पादाभ्यंगः यदुक्तं सुश्रुते "निद्राकरो देहसुखश्चक्षुष्यः श्रमसुप्तिनुत्। पादत्वङ्मृदुकारी च पादाभ्यंगः सदा हितः।" इति (चि० २४ अ०)। उत्सादनं चन्दनादिना शीतद्रव्येण। गन्धशब्दाः

मनसो अनुगुणा: प्रिया इत्यर्थ: । संवाहनं यथासुखं हस्तपादादिमर्दनम् । चक्षुषस्तर्पणं तर्पणोक्तविधिना घृतमण्डादिना पूरणम् । यथोचित: काल: येन यदा निद्रा अभ्यस्ता तदैव । एवमभ्यस्ते काले निद्रा दोषावहा न भवती- त्याह सुश्रुतो यथा–"निद्रासात्मीकृता यैस्तु रात्रौ वा यदि वा दिवा । न तेषां स्वपतां दोष: जाग्रतां वा विधीयते ॥" इति (शा० ४ अ०) । निमित्तत: चिन्तादिहेतुत: । अनुपदमेव निद्रानाशस्य निदानानि वक्ष्यन्ते ॥ ५२—५४॥

प्रसंगाद् निद्रानाशस्य ये हेतव: त एवातिनिद्राप्रसंगस्य प्रतीकारा भवन्तीत्याह कार्यस्येति । कथा संकथा मिथौ विश्रम्भालाप: । धूम: धूम- पानम् । सत्त्वौदार्यं सत्त्वगुणाधिक्यम् सात्त्विकाहारादिना लभ्यम् । तमो- जय: तमोगुणस्य ह्रास: तामसिकाहारादिवर्जनेन कर्तव्य: । अहितं निद्रा- प्रसंगं सदैव निद्राप्रवृत्तिम् । एत एव पूर्वोक्ता अहितनिद्राप्रसंगप्रतीकारा एव । अपरेऽपि केचिन्निद्रानाशस्य हेतवो वर्तन्ते तानाह कार्यमिति । कार्यासक्तो हि न निद्राति । काल: अत्युष्णादिना सामयिक: काल:, शरीरावस्था च वार्धक्यम् । विकार: प्रायो वातपित्तजा व्याधय: । प्रकृति: केऽपि स्वभावा- देव स्वल्पनिद्रा: भवन्ति । वायुरत्र विकारग्रहणेन गृहीतोऽपि विशेषतोऽ- निद्राहेतुरिति पुनरुक्त: ॥ ५५—५७ ॥

निद्राभेदानाह–तमोभव इति । तमोभवा तमोगुणाधिक्याद् भवति । श्लेष्मसमुद्भवा अतिश्लेष्माधिक्येन भवति । मन:शरीरश्रमसम्भवा मन:- शरीरयो: श्रमेण विषयाग्रहणं तेन च निद्राप्रवृत्ति: । ननु मन:शरीरश्रमेण कथं निद्रा भवितुमर्हति तेन च वायुरेव वर्धते. स च निद्रानाशेऽन्यतमं कारणं भवति इति चेत् कथ्यते । निद्रायास्तमोहेतुत्वेन श्लेष्महेतुत्वेन च तद्विरोधिनो रजोबहुलस्य वातस्य निद्रानाशे कारणत्वं युज्यत एव । परन्तु यदा हि श्रमाधिक्यात् शरीरस्य श्लेष्मसंक्षयाद् रिक्तानि स्रोतांसि भवन्ति तदैव चेत्तान्यन्नरसेन पूर्यन्ते तर्हि न कदापि शरीरे श्रमजन्यवातस्य प्राधान्यं भवितुमर्हति । अत एव श्रमिकाणामाहारो अव्यायामशीलानां धनिकानामा- हारादधिकतर एव भवेत् । आहाराभावेऽपि येन श्रम: कर्तव्यो भवेत् तस्य तु रिक्तानि स्रोतांसि पूरयित्वा वायो: प्राधान्यं भवितुमर्हति न त्वन्यथा । अतोऽत्र युक्ते आहारे श्रमसम्भवा निद्रा भवत्येव । आगन्तुकी अरिष्टस्व- रूपा । व्याध्यनुवर्तिनी सन्निपातादिविकारलक्षणा । रात्रिस्वभावप्रभवा रात्रिस्वभावप्रभावादेव प्रभवतीत्यर्थ: । षड्विधा अप्येता: सुश्रुतोक्ताया- स्त्रिविधाया निद्राया अन्तर्भवन्तीति न विरोध: । तमेवार्थं पुनर्निरूपयति रात्रिस्वभावेति । अत्र रात्रिस्वभावप्रभवा श्रमसम्भवा च स्वाभाविक्यां तमोभवा तामस्यां शिष्टा: पुनर्वैकारिक्यामन्तर्भवन्ति । भूतधात्री भूतानि प्राणिनो दधाति पुष्णातीति । अघस्य पापस्य ॥ ५८–५९ ॥

अध्यायार्थं निवेद्य तं समापयति तत्र श्लोका इति । अतिरोहितार्थ- मन्यत् ॥ ६०—६२ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां
चरकटिप्पण्यां सूत्रस्थाने अष्टौनिन्दितीयो
नामैकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः ।

पूर्वाध्यायेऽतिस्थूलं लङ्घनेनातिकृशञ्च वृंहणेनोपपादयेदित्युक्तम् । तत्र किन्नाम लङ्घनादिकमिति तान् व्याचिख्यासुरध्यायान्तरमारभते अथात इत्यादिना । तांश्च विषयानुद्दिशति तप·स्वाध्यायेति । परिचोदयन् साम्मुख्यमापादयन् । काले युक्ते समये । लंघनादिविषयकान् शिष्यप्रश्नानाह भगवन्निति । तद्भवदुक्तं लंघनं किं किंविधमित्यर्थः । कृताकृतातिरिक्तानां योगायोगातियोगानाम् ॥ १—८ ॥

प्रश्नानामेषां यथाक्रममुत्तरमाह यत्किञ्चिदिति । लाघवकरं शरीरस्य लघुत्वसम्पादकम् । वृंहत्वं पुष्टिम् । वैशद्यमपैच्छिल्यम् क्लेदराहित्यमित्यर्थः । विष्यन्दः क्षरणम् । स्वेदकारकं घर्मनिःसारकम् । लङ्घनादीनां लक्षणान्युक्त्वा किंगुणानि द्रव्याणि लंघनादिकर्तृणि तान्याह लघूष्णेति । सरं भेदकम् । बहलं घनम् । श्लक्ष्णं मसृणम् । स्थिरमचञ्चलम् । मन्दमतीक्ष्णम् ॥ ९—१७ ॥

लंघनादीनि द्रव्याण्युक्त्वा लंघनं कर्माह चतुष्प्रकारेति । चतुष्प्रकारा संशुद्धिः वमनं विरेचनमास्थापनं शिरोविरेचनञ्चेति । अनुवासनस्य तु वृंहणत्वमेव । पिपासा पिपासावेगनिग्रहः । उपवासो भोजनवर्जनम् । तेषु लंघनकर्मसु किं कुत्र योज्यमित्याह प्रभूतेति । प्रभूतशब्दः श्लेष्मादीनां प्रत्येकं सम्बध्यते । संसृष्टमारुता वातानुबन्धाः । विशुद्धिभिः वमनविरेचनादिभिः । पाचनस्थानान्याह येषामिति । विबन्धो मलादीनाम् । आदौ प्रथममेव पाचनं देयं परस्तात्तु अवस्थानुसारेण संशमनं कार्यम् । प्रायेणेति कदाचिद् दोषोत्क्लेशाधिक्येन वमनादिकमप्यविरुद्धं भवतीति ज्ञेयम् । पिपासानिग्रहस्थानमाह एत एवेति । व्यायामादिभिर्लंघनीयानाह रोगानिति । बलिनां बलवतां प्राणिनां मध्यबलान् रोगान् व्यायामादिभिर्जयेत् । पुनर्येषां रोगा अल्पबला ते च व्यायामादिभिः साध्यन्त एवेत्याह किं पुनरिति १८-२३

पुनश्च लंघनीयान् यांश्च दशविधेन लंघनेनोपपादयेत् तानाह त्वग्दोषिणामिति त्वग्दोषिणां कुष्ठिनाम् । प्रमीढानां प्रमेहग्रस्तानाम् । स्निग्धास्त्वत्रातिस्निग्धा मन्तव्याः । अभिष्यन्दी अभिष्यन्दरोगी । वृंही अतिवृंहणेनापादितः । तेषां वातविकारिणामपि शिशिरे काले हेमन्तशिशिरर्त्तौ विसर्गकालत्वेन तत्र लंघनं युज्यते ॥ २४ ॥

लंघनं लंघनीयांश्च व्याख्याय क्रमागत्वाद् वृंहणं वृंहणीयांश्च व्याकरोति अदिग्धेति । अदिग्धविद्धं न विषलिप्तशरहतम् । अक्लिष्टं न रोगाक्रान्तम् । सात्म्यचारिणां जांगलादिषु यथाभ्यस्तस्थानेष्वेव ये चरन्ति तेषाम् ।

वृंहणीयानाह क्षीणा इति । क्षता: व्रणशोषिण: । शोषादिग्रस्तानां विशिष्टं वृंहणमाह शोषेति । क्रव्यादमांसानां मांसमुक् पशुपक्षिमांसानाम् । सर्वसामान्यं वृंहणमाह स्नानमिति । उत्सादनं चन्दनहरिद्रादिभि: । स्नेहवस्तिरनुवासनम् ॥ २५—२८ ॥

क्रमागतत्वाद् रूक्षणमाह कृच्छ्रेति । स्त्रीष्वसंयम: मैथुनम् । खलि: सर्षपादीनाम् । पिण्याकस्तु तिलखलि: । रूक्षणीयानाह अभिष्यण्णेति । अभिष्यण्णा: येषु व्याधिषु किमपि क्षरति ते । स्तम्भनमाह द्रवमिति । असरं स्थिरम् । स्तम्भनीयानाह पित्तेति । पित्तदग्धा: पित्तेन दाहार्ता: । विषेति विषार्ता: स्वेदातियोगार्ताश्च ॥ २९—३३ ॥

लंघनस्य सम्यग्योगमाह वातेति । स्वेदेऽन्नमले घर्मे । क्षुदिति क्षुधाया: पिपासायाश्च सह एकत्र उदये सति । निर्व्यथे वेदनारहिते अन्तरात्मनि अन्तर्देहे इत्यर्थ: । लंघनातियोगलक्षणान्याह पर्वभेद इति । पर्वणामस्थिसन्धीनां भेद: भेदनवत् पीडा । अभीक्ष्णं नित्यं मनस: सम्भ्रम: पर्याकुलता । ऊर्ध्ववात: तन्त्रान्तरोक्तलक्षणो व्याधि: यथा "अध: प्रतिहतो वायु: श्लेष्मणा कुपितेन च । करोति नित्यमुद्गारमूर्ध्ववात: स उच्यते ॥" इति लक्षण: । हृदि तम: विषयज्ञानाभाव: । देहबल: अग्निबलश्च तयोर्नाश: ॥ ३४-३७ ॥

वृंहणस्य सम्यग्योगातियोगौ प्राह बलमिति । रूक्षणलंघनयो: कृताकृतलक्षणमेकमेवेत्याह कृतेति । स्तम्भनस्य कृताकृतलक्षणान्याह स्तम्भित इति । हनुसंग्रह: हनुसन्धेरकर्मता । हृन्निग्रह: हृत्स्तम्भ: । एषां षण्णामेवायोगलक्षणान्याह लक्षणमिति । धातूनामिति दोषाणाम् । उपसंहरति भवति चात्रेति । दोषाणां वातादीनां बहुसंसर्गाद् बहुविधसंसर्गात् । उपक्रमा: लंघनादय: संकीर्यन्ते परस्परं संसृष्टा भवन्ति । परन्तु तत्र वातादीनां त्रित्वमिव ते षट्त्वं नातिक्रामन्ति इत्याह षट्त्वमिति ॥ ३८—४३ ॥

अध्यायार्थं प्रोच्य तं समापयति तत्र श्लोक इति । अतिरोहितार्थमन्यत् ॥ ४४ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां
चरकटिप्पण्यां सूत्रस्थाने लङ्घनवृंहणीयो नाम
द्वाविंशोऽध्याय: ॥ २२ ॥

—०—

त्रयोविंशोऽध्याय: ।

पूर्वाध्यायोक्तेषु षट्सूपक्रमेषु लङ्घनवृंहणयोरेव प्राधान्यात् तदधीनत्वाच्च शरीरापचयोपचययोस्तयोरक्रमत: प्रयुक्तयो: नानाविधा उपद्रवा भवन्तीति ते पुनर्नामान्तरेण सन्तर्पणापतर्पणाख्येन निर्दिश्य व्याचिख्यासुरध्यायान्तरमारभते अथात इत्यादिना । अत्र सन्तर्पणशब्देन तत्प्रतिकूलमप-

तर्पणमपि ग्रहणीयम्। ते अधिकृत्य प्रवृत्तोऽध्यायः सन्तर्पणीयः ॥ १-२ ॥

सन्तर्पणदोषजान् व्याधीनाह सन्तर्पयतीति। गोरसैर्दुग्धैः। गौडिकैर्गुडविकृतैः। पैष्टिकैः तण्डुलादिपिष्टनिर्मितैः। चेष्टाद्वेषी व्यायामवर्जी। आमप्रदोषाः विसूच्यलसकादयः। इन्द्रियस्रोतसामिन्द्रियवहस्रोतसां लेपः अवरोधः। प्रमीलकस्तन्द्रा ॥ ३—७ ॥

सन्तर्पणदोषजानां विकाराणां प्रतिकारमाह शस्तमिति। उल्लेखनं वमनं शस्तं हितकरम्। रक्तमोक्षणं शिराव्यधेन प्रच्छानेन जलौकसा अलाब्वा वा। अभयाप्राशः हरीतकीभक्षणम्। सन्तर्पणजान् शमयितुं कांश्चिद् योगानाह त्रिफलेति। आरग्वधः स्वर्णालुमज्जा। वत्सकः कुटजत्वक्। मुस्तेति पाठा 'आकनिधि' इति भाषा। श्वदंष्ट्रा गोक्षुरः। उद्वर्तनं पिष्टद्रव्येण। उद्धर्षस्तु चूर्णेन। स्नेहोऽत्र सर्षपादिस्नेहः त्वग्दोषहरत्वात्। कुष्ठमिति। गोमेदकः तेजपत्रम्। कौञ्चास्थि वकविशेषस्यास्थि। खराह्वा वन्ययमानी। अश्मभेदकः 'पाथरकुची' इति भाषा। तक्राभयाप्रयोगः तक्रेण हरीतकीचूर्णपानम्। अरिष्टानां तत्तद्व्याधिचिकित्सिते वक्ष्यमाणानां लोध्रासवादीनाम्। त्र्यूषणमिति। क्रिमिघ्नं विडंगम्। लोहोदकस्तु अगुरुकाथः। अत्र चूर्णतैले समभागे सक्तूनामेकभागापेक्षया षोडश भागाः ग्राह्याः अनुपदयोगसाहचर्यात् ॥८-१८॥

व्योषमित्यादि। शिग्रु शोभाञ्जनम्। वृहत्यौ वृहती कण्टकारी च। हरिद्रे हरिद्रा दारुहरिद्रा च। स्थिरा शालपर्णी। केवुकं 'केउतारा' इति वंगे। हवुषा विस्रगन्धि वणिग्द्रव्यविशेषः। जलेनालोड्य पेयम्। सन्तर्पणं जलेनालोडिताः सक्तवः। सन्तर्पणकृतान् दोषान् परिजिहीर्षुः व्यायामादिकं सेव्यमित्याह व्यायामेति ॥ १६-२५ ॥

सन्तर्पणोत्थान् विकारान् सप्रतिकारान् निवेद्यापतर्पणजान् सौषधान् प्राह उक्तमित्यादि। अपतर्पणं लङ्घनम्। विण्मूत्रसंग्रहः मलमूत्रयोरल्पता। त्रिकं पृष्ठवंशस्याधोभागः। ऊर्ध्ववातादय इत्यादिना श्वासादीनां परिग्रहः। तदात्वे तदानीमेव समर्थं पुष्ट्यै इति शेषः। अभ्यासे दीर्घं कालं व्याप्य प्रयोगे। तत्र सद्यःक्षीणः सद्यःसन्तर्पणेन पुष्यति। चिरक्षीणस्तु सन्तर्पणाभ्यासेनेत्याह सद्य इति। चिरदुर्बले त्वरया क्रियमाणं सन्तर्पणं न फलद भवतीत्याह अत्वरमाणेनेति। वस्तयोऽत्र स्नेहवस्तयः। तर्पणाः तृप्तिप्रदाः तर्पणाः सन्तर्पणयोगाः। तान् योगानाह शर्करेति। अत्र समघृते मधुघृते अन्यद्रव्यसंयोगान्न मानविरुद्धे भवतः। सक्तव इति द्वितीयो योगः। फाणितमिति तृतीयः। फाणितम् अर्धावशिष्टो द्रवो गुडः 'राब' इति भाषा। मन्थ इति चतुर्थः। मन्थो जलेन मथिताः सक्तवः ॥ २६-३६ ॥

अध्यायार्थं निवेदयति तत्र श्लोक इति। निगदव्याख्यातमन्यत्॥४०॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने सन्तर्पणीयो नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्याय: ।

योजनाचतुष्के भेषजयोजनाधिकरणं शरीरमध्यायत्रयेण व्याख्याय शरीरमूलस्य विधिवज्ज्ञातशोणितस्यैव दुष्ट्या तन्नानाविधैरुपतापैरुपतप्यत इति शोणितशुद्ध्यशुद्धिनिदानस्वरूपं तत्प्रतिकारक्रमञ्चाभिधातुमध्यायान्तरमारभते अथात इत्यादिना । तस्य शोणितस्य जीवितमूलत्वेन शरीरमूलत्वं निवेदयति विधिनेति । विधिना आहारविहारनियमप्रतिपालनेन । कोऽयं विधिरित्याह देशेति । विधिर्हि देशादिभेदेन भिद्यते । तत्र देशसात्म्यानां जांगलादिदेशभेदेन यानि यस्य हितकराणि भवन्ति तेषाम् । कालसात्म्यानां यस्मिंश्च काले यानि सात्म्यानि भवन्ति तेषाम् । ओकसात्म्यानां प्रतिपुरुषसात्म्यानाम् । संप्रकाशित: तस्याशितीयेऽध्याये सौत्रीये इति शेष: । शुद्धशोणितस्य क्रियामाह तदिति । प्राणिनं मानवं बलेन वर्णेन सुखायुषा च युनक्ति । हि यत: प्राण: शोणितमनुवर्तते अन्वयव्यतिरेकाभ्याम् । यदुक्तं सुश्रुते–"नर्ते देह: कफादस्ति न पित्तान्न च मारुतात् । शोणितादपि वा नित्यं देह एतैस्तु धार्यते ॥" इति (सू० २१ अ०) पुनश्चात्र वक्ष्यते (सू० २६ अ०) "दशैवायतनान्याहु: प्राणा येषु प्रतिष्ठिता: । शंखौ मर्मत्रयं कण्ठो रक्तं शुक्रौजसी गुदम् ।" इति ॥ १–४ ॥

ननु शोणितदुष्टौ को हेतुरित्याह प्रदुष्टेति । प्रदुष्टमद्यलक्षणमाह सुश्रुतो यथा–"सान्द्रं विदाहि दुर्गन्धं विरसं क्रिमिलं गुरु । अहृद्यं तरुणं तीक्ष्णमुष्णं दुर्भोजनस्थितम् ॥ अल्पौषधं पर्युषितमत्यच्छं पिच्छिलं च यत् । तद् वर्ज्यं सर्वदा मद्यं किञ्चिच्छेषं तु यद् भवेत् ॥" इति (सू० ४५ अ०) । उष्णैरत्युष्णवीर्यैरित्यर्थ: । अन्यैश्चैतद्विधैर्मादकद्रव्यै: । निष्पावं शिम्बीजातीयं द्रव्यम् । पिण्डालु: कन्दविशेष: । हरितानामार्द्रकादीनाम् । वैला: विलशायिन: सर्पादय: । सौवीरको यवज: सन्धानविशेष: । विरुद्धानां संयोगविरुद्धानां संस्कारविरुद्धानां मानविरुद्धानाञ्च आत्रेयभद्रकाप्यीये वक्ष्यमाणानाम् । द्रवादीनि भुक्त्वा दिवाप्रस्वपनमिति योजना । अत्यादानं मात्रातिरिक्तभोजनम् । काले शरदि । अध्यशनन्तु वक्ष्यमाणलक्षणं यथा "भुक्तं पूर्वान्नशेषे तु पुनरध्यशनं मतम् ॥" इति । अजीर्णाशनन्तु पूर्वान्ने कारणवशादजीर्णे सति पुनरशनम् ॥ ५—१० ॥

शोणितदुष्ट्या के व्याधयो जायन्ते इत्याह तत इति । उपकुशो दन्तवेष्टगतव्याधिविशेष: । तल्लक्षणन्तु सुश्रुते "वेष्टेषु दाह: पाकश्च तेभ्यो दन्ता: श्चलन्ति हि । आघट्टिता: प्रस्रवन्ति शोणितं मन्दवेदना: । आध्मायन्ते स्रुते रक्ते मुखं पूति च जायते । यस्मिन्नुपकुश: स स्यात् पित्तरक्तकृतो गद: ॥" इति (नि० १६ अ०) । प्रमीलकस्तन्द्रा । सन्तापो दाह: । अन्नपानस्य विदाह: विदग्धाजीर्णत्वम् । क्लमोऽनायासकृत: श्रम: । शोणिताश्रया इति ते व्याधय: शोणितदुष्ट्या भवन्ति न तु शोणितस्य सातत्येन व्याधि-

कर्तृत्वं वर्तते ते तु वातादिदोषजन्या एवेति सूच्यते। अनुक्तानपि कांश्चिद् व्याधीन् उपशयानुपशयाभ्यां परीक्ष्य रक्तजान् विनिर्दिशेदित्याह शीतोष्णेति। अत्राद्यशब्देन विंशतिगुणवतां द्रव्याणां परिग्रहः स्यात् ॥ ११-१७ ॥

शोणितजानामुपक्रममाह कुर्यादिति। शोणितस्य स्रावणं शिराव्यधेन जलौकसा शृंगेणालाब्वा वा तच्च धान्वन्तरीयदिशा कुर्यात्। तेषां विधानन्तु सुश्रुतसंहितायां द्रष्टव्यम्। शोणितमोक्षणे निर्हर्तव्यशोणितप्रमाणमाह बलेति। बलप्रमाणमभिसमीक्ष्य यथा न रोगी दुर्बलो भवेत् तथा विचार्य। बहुदोषेऽपि एकदा नात्यधिकं शोणितं स्रावयेत्। दुष्टरक्तस्य शेषोऽपि वरं न तु तदतिक्रम्य शुद्धरक्तस्रावणम्। यदुक्तं सुश्रुते—"सशेषदोषे रुधिरे न व्याधिरतिवर्तते। सावशेषे ततः स्थेयं न तु कुर्यादतिक्रमम्॥" इति (सू० १४ अ०)। दोषप्रमाणमपि अभिसमीक्ष्य तदनुसृत्येत्यर्थः। रुधिरस्य विशुद्ध्या इति यावता शोणितमोक्षणेन रक्तस्य विशुद्धिरायाति तावत्प्रमाणमित्यर्थः। आशयं दुष्टरक्ताधिकरणं विचार्य स्वल्पे त्वग्दोषे स्वल्पं महति च बहु स्रावणं प्रशस्तमित्यर्थः। एवं स्वल्पे दोषे शृंगेणालाब्वा वा मध्ये दोषे जलायुकाभिः महति च दोषे शिराव्यधेन रक्तं स्राव्यं भवेत्। अद्यत्वे तु पलद्वयमेकदा परं प्रमाणं भवतीत्युपदेशः॥ १८-१९ ॥

स्रुते च रक्ते तद्दर्शनेन रक्तस्य दोषदुष्टिनिर्णयः कार्य इत्याह अरुणाभमिति। तत्र वातदुष्टे रुधिरे तदरुणाभमीषदुद्यदरुणवर्णं स्यात्। विशदमपिच्छिलम्। फेनिलं फेनसंकुलम्। पित्तदुष्टमाह पित्तादिति। पीतवर्णमसितवर्णं कृष्णवर्णं वा भवेत्। चिरेण दीर्घकालेन स्त्यायति घनीभवति। कफदुष्टिमाह ईषदिति। पाण्डुश्वेतबहुलं रक्तवर्णम्। तन्तुमत् अवलम्बित्वेन ॥ २०-२१ ॥

दुष्टरक्तवर्णनसाहचर्यात् शुद्धरक्तलक्षणमप्याह तपनीयेति। तपनीयेन्द्रगोपाभमिति तपनीयशब्देनात्र उद्यत्तपनवर्णं लक्ष्यते तद्वर्णो य इन्द्रगोपः वार्षिककीटविशेषः तस्याभेवाभा यस्य तदित्यरुणवर्णं रक्तमित्यर्थः। इन्द्रगोपस्य वर्णस्तु नानाप्रकारो भवतीति तस्य तपनीयेति विशेषणम्। पद्मसन्निभञ्च श्वेतमिश्ररक्तवर्णम्। अलक्तकसन्निभन्तु नीलानुविद्धं रक्तवर्णम्। गुञ्जाफलसवर्णञ्च उज्ज्वलरक्तवर्णम्। ननु रक्तस्य चतुर्विधविभिन्नवर्णता कथं संगच्छते शोणितन्तूज्ज्वलरक्तवर्णमेव प्रकृतिस्थं जानीयात् यदुक्तं सुश्रुते—"इन्द्रगोपप्रतीकाशमसंहतमविवर्णं प्रकृतिस्थं जानीयात्" इति (सू० १४ अ०)। तत्र डल्वणव्याख्या यथा—"इन्द्रगोपकः प्रावृट्कालजः उद्भिज्जः इन्द्रवधूरिति लोके। स चानेकप्रकारवर्णः अत्र तु रक्त एव गृह्यते" इति। अतोऽत्र चतुर्विधवर्णता अनुपपन्ना इति चेत् कथ्यते। रक्तं ह्युपादानस्य त्रिधातुसमवायरूपस्यान्नरसस्य धातुमानतारतम्याच्चतुर्विधं भवति तद् यथा-वातप्रधानरक्तं पित्तप्रधानरक्तं श्लेष्मप्रधानरक्तं शुद्धरक्तमर्थात् सर्वसमरक्तं चेति तत्र वातरक्तस्यारुणवर्णता,

पित्तरक्तस्यालक्तकवर्णता, श्लेष्मरक्तस्य पद्मवर्णता, सर्वसमरक्तस्य च गुञ्जाफलसवर्णता यथार्था भवति। अत: प्रकृतिस्थस्यैव चतुर्विधरक्तस्य चतुर्विधवर्णता नानुपपन्ना इति वितर्कविस्तरो मदीये 'आयुर्वेदे शारीरविनिश्चये' द्रष्टव्य:।२२

रक्तमोक्षणन्तु धान्वन्तरीयाणां क्रियेति तत्प्रकारो नात्रोपदिष्ट:। पश्चात्कर्मणस्तु कायचिकित्सान्तर्भूतत्वाद् रक्तमोक्षणानन्तरकर्तव्यमाह नात्युष्णेति। दीपनीयमग्निवर्धकम्। कथं दीपनीयं लघु च भोज्यमित्याह तदेति। शरीरं हि अनवस्थितासृक् दुर्बलं सत् तदवयवमपि जाठराग्निं दुर्बलं करोति अतस्तद्रक्षार्थं तथा भोक्तव्यमित्याशय:। नन्वज्ञाते विशुद्धाविशुद्धरक्ते पुरुषभेदे कथं क्रिया स्यादिति विशुद्धरक्तस्य पुरुषस्य लक्षणमाह प्रसन्नेति। अव्याहतपक्तृवेगमिति अव्याहत: पक्ता पाचकाग्नि: वेगश्च मलादिवेगो यस्य तमित्यर्थ:। यस्यान्नं सम्यग्जीर्णं भवति यथाकालञ्च मलमूत्रवेगौ च भवत इत्याशय:॥ २३-२४॥

सत्स्वपि रक्तदुष्टिजेषु बहुषु व्याधिषु प्राधान्यादत्र त्रय एव व्याधयो निदानोपक्रमाभ्यां विवक्षुस्तत्र तेषां सामान्यत: संप्राप्तिनिदाने प्राह यदा त्विति। मलिनाहारशीलस्य विरुद्धाद्यशनं सातत्येनाभ्यवहरत: रजोमोहावृतात्मन: तथा राजसिकतामसिकद्रव्यसेवनबाहुल्यात् शरीरे यस्य रजस्तमसी आधिक्येन वर्तेते तस्य पृथक् समस्ता वा कुपिता मला दोषा: रक्तवाहीनि स्रोतांसि चतुर्विधा: रक्तवहा: शिरा इत्यर्थ:। रससंज्ञावहानि च स्रोतांसि सुषिरासुषिरभेदेन द्विविधा धमन्यश्च प्रतिहत्य स्रोतोमार्गं मलेन मनाक्प्रतिरुध्य अवतिष्ठन्ते। तेन वर्षाऽऽविलजलवाहिप्रणालीवत् शरीरगता: सर्वा एव शिरा धमन्य: संकुचितमार्गा भवन्तीति न यथावत् शरीरे रसरक्तसंज्ञा: वहन्ति अत: संज्ञाहीनता न्याय्या भवति। के च ते व्याधय:? मदमूर्छायसन्न्यासा इति। तेषां हेतुलिंगोपशान्तिषु यथोत्तरं बलाधिक्यं विद्यात्। स्तोकमवरुद्धेषु स्रोत:सु मद: मध्यमेऽवरुद्धे मूर्छाय: कात्स्न्र्येनावरुद्धे च सन्न्यासो भवतीति ज्ञेयम्॥ २५-२७॥

अथ सामान्यतो मदव्याधिसंप्राप्तिमाह दुर्बलमिति। चेतस: स्थानं हृदयं मनोवहाश्च धमन्य:। दुर्बलता चैषां रजस्तमसोराधिक्यात्। तद्गतो वायुर्मनोविक्षोभयन् इन्द्रियपरिचालने असामर्थ्यमापादयन् संज्ञां चेतनां संमोहयेत् आकुलीकुर्यात्। एवं पित्तं कफोऽपि कुर्यातां। तस्य दोषभेदेन पृथक् लक्षणान्याह सक्तेति। सक्त: अन्तरान्तरा प्रतिबद्ध: गद्गदभाषणवदित्यर्थ:। अनल्पो बहु: व्रतश्च आभाषो वाक्यकथनं यस्य तम्। चलेति कार्यमस्य चञ्चलं स्खलितं स्वमार्गाद् भ्रष्टं भवति। श्याव: कृष्णपीतमिश्रो वर्ण:। पैत्तिकमाह सक्रोधेति। कलिप्रियं विवादप्रियम्। कफजमाह स्वल्पेति। असम्बद्धं पूर्वापरान्वयविरहितम्। प्रध्यानतत्परं चिन्ताशीलम्। मदस्य स्वल्पदोषत्वमाह जायत इति। सर्व एव मदा: त्रिदोषं विहाय न भवन्तीत्याह यथेति। रौधिर: रुधिरदर्शनाज्जात:॥ २८-३४॥

मूर्छायलक्षणान्याह नीलमिति । नीलादिकमाकाशविशेषणम् । तमः प्रविशति निःसंज्ञो भवति । वेपथुः कम्पः । छाया कान्तिः । पैत्तिकमूर्छायमाह रक्तमिति । सस्वेदश्च प्रबुध्यते ज्ञानलाभकाले प्रभूतः स्वेदो भवति । संभिन्नवर्चाः अतिसारी । कफजमाह मेघेति । मेघसंकाशं मेघसदृशं मेघवर्णमित्यर्थः । तमोघनैः गाढान्धकारैः । सप्रसेकः अतीवनिष्ठीवनशीलः । सन्निपातमूर्छापस्मारयोर्भेदमाह विनेति । अपस्मारे हि दन्तघर्षफेनागमादिवीभत्सचेष्टितानि भवन्ति न तथा सन्निपातमूर्छायेे इत्यर्थः ॥ ३५—४१ ॥

क्रमागतत्वात् सन्न्यासं व्याचिख्यासुस्तस्य मदमूर्छाभ्यां दारुणत्वमाह दोषेष्विति । कृतवेगेषु वेगं कृत्वा क्षीणबलत्वेन त्यक्तहृदयाद्याच्छादनेषु । संन्यासस्य संप्राप्तिमाह वाग्देहेति । प्राणायतनं प्राणवायोरायतनं हृदयमित्यर्थः । आश्रिताः अतिबला दोषाः । अत्र दोषा इत्यनेन सन्न्यासव्याधौ त्रिदोषस्यैव प्रकोपो भवतीति ज्ञायते । वाग्देहमनसां चेष्टां शारीरीं सर्वविधां क्रियामित्यर्थः । आक्षिप्य प्रतिसंहृत्य । अबलं निरोजसमित्यर्थः । जन्तुं संन्यस्यन्ति त्यक्तसर्वचेष्टं कुर्वन्ति हृदयगतानां ज्ञानकर्मवाहिनीनां धमनीनां चेष्टाराहित्यमापादयन्तीत्यर्थः । तस्य लक्षणमाह स नेति । ना नरः । काष्ठीभूतः अनमनशीलाचेतनकाष्ठवत्भूत्वा मृतोपमः मृतवच्चेष्टारहितः शीघ्रं प्राणैर्वियुज्यते । सद्यःफलां क्रियां त्वरितफलप्रदां चिकित्सां मुक्त्वा सद्यःफलेन भेषजेनैव न कृते उपक्रमे प्राणैर्वियुज्यते इत्यर्थः । अर्थमिमं दृष्टान्तेन द्रढयति दुर्गेऽम्भसीति अतिगम्भीरे सागरनद्यादौ । तलप्राप्तेः प्रागेव यथा सागरादिपतितं पात्रमुद्धार्य्यं भवति तथैव त्वरितमृत्योः प्रागेव सद्यःफलां क्रियां कुर्वीत इत्यर्थः । कास्ताः सद्यःफलाः क्रिया इत्याह अञ्जनानीति । अत्राञ्जनानि तीक्ष्णानि विधेयानि । अवपीडोऽत्र शोधन एव । शिरोविरेचनद्रव्याणां कल्कमवपीड्य नासिकायां प्रदानमवपीड इत्युच्यते । प्रधमनन्तु शिरोविरेचनद्रव्याणां चूर्णं षडंगुलायां नाड्यामावाप्य मुखमारुतेन नासिकायां प्रदानम् । सूचीभिः शस्त्रैर्वा तोदनं स्वल्पं शरीरे वेधनम् । दाहः अग्न्यादिना । नखान्तरे नखाग्रे पीडा सूचीवेधादिना तत्र स्पर्शज्ञानाधिक्यात् । लुञ्चनमाकृष्योत्पाटनम् । आत्मगुप्ताफलेन वृश्चिकालीपत्रेण वा शरीरे अवघर्षणम् । तयोः शूकानां विशेषतो वेदनाप्रदत्वात् । अवबोधार्थमेवं सद्यःफलां क्रियां कुर्यात् येन केन प्रकारेण यन्त्रणाधिक्योत्पादनमेव तस्य प्रबोधहेतुर्भवति । पुनरेवंविधाभिः क्रियाभिः किञ्चित्प्रत्यागते चैतन्ये पूर्णतया चैतन्यागमाय काश्चित् क्रियाः प्राह सम्मूर्छितानीति । सम्मूर्छितानि सम्यगासूतानि । प्रबुद्धसंज्ञस्य पुनराक्रमणरोधाय उपक्रमानाह प्रबुद्धेति । स्रंसनं विरेचनम् । उल्लेखनं वमनम् । शोणितस्यावसेकैः शिराव्यधादिना रक्तमोक्षणैः । अनुबन्धं पुनराक्रमणनिवारणाय दोषाणामनुबन्धम् । प्रलयहेतुतः तमःप्रवेशरूपनाशहेतुतः ॥ ४२—५३ ॥

मदमूर्छाययोरुपक्रमानाह स्नेहेति । प्राक्संशोधनं कृत्वा ततः संश-

मना योगा: सेव्या: । कांश्चित् संशमनयोगानाह अष्टाविंशतिरिति । अष्टाविंशत्यौषधस्य उन्मादचिकित्सिते वक्ष्यमाणस्य कल्याणकसर्पिष: । तिक्तकमहाषट्पलकघृते तु कुष्ठचिकित्सिते वक्ष्यमाणे । कौम्भस्य दशवर्षपुराणस्य सर्पिषो वा पानम् । शास्त्राणां धर्मग्रन्थानाम् । सत्त्ववतां सात्त्विकानाम् । सतां साधूनां वा सेवनात् सेवाकरणात् ॥ ५४-५८ ॥

अध्यायार्थं निवेद्य तं समापयति तत्र श्लोकाविति । निगदार्थमन्यत् ॥ ५९-६० ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने विधिशोणितीयो नाम चतुर्विंशोऽध्याय: ॥ २४ ॥

समाप्ता योजनाचतुष्कव्याख्या ।

पञ्चविंशोऽध्याय: ।

न खलु केवलेन भेषजेन व्याधिर्निवर्तते तत्र तु पथ्यमपि अन्यतमं प्रधानं कारणं भवतीति अन्नपानचतुष्कं व्याचख्यासुरादौ आहारादेव शरीरं जायते तस्मादेव व्याधयो भवन्तीति प्रतिपिपादयिषन् अध्यायान्तरमारभते अथात इत्यादिना। तत्र विवदतां महर्षीणां पुरत उपस्थापितं 'किन्नु भो: पुरुषो यज्ज:' इति प्रश्नमधिकृत्य प्रवृत्तोऽध्यायो यज्ज:पुरुषीयो भवति ॥ १—२ ॥

तत्रादौ प्रश्नोत्थापनप्रकारं प्रदर्शयति पुरेति । प्रत्यक्षधर्माणं तप:प्रभावेण सर्वधर्मज्ञं पुनर्वसुं पुरा सन्निकटे समेतानां समवेतानाम् । राशिसंज्ञपुरुषस्य व्याधेश्च उत्पत्तिविनिश्चये कथं तयोरुत्पत्तिरभूदिति निर्णये इयं वक्ष्यमाणा कथा प्रादुरासीत् । प्रश्नमुत्थापयति काशीपतिर्वामको यथा—तदन्तरमिति तदन्तरं तस्मिन् अवसरे ऋषिसमितिमृषिगोष्ठीम । उपसृत्य पुरत उपस्थाय। किन्तद् वाक्यमित्याह किन्नभो इति । किन्नु प्रश्ने । पुरुषोऽत्र राशिसंज्ञ: सचेतने देहेऽस्य तात्पर्यम् । यज्ज: यस्माज्जात: । तस्यामया तज्जा नवेति प्रश्न: । एवमुत्थापिते प्रश्ने उत्तरयितुमाह्वानं पुनर्वसो: सर्व एवेति । अमितेति अमितेन ज्ञानेन मोक्षबुद्ध्या विज्ञानेन सांसारिकज्ञानेन च छिन्ना: संशया येषां ते ॥ ३—७ ॥

तत्र विभिन्नमतानामृषीणां मतवादान् क्रमशो विवक्षुरादौ मौद्गल्यगोत्रजस्य पारीक्षेर्मतमाह पारीक्षिरिति । अयमर्थ:—आत्मैव शरीरोत्पत्तिकारणं भवति यथा वक्ष्यति—"आत्मजश्चायं गर्भ: गर्भात्मा ह्यन्तरात्मा..... यो गर्भाशयमनुप्रविश्य गर्भत्वेन जनयत्यात्मनात्मानम्" इति (शा० ४ अ०)। पुनश्च रोगाश्चात्मजा: हि यत: स एव रोगाणां कारणम् । कथमित्याह स चिनोतीति। चिनोति स्वयमेव कर्मजन्यमपूर्वं चिनोति तस्य फलं व्याधिमपि उपभुङ्क्ते पुनर्व्यतिरेकमुखेनापि हेत्वन्तरं दर्शयति न ह्यृते इति।

तस्याभावे मृतशरीरे सुखदुःखाभावदर्शनात दुःखरूपस्य व्याधेः स एव कारणं भवितुमर्हतीत्याशयः ॥ ८—९ ॥

पक्षमेतं न्यक्करोति शरलोमा नेत्याहेत्यादिना । तत्र हेतुमाह न ह्यात्मानमिति । हि यतो दुःखद्वेषी आत्मा आत्मना स्वयमेव दुःखप्रदैर्व्याधिभिरात्मानं न योजयेत् । पूर्वपक्षे इमामसंगतिं प्रदर्श्य स्वपक्षमाह रज इति । रजस्तमोभ्यां परीतं मन एव शरीरस्य व्याधेश्चोत्पत्तिकारणं भवति । यद् वक्ष्यति–"रजस्तमोभ्यां युक्तस्य संयोगोऽयमनन्तवान् ।" इति पुनश्च "युक्तस्य मनसा तस्य निर्दिश्यन्ते विभोः क्रियाः" इति । अतः शरीरोत्पत्तौ रजस्तमोबहुलं सत्त्वसंज्ञकं मन एव कारणम इति शरलोम्नः पक्षः ॥ १०—११ ॥

पक्षमेतं दूषयति वार्यविदो महर्षिः नेत्याह इत्यादिना । तत्र हेतुमाह न ह्येकमिति । अयमर्थः–मानसव्याध्युत्पत्तौ मनसः कारणत्वेऽपि शारीरस्य व्याधेः कारणं तन्न भवति पुनश्च शरीरं विना मनसः स्थितिरपि न भवितुमर्हति अतो न मनःकारणमिति । स्वपक्षमाह रसजानीति । भूतानि प्राणिशरीराणि । यद्वक्ष्यति–"रसजश्चायं गर्भः न हि रसादृते मातुः प्राणयात्रापि स्यात् किं पुनर्गर्भजन्म ।" इति (शां० ३ अ०) । पुनश्च "हिताहारोपयोग एक एव पुरुषवृद्धिकरो भवति, अहिताहारोपयोगः पुनर्व्याधिनिमित्तम" इति (सू० २७ अ०) तत्र हेतुमाह आप इति । निर्वृत्तिहेतवः उत्पत्तेः कारणम् ॥ १२—१३ ॥

तं पक्षं न्यक्कृत्य स्वपक्षं स्थापयति हिरण्याक्षः नेत्याह इत्यादिना । ननु रसजे पुरुषे आत्मा मनश्चापि रसजं स्यात् न तु तत्तथा । पुनर्व्याधयोऽपि शब्दस्पर्शादिजा अपि भवन्ति अतो न खल्वत्र रसः कारणं भवति । स्वपक्षमाह षड्धातुज इति । यद्वक्ष्यति–"खादयश्चेतनाषष्ठा धातवः पुरुषः स्मृतः" इति पुनश्च "अत्र मोहः सुखं दुःखं जीवितं मरणं स्वता"इति, अतः षड्धातुजः पुरुषः एवं दुःखात्मको रोगोऽपि षड्धातुजे पुरुषे एव स्यादित्याशयः । राशिः राशिसंज्ञः पुरुषः सांख्यैस्तत्त्वविद्भिः ॥ १४—१५ ॥

शौनकस्तु तन्मतं दूषयति तन्नेति । कुशिक इति हिरण्याक्षस्यापरं नाम । तत्र हेतुमाह कस्मादिति । मातापितृभ्यां विना षड्धातुजोऽपि पुरुषः कस्माद् कथं भवेन्नोत्पद्यत इत्यर्थः । तत्र प्रत्यक्षमेव प्रमाणं दर्शयति पुरुष इति । पुरुषो मानवशरीरम् इत्यर्थः । वक्ष्यति च "पितृजश्चायं गर्भः मातृजश्चायं गर्भः" इति । पुनश्च मेहादयो व्याधयोऽपि पित्र्या मातापितृभ्यां जाता भवन्ति अतस्तत्र पितरौ कारणं भवतः ॥ १६–१७ ॥

मतवादं तमप्याकरोति भद्रकाप्यः न ह्यन्ध इति । यदि पितरावेव कारणं स्यातां तर्हि अन्धाभ्यां पितृभ्यां जातं सन्तानमपि अन्धं भवेत् "कारणगुणाः कार्यगुणमारभन्ते" इति हि न्यायः । पुनश्च मातापित्रोरप्युत्पत्तिः ते तव मते कुतोऽभवत् इत्यनवस्थादोषापातः स्यात् । स्वसिद्धान्तमाह कर्मज इति ।

अत: पुरुषस्य रोगाणामुत्पत्तौ कर्मैव कारणं भवति । यद् वक्ष्यति "पुरुषो राशिसंज्ञस्तु मोहेच्छाद्वेषकर्मज:" इति पुनश्च "निर्दिष्टं दैवशब्देन कर्म यत् पौर्वदेहिकम् । हेतुस्तदपि कालेन रोगाणामुपलभ्यते" इति ॥ १८—१९ ॥

मतमेतद्दूषयति भरद्वाज: नेत्याह इति । तत्र हेतुमाह कर्तेति । हि यत: कर्मण: पूर्वं कर्ता भवितुमर्हतीति शेष: । यत: अकृतं केनापि तत् कर्म न दृष्टं यस्य फलं पुरुष: स्यात् । कर्म तु कर्तारमपेक्षते अत: पुरुषस्य कर्मण: प्रागेवोत्पत्तिर्भवितु मर्हति इत्याशय: । स्वमतमाह भावहेतुरिति । भावहेतुरुत्पत्तिकारणम् । स्वभावादेव पुरुष उत्पद्यते व्याधिरपि तस्माज्जायते इति निष्कर्ष: । तथाहि-"क: कण्टकानां प्रकरोति तैक्ष्ण्यं चित्रं विचित्रं मृगपक्षिणाञ्च । माधुर्यमिक्षौ कटुको मरीचे स्वभावत: सर्वमिदं प्रवृत्तम् ।" इति महाजनवाक्यात् पुनर्मनुष्यान् मनुष्य एव भवतीति दर्शनात् । पुनर्वक्ष्यति च-"कालस्य परिणामेन जरा मृत्व्वनिमित्तजा: । रोगा: स्वाभाविका दृष्टा:...।" इति । तत्र दृष्टान्तमाह खरेति । तेजोन्तानां पृथिव्यप्वाताग्नीनां यथाक्रमं खट्द्रवचलोष्णत्वं स्वभावादेव भवति तद्वत् ॥ २०—२१ ॥

भरद्वाजसिद्धान्तमसिद्धान्तं प्रतिपादयति काङ्कायन: नेत्याहेति । हि यत: भावानां पदार्थानां सिद्धिरसिद्धिर्वा उत्पत्तिरनुत्पत्तिर्वा चेत् स्वभावाद् भवेत् तर्हि आरम्भफलं न भवेत् । सर्वत्रैव आरम्भात् कारणसमुदाययोजनावशादेव फलं कार्यं किमपि भवति । स्वभावकारणत्वे स चारम्भो निरर्थक: स्यादित्याशय: । शास्त्रोत्पादनाय कर्षणं शास्त्रज्ञानायाध्ययनमित्यादिकं निष्प्रयोजनं भवेदिति भाव: । अत: स्वमतमाह स्रष्टेति । अमितसंकल्पो ब्रह्मणोऽपत्यं प्रजापतिर्विराट्संज्ञ: अस्य चेतनाचेतनस्य जगत: सुखदु:खयोश्च स्रष्टा भवति ॥ २२—२३ ॥

मतमिदमपाकरोति भिक्षुरात्रेय: तत्रेति । प्रजापति: प्रजाहितैषी सन्नपि असाधुवत् अपत्यं सृष्टजीवं सततं दु:खैर्व्याधिभिर्न युञ्ज्यात् । स्वमतमाह कालज इति । कालादेव पुरुषोत्पत्ति: रोगोत्पत्तिश्च भवत: । यदुक्तं सुश्रुते-"कालो हि नाम भगवान् स्वयम्भूरनादिमध्यनिधनोऽत्र रसव्यापत्सम्पत्ती जीवितमरणे च मनुष्याणामायत्ते" इति ॥ २४—२५ ॥

महर्षीणां स्वपक्षोद्भावनं परपक्षदूषणञ्च श्रुत्वा सर्वेषामेव तेषां स्वपक्षानुयायित्वेन भगवान् पुनर्वसुस्तान्यनादृत्य सुसिद्धान्तं विवक्षुराह तथेति । ऋषीणामित्यनादराधिक्ये भावलक्षणे षष्ठी । पक्षसंश्रयात् रागवशात् पक्षमाश्रित्य कथनात् । तत्त्वं सिद्धान्त: । पुरुषसृष्टिं प्रति भवदुक्तान् वादान् सप्रतिवादान् उत्थापयितुं योग्यान् तर्कान् निश्चितान् सिद्धान्तान् इव वदन्तो भवन्त: पक्षान्तं यथार्थावधारणमूलं न गच्छन्ति । न खलु कमपि सिद्धान्तं प्राप्नुवन्तीत्यर्थ: । तत्र दृष्टान्तमाह तिलपीडकेति । गतौ स्वगत्याम् । यथाहि तिलपीडक: स्वगतौ पक्षान्तं न प्राप्नोति तत्रैव पुन: पुन: भ्रमति तद्वद् भवतां वादा अपि न कदाचित् काञ्चिन्मीमांसां प्राप्स्य-

न्तीत्यर्थः। अतः एवं वादसंघट्टं परस्परवादसमुदयं मुक्त्वा अध्यात्म्यं यथार्थतत्त्वमनुचिन्त्यताम्। तमःस्कन्धे अज्ञानतालक्षणे तमःसमूहे अविधूते अनिराकृते ज्ञेये अर्थे ज्ञानं न प्रवर्तते। किमत्र तत्त्वमित्याह येषामिति। येषां भावानां पदार्थानां पञ्चभूतात्मकानां वातपित्तकफानामाहारपोष्याणां समवायेनान्नरसरूपाणां सर्वदेहोपादानकारणानां तथा पृथक्क्रियोष्मश्लेष्मरूपाणां शरीरधारणे निमित्तकारणानां त्रिधातूनां सम्पत् गुणवत्ता साम्यावस्था प्रकृतिरिति तात्पर्यम्। नरं पुरुषशरीरं सञ्जनयेत् तेषामेव त्रिदोषाणां विपत् विकृतिर्वैषम्यावस्थेति यावत्। विविधान व्याधीन् समुदीरयेत्। तत्र मानवदेहोत्पत्तौ मूलकारणयोः शुक्रशोणितयोरपि सौम्याग्नेयत्वेन कफपित्तप्रधानं त्रिधातुमयत्वं सिद्धमेव। एतत्त मदीये "आयुर्वेदशारीरविनिश्चये" व्यासतो व्याख्यानं द्रष्टव्यम्॥ २६—२९॥

सिद्धान्तमेतं श्रुत्वा काशीपतिः पुनः पृच्छति—भगवन्निति। अयन्तु प्रश्नस्याशयः पुरुषस्य रोगाणां चोत्पत्तिकारणं श्रुतं परं पुरुषो व्याधिश्च क्रमशो वर्धत इति दृश्यते तत्र किं कारणं भवतीति। तस्योत्तरमाह तमुवाचेति। पुनस्तत्र स्वसंशयं वक्ति अग्निवेशः कथमिति। अनपवादमव्याप्त्यतिव्याप्तिरहितम्। अयमर्थः—हितमपि आहारजातं मात्राकालादिभेदेन कदाचिदहिताय सम्पद्यते पुनरहितसमाख्यातमपि द्रव्यं तथा मात्राव्यक्त्यादिभेदेन हिताय भवतीति दृश्यते तत् कथं वयं जानीमहे द्रव्यमिदं हितसमाख्यमिदं वाऽहितमिति॥ ३०—३२॥

उत्तरयति यदाहारेति। आहारजातं यत्खाद्यं यया मात्रया यत्र कालादौ अभ्यवहृतं समान् शरीरधातून् दोषधातुमलाख्यान् त्रयोदशसंख्यकान् प्रकृतौ स्थापयति समानतया रक्षति न त्वसात्म्या क्षयवृद्धिभ्यां विषमान् करोतीत्यर्थः। विषमांश्च कारणान्तरेण विषमान् तान् समीकरोति क्षीणस्य वर्धनेन वर्धितस्य च ह्रासेन तेषां समत्वमापादयति तदाहारसमूहो हितकर इति जानीयात्। पुनश्च तद्विपरीतं यच्च यथाभ्यवहृतं समानेव विषमान् करोति असात्म्या क्षयेण वृद्ध्या वा तेषां विषमतां वर्धयति तदाहारजातमहितं विद्धि इत्यर्थः। पुनश्च तत्राग्निवेशः पृच्छति भगवन्निति। एतद् हिताहितलक्षणमेवं पूर्वोक्तप्रकारेणोपदिष्टं सर्वभिषजः भिषक्समुदायानां मध्ये भूयिष्ठकल्पाः ईषदूनाः भूयिष्ठाः प्रायः सर्व एवेत्यर्थः। न तु विज्ञास्यन्ति। अतो मात्राकालादियुक्तानामाहारजातानां हिताहितत्वं व्यासतो ब्रूहि इत्याशयः॥ ३३—३४॥

शिष्यजिज्ञासामनुसृत्य व्यासतो गुरुः प्राह येषामिति। येषामायुर्वेदनिष्णातानामित्यर्थः। गुणतो मृद्वादिविंशतिगुणयोगेन। द्रव्यतो द्रव्यप्रभावमनुसृत्य। कर्मतो वीर्यविपाकाभ्याम्। सर्वावयवशस्तस्य द्रव्यस्य इमे अवयवा एवंगुणा एवंप्रभावा इत्यादिरूपेण आहारतत्त्वं विदितमस्ति मात्रादयः मात्राकालक्रियाभूमिदेहदोषपुरुषावस्थारूपाः भावाः विदिता इति

लिंगवचनव्यत्यासेनान्वय: । ते विद्वांस: एवमुपदिष्टमेतद् आहारतत्त्वं विज्ञातुमुत्सहन्ते विज्ञास्यन्ति इत्यर्थ: । यथा त्विति । मात्रादीन् भावान उदाहरन्त: सभ्यगुदाहृत्य व्याख्यास्याम इत्यन्वय: । तेषां मात्रादीनाम् । हिरव- धारणार्थ: । बहुविधविकल्पत्वेन तत्र बहु वक्तव्यं वर्तत इत्याशय: । लक्ष- णतो नामत: ॥ ३५ ॥

आहारविधिविशेषाणां लक्षणतो भेदानाह तद्यथेति । तस्याहारत्व- सामान्याद् एकविधत्वमाह आहारत्वमिति । स तु योनिभेदाद् द्विधा भवति इत्याह स इति । योनिरुपादानकारणम् । उदर्क: भाविकालोद्भवफलम् । उपयोग: प्रयोग: । अशनभक्ष्ययो: व्युत्पत्त्यर्थसाम्येऽपि चर्व्यचूष्यभेदान द्विरुक्ति: । आहारस्य तथैव चातुर्विध्यस्मरणात् । यदुक्तं—"षट् कोटिर्ब्राह्मणा- नाञ्च भोजयामास नित्यश: । चूष्यपेयलेह्यचर्व्यैरतितृप्तिं दिने दिने ॥" इति । गुणभेदतो विंशतिप्रकारान् आख्यातुकाम: आहारगुणानाह विंशति- रिति । एते हि विंशतिर्गुणा: परस्परद्वन्द्वा: दश ज्ञेया: । यथा गुरुस्तद्विपरीतो लघुरेवं सर्वत्र । रूक्ष: स्नेहशून्य: । मन्दोऽतीक्ष्ण: । स्थिरो धारक: । सरो भेदक: । विशदोऽपिच्छिल: । श्लक्ष्ण: मसृण: । खर: कर्कश: । सान्द्रो घन: । एतेषां गुणानामनुगमात् अनुगतत्वात् विंशतिविध आहारो भवति । द्रव्याणां शूकधान्यादीनां संयोगात् परस्परमेलनबाहुल्यात् करणं पुन: संस्कार: पाकविधिरिति यावत् । तद्बाहुल्याच्चाहार: अपरिसंख्येयभेदो भवति ॥३६॥

यद्यपि रुचिभेदाद् देशभेदाच्चाहारावयवस्यापरिसंख्येयत्वं भवति तथापि ये खलु प्राधान्येनोपयुज्यन्ते ये चाधिकतमानां मनुष्याणां हिततमा अहिततमा वा भवन्ति तान् वक्तुमुपक्रमते । तस्य खल्विति । तत्र प्राक् हिततमान् आह तद् यथेति । आन्तरीक्षमुदकमित्यविशेषत्वेऽपि गांगमत्र ग्राह्यम् । लाव: 'भाँडइ' इति भाषा । गोधा स्वर्णगोधा । विलेशयानां गर्त निवासिनाम् । चुलुकी शिशुमार: । पाकहंस: 'बालुहाँस' इति प्रसिद्ध: । आजमेद: छागमेद: । शृंगवेरमार्द्रकम् । मृद्वीका द्राक्षा ॥ ३७—३८ ॥

अहिततमानाह—अहितेति । यवक: कंगु: । वर्षानादेयं वर्षाकालीनं नदीजलम् । उषरं 'खारी नून' इति भाषा । काणकपोत: क्षुद्रवन्यकपोत: 'घुघु' इति भाषा । चिलिचिम: महाशल्क: पार्वत्यमत्स्यविशेष: । आविकं मेषदुग्धजम् । काकमद्गु: 'पानिकाउर' इति भाषा । लिकुचं वन्यपनस: 'डहुआ' इति भाषा । फाणितम् अर्धावर्तित इक्षुरस: 'राब' इति भाषा । इत्याहारविकाराणां हिताहिततमानां विवृतिं कृत्वा पुन: शरीरगतानां कर्मणा- मौषधानाञ्च प्राधान्येन सप्रयोजनानि द्रव्याणि व्याख्यातुकाम प्राह अतो भूय इति । अत्र द्रव्याणीति अभ्यवहृतानि द्रव्याणि तज्जन्यकर्माणि च ज्ञातव्यानि तेनानशनजीर्णादीनामपि परिग्रहो भवितुमर्हति ॥ ३९ ॥

कानि तानि कर्मौषधानां द्रव्यकर्माणीत्याह तद्यथेति । वृत्तिकराणां देहस्थितिकराणां द्रव्याणां मध्ये अन्नमाहार: श्रेष्ठमित्येवं सर्वत्र । अत्र

निर्धारे षष्ठी । नक्रश्रेतः कुम्भीरडिम्बम् । अत्र श्रेतःशब्देन सद्यःप्रसूते डिम्बे तात्पर्यम् । तिन्दुकं 'गाव' इति भाषा । तत्त्व अन्यद्रव्ये रुचिं नाशयतीत्यर्थः । मन्दकं पर्युषितं दधि । गवेधुकान्नमिति गवेधुका 'देधान' इति भाषा । कोद्दालकः कोद्रवः । जाम्बवं जम्बुफलम् । शष्कुली पिष्टकविशेषः । प्रत्यक्पुष्पी अपामार्गः । शिरीषः कटभीसदृशः क्षुद्रपुष्पः । उदीच्यं बालकम् । कट्वंगं श्योनाकः । कर्मणां प्राधान्यमाह तक्राभ्यास इत्यादि । लामज्जकोशीरम् उशीरवत्पीतच्छविस्तृणविशेषः । वायुरत्र बाह्यवायुः । शारीरवायुपोषणादयं प्राणसंज्ञाप्रदो हेतुर्भवति । प्राणनसंज्ञा च शारीरवायोरेव कर्म । मद्यात्क्षेपः मद्यपानजन्यमत्तता इत्यर्थः । परायतनं परावसथशायिनां परान्नभोजिनामन्नेऽश्रद्धा स्वाभाविक्येव भवति । पराघातनमिति पाठे तु परमुत्तरमाघातनं वधस्थानम् । तत्तु यस्य वधादेशोऽभवत् तस्यान्ने श्रद्धां नाशयत्येव । प्रमिताशनं मात्राहीनभोजनम् । अजीर्णाध्यशनम् एकस्मिन् खाद्येन जीर्णे पक्वात् प्रागेव अध्यशनं यच्च वक्ष्यति-"भुक्तं पूर्वान्नशेषे तु पुनरध्यशनं मतम्" इति (चि० १५ अ०) तच्च ग्रहणीदूषणानां विषयाणां प्रधानतमम् । ग्रहणी तु आममन्नं सन्धार्य पाचयति पक्वान्नञ्च पार्श्वतो विसृजति इति तत्रामाशये अन्ने पक्वे सत्येव मुक्तद्वारा भवति इत्यस्याः प्रकृतिः । अध्यशने तु पक्वापक्वखाद्यमेलनात् ग्रहण्याः विरुद्धक्रियासमावेशो भवतीति प्रकृतिविघातः सम्भवत्येव । तेनास्या आमान्नत्यागरूपं दूषणं भवति यद् वक्ष्यति-"सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति" इति । विषमाशनन्तु वातादीनां वैषम्यजननात् तत्पोष्यमग्निं विषमं करोत्येव । निन्दितव्याधिः कुष्ठम् । अलक्ष्मीमुखानामलक्ष्मीकारणानाम् । मिथ्यायोगशब्देनात्र असमयोगः अयोगातियोगमिथ्यायोगाः परिगृह्यन्ते । संकल्पः कामः । अयथाबलमारम्भः शक्त्यतिरिक्तः श्रमः साहस इत्यर्थः । निवृत्तिः सर्वकार्येषु प्रवृत्तेरभावः । उद्धार्य्याणां चिकित्स्यानां मध्ये अजीर्णं श्रेष्ठम् । अजीर्णचिकित्सा तु सर्वव्याधिचिकित्सासु कृच्छ्रतमा इत्यर्थः । अनुषंगी पुरुषानुक्रमेण अनुषज्यते इत्यर्थः । तन्त्राणां क्रियाणां चिकित्सानामित्यर्थः । अनिर्वेदः अवैराग्यम् । अधार्तस्य अधैर्यस्य असारस्य च लक्षणानां चिह्नानाम् । वार्तलक्षणानामिति पाठे तु आरोग्यलक्षणानामित्यर्थः । योग इति यथावद् योगनिर्वाचनमित्यर्थः । विज्ञानमायुर्वेदज्ञानम् । साधनानामायुर्वेदज्ञानकारणानाम् । सम्प्रतिपत्तिः रोगाणां संप्राप्तिः कालज्ञानप्रयोजनानां चिकित्साकालज्ञानहेतूनाम् । अव्यवसायः अनिश्चयः कालातिपत्तिहेतूनां चिकित्साकालातिक्रमहेतूनाम् । हृष्टकर्मता योग्याकरणं निःसंशयकराणां चिकित्सायां संशयराहित्यानाम् । असमर्थता अयोग्यता भयकराणां चिकित्सायामिति शेषः । तद्विद्यसंभाषा तच्छास्त्रविदा सह शास्त्रानुकूलस्तर्कः । अमृतानाममृतवज्जरामरणरोधिनाम् । सर्वसन्न्यासः सर्वकर्मपरित्यागः ॥४०॥

उपसंहरति भवन्ति चात्रेति । समानकारिणः एकक्रियासम्पादकाः

ये अर्था: विषया: सन्ति। ज्यायस्त्वं श्रेष्ठत्वम्। अवरत्वमप्रशस्यत्वम्। निपुण: कुशल:। हितस्य पथ्यशब्दनिरुक्तिमाह पथ्यमिति। पथ: स्रोत:-समूहरूपात् शरीराद् अनपेतं न उत्क्रम्य गतम् उपकारकमित्यर्थ:। शरीरा-हितं हि न तत्र तिष्ठति, तिष्ठति चेत् शल्यभूतं तस्यापकारायैव सम्पद्यते इति भाव:। पुनश्च मनस: प्रियं मनोऽनुपघाति यद् भवति तदपि पथ्यम्। ननु तर्हि यदप्रियं तदेवापथ्यम्, नेत्याह तद् अपथ्यमिति नियतं निश्चितं न लक्षयेत्। कुत इत्याह मात्रेति। तत्तदप्रियमपि मात्रादीनां गुणान्तरं विभिन्नान् गुणान् प्राप्य आसाद्यते ते भावा: पदार्था: तथा तथा हिता अहिता वा दृश्यन्ते। निगमयति तस्मादिति। तस्माद् द्रव्याणां स्वभाव: प्रकृति: निर्दिष्ट: प्रकृत्या हितोऽहितो वा व्याख्यात:। तथा आश्रय: द्रव्याश्रय: मात्रादिरपि निर्दिष्ट:। तत् तस्मात् सिद्धिं कर्मसिद्धिमारोग्यमित्यर्थ: इच्छता भिषजा एतदुभयमपेक्ष्य द्रव्यमिदं प्रकृत्या हितमहितं वा मात्रादितोऽपि हितमहितं वा विविच्य कर्म प्रयोज्यं चिकित्सा कर्तव्या ॥ ४१—४७ ॥

प्रकरणमिदमुपसंहृत्य आसवद्रव्यनिर्णयप्रकरणमारिरिप्सुस्तदर्थं शिष्यप्रश्नमाह तदात्रेयस्येति। केवल: कृत्स्न:। अनपवादमनिन्दितम् ॥४८॥

'तान्यासवद्रव्याणि असंसृष्टानि चतुरशीतिभेदभिन्नान्याह तमुवाचेति। आसवानां नव योनीन् आह धान्येति। तास्वेव योनिषु। द्रव्यसंयोगकर-णत: द्रव्याणां धान्यादीनां संयोगत: मधुगुडादिसंयोगात् यत् करणं संस्कार: आसूतत्वमित्याशय:। पथ्यतमं हिततमम्। चतुरशीतिप्रकारान् आसवान् धान्यादियोनिभेदेन प्राह तद्यथेति। तत्र सुरा पक्वतण्डुलोत्था। सौवीर-लक्षणन्तु यथा "सौवीरन्तु यवैरामै: पक्वैर्वा निस्तुषै: कृतम्" इति। तुषोदक-लक्षणन्तु "तुषोदकं यवैरामै: सतुषै: शकलीकृतै:" इति। मैरेयन्तु "धातकीपुष्पगुडधान्याम्लसंहितम्" इति लक्षणम्। मेदक: पिष्टकृतो मद्यभेद:। धान्याम्ललक्षणन्तु "धान्याम्लं शालिचूर्णानां कोद्रवादिकृतं भवेत्" इति। मृद्वीकादि षड्विंशति: फलासवा:। धन्वन: 'धामनि' इति भाषा। राजादनं क्षीरिका। तृणशून्यं केतकीफलम्। मृगलण्डिका विभीतकम्। कुवलं मिष्ट-बदरम्। कर्कन्धु: मरुजशृगालकोलि:। कपीतन आम्रातक:। शंखिनी यव-तिक्ता। विदारीगन्धा शालपर्णी। कृष्णगन्धा शोभाञ्जन:। द्रवन्ती लघुदन्ती। उरुवक एरण्ड:। प्रियंगुक: पीतशाल:। अश्वकर्ण: शालविशेष:। असन: स्वर्जवृक्ष:। अरिमेद: विट्खदिर:। स्यन्दन: तिनिश:। कदर: श्वेतखदिर:। किणिही अपामार्ग:। उत्पलं नीलोत्पलम्। नलिनं श्वेताष्टदलपद्मम्। कुमुद: श्वेतोत्पलम्। सौगन्धिकं नीलाभं क्षुद्रोत्पलम् 'सुदि' इति वंगे। पुण्डरीक: शतपत्रं श्वेतपद्मम्। शतपत्रन्तु रक्तवर्णम्। काण्डेक्षु: काशदण्ड:। इक्षु-बालिका 'खागर' इति भाषा। पुण्ड्रक: पुष्टेक्षु:। ताडपत्रं 'ताडाट्' इति भाषा। तिल्वक: रक्तलोध्रम्। क्रमुक: गुवाक:। आसुतत्वात् सन्धानविशेषात्। नन्वसंख्येया आसवा दृश्यन्ते तत् कथमुच्यते चतुरशीतिरित्याह एवमिति।

चतुरशीतिप्रकारमासवद्रव्यमिति असंसृष्टैः स्तैर्जातानां चतुरशीतित्वं संसृष्टानां पुनरसंख्येयत्वं भवतीत्याह द्रव्येति। द्रव्यसंयोगविभागविस्तरतः बहुप्रकार-द्रव्यसंयोगविभागवशात् तथा संस्कारतः पृथक् पृथक् संस्कारविशेषात् तेषां बहुविधो विकल्पो भवति। तत्र हेतुमाह यथेति। हि यतः तथाभूता एवा-सवाः कार्यसमर्थाः। तत्रापि हेतुमाह संयोगेति। कर्मानुसारतः देशकालमात्रा-दय उपदिश्यन्ते केचिद् यवपल्ले केचिन्मृत्तिकाभ्यन्तरे केचित् पश्चात् केचिन्मासात् सञ्जातसन्धाना भवन्तीत्यर्थः। आसवगुणानाह भवति चात्रेति॥ ४६—५०॥

अध्यायार्थं निवेदयति तत्र श्लोक इति। निगदार्थमन्यत्॥ ५१॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपि-
कायां चरकटिप्पण्यां सूत्रस्थाने यज्ञःपुरुषीयो
नाम पञ्चविंशोऽध्यायः॥ २५॥

षड्विंशोऽध्यायः।

वक्तव्येऽन्नपानचतुष्के आहारस्य स्थूलतो हिताहितत्वं संवर्ण्य साकल्येन आहारद्रव्याणां हिताहितत्वं व्याचिख्यासुस्तच्च रसवीर्यविपाकाश्रय-मिति तान् रसादीन् व्याख्यातुमध्यायान्तरमारभते अथात इत्यादिना। तत्र च विवदतां महर्षीणां नानापूर्वपक्षानुद्धृत्य सिद्धान्तवचनं त्रिविधशिष्य-शिक्षायै प्रभवतीति तेषां महर्षीणां नामान्युल्लिख्य वादोपष्टम्भं दर्शयति आत्रेय इति। अनघः निष्पापः। मौद्गल्य इति पूर्णाक्षस्य गोत्रनाम। भरद्वाज इति कुमारशिरसः। वैदेहो राजा विदेहाधिपतिर्निमिः। बाह्लीको बाह्लीक-देशजः। तद्देशजभिषजां मध्ये वरः श्रेष्ठः कांकायनः। श्रुतवयोवृद्धाः ज्ञान-वृद्धा वयोवृद्धाश्च। विजिहीर्षवः विहर्तुमिच्छवः समीयुः समवेताः। रसा-हारविनिश्चये रसविनिश्चये आहारविनिश्चये च॥ १—७॥

तेषां स्वानि स्वान्यभिमतानि रसविनिश्चये प्राह एक एवेति। रसने-न्द्रियग्राह्यत्वं पुरस्कृत्यैव रसस्यैकत्वम्। स च रस उदकादनन्यः अब्भूत-समवेत इत्यर्थः। रसस्याबधातोरेवासाधारणगुणत्वात्। जिह्वावैषयिकं रसनेन्द्रियविषयम्। रसस्य क्रियामाश्रित्य शाकुन्तेयो रसस्य द्वैविध्यमाह द्वौ रसाविति। तत्र लवणाम्लकटुकानां छेदनीयत्वम्, मधुरतिक्तकषायाणा-मुपशमनीयत्वम्। तत्रापि मिश्ररसस्योभयक्रियामिश्रणात् पूर्णाक्षो रसानां त्रित्वमाह त्रय इति। तत्र साधारण इति मिश्ररसानाम्। पुनश्च रसानां प्रभावं जनानामासक्तिञ्चाभिसमीक्ष्य हिरण्याक्षो रसानां चातुर्विध्यमाह चत्वार इति। कुमारशिरास्तु रसाश्रयद्रव्याणां भूम्यादिजत्वेन पञ्चविधत्व-माह पञ्चेति। तदाश्रयभूतानां भूतानां गुणान् वीक्ष्य तानेव रसान् प्रति-पिपादयिषुर्वार्यविदः स्वमतमुदाहरति षडिति। निमिस्तु क्षारमपि रसाना-

व्याचिख्यासितव्ये रसे तदाश्रयाणां द्रव्याणां व्याख्यानमेव प्राक् कर्तव्यमिति तदेव वक्तुं प्रक्रमते अथे त्विति। अत्र किञ्चिच्छब्देन आयुर्वेदे प्रयोजनभूतान्येव द्रव्याणि व्याख्यातव्यानि न तु सर्वाणीत्यर्थः अप्रसंगत्वात्। सर्वमिति। अस्मिन्नर्थे अस्मिन् आयुर्वेदतन्त्रे। आयुर्वेदे हि प्रयोजनभूतं द्रव्यं सर्वमेव पाञ्चभौतिकं पञ्चमहाभूतविकारसमुदायात्मकम्। न चात्र पृथग्भूतस्य क्रियाकारित्वमपेक्षितं न वा भूतेभ्यः परं केषां पदार्थानां विवेचनं वर्तते। यदुक्तं सुश्रुते "भूतेभ्यो हि परं यस्मान्नास्ति चिन्ता चिकित्सिते" इति। तद्द्रव्यं द्विविधं चेतनामत् सेन्द्रियम् अचेतनं निरिन्द्रियमित्यर्थः। यदुक्तं "सेन्द्रियं चेतनं द्रव्यं निरिन्द्रियमचेतनम्" इति। तस्य द्रव्यस्य गुणाः शब्दादयः पञ्च विषयाः गुर्वादयश्च विंशतिः सांसिद्धिका भवन्ति। अत एवास्थायिगुणानां परापरत्वादीनामत्रानुल्लेखो न दोषावहः। ते च कदाचित् कस्मिंश्चिद् द्रव्ये तिष्ठन्ति कदाचिद्वा नेति न तदनुसृत्य-का अपि क्रिया भवन्तीति तेषामप्राधान्यं वर्तत एव। तेषुपाञ्चभौतिकेषु द्रव्येषु प्राधान्यात् पार्थिवादीनामनपवादलक्षणं शरीरे च क्रियाः प्राह तत्रेति। विशदोऽपिच्छिलः। संघातो दृढ़संयोगः घन इत्यर्थः। उपचयादिकराणि शरीरस्येति शेषः। बन्ध आश्लेषः। प्रह्लादः शरीरेन्द्रियाणां तर्पणम्। सूक्ष्मं सूक्ष्मस्रोतोऽनुगामित्वम्। प्रभा वर्णप्रकाशिनी दीप्तिः। ग्लानिः शरीरशुष्कता। विचारः पृथक्करणम्। सौषिर्यं सच्छिद्रता। नन्वाकाशात्मकस्य द्रव्यस्यापरोक्षत्वात् कथं तत्र गुणोपलब्धिः स्यादित्युच्यते अत्र सर्वमेव द्रव्यं पाञ्चभौतिकमिति आकाशभूतबाहुल्येनापि न तद्द्रव्यमपरोक्षं भवितुमर्हति इतरभूतानां प्रत्यक्षत्वेनास्य प्रत्यक्षेणोपलब्धिः सिध्यति। तत्र तत्तद्भूतबाहुल्यात् तदात्मकं द्रव्यमिति व्यपदेशः क्रियते। उक्तं हि "नानागुणसन्निपाते भूयसां स्यात् सधर्मकत्वम्" इति। तच्च पृथिव्यादीनामल्पत्वेनाकाशभूतबाहुल्येन ज्ञेयम॥ ११॥

एवं सर्वद्रव्याणां पृथक्पार्थिवादिनिर्देशेन जगत्येवं किञ्चिद् द्रव्यं नास्ति यदौषधिरूपेण प्रयोक्तुं न युज्यते। शरीरस्यापि पाञ्चभौतिकत्वेन तद्धातूनामपि तन्मयत्वेन च यत्किञ्चिद् द्रव्यमभ्यवह्रीयते तच्छारीरधातूनां समानत्वेन वैशिष्ट्येन वा तेषामुपचयापचयकरं नूनं भवतीति सर्वमेव द्रव्यमौषधीभूतं भवति इत्याह अनेनेति। नन्वेतावता पाश्चात्यानामप्यौषधीनां प्रयोगस्तस्मिन् तस्मिन् व्याधौ आयुर्वेदसम्मतमेव भवतीति चेत्सत्यम्। तच्च द्रव्यं शरीरे क्रियाविशेषाद् धातूनां साम्यं वैषम्यं वा नूनं सम्पादयति परन्तु तत्प्रयोगः पाश्चात्यदृष्ट्या रोगकारणकृमिप्रत्यनीकत्वेन नायुर्वेदसम्मतो भवति। इदं हि पाश्चात्यमौषधमस्मिन् व्याधावस्मिन् शरीरे द्रव्यप्रभावाद् गुणप्रभावाद् द्रव्यगुणप्रभावाद्वा एवं कर्म करोतीत्यध्यवसानमेव आयुर्वेदसम्मतं भवितुमर्हति न तु क्रिमिप्रत्यनीकत्वेन इत्याह न तु केवलमिति। न सर्वत्र द्रव्याणि गुणप्रभावादेव कर्म कुर्वन्ति। तत्र द्रव्यप्रभावाद् यथा दन्ती विरेचयति।

गुणप्रभावाद् यथा मातुलुंगफलं पाचयति, द्रव्यगुणप्रभावाद् यथा किरात-तिक्तकं तिक्तेन रसेन पित्तघ्नं सत् स्वप्रभावाद् ज्वरघ्नं भवति। तस्मिन् तस्मिन् उपयुक्ते काले तत्तदधिष्ठानं व्याधितम्। युक्ति योजनाम्। अर्थं प्रयोजनम्। व्याधिनिवारणरूपम। तत्कर्म चिकित्सेत्यर्थ:। अत्र वीर्यशब्देन गुणवीर्य-विपाकप्रभावाणांपरिग्रह: क्रियते। यत्र यस्मिन समये। यथा इतिकर्तव्यता-पुर:सरम्। फलमिति व्याधिनिवृत्तिरित्यर्थ:॥ १२—१३॥

द्रव्यभेदमुक्त्वा अवसरवशात् ससृष्टरसभेदानाह भेद इति। एषां षण्णां रसानां द्रव्यदेशकालप्रभावात् द्रव्यप्रभावाद् यथा कदल्यां मधुराम्ल-कषायसंसर्ग: आम्रे मधुराम्लसंसर्ग: इत्यादि। देशप्रभावात् जांगले देशे रूक्षरसानां कटुतिक्तकषायाणां संसर्ग: प्राय: सर्वत्र भवति। आनूपे च स्निग्धरसानाम्। कालप्रभावात् हेमन्ते प्रायशो मधुरसंसर्गो भवति वर्षा-यान्तु अम्लसंसर्ग:। एवं षडपि रसा: परस्परं बहुधा संसर्गमेत्य त्रिषष्टिविधा: भवन्तीत्यर्थ:॥ १४॥

तान् भेदान् द्वित्रादिसंयोगक्रमेणाह स्वादुरिति। तत्र द्विरससंयोग: पञ्चदशधा भवति तद् यथा—प्रथमो रस: द्वितीयादियोगेन पञ्चविध:, द्वितीयश्च तृतीयादियोगेन चतुर्विध:, तृतीयश्च चतुर्थादियोगेन त्रिविध:, चतुर्थश्च पञ्चमादियोगेन द्विविध:, पञ्चमश्च षष्ठयोगेनैकविध इति पञ्च-दशधा भवति॥ १५॥

विंशतिस्त्रिरसद्रव्याण्याह पृथगिति। मधुरस्य पृथगम्लादियुक्तस्य शेषै: तत्पररसै: योग: दशधा भवेत्। एवमम्लस्य पृथग् लवणादियुक्तस्य शेषै: पररसै: योग: षड्विधो भवेत्। एवं लवणस्य पृथक् कट्वादियुक्तस्य शेषै: परवर्तिरसै: योगस्त्रिविधो भवति। एवं कटोश्च तिक्तयुक्तस्य शेषेण कषा-येण योग: एकविध एवेति साकल्येन विंशतिर्भवति॥ रसचतुष्टयसंयोगात् चतूरसानि द्रव्याणि पञ्चदशविधानि भवन्तीत्याह वक्ष्यन्ते इति। सहितौ एकत्र मिलितौ स्वाद्वम्लौ पृथग्लवणाद्यै: पृथग्योगं गतौ सन्तौ तत्र शेषै: कट्वादिभि: सह पृथग्योगं यात: प्राप्नुत:, एवं चतुष्करसा: संख्यया षडेव भवन्ति तद् यथा—स्वाद्वम्ललवणकटुकं, स्वाद्वम्ललवणतिक्तम, स्वाद्व-म्ललवणकषायं, स्वाद्वम्लकटुतिक्तं स्वाद्वम्लकटुकषायं, स्वाद्वम्लतिक्तकषाय-श्चेति। पुनश्च सहितौ स्वादुलवणौ पृथक् कट्वादिभिर्युक्तौ तिक्तादिभि: पृथग् योगं यात: प्राप्नुत:। इति त्रय एव भवन्ति तद्यथा—स्वादुलवणकटुतिक्तं स्वादुलवणकटुकषायं स्वादुलवणतिक्तकषायश्चेति। तथा पूर्ववत् स्वादूषणौ स्वादुकटू मिलितौ तिक्तकषायेण सह एकविध एव भवति इति मधुर-संसर्गात् चतूरसं द्रव्यं दशधा भवति। पुनश्च अम्ललवणौ सहितौ कट्वाद्यै: पृथक्संयुक्तौ शेषै: पृथग्योगं यात: प्राप्नुत:। एवं त्रय एव संयुक्तरसा भवन्ति तद्यथा—अम्ललवणकटुतिक्तम् अम्ललवणकटुकषायम् अम्ललवणतिक्त-कषायश्चेति। पुनरम्लकटू मिलितौ इतररसद्वययोगेन एकविध एव भवति

इति अम्लसंयोगाच्चतुर्विधाः रसा भवन्ति। अन्तिमस्तु लवणोषणौ तिक्तेन कषायेण च सह मिलितौ एकविधो भवति इति चतूरसाः पञ्चदशधा भवन्ति। पञ्च रसान्याह षडिति। षट्सु रसेषु एकैकस्य परित्यागात् षडेव पञ्चरसानि द्रव्याणि भवन्ति। एकरसानि द्रव्याणि तु षडेव षड्रसस्तु एक एव इति। उपसंहरति इतीति। इति संयुक्तरसानां द्रव्याणां संख्या सप्तपञ्चाशत् असंयुक्तरसानां संख्या षट् भवति॥ १७-२२॥

एवं त्रिषष्टिविधानां रसानामपि रसानुरसकल्पनया भागानां तारतम्येन ते असंख्येया भवन्तीत्याह त्रिषष्टिरिति। परन्तु एवमसंख्येयत्वेऽपि चिकित्सायां प्रयोजनत्वेन संयुक्तरसानां सप्तपञ्चाशत् मौलिकरसानां षडिति त्रिषष्टिधा कल्पना पण्डितैः कृतेत्याह संयोगा इति। एवं रसभेदे व्यवस्थिते चिकित्सासौकर्यं दोषभेदेन दोषाणां तारतम्येन हीनातिवृद्धिसमतां च वीक्ष्य भवतीत्याह क्वचिदिति। दोषभेदेन क्वचित् एकरसं भेषजं योज्यं क्वचिद्वा संयुक्तरसम्। गदान् प्रति पृथक् पृथग् व्याधिमभिसमीक्ष्येत्यर्थः। एवमेकदोषजे व्याधौ प्रायो मौलिकरसानामेव प्रयोगः स्यात्। संसर्गे च संसृष्टरसानां द्रव्याणाम्। रसभेदज्ञान् दोषभेदज्ञांश्च स्तौति यः स्यादिति। रसदोषविकल्पज्ञो हि सर्वविधविकाराणां हेतुं लिंगं चिकित्सां च ज्ञातुं सम्यक् प्रभवन्ति कस्मिंश्चिन्नवीनेऽपि व्याधौ तेषां मोहो न भवेत्। हेतुलिंगाभ्यां दोषान् ज्ञात्वा तत्प्रत्यनीकैः रसैश्चिकित्सितुं प्रभवन्ति अत एव वक्ष्यति—"विकारनामाकुशलो न जिह्रीयात् कथञ्चन" इति॥ २३-२७॥

ननु को नाम्नायमनुरस इत्याह व्यक्त इति। शुष्कस्य द्रव्यस्य चकारादार्द्रस्य वा आदौ मुखनिपाते चकारात् परस्तादपि यो रसो लक्ष्यतेऽनुभूयते स व्यक्तो रसः तद्विपर्ययेण यश्चादावन्ते वा स्पष्टतया नानुभूयते स एव अनुरसः अव्यपदेश्यतयास्य अनुरससंज्ञा स च मधुरादीनामन्यतम एव भवति तथैवायं गुणक्रियाभ्यामनुमीयते इति न अव्यक्तरसस्य सप्तमत्वं भवतीत्याह रस इति॥ २८॥

पुनश्च रसा यथा गुर्वादिगुणयोगात् तां तां क्रियां कुर्वन्ति गुणभेदाच्च क्रियावैशेष्यमपि भवति एवं परापरत्वादिगुणयोगादपि तेषां क्रियावैशेष्यं भवितुमर्हतीति ते च परापरादयो दश गुणाः विव्रियन्ते परापरत्वे इति। एते चिकित्सायाः सिद्ध्युपायाः एतानाश्रित्यैव रसाः क्रियां कुर्वन्तीत्यर्थः। तेषां लक्षणान्याह देशेति। तत्र दैशिकं परत्वं बहुतरमूर्तसंयोगान्तरितत्वज्ञानादुत्पद्यते अपरञ्च तदल्पीयस्त्वज्ञानात्। यथा कलिकातानगरात् काशीमपेक्ष्य प्रयागः परः पुनश्च इन्द्रप्रस्थमपेक्ष्य स एव प्रयागोऽपर इति। कालिकापरापरत्वे तु यस्य सूर्यपरिस्पन्दापेक्षया यस्य सूर्यपरिस्पन्दोऽधिकः स परः। यस्य च न्यूनः सोऽपरो ज्ञातव्यः। एवं वयसि माने च परापरत्वे ज्ञेये। पाकवीर्यरसादिषु च ये यस्य योग्यत्वेन गृह्यन्ते ते तत्र पराः ये चायौगिकास्तेऽपरा ज्ञेयाः। अत्रादिना प्रकृतिबलादीनां ग्रहणम्। तेषां

सर्वेषामेव अपेक्षाबुद्धिनाशान्नाशो भवति ॥ युक्तिं व्याचष्टे युक्तिश्चेति। योजना तत्तद्दोषापेक्षया तत्तद्भेषजस्य सम्यक्प्रयोगकल्पना। अयौगिक-प्रयोगस्तु न तु युक्तिर्भवति ॥ २६-३१ ॥

संख्यां व्याकरोति संख्येति। संख्या स्याद् गणितमिति गणनाव्यवहारासाधारणं कारणं संख्येत्यर्थः। सापि अपेक्षाबुद्धिजन्या भवति। संयोगमाह योग इति। सहयोगः अप्राप्तयोः प्राप्तिः, स च उभयस्पन्दनजन्यः सर्वकर्मजः एकतरकर्मज इति त्रेधा भिद्यते इत्याह द्रव्याणामिति। तत्र द्वन्द्वकर्मजो गच्छतोरुभयोः संघर्षः। सर्वकर्मजस्तु पततां वृष्टिबिन्दूनां संयोगाज्जलधारा। एकतरकर्मजश्च श्येनपर्वतसंयोगः। स च अनित्य एव कर्मजन्यत्वात् ॥ ३२ ॥

विभागं निरूपयति विभाग इति। सा च विभक्तिर्द्विधा भवति वियोगः परस्परं योगापायः भागशो ग्रहणञ्चेति। अंशांशतो ग्रहणमपि विभागशब्दवाच्यं भवतीत्यर्थः। पृथक्त्वं विवेचयति पृथक्त्वमिति। तच्च पृथक् प्रत्ययासाधारणं कारणं भवतीत्याह असंयोग इति। तत्र नैकजातिमत्वबुद्धिर्भवतीत्याह वैलक्षण्यमिति। तदेव संख्याभेदकारणमपि भवतीत्याह अनेकतेति। परिमाणं विमर्षयति परिमाणमिति। मानमिति परिमितिव्यवहारासाधारणं कारणमित्यर्थः। संस्कारमाह संस्कार इति। करणम् एकस्य द्रव्यस्य पाकादिना गुणान्तराधानं यथा व्रीहेर्लाजाः इति। अभ्यासमाह भावेति। भावानां द्रव्यगुणक्रियाणामभ्यसनं पुनः पुनरुपसेवनम्। शीलनं सततक्रिया चेति तस्य पर्यायौ। उपसंहरति इतीति ॥ ३३-३५ ॥

ननु रसस्तु गुणपदार्थ एव तस्यैव केचिद् गुणा अत्र वर्णिताः तत्कथं समञ्जस्यतीत्याह गुणा इति। गुणा न गुणाश्रयाः इतरगुणैः सह समवायसम्बन्धेन न वृत्तिमन्तो भवन्ति यदुक्तमाद्येऽध्याये "गुणादिर्निर्गुणक्रियः" इति। अतो रसगुणान् तदाश्रयद्रव्यगुणान् विद्यात्। अयमेव ग्रन्थकर्तुरभिप्रायः। अत एव ग्रन्थार्थाधिगमे को विधिरनुसर्तव्य इत्याह अतश्चेति। अत इति एवं नानार्थत्वेऽपि एकस्य शब्दस्य कस्मिन्नर्थो ग्रहणीयस्तद्विधिमनुसृत्य इत्यर्थः। प्रकृतमिति प्रकरणं यस्मिन् प्रकरणे यः शब्दोऽभिहितस्तत्प्रकरणाविरोधित्वेन इत्यर्थः। यथा औद्भिदं गणमधिकृत्य क्षाराः क्षीरं फलमित्युक्तमत्र क्षीरमिति प्रकृतत्वात् वृक्षनिर्यासे तात्पर्यम्। 'देशान्तरमिति शिरोरोगाधिकारे क्रिमिरोगातुरम्' इत्युक्तं तत्र क्रिमिजशिरोरोगातुरमित्यर्थो नेयः। कालान्तरं यथा हि वमनकाले 'प्रतिग्राहगतान् वेगानवेक्षेत' इत्यत्र वेगशब्देन वान्तं द्रव्यं ग्राह्यम्। तन्त्रकर्तुरभिप्रायस्तु रसे गुणवत्ता तदाश्रितद्रव्यस्यैव बोद्धव्या उपायस्तु तन्त्रयुक्तिरूपः अधिकरणादिः। तान् बुद्ध्वा अर्थमादिशेत् शब्दार्थं कुर्यात् ॥ ३६—३७ ॥

अतः परं रसानां षड्विभागान् यथा च ते पञ्चभूतप्रभवा अपि षट्संख्याता भवन्ति तद् व्याचष्टे षडिति। षण्णां रसानामुत्पत्तिप्रकारं

प्रदर्शयति सौम्या इति। सौम्याः सोमगुणबहुला अब्भूतबहुला इत्यर्थः। सोमशब्दोऽयं जलार्थक एव। अन्तरीक्षप्रभवा मेघान्निष्यन्दमानाः। रसस्य जलासाधारणगुणत्वेऽपि तज्जलमव्यक्तरसमेव भवतीत्याह अव्यक्तरसा इति। ततो भ्रश्यमानाः पृथिवीप्राप्तेः पूर्वमेव भ्रष्टाश्च पृथिवीपतिताः पञ्चमहाभूतगुणसमन्विताः न्यूनातिरेकभावेन अन्तरीक्षगतेन पृथिवीगतेन च पञ्चभूतेन संसृष्टा आपः तद्गुणसम्बन्धिन्यो भवन्तीत्यर्थः। ततस्ताः स्थावराणां जंगमानाञ्च प्राणिनां मूर्तीः शरीराणि अभिप्रीणयन्ति पोषयन्ति तासु मूर्तिषु स्थावरजंगमशरीरेषु षडेव रसा अभिमूर्छन्ति अभिव्यज्यन्ते ॥ ३८—३९ ॥

पञ्चभूततारतम्येनैव रसाः षड् भवन्तीति कस्य भूतस्य प्राधान्यात् पृथक् के रसा भवन्ति तानाह तेषामिति। सोमगुणातिरेकाद् अब्भूताधिक्यात्। एवं महाभूतानां षड्विभागात् षण्णां रसानामभिव्यक्तिर्भवति न ततो न्यूनोऽधिको वा एष एव द्रव्यस्वभावः तेन च तोयवाय्वाधिक्यान्न कस्य मौलिकरसस्याभिव्यक्तिर्भवतीत्याह एवमेषामिति ॥ ४० ॥

सामान्येनैषां रसानां शरीरे कर्माण्याह तत्रेति। लघुतरभूतोत्थाः रसाः प्रायेण ऊर्ध्वभाजः ऊर्ध्वगतिसम्पन्ना भवन्ति गुरुभूतोत्थाश्च अधोगामिनः। गुरुलघुव्यामिश्रभूतोत्थाश्च उभयतोगामिनो भवन्ति। तेन वमनकर्मणि कटुतिक्तानामुपयोगः विरेचने च मधुराणां उभयकर्मणि च शेषाणां प्रयोगः प्रायः साधुर्भवतीत्याशयः ॥ ४१ ॥

साम्प्रतं षण्णां रसानां पृथक् गुणकर्मादिकं विवक्षुः मधुरस्य गुणकर्माण्याह तत्र मधुर इति। शरीरसात्म्यात् नित्यप्रयोगवशात् शरीरधातुसामान्याच्च तान् वर्धयति। षडिन्द्रियप्रसादन इति मनसोऽपीन्द्रियत्वमत्राह। दशेन्द्रियप्रयोजकत्वात् तस्येन्द्रियत्वं सिध्यति। इन्द्रियाणि तु भौतिकानि मनश्चाहंकारिकमित्युपादानभेदात् तस्येन्द्रियातिरिक्तत्वमपि युज्यते। प्रीणनः प्रीत्युत्पादकः। जीवनः प्रकृष्टायुर्वर्धकत्वात् सर्वधातुपोषकत्वाच्च। क्षीणक्षते उरःक्षतजनिते क्षये सन्धानकरं उरःक्षतं सन्दधातीत्यर्थः। षट्पदानां मक्षिकाणां पिपीलिकानाञ्चेष्टतमः। एतत्कथनन्तु मूत्रादौ मधुररसस्यानुमानार्थं ज्ञेयम्। शीतो वीर्येण। तस्यातियोगेन दोषानाह स एवमिति। अनन्नाभिलाषमरुचिम्। गलशोफः अन्तर्गले शोफः कण्ठशालुकादिः। वस्त्युपलेपः वस्तिस्रोतसोः मूत्रवहाख्ययोः मलकफेन किञ्चित् संकुचितमार्गता। धमन्युपलेपस्तु अत्र धमनीशब्देन सिराः प्रत्येतव्याः तदन्तःकफोपलेपात् संकुचितमार्गत्वेन शोणितवेगवृद्धिः स्यात्। गलोपलेपश्च अन्तर्गले कफप्रदिग्धता अदृश्यामयस्त्वत्र कफजा ज्ञेयाः। अभिष्यन्दस्याद्यामयत्वेऽपि वातादिदोषजस्यापि ग्रहणार्थं पृथङ्निर्देशः ॥ ४२ ॥

अम्लं रसं गुणकर्मभ्यां विवृणोति अम्ल इति। ऊर्जयति सबलं करोति देहमित्यन्वयः। मनो बोधयति इन्द्रियपरिचालनायोग्यं करोति। इन्द्रियाणि दृढीकरोति विषयग्रहणसमर्थानि करोति। हृदयं तर्पयति हृद्यं

भवतीत्यर्थः । भुक्तमशितादिकम् अपकर्षयति तेषां विकृतिमापादयति। क्लेदयति जरयति भुक्तमेव । तस्यातियोगे दोषानाह स एवमिति । तर्षयति तृषां जनयति । लोमानि संवेजयति रोमहर्षमापादयति । अवमूत्रितं परिसर्पितञ्च सविषप्राणिभिरिति शेषः ॥ ४४ ॥

लवणं व्याकरोति लवण इति । पाचनः पचत्यामं न वह्निं च कुर्याद् यः तथा । दीपनस्तु पचेन्नामं वह्निकृच्च । च्यावनः दोषादीनां च्युतिकारकः । छेदनः "श्लिष्टान् कफादिकान् दोषान् उन्मूलयति यद् बलाद्" इति लक्षणः । भेदनः "मलादिकमबद्धञ्च बद्धं वा पिण्डितं मलैः । भित्त्वाऽधः पातयति यः" इति लक्षणम् । विकाशी "सन्धिबन्धांस्तु शिथिलान् यः करोति विकाशी तत् ।" इति लक्षणम् । अधःस्रंसी तु "पक्वव्यं यदपक्वैव श्लिष्टं कोष्ठे मलादिकम् । योऽधो नयति"सः । सर्वरसप्रत्यनीकभूतः मात्रातिरिक्तेन सर्वान् रसान् नाशयति । आहारयोगी सर्वत्रैवाहारे युज्यते । तस्यातिमात्रयाभ्यवहारे दोषानाह स एवमिति । रक्तं वर्धयति इति, ननु रक्तस्य जीवाधारत्वात् तद्वृद्धौ गुण एव स्यात् न तु दोष इति चेदुच्यते । असाम्ना वर्धितं हि रक्तं धातुवैषम्यमापादयत् दोषलमेव भवेत् अन्यथा चिकित्सायां रक्तमोक्षणस्य वैयर्थ्यं प्रसज्येत । तापयति शरीरोत्तापं वर्धयति । मांसं क्वथ्णाति क्षपयति । मोहयति वैचित्त्यमापादयति । मूर्छयति संज्ञां नाशयति । कटुकं व्याचष्टे कटुक इति व्रणान् इत्युत्सन्नान् । शोणितसंघातं संहतशोणितं भिनत्ति द्रवीकरोति । बन्धान् संश्लेषान् । विवृणोति स्फुटीकरोति । तस्यातियोगे दोषानाह स एवमिति । तिक्तकषाययोरपि कटुविपाको भवतीति कटुविपाकस्य कार्यं पुंस्त्वोपघातनं न्याय्यं भवति । ग्लपयति हर्षक्षयमापादयति ।४५-४६

तिक्तरसं गुणकर्मभ्यामाह तिक्त इति । लेखनः देहस्य धातून् मलान् वा संशोष्य ईषत्कर्षकः स्यादित्यर्थः । तस्यातियोगे दोषानाह स एवं गुण इति । कषायं रसं विवृणोति कषाय इति । संशमनः "न शोधयति न द्वेष्टि समान् दोषान् तथोद्धतान् । समीकरोति विषमान्" इति तन्त्रान्तरलक्षणः । संग्राही-"दीपनं पाचनं यत् स्यादुष्णत्वाद्द्रवशोषकम् । द्रव्यं तद् ग्राहि" इति लक्षणम् । सन्धानकरः व्रणानामिति शेषः । पीडनः व्रणान् पीडयित्वा पूयनिष्काशनः । रोपणः संशुद्धव्रणान् रोपयति । शोषणः क्लेदस्य । स्तम्भनः गतिमताम् । तस्यातियोगे दोषानाह स एवं गुण इति । कर्शयति शरीरं कृशं करोति ॥ ४७—४८ ॥

उपसंहरति इत्येवमिति । अध्यात्मलोकस्य सात्मकजीवस्येत्यर्थः । मात्रशः मात्राप्रमाणमनतिक्रम्येत्यर्थः ॥ ४९ ॥

य एते रसगुणा उक्तास्ते वीर्यविपाकतोऽविपरीतगुणानामेव द्रव्याणां ज्ञेयाः । विपरीतानान्तु न रसगुणेन द्रव्यगुणो विज्ञेयः इत्याह भवति चात्रेति । शीतमिति यद्द्रव्यं रसपाकयोः रसे विपाके च मधुरं वीर्येण च शीतम्, यच्च तयोः रसविपाकयोः अम्लं वीर्येण च उष्णम्, पुनश्च यद्रस-

विपाकयोः कटुकं वीर्येण चोष्णम्, तेषां गुणसंग्रहः रसोपदेशेन निर्देश्यः रसगुणोपदेशेनैव निर्दिष्टो भवति । एतत्तु रसवीर्यविपाकानामवैपरीत्ये विधानम् । वीर्यतः पाकतश्च विपरीतानां द्रव्याणां गुणसंग्रहस्तु उपदेक्ष्यते इतः परस्तात् परे चाध्याये । अविपरीतानि द्रव्याण्युदाहरति यथेति । पयः सर्पिश्च रसपाकतो मधुरे वीर्यतश्च शीते । चव्यचित्रके च रसपाकतः कटुके वीर्यतश्चोष्णे भवतः । तत्र प्रायो मधुरतिक्तकषायाणां शीतं वीर्यं भवति । कटुकाम्ललवणानाञ्च वीर्यमुष्णं भवतीति ज्ञेयम् । तेनैव वीर्यस्य वैपरीत्या-वैपरीत्यं उद्भूकनीयं भवति ॥ ५०—५२ ॥

वीर्यविपरीतानां स्तोकं दृष्टान्तमाह मधुरमिति । किञ्चिद् द्रव्यं मधुरं तिक्तं कषायं वा उष्णवीर्यं भवति । यथा महत्पञ्चमूलं कषायं तिक्तानुरसमपि उष्णवीर्यं भवति । एवमब्जमानूपं वा आमिषं मधुरमपि उष्णवीर्यं भवति । लवणमपि सैन्धवं शीतवीर्यं अम्लमप्यामलकं तथैव भवति । अर्कादीनां तिक्तानामप्युष्णवीर्यत्वम् उच्यते । एवम् अम्लरसस्य भेदित्वेऽपि स्वतःसिद्धे किञ्चित् संग्राहि किञ्चिद्वा भेदि भवति । कटुरसस्यावृष्यत्वेऽपि पिप्पली-नागरयोर्वृष्यत्वं दृश्यते । कषायस्य शीतवीर्यस्य स्तम्भकत्वेऽपि हरीतक्या-मन्यथा दृश्यते इत्याह तस्मादिति । षण्णां रसानां रूक्षत्वादिषु उत्तमाधम-मध्यमत्वं निरूपयति रौक्ष्यादिति । रूक्षाणां द्रव्याणां मध्ये रौक्ष्यात् कषायः उत्तमः रूक्षतम इत्यर्थः । कटुस्तु मध्यमः रूक्षतरः तिक्तस्त्ववरः रूक्ष इत्यर्थः । उष्णत्वे तु लवण उष्णतमः अम्ल उष्णतरः कटुरुष्णः । स्निग्धानां मध्ये स्नेहान् मधुरः स्निग्धतमः अम्लः स्निग्धतरः लवणश्च स्निग्धो निरुच्यते । शैत्यात् स्वादुः शीततमः कषायः शीततरः तिक्तश्च शीतः । गुरुत्वान् मधुरो गुरुतमः कषायः गुरुतरः लवणो गुरुः । लघुत्वात् तिक्तो लघुतमः कटुर्लघु-तरः अम्लो लघुरित्यर्थः । अत्र एकीयमतमुल्लिख्य अप्रतिषिध्य स्वीकरोति केचिदिति । नन्वेकस्य लवणस्य इतरेतरप्रत्यनीकं गुरुत्वं लघुत्वञ्च कथं सम्भवतीत्युच्यते । गुरुत्वलघुत्वे च सापेक्षिके अतो लवणस्य अम्लकटु-तिक्तेभ्यः गुरुत्वेन स्वादुकषायाभ्यां च लघुत्वेन तस्य गौरवे लाघवे चावरत्वं सिध्यति ॥ ५३—६१ ॥

विपाकवीर्यप्रभावाद् रसगुणा अन्यथा भवन्तीति तयोर्विवरणं कर्तव्य-मतो विपाकं विवृणोति परमित्यादि । षडरसानामपि द्रव्याणां विपाकस्तु त्रिविधो भवति । तानि च संजीर्य त्रिविधरसोत्पत्त्या मूलधातुत्रयेण परि-णमन्तीत्यायुर्वेदराद्धान्तः । यद् वक्ष्यति—"अन्नस्य भुक्तमात्रस्य षड्रसस्य प्रपाकतः । मधुरात्तात् कफो भावात् फेनभूत उदीर्यते ॥ परन्तु पच्यमानस्य विदग्धस्याम्लभावतः । आशयाच्च्यवमानस्य पित्तमच्छमुदीर्यते ॥ पक्वाशयन्तु प्राप्तस्य शोष्यमाणस्य वह्निना । परिपिण्डितपक्वस्य वायुः स्यात् कटु-भावतः ॥" इति (चि० १५) अत्र षड्रसस्याप्यन्नस्य त्रिविधादेव विपा-कात् कफादीनां त्रिधातूनामुत्पत्तिर्गीयते । तत्र सामान्यतः के रसाः कस्मिन्

विपाकजन्यरसे परिणमन्ति तदाह कटुतिक्तेति। अत्र प्रायश इति कथनेन न खलु सर्वत्रैवायं विधिः स्वीक्रियते। अतो भूयिष्ठतया एवं विपाको सर्वरसानां भवतीत्यर्थः। तत्र पृथिव्यम्बुबाहुल्यात् मधुररसस्याधिक्येन मधुरविपाक एव भवति तेन प्राधान्येन श्लेष्मजननम्। अम्ले अग्न्यंशबाहुल्यात् अम्लविपाकस्तेन चाधिक्येन पित्तजननम्। तत्र चाल्पतया मधुरविपाकोऽपि पृथिव्यंशाद् भवति। अतः स्तोकतया श्लेष्मजननमप्यत्र भवति। लवणस्याप्येवं तोयाग्निबाहुल्याद् भवति। कटोस्तु प्राधान्येन कटुविपाकः तेन वातजननम्—अग्न्यंशाच्च स्तोकमम्लविपाकस्तेन च पित्तजननं भवति। तिक्तस्य तु कटुविपाक एव तेन वातजननम्। कषायस्य बाहुल्येन कटुविपाकस्तेन वातजननं स्तोकञ्च पृथिव्यंशान् मधुरविपाकस्तेन स्वल्पं श्लेष्मजननं भवति। विपाकलक्षणन्तु तन्त्रान्तरेऽप्युक्तं यथा—"जाठरेणाग्निना योगाद् यदुदेति रसान्तरम्। आहारपरिणामान्ते स विपाक इति स्मृतः॥" इति (अ० स०) अत्राहारपरिणामान्ते इति षड्रसानां द्रव्याणां पृथक् त्रिविधपरिणामस्य अन्तं यावदित्यर्थः। अतः प्रथमपरिणामे श्लेष्मोत्पत्तिर्मधुरीभावात्। द्वितीयपरिणामे पित्तोत्पत्तिरम्लीभावात् तृतीये च वातस्य पृथग्भावः कटुभावाज्ज्ञेयम् ६२-६३

विपाकगुणान् विवक्षुः षड्रसानां स्निग्धरूक्षत्वं निरूपयति मधुर इति। तेन मधुराम्लविपाकयोः स्निग्धत्वं वातादिनुलोमकत्वं कटुविपाकस्य च रूक्षत्वं वातादिविवर्धकत्वं च बोद्धव्यम्। विपाकानां पृथग्गुणानाह शुक्रहा इति। पुनरपि द्रव्याणां पाञ्चभौतिकत्वेन एकरसं द्रव्यं दुर्लभमेव अतः सर्वेषां द्रव्याणां त्रिविध एव विपाको भवति। तत्र रसप्राधान्येन कश्चिद् विपाकः प्रधानः कश्चिद्वा मध्यः कश्चिद्वा स्वल्पो भवतीति प्रतिपिपादयिषुराह विपाकेति। द्रव्याणां गुणवैशेष्यात् पृथिव्यादिभूतानां मात्रावैशेष्यात् यद्रसवैशेष्यं भवति तस्मात्। अत्र गुणशब्देन गुणिनः पृथिव्यादय उच्यन्ते अतः पञ्चमहाभूतवैशेष्यादित्यर्थः। सुश्रुतेऽपि गुणशब्देन भूता विवक्षिताः यथा—"पञ्चभूतात्मके देहे आहारः पाञ्चभौतिकः। विपक्वः पञ्चधा सम्यक् गुणान् स्वानभिवर्धयेत्।" इति पुनश्च "तोयाकाशगुणभूयिष्ठं मृदुत्वम्" इत्यादि। विपाकलक्षणस्यापि अल्पमध्यभूयिष्ठतां प्रति प्रतिरत्र भागे। तत्र तत्र द्रव्ये भागशः उपलक्षयेत्। तेन प्रतिद्रव्ये प्राधान्येन व्यपदेशे सत्यपि तत्र तत्र पृथग्विपाकानाम् अल्पत्वं मध्यत्वं भूयिष्ठत्वञ्च जानीयात्। तेन प्रतिद्रव्यं त्रय एव विपाका भवन्ति। तत्र मधुरप्रधाने मधुरविपाकस्य भूयिष्ठता इतरयोस्त्वल्पता ज्ञेया। एवमम्लप्रधाने अम्लविपाकभूयिष्ठता मधुरस्य मध्यता कटोश्चाल्पता ज्ञातव्या। यतो यत्र द्रव्ये पृथिव्यग्निभूतयोराधिक्यं भवति तस्यैवाम्लो रसो भवति अतस्तत्राग्निभूतस्याधिकतमत्वादम्लविपाकः श्रेष्ठः पृथिवीभूतस्य मध्यत्वेन मधुरविपाकस्य मध्यत्वम् इतरभूतानामल्पत्वेन स्तोकं तत्रापि कटुविपाको भवत्येव। एवं सर्वद्रव्यपरिणामेन शरीरमूलधातूनामुत्पत्तिः सम्भवति। एवं तेन धातुसाम्यात् शरीरमरुजं तिष्ठति।

द्रव्यगुणवर्णने सर्वत्रैव वातलत्वादिकं प्राधान्येन व्यपदेशः। न तु तस्मादितरयोर्धात्वोरुत्पत्तिर्न भवतीति युक्तियुक्तं लौकिकं वा भवति ॥ ६४—६८ ॥

वीर्यलक्षणं विवक्षुरादौ तत्र एकीयमतेन भेदान् वक्ति मृदुतीक्ष्णेति। ननु मृदुतीक्ष्णादयो द्रव्याणां गुणा एवेति गुणवीर्ययोः को भेद इति चेत् कथ्यते—ये च गुणाः जीर्णेष्वप्याहारद्रव्येषु परिणतेष्वप्यन्येषु शारीरद्रव्येषु तत्राप्यनुबध्नन्ति त एव वीर्यशब्देन कथ्यन्ते। शारीरिकी क्रिया तैरेव भवतीति तानि च रसानप्यभिभूय क्रियाः कुर्वन्तीति तानि गुणेभ्यः पृथगेव निर्दिश्यन्ते। यद् वक्ष्यत्यत्रैव "वीर्यं यावदधिवासात्" इति। यावदाहारपरिणतानि शारीरद्रव्याणि शरीरे तिष्ठन्ति, तावत् तानि क्रियाः कुर्वन्तीत्यर्थः। पुनश्च यदुक्तं सुश्रुते "एतानि वीर्याणि स्वबलगुणोत्कर्षाद् रसमभिभूयात्मकर्म कुर्वन्ति" इति। यथा तिक्तकषायं महत्पञ्चमूलं रसतो वातवर्धनयोग्यमपि उष्णवीर्यत्वात्तं शमयति। मधुरश्चेक्षुरसः वातप्रत्यनीकोऽपि शीतवीर्यत्वात्तं वर्धयति। कटुकायाः पिप्पल्याः पित्तवर्धनयोग्यत्वेऽपि मृदुशीतवीर्यत्वात्तत् शमयति। मधुरं क्षौद्रं श्लेष्मवर्धनयोग्यमपि रूक्षवीर्यत्वात्तं शमयति। एभिर्निदर्शनैः सर्वत्रैव वीर्यस्य रसाभिभव उन्नेयः। वीर्यस्य अष्टविधत्वं द्वैविध्यञ्च मतद्वयमायुर्वेदसम्मतमेव। तत्र शीतोष्णयोः। शरीरे अधिवासं यावत् स्वयमेवानुभूयमानत्वेन तयोः प्राधान्येन द्वैविध्यमतं स्वारसिकमेव भवति। यद्यपि शरीरे द्रव्यमेव क्रियाकर्तृ तथापि वीर्येण करणेनैव क्रिया भवन्तीति तत्प्राधान्यमाह नावीर्यमिति ॥ ६६—७० ॥

साम्प्रतं रसविपाकवीर्याणां गुणमात्रत्वेऽप्युपलब्धिपार्थक्याद् भेदमाह रस इति। अयमर्थः—रसस्तु जिह्वासंयोगादेवोपलभ्यते। विपाकस्तु प्रतिविपाकान्ते पृथक्परिणतिवशादुपलभ्यते। वीर्यन्तु प्राक् जिह्वासंयोगात् तीक्ष्णोष्णादिकमुपलभ्यते पश्चाद् विपाकानन्तरं परिणते देहधातौ यावत् स धातुः शरीरे तिष्ठति तावच्चानुभूयते इति विशेषः ॥ ७१ ॥

द्रव्यगुणानधिकृत्य रसवीर्यविपाकान् व्याख्याय तज्जञ्च क्रियाक्रमं निवेद्य कदाचिद् द्रव्यमेव गुणनिरपेक्षतया किञ्चित् कार्यं करोतीति प्रतिपिपादयिषुः द्रव्यप्रभावं निर्वक्ति रसवीर्येति। प्रभाववशाद् द्रव्यमेव गुणान् निर्जित्य स्वबलोत्कर्षात् किञ्चित् कार्यं करोति, स एव द्रव्यप्रभावसंज्ञ इत्यर्थः। तत्रोदाहरणानि दर्शयति कटुक इति। अत्र दन्तीचित्रकयोः रसवीर्यविपाकानां साम्येऽपि दन्त्या विरेचकत्वमस्याः प्रभावः। यन्मौलं विषं दंष्ट्राविषमपहन्ति तदुभयोः रूक्षत्वादिगुणसाम्येऽपि प्रभाववशादेव भवति। एवं कस्यचिद् द्रव्यस्य उभयभागहरत्वं प्रभाववशादेव भवतीत्यर्थः। अचिन्त्यः युक्त्या प्रतिपादयितुमशक्यः ॥ ७३—७५ ॥

उपसंहरति सम्यगिति। रसादीनां स्वाभाविकं बलमाह रसमिति। अयमर्थः—रसविपाकयोः प्रत्यनीकत्वे विपाकानुसारतः रसविपाकतो वीर्यस्य वैपरीत्ये वीर्यानुसारतः क्रिया स्यात्। प्रभावस्तु रसादिप्रत्यनीकोऽपि तान्

निर्जित्य क्रियां करोतीत्यर्थ: ॥ ७६—७८ ॥

पारिशेष्यात् षण्णां रसानां विज्ञानोपयोगिकानि लक्षणान्याह षण्णामिति । प्रीणनं तृप्ति: । आह्लादस्तु मनसो विकाश: । स्वेदनादुष्णताबोधात् । मुखबोधनात् मुखस्य जडतानाशात् । संवेजयेदित्युद्वेजयेत् । निपाते जिह्वासंस्पर्शे प्रतिहन्ति न जिघृक्षन्ति । तिक्तस्य प्रह्लादकारकत्वन्तु भक्तरुचिकारकत्वाज्ज्ञेयम् । यदुक्तं सुश्रुते "भक्तरुचिञ्चापादयति हर्षञ्च स तिक्त:" इति (सू० ४२ अ०) विकाशी वैशद्यकरत्वात् स्रोतांसि विकाशयतीत्यर्थ: ॥७६-८४॥

ननु सर्वत्रैवाहारद्रव्याणि शरीरधातून् पोषयन्ति शरीरहिताय भवन्तीति न दृश्यते कानिचित् संयोगादिविशेषादहितायैव सम्पद्यन्ते इत्यप्युपलभ्यते, अत: शरीरवैरोधिकानामपि ज्ञानं नूनमावश्यकमिति तद्विषयकशिष्यप्रश्नमाह एवंवादिनमिति । अवितथं सत्यसिद्धान्तम् । तदुत्तरमाह गुरु: तमुवाचेति । देहधात्विति । देहधातुप्रत्यनीकभूतानीति देहधातवस्त्वत्र मलान् वर्जयित्वा त्रयो वातादिमूलधातव: सप्त च रसादिबलधातवो ज्ञेया: । तेषां प्रत्यनीकभूतानि न तै: सह यानि तादात्म्यमाप्नुवन्ति तानि । केन प्रकारेण तानि विरोधमापद्यन्ते तं विवृणोति परस्परेति । परस्परगुणविरुद्धानि गुणशब्देनात्र रसवीर्यविपाकानामपि परिग्रहस्तेन रसतो वीर्यतो विपाकतश्च परस्परविरुद्धानि द्रव्याणि देहधातुप्रत्यनीकभूतानि भवन्तीत्यर्थ: । कानिचित् समानगुणान्यपि अपरद्रव्यसंयोगाद्देहधातुविरुद्धानि भवन्ति । कानि वा तथाभूतान्यपि संस्कारात् पाकविशेषात् कानि वा देशानुसारत: कालानुसारतो मात्रानुसारतो वा देहधातुप्रत्यनीकानि, कानि वा स्वभावात् विषवद् प्रत्यनीकानि भवन्ति । तत्र परस्परगुणादिविरुद्धानि यथा—मधुराम्लौ रसवीर्यविरुद्धौ मधुरलवणौ मधुरकटुकौ च रसवीर्यविपाकत: । मधुरतिक्तौ रसविपाकाभ्यामेवं रसादिविरुद्धान्युट्टंकनीयानि भवन्ति । संयोगादिविरुद्धानि वक्ष्यन्तेऽग्रे ॥ ८५—८६ ॥

एवं सामान्यतो विरुद्धान्युद्दिश्य यान्याहारद्रव्याणि भूयिष्ठं वैरोधिकान्युपसेव्यन्ते जनताभिस्तेषामेकदेशमाह तत्रेति । तत्रादौ संयोगविरुद्धान्याह न मत्स्यमिति । तयोर्वैरोधिकत्वे हेतुमाह उभयं हीति । हि यत: । महाभिष्यन्दि तीव्रतया अभिष्यन्दि । तल्लक्षणमाह तन्त्रान्तरे—"हृदयस्थान्ननिर्यासबहि:स्रोतोमुखानि यत् । भुक्तं लिम्पति पैच्छिल्यादभिष्यन्दि तदुच्यते ॥" इति । अत्र अन्ननिर्यास: अन्नरस: येन सर्वे धातव: पोष्यन्ते । अत: स च देहधातुस्रोत:सञ्चारी भवति इत एव अभिष्यन्दि द्रव्यं देहधातुस्रोतसां क्लेदकारि भवति । महाभिष्यन्दि तु अत्यर्थं स्रोतसां क्लेदकारि । मार्गोपरोधाय अन्नरसस्रोतोरोधाय । अत्रैव मतान्तरमाह भद्रकाप्य: सर्वानिति । मतमेतद् भेलसम्मतम् यदुक्तं तत्संहितायाम्—"वृतो रोहितराजिभि: रक्ताक्ष: शकली तथा । मत्स्यश्चिलिचिमो नाम कूले चरति वारिण: । तं मत्स्यं वर्जयेदेकं दुग्धेनान्यांस्तु भक्षयेत् ॥" इति (सू० १२ अ०) । शकली प्रशस्तशल्कवान् ।

मत्स्यस्यास्य शल्कास्तु षडष्टांगुलमाना अपि भवन्ति। भूमौ भूमिसमीपे स्वल्पजलेऽपि प्रस्रवणे इत्यर्थः। मत्स्योऽयं पार्वत्यः, 'वनरुइ' 'महासोल' इति वा वंगीयैः कथ्यते ॥ ८७—८८ ॥

तन्मतमपाकरोति आचार्यः नेत्यादिना। स चिलिचिमः। स्थूललक्षणभवान् विस्पष्टरूपवतः वक्ष्माणान् षाण्ड्यादीन्। कानिचिदपराणि संयोगविरुद्धान्याह ग्राम्येति। ग्राम्यं छागादिकम्। आनूपं वराहादिकम्। औदकं मत्स्यादिकम्। विसं मृणालम्। कलमूकता कलता अव्यक्तवचनता मूकता वचनाभावः मैन्मिन्यं नासाभाषणं 'खोना' इति भाषा। रोहिणीशाकं ब्राह्मी। कृष्णागन्धा शोभाञ्जनम्। अर्जकादीनि तुलसीभेदाः। जातुकशाकः हिंगुपत्रिका। निकुचं वन्यपनसः। आम्रादीनां सर्वेषामम्लफलानां पयसा सह मिश्रणं विरुद्धं भवेत्। पद्मोत्तरिका कुसुम्भः। संस्कारविरुद्धमाह हारिद्रक इति। हारिद्रकः हरिद्रावर्णः वन्यकपोतविशेषः 'हरियाल' इति प्रसिद्धः। मन्थः "सक्तुभिः सर्पिषाभ्यक्तैः शीतवारिपरिप्लुतैः। नात्यच्छो नातिसान्द्रश्च मन्थ इत्यभिधीयते॥" इति लक्षणः। वारुणी मद्यविशेषः। कुल्माषा अर्धस्विन्नगोधूमचणकादयः 'होराहा' इति भाषा। एरण्डाग्निप्लुष्टं ज्वलदेरण्डनालेन दग्धम्। भस्मपांशुपरिध्वस्तं भस्मना धूल्या च जुष्टम्। मत्स्यनिस्तालनसिद्धः येन तैलेन मत्स्या भृष्टास्तेन पक्वाः। मानविरुद्धमाह मधुसर्पिषीति। पुष्करं बीजं पद्मबीजम्। अंगारशूल्यः शूले विद्धा ज्वलदंगारे पक्वः मांसव्यञ्जनविशेषः 'कावाब' इति पारसिकाः ॥ ८९ ॥

अनुक्तान्यपि वैरोधिकानि समासतो लक्षयति यत किञ्चिदिति। दोषं वातादिकमुत्क्लेश्य प्रकोप्य मलीकृत्येति तात्पर्यम्। न कायान्निर्हरति निर्गच्छति तदाहारजातं विरुद्धं सद् अहिताय भवतीत्यर्थः। इतः परं कुत्र पुस्तके यच्चापीत्यादिभिः षोडशभिः श्लोकैस्तमेवार्थं विस्तरशः वर्णितमास्ते। ते च पुनरुक्तिबाहुल्यात प्रक्षिप्ता इति केचिद् वदन्ति इति पुनश्च निगदार्थत्वात् तेषां व्याख्याने न प्रयत्नः कृतः ॥ ९०–१०७ ॥

विरुद्धभोजनस्य दोषानाह षाण्ड्यान्ध्येति। दकोदरं जलोदरम्। सन्तानदोषस्य शुक्रशोणितदुष्ट्या इत्यर्थः। तेषां प्रतिकारमाह एषामिति। निगदव्याख्यातमन्यत् ॥ १०८—११२ ॥

अध्यायार्थमाह तत्र श्लोका इति ॥ ११३—११६ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां
चरकटिप्पण्यां सूत्रस्थाने आत्रेयभद्रकाप्यीयो
नाम षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्याय: ।

ननु रसवीर्यविपाकप्रभावत: प्रत्येकद्रव्यस्य गुणनिर्देशे हिताहितमाहारजातं नैव शक्यते अवबोद्धुमिति प्रधानतो द्रव्याणां गुणान् विवक्षुरन्नपानविधिं नामाध्यायान्तरमारभते अथात इत्यादिना । अत्र चतुर्विधस्याप्याहारस्यान्नपानेऽवरोधो ज्ञेय: । इष्टेति । प्राणिसंज्ञकानामिति स्थावराणां व्यवच्छेद: प्राणविशिष्टत्वेन तस्यापि प्राणित्वे न ते प्राणिसंज्ञका इति ज्ञेयम्। अन्तरग्ने: पाचकस्याग्ने: । अनशनात् सर्वांगक्षयवत् शरीरावयवभूतस्य पाचकाग्ने: क्षयो भविता । स च वातपित्तकफसमवेतरूपेणान्नरसेनैव पोष्यत इति तत्तद्धात्वाधिक्यात् प्रकृतावपि चतुर्विधो भवितुमर्हति अतोऽन्तरग्ने: स्थितिरपि आहारादेव भवतीति सिद्धम् । सत्त्वं मन: ऊर्जयति बलवत् करोति । शरीरधातुव्यूहस्य देहधातुसमूहस्य त्रयाणां मूलधातूनां सप्तानां बलधातूनां मलधातूनाञ्चेत्यर्थ: । बलस्य वर्णस्य इन्द्रियाणाञ्च प्रसादकरं क्षयपूरणेन प्रसन्नतापादकम् । यथोक्तं यथानियमम् । विपरीतमविधिपूर्वकमित्यर्थ: ॥ १—३ ॥

वक्तव्येष्वन्नपानगुणेषु प्राधान्यत: केषाञ्चिद्द्रव्याणां मुख्यान् गुणान् विवृणोति तत्स्वभावादिति । स्वभावात् प्रकृत्यैव । क्लेदयति घनान्याहार्याणि क्लिन्नानि करोति सम्यक् पाचयितुमित्यर्थ: । विष्यन्दयति महास्रोतसि पाचनानुगुणान् श्लेष्मादीन् स्रावयति । क्षार: पाचयति कठिनानप्याहारान् द्रवत्वमापादयति । सन्दधाति क्षतसन्धानं करोति । पयो गोक्षीरं देहधातुसाम्यात् तद्वर्धनाच्च जीवयति । जर्जरीकरोति मांसादीनां शैथिल्यमापादयति। अवधमयति मांसादिकं ह्रसयति । यदुक्तं तन्त्रान्तरे—"औष्ण्यात्तैक्ष्ण्याच्च रौक्ष्याच्च मेदो मांसं बलं तथा । जन्तोरवधमत्याशु तस्मात् सीधुर्न शस्यते॥" इति । दीपयति अग्निं वर्धयति । आचिनोति दोषानिति शेष: पिण्याकशाकं पिण्याकं तिलखलि: । शाकञ्च ग्लपयति मांसादीन् शोषयति । प्रभूतान्तर्मलो बहुमलवर्धक: । पित्तलमग्निभूताधिक्यात् प्राधान्येन पित्तं जनयति । श्लेष्मलमप्पृथ्वीभताधिक्यात् प्राधान्येन श्लेष्माणं जनयति । वातलं वाय्वाकाशबाहुल्यात् बाहुल्येन वातं जनयति । विश्वभेषजं शुण्ठी ॥ ४ ॥

आहारद्रव्याणां द्वादशवर्गान् उद्दिशति शूकेति । तत्र तेषां गुणादिकं विवक्षु: क्रमानुरोधादादौ शूकधान्यवर्गानाह रक्तशालिरिति । शालिधान्यविशेष: तल्लक्षणञ्च "कण्डनेन विना शुक्ला हैमन्ता: शालय: स्मृता:" इति। अत्र रक्तशाल्यादीनां पृथग्देशजत्वेन तत्तद्देशजानि नामानि तत्तद्देशीयेभ्यो ज्ञातव्यानि । त्रिमलापह इति मलशब्दोल्लेखात् साम्येन त्रिधातुकरत्वेन नात्र विषमधातूनां मलाख्यानामभिवृद्धिरनेन स्यादिति ज्ञेयम् । आहारद्रव्येभ्यो वातपित्तश्लेष्माण एवोत्पद्यन्ते अत्र साम्येनोत्पादनान्न तेषां मूलधातूनां मलसंज्ञा भवतीति भाव: । उत्पन्नानां धातूनां नित्यगस्य कालस्येव सतत-

मपचीयमानत्वेन न कदापि केनापि नाशो भवतीति सिद्धान्तश्चिकित्सा-
प्राभृतीये सौत्रीये निगदतो व्याख्यातस्तत्रैव द्रष्टव्यः । तस्यानुः ततः किञ्चि-
दवरः । यवकादयः शालीनां गुणागुणैरनुकुर्वन्ति गुणागुणास्तेषां शालि-
वज्ज्ञेया इत्यर्थः । षष्टिकधान्यगुणानाह शीत इति । षष्टिकस्तु षष्टिरात्रेण
जातः ग्रैष्मिको धान्यविशेषः । प्रवरः श्रेष्ठः । गौरः गौरषष्टिकः । वरकादयः
षष्टिका एव नानादेशप्रसिद्धाः । व्रीहिगुणानाह मधुर इति । व्रीहिस्तु शारदो
धान्यविशेषः स्थूलतण्डुलः । अम्लपाकत्वान मधुरोऽपि पित्तकरः । पाटलो
व्रीहिविशेषः रक्तवर्णतण्डुलत्वात् । त्रिदोषः असात्म्या वैषम्येण त्रिधातुवर्धकः
अत एव त्रिदोष इत्युच्यते । शरीरेऽयं मूत्रादीनाधिक्येन जनयतीत्याह
बह्विति ॥ ५—१५ ॥

तृणधान्यगुणानाह सकोरदूष इति । कोरदूष 'कोदों' इति
ख्यातः । नीवारः अकृष्टक्षेत्रोत्पन्नः 'उडी' इति भाषा । गवेधुकः
'देधान' इति ख्यातः । श्यामाकः 'बजरा' इति भाषा । अणुः 'चिना' इति
भाषा । पियंगुः कंगुः । जूर्णाह्वा 'जनार' इति वंगे । यवगुणानाह रूक्ष
इति । अत्र अगुरुरितीषदर्थे नञ् । तेनास्य बहुशकृत्करत्वं शोभते । वेणु-
यवगुणानाह रूक्ष इति । वेणुयवो वंशबीजं कामरूपे प्रसिद्धम् । गोधूम-
गुणानाह सन्धानेति । सन्धानकृत् क्षतसन्धानकरः । नान्दीमुखी क्षुद्रयवः ।
मधुली क्षुद्रगोधूमः ॥ १६—२२ ॥ इति शूकधान्यवर्गः ॥

शमीधान्यवर्गोक्तानां गुणान् विवक्षुस्तत्र मुद्गस्य श्रेष्ठत्वात् तद्-
गुणानादावाह कषायेति । मुद्गस्तु वर्णतश्चतुर्विधो भवति यथा हरितः पीतः
रक्तः कृष्णश्चेति । तत्र हरितः श्रेष्ठः यदुक्तं सुश्रुते "प्रधाना हरितास्तत्र"
इति । माषगुणानाह वृष्य इति । अस्य वृष्यत्वेऽप्युक्ते पुनः पुंस्त्वं शीघ्रं
ददाति चेति कथनात् पुनरुक्तिः शुक्रोत्पादकत्वेन शुक्रस्रावकत्वेन क्रिया-
भेदान्न दोषावहा । राजमाषः कृष्णमाषः । कुलत्थगुणमाह उष्णा इति ।
वन्यमुद्गगुणानाह मधुरा इति । मुकुष्टकः 'मोठ' इति भाषा । चनकादीनां
गुणानाह चनका इति । चनकाः 'चना' इति भाषा । खण्डिका त्रिपुटकलायः
'खेसारी' इति भाषा । हरेणुः वर्तुलकलायः 'मटर' इति भाषा । कलायो वर्तुल-
कलायः । तिलगुणानाह स्निग्धेति । त्वच्यः त्वक्प्रसादकृत् । केश्यः केशाय
हितः । नानाशिम्बिजातीनां गुणानाह मधुरा इति । एतेषां रूक्षत्वेन गुरु-
त्वेन च ते सस्नेहाः बहुस्नेहमिश्राः बलिभिर्बलवदग्निभिरेव भोज्याः । शिम्बी
'सिम' इति प्रसिद्धस्य शाकविशेषस्य पक्वं बीजम् । आढकीगुणानाह आढकीति ।
आढकी 'अरहर' इति प्रसिद्धा । अत्यधिकवातजनकत्वेन कफपित्तं वैषम्य-
मापन्नं ह्रस्वतां गतं साम्यं भवतीति आह कफपित्तघ्नीति एवं सर्वत्र ज्ञेयम् ।
कफवातनुदिति अवल्गुजस्य गुणः । निष्पावाः नानाविधानां शिम्बीजातीनां
पक्वबीजानि । काकाण्डः कोलशिम्बी 'काटरा सिम' इति भाषा । उमा अतसी ।
अवल्गुजः सोमराजी । एडगजः 'एडाञ्चि' इति भाषा । आत्मगुप्ता शूक-

शिम्बी ॥ २३— ३४ ॥ इति शमीधान्यवर्ग: ॥

मांसवर्गोक्तानां गुणान् विवक्षुस्तेषां बहुत्वात् पुनरपि वर्गं तं प्रसहाद्यैरष्टभिर्भेदैर्विभज्य तदन्तर्गतानां प्राणिनां नामानि प्रदर्शयन् गवादीनां प्रसहानां नामान्याह गोखरेति । खरो गर्दभ: । अश्वतर: गर्दभाश्वसंयोगाज्जात: 'खच्चर' इति प्रसिद्ध: । ऋक्षो भल्लुक: । वृकव्याघ्रौ चित्रवृहद्भेदेन द्विविधौ व्याघ्रौ । तरक्षु: 'नेकडे' इति ख्यात: क्षुद्रव्याघ्रभेद: । वन्य: वन्यकुक्कुर: । लोपाक: क्षुद्र शृगाल: । जम्बुक: शृगाल: । वान्ताद: ग्राम्यकुक्कुर: । चाष: 'नीलकण्ठ' इति ख्यात: । शशघ्नी 'इगल' इति वृहत्काय: पक्षिविशेष: । मधुहा 'बाज' इति ख्यात: । भासश्चिल्ली । उलूक: पेचक: । कुलिंगक: 'किंगा' इति भाषा । धूमीका वृहत्पेचक: 'हुतुमपेचा' इति भाषा । कुरर: उत्क्रोश: ॥ ३५—३६ ॥

भूमिशयानाह श्वेत इति । भूमौ गर्ते शेरते इति भूमिशया: तन्त्रान्तरे एषां विलेशया इति संज्ञा । कालकोऽलगर्द: जलसर्प इत्यर्थ:, स च वर्णभेदात् त्रिविध: श्वेत: श्यामश्चित्रपृष्ठश्चेति । काकुलीमृग: 'मालुयासर्प' इति भाषा । कूर्चिका 'कुचियासाप' इति वंगे । चिल्लट: काष्ठमार्जारिका । गोधा स्वर्णगोधा भक्ष्यमांसा: पञ्चनखा: । शल्लक: 'शजारु' इति कण्टकावृत: पशुविशेष: । गण्डक: श्यामवर्णवृहद् गोधां 'गोसाप' इति भाषा । कदली कदलीनकुल: 'नेउल' इति भाषा । नकुलस्तु सर्पभुक् 'वेजी' इति भाषा । श्वावित् खट्टाश: । आनूपानाह सृमर इति । सृमररुरुन्यंकवो कूलेचरा मृगविशेषा: । खडगो गण्डार: । गवयो गोसदृशो मृगविशेष: । वारिशयानाह कूर्म इति । शिशुमार: 'शुशु' इति ख्यात: । उद्र: उद्विडाल: । चुलुकी क्षुद्र: शिशुमार: । वारिचरानाह हंस इति । क्रौञ्च: वलाकाभेद: 'क्रोंचवक' इति भाषा । वलाका सर्वश्वेतो वक: । वकस्तु नीलवर्ण: । कारण्डवो हंसविशेष: । प्लव: हंसविशेष: । शराटि: 'शयाल' इति दीर्घचञ्चु: पक्षिविशेष: । पुष्कराह्व: श्वेतशीर्ष: सारस: । केशरी मानतुण्डको विजिज्ञासितव्यो । मृणालकण्ठ: 'भेया' इति भाषा । मद्गु: 'पाणिकौडि' इति भाषा । कादम्ब: 'बालिहांस' इति भाषा । काकतुण्डक: जलकाक: । उत्क्रोश: मत्स्यभुक् पक्षिविशेष: । पुण्डरीकाक्ष: हंसविशेष: । मेघराव: 'डाहुक' इति भाषा । अम्बुकुक्कुटी क्षुद्रकायो हंसविशेष: 'नाडियाल' इति भाषा । आरा क्षुद्रपक्षिविशेष: । नान्दिमुखी 'चिनाहांस' इति प्रसिद्धा । सहचारिण: 'शामुककल' इति ख्याता: । रोहिणी 'लालसार' इति ख्याता । काशीकानी अनुसन्धेया । 'रक्तशीर्षक' इति सारसविशेषणम् । चक्रवाक: 'चखा' इति ख्यात: हंसविशेष: ॥ ३७—४४ ॥

जांगलानाह पृषत इति । पृषतश्चित्रपृष्ठो मृग: । शरभोऽष्टापदो मृग: । शशस्य विलेशयत्वेऽपि मांसस्यास्य जांगलमांसवद् गुणवत्त्वेन जांगलेऽन्तर्भाव: कृत: । सुश्रुते त्वयं विलेशयवर्गे पठित: । श्वदंष्ट्रस्तु

कस्तूरीमृगः तस्यैव श्वदंष्ट्राकारा चतस्रो दंष्ट्रा वर्तन्ते । एणः कृष्णसारः अपरे मृगभेदा एव । विष्किरानाह लाव इति । लावः 'भाँडइ' इति ख्यातः । वर्तीरः तित्तिरिभेदः । कपिञ्जलः गौरतित्तिरिः । उपचक्रकः चकोरः । कुक्कुभः 'कुकुया' इति ख्यातः । रक्तवर्त्मकः कुक्कुभभेदः । वर्तकः 'बटेर' इति भाषा । वर्तिका क्षुद्राकारो वर्तकः । वर्हिमयूरः । कंकः लोहपृष्ठो पक्षिविशेषः 'काँक' इति भाषा । शारपदेन्द्राभौ कंकभेदौ । गोनर्दः सारसाकारः स्थलचरः । गिरिवर्तकः पार्वत्यवर्तकः । क्रकरः 'कयार' इति 'करकरा' इति च भाषा । वकरो विजिज्ञासितव्यः । चारटः हंससदृशः स्थलचरः । प्रतुदानाह शतपत्र इति । शतपत्रः काष्ठकुट्टकः । भृङ्गराजः कोकिलाकारो मधुरशब्दः पार्वत्यपक्षिविशेषः । कोयष्टिः 'कोंडा' इति ख्यातः । जीवञ्जीवकश्चकोराकारो विषदर्शनमृत्युः । कैरातः स्त्रीकोकिलाकारः 'पापिया' इति भाषा । अत्यूहो दात्यूहः । लट्वा विस्तृतपुच्छफेञ्चकः । कुलिंगकः गृहचटकः । चटकस्तु आवासनिर्माणकुशलः वन्यचटकः । अंगारचूडकः 'साहेब बुल्बुल' इति दीर्घपुच्छः पक्षिविशेषः । कपोतस्तु 'घुघु' इति ख्यातः । शारिका शुकश्च बहुभेदः मनुष्यशब्दानुकारी पक्षिविशेषः । पारावतः 'कबूतर' इति भाषा ॥ ४५—५३ ॥

प्रसहादिसंज्ञानां निरुक्तिमाह प्रसह्येति । प्रसह्य हठात्कृत्य । विलशायित्वात् गर्ते निवासात् । आनूपसंश्रयात् जलप्रायस्थाने निवासात् आनूपाः । अत्र विसर्गलोपेऽपि सन्धिरार्षः । जलजाः वारिशयाः । जलेचर्यात् आहारार्थं विचरणात् । जांगलचारिणः जांगलदेशे विचरन्तीत्यर्थः । विकीर्य पादेन भूमिं विलिख्य आहारमनुसन्दधन्तीत्यर्थः । प्रतुद्य चञ्चुना खाद्यं विभज्य भक्षयन्तीत्यर्थः । योनिरुत्पत्तिस्थानम् ॥ ५४—५६ ॥

सामान्यतोऽष्टविधमांसानां गुणानाह प्रसहा इति । प्रसहा अपि ते द्वेधा भिद्यन्ते मांसादाः शाकभोजिनश्चेति । तत्र व्याघ्रादयो मांसादाः गवादयः शाकभोजिनो भवन्ति । तत्र मांसादानां प्रसहानां पृथग्गुणानाह प्रसहानामिति । विष्किरा अपि द्वेधा भिद्यन्ते लावाद्याः वर्तकाद्याश्च । तत्र लावाद्यानां प्रतुदानां जांगलानाञ्च गुणैकत्वमाह लावाद्या इति । वर्तकाद्यानां पृथक् गुणानाह विष्किरा इति । गुणैः प्रसहाल्पान्तराः प्रसहेभ्यो अल्पमन्तरं पार्थक्यं येषां ते ॥ ५७—६२ ॥

अजाविकयोर्मांसगुणानाह नातिशीतेति । नातिशब्देन शीतादीनां त्रयाणामन्वयः । अजमांसस्य मानवशरीरधातुसामान्यात् अदोषलत्वमाह । शरीरधातुगुणसामान्यात् धातुसाम्यमापादयतीति तस्यादोषलत्वम् । विषमधातोरेव हि दोषसंज्ञा भवति । अतएव अनभिष्यन्दि दोषधातुमलस्रोतसामक्लेदकारि भवति । आविकमांसगुणान् आह मांसमिति । आविकं मेषमांसम् । नन्वष्टविधेषु मांसवर्गेषु कुत्र कुत्र तयोः सन्निवेशः इत्याह योनाविति । व्यामिश्रगोचरत्वात् गोखरादिवत् प्रसह्य ते भक्षयन्तीति प्रसहवर्गे तयोरन्त-

भाव:, पुनर्जांगलचारित्वाद् जांगलेऽपि एवमानूपचारित्वेनानूपेऽपि वर्गे एवम् अनिश्चितगोचरत्वेन तयो: पृथग् ग्रहणं साधु भवति। एवं सामान्यत उपदिष्टेष्वपि तेषु केषाञ्चिद् गुणवैशेष्यं दृश्यते इति तान् वक्तुमुपक्रमते सामान्येनेति ॥ ६३—६४ ॥

तत्र मयूरमांसगुणानाह दर्शनेति। दर्शनादीनां हिततम:। हंसमांसगुणानाह गुरूष्णेति। कुक्कुटमांसगुणानाह स्निग्धा इति। स्वरबोधना: स्वरभेदनाशका:। स्वेदना: स्वेदकारका: उष्णवीर्यत्वात्। तित्तिरिगुणानाह गुरूष्ण इति। नातिमधुर:। धन्वानूपनिषेवणाद् धन्वनि मरुप्रदेशे जलसमीपे च वसन्तीति वातप्रधानान् त्रिदोषान् जयति धातुसाम्यमापादयतीत्यर्थ:। गौरतित्तिरिगुणानाह पित्तेति। लावगुणानाह लावा इति। गोधागुणानाह गोधेति। शल्लकी गुणानाह शल्लकीति। मधुराम्लो रसे। गृहवासिकपोतगुणानाह कषायेति। वन्यकपोतगुणानाह तेभ्य इति। स्वल्पमूत्रकरा: मूत्राल्पतासम्पादका:। शुकमांसगुणानाह शुकमांसमिति। अत्र रूक्षशीतलमिति प्रामादिक: पाठ:, कटुशीतलमिति साधु:। विपाके विपाकवीर्यत: कटु शीतलञ्चेत्यर्थ:। चटकमांसगुणमाह चटका इति। चटकस्त्विह गृहचटक:। शशमांसगुणमाह कषायेति। कृष्णसारमांसगुणानाह मधुरा इति। वराहपिशितगुणमाह स्नेहनमिति। गव्यमांसगुणमाह गव्यमिति। माहिषमांसगुणानाह स्निग्धेति। मत्स्यगुणानाह गुरूष्णेति। बहुदोषा: विरुद्धवीर्यत्वात्। तेषु रोहितमत्स्यगुणमाह शैवालेति। कूर्ममांसगुणानाह बल्य इति। अत्र बलवर्धन इति पाठ: प्रामादिक:, श्लेष्मवर्धन इति साधु:। गण्डारमांसगुणानाह खड्गमांसेति। सम्प्रति मांससाम्यात् सद्योबलकरत्वाच्च केषाञ्चित् डिम्बगुणानाह धार्तराष्ट्रेति। धार्तराष्ट्र: राजहंस:। दत्त: कुक्कुट:। मांसानां बृंहणत्वे वैशेष्यमाह शरीरेति ॥ ६४—८८ ॥ इति मांसवर्ग:।

अथ शाकवर्गगुणान् विवक्षु: पृथक् शाकगुणानाह पाठेति। शाकस्तु प्राधान्येन पञ्चविधो भवति, तद् यथा—पत्रशाक: पुष्पशाक: फलशाक: नाडशाक: कन्दशाकश्चेति। पाठा 'आगनति' इति भाषा। शुषा कासमर्द:। सुनिषण्णकं 'सुषनि' इति लोके। ग्राहिलक्षणन्तु तन्त्रान्तरे "दीपनं पाचनं यत् स्याद् उष्णत्वाद् द्रवशोषकम्। ग्राहि तच्च" इति। वास्तुकं भिन्नवर्चा: पुरीषं भिनत्ति। काकमाचीगुणमाह त्रिदोषेति। काकमाची 'काँस्त्या' इति प्रसिद्धा। राजक्षवको दुग्धिका। कालशाकं श्राद्धीयं मरुजम्। कालायं वर्तुलकलायशाकम्। उपोदिका पूतीका। अम्लचांगेरी 'आमरुल' इति लोके। तण्डुलीयक: 'चराइ' इति भाषा। मण्डुकपर्णी 'थानकुनि' इति भाषा। कुचेला विद्धकर्णी। वनतिक्तकं ग्रीष्मसुन्दरक:। कर्कोटक: 'काकरोल' इति भाषा। अवल्गुज: सोमराजी। शकुलादनी कटुरोहिणीपत्रम्। वृषपुष्पाणि वासकपुष्पाणि। शार्ङ्गेष्टा काकतिक्तिका। केवुकं 'केउताड़ा' इति भाषा। कठिल्लक: कारवेल्ल:। नाडी 'नालिता' इति लोके। कलायमिति

माष्यः कलायशाकस्तिक्तः। गोजिह्वा 'गोजिया' इति भाषा। तिलपर्णिका एडगजपत्रम्। कौलकमिति पटोलपत्रम्। कर्कशं स्वल्पकारवेल्लकम्। पर्पटकं 'पितपापड़ा' इति भाषा ॥ ८८—९८ ॥

सर्वाणीति। सूप्यशाकानि मुद्गादिशमीधान्यस्य पत्राणि। फञ्जी ब्रह्मयष्टीपत्रम्। चिल्ली वन्यवास्तुकम्। कस्तुम्बुरुः द्रोणपुष्पपत्रम्। आलुकानि पिण्डालुकं हस्त्यालुकं शंखालुकं रक्तालुकं शूकरालुकमित्यादीनि। एषां पत्रैः सह। कठिञ्जरः क्षुद्रपत्रतुलसीभेदः। कर्बुदारः श्वेतकाञ्चनारपुष्पम्। सुवर्चला 'सुल्ट्या' इति भाषा। कोविदारः रक्तकाञ्चनारपुष्पम्। पत्तूरः शालिञ्चः। चुच्चुपर्णिका 'चेचुर' इति लोके। कुमारजीवः पुत्रञ्जीवः। लोट्टाकः 'नटे' इति भाषा। पालंक्यः 'पालम्' इति भाषा। मारिषः 'क्षुद्रेनटे' इति भाषा। कलम्बनालिका 'कलुम' इति भाषा। आसुरी राजिका। वृक्कधूमकः मारिषभेदः। प्रपुन्नाडः एडगजपत्रम्। नलिनीपत्रं पद्म पल्लवम्। कुठेरकावल्गुजौ तुलसीभेदः। कूष्माण्डक इति कूष्माण्डपत्रम्। जातुकः हिंगुपत्रिका। शालकल्याणी शालिञ्चभेदः। त्रिपर्णी कन्दविशेषः। पीलुपर्णिका मूर्वा। एतेषां पाकप्रकारं प्रदर्शयति स्विन्नमिति। आदौ जलेन स्विन्नं कृत्वा रसं निष्पीड्य ततः प्रभूतस्नेहेन पचेदित्यर्थः। शणादीनां पुष्पगुणानाह शणस्येति। न्यग्रोधादीनां कोमलपत्रस्य गुणानाह न्यग्रोधेति ॥९८—१०६॥

वायुमित्यादि। वत्सादनी गुडुची। गण्डीरः शमठ इति ख्यातः। श्रेयसी गजपिप्पली। बिल्वपर्णी हिंगुपत्रिका। भण्डी शिरीषपत्रम्। पर्वणी गण्डदूर्वा। पर्वपुष्पी कुक्कुटी। लांगलकी चित्रैरण्डः। उरुवुकः श्वेतैरण्डः। पञ्चांगुलं रक्तैरण्डः। कौसुम्भं कुसुम्भपुष्पम्। त्रपुषं 'खीरा' इति भाषा। एर्वारुकं 'काँकडी' इति भाषा। चिर्भिट 'खरबूजा' इति भाषा। पक्वकूष्माण्डं पक्वतया श्वेतवर्णं कूष्माण्डफलम् ॥ १०६—११३ ॥

केलुटमिति। केलुटं जलजकन्दविशेषः। नदीमाषकं 'गांकलइ' इति भाषा। ऐन्दुकं 'निंगार' इति ख्यातस्य फलम्। उत्पलानि उत्पलपुष्पाणि। तालप्रलम्बं ताजजटा। तालशस्यमपक्वतालफलस्य मज्जा 'तालशाँस' इति भाषा। तरुटं कल्हारकन्दः। विसं मृणालम्। शालुकं सौगन्धिककन्दः। क्रौञ्चादनं घेऊचुलिका। कशेरुकं जलजः कृष्णवर्णः कन्दः। शृंगाटकं पानीयफलम्। अंकलोड्यं 'तालमखाना' इति ख्यातम्। पौष्करं बीजं पद्मबीजम्। मुञ्जातकः औत्तरपथिकः कन्दविशेषः। विदारीकन्दः भूमिकूष्माण्डः। अम्लिकाकन्दः कामरूपे क्षुद्रः विटपविशेषः। सर्पछत्रकं सर्पफणाकारं छत्राकम् ॥ ११४–१२४ ॥

इति शाकवर्गः ॥

फलवर्गमाह तृष्णेति। मृद्वीका 'अंगूर' इति प्रसिद्धा मधुराया एव तस्या गुणाः एते भवन्ति न त्वम्लायाः। फल्गुः पक्वोदुम्बरफलम् 'आञ्जीर' इति लोके। विष्टम्भि विष्टभ्य जीर्यति। मधुराम्रातगुणानाह मधुरमिति। आम्रातम् 'आमड़ा' इति प्रसिद्धम्। पक्वतालनारिकेलफलगुणानाह तालेति।

सिद्धानि पक्वानि। शस्यमत्र फले तात्पर्यम्। भव्यं 'चालिता' इति लोके। परुषकादीनामम्लानां गुणानाह अम्लमिति। परुषकं 'फालसा' इति भाषा। कर्कन्धुः शृगालकोलिः। निकुचं 'डहुआ' इति भाषा। पारावतं 'पेयारा' इति वंगे। तच्च वाराणस्यां प्रायशो मधुरं वृहत्कायञ्च भवति। तन्मधुरं शीतवीर्यं अम्लञ्चोष्णवीर्यम्॥ १२५—१३५॥

भव्यादित्यादि। काश्मर्यं फलं गाम्भारीफलम्। तूदं 'तूतफल' इति भाषा। टंकं नीलकपित्थः काश्मीरदेशजः। सिद्धं पक्वम्। पूतिमारुतं दुर्गन्धाधोवातकरम्। आम्रगुणानाह रक्तपित्तेति। बालमदृढबीजम्। आपूर्णं दृढबीजम्। मधुरं वदरं वाराणसीभवम्। शुष्कवदरगुणान् आह तच्छुष्कमिति। शिम्बितिकाफलं शमीफलम्। गांगेरुकी गोरक्षतण्डुला तस्याः फलम्। करीरं मरुजं फलम्। बिम्बी ओष्ठोपमफला। धन्वनं 'धाम्नी' इति भाषा। पनसं कण्टकीफलं 'काँटाल' इति भाषा। मोचं कदलीफलम्। राजादनं क्षीरिकाफलम्। लवली 'हरिफल' इति भाषा। अवदंशक्षममिति फलमेतद् भुक्त्वा अन्यत्र रुचिर्भवतीत्यर्थः॥ १३५—१४५॥

नीपमित्यादि। नीपं पक्वकदम्बफलम्। पीलु 'अखरोट' इति भाषा। तृणशून्यं केतकीफलम्। विकंकतं 'वैची' इति भाषा। प्राचीनामलकं 'पानिआमला' इति भाषा। ऐङ्गुदं इङ्गुदीफलम्। तिन्दुकं 'गाव' इति भाषा। आमलकगुणानाह विद्यादिति। रूक्षमिति विभीतकगुणानाह। स्निग्धाम्लदाडिमगुणानाह अम्लमिति। ग्राहि मलसंग्राहकम्। रूक्षाम्लदाडिमगुणानाह रूक्षाम्लमिति। तत्तु कषायाम्लरसम्। स्निग्धाम्लन्तु मधुराम्लरसमिति विशेषः। कषायरसस्य विशेषेण रूक्षत्वात्। मधुरदाडिमगुणानाह मधुरमिति। पूर्वमिति पूर्वगुणं वातकफघ्नमित्यर्थः। पुनश्च पित्तनुदित्यर्थः। पुनश्च पित्तनुदित्युक्त्या मधुरस्य त्रिदोषहरत्वं सिद्धम्। सुश्रुतेऽपि तस्य त्रिदोषघ्नत्वमुक्तं यथा—"द्विविधं तत्तु विज्ञेयमधुरञ्चाम्लमेव च। त्रिदोषघ्नन्तु मधुरमम्लं वातकफापहम्" इति। अत्र तु त्रिविधस्य दाडिमस्य गुणाः प्रोक्ताः॥ १४६—१५२॥

वृक्षाम्लमित्यादि। वृक्षाम्लं महार्द्रकम्। अम्लिका तिन्तिडी। अम्लवेतसं 'थैकड' इति उत्तरवंगे प्रसिद्धं फलम्। न खल्वेतद् वेत्राकारा लता सर्वैरेव महर्षिभिः फलवर्गे परिपठितत्वात्। मातुलुंगरसगुणानाह शूले इति। विबन्धे विडविबन्धे। मद्यविप्लवे मदात्यये। वर्च्चोगदेषु पुरीषविकृतिजन्यव्याधिषु शेषमिति तस्यैव त्वङ्मांसमतोऽन्यथा गुर्वित्यर्थः। मातुलुंगो बीजपूरः मौखरसदृशोऽत्यम्लः 'बिजौरा' इति भाषा। कर्चूरो द्राविडदेशोत्पन्नः अम्लफलविशेषः। नागरंगफलं 'नारंगी' इति भाषा। वातामादयः पश्चिमदेशजाः फलमज्ञानः। अभिषुकः 'पिश्ता' इति भाषा। अक्षोडः 'अखरोट' इति भाषा। मुकूलकः काश्मीरदेशजः। निकोचकः अंकोठकः। उरुमाणः पार्वत्यफलविशेषः। पियालः 'चिरञ्जी' इति भाषा। श्लेष्मातकः बहुवारः

'नोनाआता' इति केचित्। अंकोठः 'धलाआँकडा' इति लोके। कारञ्जं करञ्जस्य फलम्। आम्रातकस्य मधुरस्य गुणान् प्राङ् निवेद्य अम्लस्य गुणान् वक्ति आम्रातकमिति। दन्तशठं अम्लकर्मरंगकम्। करमर्दकमम्लकरञ्जफलम्। ऐरावतमत्यम्लनागरंगफलम्। वार्ताकमिति पक्वं कुत्रेदं फलवद् व्यवह्रियते। पर्पटकीफलं पर्पटकस्य फलम्। आक्षिकीफलम् 'आसफल' इति लोके। अश्वत्थो वटः, लक्षः 'पाकुर' इति भाषा। न्यग्रोधः 'नाकुर' इति भाषा। उदुम्बरफलन्त्विह देशजं कषायरसप्रधानं ज्ञेयम्। प्राङ् मधुरस्यैव गुणाः प्रोक्ताः। प्रायोपयोगिकः सातत्येन व्यवह्रियमाणः ॥ १५२—१६५ ॥

इति फलवर्गः ॥

अथ हरितकवर्गं विवक्षुः प्रागार्द्रकगुणानाह रोचनमिति। हरितवर्गोक्तानि तु यद्यपि शाकवर्गेष्वेवान्तर्भवितुं युज्यन्ते सुश्रुतेऽपि तेषां शाकवर्गेऽन्तर्भावः तथापि शाकवत् तानि पक्त्वा अपक्वानि वा आहारे उपयुज्यन्ते इत्येषां पृथग्वर्गे उक्तिर्न दोषावहा। पुनश्च तानि प्रायः आर्द्राण्येव भोजनसहयोगितया शाकमांसादीनां दौर्गन्ध्यनाशाय च पाके प्रयुज्यन्त इत्येषां हरितकसंज्ञा। आर्द्रकमिति विशेषणं शुण्ठ्या व्यवच्छेदार्थम्। जम्बीरः 'नींबू' इति भाषा। मूलकं बालं रक्तवर्णं ह्रस्वकायं कटुरसान्वितञ्च ज्ञेयम्। वृद्धञ्च महत्कायं प्रायः श्वेतवर्णं मधुरप्रायञ्च भवति। न त्वेकस्यैव मूलकस्य बालावस्थायां वृद्धावस्थायां वा गुणवैशेष्यं मन्तव्यम् तयोर्भिन्नजातीयत्वात्। स्निग्धसिद्धमूलकगुणमाह मारुतापहमिति। तेन बालस्य वृद्धस्य वा दोषहरत्वं त्रिदोषकरत्वं वा आर्द्रावस्थायां सेवने गुणो ज्ञेयः। शुष्कमूलकगुणमाह विशुष्कमिति। सुरसस्तुलसीभेदः। अर्जकः तुलसी श्वेता। शिग्रुः शोभाञ्जनशाकम्। शालेयं मधुरिकाशाकम्। मृष्टकमार्द्रमरिचम्। गण्डीरः शमठः शाकः। तुम्बुरुः कुस्तुम्बुरुः। शृङ्गवेरिका आर्द्रकसदृशः लघुकायः। भूस्तृणो गन्धतृणः। खराश्वा पारसिकपमानीशाकः। धान्यकं तस्यार्द्रपत्रम्। अजगन्धा वन्ययमानीपत्रम्। सुमुखस्तुलसीभेदः। गृञ्जनकः श्वेतवर्णः क्षीरपलाण्डुः। यदुक्तं गन्धाकृतिरसैस्तुल्यो गृञ्जनस्तु पलाण्डुना। सूक्ष्मनालाग्रपत्रत्वाद् भिद्यतेऽसौ पलाण्डुतः॥" इति ॥ १६६—१७८ ॥ इति हरितकवर्गः ॥

क्रमागतत्वान् मद्यवर्गं व्याचिख्यासुः प्राक् सर्वमद्यानां सामान्यान् गुणान् आह प्रकृत्येति। मद्यस्यातितीक्ष्णत्वाद् अम्लरसस्यानुभूतिर्न भवत्यपितु मुखकण्ठयोर्दाहात् तीव्राम्लरसोऽनुमेय एव। मद्यविशेषगुणान् विवक्षुः सुरागुणानाह कृशानामिति। सुरा शालिषष्टिकादिपिष्टादिकृतं मद्यम्। यद्यपि सुराशब्दः सर्वमेव मद्यं बोधयति तथाप्यत्र अन्नादिकृतायां पैष्ट्यां गुडकृतायां वास्य तात्पर्यम्। यदुक्तं "गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा" इति। माध्वीसुरायास्तु गुणान् पृथग् वक्ष्यति। माध्वीकादीनां मदिराशब्देन परिग्रहः स्यात्। मदिरागुणानाह हिक्केति। सुराकल्कगुणानाह शूलेति। जगलः सुराकल्कः। अरिष्टगुणानाह शोषेति

अरिष्टस्तु इक्षुविकारादिसहितेन नानाद्रव्यक्काथेन संहितो मद्यविशेष:। शर्करा-जातमद्यगुणानाह मुखप्रिय इति। शार्कर: शर्कराधातकीपुष्पतोयजातो मद्य-विशेष:। सुखमद: स्वल्पमद:। सीधुद्वयस्य गुणान् विवक्षुरादौ पक्वरसस्य गुणानाह रोचन इति। पक्वरस: इक्षो रसै: पक्वै: संहित: सीधु:। अपरस्य शीतरसिकस्य गुणानाह जरणीय इति। आमैरिक्षुरसै: संहित: शीतरसिक:। विभीतकफलकृतमद्यगुणमाह पाण्डविति। आक्षिकी विभीतकफलवल्केन कृतं मद्यम्। ऐक्षीति पाठे तु इक्षुरसकृता सुरा। सुरासवगुणानाह सुरेति। सुरासवस्तु सुरयैव संहितो नानाद्रव्यकृत आसव:। माध्वीसुराया गुणमाह छेदीति। छेदी दोषस्रंसी। मध्वासव: माध्वी सुरा। मैरेयो धातकीपुष्प-गुडधान्याम्लसंहितं मद्यम्। धातक्यभिषुत: धातकीपुष्पेण संहित: इति मैरेयविशेषणम्। माध्वीकं मधूकपुष्पकृतं मद्यम्। मृद्वीकाभिरिक्षुरसेन च संहित आसव: मृद्वीकेक्षुरसासव:। मधु मद्यविशेष:। यवकृतसुरागुणा-नाह सुरेति। स्वल्पगोधूमकृतसुराया गुणमाह श्लेष्मज इति। मधूलिका स्वल्पगोधूम:। तत्कृत आसवो मधूलक:। सौवीरकं निस्तुषयवकृतं काञ्जि-कम्। तुषोदकन्तु सतुषयवकृतम्। अम्लकाञ्जिकन्तु तण्डुलकृतम्। स्पर्शात् काञ्जिकसिक्तात् प्रावारकावरणात्। अभिनवमद्यदोषानाह प्रायश इति। पुरातनमद्यगुणानाह स्रोतसामिति। सात्त्विकै: सत्त्वगुणप्रधानै: विधि-वद् युक्तिपूर्वकं च पीतस्य मद्यस्य गुणानाह हर्षणमिति। विध्यादिकं मदात्ययचिकित्सिते वक्ष्यमाणम् ॥१७८-१९६॥ इति मद्यवर्ग: ॥

अथ जलवर्गं व्याचिख्यासु: प्राक् पानीयप्राधान्येन ऐन्द्रं जलमाह जलमिति। तच्च धारकारहैमतौषारभेदाच्चतुर्विधमपि गुणसामान्येन एकमाह एकविधमिति। शीतादिषड्गुणसामान्यादेकमित्यर्थ:। ऐन्द्रस्यैकविधत्वे-ऽपि भौमं नानागुणं कथं भवतीत्याह तदिति। मेघाच्च्यवमानं हि आका-शीयवायुसंसर्गात् तद्गतधूल्यादिद्रव्यसंमिश्रणाच्च गुणपार्थक्यमस्य भवतीत्याह पतदिति। पतद् भूमिप्राप्ते: प्रागेवेत्यर्थ:। देशकालौ देश: भूमिविशेषरूप:। कालश्चर्तुविशेषरूप:। तदाधारभूमिभेदाद्दतुभेदाच्च गुण-पार्थक्यं तस्य भवतीत्यर्थ:। कथं गुणभेदो भवतीत्याह खात् आकाशाद् मेघादित्यर्थ:। कालानुवर्तिभि: पृथगृतूननुसृत्येत्यर्थ:। सोमवाय्वर्कै: चन्द्र-सूर्यकिरणैर्वायुना च स्पृष्टं गुणान्तरं भवतीति शेष:। एवं शीतादिभि-र्महीगुणै: आधारभूमिगुणै: यथासन्नमिति सन्निकटभूमिमनुसृत्य युक्तं भवतीति शेष:। तेनासन्नभूमौ शीते शीतं भवति उष्णे चोष्णं भवति एवं स्निग्धादिष्वपि ज्ञेयम् ॥ १९६-१९८ ॥

ऐन्द्रजलस्य गुणानाह शीतमिति। शिवमिति हितकरत्वात्। मृष्टं संशुद्धम्। दिव्यमुदकं धारादिचतुर्विधम्। भ्रष्टं पृथिव्यां पतितम्। पात्र-माधारभूमिमपेक्षते तदपेक्ष्य पृथग्गुणा भवन्तीत्यर्थ:। भूमिभेदात् गुण-भेदानाह श्वेत इति। श्वेते श्वेतमृत्तिकायाम्। कपिले नीलपीतवर्णे। उषरे

क्षारमृत्तिकायाम्। पर्वतविस्तारे पर्वतसंकुले प्रदेशे। कारहिमतुषाररूपस्यैन्द्रजलस्य रसमाह तथेति। हिमशब्देन हैमतौषारयोर्ग्रहणमेकविधत्वात्। कारं करकोद्भवम्। तौषारन्तु शीतप्रधाने प्रदेशे तुषारपाताद् गृह्यते। ऐन्द्रधारलक्षणमाह यदिति। उक्तैरिति तन्त्रान्तरोक्तैः यदुक्तं सुश्रुते "गांगं पुनः प्रधानं तदुपाददीत आश्वयुजे मासि शुचिशुक्लवितते पटैकदेशच्युतमथवा हर्म्यतलपरिभ्रष्टम् अन्यैर्वा शुचिभिर्भाजनैर्गृहीतं सौवर्णे राजते मृण्मये वा पात्रे निदध्यात्। तत् सर्वकालमुपयुञ्जीत" इति। इन्द्रो हि मेघानामधिपइति मेघैर्विसृष्टं जलमैन्द्रमुच्यते। तस्य सामान्यगुणान् आह ईषदिति। ऋतुभेदेन धारजलस्य पृथग् गुणान् विवक्षुर्वर्षायां धारगुणानाह गुर्विति। शरत्कालीनमाह तन्विति। हैमन्तिकमाह हेमन्ते इति। शैशिरमाह किञ्चिदिति। वासन्तिकमाह कषायेति। विभ्रान्तेषु कालेषु ऋतुव्यापत्सु। शारदीयवृष्टस्योपयोगितामाह राजभिरिति॥ १९८-२०९॥

दिव्यं जलं निगदतो निवेद्य भौमजलगुणान् व्याचिख्यासुर्हिमवत्प्रभवाणां नदीनां जलगुणानाह नद्य इति। हिमवत्प्रभवा हिमालयपर्वतोत्पन्नाः गंगाद्याः। पथ्या हितकर्यः। मलयजानां गुणानाह नद्य इति। पश्चिमाभिमुखाः पश्चिमसमुद्रगामिन्यः। मृदुवहाः स्वल्पस्रोतोऽन्विताः। पारिपात्रविन्ध्यसह्यप्रभवाणां गुणानाह पारिपात्रेति। पारिपात्रस्तु विन्ध्यस्य पश्चिमे मालवदेशप्रान्ते वर्तते॥ २१०-२१३॥

वर्षाकालीननदीजलदोषानाह वसुधेति। वसुधा मृत्तिका आनूपादिदेशजमृत्तिकागुणैः तत्तद्देशजवाप्यादीनामपि जलस्य गुणदोषौ भवतः इत्याह वापीति। वापीतडागसरांसि मानभेदेन मनुष्यखातजलाशयस्य नामानि भवन्ति। सरः इति पुष्करिणी। शतेन धनुर्भिः पुष्करिणी। पञ्चभिः शतैस्तडागः। त्रिंशच्छतैः वापी ज्ञेया। उत्सस्तु अजस्रं स्रवज्जलम्। प्रस्रवणस्तु गिरेरुपरि निर्झरादिप्रभवो जलसंघातः। जलदोषानाह पिच्छलमिति वरुणालये समुद्रे। विस्रमामगन्धि॥२१४-२१७॥ इत्यम्बुवर्गः।

गोरसवर्गान् विवक्षुरादौ गोक्षीरगुणानाह स्वाद्विति। बहलं घनं जलादित्यर्थः। श्लक्ष्णं चिक्कणम्। मन्दमतीक्ष्णम्। सामान्यात् समानगुणत्वाद् ओजो वर्धयति। तेन जीवनीयानां द्रव्याणां मध्ये प्रवरं श्रेष्ठम्। महिषीक्षीरगुणानाह महिषीणामिति। स्नेहान्यूनं गव्यक्षीरस्नेहादत्राधिकः स्नेहो वर्तते इत्यर्थः। उष्ट्रीक्षीरगुणानाह रूक्षेति। अश्व्यादीनां संयुक्तखुराणां क्षीरगुणमाह बल्यमिति। छागीक्षीरगुणानाह छागमिति। मेषीक्षीरगुणमाह हिक्केति। हस्तिनीनां क्षीरमाह हस्तिनीनामिति। नारीदुग्धगुणानाह जीवनमिति। अक्षिशूलिनां शूलयुक्ताक्षिव्याधीनां तर्पणं तर्पणकर्मणि प्रयोज्यमित्यर्थः। नावनं नस्यम्॥२१८-२२४॥

दधिगुणानाह रोचनमिति। अत्र दध्यादिकं गोक्षीरोद्भवं ज्ञेयम। महिष्यादीनां गुणास्तु तत्तत्क्षीरेवज् ज्ञेया इत्यग्रे वक्ष्यति। शीतके शीतज्वरे

मन्दकन्तु पर्युषितं क्षीरं न दधिभावापन्नमीषद् घनमुच्यते तत्तु त्रिदोषकरम। तदेव जातं दधि स्वयं जातं दधि वातघ्नं स्यात्। सर: दधिसर: शुक्रवर्धक:। मस्तु वस्त्रपरिस्रुतं दधिजलम्। तक्रगुणानाह शोफेति। सद्यष्कनवनीतगुणमाह संग्राहीति। गोघृतगुणानाह स्मृतीति। सहस्रवीर्यम् अचिन्त्यशक्तिकम्। विधिभि: नानाविधानै:। पुरातनघृतगुणानाह मदेति। तच्च दशवर्षातीतं ग्राह्यम्। अनुक्तानां सर्पिषां गुणानतिदिशति सर्पीषीति। पीयूष: सद्य:प्रसूताया: क्षीरम् आसप्तरात्रभवम्। मोरटस्तु सप्तरात्राद् दशरात्रं यावद्। किलाट: घनीभूतं क्षीरम् 'मोया' इति भाषा। तक्रपिण्डका: तक्रकूर्चिका ॥ २२६-२३८ ॥ इति गोरसवर्ग: ॥

इक्षुवर्गं प्रक्रमते वृष्य इति। भक्षितस्य दन्तैर्निष्पीडय सेवितस्य। यान्त्रिक: यन्त्रपीडनान्निष्कासितो रस:। विदह्यते विदाही भवति त्वग्ग्रन्थ्यादिभि: सह निष्पीडनादिति भाव:। पौण्ड्रक: 'खडी' इति भाषा। वंशकस्तु तत: स्थूल: 'भुडी' इति भाषा। गुडगुणानाह प्रभूतेति। प्रभूतक्रिम्यादिकर:। चतुर्भागत्रिभागार्धावशेषितो रस: क्षुद्रो गुड इत्युच्यते। तत्र यथापूर्वं पूर्व-पूर्वं गुरु: तेनार्धावशेषितात् त्रिभागावशेषित: ततस्तु चतुर्भागावशेषित: क्षुद्रो गुडो गुरुर्भवति। स्वल्पमल: पाककाले दुग्धादिप्रक्षेपेण निष्काशितमल: गुडो धौतो भवति। ततो धौतगुडात् मत्स्यण्डिका ततस्तु खण्डस्ततश्च शर्करा विमला: मलरहिता भवति। तेन च यथा यथा वैमल्यं भवति तथा तथा श्वैत्यं शुभ्रवर्णता भवति। तत्र मत्स्यण्डिका 'दानागुड' इति खण्डश्च 'खांड' इति शर्करा 'चीनी' इति लोके। शैत्यमिति पाठेतु शीतलमधिकं भवति। तेन मधुरत्वादीनामप्युत्कर्ष: क्रमशो भवेदिति ज्ञेयम्। यदुक्तं सुश्रुते "यथा यथैषां वैमल्यं मधुरत्वं तथा तथा। स्नेहगौरवशैत्यानि सरत्वञ्च तथा तथा ॥" इति। इक्षुशर्करासमानतया अपरासामपि शर्कराणां गुणानाह वृष्या इति। गुडशर्करा इक्षुरसोद्भवशर्करा। यासशर्करा दुरालभास्वरसेन निष्पन्ना। मधुशर्करा दीर्घकालावस्थितं माध्यं मधु शर्करात्वेन परिणमति सा। सर्वशर्कराणां सामान्यमुपयोगित्वमाह तृष्णेति ॥२३९-२४४॥

मधुशर्कराप्रसंगेन मधुरखाद्यत्वसाम्येन च मधुगुणानाह माक्षिकमिति। चतुर्विधमक्षिकोपहृतत्वेन मधुनोऽपि चातुर्विध्यं भवति तत्र माक्षिकं यथा—"नानापुष्परसाहार: कपिला वनमाक्षिका:। या: स्थूलास्ताभिरुत्पन्नं मधु माक्षिकमुच्यते ॥" इति। भ्रामरं यथा—"ये स्निग्धाञ्जनगोलाभा: पुष्पासवपरायणा:। भ्रमरैर्जनितं तैस्तु भ्रामरं मधु भण्यते ॥" इति। क्षौद्रं यथा—"पिंगला मक्षिका: सूक्ष्मा: क्षुद्रा इति हि विश्रुता:। ताभिरुत्पादितं यत्तु तत्क्षौद्रं मधु कथ्यते ॥" इति। पौत्तिकं यथा—"महत्यो मक्षिका: पिंगा: पुत्तिका इति कीर्तिता:। तज्जातं मधु धीमद्भि: पौत्तिकं समुदाहृतम् ॥" इति। तानि च वर्णतो विशिनष्टि माक्षिकमिति। सन्धातृ व्रणसन्धानकृत्। छेदनं कफाश्लेषछेदकरमित्यर्थ:। तस्य विषान्वयित्वेन उष्णं मधु अथवा

उष्णार्तेन सेवितं मधु हन्यादित्याह हन्यादिति। स्वल्पमात्रयोपसेवितं हि मधु हिताय भवति नातिमात्रया इत्याह गुर्विति। अतिमात्रया पाने को दोष इत्याह नातः परमिति। मध्वामात् अतिमात्रमधुपानादजीर्णात्। उपक्रम-विरोधित्वं प्रतिपादयति आमे इति। तस्यान्यमपि गुणमाह नानेति॥ ॥ २४५-२५१॥ इति क्षुद्वर्गः॥

अथ कृतान्नवर्गं व्याचष्टे तत्र पेयागुणानाह क्षुत्तृष्णेति। तत्र पेयादियवागूभेदानाह तन्त्रान्तरे यथा—"सिक्थकै रहितो मण्डः पेया सिक्थसमन्विता। यवागूर्बहुसिक्था स्यात् विलेपी विरलद्रवा॥" इति। वातवर्चोऽनुलोमनी अधोवातं पुरीषञ्चानुलोमयतीत्यर्थः। विलेपी गुणानाह तर्पणीति। मण्डगुणाह मण्डस्त्विति। मण्डस्योपयोगित्वमाह लंघितानामिति। लाजपेयागुणानाह लाजपेयेति। लाजकृता पेया लाजपेया। धातुसाम्यकरः वातादीनां वैषम्यनाशकः। शिवः मंगलकरः पथ्यत्वेन। स तु सुसंस्कृतः सुस्विन्नो वस्त्रेण गलितश्च भवति। स तु पिप्पलीशुण्ठीभ्यां श्रृततोयेन निष्पन्नोऽम्लदाडिमरसयुक्तश्च विशेषगुणभाग्भवतीत्याह क्षुदिति। क्षुत्पिपासासहः यः क्षुधां पिपासां वा न सहते तस्य पथ्यः। शुद्धानां वमन-विरेचनाभ्यामिति शेषः। तेषामपि ईषन्मलोपलेपो वर्तत एवेति तं मलमपहन्ति इत्यर्थः॥ २५२-२५८॥

अन्नगुणानाह सुधौत इति। सुधौततण्डुलकृत इत्यर्थः। ततः स्विन्नः सम्यकपाकेन मृदुतामापन्नः ततः प्रस्रुतः निर्गालितमण्डः, एवं सन्तप्तः स्वाभाविकेन उष्मणा, न पश्चात्तापेनोष्णीकृतः तस्य विवर्जनीयत्वात्। यदुक्तं तन्त्रान्तरे "विवर्जयेत् स्थिरं शीतमन्नमुष्णीकृतं पुनः" इति। ननु सुधौतप्रस्रुतेऽन्ने जीवनीयांशह्रास उपलभ्यते तत् कथं तत्पथ्यत्वेन निर्दिश्यते इत्याह अधौत इति। यदेव गुरु तदेव बृंहणं नूनं भवति यदि सम्यग् जीर्णं स्यात्। न खल्वजीर्णेऽन्ने शरीरं पोष्यते यद् वक्ष्यति "यदन्नं देहधात्वोजो-बलवर्णादिपोषकम्। तत्राग्निर्हेतुराहारान्न ह्यपक्वाद्रसादयः।" इति। अतो व्यायामादिना अत्यग्निपुरुषाणामधौताप्रस्रुतस्य पोषकत्वेऽपि न खलु व्यायामरहितानां बुद्धिजीविनां तथा भवितुमर्हति। अपक्वे द्रव्ये जीवनीय-प्रभूतत्वं वर्तत एव परन्त्वतिगुरुत्वात नात्र शास्त्रे तस्य पथ्यत्वमाह इति ज्ञेयम्। मांसादिसहितपक्वोदनगुणानाह मांसेति। सन्तर्पणाः सर्वधातुपोषकाः। माषतिलाभ्यां साधितमोदनमाह कृशरेति। क्षीरसाधितन्तु पायस इति कथ्यते। कुल्माषाः अर्धस्विन्नगोधूमचनकादयः। सौप्यगोधूमयावकाः इति मुद्गादिसूप्यकृताः गोधूमकृता यवकृताश्चेत्यर्थः। स्विन्नभक्ष्याः वाष्पस्वेदेन पक्वा अपूपादयः। यूषः मसुरादियूषः अकृतः स्नेहलवणकटुकवर्जितः। कृतश्च स्नेहादिभिः संस्कृतः। रसो मांसक्वाथः स च तनुः पत्तलः स्नेहादिना असंस्कृतः। सांस्कारिकश्च स्नेहादिभिः पक्वः। बहुमांसकृतः ईषद्घनश्च। सूपः विदलकृतव्यञ्जनविशेषः। यूषसूपयोस्त्वयं भेदः-यूषस्तु—"अष्टादशगुणे

नीरे शमीधान्यश्रृतो रस:।" इति। सूपस्तु "दलितन्तु शमीधान्यं दालिर्दाली स्त्रियामुभे। दाली तु सलिले सिद्धा लवणार्द्रकहिंगुभि:। संयुक्ता सूपनाम्नी स्यात्" इति। अतो यूषस्तु सतुषस्य शमीधान्यस्य क्वाथ: वस्त्रपरिस्रुत:। सूपस्तु निस्तुषस्यापरिस्रुत:॥ २५६—२६४॥

सक्तुगुणानाह सक्तव इति। सक्तवो भृष्टयवादिचूर्णानि। शालिसम्भवा: शालितण्डुलकृता:। यवापूप: यवचूर्णकृतपिष्टकविशेष:। यावको वाट्य: निस्तुषदलितयवमण्ड:। धाना: निस्तुषभृष्टयवा:। विरूढधानादय: सर्वे पिष्टकविशेषा:। पैष्टिका: गोधूमादिपिष्टकृता:। परमत्यर्थम्। फलेति। पललं तिलकल्क:। वेशवारस्तु "निरस्थि पिशितं पिष्टं स्विन्नं गुडघृतान्वितम्। कृष्णामरिचसंयुक्तं वेशवार इति स्मृत:॥" इति लक्षणम्। क्षीरेक्षुरसपूपका: क्षीरेणेक्षुरसेन च पक्का: पिष्टकविशेषा:। सगुडा: इति। गुडादिमिश्रा: भक्ष्या:। अत्र पक्के शीते च भक्ष्ये मधुप्रक्षेप्यं न तु पाके॥ २६५—२७२॥

गोधूमिका: गोधूमपिष्टकृता: सस्नेहादिगुणयुक्ता: गुरव: पुनस्त एव संस्कारात् पाकविशेषात् गोधूमपैष्टिका: गोधूमचूर्णकृता: शूकधान्यशमीधान्यपिष्टकृताश्च निस्नेहा: अत्यग्निपक्वाश्चेत्यर्थ: लघवो भवन्ति। पृथुका: शालिधान्यचिपिटका:। भृष्टान् कन्दुशालायां वालुकाभृष्टान्। यावा यवचिपिटका: सरसा इति आर्द्रयवा मृदुभृष्टा: मूषलाघातेन चिप्पटीभूता यावा: इत्यर्थ:। सूप्यविकृता: चनकादिकृता: अन्नविकृता: तण्डुलकृता: भृष्टा इत्यर्थ:। तान् कटुस्नेहेन सर्षपतैलेन लवणेन च सहितान् अल्पशो भक्षयेत्। मृदुपाका: स्वल्पाग्नियोगेन पक्का:। व्यतिक्रान्तपाका: सुदीर्घकालेन जीर्यतीत्यर्थ:। अथवा स्थूलादयो भक्ष्या: मृदुपाका: गुरव: खरपाकाश्च पुष्ट्यादय: यच्छन्ति॥ २७३—२७७॥

सामान्यत: पक्वान्नस्य गुणनिर्णयक्रममाह द्रव्येति। विमर्दको व्यञ्जनविशेष: 'घण्ट' इति वंगे। स च पक्वापक्वक्लिन्नभृष्टै: नानाद्रव्यै: समायुक्त: एकत्र पक्त्वा उत्करीकृत: स्यात्। रसालालक्षणन्तु—"सचातुर्जातकाजाजि सगुडार्द्रकनागरम्। रसाला स्यात् शिखरिणी संघृष्टं ससरं दधि॥" इति। सगुडदधिगुणमाह स्नेहमिति। पानकानाह द्राक्षेति। इक्षुविकृति प्रतीति इक्षुविकाराणां शर्कराखण्डादीनामित्यर्थ:। तत्रापि कटवम्लसंयोगात् मरिचजम्बीररसादिसंयोगात्। रागषाडव: नानाविधानामम्लफलानां गुडतैललवणकटुमिश्राणां पाकेन निष्पन्ना: 'आचार' 'चटनी' इति वा भाषा। आम्रादिलेहगुणानाह आम्रेति। इतरफललेहानां गुणनिर्णयप्रकारमाह बुद्ध्वेति। शुक्रगुणानाह रक्तपित्तेति। शुक्रलक्षणन्तु—"यन्मस्त्वादिशुचौ भाण्डे सगुडक्षौद्रकाञ्जिकम्। धान्यराशौ त्रिरात्रस्थं शुक्तं चूक्रं तदुच्यते॥" इति। शुक्तकाञ्जिकादावासूतानां मूलकादीनां गुणानाह कन्देति। शिण्डाकीलक्षणन्तु "शिण्डाकीराजिकायुक्तै: स्यान्मूलकदलद्रवै:। सर्षपस्वरसैर्वापि शालिपिष्टकसंयुतै:॥" इति। अन्यदासूतं सन्धानान्तरं

यच्च कालाम्लं कियत्कालञ्च पर्युषिततया संजाताम्लम्, नत्वम्लसंयोगादित्यर्थः ॥ २७८—२८७ ॥ इति कृतान्नवर्गः ॥

ननु कृतान्नवर्गे पृथग्द्रव्याणां गुणादिकं समीक्ष्य नानाद्रव्यसंयुक्तभक्ष्यस्य गुणनिर्णयोपदेशो वर्तते न खल्वज्ञाते पाकसहायके द्रव्ये गुणकर्मतस्तन्निर्णयोऽसम्भाव्य इत्याहारयोगिवर्गं व्याचिख्यासुस्तत्र तैलगुणानाह कषायानुरसमिति । तत्र तैलं मुख्यं तिलभवम् । त्वच्यमभ्यंगात् । संयोगसंस्कारान् नानौषधिसम्मिश्रणेन पाकाद्धेतोः । तैलप्रयोगात् पानाभ्यंगादिना । संख्ये युद्धे अतिबला आसन् । एरण्डतैलगुणमाह एरण्डेति । सार्षपतैलगुणमाह कटूष्णमिति । कण्डूवादिविनाशनमभ्यंगात् । पियालतैलं पियालबीजकृतं तैलम् । आतस्यमुमाबीजतैलम् । कसुम्भतैलं कुसुम्भबीजतैलम् । एवमनुक्तानि फलतैलानि तत्तत्फलगुणैर्निर्देष्टुमाह फलानामिति ॥ २८८—२९६ ॥

वसाया मज्ञश्च गुणानाह मधुर इति । यथासत्त्वं तत्तज्जीवानुरूपम् । यस्य मांसमुष्णवीर्यं तस्य वसामज्जानावुष्णौ यस्य च शीतं तस्य च शीतौ ज्ञेयौ । शुण्ठीगुणमाह सस्नेहमिति । आर्द्रपिप्पलीगुणमाह श्लेष्मलेति । शुष्कायाः गुणमाह सेति । मरिचगुणमाह नात्यर्थमिति । हिंगुगुणमाह वातश्लेष्मेति । सैन्धवगुणमाह रोचनमिति । सौवर्चलगुणमाह सौक्ष्म्यादिति । सौक्ष्म्यात् सूक्ष्मस्रोतःप्रवेशित्वात् । विडलवणगुणमाह तैक्ष्ण्यादिति । औद्भिदलवणगुणमाह सतिक्तेति । काललवणगुणमाह नेति । स च विट्सदृशो गन्धहीनः । सामुद्रं सामुद्रजलोद्भवम् । पांशुजं मरुभूमिजातं सम्भरादिकम् । पाकि नानाविधपाकेन निष्पन्नं कृत्रिमं लवणम् ॥ ॥ २९७—३०६ ॥

यवक्षारगुणानाह हृत्पाण्डविति । यावशूकः यवानां शूकैर्निर्मितः इत्यर्थः । सर्वक्षारगुणानाह तीक्ष्णेति । कारवी मधुरिका । कुञ्चिका कृष्णजीरकः । अजाजी जीरकः । तम्बुरुः कुस्तुम्बुरुः । नन्वेतैरेव नाहारयोगिवर्गः समाप्यः अन्यान्यपि सन्ति आहारयोगिद्रव्याणि इत्याशंकां समाधातुमाह आहारेति । भक्तिनिश्चय इति भक्तिरिच्छा नानाप्रदेशे नानाद्रव्याणि तत्तद्देशवासिनामिच्छावशाद् बहूनि सन्ति इति तस्या निश्चयो न भवितुमर्हति इत्यर्थः । अतस्तेषां रसादिभिर्गुणो ज्ञेय इति तात्पर्यम् ॥ ३०७–३१० ॥

द्रव्याणां सर्ववर्गोक्तानां प्राशस्त्यमभिधातुं प्राक् शूकशमीधान्यवर्गोक्तेषु प्रशस्यमाह शूकधान्यमिति । समातीतं संवत्सरातीतम् । प्रायश इत्यनेनातिपुरातनस्य अतिरूक्षत्वादग्राह्यत्वं भवतीति ज्ञेयम् । यद् यदिति । आगच्छति वपनानन्तरं त्वरितं सम्भवति । सूप्यं माषमुद्गादिकम् । युक्तिभृष्टमीषद्भृष्टम् । निस्तुषं त्वग्रहितम् । मांसेषु प्रशस्याप्रशस्यत्वमाह मृतमिति । मृतं स्वयं मृतं व्याध्यादिना । अतिमेद्यमतिमेदस्कम् । बालमित्यतिबालम् । अगोचरभृतं यस्य जन्तोर्जीवनोपायोऽविज्ञातस्तस्य मांसम् । व्याल-

मृदितं श्वापदैर्हतम् । मांसरसगुणानाह प्रीणन इति । यथास्वमिति रोगानुसारेण पृथग्भेषजादिना संस्कृतमित्यर्थः । शाकस्य फलादेश्च ग्राह्याग्राह्यत्वमाह क्रिमीति । क्रिम्यादिना आक्रान्तम् । हतमिति विकृतमित्यर्थः । जीर्णमतिवृद्धम् । अनार्तवमनुत्पादकाले यत्नातिशयेन जातम् । अपरिस्रुतमुदकेन पक्त्वा न त्यक्तनिःक्वाथम् । अस्नेहसिद्धं विना स्नेहेन पक्वम् । पुराणं शुष्कम् । आममपक्वम् । संक्लिष्टमाक्रान्तम् । व्यालैः काकादिपक्षिभिः । अदेशजं यथा द्राक्षा आनूपदेशजा आम्रं पार्वत्यदेशजमित्यादि । अकालजं हेमन्ते आम्रं वसन्ते द्राक्षा इत्यादि । क्लिन्नमतिपक्वतया गलितम् । साधनाहृते इति न खलु तत्शाकवत् परिस्रुतं स्नेहसिद्धञ्च कर्तव्यमित्युपदिष्टमित्यर्थः ॥ ३११-३२० ॥

अनुपानमाह यदाहारेति । यत्पानमाहारगुणैः विपरीतं विपरीतगुणं भवति तदिष्यते यच्च धातूनां देहधातूनां विरोधि न भवति तदन्नानुपानं दृष्टम् । तत्रानुपानार्थं द्रव्यमाह आसवानामिति । धातुभेदेनानुपानभेदमाह स्निग्धेति । पयः क्षीरम् । मधूदकं मधुपानकम् । मद्यमांसोचितानामेव मद्यमनुपानं भवति न त्वन्यत्रेत्याह अल्पाग्नीनामिति । अनुपानकर्मगुणानाह अनुपानमिति । तर्पयति घनद्रव्यसेवनादनन्तरं द्रवपानात् तृप्तिमापादयति । प्रीणयति सौहित्योपयोगात् प्रीतिमुत्पादयति । ऊर्जयति बलमादधाति । पर्याप्तिमभिनिर्वर्तयति असम्पूर्णमाहारं सम्पूर्णतां गमयति । अवसादयति खाद्यं क्लिन्नतां प्रापयति । संघातं घनं चान्नं सूक्ष्माकारेण भिनत्ति । आशुव्यवायितां सर्वशरीरव्याप्तियोग्यताम् । युक्तं यत्र यदनुपानं कर्तव्यं तच्च सौश्रुतेऽन्नपानाध्याये सौत्रीयेऽनुपानप्रकरणे द्रष्टव्यम् । ग्रन्थविस्तरभयान्नोल्लिखितम् ॥ अनुपानानर्हानाह नेति । ऊर्ध्वं गमारुताविष्टाः ऊर्ध्वकाये वातेन पीडिताः । कथमुदकं न पिबेदित्याह तद्धीति । हि यतः तदुदकं कण्ठोरसि स्थितम् आहारजं स्नेहमिति भुक्तमात्रादारभ्य आहारमधुरपाकादुदीर्णं कफमित्यर्थः । हत्वा उदकस्रोतसा प्लावयत् कफस्य स्नेहांशं विनाश्य वायोर्बलं वर्धयद् दोषाय वायुवेगेन तेषां तेषां व्याधीनां प्रकोपाय भवतीत्यर्थः । गत्वेति पाठे तु कण्ठोरोगतेन कफेन संमिश्र्य तं वर्धयत् तान् तान् व्याधीन् द्विदोषोल्वणान् कुर्वत् गीतादिप्रसक्तानां स्वरभेदम् उरःक्षतिनाञ्च यक्ष्माणमापादयत् दोषाय भवतीत्यर्थः । केचित्तु तेषां व्याधितानामनुपानं कण्ठोरसि स्थितमेव सत् आहारजं स्नेहं नाशयतीति व्याचिख्यासति न जाने पीतमुदकं कथंकारं कण्ठे उरसि वा स्थातुं शक्नोतीति । अत्र सुधिय एव प्रमाणम् ॥३२१-३३०॥

नानादेशीयानां नानाविधानामन्नपानानां साकल्येन वर्णनमसम्भाव्यमेवेति सदैव प्राधान्येनाभ्यवह्रियमाणानामन्नपानानां गुणास्त्वत्र निर्दिष्टा इत्याह अन्नपानेति । प्रायोपयोगिकः इति बाहुल्येन य उपयुज्यते स एवान्नानैकदेशः उक्तः स गुणकर्मभिः वर्णितः । सर्वदेशोपयोज्यानि द्रव्याणि कात्स्न्र्येन नामभिरपि निर्देष्टुं न शक्यं किमुत गुणकर्मभिः । तर्हि अनुक्तानां

भक्ष्यद्रव्याणां गुणकर्मज्ञानाभावान्न तेषां हिताहितत्वं निर्णीयते न वास्य मात्रादिकम् इति त्यक्तद्रव्याणां गुणज्ञानायोपायानाह यथेति। यथा नानौषधं किञ्चिदिति यत्तु पूर्वाध्याये "नानौषधिभूतं जगति किञ्चिद् वर्तते" इति सिद्धान्ते अनुक्तद्रव्याणां गुणविज्ञाने यानुपायान् प्राह तथैवात्र अन्नपानानां गुणाः ज्ञेयाः। पक्षान्तरमाह देशजानां वचो यथेति। यथा वा देशजानां तत्तद्देशीयानामंगवंगकलिंगमहाराष्ट्रादीनां वचः भाषा तत्तद्देशीयेभ्य एव ज्ञेयं भवति तथैव तत्तद्देशजं द्रव्यं तत्तद्देशीयेभ्यो गुणान् ज्ञात्वा ते निर्देश्या भवन्तीत्यर्थः॥ ३३१-३३२॥

दृष्टान्तार्थमनुक्तद्रव्याणां गुणविज्ञानाय का नाम प्रणाली आश्रयणीया इत्यनुक्तस्य मांसस्य गुणनिर्णयविधौ परीक्षाप्रकारमुद्दिशति चर इति। चरादिभिः परीक्ष्य मांसस्य ग्राह्याग्राह्यत्वं निर्णयं भवतीत्यर्थः। अथ चरादिशब्दान् व्याख्याय निर्दिशति चरोऽनूपेत्यादि। चरो विचरणस्थानं भक्ष्यसंविधिश्च बोध्यते। तत्रोदाहरणमाह जलजा इति। जलजा जल एव जायन्ते तत्रैव च निवसन्ति ये ते। जलचरास्तु भक्ष्यार्थं जले विचरन्ति न तु जले निवसन्ति इति भेदः। सत्वाः प्राणिनः। धन्वजाः मरुदेशजाः। धन्वचारिणः मरुप्रदेशे आहारार्थं विचरन्ति ये ते॥ ३३३-३३५॥

शरीरावयवभेदेनापि मांसस्य गुरुत्वं लघुत्वं वा क्रमागतत्वाद् विचारयति शरीरावयव इति। एतेन सर्वशरीरावयवेभ्यः सक्थिमांसम ऊरुमांसं लघुतमं भवति, ततः स्कन्धमांसं ततश्च क्रोडस्य वक्षसः पार्श्वमांसं शिरोमांसं ततश्च गुरु ज्ञेयम्। वृषणाविति। अत्र "वृषणौ वस्ति मेढ्रश्च श्रोणिवुक्के यकृद्गुदम्" इति पाठः साधीयान्। चर्म इति पाठो न वरो मन्ये अभक्ष्यत्वात् तस्य। वुक्कन्तु उरोमध्यास्थि। तच्च वुक्क्यते स्वादुत्वान् मृग्यते इति निरुक्त्या सर्वशरीरमांसात् स्वादिष्ठत्वेन तस्यैव ग्रहणं साधु भवति। वंगेऽप्यस्य 'वुक' इति प्राकृती संज्ञा दृश्यते। वस्तिग्रहणेनैव तच्छिरोभूतयोः कुक्षिगोलकयोर्ग्रहणं साधु भवितुमर्हति। क्वचित् क्वचित् पुस्तके तथैव पाठो दृश्यते। वुक्कशब्दस्य व्याख्यानमपि कैश्चित् टीकाकृद्भिः कृतम। चक्रस्त्वत्र मौन एव। श्रोणीति नितम्बमांसम्। मध्यमस्थि पृष्ठवंशास्थि। यथास्वमिति तत्तत्प्राणिमांसस्य स्वाभाविकगुरुत्वलघुत्वादिकमपेक्ष्येत्यर्थः॥ ३३६-३३७॥

क्रमागतत्वात् स्वभावं परीक्ष्यते स्वभावादिति। धातूनां गुरुलघुत्वं विवेचयति धातूनामिति। शोणिताद्यानां शोणितमांसमेदोऽस्थिमज्जशुक्राणाम्। यथोत्तरमुत्तरोत्तरम्। क्रियां विवृणोति अलसेभ्य इति। अलसेभ्यः स्वल्पक्रियेभ्यः॥ ३३८-३३९॥

लिंगपरीक्षामाह गौरवमिति। लिंगसामान्ये समानायां जातौ। विधानञ्चैतत् पशुमधिकृत्य भवति पक्षिषु चान्यथा भवति। यदुक्तं हारीते—"चतुष्पादेषु लघ्वी स्त्री विहगेषु लघुः पुमान्" इति। वृद्धवाग्भटे च—"लघुर्योषित् चतुष्पात्सु विहंगेषु पुनः पुमान्" इति सुश्रुतेऽपि "स्त्रियश्चतुष्पादेषु

पुमांसो विहंगेषु" इत्यादि समानतन्त्रदर्शनादत्रापि शब्दार्थसंकोच: कर्तव्य:। प्रमाणं परीक्ष्यते महेति। स्वजातावित्यवान्तरजातेरेव ग्रहणम्। तेन महाकायस्वल्पकायत्वाभ्यामेव सा जातिर्निर्देश्या। न तु मत्स्यसामान्यान् मृगत्वसामान्याद्वा, तेन ह्रस्वकायो रोहितो मत्स्यो महाकायात् तस्माल्लघुर्भवतीति बोध्यम्, न तु प्रोष्ठिकारोहितयो:॥ संस्कारपरीक्षामाह गुरूणामिति। सविपर्ययमिति लघूनामपि संस्काराद्गुरुत्वं स्यादित्यर्थ:। तयोरुदाहरणे प्राह व्रीहेरिति। गुरोरपि व्रीहे: व्रीहिधान्यात् वालुकाभृष्टात् लघवो लाजा जायन्ते। लघूनामपि सक्तूनां पाकात् सिद्धपिण्डका: सक्तुकृतपिष्टकविशेषा: गुरवो भवन्ति॥ ३४०–३४१॥

मात्रापरीक्षामाह अल्पादाने इति। स्वभावतो गुरुद्रव्याणा माषादीनामल्पमात्रया ग्रहणेन लघुत्वं भवति, एवं स्वभावलघूनामपि लाजादीनामतिमात्रया ग्रहणेन गौरवं भवतीति गुरुत्वे लघुत्वे वा मात्रापि कारणं भवतीत्यर्थ:। उद्दिष्टं मात्राशितीये यथा—"द्रव्यापेक्षया त्रिभागसौहित्यमर्धसौहित्यं वा गुरूणामुपदिश्यते लघूनामपि नातिसौहित्यमग्नेर्युक्त्यर्थम्" इति। द्रव्याणि मात्रामपेक्षन्ते सममात्रावन्त्येव तानि गुरूणि लघूनि वा भवन्तीत्यर्थ:। मात्रा चाग्निमपेक्षते इति प्रतिपुरुषं प्रतिदिवसमग्नेर्बलाबलमभिसमीक्ष्यैव मात्रा निर्णेया भवेदित्यर्थ:॥ ३४२—३४३॥

कथं मात्राग्निमपेक्षत इत्याह बलमिति। बलादयो अग्नौ प्रतिष्ठिता इति। अग्निना सम्यक् पकादेव खाद्याद् बलादयो भवन्ति यद् वक्ष्यति—"यदन्नं देहधात्वोजोबलवर्णादिपोषकम्। तत्राग्निहेतुराहारान्न ह्यपक्वाद् रसादय:" इति। इन्धनैरिव अन्नपानैरग्निर्ज्वलति अग्नेरप्यन्नरसपोष्यत्वात्। अन्यथा तदभावात् तदधिकत्वाद्वा व्येति नाशं गच्छतीत्यर्थ:। अत एवात्यग्निपुरुषान् प्रति गुरुलाघवचिन्ता नास्तीत्याह गुरुलाघवेति। महोदरा इति महाशना:। कर्मनित्यानां व्यायामादग्निबलं वर्धत एव यदुक्तम् "अन्यत्र व्यायामाग्निबलात्" इति॥ ३४४—३४६॥

उपसंहरन् सामान्येन भोजनविधिमाह हिताभिरिति। अन्तरग्निं जाठराग्निम्। अन्नपानरूपैरिन्धनै: यज्ञीयकाष्ठैर्जाठराग्निरूपहोमाग्नौ समाहित: सावधान: सन् मात्राकालौ विचारयन् यथाकाले यथामात्रञ्च जुहुयात्। विधेरस्यार्थवादमाह आहिताग्निरिति। अहिताग्निरिवेत्याहिताग्नि:। आहिताग्निना तु नित्यं होम: कर्त्तव्य:। य: दिवसे दिवसे पथ्यानि हितान्यन्नपानानि अन्तरग्नौ जुहोति ब्रह्म चायुर्वेदं जपति तदनुसृत्याहितानि परिहृत्य हितानि सेवते अथ आयुर्वेदज्ञानानन्तरं ददाति लूनाति कालादिजन्यं दोषसञ्चयं वमनविरेचनादिना छिनत्ति, तं नरं किम्भूतं निश्रेयसे आत्महिताय युक्तं पाने भोजने च सात्म्यज्ञं स्वोपशयज्ञ विविच्य आहारादिकं कुर्वाणं भाविन: आगामिन: अन्तरात् अन्तं राति ददाति इति अन्तर: मृत्युरूप: स्वाभाविको व्याधि: तस्माद्दते विना न केचिदामया: भजन्ते। मृत्युरूप: स्वाभाविको

व्याधिः सर्वेषामायात्येवेति तद्वच्यवच्छेदो युक्त एव। आहिताग्निरपि प्रतिदिवसं पथ्यानि होमीयद्रव्याणि आत्मीयाग्नौ जुहोति ब्रह्म च जपति ददाति च। तमेव निश्रेयसे मोक्षाय उद्युक्तं अवश्यम्भाविन आत्मीयप्राक्कर्मफलजातेते किमपि दुःखं न भवतीत्युपमात्र व्यज्यते। अस्यैव व्याख्यानमाह षट्त्रिंशतमिति। रात्रीणां षट्त्रिंशत्सहस्राणि वर्षशतमित्यर्थः। अनातुरमिति शतवर्षमध्ये कोऽपि व्याधिर्न भवतीत्यर्थः। पुनरन्नं स्तौति प्राणा इति। अभिधावति कांक्षति। प्रतिभा "प्रज्ञानवनवोन्मेषशालिनी प्रतिभा मता" इतिलक्षणा। मेधा धारणावती बुद्धिः। वृत्तौ देहवृत्तौ लौकिकं कर्म ऐहिकं कर्म। वैदिकं पारलौकिकं स्वर्गप्राप्तौ अपवर्गे मोक्षे च यत कर्म। यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतञ्च तत्सुखं "स्वःपदास्पदम्" इतिलक्षणः स्वर्गः। अपवर्गश्च आत्यन्तिकदुःखनिवृत्तिलक्षणः। निगदार्थमन्यत्॥ ३४७–३५३॥

अध्यायार्थं समासतो निवेद्य तं समापयति। तत्र श्लोक इति॥

॥ ३५४॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पणयां सूत्रस्थाने अन्नपानविधिर्नाम सप्तविंशोऽध्यायः॥

अष्टाविंशोऽध्यायः।

ननु विविधं खाद्यं पेयञ्च वस्तुजातं सम्यगशितं पीतं वा कथंकारं शरीरस्योपचयाय प्रभवति, कथं वा आहारमपि कुर्वतां केषाञ्चिन्नोपचयाय भवतीति शिष्यशंकानिरासार्थमध्यायान्तरमारभते अथात इत्यादिना। हितमेवाहारजातं शरीरोपचयाय प्रभवतीत्याह विविधमिति। अशितं भक्ष्यमन्नादिकम्। पीतं द्रवद्रव्यम्। लीढं लेह्यं पायसादिकम्। खादितं चर्व्यमपूपादिकम्। एतैरेव सर्वेषामेवाहार्यद्रव्याणां परिग्रहः कृतः। तच्च हितमहितमिति द्वेधा भिद्यते। तत्र हितं यदशितादिकं तद् अन्तरग्निसन्धुक्षितबलेन अन्तरग्निना पाचकाख्येन पक्वामाशयमध्यस्थेन पित्तेन सन्धुक्षितं प्रवृद्धं बलं यस्य तेन यथास्वेन उष्मणा इति पञ्चभिर्भूताग्निभिः सप्तभिर्धात्वग्निभिरन्नपाचकेनेति त्रयोदशविधैरग्निभिः यत्र योऽग्निर्युज्यते तत्र तेनैवेत्यर्थः। सम्यग् विपच्यमानं सत् शरीरधातून् ऊर्जयति उपचितान् करोति केवलं कृत्स्नं शरीरमुपचयबलवर्णसुखायुषा योजयतीति योजना। कीदृशं तच्छरीरमित्याह कालवदिति। काल इव अनवस्थितः सन्तत्या गतिशीलः सर्वेषां धातूनां रसरक्तादीनां पाकोऽपचयो यत्र तत्। एतेन कालो यथा सन्ततं गच्छति तथैव देहधातवोऽपि स्वेन स्वेनोष्मणा विपक्वा मलतामेत्य बहिर्निर्गच्छन्ति इति सदैवैषां धातूनां पूर्तिरावश्यकी स्यात्। एव प्रकृतिकमपि शरीरं सम्यग्विपच्यमानेनाशितादिना पुनरनुपहतसर्वधात्वग्निमारुतस्रोतो भवति। सर्व

धातवो रसरुधिरादयो वक्ष्यमाणा:। ऊष्मा त्रयोदशविधा अग्नय:। मारुतस्तु सर्वशरीरपरिचालको वातधातु: तेषां स्रोतांसि च तेनैवाहारसारेण अनुपहतानि सन्ततमपचयशीलान्यपि यथाप्रमाणं अवतिष्ठन्ते इत्यर्थ:। न केवलं शरीरधात्वाद्यपचयपूरणमस्य कार्यं पुनर्बाल्ये यौवने च तान् धातून्नूर्जयति वर्धयति च। तच्चैव शरीरं जीवयति यापयति वार्धक्ये वर्धयति चेति निष्कर्षार्थ:॥ १—३॥

ननु केन प्रकारेणाशितपीतादिकं धातून् पोषयति इत्याह धातव इति। धातवो रसरक्तादय: सततं स्वत एव अपचीयमाना अपि धात्वाहारा: इति धातुरन्नरसरूप आहारो येषां ते तथाविधा: सन्त: प्रकृतिमनुवर्तन्ते अपचितांशपूरणादिति भाव:। धातूनां यावान् अंशोऽपचितो भवति तावांस्तु अन्नरसादेव पूर्णो भवतीति अन्नरस एव तेषामाहारस्वरूपो भवतीत्याशय:॥ ४॥

ननु को नामायमन्नरस इत्याह इति। आहार: परिणतिवशात् प्रसादाख्यं रसं किट्टाख्यं मलञ्च अभिनिर्वर्तयति। सम्यग् जीर्णाहारस्य द्विविधैव परिणतिर्भवति एक: अन्नरस: प्रसादापरपर्याय: सार इत्यर्थ:, अपरश्च किट्टापरपर्यायो मल इत्याशय:॥ ५॥

एतौ द्वावेव सारकिट्टौ शरीरगतान् धातुमलान् पोषयत: इति प्रतिपिपादयिषुरादौ स्वल्पवक्तव्यत्वेन किट्टपोष्यान् मलानाह किट्टादिति। किट्टाद् आहारपरिणतिरूपाद् मलांशात् स्वेदादयो नखान्ता: मलाख्या अवयवा: पुष्यन्ति इत्यर्थ:। तत्र स्वेदो हि द्विविध: एकोऽन्नमलरूप: द्वितीयस्तु मेदोमल:। तत्र पूर्वो य: सदैव प्रभूतपरिमाणेनोदकाकृतिरुष्मणानुबद्ध: लोमकूपेभ्यो निष्पतन् स्वेदशब्दमधिगच्छति। द्वितीयस्तु स्वल्पपरिमाण: स्निग्ध ईषत्सान्द्र: प्रच्यवन् त्वचां स्निग्धत्वं सौकुमार्यञ्चापादयति। मूत्रपुरीषे च प्रसिद्धे। वातस्त्वत्र मलरूपो वायु: मनाक्स्थूल: स चाहारस्य मलरूप: कोष्ठे सञ्चिनोति पुनश्च कोष्ठादुद्गाराधोवायुरूपेण सततं बहिर्निर्गच्छति। अस्यैवातिशय्ये आध्मानाटोपादिका व्याधयो जायन्ते। न खल्वत्र धातुवातोऽभिप्रेत:। न हि तस्य पोषणं किट्टांशाद् भवितुमर्हति। तस्य च बहिर्मुखस्वभावान्मलत्वमेव सिध्यति। यदुक्तं वृद्धवाग्भटे—"वायु: पुनरन्नेराहारस्य च बहुलपतया तस्मात् तस्माद् मूर्छनाविशेषाद् अमूर्त: शब्दवान् ईषच्छब्द: प्रचुरोऽल्पो वा पञ्चात्मा कोष्ठे प्रादुर्भवति" इति (शा० ६ अ०)। अस्य च अनशनात् क्षय: आहाराच्च प्रवृत्तिरिति दर्शनात् स चान्नमल एव निश्चीयते। चक्रेणाप्यर्थोऽयं स्वीकृतो यथा—"अन्नाद् य: किट्टांशस्ततो मूत्रपुरीषे भवतो वायुश्च" इति॥ पित्तमत्र मलपित्तं तच्च रुधिरस्य मलांशेनोत्पन्नं सद् यकृद्गते पित्तकोषे सञ्चीयते। मलत्वेन बहिर्मुखस्वभावाच्च तत्संसृष्ट्या नाड्या अन्तर्नाभौ पतदन्नमलेन सह बहिर्निर्गच्छति। नायं पित्तधातुरित्यवगन्तव्यम्। धातुत्वे चास्य रक्तमलत्वेन

निर्देशः किट्टांशाश्च पुष्टिर्बहिर्मुखत्वञ्च न संगच्छेत। श्लेष्मा चात्र रसमल-स्वरूपः। नायं धातुकफ इति मन्तव्यः। अयं हि सञ्जाते प्रतिश्याये मुख-नासिकाभ्यां निर्गच्छति। कासादिव्याधौ च उरस्तः कण्ठतो वा मुखमार्गेण निःसरति। प्रकृतावप्ययं बाह्याभ्यन्तरस्रोतांसि सततं सिञ्चन् पैच्छिल्येन स्वक्रियासमर्थानि कुर्वन्ति। अस्य बहिर्मुखस्वभावाद् रसमलत्वेनोल्ले-खात् किट्टपोष्यत्वाच्च मलत्वं सिध्यति। कर्णादिगता मलास्तु मांसमलाः। केशादयश्चास्थिमलाः। अत्र आदिपदेन मज्जमलस्य नेत्रादिस्नेहरूपस्य लसीकादीनाञ्च परिग्रहो भवति। वक्ष्यति च—

"किट्टमन्नस्य विण्मूत्रं रसस्य तु कफोऽसृजः।
पित्तं मांसस्य खमलाः मलः स्वेदस्तु मेदसः।
स्यात् किट्टं केशलोमास्थ्नो मज्ञः स्नेहोऽक्षिविट्त्वचाम्॥"
इति (चि० १५ अ०।

प्रजननमिति अधिकरणवाच्येऽनट् तेन तस्मिन् तस्मिन् जायमाना मला इत्यर्थः॥ ६॥

किट्टपोष्यान् मलधातूनुक्त्वा अन्नरसाख्यसारपोष्यानाह पुष्यन्तीति। ओजःसहिताः रसादयः सप्तधातवः पञ्चेन्द्रियद्रव्याणि पञ्चेन्द्रियपोषकानि क्षित्यादिप्रधानानि पाञ्चभौतिकानि द्रव्याणि। धातुप्रसादसंज्ञकानि धातु-संज्ञकानि रसाद्योजोऽन्तानि द्रव्याणि। प्रसादसंज्ञकानि च इन्द्रियपोषक-द्रव्याणि। शरीरसन्धिबन्धाः स्नायुशिराधमन्यादयः पिच्छादय इति पिच्छा-मांसादिसन्धौ च परस्परघर्षणनिवारकाः पिच्छिलाः पदार्थाः। आदिशब्देन कोष्ठांगानि स्तन्याद्युपधातुसंज्ञकानि द्रव्याणि च परिगृह्यन्ते॥

अत्र रसादिपोषणमन्नरसेन कथंकारं भवतीत्युच्यते। न खल्वस्मिन् तन्त्रे कश्चित् प्रकारविशेष उक्तः। परन्तु सुश्रुते स च प्रकारः दृष्टान्ताभ्यां कथित आस्ते। यथा—"इदं शरीरमाराम इव जलहारिणीभिः केदार इव च कुल्याभिरुपस्निह्यते" इति। अत्रान्नरसेनैकेन बलधातुपोषणक्रमः इन्द्रिय-द्रव्यादिपोषणक्रमश्चात्र समासतो विचार्यते॥

तत्र सप्तधातुपोषणक्रमे विदितवेदितव्यानामायुर्वेदविदां त्रिविधा सरणिर्दृश्यते तद् यथा—क्षीरदधिन्यायः, केदारकुल्यान्यायः, खलेकपोति-कान्यायश्चेति। तत्र क्षीरदधिन्यायो यथा—कृत्स्नात् क्षीरात् संस्कारेण ततोऽन्यूनं दधि जायते तन्मन्थनाच्च ततो न्यूनं नवनीतं भवति तत्पाकेन च ततोऽपि न्यूनं घृतं भवतीति। एवमन्नरसः पक्वः साकल्येन रसधातुर्भवति। ततो रसधातुपक्वः साकल्येन ततो न्यूनं रक्तं भवति रक्तञ्च पक्वं मांसतामेति ततश्च मेदः, एवं शुक्रान्तानां धातूनामुत्पत्तिः पूर्वपूर्वोपादानेन परपराक्रमेण भवति एष खलु क्षीरदधिन्यायः। केदारकुल्यान्यायस्तु यथा कुल्याभिः क्षेत्रे जलसेचनेन प्राक्सन्निकृष्टं शस्यं प्लाव्यते क्रमशो दूरदूरान्तरस्थम्। एवमेक एवाहाररसः प्राक्सन्निकृष्टं पोष्यरसं प्लावयन् पोषयति। ततश्च तद्गतः सन्

परवर्तिनं धातु रक्तं, ततस्तद्गतो मांसम्, एवंक्रमेण शुक्रं यावत् सावयन् पोषयति। स चैकेन वर्त्मना पृथक् पृथक् धातुमतिक्रम्य क्रमशोऽन्तिमं धातुं प्रविश्य तान् क्रमश: पोषयतीति। खले कपोतन्यायस्तु यथा—कस्मिंश्चित् शस्यमर्दनस्थाने (खले) नानास्थानादागता: कपोता: एकत्रीभूय पुनर्विभिन्नैर्मार्गैः स्वं स्वमावासं यान्ति तत्र सन्निकृष्टवासा: स्वल्पेन कालेन विप्रकृष्टवासास्तु दीर्घेण कालेनेति तद्वदेक एवान्नरस: विभिन्नेन पथा पृथग्धातुस्थानं गत्वा तान् पोषयति। तत्र सन्निकृष्टे धातुस्थाने स्वल्पेनैव कालेन याति विप्रकृष्टे तु दीर्घेणेति विशेष:। एवं त्रिविधे धातुपोषणप्रस्थाने उद्दिष्टे कतरोऽयं पन्था आयुर्वेदसम्मतस्तद्विचारयितुं युज्यते॥

अन्नरसस्तु वातादित्रिधातुसमवायरूप: इति मदीये 'शारीरविनिश्चये' सम्यक् प्रतिपादितम्। पुनश्च ग्रहणीचिकित्सितटिप्पण्यां प्रतिपादयिष्यते। अतस्तेषां समवाये शरीरस्य पृथक्प्रयोजनसंसिद्ध्यर्थं पोषकधातोरन्नरस-स्यापि चातुर्विध्यं भवितुं युक्तम्। इत्यन्नरसोऽसौ वातप्रधान: पित्तप्रधान: श्लेष्मप्रधान: सर्वसमश्चेति चतुर्धा भिद्यते। अत एव तदुत्पन्नं रक्तमपि वातरक्तं पित्तरक्तं श्लेष्मरक्तं शुद्धरक्तञ्चेति चतु:प्रकारं भण्यते। एवं तेनैव रक्तवहानां शिराणां चतुर्धात्वं भवितुमर्हति। अत्रान्नरसस्यैव पोषकत्वेऽपि तद्वाहकस्य रक्तस्य पोषकत्वं गौण्या वृत्त्या सर्वत्र शास्त्रे कथितमास्ते। तत्र शिरावर्णविभक्त्यध्याये सौश्रुतशारीरे एवं रक्तवहाया: प्रणाल्या अपि शरीरोपस्नेहनमनयैव दिशा कथितम्। तत्र तु दृष्टान्तद्वयेन पोषणक्रमो विशदीकृत:। तच्च प्रागेवोक्तम्। न खलु दृष्टान्तद्वयन्तद् एकमेवार्थं बोधयति। नानावृक्षसमन्विते आरामे जलसेचनस्थलात् पृथक् पृथक् प्रणालीभि: पृथग् वृक्षमूलं सिञ्चज्जलं गच्छति। कुल्याजलं तु केदारवृतिं निर्भिद्य एकदैव एकैनैव पथा समग्रं केदारं क्रमश आप्लाव्य सर्वाण्येव शस्यमूलानि सिञ्चद् गच्छति। अत: शरीरेऽपि एतेन दृष्टान्तद्वयेन कञ्चिद् विशिष्टमवयवं पोषयितुं विशिष्टया प्रणाल्या विशिष्टो वातादिप्रधानोऽन्नरस: आराम इव जलहारिणीभिर्गच्छति। पुनश्च सप्तधातुपोषणाय रक्तमिश्र: सर्वधातुसमोऽन्नरस: एकयैव सरण्या शरीरान्त:प्रविश्य प्राक्सन्निकृष्टं धातुं क्रमशोदूराद्दूरान्तरं गच्छन् विप्रकृष्टञ्च धातुमाप्लावयन् पोषयतीति विशेष:॥

सप्तधातुपोषणन्तु सर्वसमरक्तेनैव भवति—यदुक्तं सुश्रुते शुद्धरक्तवाहिन्य: प्रकृतिगतकर्मव्याख्याने—"धातूनां पूरणम्" इति। अतो धातूनामुपचयोऽनेनैव रक्तेन भवतीति ध्रुवम्। एवं परिस्थितौ धातुपोषणक्रमे केदारकुल्यान्याय एवायुर्वेदसम्मतो भवितुमर्हति। सर्वधातुपोषकत्वेनान्नरसस्यैव कर्तृत्वमत्र स्पष्टत: प्रोच्यते। सुश्रुतोऽप्यर्थमिमं समर्थयति यथा—"तत्रैषां धातूनामन्नपानरस: प्रीणयिता" इति (सू० २१ अ०)

ननु तर्हि रसाद्रक्तमित्यादिवाक्यस्य का गति: स्यात्? यद्वदति—"रसाद्रक्तं ततो मांसं मांसान् मेदस्ततोऽस्थि च। अस्थ्नो: मज्जा तत: शुक्रं

शुक्राद् गर्भः प्रसादजः ॥" इति । चि० १५ अ०) इति चेत्कथ्यते । अत्र ह्येकवाक्यतारक्षणाय धातूनामन्नरसादेव क्रमपोषणं नूनं स्वीकर्तव्यम् । अतोऽत्रानन्तर्यार्थे पञ्चमी न तु जननार्थे । तत्र अन्नरसात् प्रागेव रसवहस्रोतः-प्रवेशेन रसाग्निना पच्यमानात् साम्येन किट्टाभावात् कियदंशात् स्थायि-रसस्य पुष्टिर्भवति । ततश्च रक्तवहस्रोतसि प्रविष्टाद् रक्ताग्निना परिपक्वादन्न-रसात् तस्यैव रक्तसमानांशेन कफरूपं मलमुत्सृज्य रक्तस्य पुष्टिर्भवति । ततो मांसवहस्रोतसि प्रविष्टस्य मांसाग्निना पक्वस्यान्नरसस्य मांससमानादंशात् त्यक्तपित्ताख्यकिट्टात् मांसपुष्टिर्भवति । पुनर्मेदोवहस्रोतसि प्रविष्टस्य मेदो-ऽग्निना पक्वस्यान्नरसस्य मेदःसमानादंशात् त्यक्तखमलरूपकिट्टात् मेदःपुष्टिः । ततोऽस्थिस्रोतसि प्रविष्टस्यास्थ्यग्निना पक्वस्य त्यक्तस्वेदरूपकिट्टस्य तस्यास्थि-समानादंशादस्थिपुष्टिः । ततो मज्जवहस्रोतसि प्रविष्टस्य मज्जाग्निना पक्वस्य विसृष्टकेशाद्युपादानरूपमलस्य तस्य मज्जसमानादंशान् मज्ञः पुष्टिः । ततः शुक्रवहस्रोतसि प्रविष्टस्य शुक्राग्निना परिपक्वस्य त्यक्तनयनादिस्नेहरूप-किट्टस्य तस्य शुक्रसमानादंशात् शुक्रस्य पुष्टिर्भवति । यथा हि कुल्याजलं प्रथमं केदारं प्रागाप्लावयति तद्गतञ्च शस्यं तदनुकूलं द्रव्यं जलाद् गृह्णाति ततो द्वितीये केदारे प्लावितं शस्यमन्यत् तस्मादेव जलादनुकूलं खाद्यं गृह्णाति ततस्तृतीयमेवं क्रमशः तद्वत् । एवं क्रमशो बाह्यधातुतः गम्भीरधातुगमनन्तु अन्नरसस्य क्रमाद् भवतीति आनन्तर्ये पञ्चमीयं वक्तुं युज्यते । अत्र सम्भव-जनिप्रभृतिशब्दस्य पोषणार्थे तात्पर्य्यम् । तत्र ते धातवः सदैव शरीरे वर्तन्त एव । तेषामपचितांशपूरणमेवान्नरसस्य कार्यं भवति । अतस्तेषामेक-धातुतो धात्वन्तरोत्पत्तिर्न सम्भवति ॥

नन्वत्र धातवो हि धात्वाहाराः इति स्पष्टं सूत्रं वर्तते तेन च पूर्वं पूर्वं धातुमाहृत्यैव परपरधातूनां पोषणं भवितुमर्हति एवं रसस्य परिणामेन रक्तं तस्य च मांसमेवंक्रमेणैव भवितुं न्याय्यमिति चेदुच्यते । अत्रानयोर्धातुतो धातुपोषणरूपस्य अन्नरसतश्च धातुपोषणस्येति वाक्ययोः नूनमेकवाक्यता रक्षणीया भवति । पूर्वपूर्वधात्वाहारत्वेऽभिप्रेते धातुषु रसस्य ग्रहणं न भवेत् तस्य पूर्वधातोरभावात् । नन्वन्नरस एव तस्य पूर्वो धातुर्भवतु चेत्तस्यैव सर्वेषामाहारत्वेन धात्वाहारत्वसिद्धिरव्याहता स्यात् । अत एव धातुपोषणे सुश्रुतस्य स्पष्टवचनात् केदारकुल्यान्याय एव ग्राह्यो भवितुमर्हति ॥

अथ आरामजलहारिणीन्यायेन शरीरे के खल्ववयवाः पोष्यन्त इति विचार्यते । तत्र पञ्चेन्द्रियद्रव्याणां पञ्चभूतानामपि पोषणमन्नरसेनैव भवति । अतो यैरेव स्रोतोभिः गत्वा यथानुपूर्व्या अन्नरसाद् धातुपोषणं भवति न खलु तैरेव स्रोतोभिस्तथानुपूर्व्या इन्द्रियद्रव्याणां पोषणं सम्भवति इत्यत एव तत्रारामजलहारिणीन्याय उल्लिखितोऽभूत् । एतदर्थमेवान्नरस-गतेन पृथग्भूताग्निना पक्वोऽन्नरसः विभिन्नैर्मार्गैरिन्द्रियद्रव्याणि पोषयितुं शक्नोतीति तदर्थः पृथग् दृष्टान्तः प्रदर्शितः । अतः शुद्धरक्तवाहिनीनां क्रियार्थ-

मर्थाद् धातूनां पूरणार्थं केदारकुल्यान्याय:, इतरेषाञ्च त्रिविधानां वातपित्त-कफरक्तवाहिनीनां क्रियार्थमारामजलहारिणीन्यायो ग्रहणीय:। एवं जठराग्नि-पोषणे दर्शनेन्द्रियपोषणे च पित्तप्रधानान्नरसस्य विभिन्नस्रोतसा यथैव गमनं युक्तं भवति तथैव शिराधमनीनां शरीरबन्धानां श्रवणस्पर्शनेन्द्रियाणाञ्च पोषणे वातप्रधानान्नरसस्य तथा शरीरपिच्छादीनावयवानां घ्राणरसनेन्द्रिया-णाञ्च पोषणे कफप्रधानान्नरसस्य पृथङ्मार्गेण गमनं युज्यत एव। एतत् पोषणदृष्टान्तार्थमेवारामजलहारिणीन्याय: समीचीनो भवति। तत्रेन्द्रिय-द्रव्यपोषणे एकेनैव वातप्रधानान्नरसेन वायव्याग्निपक्वेन स्पर्शनेन्द्रियद्रव्यस्य, आकाशाग्निपक्वेन च श्रवणेन्द्रियद्रव्यस्य पोषणं भवति। तथैव श्लेष्म-प्रधानान्नरसेन आप्याग्निपक्वेन रसनेन्द्रियद्रव्यस्य पृथिव्यग्निपक्वेन च घ्राणेन्द्रियद्रव्यस्य पोषणं भवति। पुनश्चाग्नेयाग्निपक्वेन पित्तप्रधानान्न-रसेन दर्शनेन्द्रियस्य पोषणं भवति। एतदर्थमेव धात्वग्न्यतिरिक्तानां भूताग्नीनां स्वीकारो दुर्निवारोऽभूत्।

क्षीरदधिन्यायस्तु नापि धातुपोषणे नवेन्द्रियद्रव्यपोषणे प्रयुज्येत। धातुपोषणे तु रसाद्रक्तं ततो मांसमित्यादिवचनस्य पूर्वपूर्वधातुपरिणामात् परपरधातूत्पादरूपार्थस्वीकारे कथञ्चिद् युज्यते। परन्तु न तथाविधोऽर्थ: समीचीन:, अन्नरसस्यैव सर्वधातुपोषकत्वसूचकस्पष्टवचनविरोधात्। पुनरपि रसपरिणामाद् रक्तोत्पत्तिस्वीकारे अनशनात् पञ्चदिवसात् परं शरीरे रस-धातो: सत्ता विनश्येत, एवं मासेन सर्वधातूनां परधातुपरिणतिवशात् शुक्र-मयमेव शरीरं स्यात् तच्च नोपपद्यत इति क्षीरदधिन्यायोऽग्राह्य एव॥

खलेकपोतिकान्यायोऽपि धातुपोषणे न संगच्छते। न खलु तत्रान्न-रसस्य पृथङ्मार्गा दृश्यन्ते। सर्वत्रैव स रक्तसाहचर्यात् शिराभिरेव याति। रक्तन्त्वन्नरसस्य वाहकमात्रम्। न खलु स्थूलशिरात: रक्तं प्रच्युतं भवितु-मर्हति। सुसूक्ष्मशिरायास्तु रक्तधराया: कलाया अतिपक्वत्वेन ततश्च्युत एवान्नरस: धातून् पोषयति। अत्र विशेषतो गतियुक्तत्वेन वातरक्तमेव वाहकं भवितुमर्हति। तेन च कर्मणा न्यूने वातभागे पुनरपि रक्तं वातमागा-हरणार्थं वातस्यामाशये फुफ्फुसे प्रत्यागच्छति। जीर्णेन च बाह्यवायुना पुष्टे रक्तगते वातभागे पुनररुणं भवदन्नरसं वाहयति शिराभिरिति विशेषो लक्ष-णीय:। अतो रसस्थानात् पृथङ् मार्गान्तराभावात् खलेकपोतिकान्यायो-ऽप्यत्र न संगच्छते॥ ७॥

उपसंहरति-ते सर्व इति। मलाख्या धातव: स्वेदमूत्रपुरीषादय:। प्रसादाख्याश्च रसरक्तादय: सततमपचिता इति शेष:। रसमलाभ्यां अन्नरस-किट्टाभ्यां पुष्यन्त: अपचयपूरणेनोपचिता: सन्त:। यथा वय:शरीरमिति वयोऽनुरूपं शरीरप्रमाणानुरूपञ्च स्वं मानं युक्तं प्रमाणम् अनुवर्तते सातत्येन तिष्ठन्ति इत्यर्थ: प्रकृताविति शेष:। अनेनैव क्रमेण प्रकृतौ धातुसाम्यं तिष्ठती-त्याह एवमिति। विकृतावपि आहारेणैव पुन: प्रकृतिमाप्तुं सर्वे शक्नु-

वन्तीत्याह निमित्तत इति। निमित्ततोऽसात्म्या लंघनबृंहणादिभिः। तस्मिन् साम्योत्पादने अन्नरसः अन्नकिट्टञ्च कारणे भवत इति तात्पर्यम्। मलवृद्धौ कारणान्तरं दर्शयति स्वमानेति। मलाः स्वमानातिरिक्ताः चेत् स्युस्तर्हि शीतोष्णपर्यायगुणैः विपरीतगुणैः शीतैरुष्णैश्च। शीतसमुत्थे मलसञ्चये उष्णैरुष्णसमुत्थे च शीतैरित्यर्थः। उपचर्यमाणाः चिकित्स्यमानाः ते उत्सर्गिणः शरीरान्निष्क्रमणशीलाः सन्तः शरीरधातूनामत्र मलधातूनामित्यर्थः। साम्यकरा भवन्तीति समुपलभ्यन्ते। मलस्यापि शरीरधारकत्वाद् धातुत्वं भवति। यदुक्तं सुश्रुते—"दोषधातुमलमूलं हि शरीरम्" इति। ननु कदाचिद् आहारान् मलप्रसादौ सञ्जातावपि न धातून् पूरयत इति दृश्यते इति। धातुपूरणे प्रयोजकान्तरं निवेदयति तेषामिति। तुः पक्षान्तरार्थः। अयनमुखानि गमनमार्गाः। तानि प्रकृतिस्थानीति शेषः। यथाविभागेन पृथग् विभागानुसारतः यथास्वं स्वेन स्वेनोपादानेन धातूनापूरयन्ति। तैश्च मार्गैर्गच्छद्भ्यां रसमलाभ्यामेव प्रसादमलौ पूर्तिमापद्येते इत्यर्थः। निगमयति। तत्र हिताहारोपयोगेन शरीरोपचयो भवति अहिताहारेण व्याधेरुत्पत्तिर्भवतीत्यर्थः। इति प्रकरणसमाप्तौ ॥ ८—१३ ॥

सिद्धान्तेऽस्मिन् शिष्यः शंकते एवंवादिनमिति। अत्र हिताहारिणोऽपि सगदाः अहिताशिनोऽप्यगदाः दृश्यन्ते अतः संशयः। अगदा व्याधिरहिताः। तमुत्तरयति तमुवाचेति। व्याधौ हिताहारो न कदाचित् कारणं भवति। अहिताहारादृतेऽपि बहूनि व्याधिकारणानि सन्ति इति हिताशिनां व्याध्युत्पत्तौ न काचिद् विप्रतिपत्तिर्भवतीत्याह न हिताहारेति। रोगप्रकृतयो रोगकारणानि। कास्ता इत्याह—कालेति। अत्र "शब्दस्पर्शरूपरसगन्धाश्चासात्म्याः" इत्यपपाठः। 'शब्दस्पर्शरूपगन्धाः' इति साधीयान्। हिताहारिणामसात्म्यरसाभ्यवहारासम्भवात्। इति सुधीभिर्विभाव्यम्। रसान् सम्यगुपयुञ्जानं हिताशिनमपीत्यर्थः। अहिताशिनां कथं व्याधिर्न भवतीत्याह-अहितेति। कारणतोऽन्येन केन कारणेन। अपचारः अहिताहारः किन्तत् कारणमित्याह न हीति। अपथ्यानि न सर्वत्र समानदोषकराणि भवन्ति। सर्वे दोषाः अपथ्योत्पन्ना इत्यर्थः। न सर्वत्र समानबला भवन्ति। शरीराण्यपि कानिचिद् व्याधिसहानि कानि वा व्याध्यसहानि सन्ति। एतैस्त्रिविधैः कारणैः अपथ्यानां मृदुत्वेन दोषाणामल्पबलत्वेन शरीरस्यापि व्याधिसहत्वेन कदाचिदपथ्यसेविनोऽपि व्याधिर्न लभन्त इति तात्पर्यम्। तानि कारणानि व्याचिख्यासुरपथ्यानां न्यूनाधिकबलत्वे हेतुं दर्शयति तदेवेति। तदेव उपसेव्यमानम्। देशातियोगाद् यथा—श्लेष्मकरं द्रव्यमानूपदेशे। कालातियोगस्तु तदेव शीते। संयोगातियोगाद् व्रीहिदध्यादियोगात्। वीर्यातियोगात् उष्णमम्लमुष्णवीर्ये मत्स्ये योगात्। प्रमाणातियोगान् मात्रातिक्रम्य भोजनात्। स्वल्पमप्यपथ्यं भूयस्तरं भवति। एतेन विरुद्धदेशादियोगाच्च तदेवाल्पं दोषं जनयतीत्युन्नेयम्। एवमपथ्यात् स्तोकमप्युत्पन्नो दोषः कारणैः

क्षिप्रकारितम: कष्टतमो वा भवति तद्विपर्ययो वेति प्रतिपादयति स एवेति। संसृष्टयोनि: यथा अम्लसेवया स्तोकमप्युत्पन्नं पित्तं शरत्कालयोगेन रक्तदूष्यत्वेन च संसृष्टयोनि भवत् कृच्छ्रतमं भवति। विरुद्धोपक्रम: तदेव स्वेदसाध्यं व्याधिमुत्पादयत् विरुद्धोपक्रमं स्यात्। पुनश्च गम्भीरानुगत: कोष्ठादिगत:। चिरस्थित: दीर्घरात्रानुबन्धी। प्राणायतनानि वक्ष्यमाणानि तद्गत:। मर्मोपघाति सप्तोत्तरे मर्मशते किमपि मर्माक्रम्य स्थित:। तद्विपर्यये बाह्यमार्गानुगता: चिरकारिणोऽमर्मगा: मृदवो दोषा भवन्तीत्युन्नेयम्। शरीरस्यापि व्याध्यसहसहत्वे कारणं दर्शयति शरीराणीति। अनिविष्टानि यथास्थानमसन्निविष्टानि शिथिलानीत्यर्थ: मांसादीनि यत्र तत्। असात्म्येन अहितेनाहारेणोपचितानि। तेन न तत्र सर्वधातुपोषणं भवतीति सूच्यते। अल्पसत्त्वानि दुर्बलचेतांसि। उपसंहरति एभ्य इति। अतोऽपथ्यसेविनामपि अपथ्यस्य देशादिविपर्ययेण दोषस्य चिरकारित्वेन शरीरस्य व्याधिसहत्वेन च न त्वरितं व्याध्युत्पत्तिर्भवति इत्याशय: १४-२०

ननु न केवलमाहारदोषशरीरेभ्यो व्याधीनां मृदुत्वादिवैशिष्ट्यं भवेत् परन्तु दोषादीनामवैशिष्ट्येऽपि दूष्यवैशेष्यादपि व्याधीनां वैशिष्ट्यं भवतीत्याह अत एवेति। अतोऽहिताहारादित: कारणात् स्थानविशेषे रसादिदूष्यविशेषाधिकरणे प्रकुपिता वातादयो व्याधिविशेषानभिनिर्वर्तयन्ति जनयन्ति। एवं दूष्यविशेषात् गम्भीरधात्वनुगतत्वेन त एव दोषा: दारुणान् व्याधीन् जनयन्ति, बाह्यधातुगतास्तु मृदून्, पुनश्च दूष्यासंसर्गेण व्याधीन् जनयितुं न समर्था भवन्ति इत्याशय:। इत एव दूष्यवैशेष्येण ये ये व्याधयो भवन्ति तान् पृथग् व्याचिख्यासुराह तत्रेति। स्थानेषु अधिकरणेषु अत्र स्थानप्राधान्यादश्रद्धादयो भवन्ति ॥ २१—२२ ॥

तत्र रसगतान् व्याधीन् विवृणोति अश्रद्धेति। सादोऽवसन्नता। अयथाकालं वार्धक्यात् प्रागेवेत्यर्थ:। यथाकालं बलिपलितादेरुत्पत्तिस्तु स्वाभाविको व्याधिर्न तु रसगत इत्यर्थ:। रक्तदोषजानाह कुष्ठेति। पिप्लव: क्षुद्ररोगविशेष: अजगल्लिकाकार:। मांसगतानाह अधिमांसेति। कीलं चर्मकीलम्। मेदोजानाह निन्दितानीति। निन्दितानि अष्ठौनिन्दितीयाध्यायोक्तानि। अस्थिसंश्रयानाह अध्यस्थीति। अध्यस्थि क्वचिद् अस्थ्नामभिवृद्धि:। अधिदन्तस्तु अधिकदन्तोद्गम:। दन्तास्थिभेद: भग्नदन्तवद् तत्र वेदना। दन्तास्थिशूलं च वेदनामात्रम्। विवर्णता दन्तानामेव ॥ मज्जगतानाह रुगिति। तमस: असत्तमसो दर्शनम्। अरुषां व्रणानाम्। शुक्रसंश्रयानाह—शुक्रस्येति। क्लैब्यं मैथुनाशक्ति:। अहर्षणं कामप्रवृत्तेरभाव:। शुक्रदोषाद् अपत्यं रोगिक्लीबादिकं भवति स्त्रियाश्च गर्भस्रावादिना बाधा जायते इत्याह शुक्रं हीति ॥ २३—३३ ॥

संप्रति वात्वाश्रयगतान् व्याधीन् निवेद्य शरीरावयवाश्रयान् व्याधीन् निवेदयति इन्द्रियाणीति। अत्रेन्द्रियाणीति इन्द्रियाणि इन्द्रियाधिष्ठानानि

चक्षुरादीनि ज्ञातव्यानि। नन्वतीन्द्रियाणामिन्द्रियाणाममूर्तत्वाद् दोषसंसर्गो न भवितुमर्हतीति चेदुच्यते। इन्द्रियाणामतीन्द्रियत्वेऽपि न तान्यमूर्तानि पाञ्चभौतिकत्वात्। सर्वाण्येव पाञ्चभौतिकानि मूर्तान्येव। सौक्ष्म्याच्चैषां प्रत्यक्षानुपलब्धिः। पुनश्चैतानि अन्नरसपोष्याणीति कृत्वा तत्संसर्गाद् दोषसंसर्गः सम्भवत्येव। अतोऽन्नरसे स्वल्पपित्तांशे तेन पोषणाच्चक्षुरिन्द्रियस्य विकृतिर्भवत्येव। पञ्चेन्द्रियज्ञानस्य विकृतिरिन्द्रियदोषादिन्द्रियाधिष्ठानदोषाच्च भवतीति ज्ञेयम्। तेनाविकृतेऽपि दर्शनेन्द्रियाधिष्ठाने लिंगनाशो भवत्येव। अत्र उपघातः साकल्येनेन्द्रियनाशः। उपतापस्तु तद्विकृतिमात्रम्। स्नाय्वाद्यवयवगतानाह स्नायुशब्देनैव कण्डराणां परिग्रहेऽपि तद्गतपंगुत्वादिपृथगव्याधिदर्शनात् तस्याः पृथगुल्लेखो न दोषावहः। शिराशब्देनात्र धमनीनामपि परिग्रहः कर्तव्यः। शिराकण्डराभ्य इत्याश्रित्येति ल्यब्लोपे पञ्चमी। अत्र स्तम्भः संकोचखल्लयः स्नायुकण्डराश्रिताः ग्रन्थिश्च स्फुरणञ्च शिरागते सुप्तिश्च धमनीगा इति ज्ञेयम्। खल्ली कराद्यवमोटनरूपो व्याधिः। स्फुरणं स्पन्दनम्। सुप्तिः स्पर्शज्ञानाभिज्ञता। मलान् स्वेदमूत्रपुरीषादीन् न खल्वन्नमले दोषाणामुपादानत्वेन दुष्टिः सम्भवतीति तेषां सञ्चालने उत्सर्गादौ च निमित्तकारणत्वेन दुष्टैर्दोषैः विकृतिः सम्भवत्येवेत्याह मलानाश्रित्येति। आश्रित्य आक्रम्येत्यर्थः। तत्र भेदः पुरीषस्य वातजन्यः। शोषोऽपि सर्वेषां तज्जन्य एव। प्रदूषणं वर्णादिविकृतिस्तु सर्वैरेव दोषैर्भवति। अतीव संगोत्सर्गौ च अपानवायुविकृत्या भवति। अतिसंगोऽप्रवृत्तिः अत्युत्सर्गश्चातिप्रवृत्तिः। न खलु मलजव्याधौ आहारः कारणं भवितुमर्हति तस्य च विकृतदोषजन्यत्वात् नेत्याह विविधेति। दोषदुष्टिरपि विविधाहारजन्या अतः प्रोक्ता व्याधयो दोषजा एवेति सर्वेषामाहारजन्यत्वनिगमनं नासमीचीनं भवतीत्यर्थः॥ ३४—३८॥

प्रसंगवशादत्रैव प्रोक्तानां व्याधीनां सामान्यतश्चिकित्साक्रममाह रसजानामिति। भिषग्जितमौषधम्। संशुद्धिर्वमनादिः। अस्थिगतव्याधौ पञ्चकर्माणीत्युक्त्वा पुनर्वस्तयः इति कथनं वस्तेर्विशेषेणोपयोगित्वमाख्यातुम्। वस्तिर्हि वातहराणां श्रेष्ठः अस्थनि च वातधातोराधिक्यं वर्तते। यदुक्तं वृद्धवाग्भटे—"तत्रास्थनि स्थितो वायुः असृक्स्वेदयोः पित्तम्, शेषेषु च श्लेष्मा" इति (सू० १६ अ०)। तिक्तकोपहितानि पटोलपत्रादिसिद्धानि क्षीराणि सर्पींषि च पानार्थं देयानीत्यर्थः। स्वादु तिक्तकं मधुरं तिक्तञ्चान्नम्। व्यवायस्तु शुक्राश्मर्यां नैष्ठिकब्रह्मचर्यजन्ये क्लैब्ये न त्वन्यत्र। काले शरदादिकाले शुद्धिर्विरेचनादिः। मात्रया युक्तमात्रया। क्वचित् क्वचिदित्यन्यत्रापि॥ ३६—४४॥

ननु दोषास्तु कोष्ठे सञ्चीयन्ते स्वस्थानं त्यक्त्वा कैर्निदानैः रसादीन् धातून् अन्यांश्चावयवान् गच्छन्तीत्याह व्यायामादिति। शाखाशब्देनात्र रसादयो धातवः शिरास्नाय्वादयश्चावयवाः ज्ञातव्याः। तत्र व्यायामात् धातुक्षये

तत्पूरणार्थमन्नरसगमनात् तस्य त्रिधातुमयत्वेन तत्र गमनं समीचीनं भवति नान्यथा। उष्मणस्तैक्ष्ण्यादिति। उष्मण: कायाग्नेस्तैक्ष्ण्यात् प्रसारितस्रोतस्त्वेन पोषणाय गमनं सुकरं करोतीत्यर्थ:। हितस्यानवचारणादिति अहितोपचारादतिमात्रवृद्धा: दोषा: जलस्रावनन्यायेन शाखासूत्क्रामन्ति। मारुतस्य द्रुतत्वात् गतिमत्त्वात्। कदाचित् स्वमानस्थिता अपि दोषा: प्रकुपितेन वायुनानीता: व्याधीन् जनयन्तीत्यर्थ:। यदुक्तं तन्त्रान्तरे—"पित्तं पंगु कफ: पंगु: पंगवो देहधातव:। वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत्॥" इति। एवं दोषे स्थानसंश्रितेऽपि कदाचिद् व्याध्युत्पत्तिर्न भवतीत्याह तत्रस्था इति। तत्रस्था: तद्गता अपि विलम्बन्ते व्याध्युत्पत्तौ विलम्बं कुर्वन्ति। कथमित्याह न समीरिता: सम्यग् ईरिता: प्रकुपिता: अल्पबलत्वेनेत्यर्थ:। कथं न ते कुप्यन्ति इत्याह नादेशेति। भूयो हेतुप्रतीक्षिण: अल्पबलत्वेन पुनर्बललाभाय हेत्वन्तरं प्रतीक्षमाणा: न अदेशे अननुगुणप्रदेशे न चाकाले अननुगुणे च काले ते कुप्यन्ति। अत एव अहितसेविनोऽपि न तदात्व एव व्याधिर्भवतीति निष्कर्ष:॥ ४५—४६॥

शाखां गता अपि दोषा व्याधेरनुत्पत्तावपि यावत् पुन: स्वस्थानं कोष्ठं नागच्छेयुस्तावद् व्याधिशंका वर्तत एव अतस्ते केनोपायेन पुन: कोष्ठे प्रत्यावर्तेरंस्तमाह वृद्ध्या इति। वृद्ध्या बृंहणेन वातशमकेन तेन वायो: प्रशमनात् पुनर्दोषा: कोष्ठमायान्ति। विष्यन्दनात् स्रोतोलिप्तेषु दोषेषु स्नेहस्वेदाभ्यां विलयनात्। स्रोतोवरोधजन्येषु शाखासम्बद्धेषु च दोषेषु स्रोतोमुखविशोधनात् स्रोतोऽवरोधापगमात्। वायोश्च निग्रहात् प्रसरणकर्तुर्वायो: प्रशमात् दोषा: पुन: स्वस्थानमायान्तीत्यर्थ:॥ ४७॥

आहारचतुष्कमुपसंजिहीर्षु: समासतो मिथ्याहारविहाराभ्यामेव सर्वव्याधिजननं तद्वर्जनं च सर्वव्याध्यनुत्पत्तौ कारणमिति प्रतिपादयति अजातानामिति। दृष्ट: पूर्वपूर्वाध्यायेषु सावधानेन विवेचित:। सुखार्थी आरोग्यकामी। नन्वेवं विधिनिषेधाधीनो मानव: कथं स्यादित्याह सुखेति। सुखलाभायैव मानवानां स्वाभाविकी प्रवृत्तिर्वर्तत इत्यर्थ:। ननु तर्हि कथं ते स्वप्रवृत्त्या रोगनिदानान्युपसेवन्ते इत्याह ज्ञानेति। ज्ञानात् मार्गे विधिविहितपथि प्रवृत्ति: अज्ञानात्त अमार्गे प्रवृत्ति: उच्छृंखलतेत्यर्थ: भवतीति शेष:। तमेवार्थं पुनर्विशिनष्टि हितमिति। परीक्षका: ज्ञानविज्ञानवन्त:। प्रपरीक्ष्य हिताहितं सम्यग् विचार्य्य। हितमिति तदात्वे दु:खदमपि उत्तरकाले हितमित्यर्थ:। लौकिका: रजोमोहावृतत्वादज्ञाना: प्रियं तदात्वप्रियमेव अशुभोदर्कमपीत्यर्थ:। अनुरुध्यन्त इति योजना। अतो लौकिकपरीक्षकयोर्गुणभेदान् दर्शयति श्रुतमिति। तन्मूला: रजस्तमोमूला:। अत एव अज्ञप्रवृत्तिप्रकारं प्रदर्शयति प्रज्ञेति। प्रज्ञापराध:—"धीधृतिस्मृतिविभ्रष्ट: कर्म यत् कुरुतेऽशुभम्। प्रज्ञापराधं तं विद्यात् सर्वदोषप्रकोपनम्।" इति वक्ष्यमाणलक्षण:॥ तदात्वसुखसंज्ञेषु तात्कालिकसुखप्रदेषु उत्तरकालन्तु तेषां

भावानां रोगजनकत्वादित्यर्थः। विज्ञाता तु न तेष्वहितेषु आपातरम्येषु रज्यते विज्ञाने बुद्धौ अमलीकृते रजस्तमोरहिते। अतः कर्तव्यमुपदिशति न रागादिति। रागशब्दोऽत्र लोभपरः। देहो ह्याहारसम्भव इति हिताहारादुपचयो भवति अहिताहाराच्च क्षयो भवतीत्यर्थः। आहारस्य परीक्षाविधिमुद्दिशति आहारस्येति। अष्टौ हेतुसंज्ञका विशेषाः प्रकृत्यादिभिः रसविमाने वक्ष्यमाणाः॥ हितसेवां स्तौति परिहार्य्येति। साधूनामृषीणां सम्बन्धे अनृणताप्राप्तः ऋणमुक्तो भवति। यदुक्तं विष्णुधर्मोत्तरे "देवानां च पितॄणां च ऋषीणां च तथा नरः। ऋणवान् जायते यस्मात् तस्मान् मोक्षे यतेत् सदा॥" इति तन्मुक्त्युपायश्च तत्रैव "ऋषीणां ब्रह्मचर्य्येण श्रुतेन तपसा तथा।" इति तानि च विना आरोग्यं न सम्भवतीति युक्तमुक्तं पथ्याशी साधूनामनृणतां प्राप्तो भवतीति। तथापि परिणामजानां व्याधीनां परिहारोऽसम्भाव्य एवेत्याह यस्त्विति। यत्त रोगसमुत्थानं निदानं परिहर्त्तुमशक्यं यथा जन्मान्तरीयं कर्म यश्च वा कालपरिणामः तत्तज्जन्यं व्याधिं कुष्ठादिकं जरादिकं वा प्राप्य न शोचितव्यम्। हिताहारिणामपि ते व्याधयो भवन्तीति हिताहितं न विचार्य्यमित्यनुशोचना न कर्तव्येत्यर्थः॥ ४८-५८॥

अध्यायार्थं निवेद्य तं समापयति तत्र श्लोका इति। निगदार्थमन्यत्॥ ५६-६२॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने विविधाशितपीतीयो नामाष्टात्रिंशोऽध्यायः॥२८॥

समाप्ता चेयमन्नपानचतुष्कटिप्पणी॥

ऊनत्रिंशोऽध्यायः।

पूर्वाध्याये दोषाणां कष्टतमत्वविमर्शे प्राणायतनसमुत्थो दोषः कष्टतमः इत्युक्तम्। ननु कानि तानि प्राणायतनानीत्यपेक्षायां दश प्राणायतनानि व्याचिख्यासुरध्यायान्तरमारभते अथात इत्यादिना। कथं तेषां प्राणायतनत्वमित्याह प्राणा येषु प्रतिष्ठिता इति। तेषामुपघाते प्राणानामुपघातात्तेषां प्राणायतनत्वमित्यर्थः। कानि तानीत्याह शंखाविति। शंखौ नाम भ्रुवोः पुच्छान्तयोरुपरि कर्णललाटयोर्मध्ये अस्थिमर्मविशेषौ। मर्मत्रयं शिरो हृदयं वस्तिश्च। तत्र शिरसि घ्राणश्रोत्राक्षिजिह्वासन्तर्पणीनां शिराणां मध्ये शृंगाटकानि नाम चत्वारि शिरामर्माणि तथा मस्तकाभ्यन्तरोपरिष्टात् अधिपतिर्नाम रोमावर्ताकारः शिरासन्धिमर्मविशेषो वर्तत इति सद्यःप्राणहराणां पञ्चानां मर्मणां सत्त्वात् शिरसः प्रधानमर्मत्वम्। हृदयन्तु उरसोऽभ्यन्तरे फुःफुसस्य मध्यान् मनाक् तिर्यगभावेन लम्बमानं अधोमुखपद्मकलिकारं यन्त्रम्। अस्य प्राधान्यं परस्मिन् अध्याये स्वयमेव विवरिष्यति। वस्तिश्च मूत्राशयः। यदुक्तं सुश्रुतेऽस्य स्थानम्-"नाभिपृष्ठकटीमुष्कगुदवंक्षणशेफसाम्।

एकद्वारस्तनुत्वक्को मध्ये वस्तिरधो मुख:॥"इति पृष्ठादारभ्य नाभ्यादीनां मध्येऽस्य स्थाननिर्देशात् सवस्तिशिर: समूत्रवह: मूत्राधारो लक्ष्यते। समग्रं मूत्राणां स्थानमेव मूत्राशयो वस्तिरिति कथ्यते तस्यैव मर्मत्वं न तु मूत्राधारमात्रस्य। अत्र कण्ठपदेन कण्ठस्था अष्टौ शिरामातृका: नीले मन्ये चेति मर्मस्थानान्यभिप्रेयन्ते। रक्तमिति जीवरक्तं सुश्रुते "रक्तं जीव इति स्थिति:" इति। शुक्रन्तु सर्वशरीरव्यापि सूक्ष्मशुक्रम् तस्यैव चरमधातुत्वेन प्राणायतनत्वं शोभते। ओजस्तु सर्वधातुसाररूपं रक्तवर्णमीषत्पीतानुविद्धं हृदि स्थितं परमोज:। वक्ष्यति च "तन्नाशान्ना विनश्यति" इति। गुदं नाम वातवर्चोनिरसनम्। तच्च गुदवलित्रयादूर्ध्वं वर्तते। तस्यैव गुदमर्मत्वं सौश्रुतीये नेत्रवस्तिव्यापच्चिकित्सिते त्र्यंगुलादूर्ध्वं प्रतिपादितम्। न खलु गुदवलित्रयस्य मर्मत्वं शोभते अर्शसि भगन्दरे च तत्र शस्त्रावचारणविधानात्। एषामुपघाते सद्य एव मरणं स्यादिति प्राणायतनत्वं युज्यते। आयुर्वेदविदा नूनमेतानि ज्ञातव्यानीति तज्ज्ञानं स्तौतितानीति। तानि प्राणायतनानि। विज्ञानं बुद्धिर्मनश्च। चेतनाहेतुमात्मानम्। आमयान् व्याधीन् सहेतुलिंगानिति शेष:। प्राणाभिसर इति तस्य अन्वर्था संज्ञा भवतीत्यर्थ:॥ १-४॥

प्राणाभिसरत्वप्रसंगेन वैद्यस्याप्राणाभिसरत्वं रोगाभिसरत्वमपि प्रतिपिपादयिषु: प्रकरणान्तरमारभते द्विविधास्त्विति। रोगाणामभिसरा: वर्धका:॥ अतस्तयोर्द्विविधवैद्ययो: विशेषज्ञानार्थं शिष्यप्रश्नमाह एवमिति॥ ५-६॥

तयोर्द्विविधयो: स्वरूपवर्णनमूलकमुत्तरमाह गुरु: य इमे इति। कुलीना: सत्कुलोत्पन्ना: पर्यवदातश्रुता: श्रुता वायुर्वेदे निष्णाता:। परिदृष्टकर्माण: कृतयोग्या: उभयज्ञो हि वैद्य: कर्मसम्पादयितुमलं भवति-यदुक्तं सुश्रुते—

"यस्तु केवलशास्त्रज्ञ: कर्मस्वपरिनिष्ठित:।
समुह्यत्यातुरं प्राप्य प्राप्य भीरुरिवाहवम्॥
यस्तु कर्मसु निष्णातो धाष्ट्र्यात् शास्त्रबहिष्कृत:।
स सत्सु पूजां नाप्नोति वधं चार्हति राजत:॥
उभावेतावनिपुणावसमर्थौ स्वकर्मणि।
अर्धवैद्यधरावेतावेकपक्षाविव द्विजौ॥" इति (सू० ३ अ०)।

दक्षा: कर्मकुशला:। जितहस्ता: लघुहस्ता: शस्त्राद्यवचारणे येषां हस्तौ लघुतया न वेपथुमन्तौ भवतस्ते। प्रकृतिज्ञा: रोगाणां कारणज्ञा: आतुराणाञ्च स्वभावज्ञा:। प्रतिपत्तिज्ञा: तत्क्षणकर्तव्ये विषये ज्ञानवन्त:। एवं समासतो वैद्यगुणानुक्त्वा वैद्यकतन्त्रेऽपि तेषां पारदर्शित्वमाह तथाविधा इत्यारभ्य कर्तृकरणकुशला इत्यन्तेन। शरीरज्ञाने शरीरावयवानामाकृतिज्ञाने। शरीराभिनिर्वृत्तिज्ञाने शरीरधातूनामुत्पत्तिज्ञाने। प्रकृतिविकारज्ञाने तेषामेव देहधातूनां प्रकृतिज्ञाने विकृतिज्ञाने च प्रकृत्यवस्थायां विकृत्य-

वस्थायां वा किम्भूतास्ते भवेयुरित्यत्र निःसंशयाः संशयरहिताः। सुखेति चतुर्विधस्य रोगस्य समुत्थानादिज्ञाने व्यपगतसन्देहाः सन्देहरहिताः। अत्र समुत्थानं निदानं मिथ्याहारविहारादिकम्। लिंगवेदनयोरभेदेऽपि रूपोपसर्गभेदाद् द्वैविध्यं ज्ञेयम्। विशेषविज्ञानं तु संप्राप्तिः संप्राप्तिवैशेष्यादेव व्याधिवैशेष्यं भवति। एवं पञ्चस्वेव निदानेषु निःसंशयं ज्ञानं येषामस्ति ते इति भावः। त्रिविधस्येत्यारभ्य त्रिंशत्तममध्यायमित्यन्तं विषयजातं तन्त्रस्यास्य सूत्रस्थानस्यैव समासः। त्रिविधान्यायुर्वेदसूत्राणि यथा हेतुसूत्रं लिंगसूत्रमौषधसूत्रञ्चेति। ससंग्रहव्याकरणस्य समासव्यासविवृत्या सहेत्यर्थः। त्रिविधान्यौषधानि दैवव्यपाश्रयं युक्तिव्यपाश्रयं सत्त्वावजयश्चेति। तेषां समूहस्येत्यर्थः। चतुर्विंशत्युपनयस्य चतुर्विंशतिप्रकारायाः स्नेहविचारणायाः। चतुःषष्टिपर्यन्तस्य तत्संख्यकस्योपकल्पनीयस्येति योजना। व्यवस्थापयितारः व्यवस्थां कर्तुं समर्थाः। आहारगतिः आहारपरिणामात् यद् यद् भवति सा परिपाकपरिपाटीत्यर्थः। तन्त्रोद्देशलक्षणस्य तन्त्रोद्देशस्य तन्त्रलक्षणस्य च। तन्त्रस्य समग्रतन्त्रस्य ग्रहणादिषु च कुशलाः। ग्रहणमध्ययनं, धारणं प्रभाषणं, विज्ञानमर्थतत्त्वज्ञानं, प्रयोगः तदनुसृत्य प्रत्यातुरं प्रयोजनं, कर्म चिकित्सा, कार्यं धातुसाम्यं, कालः क्रियाकालः, कर्ता भिषक्, करणञ्च भेषजम्। तेषु तेषां गुणग्रामादिज्ञानेषु कुशलाः। शास्त्रयुक्तिः तन्त्रयुक्तिः यामनुसृत्य शास्त्रार्थं योजयति। अविसंवादनेन अविप्रलम्भेन। सर्वप्राणिषु मातृपित्रादिवत् चेतसो मैत्रस्य मित्रतायाः संपादनेन युक्ताः इत्यन्वयः॥ ७॥

रोगाभिसरान् व्याचष्टे अत इति। भिषक्छद्मप्रतिच्छन्ना इति भिषक् छद्मना चिकित्सक इति व्याजेन आवृतात्मस्वरूपा इत्यर्थः। तिरूपकसधर्माणः छद्मचरधर्मिणः। यदुक्तं भिषक्छद्मचरलक्षणे—"वैद्यभाण्डौषधैः पुस्तैः पल्लवैरवलोकनैः। लभन्ते ये भिषक्शब्दं अज्ञास्ते प्रतिरूपकाः" इत्यत्र छद्मचरभिषजि एव प्रतिरूपकसंज्ञा दृश्यते। अतस्तल्लक्षणाक्रान्ता इत्यर्थः। प्रमादाद् अनवधानवशात् राष्ट्राणि स्वाधिकृतप्रदेशान् चरन्ति। तेषामुक्तलक्षणानामपि विशेषलक्षणान्याह तेषामिदमिति। कर्मलोभाद् आतुरलाभलोभात्। विशिखान्तरं मार्गान्मार्गान्तरमनुचरन्ति अटाट्यन्ते। अभितः समन्ततः परिपतन्ति अनाहुता अप्यागच्छन्ति। अत्र परिपतन्ति इति क्रियाप्रयोगात् यथा हि नभोमार्गान् मृतपशुदर्शनेन गृध्राः समन्तात् परिपतन्ति तद्वदिति व्यज्यते। संश्रवणे श्रवणे विषये अस्यातुरस्य। यश्च प्रतिकर्म करोति येनायं चिकित्सितो भवति। आतुरमित्राणि आतुरस्यात्मीयान् पित्रादीन्। प्रहर्षणादिभिरात्मोकर्तुमिच्छन्ति। प्रहर्षणं द्वित्रेणाह्ना आरोग्यं विधास्यामीति हर्षोत्पादकवाक्यकथनम्। उपजापः स्वपक्षमानेतुं नानाविधं कर्णे जपनम्। कर्म चासाद्य आतुरं केनापि प्रकारेण स्वचिकित्साधीनं कृत्वा दाक्ष्येणात्मनोऽज्ञानं प्रच्छादयितुकामा मुहुर्मुहुरवलोकयन्ति योग्यचिकित्सितं कर्तुमसमर्थाः यथा स्वीयमज्ञानं न प्रकाशितं भवेत् तथा विचारयन्ति। अपावर्तयितुं

शमयितुम्। अनुपकरणमिति चिकित्साफलाभावे द्रव्यपरिचारकरोगिणां पादत्रयाणामेव त्रुटिं ख्यापयन्तीत्यर्थ:। अन्तं गतं मृतमित्यर्थ:। अपदेशं कृत्वा आत्मन: स्वरूपमाच्छाद्य अन्यं देशमातुरमित्यर्थ:। प्राकृतजनसन्निपाते अविद्वत्परिषदि। अध्वगा: पथिका:। प्रतिभयं भयंकरम्। कान्तारं महावनमिव। एषां छद्मचराणां क्षुद्रावयवे स्वल्पे व्याधौ य: कश्चिद् उपयुक्तो निरामयो भवति तं निरामयम्। अप्रकृते अप्रसंगादपि प्रकृतान्तरे प्रसंगान्तरे वा सततमुदाहरति प्रख्यापयति। अनुयोगं तद्विद्यसम्भाषाम्-यद् वदयति—"अनुयोगो नाम स यस्तद्विद्यानां तद्विद्यैरेव सार्धं तन्त्रे तन्त्रैकदेशे वा प्रश्न: प्रश्नैकदेशो वा ज्ञानविज्ञानवचनप्रतिवचनपरीक्षार्थमादिश्यते" इति (वि० ८ अ०)। अनुयोगात् तादृशशास्त्रविषयकप्रश्नात्। सब्रह्मचारी सतीर्थ:। वैवादिक: तद्विद्यसम्भाषायां प्रतिपक्ष:। वैदिक इति पाठे तु आयुर्वेदज्ञ: आचार्य: उपनयनकर्ता ॥ ८-९ ॥

अर्थमिमं पुन: पद्येनाह भवन्ति चात्रेति। भिषक्छद्म प्रविश्य भिषग्व्याजेन आत्मानं पुरस्कृत्य। तर्कयन्ति तत इतोऽनुसन्धत्ते। वितंसं पक्षिबन्धनयन्त्रं जालपाशादिकम्। शाकुनिका व्याधा:। द्विजान् पक्षिण:। तेषां हेतुगर्भं विशेषणमाह श्रुतेति। श्रुतात् शास्त्रज्ञानात् दृष्टात् कर्मदर्शनात् क्रियायाश्चिकित्सितात् कालमात्रास्थानज्ञानाच्च बहिष्कृता श्रुतादिज्ञानविहीना इत्यर्थ:। मृत्योरनुचरा: यमदूता इवेत्यर्थ:। पीतमारुता इति विशेषणात् मूर्खवैद्यानां शून्योदरत्वेन अत्यर्थलोभादातुराणां शुभाशुभदर्शनेऽनीशत्वं सूच्यते। प्रक्लृप्तमेऽपि काले आचार्यमाठरेण सांख्यकारिकावृत्तौ एवं भिषक्छद्मचरो वर्णित: तद्यथा—"किञ्च नास्ति सम्यग्धातुपरिज्ञाननिमित्ततया भैषज्यम्। तथा हि-यानि कानि च मूलानि येन केन च पेषयेत्। यस्मै कस्मै च दातव्यं यद्वा तद्वा भविष्यति ॥" अन्यच्च कार्यार्थिजनद्रव्यभक्षणाय स्वशक्तिख्यापनाय च स्वल्पमपि रोगं पुरस्ताद् वर्धयति भिषज:। ततश्च कदाचिदसौ तेषामेवासाध्यतामायाति। तथा च "वैद्यवैद्य नमस्तुभ्यं क्षपिताशेषमानव। त्वयि विन्यस्तभारोऽयं कृतान्त: सुखमेधते ॥" इति ॥ १०-१२ ॥

शास्त्रविदं भिषजं स्तौति ये त्विति। कर्मकोविदा: कर्मसु चिकित्सासु पण्डिता:। जितात्मान: अलोभपरवशा:। निगदव्याख्यातमन्यत् ॥ १३ ॥

अध्यायार्थं निवेदयति तत्र श्लोक इति ॥ १४ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने दशप्राणायतनीयो नाम एकोनत्रिंशोऽध्याय: ॥ २९ ॥

त्रिंशोऽध्यायः ।

पूर्वाध्याये दशप्राणायतनानि व्याख्यातानि तेषु हृदयस्य श्रेष्ठत्वं प्रतिपिपादयिषुरध्यायान्तरमारभते भगवान् अथात इत्यादिना । तत्र श्रेष्ठत्वे हेतुमाह अर्थे इति । अर्थेऽत्र हृदये । महामूलाः महद्हृदयं मूलं यासां ताः । महाफलाः महद् ओजोरूपं फलं यासां ताः । शिराः* रक्तवहाः प्रणाल्यः सक्ताः सम्बद्धाः । एताः खलु हृदयात् सर्वशरीरे विसृप्ता भदन्तीति मूलमासां दशानां हृदयं भवति । वृद्धजीवकीयेऽप्युक्तम्—"हृदयात् संप्रतायन्ते शिराणां दश मातरः । ऊर्ध्वं चतस्रो द्वे तिर्यक् चतस्रोऽधोवहाः शिराः ॥" इति । ननु मृतकखण्डनाद् द्वे एव शिरे हृदयसम्बद्धे दृश्येते अतः प्रत्यक्षविरोधादग्राह्यमेतद्वचः इति चेन्न । द्वयोरेव तयोर्हृदयान्निर्गतयोश्चतुरंगुलाभ्यन्तर एव एकैकस्याः स्थूलाः पञ्च प्रताना: सन्तीति कृत्वा ता दश एव मूलशिरात्वेन शिरामातृका इत्याख्यायन्ते । प्रधानशिरात्वेनासां मातृका संज्ञा भवति । हृदयाद् बहिरेवैताः दशभिः प्रतानैरूर्ध्वाधस्तिर्यग् गच्छन्तीत्यर्थो नेयः । एवमेव महाभारतेऽप्युक्तम्—"प्रवृत्ता हृदयात् सर्वास्तिर्यगूर्ध्वमधस्तथा । वहन्त्यन्नरसान् नाड्यो दश प्राणप्रचोदिताः ॥ इति (३।२१३।१६) । ननु सुश्रुते शिराणां नाभिमूलत्वमुक्तम् अत्र महामूला इति कथनेन हृदयमेव मूलमित्युपलभ्यते इति विरोधः । यदुक्तं सुश्रुते—"तासां (शिराणां) नाभिर्मूलं ततश्च प्रसरन्ति ऊर्ध्वमधस्तिर्यक् च" इति (शा० ७ अ०) । इति चेत् कथ्यते । अत्र महामूला इति शिराणां दशप्रतानानां हृदयसम्बद्धत्वेन मूलत्वं न तु मूलमिव मूलमिति सर्वशिराणां नाभिमूलत्वं नानेन व्याहन्येत । यथा वृक्षकाण्डादेव शाखाविस्तारो भवत्यतः शाखानां मूलं काण्ड एव भवति तथैव हृदयनिसृतानां शिराप्रतानानां मूलं हृदयं भवति । यथा वृक्षस्य मूलानि नानाप्रतानैः भूमेरभ्यन्तरं गत्वा रसानाकर्षन्ति सर्वावयवान् पोषयितुं, तथैव शिरामूलानि नानाप्रतानैरन्तर्नाभिनिबद्धानि परिपक्वाहारादरसानाकृष्य स्कन्धद्वारेण सर्वावयवान् पोषयन्ति इति न विरोधः ॥ हृदयस्य पर्यायानाह महदिति ॥ १-३ ॥

तस्य महत्पदवाचकत्वे हेतुमाह षडंगमिति । षडंगमंगमिति लिंगशरीरमित्यर्थः । तस्यैव विवरणं विज्ञानमित्यादि । विज्ञानपदेन विज्ञायतेऽनेनेति व्युत्पत्त्या अन्तःकरणाख्यौ बुद्ध्यहंकारौ गृह्येते । इन्द्रियाणि दशेन्द्रियाणि । चेतो मनः । अर्थपञ्चकमिति गुणग्रहणेन गुणिनां पञ्चभूतानां परिग्रहः । एतेनाष्टादशकमेतल्लिंगशरीरमात्मना सदैव हृदये तिष्ठति । यदुच्यति—"अतीन्द्रियैस्तैरतिसूक्ष्मरूपैरात्मा कदाचिन्न वियुक्तरूपः । न कर्मणा नैव मनोमतिभ्यां न चाप्यहंकारविकारदोषैः ॥" इति (शां० २ अ०) । ननु निर्गुण आत्मा न लिंगशरीरभाग् भवतीत्याह सगुण इति ।

* 'शिराः सक्ता महाफलाः' इति पाठोऽत्राहृतः ॥

सगुण: सत्त्वरजस्तमोगुणसहित: । तेनात्र संसार्येवात्मा परिगृह्यते । आयुर्वेदे तु निर्गुणस्यात्मनोऽनौपयौगिकत्वात् । ननु मनस्तु सर्वशरीरव्यापि पादांगुल्याग्रेऽपि वेदनानुभूतेरिति तस्य विज्ञानपदेन परिगृहीतेऽपि पुनरुच्यते चेत इति । हृदयप्रदेश एव सुखदु:खानुभवात् सर्वशरीरगमपि मनो हृदि तिष्ठतीति सिध्यति । पुनश्च निवृत्तायां वेदनायामुपरतक्रियस्य तस्यात्मस्थत्वं स्पष्टतोऽत्र वक्ष्यति यथा—"आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात् प्रवर्तते । सुखदु:खमनारम्भाद् आत्मस्थे मनसि स्थिरे ॥" इति, अत्र अनारम्भादिति विशेषणेन चरमसन्न्यासात् प्रागपि सुषुप्त्यादौ मनसोऽक्रियत्वाद् आत्मस्थत्वं सिध्यतीति तस्य स्थानं हृदयं भवितुमर्हति । चिन्त्यमिति मनोऽर्थ: । हृदि संस्थितमिति हृदयमेषां भावानां स्थानमित्यर्थ: । ननु भेलसंहितायां मनस: स्थानं मस्तुलुंगमेवाह यथा—"शिरस्तालवन्तरगतं सर्वेन्द्रियपरं मन: । तत्रस्थं तत्र विषयान् इन्द्रियाणां रसादिकान् ॥ समीपस्थान् विजानाति" इति । अतोऽत्र हृदयपदेन तदेकवाक्यतारक्षणाय मस्तुलांगार्थो नेय: स्यादिति चेत् कथ्यते । चतुर्णामिन्द्रियाधिष्ठानानां शिरसि वर्तमानत्वात् प्रधानत: इन्द्रियाणां कर्मस्थानं शिरो भवति अतस्तत्परिचालकस्य मनसोऽपि कर्मस्थानं तत्रैव भवितुमर्हति । पुनश्च वेदान्तिनो हि मनो द्विभेदं कल्पयामासु: । तत्र तन्मतमेवावलम्ब्य भेलसंहिताकारोऽपि हृत्स्थस्य मनस: चित्तसंज्ञां प्रादात् । यदुक्तं वेदान्तशास्त्रे "मनोबुद्धिरहंकारश्चित्तं करणमान्तरम् । संशयो निश्चयो गर्व: स्मरणं विषया अमी ॥" इति । भेलोऽपि चित्तस्य स्थानं हृदयमेवाह यदुक्तं तत्र—"कारणं सर्वबुद्धीनां चित्तं हृदयसंस्थितम् ।" इति पुनरपि "हृदि संतिष्ठते चित्तं बुद्धि: सर्वेन्द्रिय(णि च) इति (१०४ पृ०) । अत्रापि यत्र हृदये दश मूलशिरा: सक्ता: याभि: शरीरे रसरूपमोजो विधम्यते तदेव हृदयम् आत्मनो लिंगदेहस्य च स्थानमुक्तमिति हृदयपदेनात्र ब्रह्महृदयाख्यमस्तिष्ककल्पना नायुर्वेदसम्मता कथञ्चिदपि भवितुमर्हतीति सर्वमवदातम ॥ ४ ॥

पुनरेव अर्थमेनं दृष्टान्तेन परिष्करोति प्रतिष्ठार्थमिति । प्रतिष्ठार्थमवस्थानार्थम् । एषामंगादीनां भावानामिष्यते अर्थचिन्तकै: हृदयज्ञै: शरीरतन्त्रज्ञैरित्यर्थ: । गोपानसीनां गृहाच्छादनाधारकाष्ठानां 'रुआ' इति वंगे ख्यातानाम् । आगारकर्णिका कुटीरपटलयोरूर्ध्वसंयोगस्थले तिर्यक्संसक्तं काष्ठखण्डम् 'मटकारआडा' इति वंगीया: ॥ तस्य महदर्थसंज्ञयोरन्वर्थतां दर्शयति तस्येति । उपघातात् स्वल्पाघातात् । भेदादिति विपुलाघातात् । कथं मरणं भवतीत्याह यद्धीति । हि यत: यत् स्पर्शविज्ञानं स्पर्श एव विज्ञानं ज्ञानहेतु: ऐन्द्रियक: स्पर्शो मानसस्पर्शश्च । यद् वक्ष्यति—"यश्चैवैन्द्रियक: स्पर्श: स्पर्शो मानस एव च । द्विविध: सुखदु:खानां वेदनानां प्रवर्तक: ॥" इति (शा० १ अ०) । पुनर्यच्च धारि शरीरेन्द्रियसत्त्वात्मसंयोगरूपम् । तत् तत्र हृदये संस्थितम् । अत: उपघाते स्पर्शविज्ञानोपघातात् मूर्छायं भवति

धारिभेदाच्च मरणं स्यात्॥ तदेव परस्य अष्टविन्द्वात्मकस्य श्रेष्ठस्य ओजसः। यच्चोक्तं "हृदि तिष्ठति यच्छुभ्रं रक्तमीषत् सपीतकम्। ओजः शरीरे संख्यातं तन्नाशान्ना विनश्यति॥" इति तन्त्रान्तरेऽप्युक्तम्—"प्राणाश्रयस्यौजसोऽष्टौ विन्दवो हृदयाश्रिताः" इति। परस्येति विशेषणाद् अपरमप्योजो वर्तते यच्च सर्वशरीरव्यापि अर्धाञ्जलिप्रमाणमिति ज्ञेयम्। यदुक्तं सुश्रुते—"ओजः सोमात्मकं स्निग्धं शुक्लं शीतं स्थिरं सरम्। विविक्तं मृदु मृत्स्नञ्च प्राणायतनमुत्तमम्। देहस्यावयवस्तेन व्याप्तो भवति देहिनाम्।" इति (सू० १५ अ०)। पुनश्च वक्ष्यतेऽत्र "मस्तिष्कस्यार्धाञ्जलिः.....तावदेव श्लेष्मलस्यौजसः।" इति (शा० ७ अ०)। अत्र श्लेष्मलस्येति विशेषणात् परिमाणाधिक्याच्च सर्वशरीरव्यापि श्लेष्मप्रधानस्य अपरस्यौजसः विवृतिरियं नात्र संशयावकाशः। तस्याष्टविन्द्वात्मकस्य परस्यौजसः स्थानमेव हृदयं भवति। तत्र चैतन्यसंग्रह इति तत्रैव नानेन्द्रियाधिष्ठानेषु परिगृहीतानां विषयाणां ज्ञानं भवति बुद्ध्यात्मनोः स्थानत्वादित्यर्थः। निगमयति हृदयमिति॥ ५—७॥

दशशिराणां महामूलत्वं प्रतिपादयति तेनेति। तेन पूर्वोक्तेन महता हृदयेन मूलेन मूलस्वरूपेण कर्त्रा दशशिरा इति शेषः। अस्मिन् शरीरे समन्ततः सर्वतः विधम्यन्ते अन्नरसेन पूर्यन्ते। अतएव एताः शिराः महामूला ओजोवहाश्च रसवहाश्च मताः। ओजःशब्दोऽत्र रसार्थे प्रयुक्तः। यदुक्तं—"धातूनां तेजसि रसे तथा जीवितशोणिते। श्लेष्मणि प्राकृते वैद्यैरोजःशब्दः प्रकीर्तितः॥" इति। हृदयक्रियावशादेव शिरास्वन्नरसः सञ्चरति अत एव तासां मूलं हृदयं भवतीत्यासां महामूला इति संज्ञा॥ ८॥

तासां महाफलसंज्ञाहेतुं विवृण्वन् द्विविधस्यौजसो महत्त्वं प्रतिपिपादयिषुरादौ रससाररूपस्य श्लेष्मलस्यौजसो व्याख्यानमाह येनौजसेति। येन श्लेष्मलेनार्धाञ्जलिमितेन ओजसा प्रीणिताः पोषिता सर्वजन्तवो वर्तयन्ति। प्राणिजीवनान्वयित्वं प्रदर्श्य व्यतिरेकेण फलमाह यद्गते इति। पुनर्योजः गर्भस्य आदौ कललावस्थायां सारं सारवस्तु भवति। तेनैव मातृहृदयागतेन कललं पुष्टं भवतीत्यर्थः। यच्च गर्भरसात् गर्भं रसयत्युपस्निह्यते इति तदोजः रसः इति कथ्यत इति शेषः। यदुक्तं "सदैव सकलं देहं रसतीति रसः स्मृतः" इति। स्वरणादवचनं चात्र यथा—"रसधातोः परं धाम पच्यमानात् प्रसीदति। सौम्यस्वभावं रक्ताग्रे यत्तदोजः प्रकीर्तितम्।" इति॥ पुनश्च परस्यौजसो विवृतिमाह संवर्तमानमिति। पुरा गर्भावस्थायां संवर्तमानं निष्पद्यमानं हृदयं यद् अष्टविन्द्वात्मकमोजः समाविशति अधितिष्ठति। अत्र केचिदायुर्वेदनिष्णाताः महामहोपाध्यायाः "समाविशति यत् पुनः" इति पाठः साधीयान् इति प्रतिपिपादयिषन्ति इति तच्चिन्त्यम्। सहस्रवर्षप्राचीनोऽपि चक्रपाणिः "समाविशति यत् पुरा" इत्येवं पाठं ददर्श व्याचख्यौ च। सत्येवं नवीनपाठे संवर्तमानमिति पदस्य कोऽर्थो भवेत्

इत्यपि जिज्ञासा जायते। पुनश्चात्र हृदयाद् ओजोरूपस्य रसस्य(?)निर्गमनं नोपलभ्यते अत: पुन:शब्दस्य वैयर्थ्यं स्यात्। बङ्गशुद्धिकलंकिते मुद्रिते भेले य एवं पाठो दृश्यते यथा—"हृदोरसो निस्वरति तस्मादेवं च सर्वश:। शिरोभि: हृदयं वेत्ति तस्मात् तत्प्रभवा: शिरा: ॥" इति तस्य समार्थक-कल्पनया चरकपाठकल्पनं युक्तं भवति न वेति विचार्यमासीत्। "शिराभि: हृदयं चैति" इति स्वेच्छया संशोधनमपि युक्तं नवेति चिन्त्यमासीत्। न खल्वन्नरस: शिराभि: पुनर्हृदये प्रत्यागच्छति॥ परस्यौजसो नाशात् प्राणिनां नाशो भवति यदुक्तं (सू० १७ अ०) "तन्नाशान्ना विनश्यति" इति अत-एवास्य धारिसंज्ञा। हृदयाश्रितं हृदये स्थितम्। यत् शरीररसस्नेह: शरीर-पोषकधातुसार इत्यर्थ:। अतएव यत्र ओजसि प्राणा: प्रतिष्ठिता: तदन्वय-व्यतिरेकानुविधायित्वात् प्राणानामित्यर्थ:। एवमस्य महत्त्वं प्रदर्शितम्। तत्फला तस्य ओजस: फलं निष्पत्तिर्याभ्यस्ता:। अत्र फलनिष्पत्तौ धातु: शिराद्वारेणैव सर्वधातुभ्य आकृष्टमोजो हृदि गन्तुं प्रभवतीति शिराणां तत्-फलत्वं सिध्यति। पुनरोजसो महत्त्वेन शिराणां महाफला इति विशेषण-मन्वर्थं भवति। महाफला इत्यस्य द्वितीयां निरुक्तिमाह बहुधा वेति। ता: शिरा: महतो हृदयाद् बहुधा फलन्ति गच्छन्ति इति महाफला:। हृदये दशसंख्यया संश्रिता अपि तानप्रतानैर्भिद्यमाना: सर्वस्मिन्नेव काये विसर्पन्ती-त्यर्थ:। यदुक्तं वृद्धवाग्भटे—"दशमूलशिरा हृदयप्रतिबद्धा सर्वांगप्रत्यंगेषु ओजो नयन्ति तास्तु द्व्यंगुलमंगुलमर्धांगुलं यवं यवार्धं च गत्वा द्रुमपत्र-सेवनीप्रतानवद् भिद्यमाना: सप्तशतानि भवन्ति" इति (शा० ६ अ०)। निरुक्त्या अवयवस्यास्य शिराधमनीस्रोत: संज्ञा: अविरुद्धा भवन्तीति प्रतिपाद-यति ध्मानादिति। ध्मानाद् वायुना रसेन वा पूरणात् स्रवणात् सर्वधातूनां पोष्यपोषकमलानां मन्दं मन्दं गमनात्। सरणाद् गमनाद्। एताभिर्दशसि-राभि: व्यानप्रवोदितोऽन्नरस: याति तेन पोषकरसेन पूर्णा भवन्तीति तासां धमनीसंज्ञा अविरुद्धा। यदुक्तं तन्त्रान्तरे—"धमन्यो रसवाहिन्यो धमन्ति पवनं तनौ" इति। पुनश्चैताभिरन्नरससहितं रक्तमपि मन्दं मन्दं यातीति आसां स्रोत:संज्ञाऽप्युपपन्ना भवति। एवं सर्वशरीरविसर्पणादासां सिरासंज्ञा भवितु-मर्हति। वस्तुतस्तु आयुर्वेदे धमनीसिरास्रोत:शब्दानां नाडीरूपस्यैकार्थस्य बोधकत्वेऽपि ते च शब्दा: योगरूढ्या पृथक्पदार्थेषु शक्तिग्रहं कुर्वन्तीति विज्ञेयम्। तत्र वातमात्रवहा रसमात्रवहाश्च द्विविधा: नाड्यो धमनीशब्द-वाच्या:, चतुर्विधरक्तवहाश्च शिराशब्दवाच्या:, आहारधातुमलादिवाहिन्यश्च स्रोत:शब्दवाच्या भवन्ति। तेषां व्यासतो विवरणं भदीये "शरीरविनिश्चये" द्रष्टव्यम्॥ ९—११॥

तेषामपि प्राणायतनत्वात् तेषां रक्षाविधिमाह तन्महदिति। तत्पूर्वोक्त-मात्मादीनां स्थानम्। ता: पूर्वोक्ता महामूला हृदयनिबद्धा दश मूलशिरा:। तत्पूर्वोक्तमोज: रसात्मकमोज अष्टविन्दुमितं परमोजश्च। मनसो दु:खहेतूनां

परिहारे उपायमाह हृद्यमिति । हृद्यं मनोरमम् । औजस्यं द्विविधस्यौजसो हितम् । स्रोतसामिह दशानां मूलशिराणाम् । प्रशमः शान्तिप्रदः । ज्ञानं तत्त्वज्ञानम् ॥ १३—१४ ॥

अथ हृद्यादिविषयानुद्दिशति अथ खल्विति । अत्रैकमिति प्राणादिवर्धनानामुत्कृष्टेषु सत्स्वपि बहुषु उत्कृष्टतमत्वेन एकमेवास्तीति सूच्यते । प्राणवर्धनमायुर्वर्धकम् । बृंहणं तेजोवर्धकम् । नन्दनं सुखकारकम् । हर्षणं चित्तोत्साहवर्धकम् । अयनं दिव्यलोकावाप्तिः । अहिंसा जीववधादुपरतिः । वीर्यं शुक्ररक्षा । इन्द्रियजयः क्षणिकसुखसाधनाद् विषयादिन्द्रियोपरतिः । तत्त्वावबोधस्तत्त्वस्मृतिः । ब्रह्मचर्यमष्टविधमैथुनवर्जनम् ॥ १५ ॥

ननु के नामायुर्वेदविदः इत्याह तत्रेति । "नापृष्टः कस्यचिद् ब्रूयात्" इति न्यायात्प्रकरणारम्भः शिष्यप्रश्नानन्तरमेव भवितुं युज्यते इत्याचार्यः तत्राहेति शिष्यप्रश्नं सूचयति । तत्र विजिज्ञासितव्ये विषये इत्यर्थः । पुनः शंकत तत्राहेति । तत्र उत्तरे । यथाम्नायं शास्त्रमनुसृत्य । अनुप्रविश्य अर्थतत्त्वमिति अर्थतो ज्ञात्वा इत्यर्थः । प्रतिज्ञादिकं स्वयमेव विमानस्थाने व्याख्यास्यत्याचार्यः । त्रिविधशिष्याणामुत्तममध्यमाधमबुद्धीनाम् । अर्थदुर्गाणां दुरूहार्थानाम् । तन्त्रनियतानां शास्त्रोक्तानां विषयाणामिति शेषः । विभावनैः व्याख्यानैः ॥ १६—१९ ॥

समासतः उद्दिष्टेऽस्मिन् विषये पुनः प्रश्नावतारयति तत्र चेदिति । किमायुः किंलक्षणकमायुरिति निष्कर्षः । कस्मादायुर्वेद इति का नामास्य निरुक्तिरित्यर्थः । किमर्थमायुर्वेदः तस्य किन्नाम प्रयोजनम् । शाश्वतः शश्वत् सदैव वर्तत इति नित्य इत्यर्थः । अशाश्वतोऽनित्यः । इत्यष्टौ प्रश्नाः । तत्र यथाक्रममेषां प्रश्नानामुत्तरं विवक्षुः प्रथमप्रश्नस्योत्तरमाह तत्र भिषजेति । आत्मन आयुर्वेदस्य अथर्ववेदे भक्तिर्विभागो वर्तत इति शेषः । अथर्ववेदस्य एको विभागः आयुर्वेद इत्याशयः । कथमित्याह वेदो हीति । हि यतः अथर्ववेदो दानादिपरिग्रहात् चिकित्सां दैवव्यपाश्रयामित्यर्थः । अतो अथर्ववेदैकदेश एव आयुर्वेदः । अत एव सुश्रुतः अथर्ववेदस्योपांगमायुर्वेदमाह ॥ किमायुरिति द्वितीयप्रश्नस्योत्तरमाह वेदमिति । चेतनानुवृत्तिः गर्भादारभ्य मरणं यावत् चैतन्यस्य या धारा प्रवर्तते तदेवायुरित्यर्थः । जीवितादिशब्दाः अस्य पर्याया इत्याह इत्येकोऽर्थ इति ॥ २०—२२ ॥

तृतीयप्रश्नस्योत्तरं विवक्षुरायुर्वेदशब्दस्य निरुक्तिमाह तत्रेति । कथं केन प्रकारेण वेदयतीति चेद् उच्यते । स्वलक्षणत इति किंनामायुषो लक्षणमिति प्रश्नस्योत्तरेणेत्यर्थः । सुखासुखत इति किन्नाम सुखायुषोऽसुखायुषश्च हितायुषोऽहितायुषश्च लक्षणमित्यस्योत्तरेणेत्यर्थः । प्रमाणाप्रमाणत इति कथं वायुर्निर्दिष्टप्रमाणं भवति कथं वाऽनिर्दिष्टप्रमाणमिति विवेचनेनेत्यर्थः । तेषां तेषामायुष्यानायुष्यद्रव्यगुणकर्मणाञ्च विवेचनेन आयुर्वेदयतीति तन्त्रमिदमायुर्वेदशब्देन निरुच्यते इत्याशयः । केवलेन कृत्स्नेन ।

तत्रायुरिति । इहैव अत्राध्याये । पूर्वाध्याये प्रथमाध्याये । सुखायुरादीनि चतुर्विधान्यायूंषि व्याचष्टे तत्रेति । अनभिद्रुतस्य अनाक्रान्तस्य । समर्थेति-सम्यग अर्थे विषये अनुमतानि बलादीनि यस्य तथाभूतस्य । पौरुषमुद्यमस्तेजो वा । ज्ञानेति ज्ञानादिबलसमूहे वर्तमानस्य । परमेति परमर्धिसमृद्धो रुचिप्रदश्च विविध उपभोगो यस्य । समारम्भ: कर्म । असुखायुराह असुखमिति । विपर्ययेण सुखसंज्ञकं यदायुस्तद्विपरीत्येन असुखमायुर्ज्ञातव्यम । हिताहितत आयुराह हितैषिण इति । भूतानां जन्तूनाम् । हितैषिण: सततं हिताकांक्षिण: । परस्वात् परधनात् । सामपरस्य प्रियवादार्थप्रदानसम्बन्धादिभि: क्रोधोपशमनं साम तत्परस्य । अप्रमत्तस्य सावधानस्य । त्रिवर्ग: धर्मार्थकामा: । वृद्ध: पण्डित: । सुनियतेति सम्यङ्निगृहीतो रागादीनां वेगो येन तस्य । ज्ञानविज्ञानोपशंसशीलस्य ज्ञाने विज्ञाने च प्रशंसापरस्य । तपोज्ञानप्रशमनित्यस्य नित्यं तपश्चरणे तत्त्वज्ञाने शान्तौ च युक्तस्य । अध्यात्मविद: आत्मादितत्त्वज्ञस्य । तत्परस्य अध्यात्मपरस्य । स्मृतिमत: तत्त्वस्मृतियुक्तस्य । अमुं परलोकम् । अतो विपर्ययेण हितायुर्वैपरीत्येन ॥ २३—२४ ॥

अथायुष: प्रमाणाप्रमाणे वेदयति प्रमाणमिति । अर्थादीनामनिमित्तैर्विकृतिलक्षणैरायुष: प्रमाणमुपलभ्यते इत्यन्वय: । अर्थादीनामाकस्मिकी विकृतिर्हि अरिष्टं तल्लक्षणै: । कथं प्रमाणमुपलभ्यत इत्याह अयमिति । अस्मात् क्षणादारभ्य संवत्सरपर्यन्तमेव आयु:प्रमाणमरिष्टलक्षणादवगम्यते न ततोऽधिकं कालमित्याशय: । स्वभावमापत्स्यते मरणमधिगच्छतीत्यर्थ: । स्वभावशब्दस्य मरणार्थकत्वं प्रतिपादयति तत्र स्वभाव इति । अप्रमाणन्तु अतो विपरीतम् । कदा मरिष्यतीत्यनिश्चय: । यथा कस्याञ्चिदवस्थायां न सिध्यति व्याधौ स च प्रत्याख्येय: अप्रतिक्रियश्चेत्यादिवचनैरुक्त: स्यात् । एतच्च प्रमाणमायुर्वेदे अरिष्टाधिकारे इन्द्रियस्थाने देहप्रकृतिलक्षणमधिकृत्य देहस्य विभिन्नै: प्रकृतिलक्षणैरायुष्मत्त्वानायुष्मत्त्वविचारेऽप्युक्तमायुष: प्रमाणम । यथा भेले विभिन्नै: प्रकृतिलक्षणैरष्टाविंशतिवर्षादारभ्य शतवर्षं यावदायु: प्रमाणं प्रोक्तम् ॥ २५ ॥

आयुर्वेदप्रयोजनरूपस्य चतुर्थप्रश्नस्योत्तरमाह प्रयोजनमिति । अत्र स्वस्थस्य स्वास्थ्यरक्षणमेव जनताभि: प्रागभीप्सितमिति तस्य प्राथम्येनोपदेश: । भवति च विकारे ततस्तत्प्रशमनस्य गौणत्वेन परस्तादभिधानम । ननु सुश्रुते तु विकारप्रशमनस्यैव प्राथम्यं दृश्यते इत्युच्यते । तस्य शल्यतन्त्रप्राधान्यात् कायचिकित्सागतज्वरादीनामुत्पत्ते: प्रागेव आदिममानवानां वनेचरप्रायाणां कलिसंप्रहारादित: व्रणोत्पत्तिरभूदिति स्वास्थ्यान्वेषणात् प्रागेव व्रणादिचिकित्साप्रवृत्तिरासीत् । एवं परिस्थितौ शल्यतन्त्रे विकारप्रशमनस्य प्राथम्यं युज्येत एव ॥ २६ ॥

अथायुर्वेद: शाश्वतोऽशाश्वतो वेति पञ्चमप्रश्नस्योत्तरं विवक्षुरनुमानत्रयेण तस्य शाश्वतत्वं साधयति स इति । आयुर्वेद: शाश्वतो नित्यो-

ऽनादित्वात् । कथमयमनादिरिति हेत्वन्तरेण सिसाधयिषुरनुमानान्तरमुपन्यस्यति । स च अनादिः स्वभावसिद्धलक्षणत्वात् । पुनश्चायुर्वेदलक्षणस्य स्वभावसिद्धत्वं हेत्वन्तरेण प्रमाणयति यथा—आयुर्वेदलक्षणं स्वभावसिद्धं भावस्वभावनित्यत्वात् इति । आयुर्वेदप्रयोजनस्य आयुषो वृद्धेः अभिधेयस्य चायुषः तथा तत्र वाच्यवाचकसम्बन्धेन सम्बद्धस्य ब्रह्मणश्चानादित्वं प्रदर्शयन् आयुर्वेदस्यानादित्वं द्रढयति नहीति । नहि नैवाभूत आसीदेव । सन्तानो धारा । नन्वायुषोऽनादित्वे नास्ति कस्यापि विप्रतिपत्तिः परन्तु न केवलमायुरेवास्य वाच्यं भवति अपितु व्याधिरारोग्यञ्चाप्यस्य वाच्यत्वेन निर्दिश्येते इति तयोरप्यनादित्वं प्रतिपादयति अनादि चेति । सुखं दुःखम आरोग्यं व्याधिश्च यदुक्तं "सुखसंज्ञकमारोग्यं विकारो दुःखमेव च" इति । सद्द्रव्यहेतुलक्षणं तयोः द्रव्यमुत्पादकहेतुत्वेन निर्दिष्टं पथ्यमपथ्यञ्च हेतुर्धातूनां साम्यं वैषम्यञ्च लक्षणञ्च ज्ञापकं लिंगं पूर्वरूपादिकं तैः सह वर्तमानं सुखदुःखमपि अनादिमद् अपरापरयोगाद् एतयोरपि धारा अविच्छिन्नैवेत्यर्थः । ननु प्रयोजनाभिधेययोरनादित्वे कथमायुर्वेदस्यानादित्वमित्याह एष इति । एष आत्मसंग्रह आत्मना स्वेन संगृह्यतेऽसाविति प्रयोजनाभिधेयादिः यत आयुर्वेदेन विभाव्यते विव्रियते अत आयुर्वेदोऽप्यनादिरेवेत्याशयः । अनादित्वे हेतुभूतमायुर्वेदलक्षणस्य स्वभावसिद्धत्वं प्रतिपिपादयिषुः आयुर्वेदलक्षणमाह आयुर्वेदेति । आयुर्वेदस्तु त्रिलक्षणेन विभक्तः । लक्षणत्रयञ्च सामान्यलक्षणं विशेषलक्षणं तदुभयलक्षणञ्चेति । तच्च नानात्मकानां द्रव्याणां सामान्यविशेषाभ्यां वृद्धिः ह्रासः समता चेति । तस्यैव विवरणमाह गुरुभिरिति । इतरेषां रूक्षस्निग्धादीनामित्यर्थः । भावानां पदार्थानामेष स्वभावः समानो भावस्तत्समानं वर्धयति विशिष्टश्च ह्रसयतीति नित्यः शाश्वतः । नन्वेतद् द्रव्यमेतद् वर्धयति विशिष्टं ह्रसयति वा नियमेन न भवितुं युज्यते द्रव्याणामनैकान्तिकधर्मत्वादित्याह स्वलक्षणमिति । पृथिव्यादीनां द्रव्याणां स्वलक्षणमपि नित्यमेवेति लिंगविपर्ययेण योजना । एतद् द्रव्यमेतद्गुणकमिति शाश्वतप्रयोगः । ननु नश्वराणां द्रव्याणां लक्षणस्य कथं नित्यताप्रसक्तिः स्यादित्याह सन्तीति । अयमर्थः एतद्घटस्य तद्घटस्य वा नाशेऽपि न सर्वथा घटत्वावच्छिन्नघटानां साकल्येनोच्छित्तिः स्यादिति द्रव्यत्वसामान्येन द्रव्याणां नित्यता विशिष्टद्रव्याणामनित्यता प्रसिद्धैव । नन्वनेके आयुर्वेदस्योत्पत्तिं कथयन्ति यथा च सुश्रुते "वेदोत्पत्तिं नामाध्यायं व्याख्यास्यामः" इति नहि नित्यस्योत्पत्तिरस्ति इत्याह नहीति । अभूतस्य असतः आयुर्वेदस्य उत्पत्तिर्नोपलभ्यते कुत्रापि दृश्यते श्रूयते वा । अपितु अवरोधस्तिरोभावः प्रलयकाले इति शेषः । तथा उपदेशः प्रलयान्ते आविर्भावः ताभ्यामन्यत्र विना । आविर्भावतिरोभावयोरेवोपलब्धिः सर्वत्र भवतीत्यर्थः । एतदाविर्भावतिरोभावद्वयमधिकृत्य पुरस्कृत्य एके केचित् पण्डिताः तस्योत्पत्तिमुपदिशन्ति ।

अर्थमिमं दृष्टान्तेन द्रढयति स्वाभाविकमिति अग्न्यादीनामुष्णत्वादिवद् आयुर्वेदस्य लक्षणमपि स्वाभाविकं स्वतोवर्तमानं तथा अकृतकमकृत्रिममित्याद्ये प्रथमेऽध्याये "ब्रह्मणा हि यथा प्रोक्तम्" इत्यादिना ग्रन्थसन्दर्भेण प्रतिपादितमित्यर्थ: । भावस्वभावनित्यत्वमपि तत्रैव सामान्यविशेषभावप्रदर्शनेनैव प्रदर्शितमित्याह भावस्वभावेति । यथोक्तं प्रथमेऽध्याये इति शेष: ॥ २७ ॥

अथ षष्ठप्रश्नस्योत्तरं विवक्षु: आयुर्वेदस्याष्टावंगानि निवेद्यन्ते तस्येति। कायचिकित्सा कायाग्नेरन्तरग्नेश्चिकित्सा यदुक्तं भेलसंहितायाम् "यस्तं चिकित्सेत् सिद्धन्तं (दुष्यन्तं) व्याधिना चापि देहिनाम् । आयुर्वेदाभियोगेन स वै कायचिकित्सक: ॥" इति अत्र तमिति जाठराग्निम् । शालाक्यमूर्ध्वजत्रुगतव्याधिचिकित्सितमित्यर्थ: । तत्र नेत्रगतलिंगनाशादिचिकित्सायां शलाकाया: प्रधानोपकरणत्वात् तत्साध्यत्वेन शालाक्यमिति संज्ञा । शल्यापहर्तृकं सर्वशरीराबाधकरं शल्यं तदपहरणायोपदिष्टमित्यर्थ: । दुष्टानां दोषाणां शरीराबाधकरत्वात् शल्यत्वेऽपि तत्र लोहवेणुवृक्षतृणशृंगास्थ्यादिमयेष्वेव अधिकार: । विषगरवैरोधिकप्रशमनं विषस्य स्थावरजंगमात्मकस्य गरस्योपविषस्य वैरोधिकस्य संयोगविरुद्धाद्यभ्यवहारजस्य प्रशमनं यत्र विद्यते तद् अगदतन्त्रमित्यर्थ: । भूतविद्या देवादिग्रहाद्युपसृष्टानामुपशमार्थम् । कौमारभृत्यं नाम "गर्भोपक्रमविज्ञानं सूतिकोपक्रमन्तथा । बालानां रोगशमनं क्रिया बालचिकित्सितम् ॥" इति तन्त्रान्तरोक्तलक्षणम् । रसायनं नाम जराव्याधिप्रशमनं मेधायुर्बलवर्धकञ्च । वाजीकरणं नाम स्वल्पाविशुद्धरेतसामाप्यायनार्थं तथा प्रहर्षजननार्थञ्च । वाज: शुक्रं तदस्यास्तीति वाजी अवाजिनं वाजिनं करोतीति निरुक्ति: ॥ २८ ॥

सप्तमप्रश्नस्योत्तरमाह स चेति । स आयुर्वेद: । राजन्या: क्षत्रिया: । कै: किमर्थमित्याह तत्रेति । प्राणिनामत्र मानवानाम् आयुर्वेदस्यास्य मानवपरत्वात् । अनुग्रहार्थं चिकित्सानिष्क्रयणार्थं किमपि प्रतिदानमनाशंक्यापि तदुपकारायेत्यर्थ: । आत्मरक्षार्थम् अरिप्रदत्तेभ्यो विषगरादिभ्य: मिथ्याहारविहाराभ्याञ्चेति शेष: । वृत्त्यर्थं स्वजीविकार्थम् । पक्षान्तरमाह सामान्यत: इति । सर्वैर्ब्राह्मणक्षत्रियवैश्यै: धर्मार्थकामपरिग्रहार्थं त्रिवर्गलाभाय । धर्मादिलाभ: कथं भवतीत्याह तत्र चेति । अध्यात्मविदां आत्मतत्त्वज्ञानामृषीणाम् । धर्मपथस्थानां धार्मिकानां धर्मप्रकाशकानां धर्मशास्त्रव्याख्यातृणाम । अध्यात्ममात्मज्ञानं शारीरादिस्थानोक्तम् । अनुध्यायति आलोचयति । वेदयति अन्यान् ज्ञापयति । अनुविधीयते तदनुस्मृत्यात्मतत्त्वमुपतिष्ठते । सुखोपहारनिमित्ता आरोग्यलाभजन्या उपहाररूपा । आत्मरक्षणं स्वस्वास्थ्यरक्षणम् । आतुर्यते रोगात् । स्वपरिगृहीतानां स्वात्मीयानाम् । विद्वद्ग्रहणं विद्वत्सु मध्ये स्थानावाप्ति: । सम्मानशुश्रूषा सम्मानं सेवा च । इष्टानां विषयाणां स्त्रीपुत्रादीनाम् । उपसंहरति इतीति ॥ २९ ॥

पुनरपि प्रश्नविशेषानुद्दिशति अथेति । भिषक् अष्टविधं प्रश्नं प्रष्टव्यो भवतीत्यन्वयः । अत्र गौणकर्मणः उक्तत्वम् । आदित आमूलात् । के ते प्रश्ना इत्याह तद् यथेति । पृष्टेन भिषजा । वाक्यशः वाक्यं वाक्यमधिकृत्येति वीप्सायां च शस् । एतत्तन्त्रादिकम् । तेषु तन्त्रं व्याचष्टे तत्रेति । तत्र तेषु व्याख्यातव्येषु । अनर्थान्तरं पर्यायवाचकम् । शास्त्रविद्येत्यर्थवेदस्य । सूत्रमिति त्रिसूत्ररूपम् । ज्ञानं ज्ञायेते हिताहितावनेनेति । शास्त्रलक्षणमिति शास्त्राण्यनुशासनानि लक्ष्यन्ते विविच्यन्ते अनेनेति । तन्त्रमिति तन्त्र्येते नियम्येते विधिनिषेधावनेनेत्यर्थः । तन्त्रार्थमाह तन्त्रार्थ इति । स्वलक्षणैः तन्त्रलक्षणैः । शरीरादिविनिश्चयाः दश प्रकरणानि । तत्र शरीरं पाञ्चभौतिकमात्माश्रयं तस्य विनिश्चयः आकृतितः प्रकृतितः अवयवतश्च निर्णयः । वृत्तिस्त्वाहारविहारौ तस्याः विनिश्चयः पथ्यापथ्यत्वविनिर्णयः । हेतुर्व्याधेरुत्पादको ज्ञापकश्च तस्य विनिश्चयः पञ्चनिदाननिर्णयः । व्याधिर्धातुवैषम्यं तस्य विनिश्चयः रोगविज्ञानम् । कर्म दैवव्यपाश्रयं युक्तिव्यपाश्रयं शास्त्रप्रणिधानञ्च तस्य विनिश्चयः चिकित्सितविज्ञानम् । कार्यं धातुसाम्यं तस्य विनिश्चयः स्वस्थवृत्तम् । कालस्तु संवत्सर आतुरावस्था च तस्य विनिश्चयः नक्तंदिनर्तुभुक्तांशादिभेदात् आतुरावस्थाभेदाच्च कर्तव्याकर्तव्यनिर्णयः । कर्ता भिषक् तस्य विनिश्चयः प्राणाभिसररोगाभिसरादिभेदाद् विनिर्णयः । करणं भेषजादिकं तस्य विनिश्चयो गुणादिविनिर्णयः । विधिराहारादौ कर्तव्याकर्तव्यते तयोर्विनिश्चयः । एतानि दशप्रकरणानि केवलेन कृत्स्नेन तन्त्रेणोपदेक्ष्यन्ते ॥ ३०—३२ ॥

तन्त्रं तन्त्रार्थञ्च व्याख्याय स्थानान्याह तन्त्रस्येति । श्लोकस्थानं सूत्रस्थानम् । स्थानार्थान् व्यासतो व्याचष्टे तत्रेति । अर्थमेनं पुनः श्लोकैराह भवन्ति चात्रेति । द्वे इत्यादि यथाक्रमं ज्ञेयम् । अष्टकानि अष्टाध्यायात्मकानि । एषु सविंशशताध्यायेषु समाप्तिः स्थानानामिति शेषः । औषधं चिकित्सितस्थानम् । अरिष्टमिन्द्रियस्थानम् । विकल्पसंज्ञकं कल्पस्थानम् । मानसंज्ञकं विमानस्थानम् । आश्रयसंज्ञकं शारीरस्थानम् । स्थानार्थान् तत्र तत्र स्थानेषु उपदेक्ष्यत इत्याह स्वे स्वे इति । अध्यायनामकथनेनाध्यायानुद्दिशति सविंशमिति । छन्दोऽनुरोधाद् अत्र दीर्घजीवितीय इत्याद्यध्यायसंज्ञाया एकदेशविकृत्या दीर्घजीव इत्यादिकथनं न दुष्यति । तत्र सूत्रस्थाने चतुरध्यायात्मकैः सप्तभिश्चतुष्कैः द्वाभ्यां च संग्रहाध्यायाभ्यां त्रिंशदध्यायाः कथिताः । तेषां चतुष्काणां नामान्याह औषधेति । शिरःशब्दोऽयं प्रधानार्थकः । आसु सिद्धिषु तन्त्रं कायचिकित्साप्रधानमिदं शास्त्रं समाप्यते । अध्यायार्थं निर्दिशति स्वे स्वे इति ॥ ३५—६६ ॥

प्रश्नं व्याचष्टे पृच्छेति । यथाम्नायं यथाशास्त्रम् । प्रश्नार्थमाह प्रश्नार्थ इति । तस्य प्रश्नस्य । अथ तन्त्रादिशब्दस्य निरुक्तिमाह निरुक्तमिति । तन्त्रणाद् आयुर्वेदार्थग्रथनात् । अर्थप्रतिष्ठया तत्तद्विशिष्टार्थावस्थानात् । अर्थ-

मधिकृत्येति स्थानान्तर्गतार्थविशेषमधिकृत्य प्रवृत्त इत्यर्थः ॥ ७०—७२ ॥

साम्प्रतं पूर्वाष्टकविचारे प्रयोजनमुखेन पल्लवग्राहिणां दोषमाचष्टते सन्तीति । केचित् * पल्लविकोपेताः पल्लवग्राहिणः सन्ति ये शास्त्राणां संक्षोभं जनयन्ति अल्पज्ञा हि शास्त्रमालोड्य विधिनिषेधौ पर्य्याकुलौ कुर्य्युरिति भावः । तत्र दृष्टान्तमाह वर्तिकेति । यथा सहसा विभाविताः उत्पादिता उत्पाताः वर्त्तिकानां 'बटेर' इति प्रसिद्धानां स्वतश्चञ्चलानां विहगानां संक्षोभं जनयन्ति तद्वदित्यर्थः । तस्मात् शास्त्रविदां वरः † अत्रायुर्वेदे परावरपरीक्षार्थं श्रेष्ठनिकृष्टविचारार्थं सर्वत्र जल्पे पक्षमाश्रित्य प्रवृत्ते वादे पूर्वकम् अष्टकं तन्त्रतन्त्रार्थादिकं आदिशेत् प्रयोजयेत् । कथं पल्लविकोपेतास्ते ज्ञेया इत्याह शब्देति । केवलस्य कृत्स्नस्य तन्त्रस्य अनल्पे सम्पूर्णे अंशे इति शेषः । नैव वर्तकाः न ज्ञानवन्तः अतः एकदेशिकाः एकदेशे ज्ञानवन्तः पल्लवग्राहिण इत्यर्थः । ततः अल्पबलाः तन्त्रे शब्दमात्रेण न त्वर्थतो भ्रमन्ति§ चरकादिसंहिताभ्यो नानास्थानात् कतिपयान् श्लोकान् शब्दमात्रेणायत्तीकृत्य तानेव प्रकृते प्रकृतान्तरे वोदाहृत्यात्मनस्तच्छास्त्रज्ञत्वं चिख्यापयिषन्तीत्यर्थः । तादृशान् वैद्यान् पुनर्विशिनष्टि पशुरिति । वृकायते वृक इवाचरतीत्यर्थः । प्रकृतिं भजते स्वं स्वं भावमापद्यते । मौखर्यसाधनः मौखर्यं वाचालता एव साधनं यस्य सः । आत्मानमाप्तं पण्डितं स्थापयति पण्डितहीने देशे मूर्खोऽपि पण्डितायते इति तात्पर्यम् । तुः पक्षान्तरे आप्तमासाद्य पण्डितान् पुरतः भिद्यते इति स्वीयं यथार्थं रूपं प्रकाशयतीति फलितार्थः । पुनर्दृष्टान्तेनार्थमेनं द्रढयति वभ्रुरिति । वभ्रुः वृद्धनकुलः वृद्धावस्थायामस्य लोमशातनं भवति अत ऊर्णाभिरन्येषां लोमभिः गूढः आच्छादितकायः यथा युवेव परिदृश्यते परन्तु कार्यतश्चास्य वृद्धत्वं प्रकाश्यते तद्वद् अबहुश्रुतः अनधिगतकृत्स्नतन्त्रः भिषक् संजल्पे प्रवृत्ते वादे किं वक्ष्यति तस्य वचनावकाश एव न भवितुमर्हतीत्यर्थः । यथा जडो मूर्खः यज्ञं कुर्वन् कुण्डभेदी यज्ञकुण्डमेव भिनत्ति तद्वत् । तत्र किं करणीयमित्याह सद्वृत्तैरिति । अल्पश्रुतैः स्वल्पाधिगततन्त्रैरपि सद्वृत्तैः दम्भपारुष्यादिवर्जितैर्भिषग्भिः सह न विगृह्णीयान् न विगृह्य वादं कुर्यात् । तुः पक्षान्तरे आत्ममानिनो दम्भिनः इतरान् असद्वृत्तान् तन्त्रादिप्रश्नाष्टकेन हन्यात् निगृह्णीयात् । ननु के असद्वृत्ताः इत्याह दम्भिन इति । के वा सद्वृत्ताः इत्याह प्रायेणेति । सुमुखा मधुरभाषिणः । युक्ताल्पभाषिणः युक्तियुक्तमल्पञ्च भाषन्ते ये ते । तथाऽहंकारमनाश्रितास्ते तत्त्वज्ञानप्रकाशार्थं विवदन्ते इति शेषः । तान् स्वल्पाधाराज्ञमुखरान् इति—स्वल्पाधारा धारणा बुद्धिर्येषां ते स्वल्पा-

* 'पल्लविकोपेताः' इति पाठोऽत्र गृहीतः ।

† 'शास्त्रविदां वरः" इति पाठः ।

§ अनल्पे नैव वर्तकाः' इति पाठोऽत्रादृतः ।

धारास्तान् अज्ञान् मुखरांश्च विवादिनः प्रतिपक्षान् न मर्षयेत् क्षमेत सद्वादमाश्रित्य तान् निगृह्णीयादित्यर्थः ॥ ननु तर्हि तानज्ञान् असद्वादमप्याश्रित्य किं निगृह्णीयान् नेत्याह पर इति । येषां भूतेषु सर्वप्राणिषु परः श्रेष्ठः अनुक्रोशः करुणा सा दया तत्त्वज्ञानपरा यथार्थज्ञानानुसारिणी भवतीति शेषः । तेषां असद्वादनिग्रहे असद्वादमाश्रित्य प्रतिपक्षपराजये मतिर्निरता न ते येन तेन प्रकारेण प्रतिपक्षान् जेतुमभीप्सन्तीत्यर्थः ॥ ७६—८२ ॥

असद्वादानां दोषान् आह असत्पक्षा इति । हि यतः असत्पक्षाः असद्वादाः किम्भूताः परिविकल्पनाः * सर्वतोभावेन विकल्पन्ते एकपक्षमाश्रित्य वदन्तः परेणानुयुक्ताः पुनरपरं पक्षमाश्रयन्तीत्यर्थः । पुनश्च दम्भपारुष्यसाधनाः दम्भः पारुष्यञ्च वाक्पारुष्यमेव साधनं यत्र ताः, न तु युक्तयः प्रमाणं वेत्याशयः । क्षणित्वात् क्षणस्थायित्वात् प्रायः स्वे तन्त्रे अनाप्ताः अप्रमाणानि भवन्ति । उपसंहरन् ज्ञाज्ञभिषजां सेव्यासेव्यत्वमाह तानिति । कालपाशसदृशान् मूर्खत्वेन व्याधितानामिति शेषः । शास्त्रदूषकान् अल्पज्ञत्वेन शास्त्रं दूषयन्ति ये तान् । यदुक्तं केनचित् "विभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति" इति । वर्जयेद् असेव्यत्वेनेत्यर्थः । समभिज्ञानज्ञान् † ज्ञायतेऽनेनेति ज्ञानं शास्त्रं सम्यक् सर्वतश्च तज्जानन्ति ये तानित्यर्थः । अतोऽपूर्वान् श्रेष्ठान् भिषक्कमान् सेवेत ॥ ८३—८४ ॥

पुनरपि ज्ञानाज्ञानयोः फलमाह समग्रमिति । अविज्ञाने अज्ञतायां द्वयाश्रयं शारीरं मानसञ्च दुःखं समग्रमशेषेण आयत्तम् । विमले विशुद्धे च विज्ञाने शास्त्रज्ञाने । अतोऽविज्ञानं निराकर्तुं किं कर्तव्यमित्याह इदमिति । इदमेव शास्त्रमज्ञानार्थप्रकाशकं भवतीति तदेवाध्येयमित्यर्थः । दृष्टिप्रणष्टानाम् अन्धकारेणेति शेषः ॥ ८५—८६ ॥

अध्यायार्थं निवेद्याध्यायं समापयति तत्र श्लोका इति । निगदव्याख्यातमन्यत् ॥ ८७—९० ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां सूत्रस्थाने अर्थदशमहामूलीयो नाम त्रिंशदध्यायः ॥ ३० ॥

श्रीमज्ज्योतिषचन्द्रेण कृता भूतार्थदीपिका ।
प्रदीपिका समाप्तेयं श्लोकस्थानस्य टिप्पणी ॥ १ ॥

---

* असत्पक्षाः क्षणित्वाद्धि दम्भपारुष्यसाधनाः ।.....परिविकल्पनाः" इति पाठोऽत्रादृतः ।

† 'सेवेत समभिज्ञानज्ञानपूर्वान् भिषक्कमान्' इति पाठोऽत्र गृहीतः ।

निदानस्थानम् ।

प्रथमोऽध्यायः ।

त्रिंशदध्यायात्मकेन श्लोकस्थानेन आयुर्वेदतन्त्रमधिजिगांसूनां ज्ञातव्यत्वेन प्राथमिकं ज्ञातव्यनिचयं निखिलेन निरदिक्षत् । साम्प्रतन्तु अज्ञाते व्याधितत्त्वे न खलु विदितवेदितव्यः कश्चित् भिषक् तन्निराकर्तुं प्रभवेदिति प्राग् व्याधीनां निदानतत्त्वे व्यचिख्यासितव्ये शारीराणां प्राथम्याज् ज्वरनिदानमेव व्याख्यातुं तन्निदानात्मकमध्यायमारभते अथात इत्यादिना । हेतुलक्षणनिर्देशादस्य स्थानस्य निदानस्थानत्वं सिध्यति । निरुक्तिश्चात्र निदीयते निबध्यते हेत्वादिसम्बद्धो व्याधिरनेनेति । तेनात्र स्थाने हेतुलक्षणादिना व्याधिनिर्देशो भविष्यतीति अभिधेयोऽपि कथितः । तत्रादौ निदानं व्याचिख्यासुः पर्यायशब्दैस्तद् बोधयति इहेति । असाधारणकारणत्वे कर्तृत्वमपि स्यादित्याह कर्ता इति । ननु एकार्थाभिधायिनामेतेषां शब्दानां मिलितो योऽर्थविशेषस्तन्निदानमुत प्रत्येकस्य ? तत्र नाद्यस्तथाप्रयोगस्यासम्भवात् , नचाप्यन्त्यः पृथक्शब्दानामेषामन्यार्थेऽपि प्रयोगदर्शनात् इति चेन्न । हेत्वादिभिः पर्यायैरेकार्थवाचकैः शब्दैः योऽर्थविशेषः प्रतीयते तदेव निदानम् । असात्म्येन्द्रियार्थसंयोगादयः (सू० ११ अ०) व्याख्याताः १-३

अत इति । अतः एभ्यः कारणेभ्यः । आग्नेयाः पैत्तिकाः सौम्याः श्लैष्मिकाः । त्रिविधविकल्पाः त्रिविधभेदाः । शारीरव्याधिभेदानुक्त्वा मानसव्याधिभेदमाह द्विविधा इति । अपरे मानसा इत्यर्थः । यथाहि शारीराः सर्व एव व्याधयः त्रिदोषं विहाय न भवन्ति तथैव मानसा अपि रजस्तमोभ्यां विना न भवन्ति यदुक्तम्—

"वायुः पित्तं कफश्चोक्तः शारीरो दोषसंग्रहः ।
मानसः पुनरुद्दिष्टः रजश्चतम एव च ॥" इति ॥ ४ ॥

व्याधिनिदानं विवक्षुर्व्याधिं व्याचष्टे अत्रेति । अत्र आयुर्वेदे । व्याध्यादिशब्दास्तु तत्पर्यायाः । अनर्थान्तरं पर्यायबोधकमित्यर्थः । तस्य विज्ञानान्याह तस्येति । तस्य व्याधेर्निदानादिभ्यः पञ्चभ्यः कारणेभ्यः उपलब्धिर्ज्ञानं भवति । तान् यथाक्रमं व्याचिख्यासुरादौ निदानमाह तत्रेति । तत्र तेषु पञ्चसु निदानादिषु मध्ये कारणमिति उत्पादको हेतुः मिथ्याहारविहारादिः । पूर्वरूपं व्याचष्टे पूर्वरूपमिति व्याधेः प्रागुत्पत्तिलक्षणं येन लक्षणेन उत्पित्सुर्व्याधिर्लक्ष्यते तत् । लिंगं विवृणोति प्रादुर्भूतेति । प्रादुर्भूतस्य उत्पन्नस्य व्याधेर्लक्षणं लिंगमित्यर्थः । अस्मिन्नर्थे अस्मिन्नायुर्वेदतन्त्रे । लिंगादयः शब्दाः अस्य पर्यायवाचका भवन्तीत्याह तत्रेति । उपशयं व्याकरोति उपशय इति ।

हेतोर्व्याध्युत्पादकस्य सन्निकृष्टस्य वातादिदोषस्य विप्रकृष्टस्य चाहिताहार-विहारस्य व्याधेश्च व्यस्तसमस्तयोर्विपरीतानां तथा तथैव व्यस्तसमस्तयोः विपरीतार्थकारिणां हेत्वादिसधर्माणामपि तद्विपरीतार्थकारिणाम् औषधाहार-विहाराणामुपयोगोऽभ्यवहारः स चेत् सुखानुबन्धः स्थिरसुखप्रदः स्यात्तर्हि उपशयशब्दवाच्यः स्यात्। अपथ्यसेवाजनिततदात्वसुखनिरासार्थम् उपयोगस्य सुखानुबन्ध इति विशेषणं भवति। अत्र हेतुव्याधीति समस्तपदस्य प्रागितरेतरद्वन्द्वेन ततः समाहारद्वन्द्वेन निष्पन्नयोर्द्वयोर्हेतुव्याधिपदयोरेकशेषकरणेन हेतुव्याधिपदोऽत्र निष्पादितस्तेन च तत्र हेतुव्याध्योः व्यस्तसमस्तयोरेव ग्रहणं भवति। पारिशेष्यात् संप्राप्तिं विवृणोति संप्राप्तिरिति। संप्राप्तिस्तु सेतिकर्तव्यताकं व्याधिजन्म तेनास्याः जात्यादयो पर्याया भवन्ति। तत्र इतिकर्तव्यता तु करणगतप्रकाराकांक्षापूरिका भवति। तेन व्याधेरसाधारणकारणानां दोषादीनां निदानसेवानन्तरं व्याधिजन्म यावद् ये ये प्रकारा भवन्ति सञ्चयप्रकोपप्रसरस्थानसंश्रयादयः तैः सहैव व्याधेरुत्पत्तिः सम्प्राप्तिपदवाच्या भवति। विवृतिरस्याः सौश्रुतसूत्रीये व्रणप्रश्नाध्याये द्रष्टव्या। आगन्तोरपि व्याधेः करणगताः प्रकारा नूनं भवन्ति तैः सहैव व्याधेरुत्पत्तिर्भवतीति न दोषः॥ ५—११॥

तस्याः भेदान् व्याचष्टे संख्येति। संख्याविशेषैर्भेदास्तु प्रागेवाष्टोदरीये व्याख्याताः। प्राधान्यमाह प्राधान्यमिति। प्राधान्यं पुनर्द्वयोस्त्रिषु वा व्याध्युत्पादकेषु दोषेषु श्रेष्ठत्वादिना लक्ष्यत इत्याह दोषाणामिति। तन्त्रान्तरेऽप्युक्तम् "स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत्" इति। विधिभेदमाह—ननु विधिसंख्ययोः को भेद इत्युच्यते यद्यपि सर्वत्र संख्याभेदो वर्तत एव तथापि यत्र समानेन धर्मेण भेदानां परिग्रहः क्रियते स एव विधिः संख्या तु भेदमात्रम्। साध्यासाध्यमृदुदारुणभेदेनेति। मृदुसाध्यो दारुणसाध्यश्च मृदुसाध्यो दारुणासाध्यश्चेति। विकल्पमाह समवेतानामिति। समवेतानां व्याध्युत्पादकत्वेन सम्मूर्छितानाम् दोषाणामंशांशेन तेषु कियानंश एकस्य अपरस्य च कियान् इत्यादि विचार्य तत्तद्दोषस्य मानतो या कल्पना सैषाऽस्मिन्नर्थे आयुर्वेदे विकल्प इति कथ्यते। यदुक्तं तन्त्रान्तरे—"दोषाणां समवेतानां विकल्पोऽशांशकल्पना" इति। बलकालविशेषमाह बलेति। बलस्य कालस्तस्य विशेषस्तु ऋतोर्वसन्तादिना अहोरात्रस्य पूर्वाह्णादिना आहारस्य च भुक्तमात्रादिना कालविधिना विनियतो निर्णीतो भवति। तद्यथा—वसन्ते पूर्वाह्णे भुक्तमात्रे च जातस्य कफजत्वं शरदि मध्याह्ने जीर्यमाणावस्थायां च पित्तजत्वं प्रावृषि सायाह्ने जीर्णावस्थायां च वातजत्वं विनियतं भवति॥ १२—१६॥

समासतो निदानप्रकरणं सर्वव्याधिनिदानसामान्यं वोपसंहरति तस्मादिति। हेत्वादिभिः निदानपूर्वरूपरूपोपशयसंप्राप्तिभिः पञ्चभिर्भावैर्निदानैः व्याधीननुबुध्येत आदौ निदानलिंगादीन् बुद्ध्वा ततो व्याधीन् बुध्येत। निदान-

स्थानस्य इति पूर्वोक्तप्रकारेण अर्थसंग्रह: समासत: सर्वव्याधिनिदानानि इत्यर्थ:। उद्दिष्टस्तेषामुद्देश: कृत:। अत: इत: परं तमुद्देशम्॥ १७—१८॥

सर्वव्याधीनां सामान्यं निदानं निवेद्य पृथग् व्याधिनिदानमुपदिदिक्षु-रादावत्र निदानस्थाने प्रथमोत्पन्नानामष्टानामेव व्याधीनां निदानादिकं वक्तुं प्रतिजानीते तत्र प्रथमत इति। आद्यान् प्रथमोद्भवान्। एतेषामादिप्रभवत्वं स्वयमेवापस्मारनिदाने वक्ष्यति। लोभादिप्रभवत्वञ्चैषां जनपदोद्ध्वंसनीये विमाने च प्रतिपादयिष्यति। निदानपूर्वेण च क्रमेण निदानप्राथम्येन क्रमेण। सर्वत्रैव निदानं प्रागुक्त्वा तत: संप्राप्तिक्रमेण रूपादिकम्, क्वचिद्वा पृथग्-दोषभेदेन रूपाण्युल्लिख्य पूर्वरूपमपि लिखितमास्ते प्रयोजनवशादिति न दोष:। चिकित्सास्थाने सिद्धिस्थानेऽपि निदानादिकं वक्तुं प्रतिजानीते चिकित्सितेष्विति। उत्तरकालं परस्तात् चिकित्सितेषु यत्र चिकित्सा वक्ष्यते तेषु। तेन सिद्धिस्थानेऽपि केषाञ्चिन् निदानचिकित्सावर्णनं न दोषावहं भवति। यथोचितविकारान् संगतिवशाद् व्याख्यातव्यान् व्याधीनिति निदानचिकित्सादिभिरिति शेष:॥ १९॥

तत्र ज्वरनिदानप्राथम्ये हेतुमाह इहेति। इह वक्तव्ये व्याधिनिदाने विकाराणां शारीराणां व्याधीनाम् प्रथमत्वञ्चास्य स्वयमेव प्रतिपादयिष्यत्यग्रे। वक्तव्ये ज्वरनिदाने तस्य संख्याभेदान् सकारणानाह अथेति। अथेत्ययमानन्तर्यार्थ:। पृथग् ज्वरान् विवक्षुस्तत्र वक्तव्यविशेषानुद्दिशति तस्येति। नन्वत्र संप्राप्तिरप्युक्ता 'स यदा प्रकुपित:' इत्यादिना स्पष्टतस्तत्कथमत्रोद्देशे-नोक्ता इति चेदुच्यते। अत्र निदानादीनां दोषभेदेन वैशेष्यं वर्तते संप्राप्तेस्तु सर्वत्रैकविध्येन नोक्तिर्दोषावहा भवति। ननु पूर्वरूपेऽपि वैशेष्यं नास्तीति चेन्न। तत्र सामान्यत उक्तेऽपि नूनं दोषभेदेन वैशेष्यं भवत्येव। यदुक्तं सुश्रुते "xxxx विशेषात्तु जृम्भात्यर्थं समीरणात्। पित्तान्नयनयोर्दाह: कफादन्नाभिनन्दनम्" इति। न खल्वत्रोपशयविशेषो नोल्लिखित इति वाच्यम् निदानविपर्ययेणैवास्योपलम्भात्॥ २०—२२॥

अथ वातज्वरस्य निदानसंप्राप्तिलक्षणानि विवक्षुरादौ तस्य निदानान्याह रूक्षेति। वमनादीनामतियोग: अतिप्रवृत्ति:। वेगानां मलमूत्रादि-वेगानामुदीर्णानामित्यर्थ:। अनशनमुपवास:। शोणितातिषेक: मात्रातिरिक्त-शोणितस्राव:। जागरणं रात्रिजागरणम्। विषमशरीरन्यास: यथा शरीर-स्थापनेन शिराधमनीस्रोतसामवरोध: स्यात् तथा शरीरावयवस्थापन-मित्यर्थ:। अतिसेवितेभ्य एतेभ्य: कारणेभ्य: न खलु स्वल्पोपसेवया इत्यर्थ:। वायु: प्रकोपमापद्यते। ननु को नामायं वातादीनां प्रकोप इत्युच्यते। शरीरे वातादयो हि साम्यावस्थायां शरीरं वर्धयन्ति उपादानत्वेन, पालयन्ति स्वस्व क्रियाणां कर्मोष्माश्लेषरूपाणां करणेन च निमित्तत्वहेतुत्वेन, एवं विषमावस्थायां शरीरं नाशयन्ति इत्येषां प्रकृतिविकृती व्याख्याते भवत:। यदुक्तं सुश्रुते— "वातपित्तश्लेष्माणो हि देहसम्भवहेतव:। तैरेवाव्यापन्नैरधोमध्योर्ध्वसन्निविष्टै:

शरीरमिदं धार्यते ..... त एव व्यापन्नाः प्रलयहेतवः ॥" इति (सू० २१ अ०) अयमर्थः ते—त्रिधातवः आहारोत्पन्ना अन्नरसरूपेण सर्वशरीरोत्पादने उपादानभूताः समाश्च सर्वशरीरव्यापिनो भवन्ति । त एव निमित्तकारणभूता अधोमध्योर्ध्वसंश्रयाः समाश्च स्वेन स्वेन कर्मणा शरीरं पालयन्ति । पुनश्च व्यापन्ना विषमास्ते कुत्रचिदुपादानकारणत्वेन कुत्र वा निमित्तकारणत्वेन व्याधीन् सृजन्तः शरीरं नाशयन्ति । एषामसाम्ना क्षयवृद्धी वैषम्यमापादयतः । तदैव विकारोत्पत्तिर्भवति । यदुक्तं "विकारो धातुवैषम्यं धातुसाम्यमरोगता" इति । एषु यस्य उपादानभूतस्य वृद्धिर्भवति तस्यैव प्रकोप इत्युच्यतेऽस्मिन्नर्थे, पुनश्च निमित्तभूतस्य यस्योन्मार्गगामित्वं भवति तदैवास्य प्रकोप इति विशेषो ज्ञेयः । यदुक्तं वृद्धवाग्भटेन—"कोपस्तून्मार्गगामिता । लिंगानां दर्शनं स्वेषामस्वास्थ्यं रोगसम्भवः ॥" इति (सू० २० अ०) । अत्र उन्मार्गगामित्वं निमित्तभूतानाम्, उपादानभूतानाञ्च स्वलिंगदर्शनमित्यर्थः । एवमत्र वायोः प्रकोपकनिदानेषु कानि खलूपादानभूतस्य कानि वा निमित्तभूतस्य वायोः प्रकोपे निदानानि भवन्तीति व्याख्याय तस्य प्रकोपं जिज्ञापयिषामः, यथा—तत्र प्राक् शीतलघुरूक्षद्रव्याणामुपसेवा उपादानभूतं वायुं वर्धयति । रूक्षादीनि हि वाय्वाकाशप्रधानानि अतो वाय्वाकाशप्रधानस्य वायोः सामान्येन तं वर्धयन्ति यदुक्तं "सामान्यं वृद्धिकारणम्" इति । वृद्धवाग्भटेनाप्युक्तं "वाय्वाकाशाभ्यां वायुः" इति (सू० २० अ०) । अतिवमनविरेचनादिनापि पित्तश्लेष्माणौ क्षयमाप्नुतः तेन च समावस्थायामवस्थितस्यापि उपादानभूतस्य वायोर्मानाधिक्यं भवति । वेगसंधारणेन निमित्तकारणस्य वायोः प्रतिलोमगामित्वेन प्रकोपः । अनशनेन च कफपित्तयोरनुत्पादः निःश्वासेन च बाह्यवायोराहाराद् वायोः पुष्टिसातत्येन उपादानभूतस्य निमित्तभूतस्य च वायोर्मानाधिक्यात् प्रकोपः । अभिघातव्यवायशोणितातिषेकादिभ्यः उपादानभूतस्य उद्वेगशोकविषमशरीरन्यासेभ्योऽतिसेवितभ्यो निमित्तकारणभूतस्य प्रकोपः । एवं सर्वत्रैव धातूनां प्रकोपादिषु निदानादिभिः सम्बन्ध उद्टंकनीयो भवति ॥ २३ ॥

वायोः प्रकोपे निदानान्युक्त्वा तज्जन्यज्वरसंप्राप्तिमाह स यदेति । उष्मणः स्थानमामाशयमिति अत्रामाशयपदेन कोऽर्थः प्रतीयते इति प्राग् विचार्यते । आयुर्वेदे तु आमाशयशब्दो द्व्यर्थको दृश्यते । तत्रैको महास्रोतसः स्थूलतमोंऽशः मुख्यतया केवलस्य आमस्याद्यस्य धारणात् । अस्य चेयमाकृतिगता संज्ञा । अपरस्य लक्षणं त्रिविधकुक्षीये विमाने यथा—

"नाभिस्तनान्तरं जन्तोरामाशयः प्रकीर्त्तितः ।
अशितं खादितं पीतं लीढञ्चात्र विपच्यते ॥
आमाशयगतः पाकमाहारः प्राप्य केवलम् ।
पक्वः सर्वाशयं पश्चाद् धमनीभिः प्रपद्यते ॥" इति

वाक्यबलादस्मादत्राहारस्य पूर्णतया पाकः (केवलं पाकम्) आमा-

शये भवतीत्यवगम्यते। पुनस्तत एव अन्नरसो सर्वाशये गच्छतीति निर्देशात् स्थानमप्यस्य स्तनादारभ्य नाभि-(बाह्यांगो नाभि: स्तनसाहचर्यात्) पर्यन्तं प्रसृतमित्युक्ते: महास्रोतस: आद्यभागादामाशयादारभ्य तदनु अन्तर्नाभे: क्षुद्रान्त्रस्यापि आमाशयपदेन परिग्रहो भवति। किञ्च स्थाननिर्देशे स्तनस्योर्ध्वसीमानिर्देशाद् उर:स्थलस्यापि आमाशयत्वं सिध्यति। तद्धि शरीरान्यतमप्रधानधातोर्वातस्याहारत्वेन कल्पितमामं बाह्यवायुमपि धारयतीति तस्याप्यामाशयत्वं युज्यत एव। यदत्रैव हृद्रोगचिकित्सिते वक्ष्यति-यथा—"प्रायोऽनिलो रुद्धगति: प्रकुप्यत्यामाशये शोधनमेव तस्मात्" इति। पुनश्च फु:फुससहितस्य हृत्पिण्डस्य आमाशयश्रेष्ठत्वं ख्यापितं सुश्रुतेनेति अत्र आमाशयपदेन हृदयफु:फुसामाशयनाभिक्षुद्रान्त्राण्येतानि यन्त्राणि परिगृह्यन्ते। इयं हि आमाशयस्य प्रकृतिगता संज्ञा। तत्रैव उष्मण: स्थानं कर्मस्थानम्। नाभिगतोऽप्ययं जाठराग्नि: ऊर्ध्वज्वालया आमाशयोरोगतान् आहारान् पचति। सूर्यकिरणसम्पातवद् उष्मणा क्षुद्रान्त्रगतमपि शोषयति। अतोऽत्र उष्मण: स्थानमिति (न तु पाचकाग्ने: स्थानम्) विशेषणाज् जाठराग्नेरुष्मा यत्र यत्र गच्छति तानि स्थानान्येव आमाशयपदेन ग्रहीतुं युज्यते न तु जाठराग्निस्थानमात्रम्। अतो ज्वरकारिणो दोषा: एतानि स्थानानि संश्रयते इति तात्पर्यम्। प्रविश्य आक्रम्येत्यर्थ:। अत्रैव ते दोषा आहाराज्जायन्त इति एतत् स्थानाक्रमणं युज्यते। उष्मणा पाचकाग्निना सह मिश्रीभूत इति जाठराग्निरपि त्रिधातुसमवायरूपेण पित्तप्रधानेनान्नरसेन पोष्यत इति आत्मनो जीवनयोनिप्रयत्नवशाद् उपादानत्वेन प्रकुपितस्यापि वायो: पोषणव्यपदेशात् तन्मिश्रणं युज्यते। एवं मिश्रीभावाद् उपादानदोषादग्निरपि नाशं गच्छतीत्याह अग्निमुपहत्येति। अत्र उपहत्य विषमं कृत्वेत्यर्थ:। एवमग्निदोषाद् अन्नरसोऽपि आमखाद्यमिश्रत्वात् सामो भवति। तमाद्यमाहारपरिणामधातुं रसनामानमिति सर्वधातुपोषकमाहारात् प्रागुत्पन्नमन्नरसमित्यर्थ:। स्थायिपोष्यरसप्रतिषेधार्थं विशेषणद्वयं प्रदत्तम्। तस्य च सामत्वेन रसस्वेदवहानि स्रोतांस्यवरुद्धानि भवन्तीत्याह रसस्वेदेति। केवलं कृत्स्नं देहमनुप्रपद्यते। यद्वक्ष्यति ग्रहणीचिकित्सिते—

"व्यानेन रसधातुर्हि विक्षेपोचितकर्मणा।
युगपत् सर्वतोऽजस्रं देहे विक्षिप्यते सदा॥
क्षिप्यमाण: खवैगुण्याद् रस: सज्जति यत्र स:।
करोति विकृतिं तत्र" इति।

एवं सर्वशरीरविसर्पणात् ज्वर: सर्वांगगतो भवति। एवमामरसस्य सर्वशरीरे सर्वशरीरगतं स्थायिरसं पोषयितुं गमनात् आमाधिक्याच्च त्वग्गतभ्राजकाग्निना परिपाकासम्भवात् जीवनयोनिप्रयत्नवशादेव भ्राजकाग्नेर्बलं वर्धयितुं पाचकाग्नेरुष्मणो बहिस्त्वचि नि:सरणं भवतीत्याह उष्माणं बहिर्निरस्येति। यदुक्तं सुश्रुते व्रणप्रश्ने सौत्रीये—"तत्रस्थमेवात्मशक्त्या

शेषाणां पित्तस्थानानां शरीरस्य चाग्निकर्मणाऽनुग्रहं करोति" इत्याह पक्ति-स्थानादिति। तत्राग्नेः शक्तिरुष्मैव। अत एव त्वग्गतभ्राजकाग्नेः स्वाभाविक उष्मा पाचकाग्नेरुष्मसंयोगाद् वर्धितो ज्वरितमुष्णगात्रं करोति। यद्वक्ष्यति—

"संसृष्टाः सन्निपतिताः पृथग्वा कुपिता मलाः।
रसाख्यं धातुमन्वेत्य पक्तिं स्थानान्निरस्य च॥
स्वेन तेनोष्मणा चैव कृत्वा देहोष्मणो बलम्।
सन्तापमधिकं देहे जनयन्ति ....." इति।

बहिःशब्दोऽत्र त्वगर्थकः। तेन च पाचकाग्नेः स्थानाद् भ्राजकाग्नि-स्थाने त्वचि उष्मणो गमनं लौकिकं भवति नान्यथा॥ २४॥

वातज्वरस्य लिंगान्याह तद्यथेति। विषमारम्भविसर्गित्वमिति ज्वरा-रम्भत्यागयोः कालस्य वैषम्यमित्यर्थः। उष्मणः शरीरोष्मणः वैषम्यं प्रतिदिनं पृथक् सततह्रासवृद्धिशीलो वा भवतीत्यर्थः। ज्वरस्य तीव्रताया मृदुतायाश्च नैकभावेनावस्थितिर्भवतीत्याह तीव्रेति। जरणान्ते अन्नपरिपाकस्य तृतीयाया-मवस्थायामित्यर्थः। तदैवाहाराद् वातविवेको भवतीति ज्वरारम्भकदोषबल-वर्धनात्। घर्मान्ते ग्रीष्मकालान्ते प्रावृषीत्यर्थः। नखादीनां परुषता रूक्षता अरुणवर्णता च। क्लृप्तीभावः अभूतसामर्थ्यविशिष्टता। चलाः क्षणस्था-यिनः अचलाः स्थायिनः सुप्तता स्पर्शज्ञानराहित्यम्। पिण्डिकयोर्जंघामध्ये स्थूलतमयोर्मांसपिण्डयोः उद्वेष्टनं रज्ज्वा वेष्टनवत् पीडा। विश्लेषणं विश्लिष्ट-वदनुभूतिः। सादोऽवसन्नता। कटीति कट्यादीनामस्थ्नां भग्नत्वमिव वेदनेति योजना। रुग्नत्वं यष्ट्यादिना, मृदितत्वं पाषाणादिना, मथितत्वं मुष्ट्यादिना, चटितत्वं अस्थिच्छल्लितभग्नवत्, अवपाटितत्वं कुठारादिना। अवनुन्नत्वं विवर्तितत्वम्। अप्रसिद्धिरकर्मण्यता। हृदयग्रहः वक्षसि वेदना हृत्पिण्ड-स्पन्दनवैषम्यं वा। अन्नरसखेदः अन्ने रसाग्रहणम्। प्रसेकः निष्ठीवनाधि-क्यम्। विनामो नतगात्रता। वेपथुः कम्पः। दन्तहर्षस्तु—

"दशनाः शीतमुष्णञ्च सहन्ते स्पर्शनं न च।
यस्य तं दन्तहर्षन्तु व्याधिं विद्यात् समीरणात्॥"

इतिलक्षणः। एवं रूपाण्युक्त्वा उपशयमपि ज्ञापकत्वेनात्रैवाह निदा-नेति। लिंगानि ज्ञानसाधनानि भवन्ति। यदुक्तं "गूढलिंगं व्याधिमुप-शयानुपशयाभ्यां परीक्षेत" इति॥ २५॥

पित्तज्वरस्य निदानान्याह उष्णेति। तीक्ष्णातपः शरद्ग्रीष्मयोः। संप्राप्तिमाह तद्यदेति। तत्पित्तम्। आमाशयादिति ल्यब्लोपे पञ्चमी। तत्रा-वस्थायेत्यर्थः। द्रवत्वादग्निमुपहत्यैति वचनात् पाचकाग्नेः पित्तवद् द्रवत्वं नास्तीति सूच्यते। स च पित्तप्रधानान्नरसपोष्यः। परन्तु तत्र पित्ताधिक्याद् विरुद्धधर्मेण द्रवेण तस्योपघातः सम्भवत्येव। अतो वृद्धवाग्भटः स्पष्टतया पाचकाग्नेः किञ्चिद् वैशिष्ट्यमाह यथा—"तत्र यदामाशयपक्वाशयमध्यस्थं पञ्चमहाभूतात्मकत्वेऽपि तेजोगुणोत्कर्षात् क्षपितसोमगुणं ततश्च त्यक्तद्रव-

स्वभावम्" इति। (सू० २० अ०) अन्यत् पूर्ववद् व्याख्येयम् ॥२६—२७॥

पित्तज्वररूपाण्याह तद्यथेति युगपदेकदैव न तु वातज्वरवत् कालतो वैषम्यं वर्तते इत्याशय:। कटुकास्यता तिक्तमुखता। विदाहकाले पच्यमानावस्थायां द्वितीयेऽवस्थापाके इत्यर्थ:। तदैवाहारात् पित्तोदीरणं भवतीति पित्तस्य प्राधान्यं भवति व्राणादिषु पाक: व्रणोत्पत्ति:। रज:पित्तानिलाद् भ्रम: इत्युक्ते: वातिके पैत्तिके च ज्वरे भ्रमस्य रूपत्वमाह। अतीसार इति अतीव दोषप्रवृत्ति:। अतीवोष्मण: तीव्रभाव: वातिकश्लैष्मिकज्वरापेक्षया शरीरतापाधिक्यम् ॥ २८॥

कफज्वरनिदानमाह स्निग्धेति। संप्राप्तिमाह स यदेति पूर्ववद् व्याख्यातव्यम्। तस्या रूपाण्याह तद्यथेति। भुक्तमात्रे आहारपाकस्य प्रथमावस्थायां मुखप्रवेशादारभ्य प्रथमं मधुरपाकं यावदित्याशय:। हृल्लासो विवमिषा। हृदयोपलेप: उरस्यन्त:श्लेष्मप्रलिप्तवद्वेदना। स्तिमितत्वमार्द्रपटावगुण्ठितत्वमिव। स्तम्भोऽगानाम्। श्वैत्यं श्वेतवर्णता, शीतपिडका उदर्दवत् पिडकोत्पत्ति: ॥ २६—३१ ॥

द्वन्द्वजसान्निपातिकानां निदानान्याह विषमेति। यद्यप्यनशनात् प्राधान्येन वातप्रकोपो भवति तथापि तज्जन्याग्निबधहेतुकस्त्रिमलप्रकोप: सम्भवत्येव। अत एव दुर्भिक्षान्ते सान्निपातिकव्याधीनां प्रादुर्भावो विशेषतो दृश्यते। अन्नपरिवर्तात् सदैव विभिन्नजातीयान्नपरिग्रहात्। ऋतुव्यापत्तिस्तु तेषां लक्षणानां शीतोष्णवर्षाणामयोगातियोगमिथ्यायोगा:। गरेभ्य: दूषीविषाक्रमणात्। गिरीणामत्र मूषिकाणामुपश्लेषात स्पर्शात् तद् विषं संक्रम्य ज्वरमापादयति तेषां शुक्रविषत्वात्। यदुक्तं सुश्रुते—

"शुक्रं पतति यत्रैषां शुक्रवृष्टै: स्पृशन्ति वा।
नखदन्तादिभिस्तस्मिन् गात्रे रक्तं प्रदुष्यति।
पर्वभेदो रुजस्तीव्रा ज्वरो मूर्छा च दारुणा।"

इत्यादि। स्नेहादीनामयथावत्प्रयोगो अयोगोऽतियोगश्च। विषमप्रजननाद् गर्भव्यापत्ते:। यथोक्तानां तत्तद्दोषप्रकोपकाणां हेतूनां निदानानाम्। अन्यतम: वातपित्तौ वातकफौ पित्तकफौ वा। तयैवानुपूर्व्येति पूर्ववत् संप्राप्तिपुर:सरमित्यर्थ:। समासतस्तेषां लक्षणानि निर्दिशति तत्रेति। यथोक्तानामिहैवोक्तानां वातादिज्वरलिंगानाम्। मिश्रीभावदर्शनं प्रकृतिसमसमवेते दोषे विशेषदर्शनञ्च विकृतिविषमसमवेते ज्ञेयम ॥ ३२—३३ ॥

आगन्तुज्वरनिदानान्याह अभिघातेति। अभिघात: यष्टीपाषाणादिभि: यैर्वा शरीरमभिहतं भवति सर्वाण्येव तानि अभिघातशब्देन गृह्यन्ते। अभिषंगस्तु मनोऽभिघातकर: तेन कामादीनां भूतादीनाञ्च परिग्रहो भवति। अभिचारस्तु परशरीरानिष्टकारी वैदिकस्तान्त्रिको वा प्रयोगविशेष:। अभिशापस्तु गुरुवृद्धसिद्धाचार्याणामतिक्रमात् तैरमङ्गलाशंसनम्। एतान्येव चत्वारि आगन्तुज्वरनिदानानि भवन्ति। व्यथा शारीरी मानसी वा पीडा

पूर्वं पूर्वरूपं यत्र तद्यथा स्यात्तथा । सर्वेषामेषां व्यथापूर्वत्वेनैव एकत्वं तेन न नवमात्वापत्तिः स्यात् । ननु कान्यस्य लक्षणानि इत्याकांक्षायां तत्र प्राक् पृथङ्निदानस्यास्य पृथङ् मनःशरीरसम्भवा पीडा भवति पश्चाच्च दोषलक्षणानि भवन्तीति प्रतिपादयन्नाह स इति । किञ्चित् कालं स्वल्पं कालम् । केवलः अन्येनासंसृष्टः दोषासंसृष्ट इत्यर्थः । चतुर्विधनिदानोत्पन्नानामागन्तूनां पृथग् दोषसंसर्गं दर्शयति तत्राभिघातज इति । ननु दोषलक्षणानि चेत् तत्र भवेत तर्हि तस्य किन्नाम वैशिष्ट्यं निजाद् व्याधेरित्याह स इति । निदानवैशिष्ट्यात् लिंगवैशिष्ट्यात् उपक्रमवैशिष्ट्याच्च स भिन्न एव मन्तव्य इत्यर्थः । तत्रोपक्रम-वैशिष्ट्यं दर्शयति कर्मणेति । साधारणेन युक्तिव्यपाश्रयेण दैवव्यपाश्रयेण चेत्यर्थः । उपसंहरति इत्यष्टविधेति ॥ ३४—३६ ॥

भेदप्रकृत्यन्तरेण ज्वरभेदान् विवृण्वन् सन्तापलक्षणत्वेन सर्वज्वराणा-मेकत्वं भवतीत्याह ज्वर इति । अभिप्रायविशेषात् शीताभिप्रायित्वेन उष्णाभि-प्रायित्वेन च पुनश्च निजागन्तुविशेषाच्च ज्वरं द्विविधमाचक्षते । निजः दोष-जोऽपि द्विविधः पृथङ्मिश्रदोषाभ्यां, त्रिविधः त्रिदोषभेदेन, चतुर्विधस्तु वातादिपृथगदोषेण त्रिविधः सन्निपातश्चैक इति । सप्तविधश्च त्रिविध एकदोषजः त्रिविधो द्वन्द्वजः एकश्च सान्निपातिक इति ॥ ३७ ॥

सर्वज्वराणां सामान्यतः पूर्वरूपाण्याह तस्येमानीति । पूर्वरूपाण्येतानि दोषजज्वरस्य । आगन्तोस्तु व्यथैव पूर्वरूपत्वेन निर्दिष्टा तत्रैव । अनन्नाभिलाषः क्षुधाया अभावः, अरोचकस्तु खाद्ये रुच्यभावः न खाद्यं स्वदते इत्यर्थः । अंगमर्दः गात्रमोटनम । अल्पप्राणता ह्रस्वोच्छ्वासता दीर्घसूत्रता चिरात् कर्मकरणम् । उचितस्य अभ्यस्तस्य । प्रतीपता प्रतिकूलता । अभ्यसूया दोषदर्शनम् । परिक्लेशनं क्लेशबोधः । सन्तापात् सन्तापलक्षणाज् ज्वरात् प्राक् पूर्वमेवैतानि भवन्ति इति योजना । अपिच पक्षान्तरे इमानि एनं सन्तापार्त ज्वरागमनात् पश्चादपि अनुबध्नन्ति अधितिष्ठन्तीत्यर्थः । उपसंहरति इत्येता-नीति । विस्तरसमासाभ्यामिति अत्र एकदोषजानां विस्तरेण द्वन्द्वसन्निपातानां समासेनेत्यर्थः ॥ ३८—३६ ॥

ज्वरस्य सर्वरोगेषु प्राधान्यमाह ज्वरस्त्विति । महेश्वरकोपप्रभवत्वे-नास्य दारुणत्वं ज्ञेयम् । सर्वप्राणिनामिति न केवलं मनुष्याणां पशुपक्षिणा-मपि । तेषां ज्वरस्तु प्राणहर एव भवति यदुक्तं सुश्रुते—

"ऋते देवमनुष्येभ्यो नान्यो विषहते तु तम ।
.....

शेषाः सर्वे विपद्यन्ते तैर्यग्योना ज्वरार्दिताः" इति ।

नानातिर्यग्योनिषु पशुपक्ष्यादिषु । बहुविधैः शब्दैः नामभिः । तन्त्रान्तरे तानि नामान्याह यथा—

"पाकजः स तु नागानामभितापस्तु वाजिनाम ।
गवामीश्वरसंज्ञश्च मानवानां ज्वरो मतः ॥

अजावीनां प्रलापाख्यः करभेषु मृगेषु च।
पक्षिणामभिघातस्तु मत्स्ये चेन्द्रमदो मतः।
पक्षपातः पतंगानां व्यालेष्वक्षिकसंज्ञकः ॥" इति।

प्राधान्ये पुनश्च हेत्वन्तरं दर्शयति सर्वे इति। ननु जायमाना म्रियमाणाश्च सर्वे न सर्वत्र ज्वरेणाक्रान्ता भवन्ति तथा सति जात एव सन्ताने सर्व एव तत्र ज्वरप्रत्यनीकां क्रियां कर्तुं प्रायतिष्यन् न तु तत्तथेत्याह स इति। महामोहः गुरुतमबुद्धिविभ्रंशः। प्राग्दैहिकं जन्मान्तरीयम्। तस्मिन् महामोहे प्रवेश एव प्राणिनां मरणमित्याह सर्वेति ॥ ४० ॥

निखिलेन ज्वरनिदानं व्याख्याय पूर्वोद्दिष्टं चिकित्सासूत्रं विवृणोति तत्र पूर्वरूपेति। अपतर्पणं लङ्घनमित्यनर्थान्तरम्। बहुदोषे लंघनं स्वल्पे तु लघ्वशनम्। ततस्तु तरुणज्वरक्रमान् वक्ति ततः कषायेति। यथास्वं तत्तद्दोषानुबन्धमभिसमीक्ष्येत्यर्थः। जीर्णज्वरक्रममाह जीर्णज्वरेष्विति। अग्निमन्थेषु अग्न्याक्रान्तेषु। अर्थमिमं पुनः पद्येन उक्त्वा द्रढयति भवन्ति चात्रेति। घृतस्य त्रिदोषापहत्वं दर्शयति स्नेहादिति। ननु संस्कारात् कथं तत्सामान्यं कफं ह्रसयतीत्याह नान्य इति। ननु पूर्वोक्तमर्थं पुनः पद्याकारेणोल्लिखन् आचार्यः पुनरुक्तिदोषभाग् भवतीत्याह पूर्वोक्त इति। निगदव्याख्यातमन्यत् ॥ ४१—४६ ॥

अध्यायं समापयति तत्र श्लोका इत्यादिनाध्यायार्थं निवेद्य ॥ ४७—४९ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां निदानस्थाने ज्वरनिदानं नाम प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

वक्ष्यति हि "ज्वरसन्तापाद् रक्तपित्तमुदीर्यते। रक्तपित्ताज्ज्वरः" इति एवं ज्वररक्तपित्तयोरन्योन्याश्रयित्वात् पुनश्च प्राग् ज्वरमनु प्रादुर्भावाज्ज्वरनिदानानन्तरं रक्तपित्तनिदानं व्याख्यातुमारिरिप्सुरध्यान्तरमारभते अथात इत्यादिना। तत्र पित्तस्य रक्तपित्तसंज्ञा कथं भवतीति वक्तुं प्रतिजानीते पित्तमिति। यथाभूतं यादृगवस्थम् ॥ १-३ ॥

तत्रादौ रक्तपित्तनिदानान्याह यदा जन्तुरिति। यवको वन्ययवः उद्दालकः कोद्रवः। कोरदुषः कंगुः। निष्पावाः शिम्बीजातीयाः। कट्वरस्तक्रभेदः। आविकं मेषभवम्। सुमुखसुरसकुठेरककालमालकपर्णासफणिज्झकाः तुलसीभेदाः। उपदंशः "चाटनी" इति भाषा। मेदकमधुलकौ काञ्जिकभेदौ। कुवलो बृहद्बदरः। अतिवेलं वेलां सीमामतिक्रम्य भृशमित्यर्थः। रोहिणीकं शाकभेदः। काणकपोतः 'घुघु' इति भाषा। शौक्तिकैः शुक्तनिर्मितैः काञ्जिकवटकादिभिः। लोहितं रक्तम्। स्वप्रमाणं यादृशि शरीरे यावत्प्रमाणं रक्तं स्थातव्यं तच्च स्वाञ्जलिप्रमाणेनाष्टाञ्जलिमानमित्यर्थः। अतिवर्तते

अतिक्रम्य वर्तते ततोऽधिकं भवतीत्याशयः । तेन च शिरासु रक्तभारबाहुल्यं भवतीति ज्ञेयम् । प्रमाणातिवृत्ते तस्मिन् रक्ते अधिकरणे तत्समानतया तेन सह संमिश्र्येत्यर्थः । प्रकुपितं पित्तं सर्वशरीरमनुसर्पत् सर्वशरीरपोषकान्नरसवहनायेत्यर्थः । यदैव यस्मिन् काले यकृत्प्लीहप्रभवाणां यकृत्प्लीहभ्यां निर्गतानां लोहितानां स्रोतसां शिराणामित्यर्थः । मुखानि प्रवेशनिर्गमवर्त्मानि । किम्भूतानि लोहिताभिष्यदेन प्रमाणातिरिक्तरक्तगमनेन गुरूणि ईषद्विस्फारितानीत्यर्थः । आसाद्य प्रतिरुन्ध्यात् प्रतिरुद्धानि कुर्यात् । वर्त्मनां क्रमशः सूक्ष्मत्वेन रक्तप्रमाणाधिक्येन चेत्यर्थः । तदैव लोहितं दूषयति शिरां विदार्य रक्तपित्तं जनयतीत्यर्थः । रक्तभाराधिक्यात् शिराणां विस्फारितत्वात् पित्तस्य चौष्ण्यात् विदारणं युज्यत एव । निगमयति संसर्गादिति । संसर्गात् रक्तसंसर्गात् पित्तं रक्तपित्तमाचक्षते इति योजना । ननु रक्ते पित्तसंसर्गः सदैव वर्तते एव तदुपादानत्वात् यदुक्तं वृद्धवाग्भटे—"असृक्स्वेदयोः पित्तम्" इति अतो हेत्वन्तरमाह लोहितप्रदूषणादिति । ननु प्रायः सर्वत्रैव रक्तजे व्याधौ पित्तेन रक्तदूषणं वर्तत एवेति हेत्वन्तरमाह लोहितगन्धवर्णानुविधानाच्चेति । रक्तस्य गन्धवर्णाभ्यामेवात्र पित्तं युज्यत इत्यस्य रक्तपित्तसंज्ञा । अतएव रक्तपित्तोक्तं रक्तं न शोणितपैर्जीवैरुपभुज्यते भृशं कटुत्वात् ॥ ४-५ ॥

तस्य पूर्वरूपाण्याह तस्येति । शुक्ताम्लं काञ्जिकाम्लम् । छर्दितस्य वमितस्य द्रव्यस्य । बीभत्सता न्यक्कारजनकता । सिंघाणकं नासामलम् । पिच्चडिका नेत्रोपदेहः । अर्चिष्मतां ज्योतिष्मताम् । अभीक्ष्णं प्रायशः । तस्योपद्रवानाह उपद्रवास्त्विति । तस्य रूपाण्याह मार्गाविति । मार्गौ रक्तपित्तस्य बहिर्निर्गमणपन्थानौ । दोषानुबन्धभेदात् पृथङ् मार्गाभ्यां निर्गच्छतीत्याह तद् बहुश्लेष्मणीति । बहुश्लेष्मणि शरीरे आमाशय एव सञ्चयो भवति तेनास्य ऊर्ध्वद्वारेभ्यः निर्गमनं, बहुवाते च पक्वाशये, तेनाधोद्वाराभ्यामित्यर्थः । यदुक्तं सुश्रुते—

"आमाशयाद्व्रजेदूर्ध्वमधः पक्वाशयाद्व्रजेत् ।
विदग्धयोर्द्वयोश्चापि द्विधा मार्गं प्रवर्तते ॥इति उ० ४५ अ०॥

यथोक्तेभ्यः खेभ्यः शरीरस्य सर्वच्छिद्रेभ्यः रोमकूपादिभ्यः । यदुक्तं वृद्धवाग्भटेन—"कुपितं रोमकूपेभ्य समस्तैस्तत् प्रवर्तते ।" इति (नि० ३ अ०) सहेतुकमस्य साध्यासाध्यत्वं विवेचयति तत्र यदिति ॥ ८-९ ॥

तस्य विप्रकृष्टनिदानमाह रक्तपित्तेति । रुद्रकोपामर्षाग्निना रुद्रस्य रौद्रभावेनावस्थितस्य महादेवस्य कोपः नेत्रलौहित्यादेर्हेतुश्चित्तविकारः अमर्षो अक्षमा तौ प्रभवौ यस्य तेनाग्निना तेजःपदार्थेन परिगता व्याप्ताः शरीरं प्राणाश्च येषां प्राणिनाम् । ज्वरमनु ज्वराविर्भावस्य पश्चादित्यर्थः । तस्य समासतः क्रियासूत्रमाह तस्येति । आशुकारिणः आश्वेव प्राणघातकस्येत्यर्थः ॥ १०-११ ॥

पुनश्च पद्यैरूर्ध्वगस्य साध्यत्वं प्रतिपादयति साध्यमिति । अनधमं

न निकृष्टतमम्। अधोगस्य पुनर्याप्यत्वे हेत्वन्तरं दर्शयति रक्तं तु यदिति। वमनस्याल्पयोगित्वात् पित्ते अयोगित्वाच्च। वमनस्येति हेतुद्वयस्यैव विवृतिमाह वमनं हीत्याहिना। अवरं निकृष्टमयौगिकमित्यर्थः। भेषजस्यापि अल्पत्वं दर्शयति तच्चेति। वातानुबन्धे पित्ते कषायं तिक्तञ्च अयोगवाहमयौगिकमिति भेषजस्याल्पत्वम्। अनुलोमगमधोगम्॥ १२-१७॥

उभयमार्गस्यासाध्यतां दर्शयति रक्तपित्तमिति। प्रतिमार्गगं विपरीतमार्गे गच्छतीत्यर्थः। हरणं संशोधनम्। ननु संशोधनाभावेऽपि संशमनमस्तु नेत्याह एवमेवेति। सर्वजित् शमनं सर्वदोषप्रशमनम्। त्रिविधोदर्कं त्रिविधभाविफलम् साध्ययाप्यासाध्यतारूपं यस्य तत्। मार्गविशेषतः ऊर्ध्वादिरक्तपित्तनिर्गममार्गभेदात्॥ १८-२१॥

ननूर्ध्वगस्य साध्यत्वान्नेदं दारुणं भवति इति शंकामपाकुर्वन् साध्यानामपि रोगाणां कारणवशादसाध्यत्वं प्रतिपादयन् साध्येऽपि तत्रासाध्यता स्यादिति दर्शयति एभ्य इति। प्रेष्योपकरणाभावात् परिचारकस्य भेषजस्य चाभावात्। अकर्मतः अचिकित्सातः कुचिकित्सिताद्वा। साध्यतामतिक्रम्य असाध्यतामेति। तत्र तस्मिन् साध्येऽपि रक्तपित्ते पूर्वोक्तात् कारणात् साध्ययाप्यपरिक्रमात् साध्यपरिणामाद् याप्यत्वं याप्यपरिणामाच्च असाध्यत्वं स्यात्। प्रागुत्पन्नमूर्ध्वगमचिकित्सावशादधोगं भूत्वा याप्यतामेति, तत्राप्यकर्मतः उभयमार्गगं सदसाध्यतां गच्छति। यथा हि नेत्रगतं तिमिरं साध्यमपि याप्यः काचो भवति ततश्चासाध्यो लिंगनाशः तद्वद् रक्तपित्तमपि एवंपरिक्रमेण गच्छतीत्याशयः। तस्य तथैव परिणतस्य असाध्यस्य रक्तपित्तस्य लक्षणानि वक्तुमुपक्रमते रक्तपित्तस्येति। शक्रधनुःप्रभं नानावर्णरञ्जितम्। वाससो रञ्जनं जलेन धौतेऽपि येन रक्तपित्तेन सिक्ते वाससि रक्तिमा न विलीयते तदित्यर्थः। तच्च रक्तं रक्तपित्तमसिद्धिमद् असाध्यम्। पुनश्चाह येनेति। येन रक्तपित्तेन उपहतो मानवः दृश्यं दर्शनेन्द्रियग्राह्यं वस्तुजातं वियत् आकाशञ्च रक्तं रक्तवर्णं पश्येत इति योजना। उपसंहरति तत्रासाध्यमिति। अवहितः सावधानः सन्॥ २१-२७॥

अध्यायार्थं निवेद्य तं समापयति तत्र श्लोकाविति॥ २८-२९॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां निदानस्थाने रक्तपित्तनिदानं नाम द्वितीयोऽध्यायः॥ २॥

तृतीयोऽध्यायः।

"तस्मिन् हि दक्षाध्वरध्वंसे देहिनां नानादिक्षु विद्रवतामभिद्रवतां तरणधावनलंघनप्लवनाद्यैर्देहविक्षोभणैः पुरा गुल्मोत्पत्तिरभूत" इत्यनागतावेक्षणाद् रक्तपित्तमनु गुल्मोत्पत्तेः रक्तपित्तनिदानान्तरं गुल्मनिदानं व्याचिख्यासुराचार्योऽध्यायान्तरमारभते अथात इत्यादिना। तत्र संख्यातं गुल्मभेदानाह इह खल्विति। इह अस्मिन् संसारे। निचयगुल्मस्तु त्रिदोष-

जत्वेन। तत्र शिष्यप्रश्नमाह एवंवादिनमिति। विशेषं वैशेष्यं पार्थक्यमिति यावत्। अविशेषवित् विशेषान् पारस्परिकभेदान् न वेत्तीत्यर्थः। उत्तरयति तमुवाचेति। समुत्थानादिवैशेष्यादेव व्याधिवैशेष्यं भवतीत्याह समुत्थानेति। समुत्थानं निदानम्। लिंगवेदनयोर्लिंगत्वसामान्येऽपि वेदनाप्रधानव्याधीनां वेदना अपि वाच्या भवन्तीति पृथगुल्लेखः। नन्वत्र स प्रकुपित इत्यादिना संप्राप्तिरपि कथ्यते इति कथं न तस्या उद्देशः कृतः इति चेदुच्यते। पृथग् व्याधीनां त्रिदोषजत्वेऽपि संप्राप्तिभेदाद् व्याधिभेदो भवतीति व्याधिवैशेष्ये सम्प्राप्तिवैशेष्यस्य सत्यपि हेतुत्वे न खलु एकस्यैव दोषभेदेन सञ्जाते वैशेष्ये सम्प्राप्तिवैशेष्यं भवतीति तस्योद्देशेऽनुल्लेखो न दोषावहो भवति। अत्र गुल्मानां विशेषविज्ञाने समुत्थानादीनामेव वैशेष्यज्ञानं प्रयोजनंमिति भावः॥ १-५॥

तत्र वातगुल्मनिदानान्याह यदेति। विशेषेण इति कथनाद् वातलस्य वातप्रकोपो यथा निदानसेवया त्वरितं भवति, न तथा पित्तलादेरिति सूचयति। ज्वरादिभिः कर्शनैः कोष्ठगतयोः पित्तकफयोः क्षयात् कोष्ठ एव वाताधिक्यं कोष्ठगतगुल्मव्याधेर्निदानं भवितुमर्हति। सर्वत्रैव गुल्मे वायोः कर्तृत्वं वर्तते इति सर्वगुल्मानां निदानमिदं सामान्यं भवति। वातलमाहारमितरयोरपेक्ष्याधिकवातोत्पादकं कटुतिक्तकषायादिकमित्यर्थः। शीतमिति स्पर्शतः शीतं वीर्यतश्च शीतमित्यर्थः। अस्नेहपूर्वं न स्नेहयित्वेत्यर्थः। नवोदकं वार्षिकमुदकम्। अभिघातं कोष्ठे इति शेषः। अति संक्षोभिणा हस्त्यश्वादिना। अतिव्यवायादेः रुचिवशात्तेषां करणमेवात्राभिधीयते॥ ६॥

तस्य संप्राप्तिपूर्वकौ रूपोपशयावाह स प्रकुपित इति। महास्रोतः कोष्ठम्। सौक्ष्म्याद् आप्लुत्य संहत्य कठिनीभूतः घनीभूतः पिण्डितः संघातरूपेण हृदयादिस्थाने अवस्थानं करोति। अत्र हृदि हृद्यवस्थानप्रदेशे वक्षसि कोष्ठोर्ध्वप्रदेशे इत्यर्थः। वस्तौ वस्त्यवस्थाने कोष्ठाध इत्यर्थः। नाभ्यां कोष्ठमध्यप्रदेशे पार्श्वयोश्च कोष्ठपार्श्वयोरित्यर्थः। तेन च वातगुल्मस्य समग्रमेव कोष्ठं स्थानं ज्ञेयम्। एवं सचलत्वात् सर्वस्थानगोऽपि भवति। यत्र यत्र गुल्मोत्पत्तिर्भवति तत्र तत्र सशूलान नानाविधाकारान् ग्रन्थीन् स्पर्शलभ्यानुत्पादयतीत्याह सशूलमिति। व्याधावस्मिन् ये ग्रन्थयो जायन्ते प्रायो गोलाकारा भवन्ति इत्याह पिण्डित इति। पिण्डितः पिण्डवद् गोल इत्यर्थः। वर्तुलार्थकस्य गुडशब्दस्य मक्प्रत्ययेन निष्पन्नत्वादस्य निरुक्तिमाह पिण्डितत्वाद् वर्तुलत्वादित्यर्थः। आधमति विस्फारितो भवति। अणुत्वं क्षुद्रत्वम्। अनियता अनिश्चिता विपुला च अरुणी च वेदना यत्र तादृशः। तोदादीनां प्रलयोदयबहुलः कदाचित् तोदादयः प्रादुर्भवन्ति कदाचिद्वा विलीयन्ते अनियमेनेत्यर्थः। सुप्तिः स्पर्शज्ञानाभावः। शंकुः सुतीक्ष्णाग्रः कीलः। दिवसान्ते सायं जीर्यति * अन्नजरणस्य तृतीये अवस्थापाके इत्यर्थः। वेद-

* 'आप च दिवसान्ते जीर्यात' इति पाठोऽत्र दृतः।

नाया: प्रादुर्भावे आस्यमस्य शुष्यति उच्छ्वासश्चोपरुध्यते रोमाणि च हृष्यन्ति इति योजना। प्लीहादयोऽस्योपद्रवा भवन्तीत्याह प्लीहेति। ब्रध्नरोगश्च तन्त्रान्तरोक्तलक्षणो यथा—

"अत्यभिष्यन्दिगुर्वन्नसेवनान्निचयं गतः।
करोति ग्रन्थिवच्छोथं दोषो वंक्षणसन्धिषु॥
ज्वरशूलांगदाहाढ्यं तं ब्रध्नमिति निर्दिशेत्॥" इति।

उपशयस्यानुपशयमुखेन वक्ति निदानोक्तानीति॥ ७॥

पित्तगुल्ममाह तैरेवेति। व्यापन्नमद्यं दुष्टमद्यम्। अतिवेलं मात्रातिरिक्तम्। सन्धारणं मलमूत्रादिवेगानाम्। आमाशयैकदेशे नाभ्यां कोष्ठमध्यभागे तत्रैव पित्तस्थानत्वात्। संमूर्च्छ्य पिण्डितं कृत्वा। कफगुल्ममाह तैरेवेति। अतिसूहितस्य अतितृप्तस्य। अतिप्रगाढमतिप्रमाणम्। संक्षोभणात् यानयानादिना। अत्र आमाशयैकदेशे आमाशयस्योर्ध्वभागे संमूर्च्छ्य संवर्त्य। अवगाढसुप्तता अत्यर्थस्पर्शज्ञानहीनता। निचयगुल्ममाह त्रिदोषेति। विप्रतिसिद्धोपक्रमत्वञ्चास्य प्रत्याख्येयत्वेन दारुणत्वेन च बोध्यम्॥८-११॥

पारिशेष्यात् शोणितगुल्मनिदानमाह शोणितेति। एवकारोऽयं तुकारार्थः। कथं पुरुषस्य न भवतीत्याह गर्भेति। गर्भकोष्ठः गर्भाशयः आर्तवागमनं मासि मासि ऋतुशोणितस्रावः तयोर्वैशेष्यात्। न खलु पुरुषस्य द्वयमेतद् वर्तते। पारतन्त्र्यात् पराधीनत्वात्। अवैशारद्यादज्ञानात्। सततमुपचारानुरोधात् कर्मव्यापृतत्वात्। वेगानत्र वातमूत्रपुरीषाणामेवेति ज्ञेयम्। अचिरात् पतिते आमगर्भे गर्भपातानन्तरमेव। ऋतौ ऋतुशोणितप्रवृत्तिकाले चतुरहाभ्यन्तरे इत्याशयः। योनिमुखमिति योनिमुखशब्दोऽत्र तस्यास्तृतीयावर्त्तपरः गर्भशय्या इत्यर्थः। योनेस्तृतीयावर्तस्य गर्भशय्यात्वेन प्राधान्यात् प्रधानार्थकोऽयं मुखशब्दः। तत एव पुरातनगर्भशय्याभेदनात् शोणितस्रावो भवति। ततश्च तत्र नवीना गर्भशय्या उत्पद्यते। अतो वातविकृतिवशाद् गर्भानुत्पत्तावपि सैव गर्भशय्या शोणितेन पोष्यमाणा स्फीता सती गुल्मत्वमेति। एवं तद्वर्धनात् गृहीतगर्भाया इवास्याः कुक्षिरपि वर्धते। पुनश्च तस्याः शूलादयो भवन्ति। स्तनयोश्च स्तन्यमित्यादिभिः उपजायते इत्यन्वयः। स्तनमण्डलयोः स्तनचूचुकयोः। चक्षुषोरित्यर्थं ग्लानिः कोटरप्रविष्टता। दोहदोऽत्र आपन्नसत्त्वाया इव नानाविषयिणी इच्छा। रोमराज्याः योनिरोमान्तादारभ्य नाभिं यावत् या रोमरेखा वर्तते तस्या ईषदुद्गमः। चाटालत्वं विस्तृत्वं योनेर्भगस्य। अयं शोणितगुल्मोऽपि स्पन्दते। किन्तु केवलः कृत्स्नः पिण्डित एव। नत्वंगप्रत्यंगैर्गर्भवत्। एवकारोऽत्र सादृश्ये। सुश्रुतेऽप्यस्येषत्स्पन्दनमुक्तम, यथा—

"न स्पन्दते नोदरमेति वृद्धिं भवन्ति लिंगानि च गर्भिणीनाम्"
इति। अत्र न स्पन्दते इति न, तेनेषत्स्पन्दनं सूच्यते। अत्र गर्भिणीना
कतिपयेषु लक्षणेषु सञ्जातेष्वपि बहुतरगर्भविरुद्धलक्षणसमावेशात् न तत्र

गर्भशंका पण्डितानां भवतीत्याह तामगर्भामिति । गर्भिणीलक्षणन्तु वक्ष्यते-ऽत्र "आर्तवादर्शनमास्यस्रवणमनन्नाभिलाषः छर्दिररोचकोऽम्लकामता च विशेषेण श्रद्धाप्रणयनमुच्चावचेषु भावेषु गुरुगात्रत्वं चक्षुषोर्ग्लानिः स्तनयोः स्तन्यमोष्ठयोः स्तनमण्डलयोश्च काष्ण्यमत्यर्थं श्वयथुः पादयोरीषद्-रोमराज्युद्गमः योन्याश्चाटालत्वमिति (शा० ४ अ०) ॥ १३-१४ ॥

गुल्मानां तेषां पूर्वरूपाण्याह एषामिति । अभिनिर्वृत्तेरुत्पत्तेः । अनन्नाभिलषणं क्षुद्बोधाभावः । अरोचकस्तु आहारस्य स्वादविकृत्यनुभवाद् रुचेरभावः । अग्निवैषम्यन्तु कदाचिद् यथावत् परिपाकात् कदाचिद्वाऽपरिपाकाद् भुक्तस्य ज्ञेयम् । भुक्तस्य विदाहः पाककाले आधिक्येनाम्लपरिणतिरित्यर्थः । अयुक्त्या अकारणतः । आटोपो गुडगुडाशब्दः । अन्त्रकूजनन्तु वंशीशब्दस्येव । परिहर्षणं लोम्नाम् । अतिवृत्तपुरीषता छागपुरीषवदित्यर्थः । सौहित्यस्य आतृप्तितो भोजनस्य असहत्वम् कोष्ठे दोषसञ्चयेन स्थानाल्पत्वादित्यर्थः ॥ १५ ॥

सर्वेष्वेव गुल्मेषु वातस्य प्राधान्यमाह सर्वेष्विति । चिकित्सासूत्रं विवक्षुः प्राक् सन्निपातजस्योपक्रमं प्रतिषिध्यति तेषामिति । यथास्वं तत्तद्दोषप्रत्यनीकम् । संसृष्टान द्वन्द्वजान । साधारणेन उभयप्रत्यनीकेन । तदुपद्रवचिकित्सासूत्रमाह तदवचारयेदिति । इतरान् न गुरून् जघन्यं पश्चात् चिकित्सेदित्यन्वयः । आत्ययिकगुल्मक्रममाह त्वरमाण इति । विशेषमनुपलभमानः गुल्मोऽयं कस्मिन् भेदेऽन्तर्भवतीति ज्ञानाभावे इत्यर्थः । वस्तीनिति त्रिविधान् निरूहानुवासनोत्तरवस्तीनित्यर्थः । शोणितगुल्मे उत्तरवस्तिप्रयोगो भवत्येव । नियन्तुं जेतुम् । अर्थमेनं पुनः पद्येनाह भवति चात्रेति । निर्गलितार्थमन्यत् ॥ १६-१८ ॥

अध्यायार्थं निवेद्याध्यायं समापयति तत्र श्लोक इति ॥ १९ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां निदानस्थाने गुल्मनिदानं नाम तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः ।

तस्मिन् हि दक्षाध्वरध्वंसे गुल्मानन्तरं हविःप्राशात् प्रमेहकुष्ठयोरुत्पत्तिरभूदित्यानन्तर्यमुपजीव्य गुल्मनिदानान्तरं प्रमेहनिदानमारभते अथातइत्यादिना । प्रमेहनिदानं विवक्षुरादौ तस्य निदानं सम्प्राप्तिभेदञ्च प्रतिजानीते त्रिदोषेति । विंशतिविधाः प्रमेहाः तथा चापरे सर्व एवापरिसंख्येयाः व्याधयस्त्रिदोषप्रकोपनिमित्ता एव भवन्ति । यथा ह्येकेनैव त्रिदोषेण शरीरे नानाव्याधयो जायन्ते तथैव तेषां त्रित्वेऽपि ततो विंशतिप्रमेहाणामुत्पत्तिर्नासमीचीना भवतीत्याशयः । अथ त्रिभिर्दोषैरुत्पन्नस्य प्रमेहस्य विंशतित्वं सिसाधयिषुरादौ सर्वव्याधीनां त्रिदोषनिमित्तत्वेऽपि न केवलं तैरेव व्याध्युत्पत्तिर्भवतीति कारणसमष्टेरेव व्याध्युत्पादकत्वं प्रतिपिपा-

दयिषुरन्वयव्यतिरेकेण व्याधीनां भावाभावभाववैशेष्यं दर्शयति इह खल्विति । निदानेति व्याधीनामेतानि त्रीणि कारणानि यथा निदानानि दोषा: दुष्याश्चेति । तेषां वैशेष्येभ्यो विकाराणां विघातभाववैशेष्यं साकल्ये नानुत्पत्तिश्चिरेण वाभिनिर्वृत्ति: तनुतया वाभिनिर्वृत्तिश्चेति त्रिविधा विशेषा भवन्ति । पुनश्च तेषां विघाताभावस्य उत्पत्तेरपि वैशेष्यं तथैव भवति यथा अतिबलत्वेनोत्पत्ति: पृथक्स्थानत्वेन पृथक्सम्प्राप्तितो वा इत्यादिनाना-वैशेष्यं भवतीत्यर्थ: । अर्थमेनं स्वल्पेनोदाहरणेन विस्पष्टीकर्तुमादौ विघात-भावविशेषान् विवृणोति यदा ह्येते इति । एते निदानदोषदुष्या: परस्परं नानुबध्नन्ति न परस्परं संसर्गमापद्यन्ते तदा न विकाराभिनिर्वृत्ति: साकल्येन भवतीति शेष: । अथवा कालप्रकर्षाद् लब्धबलास्ते परस्परमनु-बध्नन्ति तदा चिरादभिनिर्वर्तन्ते व्याधय इति शेष: । अथवा यदा अल्पीयांस-स्ते परस्परमनुबध्नन्ति तदा अयथोक्तसर्वलिंगा तनवो भवन्ति व्याधय-इति शेष: । विघातभावविशेषान् उदाहृत्य विघाताभावविशेषान् समासतो वक्ति विपर्यये इति । विपर्यये एतद्विपरीते निदानादीनां परस्परानुबन्धे त्वरितमनुबन्धे बलवतां वा तेषामनुबन्धे इत्यर्थ: । विपरीता इति यथोक्त-विकारागम: त्वरितागम: बलवतां यथोक्तसर्वलिंगानां च विकाराणामागम इत्यर्थ: । इति प्रकरणोपसंहारे ॥ १-५ ॥

एवं सर्वव्याधीनां निदानादिविशेषानुक्त्वा प्रस्तुतप्रमेहनिदानादिषु वक्तव्येषु साध्यत्वेन समानधर्मित्वेन च प्राक् श्लैष्मिकप्रमेहस्य निदानादी-न्याह तत्रेमे इति । तत्र हायनयवकनैषधप्रमोदकसुगन्धका: शालिधान्य-विशेषा: । चीनकोद्दालकौ षष्टिकधान्यविशेषौ । इक्षुकटमुकुन्दकमहाव्रीहयस्तु व्रीहिधान्यविशेषा: । अतिवेलं वेलां सीमामतिक्रम्येत्यर्थ: । मन्दकं दधि पर्युषितं दधि । मृजावर्जनं स्नानादिराहित्येन । प्रसंग: अभ्यास: । निदाना-न्युक्त्वा दोषमाह बहुद्रव इति । निराम: श्लेष्मा द्रव: पिण्डितो वा भवति । तत्र तस्य बहुत्वं द्रवत्वञ्च प्रमेहजनने हेतुर्भवति । यदुक्तं वृद्धवाग्भटे— "श्लेष्माच्छ: पिण्डितोऽथवा । विशदश्च सफेनश्च धवलो मधुरो रसे ॥" इति । (सू० २१ अ०) दूष्यानाह बह्वबद्धमिति । अबद्धं शिथिलीभूतम् इति सर्वत्र मेदआदिना सम्बध्यते । ओज:संख्यात: ओजस्त्वेन परिगणितो रस: श्लेष्मलमोज: इत्यर्थ: ॥ ६-८ ॥

अथ श्लैष्मिकप्रमेहस्य संप्राप्तिमाह त्रयाणामिति । सन्निपाते मेलने सति । यस्य प्रमेहस्य यो दोष: कर्ता यच्च दूष्यं यद्वा निदानं तेषां नत्वन्ये-षामित्याह निदानादिविशेषाणामिति । तत्र हायनकादिनिदानविशेषाद् यथा दोषेषु श्लेष्मण एव वृद्धि: स्यात् तथैव दूष्येष्वपि मेदो मांसं शरीरज-क्लेद: शुक्रञ्च वर्धितं भवेत् नत्वन्ये । अत: श्लेश्मप्रमेहेषु एत एव प्राधान्येन दूष्या: भवन्ति । प्राक् प्रथमत: श्लेष्मण एव प्रकोपो भवति तथा निदाना-भ्यासेन तस्यैव अतिभूयस्त्वात् । स श्लेष्मा प्रकुपित: ततोऽन्नरसान्तर्गत:

सर्वशरीरे विसृप्तिं लभते। व्यायामाद्यभावात् तस्य शरीरशैथिल्यं मेदसश्चाधिक्यं भवति। स च कफप्रधानोऽन्नरसः आधिक्येन समानगुणेन प्राक् बहुना शरीरबद्धेन मेदसैव मिश्रितो भवति तदुपादानत्वेनेत्याशयः। यदुक्तं वृद्धवाग्भटे—"तत्रास्थनि स्थितो वायुः असृक्स्वेदयोः पित्तं शेषेषु च श्लेष्मा" इति (सू० १६ अ०) वातादिभिरेव सप्त धातवः पुष्टा भवन्तीत्यायुर्वेदसमयः। यदुक्तं वृद्धजीवकीये—"वातादीनां धातूनामन्ये धातव आप्यायिताः भवन्ति" इति, अतएव कफस्य मेदसा मिश्रीभावो युज्यते नान्यथा। अतो विकृतकफेन पुष्टं मेदोऽपि विकृतं भवति इत्याह स मेदसेति। ततो विकृतः कफः विकृतमेदोयुक्तः शरीरक्लेदेन किट्टेन खाद्यस्यासारांशेनेत्यर्थः। मांसेन च यदा संसर्गमेति तदा मांसं सन्दुष्य तत्र पीडकादीन् जनयति क्लेदञ्च मूत्रत्वेन परिणामयति। एवं तस्मिन् मूत्रे श्लेष्मगुणानामेवाधिक्यमुपलभ्यते। कथंकारं मूत्रत्वेन परिणामयतीत्याह मूत्रवहाणामिति। तथाविधः कफः वंक्षणवस्तिप्रभवाणां मूत्रवहाणां स्रोतसामिति वंक्षणप्रभवे वंक्षणदेशगते द्वे स्थूले मूत्रवहस्रोतसी तयोः, वस्तिप्रभवाणां वस्तिशिरोगतानाञ्च सूक्ष्मस्रोतसामित्यर्थः। यद्वक्ष्यति "मूत्रवहाणां स्रोतसां वस्तिर्मूलं वंक्षणौ च" इति। (वि० ५ अ०)। तत्र सूक्ष्माणां वस्तिर्मूलं स्थूलयोश्च वंक्षणौ मूलं तदधिष्ठितत्वात् ज्ञातव्यम्। तेषां मुखानि सरणावर्त्मानि। तानि किम्भूतानि मेदःक्लेदोपहितानि दुष्टमेदसा दुष्टक्लेदेन च युक्तानि अतएव गुरूणि। आसाद्य मूत्रत्वेन परिणामयति। ततः स कफः तत्र प्रतिरुध्यते गत्वावतिष्ठते। पुनश्च प्रकृतिविकृतिभूतत्वात् प्रकृतिः श्लेष्मणः सर्वाण्येव गुणकर्माणि तेषां विकृतिभूतत्वात्। तत्र यदि सर्वगुणकर्माणि स्तोकं विकृतिमापद्यन्ते तदा तेषां प्रमेहाणां स्थैर्य्यं याप्यत्वं अत्यर्थवैकृत्या च असाध्यतां जनयतीत्यर्थः॥ ६॥

श्लैष्मिकस्य प्रमेहस्यैकत्वेऽपि यथा विभिन्नश्लेष्मगुणाधिक्येन तस्य दशभेदा भवन्ति इत्याह शरीरेति। एवं श्लेष्ममेदोमिश्रः शरीरक्लेदः मूत्राशयं वस्तेः प्रमुखस्थाने वस्तिशिरसीत्यर्थः। प्रविशन् तत्रैव रक्तवाहितः शरीरक्लेदो रक्तात् पृथग्भूय मूत्रत्वमापद्यमानः प्राप्नुवन् वैषम्ययुक्तैः न्यूनाधिकमात्रावस्थितैरेभिर्वक्ष्यमाणैर्दशभिर्गुणैरुपसृज्यते संयुज्यते। के ते गुणा इत्याह तद्यथेति। मूर्त्तं प्रत्यक्षयोग्यम्। अच्छं द्रवतरम्। तत्रैकस्यानेकस्य वा गुणस्य पृथग् आधिक्यात् तेषां तत्सदृशं नामविशेषं भवतीत्याह अत्रेति। के ते नामविशेषा इत्याह ते त्विति। तत्राच्छगुणाधिक्याद् उदकः, मधुराधिक्याद् इक्षुवालिका। गुरुत्वाधिक्यात् सान्द्रः, सान्द्रप्रसादाधिक्यात् सान्द्रप्रसादः, श्वेताधिक्यात शुक्लः, स्निग्धाधिक्यात शुक्लः, शीताधिक्यात् शीतः, मूर्तोधिक्यात सिकता, मन्दाधिक्यात् शनैः, पिच्छिलाधिक्याद् आलालश्चेति पृथग् दशगुणाधिक्याद्दश नामविशेषा भवन्ति। तेषां साध्यत्वं सहेतुकं प्रतिपादयति ते दश इति॥ १०-१२॥

तेषां दशानां श्लैष्मिकप्रमेहाणां परस्परभिन्नलक्षणप्रतिपादकान् कांश्चित् श्लोकानाह तत्रेति । अच्छं निर्मलम् । सितमत्र वर्णरहितम् । काण्डेक्षुः 'नटा' इति वंगीयाः । आविलमस्वच्छम् । पर्युषितं व्युष्टम् किञ्चित् कालं स्थिरतया स्थितमित्यर्थः । संहन्यते सान्द्रीभवति अध इति शेषः । प्रसीदति उपर्यच्छं भवति । एष तु तन्त्रान्तरे सुरामेहसंज्ञयाऽभिहितः तत्र 'उपर्यच्छमधोघनम्' इति लक्षणात् । पिष्टनिभं पिष्टतण्डुलमिश्रं जलमिवेत्यर्थः । तन्त्रान्तरेऽस्य पिष्टमेह इति संज्ञा । शुक्राभमिति ईषद्घनं पिच्छिलञ्चेत्यर्थः । अत्यर्थेति अत्यर्थं शीतमत्यर्थं मधुरञ्चेत्यर्थः । मूर्तानणून् अणुपरिमितानपि दृश्यानित्यर्थः । सिकतारूपिणः बालुकाकणसदृशान् । शर्करायामपि सिकतावत् सूक्ष्मा दोषा मूत्रेण सह दृश्यन्ते परं तत्र मूत्रकृच्छ्रत्वं वर्तत एव न सिकतामेहे इति विशेषः । मन्दं मन्दम् अल्पाल्पम् अवेगं वेगरहितं शनैरद्रुतं कृच्छ्रं बहुकुन्थनेनेत्यर्थः । तन्तुबद्धमिव सूत्राकारमिव आलालं लालासदृशम् । उपसंहरति इत्येते इति ॥ १३-२३ ॥

पैत्तिकप्रमेहनिदानादिकमाह उष्णेति । तथाविधशरीरस्य बहुबद्धदुष्टमेदोमांसादिकस्य । सम्प्राप्तिरप्यस्य श्लेष्मप्रमेहवदित्याह तयैवानुपूर्व्येति । तेषां याप्यत्वं प्रतिपादयति सर्व एवेति । संसृष्टदोषमेदःस्थानकत्वात् संसृष्टौ दोषौ पित्तकफौ परस्परविरुद्धधर्मकौ मेदश्च पित्तविरुद्धं स्थानं येषां तद्धर्मकत्वात् । अत एवैषां विरुद्धोपक्रमत्वं युज्यते ॥ २४-२६ ॥

तेषां लक्षणान्याह तत्र श्लोका इति । मसीवर्णं कृष्णवर्णम् । चाषपक्षनिभं नीलवर्णम् । विस्रमामगन्धि । मञ्जिष्ठोदकसंकाशं मञ्जिष्ठाक्वाथतुल्यवर्णम् । उपसंहरति इतीति ॥ २६-३५ ॥

वातिकप्रमेहस्य निदानादिकमाह रूक्षेति । वमनादीनामतियोगः । सन्धारणं मलमूत्रादीनामुपस्थितवेगानां वेगधारणम् । उपसेवमानस्य आधिक्येनाभ्यवहरतः । तस्य संप्राप्तिमाह स प्रकुपित इति । वसा शरीरस्य स्नेहांशः । यदुक्तं सुश्रुते "शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्त्तिता ।" इति । मूत्रवहानि वस्तिशिरोगतानि सूक्ष्माणि स्रोतांसीत्यर्थः । मज्जा तु स्थूलास्थ्यन्तर्गतः स्नेहविशेषः । यदुक्तं तत्रैव—"स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तराश्रितः" इति । मूत्रवस्तौ वस्तिशिरसोरारभ्य मूत्राधारं यावत् स्थाने । लसीका नाम त्वगन्तःस्थितं सर्वशरीरमुदकम् । यद्वक्ष्यति "यत्तु त्वगन्तरे व्रणगतं लसीकाशब्दं लभते" इति । (शा० ७ अ०) । अनुबन्धमनवरतं मूत्रं च्योतयति क्षारयति । अतिमूत्रप्रवृत्तिसंगमिति अतिमूत्रप्रवृत्तेः संगं संश्लेषं करोति मत्तगजमदस्रावबदित्यर्थः । ओजस्त्वत्र श्लेष्मलमोजः नतु परमोजोऽष्टबिन्द्वात्मकम् शरीरस्य प्रधानधातूनां निरसनात् वातिकस्य महात्ययिकत्वं युज्यत इत्याह तानिमानिति ॥ ३६-३८ ॥

वातिकानां नामान्याह तेषामिति । तेषां लक्षणान्याह तत्र श्लोका इति । मत्तः हस्तीव मत्तहस्तिमदस्रावबदित्यर्थः । प्रतीयात् जानीयात् । उपसं-

हरति त एवमिति। प्रमेहाणां पूर्वरूपाण्याह त्रयस्त्विति। अभिनिर्वर्तयिष्यन्तः उत्पादयिष्यन्तः। सुप्तता स्पर्शज्ञानहीनता। कायच्छिद्रेषु मुखनासिकारोमकूपादिषु उपदेहं मलम्। भविष्यत्प्रमेहाणां शरीरे मूत्रे च माधुर्यान् मक्षिकापिपीलिकादीनां सञ्चारो भवतीत्याह षट्पदेति। मूत्रदोषान् तत्तद्दोषसंसृष्टमूत्रवर्णादिकान्। तत्प्रसंगात् प्रमेहानुबन्धात्। तत्र चिकित्सासूत्रमाह तत्रेति ॥ ३६–४८ ॥

सामान्यतः केषां प्रमेहो भविष्यति केषां वा नेति विवक्षुर्लोकप्रकृतिमाह भवन्ति चात्रेति। गृध्नुं लोभिनम्। अभ्यवहार्य्येषु खाद्यपानीयादिषु। नीडद्रमः वासवृक्षः। मन्दोत्साहमव्यायामिनमित्यर्थः। महाशनं बहुभुजम्। चेष्टा व्यायामः। निगदार्थमन्यत् ॥ ४६–५१ ॥

अध्यायार्थं निवेद्याध्यायं समापयति तत्र श्लोका इति ॥ ५१–५४ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां निदानस्थाने प्रमेहनिदानं नाम चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः।

विप्रकृष्टनिदानसाम्यात् प्रमेहनिदानमुपदिश्य कुष्ठनिदानमुपदिदिक्षति अथात इत्यादिना। यद्वदयति "हविप्राशान् मेहकुष्ठयोः" इति। तत्रादौ कुष्ठानामुपादानकारणान्याह सप्तेति। प्रकृतिविकृतिमापन्नानि इति प्रकृतयोऽपि मूलकारणानि धातुरूपाण्यपि तानि विकृतिमापन्नानि दोषत्वेन परिणतानि। प्रकृतितः शरीरोपादानस्वरूपाण्यपि विकृतितस्तानि व्याध्युत्पादनेन शरीरघातीनि भवन्तीत्याशयः। प्रकृतिरिति पृथक्पाठे प्रकृतिः कारणानि कुष्ठानामित्यन्वयः। कानि तानि सप्त द्रव्याणीत्याह त्रय इति। प्रकोपणेन कुष्ठकरनिदानेन विकृताः असाम्ना क्षयवृद्धिमापन्नाः दोषाः धातुत्वेऽपि धातुदूषणात् दोषत्वं गताः। चत्वारश्च शरीरधातवो दुष्याः त्वगादयः। अत्र लसीका "यत्त सर्वशरीरचरं बाह्यात्वग् बिभर्ति" इत्यादिवक्ष्यमाणलक्षणा रसधातुविशेषः। चतुर्धा चतुःप्रकारेण दोषसंसर्गदूषिताः दोषा हि धातूनामुपादानत्वेन तत्पोषणव्यपदेशेन तान् पृथक्प्रकारेण दूषयन्तीति चतुर्धातुदूषणे पृथक्प्रकारत्वेन चतुर्धा इत्याह। सप्त धातवो हि वातादिभिरेवाप्यायिता भवन्ति यदुक्तं वृद्धजीवकीये—"वातादीनां धातूनामितरे धातव आप्यायिता भवन्ति" इति। अत्र वातादीनामिति तृप्त्यर्थधातुयोगेन करणे षष्ठी। दोषोपघातविकृताः विकृतवाताद्याश्रयेण विकृताः। दुष्टे उपादाने कार्यमपि विकृतं भवतीति भावः। सप्तानां कुष्ठानामेवंगतं पूर्वोक्तेन प्रकारेण विकृतिमापन्नम्। सप्तधातुकं सप्तानां धातूनां समाहारः, आजनम् उत्पत्तेः कारणम्। एतेन सर्वेष्वेव कुष्ठेषु त्रयाणां दोषाणां चतुर्णाञ्च त्वगादीनां समस्ततया कारणत्वं वर्तते। अतएव कुष्ठविसर्पयोः समानदोषदूष्यत्वेऽपि तयोर्भेदो वर्तते। विसर्पे तु न सर्वत्र साकल्येन तेषां दोषदूष्याणां

कारणत्वं वर्तते कुष्ठेतु सर्वेषामेव। अत एभ्यः सप्तधातुभ्यः एव प्रभवो येषां तथाविधान्यपि अभिनिर्वर्तमानानि उत्पन्नानि तानि कुष्ठानि परस्तात् केवलं कृत्स्नं शरीरमुपतपन्ति आक्रामन्ति प्रागुत्पत्तौ चतुर्धात्वाश्रयिण्यपि ततः पश्चात् मेदआदि सर्वधातूनाक्रामन्तीत्यर्थः॥ १-३॥

नन्वेवं सप्तधातुकत्वे कथं तेषां भेदो भवेद् अत एकदोषजमपि कुष्ठं नूनं भाव्यम्, यदुक्तं तन्त्रान्तरे—"वातेनारुणं पित्तेनौडुम्बरर्ष्यजिह्वकपाल-काकणकानि श्लेष्मणा पुण्डरीकं दद्रुकुष्ठञ्च" इति। नेत्याह नचेति। ननु तर्हि एककारणकानां कथं भेद इत्याह अस्ति त्विति। समानप्रकृतीनामेककारणका-नाम्। दोषेति दोषाणामंशांशविकल्पेन स्थानविभागेन च। वेदनेति वेदनाः कण्डूदाहादयः वर्णाः शुक्लकृष्णादयः, संस्थानमाकृतिः प्रभावः साध्यता-साध्यत्वादिः। नाम कपालौडुम्बरादि। चिकित्सितस्य विशेषः पार्थक्यं भव-तीति शेषः। अत्र तु प्राधान्येन सप्तविधकुष्ठेषु कथ्यमानेष्वपि तेषां नाना-मुनिवचनप्रामाण्यात् प्रत्यक्षदर्शनाच्च अपरिसंख्येयविधत्वमपि भवितु-मर्हतीत्याह स इति। तथैव भेदकल्पनायां हेतुमाह दोषा इति। हि यतो दोषा वाता-दयः विकल्पनैः नानाविधनिदानोपसेवादिभेदकारकैः हेतुभिः विकल्प्यमानाः अंशांशतो भिद्यमानाः विकारान् विकल्पयन्ति नानाविधभेदविशेषैरुप-पादयन्ति। असाध्यभावादन्यत्र असाध्यतां विना, तस्या एकविधत्वात् तथा चोक्तं—"विकल्पो नत्वसाध्यानां नियतानां विकल्पना।" इति। अत्रा-साध्यपदेन प्रत्याख्येयस्यैव परिग्रहः नतु याप्यस्य, तस्य तु यापनार्थं चिकि-त्सितभेदाद् विकल्पना वर्तत एव। तर्हि कथमत्र कुष्ठानां सप्तविधत्वमुक्त-मित्याह तेषामिति। विकल्पविकारसंख्याने विकल्पैः पृथग्भेदैर्विकाराणां संख्याने व्यासतः कथने अतिप्रसंगमानन्त्यदोषापातमभिसमीक्ष्य विचार्य॥ ॥ ४-५॥

अत्र सप्तविधे कुष्ठे दोषविकल्पविशेषमुपदेष्टि इहेति। इह अस्मिन् शरीरे। सप्तविधे कुष्ठे दोषवैशेष्यमभिधाय सप्तविध एव सः दोषाणां पुन-स्तारतम्येन अपरिसंख्येयो भवतीत्याह स चैष इति। स एषः सप्तविधः कुष्ठविशेषः। प्रकृते कारणे सप्तद्रव्ये तरतमतः आपेक्षिकह्रासवृद्ध्या विकल्प्यमानायां भिद्यमाने भूयसीं बहुतरां विकारविकल्पसंख्यां व्याधि-भेदरूपां संख्याम्॥ ६॥

तत्र कुष्ठस्य निदानमाह तत्रेदमिति। समासेन संक्षेपेण। शीतोष्ण-व्यत्यासं शीतोष्णयोः परिवर्तनम् अनानुपूर्व्या अयथोक्तक्रमेण उपसेव-मानस्य, यत्र शीतसेवा युक्ता तत्रोष्णसेवा, उष्णसेवायां युक्तायां शीतसेवा इत्याशयः। सन्तर्पणं बृंहणम् अपतर्पणं लंघनम् तयोश्च व्यतिक्रमम् अयुक्त्या सेवमानस्येत्यर्थः। अभ्यवहार्यमाहारः। मध्वादीन् सततमतिमात्रेण समश्नतः इत्यन्वयः। पुनरन्नेऽजीर्णेऽपि सततं समश्नतः सन्ततमध्यशनशीलस्येत्यर्थः। फाणितम् अर्धावर्तित इक्षुरसः। लकुचं वन्यपनसः। पयसा चिलिचिमं मत्स्य-

विशेषं सततं समश्नत इति सर्वत्रैव योजना। हायनकादीनामन्नानि क्षीरादिमन्ति। एतैरेवाहारजातैरतिमात्रं सुहितस्य आतृप्तितो भुक्तस्य व्यवायादिकमुपसेवमानस्य। सहसा भयादिजनितक्लमापनोदनात् प्रागेवेत्यर्थः। विदग्धमजीर्णम् अनुल्लिख्य वमनेनानिर्हार्य्य। पुनर्विदाहीनि अजीर्णकराणि द्रव्याणि अभ्यवहरतः खादतः। आगतं छर्दिं वमनवेगं प्रतिघ्नतः धारयतः। स्नेहान् घृतादिकान् अतिचरतः अक्रमेणोपसेवमानस्य। त्वगादयस्त्वङ्मांसशोणितलसीकाः। शैथिल्यमवकाशबाहुल्यम्। आपद्यन्ते प्राप्नुवन्ति। अतस्तेषां पोषणार्थं दुष्टानां दोषाणां तेषु स्थानग्रहणं समीचीनं भवतीत्याह तेष्विति। अतो दुष्टदोषोपादानत्वात् त्वगादीनां दुष्टिः स्वभाविक्येव भवति॥ ७॥

कुष्ठकराणां दोषाणां स्थानसंश्रयं व्याख्याय अनन्तरभावित्वात् तेषां पूर्वरूपाण्याह तेषामिति। अस्वेदनं घर्मप्रादुर्भावाभावः। अतिस्वेदनमत्यर्थं घर्मप्रवृत्तिः। पारुष्यं रूक्षता। अतिश्लक्ष्णता अतिमसृणता। वैवर्ण्यञ्च त्वचामित्यर्थः। निस्तोदः सूचीवेधवद्वेदना। सुप्तता स्पर्शज्ञानहीनता। परिहर्षः झिन्झिनिवद्वेदना। खरत्वं कर्कशता। उष्मायणं उष्माणमुद्वमन्तमिवेत्यर्थः। अभीक्ष्णं प्रायः। कायच्छिद्रेषु मुखनासादिषु उपदेहः मलाधिक्यम्। पक्वादिपदेन सर्वप्रकारयोः शारीरागन्तुव्रणयोरुपरोधः क्रियते। दुष्टिः कोथपूयाधिक्येन। असंरोहणं न रोपणमित्यर्थः॥ ८॥

पृथक् कुष्ठरूपाण्याह तेभ्य इति। तत्र वेदनाविशेषः निस्तोदादीनि, वर्णविशेषः अरुणादीनि, संस्थानविशेषः विषमोन्नतादीनि, नामविशेषः कपालादीनि प्रभावविशेषः जन्तुमत्त्वादीनि। तत्र कपालकुष्ठस्य वेदनादीन्याह रूक्षेति। परुषं कर्कशम्। खरपर्यन्तानि प्रान्ते तीक्ष्णकण्टकाचितवत् स्पर्शानि। तनूनि विरलानि न पुनः सर्वशरीरव्यापीनीत्यर्थः। उद्वृत्तबहिस्तनूनि समुन्नतबाह्यावयवानि। सुप्तवत् सुप्तानि अत्यर्थस्पर्शज्ञानरहितानि। लसीकात्र व्रणगततरलस्रावः। गतिर्विसर्पणम्। समुत्थानमुत्पत्तिः। आशुभेदीनि स्वल्पेनैव दिनेन भिन्दन्ति चर्मावदारयन्तीत्यर्थः। जन्तुमन्ति व्रणे सञ्जाते कृमिमन्ति। कृष्णारुणस्य कपालस्य घटावयवस्य वर्ण इव वर्णो येषां तानि॥ ९॥

उदुम्बरकुष्ठलक्षणान्याह ताम्राणीति। बहलानि उत्सेधवन्ति। रक्तादीनां बहलत्वं घनत्वम्। कोथः पूतिभावः। परिमण्डलाकारत्वेन मण्डलकुष्ठलक्षणान्याह स्निग्धानीति। स्निग्धानि स्नेहलिप्तवदवभासन्त इत्यर्थः। पीनपर्यन्तः स्थूलप्रान्तदेशः। शुक्लेति शुक्लवर्णरोमसमूहव्याप्तानीत्यर्थः। सक्तेति सक्तानि चिरभावीनि गत्यादीनि येषां तानि। ऋष्यजिह्वकुष्ठलक्षणान्याह परुषाणीति। ऋष्यस्य हरिणस्य जिह्वाकारत्वादस्य ऋष्यजिह्वेति संज्ञा। तद्वर्णमाह बहिरिति। बहिः प्रान्तदेशे, अन्तर्मध्यभागे श्यावानि कृष्णपीतवर्णानि। शूकः शूकशिम्बीफलादीनां गात्रव्याप्तं सूक्ष्मकण्टकम्। उत्सन्न-

मध्यानि मध्योन्नतानि तनुपर्यन्तानि प्रान्तदेशे पत्तलानि । दीर्घपरिमण्डलानि जिह्वावत्प्रान्ते मण्डलान्यपि दीर्घाणि ॥ पुण्डरीककुष्ठलक्षणान्याह शुक्लरक्तेति । शुक्लरक्तावभासानि पद्मपलाशवर्णानीत्यर्थः । रक्तपर्यन्तानि प्रान्तदेशे रक्तवर्णानीत्यर्थः । राजी रेखा ॥ १०-१३ ॥

सिध्मकुष्ठलक्षणान्याह परुषेति । परुषारुणविशीर्णबहिस्तनूनि परुषाः रूक्षाः अरुणाः विशीर्णाः गलत्स्वभावाश्च बहिस्तनवो बाह्यत्वचो यत्र तानि । अत एव वक्ष्यति "रजो घृष्टं विमुञ्चति" इति बाह्यत्वचो विशीर्णत्वेन घृष्टा रजोवद् गलिता पतति । बाह्यत्वग्विमोक्षान्ते अन्तःस्निग्धं दृश्यते । लघुसमुत्थानानि क्षिप्रं प्रजननशीलानि । काकणकुष्ठलक्षणमाह काकणन्तिकेति । काकणन्तिका रक्तगुञ्जा । पापीयसां महापापिनाम् । एषामसाध्यतामितरेषां साध्यतामाह तानीति ॥ १४-१५ ॥

कापालादीनां साध्यत्वेऽपि अप्रतिक्रियमाणानां तेषामपि असाध्यत्वं भवतीत्याह तत्रेति । कथंकारं तानि असाध्यतां यान्तीत्याह साध्यानामिति उपेक्ष्यमाणानामचिकित्स्यमानानाम् । अपचारतः अपथ्यसेवया । तरुणास्थीनि नासादिगतानि । आददते भक्षयन्ति । अंगावयवानामंगुल्यादीनाम् । अर्थमिमं पुनः पद्येनाह भवन्ति चात्रेति । किञ्चित्कालमासाद्य गते क्रियति काले । रोगेभ्यः प्राक् पूर्वरूपावस्थायामित्यर्थः । दृष्टान्ताभ्यामर्थमिमं परिष्करोति यथेति । निगदार्थमन्यत् ॥ १६-२३ ॥

अध्यायार्थं निवेदयति तत्र श्लोक इति ॥ २४ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां, चरकप्रदीपिकायां चरकटिप्पण्यां निदानस्थाने कुष्ठनिदानं नाम पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ।

कुष्ठशोषयोरुभयोरपि कृतयुगोत्पत्तित्वसाम्यात् कुष्ठनिदानानन्तरं शोषनिदानं वक्तुं प्रक्रमते अथात इत्यादिना । इहेति । इह आयुर्वेदे आयतनानि निदानानि । तानि चत्वारि साहसादीनि यथाक्रमं विवृणोति तत्र यदुक्तमिति । तत्र चतुर्षु निदानेषु । विगृह्णाति युद्धं करोति । व्यायच्छति व्यायोपणादिना व्यायामं करोति । जल्पति वाग्व्यायामं करोति सूतपाठकादिवदित्यर्थः । उत्सादनपदाघातनयोरतिप्रगाढमुपसेवनञ्च अतिभारिकस्य द्रव्यस्य पुनः पुनरुत्तोलनं पादेन वा क्षेपणम् । अतिविप्रकृष्टमतिदूरम् । अभिपतति द्रुतं गच्छति । अभिहन्यते केनचिद् बलवतेत्यर्थः । अन्यद्वा किञ्चिदेवंविधमित्यनेन अद्यत्वे प्रचस्तानां दूरं द्विचक्रयानेन भ्रमणं पादगोलककीडादिकं परिगृह्यते । अतिमात्रेण मात्रातिरिक्तेन शक्त्यतिरिक्तेन च अतिश्रमजनकेन कर्मणा उरः क्षण्यते फुःफुसगता सिरा विपाट्यते ततो मुखाद् रक्तं निर्गच्छति । एवं रक्तक्षयाद् वायुः प्रकुप्यतीत्याह तस्येति । उरःक्षतमुपलक्ष्यीकृत्य वायुः प्लवते कुप्यति । तत्र उरसि । उरःस्थं श्लेष्मा-

णम् उपसंसृज्य आक्रम्य पित्तञ्च दूषयन् । विहरन् इत्यादिना तेषां सर्वशरीरचारित्वं सूचयति । इति सामान्यसंप्राप्तिं सञ्चयप्रकोपप्रसररूपामभिधाय स्थानसंश्रयरूपां विशेषसंप्राप्तिमाह तस्येति । तस्य संपिण्डितत्रिदोषस्य । शरीरसन्धीन सर्वानेव प्रविश्य ज्वरांगमर्दयोर्हेतुर्भवति । हनुसन्धिगतास्तु जृम्भायाः । आमाशयशब्देनात्र नाभिस्तनान्तरं स्थानमितिकृत्वा यत्र महास्रोतसोऽंशे खाद्यं पूर्णतया जीर्णं भवति तदंशो नेयः । तत्रैवाधिक्येन प्रच्यवमानमुदकं विकृत्या वर्चो भिनत्ति यद् वक्ष्यति "यत्तु प्रच्यवमानं पुरीषमनुबध्नात्यतियोगेन" इति । हृदयशब्देनात्र उरःप्रदेशोऽभिधीयते तेनैव चोरस्या व्याधयो जायन्ते । रसनां जिह्वाम् । कण्ठ उद्ध्वंसते अत्यर्थं श्लेष्मणा तज्जाभिः पीडकाभिश्च संलिप्तो भवतीत्याशयः । कण्ठस्थगोजिह्वायामतिश्लेष्मोपचयात् स्वरश्चास्यावसीदति स्वरभेदो भवतीत्यर्थः । प्राणवहानि स्रोतांसि फुःफुसगताः श्वासवहा नाड्यः । अन्वेति आक्रामति । शिरः उपहन्यते श्लेष्मणा परिपूर्णत्वाद् भारिकं भवति । कासः शुष्क एव उत्कासिका इति तात्पर्य्यम् । कासप्रसंगात् सततकासप्रवृत्तेः उरसि क्षते पुनरिति शेषः । साहसप्रभवा इति सहसा बलादीननपेक्ष्य कृतं साहसं तस्मात् प्रभव उत्पत्तिर्येषां ते इत्यर्थः । साहसिकं सहसा कर्म कुर्वन्तं जनम् । स्पृशन्ति आक्रामन्ति । उपशोषणैः शरीरक्षयकारकैः । बलसमाधानं बलमेव समाधानं प्रवृत्तेः कारणं यस्य तत् । ननु गच्छतु शरीरं तेन किमित्याह शरीरमूलश्चेति । तमेवार्थं पुनः पद्येन समर्थयति भवति चात्रेति ॥ १-६ ॥

शोषस्य द्वितीयं समुत्थानं सन्धारणं व्याकरोति अथेति । राजसभायां सभासद्रूपेण कर्मचारिरूपेण वा । भर्तुः समीपे निदेशं पालयन् । गुरोराचार्यस्य पादमूले अधीयानः इति शेषः । सर्वमेतत् प्राधान्यादनुक्तज्ञानार्थं यत्र क्वापीति तात्पर्यम् । उच्चावचैः नानाप्रकारैः । यानैरभियान् समन्ततो गच्छन् । भयाद् राजसमीपस्थानाम् । प्रसंगात् कार्यव्याप्तत्वात् सेवकानां वणिजां वा । ह्रीमत्त्वात् स्त्रीमध्यस्थानाम् । घृणित्वात् घृणावशात् । आगतान् उपस्थितान् । वातस्य अधोवातस्य । वेगान् निरुणद्धि उपस्थितेऽपि वेगे वातादीन् नोत्सृजति । समुदीर्य प्रकोप्य । पुरीषं भिनत्ति अतिसारयति उच्छोषयति आनाहयति वा । अंसौ स्कन्धनिम्नप्रदेशौ अवमृद्नाति मर्दनजातवेदनावद् वेदनयावगृह्णाति । कण्ठमुरश्चावधमतीति तमकश्वासग्रस्त इव भस्त्रेव उत्थितावनामिताभ्यां कण्ठोरोभ्यामुपलक्षितो भवतीत्यर्थः । शिरश्चोपहन्ति श्लेष्मपूर्णतया भारिकं भवति । आत्मनः स्वस्य योगक्षेमकरेषु उपचयपालनकर्तृषु शारीरेषु शरीरहितकरेषु विषयेषु प्रयतेत यत्नं कुर्यात् शरीरहितकरानेवोपसेवेत इत्यर्थः । अस्य प्राणिनो योगक्षेमस्य मूलं हि शरीरं, विना शरीरं योगक्षेमं न भवतीत्यर्थः । पुनश्च पुरुषः संयोगपुरुषोऽपि शरीरमूलो भवति । अर्थमिमं पद्येन पुनर्दृढयति भवति चात्रेति । भावानामुत्पत्तिशीलानां शरीरिणां मनुष्याणां सर्वाभावः सर्वकर्माभावः ।

अत: शरीरं प्रधानमिति तद्रक्षार्थं प्रयतेतेति निष्कर्ष: ॥ ७-८ ॥

शोषस्य तृतीयमायतनं क्षयं व्याकरोति क्षय इति । स तु द्विविध: अनुलोमक्षय: प्रतिलोमश्चेति । तत्रादावनुलोमक्षयमधिकरोति यदेति । शोकेन धनबान्धवादिक्षयजन्येन विपत्तिदैन्यादिजन्यचिन्तया च परीतमाक्रान्तं हृदयं यस्य स: । ईर्ष्यादिभिश्च समाविश्यते आक्रम्यते । रूक्षादिना बृंहणप्रतिकूलं यत्किंचिल्लंघनं तदुपलक्षितं भवति । हृदयस्थायी रस: तैजसोऽन्नरस: इत्यर्थ: । तस्यैव हृदयं स्थानं नतु स्थायिपोष्यरसस्य । स एव सर्वधातूनां पोषक: । यदुक्तं सुश्रुते—"..... उपयुक्तस्याहारस्य सम्यक्परिणतस्य यस्तेजोरूप: सार: परमसूक्ष्म: स रस इत्युच्यते । तस्य च हृदयं स्थानम् । स ..... कृत्स्नं शरीरमहरहस्तर्पयति" इति । अत्र चाप्युक्तम्—"पुष्यन्त्याहाररसाद् रसरुधिरमांसमेदोऽस्थिमज्जशुक्रौजांसि" इति । अत आहाररसक्षये सर्वधातुक्षय: सम्भवत्येव, तस्य चानुबन्धे शोषो भवितुमर्हति । प्रतिलोमक्रमेण क्षयं विवृणोति यदा वेति । अतिहर्षात् कामप्राबल्यात् । अतिप्रसक्तभावात् अत्यनुरागात् । अतिप्रसंगमत्यधिकमैथुनम् । शुक्रे क्षीणेऽपि तस्य पुरुषस्य मनो न स्त्रीभ्यो निवर्तते परन्तु रिरंसाप्रवृत्ति: वर्धत एवेत्यर्थ: । एवमतिप्रणीतसंकल्पस्य अतिकामुकस्य मैथुनमापद्यमानस्य रमत: क्षीणशुक्रत्वात् शुक्रप्रवृत्तिर्न भवेत् । अथ पश्चान्तरे व्यायच्छमानशरीरस्य मैथुनार्थमतिरिक्तं व्यायामं कुर्वत: प्रकुपितो वायु: । धमनीशब्दोऽत्र शिरावाचक: । ताश्च शुक्रवहस्रोत:पोषिका: । तां शिरां विपाट्य शुक्रवहस्रोतसि शोणितं प्रच्यावयति । ततश्चाकृतेऽपि मैथुने शुक्रमार्गात् पुरुषस्य वस्तिद्वारस्याधो द्व्यंगुलात् मूत्रप्रसेकात् वातानुसृतलिंगं वातलक्षणाक्रान्तं शोणितं प्रवर्तते । पुरुषस्य शुक्रस्य बहिर्निर्गममार्गस्तु मूत्रप्रसेकस्याधोभाग एव । यदुक्तं सुश्रुते—

"द्व्यंगुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यध: ।
मूत्रस्रोत: पथाच्छुक्रं पुरुषस्य प्रवर्तते ॥" इति ।

ततश्च शरीरस्य सारभूतयो: शोणितशुक्रयो: क्षयात् सन्धिशैथिल्यादिकं भवति । पुनश्च शरीरस्य सन्धिशैथिल्याद् रौक्ष्याद् दुर्बलत्वाच्च विशेषतो वायुप्रकोपो भवतीत्याह अथास्येति । भूय: पुनरप्याधिक्येन । ततश्च रक्तशुक्रक्षयात् रिक्तानि स्रोतांसि वायुना पूर्यन्ते इत्याह स इति । वशिकं शून्यं रिक्तमित्यर्थ: । श्लेष्मपित्ते उदीर्य स्वस्थानादानीय प्रक्षिप्य च । प्रच्यावयति श्लेष्मपित्ते इत्यत्र मलरूपं कफं पित्तञ्चेत्यर्थ: । शिर:श्लेष्माणं शिरोगतमस्तुलुंगापरपर्यायं तर्पकश्लेष्माणमुपक्लेश्य संशोष्य श्लेष्मणा मलकफेन परिपूरयति शिर इति शेष: । कासप्रसंगात् सततशुष्ककासाधिक्यात् उरसि फु:फुसे क्षते सञ्जाते कासवेगात् शिरायां विपाटितायां शोणितनिष्ठीवनं करोतीत्याह स कासेति । एषा शुक्ररूपा आहारस्य परा श्रेष्ठा फलनिर्वृत्ति: फलस्वरूपा भवतीति शेष: । अर्थमिमं पद्येन समर्थयति भवति

चात्रेति। परं धाम श्रेष्ठः सारः ॥ ६-११ ॥

शोषस्यान्तिमं निदानं व्याचष्टे विषमाशनमिति। पानेति पानादिभेदेन चतुरः उपभोगान् आहारान्। प्रकृत्यादीनि आहारविधिविशेषायतनानि परमतो विमाने स्वयमेव व्याकरिष्यति। अत्राहारवैषम्याद् वातादीनां वैषम्यमुक्त्वा आहारस्य वातादेरुपादानत्वं सिद्धं भवतीति ज्ञेयम्। स्रोतसां रसरक्तादिवहानाम्। अयनमुखानि गमनमार्गान् प्रतिवार्य संरुध्य। भूयिष्ठं बाहुल्येन। पुरीषोपष्टम्भात् मलसाहाय्यात् वर्तयति जीवति। मलमपि शरीरोपस्तम्भकं भवति यदुक्तं सुश्रुते—"दोषधातुमलमूलं हि शरीरम्" इति। इत्यर्थं दुर्बलकृशानामपि शरीरे मलप्राधान्यात् तद् विशेषतो रक्ष्यं भवतीत्याह तथेति। अनाप्यायमानस्य कृताहारस्यापि अपुष्टशरीरधातोः। के ते उपद्रवा इत्याह तत्र वात इति। कासातिप्रसंगाद् अतिरिक्तकासवेगाद् फुःफुसगतशिराभेदात् उरःक्षतं भवतीत्यर्थः। उपसंहरति तस्मादिति। उपशयशब्देनात्र सात्म्यं लभ्यते। ओकसात्म्यन्तु प्रतिपुरुषापेक्षमिति उपयोक्तुरप्यत्र अन्तर्भावो भवति। देशकालसात्म्यविरुद्धमपि विषमाशनेऽन्तर्भवितुं युज्यते। अर्थमिमं पुनः पद्येनाह भवति चात्रेति ॥ ॥ १२-१३ ॥

पृथङ्निदानचतुष्टयेन शोषसंप्राप्तिमभिधाय तस्यैव सर्वदोषकार्यत्वं राजयक्ष्मेति संज्ञानिरुक्तिञ्चाह एतैरिति। तं शोषम्। यक्ष्मणां रोगाणां राजा श्रेष्ठ इति राजदन्तादिवत् पूर्वनिपातः। राज्ञश्चन्द्रस्य वा यक्ष्मा इति राजयक्ष्मा पदसिद्धिः। उडुराजस्य चन्द्रमसः ॥ १४ ॥

तस्य पूर्वरूपाण्याह तस्येमानीति। अभीक्ष्णं सततं क्षवथुः छिक्का। श्लेष्मप्रसेको मुखनासिकाभ्याम्। अन्नकाले भोजनकाले आयासः आहारश्रमादप्ययं श्रान्तो भवतीत्यर्थः। अदोषेषु पात्रादिषु इत्यन्वयः। उपदंशं भक्ष्यपानरोचकद्रव्यं 'चाट' इति वंगे। अस्यैव लक्षणस्य विवरणं चिकित्सिते वक्ष्यति यथा—"मक्षिकाघुणकेशानां तृणानां पतनानि च। प्रायोऽन्नपाने" इति। एवं स्वल्पदोषलमन्नं प्रायः सर्वत्रैव भवति परन्तु भाविशोषिणः अल्पदोषेष्वन्नेषु एवं दोषदर्शनं भवति। उल्लेखनं वमनम्। पाण्योरवेक्षणम् अत्यर्थं पाणिरयं नीरक्तो निर्मांसो वेति जिज्ञासार्थमित्यर्थः। बाह्वोः प्रमाणजिज्ञासा कथमहं क्षीणो भवामि नवेति सूत्रादिना बाह्वोः प्रमाणपरीक्षणम्। स्त्रीकामता रिरंसा। निर्घृणित्वं जुगुप्सारहितत्वम्। काये बीभत्सदर्शनता विकृतदर्शनता विवर्णत्वादिना। ग्रामः प्राकारपरिखादिरहिता बहुजनवसतिः। नगरन्तु अद्यत्वे 'शहर' इति भाषा। निगमस्तु वणिक्पथः 'बाज़ार' इति भाषा। जनपदः प्रदेशः। शून्यानां मानवरहितानाम्। कृकलासादिभिरधिरोहणं तेषां शरीरे आरोहणम्। यानमारुह्य गमनम्। केशादिराशौ चारोहणम् ॥ १५ ॥

शोषरूपाण्याह अत ऊर्ध्वमिति। लक्षणान्येतानि अनुक्तज्ञानाय

तेन चिकित्सिते वक्ष्यमाणानि पृथगेकादशलिंगान्यपि भवितुमर्हन्ति। तस्य साध्यासाध्यतामाह तत्रेति। अतिरोहितार्थमन्यत् ॥ १६-१८ ॥

अध्यायार्थं ब्रूते अध्यायसमापनाय तत्र श्लोक इति ॥ १९ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां निदानस्थाने शोषनिदानं नाम षष्ठोऽध्याय: ॥ ६ ॥

सप्तमोऽध्याय:।

तस्मिन् हि दक्षाध्वरध्वंसे उत्पन्नानां व्याधीनां चतुर्णां ज्वरादीनां निदानानि प्राग् अध्यायचतुष्टयेन व्याख्यातानि साम्प्रतं शिष्ट्योर्द्वयोर्निदानानि वक्तव्यानि भवन्तीति अध्यायान्तरमारभते अथात इत्यादिना। इहेति इह अस्मिन् आयुर्वेदतन्त्रे। पञ्चेति दोषप्रकोपनिमित्ताश्चत्वार: देवादिप्रकोपनिमित्तश्चैक इत्यर्थ: ॥ १-३ ॥

तत्र प्राग् दोषजानां निदानं सम्प्राप्तिञ्च ब्रूते तत्रेति। अभिनिर्वर्तन्ते उत्पद्यन्ते। उपक्लिष्टसत्त्वानां तैस्तैर्भावैरुपहतमनस्कानाम्। उत्सन्नदोषाणां समभिवर्धितमानसदोषाणाम्। समलेति समलानि तृणमांशुकीटमलादियुक्तानि विकृतानि दग्धपूतिपर्युषितादीनि उपहतानि नष्टानि अनुचितानि अनभ्यस्तानि वैषम्ययुक्तेन वक्ष्यमाणाहारविधिविशेषायतनानि हित्वेत्यर्थ:। उपयुञ्जानानां भुञ्जानानाम्। तन्त्रप्रयोगं तन्त्रोक्तसाधनप्रक्रियाम्। विषमाचरतां विधिं हित्वा समाचरताम्। अत्युपक्षीणदेहानां स्वभावतो बीजदोषाद्वेति तात्पर्यम्। व्याधितानां पृथगुल्लेखान्न खलु व्याधिक्षीणानामत्र परिग्रह: क्रियते। व्याधिवेगसमुद्ग्रसितानां व्याधिवेगेन विभ्रान्तचित्तानाम् कामादिभिरुपहतमनसां वा। स्वभावत एवंविधानां पुरुषाणां भूयोऽभिघातैर्मनोघ्नैर्विषयै: अभ्याहतानां जनानां मनसि उपहते बुद्धौ च प्रचलितायां व्याकुलीभूतायाम्। अस्यामवस्थायां तत्तद्दोषकोपणै: प्रकुपिता दोषा: हृदयं बुद्ध्यादीनां स्थानमुर:कोष्ठस्थं हृत्पिण्डं, मनोवहानि स्रोतांसि इन्द्रियाधिष्ठानेभ्यश्चेतनास्थानं हृदयमभिप्रचलितानि अतीन्द्रियाणि स्रोतांसि आवृत्य दूषयित्वा मार्गं वा संरुध्य उन्मादं जनयति इन्द्रियैर्हि ये ये विषया: परिगृह्यन्ते मनोवहस्रोतोदुष्टिवशात् ते मनसा न सम्यगालोच्यन्ते न वा बुद्ध्याऽध्यवस्यन्तेऽत उन्मादे पर्याकुलक्रियत्वं भवतीत्यर्थ: ॥ ४ ॥

तस्य सामान्यरूपमाह उन्मादमिति। मनआदीनां विभ्रमोऽन्यथाभाव:। मनोविभ्रमादिन्द्रियार्थेषु अन्यथाभावो भवति। बुद्धिविभ्रमस्तु नित्येऽनित्यबुद्धि: हिते चाहितबुद्धिरित्यादिवद् भवति। संज्ञा तु नामग्राहकं ज्ञानं तत्तु मानवानां स्वत:सिद्धं भवति। स्मृतिविभ्रमस्तु पूर्वानुभूतस्यान्यथाज्ञानम्। भक्तिरिच्छा तस्या विभ्रमो अनीप्सिते इच्छा ईप्सिते चानिच्छा। शीलविभ्रमस्तु यस्य यथा स्वभाव: पुरासीत् तस्य व्यतिक्रम:। आचारविभ्रमस्तु शास्त्रानुयायिव्यवहारप्रतिकूलता ॥ ५ ॥

तस्य पूर्वरूपाण्याह तस्येमानीति । शिरसः शून्यता शिरो मस्तुलुंग-रहितमिवावबोधः । आकुलता चाञ्चल्यम् । स्वनो नादबोधः । उच्छ्वासस्य दीर्घश्वासस्य आधिक्यम् । आस्यसंस्रवणं मुखादतिलालास्रावः । अनन्नाभिलाषः अक्षुधा । अरोचकस्तु भोजने स्वादराहित्यम् । हृदयग्रहः तेन पाषाणसंहननोपपन्नमिव हृदयं मन्यते । अस्थाने अकारणे विषये ध्यानादीनां प्रादुर्भावः । अभीक्ष्णं प्रायः अन्तरान्तरेत्यर्थः । उन्मत्तचित्तत्वं मनस उद्भ्रान्तत्वम् । अर्दिताकृतिकरणं मुखस्य वक्रीकरणम् । उन्मर्दितत्वञ्च व्याधेरिति स्वस्थेऽपि असति वा व्याधौ अत्याक्रान्तत्वमिव* । स्वप्ने स्वप्नावस्थायां भ्रान्तानां घूर्णितानां चलितानां द्रुतगतिशीलानाम् । अनवस्थितानामस्थिराणाम् अशस्तानाम् अमंगल्यानाञ्च रूपाणां वस्तूनां दर्शनम् । वातकुण्डलिका घूर्णिवायुः कलुषाणामाविलानामम्भसां जलानाम् आवर्ते जलभ्रम्यां निमज्जनं निमज्जतीवेति दर्शनम् । तिलपीडकचक्रं 'घानी' इति भाषा । तत्राधिरोहणम् अधिरुह्य भ्रमतीवेति दर्शनम् । चक्षुषोरक्षिबुद्बुदयोरपसर्पणं स्वस्थानात् निष्क्रान्तिरिव दर्शनं स्वप्ने इति सर्वत्र योजना ॥ ६ ॥

दोषविशेषेणोन्मादरूपाण्याह तत इति । अभिनिर्वृत्तिरुत्पत्तिः । तत्र वातिकोन्मादलक्षणान्याह तद्यथेति । अजस्रमनवरतम् । परिसरणं समन्ततो भ्रमणम् । अङ्गादीनामंगानाम् अकस्मात् कारणात् विक्षेपणम् । अनियतानां गिरामुत्सर्ग इति निरंकुशत्वेन सततं प्रलपनमित्यर्थः । अस्थाने अयोग्ये देशे काले च स्मितादीनां प्रयोगः । असाम्ना तालमानराहित्येन वीणादीनां शब्दानामनुकरणं मुखेनेत्यर्थः । अयानैर्ज्ञानवतामयोग्यैः कुक्कुरादिभिः यानं तदधिरुह्य गमनम् । अनलंकारकैः द्रव्यैः पादुकादिभिः अलंकरणं माल्यादिवद् धारणम् । अलब्धेषु अप्राप्तेषु भोज्यादिषु । अवमानः अनादरः । उत्पिण्डिते बहिर्निर्गते इव अरुणे अरुणवर्णे चात्तिणी यस्य तस्य भावः उत्पिण्डितारुणाक्षता । वातेति वातोपशयः वातगुणविपर्यस्तद्रव्योपयोगः तस्य विपर्यस्ते तद्विपरीते वातसामान्यद्रव्योपयोगे इत्यर्थः । अनुपशयता व्याधेर्वृद्धिरित्यर्थः ॥ ७ ॥

पित्तोन्मादलक्षणान्याह अमर्ष इति । अमर्षः असहिष्णुता । क्रोधः कोपः । संरम्भः कलहः । अस्थाने अकारणतः । अभिद्रवणं पलायनम् । स्वेषां स्वकीये काये परेषां अन्येषां काये वा शस्त्रादिभिरभिहननम् । अतिवेलं वेलां सीमामतिक्रम्येत्यर्थः । संरब्धं क्रोधपूर्णमिव । श्लेष्मोन्मादलक्षणान्याह स्थानमिति । एकदेशे स्थानं सततमेकस्मिन्नेव स्थानेऽवस्थानम् । तूष्णीम्भावो वाक्यराहित्यम् । सिंघाणको नासामलः कफः । रहःकामता निर्जनप्रियता । वीभत्सत्वं शरीरस्य स्नानादिशौचक्रियादोषात् घृणाजनक-

* "ज्वरश्चाभीक्ष्णमभीक्ष्णमुन्मत्तचित्तत्वमर्दिताकृतिकरणमुन्मर्दितत्वञ्च व्याधेः" इति पाठोऽत्र परिगृहीतः ॥

स्वम्। स्वप्ननित्यता निद्रालुता। शुक्लेति शुक्ले स्तिमिते प्रायोनिमेषरहिते मलोपदिग्धे पिच्चडिकालिप्ते अक्षिणी यस्य तस्य भाव: इत्यर्थ:। सान्निपातिकस्य लक्षणान्याह त्रिदोषेति। समासत: साध्यानां प्रतिकारक्रममुपदेष्टि साध्यानामिति। बधोऽत्र कायिकयन्त्रणादानम् यदुक्तं सुश्रुते—"कशाभिर्वाथ ताडयेत्.....मर्माघातं विवर्जयेत्।" इति। व्यध इति पाठस्तु प्रामादिक: शिराव्यधस्य पृथगुल्लेखात्। अवरोधनमन्धकूपादिषु निवासनम्। वित्रासनं निर्विषसर्पादिना। विस्मापनं विस्मयोत्पादनम्। अर्थमिमं पुन: पद्येनाह भवतीति ॥ ८-११ ॥

दोषजानामुन्मादानां निदानादिकं व्याख्याय आगन्तोरुन्मादस्य निदानादिकं ब्रूते यस्त्विति। समुत्थानं निदानम्। लिंगवेदनयोरैक्येऽपि आत्मपरयो: विज्ञानकर्तृत्वपार्थक्यात् पृथगुक्ति:। तेषां विशेषसमन्वित: पार्थक्ययुक्त:। जन्मान्तरीयं कर्म अस्य निदानं भवतीति केचित्कं मतं न्यक्कृत्य इहैव प्रज्ञापराध एवास्य निदानमिति स्वमतं स्थापयति केचिदित्यादिना। आत्मकृतेनाशुभेन कर्मणा उपहतम्। उपघ्नन्त: आवेशं कुर्वन्त:। तेषां पूर्वरूपाण्याह तत्रेति। पुरस्कृतस्य आक्रान्तस्य। नृशंसाभिप्रायता निर्दयकर्मरुचिता। अरतिश्चाञ्चल्यम्। ओजआदीनामुपतप्ति: विकृति:। स्वप्ने देवादिभि: प्रवर्तनं प्रवृत्तिप्रेरणम्। ननु कथं देवादयोऽशुचौ मानवशरीरे प्रविशन्त उन्मादमभिनिर्वर्तयन्तीत्याह तत्रायमिति। उन्मादयिष्यतां उन्मादं करिष्यताम्। धर्षयन्त: परिभवन्त: 'दर्शयन्त:' इति पाठे तु आत्मानमिति शेष:। आत्मगन्धं स्वशरीरगन्धम्। तेषां सामान्यरूपाण्याह तस्येमानीति। बलादिकं यस्य अत्यात्मम् आत्मानमतिरिच्य भवति। यस्य यथा स्वाभाविकं बलादिकमासीत् देवाद्यन्मत्तस्य तत् तदरिच्यवर्तत इत्यर्थ: ॥ १३-१६ ॥

ननु ते कानि च्छिद्राण्यभिगम्य कदा कुत्र वा मानवानाक्रामन्तीत्याह उन्मादयिष्यतामिति। अन्तरेषु छिद्रेषु अपराधरूपेष्वित्यर्थ:। अभिगमनीया आक्रम्या:। पर्वसन्धिषु पर्वसु अष्टमीचतुर्दश्यादिषु सन्धिषु प्रात: सन्ध्यौ सायंसन्ध्यौ च। विगुणे विधिहीनत्वात् निर्गुणीभावे। महाग्रहस्य शनैश्चरस्य उपगमने शनेर्दशायामथवा महाग्रहस्य राहोरुपगमने ग्रहणकाले इत्यर्थ:। चैत्य: ग्राम्यदेवायतनवृक्ष:। मांसादीना मुच्छिष्टे भुक्तावशेषे। दिग्वाससि नग्नावस्थायाम्। द्विजादीनामभिधर्षणे अवमाननायामित्यर्थ: ॥ १७ ॥

देवादीनामुन्मादकरणे प्रयोजनमुद्दिश्य चिकित्सावैशेष्यं भवतीति तान्याह त्रिविधमिति। हिंसा वध:, रतिरुपभोग:, अभ्यर्चना पूजा। एतत् प्रयोजनत्रयम् उन्मत्ताचारविशेषेण ज्ञातव्यम्। तत्र हिंसार्थकस्यासाध्यत्वादाचारविशेषो कण्ठत उक्त:। रत्यर्थकस्य नानाविषयेषु उपभोगप्रियतां दृष्ट्वा विद्यात्। अभ्यर्चनार्थकस्य च तत्तत्पूजाप्रवृत्तिदर्शनात्। स्थलात् समतलात्

श्वभ्रे अतिगम्भीरे गर्त्ते कूपादिष्वित्यर्थः । आगन्तोः साधनक्रमं समासतो ब्रूते तयोरिति । तयोः रत्यभ्यर्चनार्थकयोः आगन्तून्मत्तयोः । हिंसार्थकस्या-साध्यत्वान्नोपक्रमः कथितः । गमनन्तु गुरुद्विजादीनामनुगमनं तीर्थादिगमनं वा ॥ १८–२० ॥

पुनः प्रकृत्यन्तरेण भिद्यमानानां पञ्चानामुन्मादानां भेदान्तरमाह ते त्विति । अनुबध्नीत संसृष्टतां प्राप्नुतः । कदाचिदिति न सर्वदा । उभयोर्निदान-सेवयैव भवितुमर्हतीत्याह यथोक्तहेतुसंसर्गात् । संसृष्टं मिलितमुभयप्रकार-मित्यर्थः । असाध्यसंयोगं असाध्ययोर्निजागन्त्वोः सान्निपातिकहिंसार्थयोः संयोगो यत्र तम् । साध्यासाध्यसंयोगम् एकदोषजहिंसार्थयोः रत्यर्थकसान्नि-पातयोर्वा संयोगो यत्र तमसाध्यं विद्यात् । साधनं चिकित्सा ॥ २१ ॥

ननु प्रागेवोक्तं—

"कालबुद्धीन्द्रियार्थानां योगो मिथ्या न चाति च ।
द्वयाश्रयाणां व्याधीनां त्रिविधो हेतुसंग्रहः ॥" इति ।

न चात्रागन्तुके व्याधौ ते च हेतवो संगच्छन्ते इति नेत्याह भवन्ति चात्रेति । ते च देवादयः स्वयमक्लिष्टमात्मनः प्रज्ञापराधेन नोपहतं मानवं न उपक्लिश्नन्ति । ये च देवादयः एनं स्वयमुपहतम् अनुवर्तन्ते स क्लैशो व्याधिर्न तद्धेतुकः देवादिहेतुको भवति । हि यतः तत्र तत्र व्याधौ तेषां देवादीनां कृतकृत्यता कर्तृत्वं नास्ति । अतएव आत्मनः कर्मजे प्रज्ञा-पराधाज्जाते व्याधौ सति बुधः देवान् देवादीन् न अभिशंसेत् परिवदेत् । आत्मानमेव सुखदुःखयोः कर्तारं मन्येत । तस्मात् श्रेयस्करं मार्गं प्रज्ञाऽ-पराधादिपरिहाररूपं पन्थानं प्रतिपद्येत आश्रयेत् नो तत्र त्रसेत् न भयं कुर्यात् । कथमात्मानमेव कर्तारं मन्ये इत्याह देवादीनामिति । उपचितिः पूजनम् । ते हितोपसेवनं देवपूजा च तेभ्यो विरोधः तद्विपरीतकर्मकरणं वा सर्वमात्मनि आयत्तम् । अतिरोहितार्थमन्यत् ॥ २२–२६ ॥

अध्यायार्थं निवेद्याध्यायं समापयति तत्र श्लोक इति ॥ २७ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां निदानस्थाने उन्मादनिदानं नाम सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ।

तस्मिन् हि दक्षाध्वरध्वंसे सञ्जातानां व्याधीनां पारिशेष्याद् अप-स्मारनिदानं व्याचिकीर्षुरध्यायान्तरमारभते अथात इत्यादिना । इहेति । इह आयुर्वेदतन्त्रे । तस्य निदानं संप्राप्तिञ्च ब्रूते त एवंविधानामिति । प्राणभृतां मानवानाम् इत्यर्थः सामान्यशब्दस्य विशेषपरत्वम् । उद्भ्रान्त-विषमबहुदोषाणाम् उद्भ्रान्ताः प्रकुपिताः विषमाः असाम्ना क्षयवृद्धिमापन्नाः बहवो दोषा यत्र तेषाम् । समलेत्यादि पूर्वाध्याये व्याख्यातम् । अदुपचीण-देहानां वा विषमा अन्याश्चेष्टाः व्यायामादीनि वैषम्येण समाचरताम् ।

त्वम्। स्वप्ननित्यता निद्रालुता। शुक्लेति शुक्ले स्तिमिते प्रायोनिमेषरहिते मलोपदिग्धे पिच्चडिकालिप्ते अक्षिणी यस्य तस्य भाव: इत्यर्थ:। सान्निपातिकस्य लक्षणान्याह त्रिदोषेति। समासत: साध्यानां प्रतिकारक्रममुपदेष्टुं साध्यानामिति। बधोऽत्र कायिकयन्त्रणादानम् यदुक्तं सुश्रुते—"कशाभिर्वाथ ताडयेत् ..... मर्माघातं विवर्जयेत्।" इति। व्यध इति पाठस्तु प्रामादिक: शिराव्यधस्य पृथगुल्लेखात्। अवरोधनमन्धकूपादिषु निवासनम्। वित्रासनं निर्विषसर्पादिना। विस्मापनं विस्मयोत्पादनम्। अर्थमिमं पुन: पद्येनाह भवतीति ॥ ८-११ ॥

दोषजानामुन्मादानां निदानादिकं व्याख्याय आगन्तोरुन्मादस्य निदानादिकं ब्रूते यस्त्विति। समुत्थानं निदानम्। लिंगवेदनयोरैक्येऽपि आत्मपरयो: विज्ञानकर्तृत्वपार्थक्यात् पृथगुक्ति:। तेषां विशेषसमन्वित: पार्थक्ययुक्त:। जन्मान्तरीयं कर्म अस्य निदानं भवतीति केचित्कं मतं न्यक्कृत्य इहैव प्रज्ञापराध एवास्य निदानमिति स्वमतं स्थापयति केचिदित्यादिना। आत्मकृतेनाशुभेन कर्मणा उपहतम्। उपघ्नन्त: आवेशं कुर्वन्त:। तेषां पूर्वरूपाण्याह तत्रेति। पुरस्कृतस्य आक्रान्तस्य। नृशंसाभिप्रायता निर्दयकर्मरुचिता। अरतिश्चाञ्चल्यम्। ओजआदीनामुपतप्ति: विकृति:। स्वप्ने देवादिभि: प्रवर्तनं प्रवृत्तिप्रेरणम्। ननु कथं देवादयोऽशुचौ मानवशरीरे प्रविशन्त उन्मादमभिनिर्वर्तयन्तीत्याह तत्रायमिति। उन्मादयिष्यतां उन्मादं करिष्यताम्। धर्षयन्त: परिभवन्त: 'दर्शयन्त:' इति पाठे तु आत्मानमिति शेष:। आत्मगन्धं स्वशरीरगन्धम्। तेषां सामान्यरूपाण्याह तस्येमानीति। बलादिकं यस्य अत्यात्मम् आत्मानमतिरिच्य भवति। यस्य यथा स्वाभाविकं बलादिकमासीत् देवाद्यन्मत्तस्य तत् तदरिच्यवर्तत इत्यर्थ:॥ १३-१६ ॥

ननु ते कानि च्छिद्राण्यभिगम्य कदा कुत्र वा मानवानाक्रामन्तीत्याह उन्मादयिष्यतामिति। अन्तरेषु छिद्रेषु अपराधरूपेष्वित्यर्थ:। अभिगमनीया आक्रम्या:। पर्वसन्धिषु पर्वसु अष्टमीचतुर्दश्यादिषु सन्धिषु प्रात:सन्ध्यौ सायंसन्ध्यौ च। विगुणे विधिहीनत्वात् निर्गुणीभावे। महाग्रहस्य शनैश्चरस्य उपगमने शनेर्दशायामथवा महाग्रहस्य राहोरुपगमने ग्रहणकाले इत्यर्थ:। चैत्य: ग्राम्यदेवायतनवृक्ष:। मांसादीना मुच्छिष्टे भुक्तावशेषे। दिग्वाससि नग्नावस्थायाम्। द्विजादीनामभिधर्षणे अवमाननायामित्यर्थ: ॥ १७ ॥

देवादीनामुन्मादकरणे प्रयोजनमुद्दिश्य चिकित्सावैशेष्यं भवतीति तान्याह त्रिविधमिति। हिंसा वध:, रतिरुपभोग:, अभ्यर्चना पूजा। एतत् प्रयोजनत्रयम् उन्मत्ताचारविशेषेण ज्ञातव्यम्। तत्र हिंसार्थकस्यासाध्यत्वादाचारविशेषो कण्ठत उक्त:। रत्यर्थकस्य नानाविषयेषु उपभोगप्रियतां दृष्ट्वा विद्यात्। अभ्यर्चनार्थकस्य च तत्तत्पूजाप्रवृत्तिदर्शनात्। स्थलात् समतलात्

श्वभ्रे अतिगम्भीरे गर्त्ते कूपादिष्वित्यर्थः । आगन्तोः साधनक्रमं समासतो ब्रूते तयोरिति । तयोः रत्यभ्यर्चनार्थकयोः आगन्तून्मत्तयोः । हिंसार्थकस्यासाध्यत्वान्नोपक्रमः कथितः । गमनन्तु गुरुद्विजादीनामनुगमनं तीर्थादिगमनं वा ॥ १८–२० ॥

पुनः प्रकृत्यन्तरेण भिद्यमानानां पञ्चानामुन्मादानां भेदान्तरमाह ते त्विति । अनुबध्नीत संसृष्टतां प्राप्नुतः । कदाचिदिति न सर्वदा । उभयोर्निदानसेवयैव भवितुमर्हतीत्याह यथोक्तहेतुसंसर्गात् । संसृष्टं मिलितमुभयप्रकारमित्यर्थः । असाध्यसंयोगं असाध्ययोर्निजागन्त्वोः सान्निपातिकहिंसार्थयोः संयोगो यत्र तम् । साध्यासाध्यसंयोगम् एकदोषजहिंसार्थयोः रत्यर्थकसान्निपातयोर्वा संयोगो यत्र तमसाध्यं विद्यात् । साधनं चिकित्सा ॥ २१ ॥

ननु प्रागेवोक्तं—

"कालबुद्धीन्द्रियार्थानां योगो मिथ्या न चाति च ।
द्वयाश्रयाणां व्याधीनां त्रिविधो हेतुसंग्रहः ॥" इति ।

न चात्रागन्तुके व्याधौ ते च हेतवो संगच्छन्ते इति नेत्याह भवन्ति चात्रेति । ते च देवादयः स्वयमक्लिष्टमात्मनः प्रज्ञापराधेन नोपहतं मानवं न उपक्लिश्नन्ति । ये च देवादयः एनं स्वयमुपहतम् अनुवर्तन्ते स क्लैशो व्याधिर्न तद्धेतुकः देवादिहेतुको भवति । हि यतः तत्र तत्र व्याधौ तेषां देवादीनां कृतकृत्यता कर्तृत्वं नास्ति । अतएव आत्मनः कर्मजे प्रज्ञापराधाज्जाते व्याधौ सति बुधः देवान् देवादीन् न अभिशंसेत् परिवदेत् । आत्मानमेव सुखदुःखयोः कर्तारं मन्येत । तस्मात् श्रेयस्करं मार्गं प्रज्ञाऽपराधादिपरिहाररूपं पन्थानं प्रतिपद्येत आश्रयेत् नो तत्र त्रसेत् न भयं कुर्यात् । कथमात्मानमेव कर्तारं मन्ये इत्याह देवादीनामिति । उपचितिः पूजनम् । ते हितोपसेवनं देवपूजा च तेभ्यो विरोधः तद्विपरीतकर्मकरणं वा सर्वमात्मनि आयत्तम् । अतिरोहितार्थमन्यत् ॥ २२–२६ ॥

अध्यायार्थं निवेद्याध्यायं समापयति तत्र श्लोक इति ॥ २७ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां निदानस्थाने उन्मादनिदानं नाम सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ।

तस्मिन् हि दक्षाध्वरध्वंसे सञ्जातानां व्याधीनां पारिशेष्याद् अपस्मारनिदानं व्याचिकीर्षुरध्यायान्तरमारभते अथात इत्यादिना । इहेति । इह आयुर्वेदतन्त्रे । तस्य निदानं संप्राप्तिञ्च ब्रूते त एवंविधानामिति । प्राणभृतां मानवानाम् इत्यर्थः सामान्यशब्दस्य विशेषपरत्वम् । उद्भ्रान्तविषमबहुदोषाणाम् उद्भ्रान्ताः प्रकुपिताः विषमाः असाम्या क्षयवृद्धिमापन्नाः बहवो दोषा यत्र तेषाम् । समलेत्यादि पूर्वाध्याये व्याख्यातम् । अदुपचीणदेहानां वा विषमा अन्याश्चेष्टाः व्यायामादीनि वैषम्येण समाचरताम् ।

प्रागेव कारणान्तरेण शरीरे येषां रजस्तमसोर्वृद्धिरासीत् तेषां पुनः समले-त्यादिकारणैर्यथा दोषप्रकोपो भवति पुनस्तथैव रजस्तमसोऽप्यभिवृद्धि-र्भवति इत्याह प्रकुपिता दोषाः रजस्तमोभ्यामुपहतचेतसामिति । पुनः सञ्चयकारणान् न द्विरुक्तिः । एवं सञ्चयप्रकोपावुक्त्वा प्रसरस्थानसंश्रया-वाह अन्तरात्मन इत्यादि । श्रेष्ठतममित्यत्र यद्यपि "अतिशायने तमबिष्ठनौ इति शब्दस्मृतेरनुशासनादेकत्र एकार्थप्रत्ययद्वयप्रयोगो दोषावह इति प्रतिभाति तथापि "सरूपः प्रत्ययो नेष्टः विरूपस्तु भवेदिह ।" इति गोपीचन्द्रानु-शासनाद् बहुशिष्टप्रयोगदर्शनाच्च नासमीचीनो भवति । महाभारते च "युधिष्ठिरः श्रेष्ठतमः कुरूणाम्" इति भागवते च "सुहृच्छ्रेष्ठतमो नाथ" इत्यादिप्रयोगो दृश्यते । जीवात्मनः अद्वितीयं स्थानमित्यर्थः । यद् वक्ष्यति "हृदयं चेतनाधिष्ठानमेकम्" इति । अत्र एकमित्यद्वितीयमित्यर्थः । इन्द्रिया-यतनानि पञ्चेन्द्रियाधिष्ठानानि इन्द्रियवहस्रोतांसि च उपसृत्य तत्र प्रसरं कृत्वा पर्यवतिष्ठन्ते स्थानसंश्रयं कुर्वन्ति । तत्रावस्थायामपि न व्याधिं जनयन्ति हेत्वन्तरञ्चापेक्षन्ते यदुक्तं—"तत्रस्थाश्च विलम्बन्ते ..... भूयो हेतु-प्रतीक्षिणः" इति । पुनस्ते यदा कामादिभिः सामयिकैर्हेतुभिरीरिता वर्धिताः सन्तः तानि हृदयादीनि अभि समन्ताद् व्याप्य पूरयन्ति तदा सहसा अकस्मात् जन्तुर्मानवो अपस्मरति अपस्मारग्रस्तो भवति । एतेन सामयिकहेतुवेगोपशमात् दोषाः न्यूनबला यदा हृदयादीनि सम्यक् पूरयितु-मसमर्था भवन्ति तदास्य अपस्मारविमोक्षः स्यादिति ज्ञेयम् । अपस्मारस्य सामान्यं लक्षणमाह अपस्मारमिति । आवस्थिकं कादाचित्कं तमःप्रवेश-मज्ञानतामिति यावत् । तमसो मोहहेतुत्वात् तत्प्रवेशस्तु अज्ञानतार्थं व्यनक्ति। तत्र हेतुमाह स्मृतीति । संप्लवाद् विकृतिवशात् । बीभत्सचेष्टत्वमस्य मूर्च्छा-दिभ्यो वैशिष्ट्यं सूचयति । बीभत्सचेष्टता त्वत्र फेनोद्वमनांगादिविकृत्या ज्ञातव्या ॥ १–५ ॥

तस्य पूर्वरूपाण्याह तस्येमानीति । भ्रूव्युदासः भ्रुवोरुत्क्षेपणम् । सिंघाणकस्तु नासागतः कफः । हृदयग्रहः हृतकम्पः । मोहो मनोमोहः । तमसो दर्शनं द्राग् अन्धकारदर्शनं दिवापि । भ्रमः चक्रारूढस्येवानुभूतिः । स्वप्ने च मद्यादीनां दर्शनम् । पूर्वरूपन्तु स्थानसंश्रिते दोषे भवति तत एव व्याध्युत्पत्तिर्भवतीत्याह तत इति ॥ ६–७ ॥

तस्य दोषभेदेन विशेषरूपं विवक्षुरादौ वातिकस्य लक्षणमाह तद्-यथेति । अभीक्ष्णं प्रायः । क्षणेन स्वल्पकाल एव गते । स शीघ्रं संज्ञां लभते इत्यर्थः । उत्पिण्डिताक्षं उत्पिण्डिते ऊर्ध्वं गते अक्षिणीति सामान्य-शब्दस्य विशेषपरत्वाद् अक्षितारके यस्य तम् । अतीवाध्मातग्रीवं आध्माता पृष्ठतोऽवनामितशिरस्त्वेन स्तब्धत्वेन च पुरत उन्नमिता ग्रीवा यस्य तम् । आविद्धशिरस्कं पृष्ठतोऽवनामितमस्तकम् । अनवस्थितानि सततविक्षेपण-शीलानि सक्थ्यादीनि यस्य तम् । सक्थिशब्देनात्रोरुर्बोध्यते पादस्तु तदधो-

भाग: । विषमविनतांगुलिं वैषम्येण बद्धमुष्टिम् । अनवस्थितादिरूपदर्शनञ्चात्र प्राङ्मोहकाले ज्ञेयम् । पैत्तिकापस्मारलक्षणमाह अभीक्ष्णमिति । पैत्तिकेऽपि स्वल्पेन कालेन प्रतिबुध्यत इत्याह क्षणेनेति । आस्फालयन्तं हस्तपादेन भ्रान्तम् । रुधिरोक्षितरूपादिदर्शनन्तु मन:प्रमोहप्रारम्भे ज्ञेयम् । श्लेष्मजस्य रूपाण्याह चिरादिति । चिराद् दीर्घकालव्यवधानात् । चिरात् संज्ञां लभमानमित्यस्य मोहावस्था दीर्घं कालं यावत् तिष्ठतीत्यर्थ: । पतन्तं भुवि ऋजुतया शयानम् । हस्तपादादिविक्षेपस्त्वत्र न भवतीति तात्पर्यम् । सान्निपातिकापस्मारस्य रूपाण्याह समवेतेति ॥ ८-११ ॥

तेषामिति । तेषां चतुर्णामपस्माराणामागन्तु: देवाद्यावेशोऽपि अनुबन्धो भवति कदाचित् अप्यर्थोऽयमेवकार: । तेन न तत्र पञ्चमत्वापत्ति: तस्यानुबन्धरूपत्वेन न पृथङ्निर्देश: । उत्तरकालं चिकित्सिते नवमाध्याये । लिंगाधिक्यमागन्तुर्लिंगानुबन्धात् । यल्लिंगं दोषलिंगानुरूपं न भवतीत्याह अदोषेति । तस्योपक्रममाचष्टे हितानि च ॥ १२-१४ ॥

निदानस्थानमुपसंजिहीर्षन् तत्स्थानोक्तानां व्याधीनां विप्रकृष्टनिदानमाह तस्मिन्निति । विद्रवतां पलायमानानाम् । नक्षत्रराजस्य चन्द्रमस: । पूर्वोक्तोऽर्थ: त्रिविधशिष्यबुद्धिव्यवसायार्थं पुन: पद्यै: समनुगीयते भवन्ति चात्रेति । समाहिता: सावधाना: । साधारणं दैवव्यपाश्रयं युक्तिव्यपाश्रयञ्च ॥ १५-१६ ॥

निदानस्थानमुपसंहरन् सर्वव्याधिसामान्यान् कांश्चिदर्थान् ब्रवीति । निदानार्थकर इति । कश्चिद् रोगोऽपि अन्यस्य रोगस्य निदानार्थकर: निदानस्य अर्थं व्याध्युत्पादनरूपं प्रयोजनं करोतीति उपलभ्यते दृश्यते । अत्र निदानमिति वक्तव्ये निदार्थकर इत्युक्त्या परिणते व्याधौ पुनर्निदानोपसेवया उपबृंहितबल एव तथा कर्तुं समर्थ इति द्योतयति । जठरं दु:खम् उदरं व्याधिम् । अथोऽनन्तरं तज्जन्य इत्यर्थ: । क्षय: क्षयकास: । शोषस्य राजयक्ष्मण: । पूर्वोक्तमर्थं स्फोरयति त इति । पूर्वमुत्पत्त्यनन्तरमेव । पश्चात् परस्तान् निदानाद्युपसेवादिभिर्लब्धबला इत्यर्थ: । पुनस्तेषां प्रकृत्यन्तरं विवृणोति उभयोरिति । उभयो: निदानरोगयो: अर्थं प्रयोजनं कुर्वन्तीति उभयार्थकरा: । एकस्य निदानस्यैव अर्थं कुर्वन्तीति एकार्थकारिण: । रोगा दृष्टा-इति योजना । अर्थमिदं व्याचिख्यापयिषन् पुनराह कश्चिद्धीति । य एकार्थकारी कश्चिद् रोग: अन्यस्य व्याधेर्हेतुर्भूत्वा स्वयमुपशाम्यति यथा शान्तेऽभिष्यन्दे तन्मूलस्य अव्रणशुक्रस्य प्रादुर्भाव: । पुन: कश्चिदुभयार्थकारी स्वयं नोपशाम्यति अन्यस्य च हेतुत्वं करोति—यथा लीहा न निवर्तते उदरञ्च करोति यथा वा विद्यमान एवार्शसि तन्मूलयोर्गुल्मोदरयोरुत्पत्तिर्भवतीति ॥ २०-२५ ॥

ननु कथमेवं व्याधीनां सांकर्यं भवतीत्याह एवमिति । प्रयोगस्य चिकित्साया: अपरिशुद्धत्वात् अविशुद्धत्वात् तथा पूर्वोक्तेन प्रकारेण उप-

वृंहितबलेभ्य: अन्येभ्य: व्याधिभ्य: अन्येषां व्याधीनां सम्भवात् उत्पत्तेर्हेतोरेवं व्याधिसंकरा: दृश्यन्ते । ननु का नाम अविशुद्धा चिकित्सा इत्याह प्रयोग इति । य: प्रयोगश्चिकित्सा व्याधिं यदर्थं प्रयुक्तं तं शमयेत् परन्तु अन्यं व्याधिम् उदीरयेत् सृजेत् चिकित्साजन्य एव चेदन्यो व्याधिर्भवेदित्याशय: । नासौ प्रयोगो विशुद्ध: । शुद्ध: प्रयोगस्तु व्याधिं शमयेत् । परन्तु नान्यं व्याधिं कोपयेत् । अर्थमिमं सुश्रुत: पदान्तरैराह यथा—

"या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च ।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत् ॥" इति ॥ २६-२७ ॥

पुनर्व्याधेरवस्थानन्तरं प्रकटीकरोति एक इति । अनेकस्य व्याधेरिति योजना । व्याधेर्लिंगवैचित्र्यमाह लिंगमिति । चिकित्सावैचित्र्यमाह एकेति । शान्ति: चिकित्सा ॥ २८-३६ ॥

सुखसाध्यादीनां लक्षणान्याह सुखसाध्य इति । नाशेषतां याति न निर्मूलो भवतीत्यर्थ: । अपरस्त्वसाध्य प्रत्याख्येय: । स च सर्वा: क्रिया: अतिवर्तते न काभिरपि चिकित्साभिस्तत्र किमपि फलं भवति तेनैव च म्रियत इत्यर्थ: । पादावचारात् भिषगादिपादचतुष्टयस्यायथावत् सम्मेलनादित्यर्थ: । दैवाज्जन्मान्तरकर्मवशाद्वा । भावान्तरं साध्या अपि याप्यत्वं प्रत्याख्येयत्वं वा यान्ति प्राप्नुवन्ति । ननु न केवलं व्याधीनां निदानज्ञानेन केऽपि चिकित्सितुं समर्था: तत्र तेषां त्रिविधा अवस्था गतिश्चापि ज्ञातव्या इत्याह वृद्धिस्थानेति । प्राज्ञो भिषक् रोगाणामिति रोगकर्तृणां वृद्धिस्थानक्षयावस्थामित्यनेन त्रिविधां गतिमुपलक्षयेत् । पुनर्वृद्ध्यादित्रिविधगतिवद् अपरापि या या त्रिविधा गतिस्तेषां वर्तते ता अपि विजानीयात् यदुक्तं—

"क्षयस्थानं च वृद्धिश्च दोषाणां त्रिविधा गति: ।
ऊर्ध्वञ्चाधश्च तिर्यक् च विज्ञेया त्रिविधाऽपरा ॥
त्रिविधा चापरा कोष्ठशाखामर्मास्थिसन्धिषु ॥" इति (सू० १७ अ०)

पुनश्च सुसूक्ष्मामपि देहाग्निबलचेतसां देहाग्नीनां सप्तानां धात्वग्नीनां पञ्चानां भूताग्नीनां तथा पाचकाग्नेश्चेति त्रयोदशविधानां शरीरबलस्य चेतसश्च अवस्थामित्येकदेशेनान्वय: । उपलक्षयेत् लिंगादिना विशेषतो जानीयात् । हि यत: एतैर्लक्षणैर्व्याध्यवस्थाविशेषात् ज्ञात्वा ज्ञात्वा तस्यां तस्यामवस्थायां तत्तत् † द्रव्यादिकं श्रेय: हितमिति प्रपद्यते जानाति । दोषाणां गतिविशेषज्ञानेनैव व्याध्यवस्थाविशेषो ज्ञातव्य इत्याशय: । उदाहरणेनैकेन अर्थमिमं स्फुटीकरोति प्राय इति । तिर्यग्गता: शाखागता: सर्वशरीरव्याप्ता इति तात्पर्यम् । एवं दोषाणां गतिं ज्ञात्वा तत्र सर्वशरीरगे दोषे त्वरया क्रियां न कुर्यात् प्रभूतदोषहरभेषजोपयोगेनेत्याशय: । कथमिति हेतुगर्भं विशेषणमाह देहाग्निबलविदिति तेन च देहमूलानां दोषाणां नाशात् देहबलं

† तत्तच्छ्रय:, इति पाठोऽत्रादृत: ।

नश्येत पुनश्च मात्राधिक्यादग्निबलमपीति निष्कर्षः। अतस्त्वत्र किं कुर्यादित्याह प्रयोगैरिति। अल्पाल्पमात्रया भूयो भूयः प्रयोगेणेति बहुवचनम्। अथवा सुखं स्रोतोमुखशोधनेन वातनिग्रहेण वा। यथासन्नमिति श्लेष्मणः आमाशयगतत्वेन वमनेन, पित्तस्य चामपक्वाशयगतत्वाद् विरेचनेन, तथा च वायोः पक्वाशयगतत्वाद् वस्तिनेत्यर्थः। हरेत निर्हरेत्॥ ३७-४३॥

ननु निदाने चोक्तानि लिंगानि सर्वाण्येवारोचकादीनि पृथग्व्याधय एव अतस्त्वत्रापि पृथक् तत्तद्व्याधिहर्यः क्रियाः कर्तव्याः नेत्याह ज्ञानार्थमिति। संग्रहे व्याधिनिदानप्रकरणे। ते व्याधयोऽपि तदात्वे अन्यव्याधिरूपत्वे तानि लिंगानि इति मन्तव्यानि न तु पृथगामयाः। अतो मूलव्याधिप्रतिक्रियात एव तेषामुपशान्तिर्भवेदिति ज्ञातव्यम्। पञ्चनिदानेषु निदानस्यैव प्राधान्यमाह विकार इति। विकारो विषमावस्था प्रकृतिस्तु साम्यावस्था दोषाणाम्। एतद्द्वयं तद्धेतुवशगं तत्तद्धेत्वधीनं भवति। हेतोरभावात् निदानाभावान्न प्रवर्तते। वक्ष्यति च—

"हेतुस्तु सुखदुःखानां योगो दृष्टश्चतुर्विधः।
सन्तीन्द्रियाणि सन्त्यर्थाः योगो नच नचास्ति रुक्।
न सुखं, कारणं तस्माद् योगो दृष्टश्चतुर्विधः॥" इति।

तत्र समयोगः प्रकृतेः, नातिमिथ्यायोगाश्च विकारस्य कारणं जानीयात्। निगदव्याख्यातमन्यत्॥ ४४-४५॥

अध्यायार्थं निवेद्याध्यायं समापयति पुनः स्थानार्थञ्च समासतो निवेद्य स्थानमपीत्याह तत्र श्लोका इति॥ ४६-४८॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां निदानस्थाने अपस्मारनिदानं नामाष्टमोऽध्यायः॥ ८॥

कृता ज्योतिषचन्द्रेण जगदम्बाप्रसादतः।
विशदार्था समाप्तेयं निदानस्थानटिप्पणी॥

विमानस्थानम्।

प्रथमोऽध्यायः।

यदुक्तं—

"रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्।
ततः कर्म भिषक् पश्चाज् ज्ञानपूर्वं समाचरेत्॥" इति

तत्र खल्वाद्ये स्थानद्वये विकारो भेषजञ्च सम्यक् परीक्षितं महर्षिणा। साम्प्रतं कर्तव्ये कर्मणि वक्तव्येऽपि न खलु रसादिमानाज्ञः क्रियाकुशलो भवतीति रसदोषादिमानज्ञानार्थं स्थानान्तरमारिरिप्सुः रसादिमानं नूनमादौ ज्ञातव्यमिति रसविमानं व्याचिख्यासुः प्रथममध्यायमारभते अथात इत्यादिना। तत्र स्थानस्यास्य प्रयोजनाभिधेयौ प्राह इहेति। इह आयुर्वेदे। व्याधीनां निमित्तादिशब्देन साकल्येन निदानस्थानोक्तविषयाणां परिग्रहः क्रियते। अनुप्रविश्य सम्यग्ज्ञात्वा रसद्रव्यदोषभेषजादीनां † मानं ज्ञेयं भवति। कथमित्याह रसादिमानायत्तत्वात् क्रियायाः। अज्ञाते तेषां माने न केचिच्चिकित्सां कर्तुमर्हन्तीत्यर्थः॥ १-३॥

अध्यायार्थमुद्दिशति तत्रेति। आदावस्मिन्नध्याये। ते रसाः सम्यगुपयुज्यमानाः सर्वरससमानतया तत्तद्रसविशिष्टद्रव्याण्यभ्यवह्रियमाणाः। यापयन्ति पालयन्ति। मिथ्योपयुज्यमानाः प्रकृत्यादिकं न्यक्कृत्य एकरसाभ्यासादिना आह्रियमाणाः। दोषप्रभावं व्याकरोति दोषा इति। प्रकृतिभूताः साम्यावस्थायामवस्थिताः शरीरोपकारकाः उपादानकारणभूताः देहधातून् पोषयन्तः निमित्तकारणभूताः शरीरक्रियोष्माश्लेषणानि यथावत् संरक्षन्तः शरीरं परिचालयन्तश्चेत्यर्थः। विकृतिमापन्नाः विषमाः देहधातूनां वैषम्यमापादयन्तः शरीरक्रियादिकांश्च विषमं कुर्वन्त इत्यर्थः॥ ४-५॥

रसदोषयोः स्वकं प्रभावमुपदिश्य तयोः सम्बन्धं विवृणोति तत्र दोषमिति। त्रयस्त्रयो रसा एकैकं दोषं जनयन्ति कार्यकारणभावेनोत्पादयन्ति शरीरान्तःपक्वास्त्रयो रसा एकैकं दोषमुत्पादयन्ति एवं त्रयो रसा एकैकं शमयन्ति इतरदोषवर्धनेन साम्यमापादयन्तीत्यर्थः। तत्र के नाम रसाः कं दोषं वर्धयन्ति कं वोपशयन्ति इति नामग्राहं वक्ति तद्यथेति। एवं वर्धनोपशमनयोर्युक्तिमाह रसदोषेति। रसदोषसन्निपाते रसदोषयोरन्तःशरीरे मेलने सति। ये रसाः यैर्दोषैः समानगुणाः एकगुणविशिष्टाः समानगुणभूयिष्ठाः वा आधिक्येन तद्गुणसमन्वितास्ते तान् वर्धयन्ति अत्र रसशब्देन रसवद्द्रव्यस्य ग्रहणमिति प्रागेवोक्तम्। तत्तद्द्रव्याणि जरणकाले आदौ देहश्लेष्मसंसर्गात् मधुरीभवन्ति। तदैव तद्गतमधुररसांशात् जातः कफः शरीरकफं वर्धयति। ततस्त्र तान्येव देहनिःसृतपित्तसंसर्गाद् अम्लत्वं यान्ति

† "रसद्रव्यदोषविकारभेषज-देश-काल-बलशरीरसाराहार" इत्यादिः पाठः।

तदा तद्गतास्लांशात् उदीर्णं पित्तं शरीरपित्तं वर्धयति। एवं वायोरपि द्रव्यस्य तिक्तकषायादिरसादाविर्भावः तेन च शरीरवायोः वर्धनं भवति। वृद्धिह्रासौ त्वापेक्षिकौ। अत्र केवलमधुररसाभ्यासेन इतरदोषाभ्यां कफस्यैव आधिक्येनोत्पत्तिवशात् तस्य वर्धनं स्यात्। एवमितरदोषोत्पादकैः रसैस्तयोर्वृद्धिवशात् सर्वदोषसाम्यं भवति तदेव शमनमिति कथ्यते एवं सर्वत्र। एतद्व्यवस्थाहेतोः पूर्वोक्तनियमबलादित्यर्थः। परस्परेणासंसृष्टानां नेतरेतरमिलितानां केवलानां रसानां षट्त्वं नाधिकं नाल्पं वा। दोषाणामपि त्रित्वमायुर्वेदे उपदिश्यते। ननु संसृष्टाः दोषभेदाः रसभेदाश्च प्रोगेवोक्ताः तर्हि तेषां कथं षट्त्वं त्रित्वं वावतिष्ठते इत्याह संसर्गाणामानन्त्यात् न खलु तेषां कर्मनिर्देशः सुकरो भवति इति तेषामानन्त्यमाह संसर्गेति। हि यतः एषां रसदोषाणां संसर्गविकल्पविस्तरः संसर्गेण सममात्रसंयोगेन विकल्पेन अंशांशभेदेन च विस्तरो यः समूहो भवति स चापरिसंख्येयः अप्रमितो भवति। संसर्गजभेदस्य संख्येयत्वेऽपि विकल्पजन्यभेदस्यापरिसंख्येत्वात् साकल्येन भेदाः अपरिसंख्येया एव भवन्ति। ननु तर्हि कथं सर्वेषां व्याधीनां चिकित्सा भवति, सन्ति हि रोगाः संसर्गविकल्पतो बहुभेदभिन्नाः भेषजान्यापि नानारसविकल्पभिन्नानि अतस्तस्मिंस्तस्मिन् संसृष्टदोषे तत्तद्भेषजं यथा प्रयोज्यं भवति तदाह तत्र खल्विति। तत्र च रसदोषप्रभावमेकैकशस्येन पृथक् पृथग् अंशांशतः अभिसमीक्ष्य ततः प्रयोज्यद्रव्यमिदमेवंप्रभावं विकारश्चायमेवंप्रभावः इति व्यवस्येत् निश्चिनुयात्॥ ७-९॥

द्रव्यविकारयोः पृथग् रसज्ञानेन द्रव्यप्रभावनिर्णयः दोषाणां पृथक्प्रभावात् विकारप्रभावनिर्णयस्तु न सर्वत्र भवितुमर्हति। संसृष्टानां हि दोषाणां रसानाञ्च द्विविधः संसर्गो भवति प्रकृतिसमसमवायः विकृतिविषमसमवायश्चेति। तत्र पूर्वोक्तं विधानं प्रकृतिसमसमवेते द्रव्ये विकारे वा भवति। तत्र हि द्रव्यावयवाः रसाः विकारावयवाः दोषाश्च प्रकृताववस्थायैव समवेता भवन्तीति स्वानुरूपाः गुणाः द्रव्ये स्वान्येव लक्षणानि विकारे चोपलभ्यन्ते तेन च समुदायप्रभावत्वं अवयवप्रभावैरेव ज्ञायते। किन्तु यत्र हि द्रव्यावयवाः विकारावयवाश्च विकृत्या विषमतया प्रकृत्यननुगुणतया समवेता भवन्ति तत्र अवयवप्रभावेभ्यः समुदायप्रभावः पृथग् भवतीत्याह नत्वेवमिति। ननु कुत्र विकृतिविषमसमवेताः अवयवाः भवन्तीति प्रतिपादयितुं त्रीणि हेतुगर्भविशेषणानि प्रदत्तानि नानेति। नानात्मकानां नानारूपाणाम् एकस्यैव द्रव्यस्य रूपभेदेन पृथक्प्रभावो यथा स्यात् तथैव एकसंसृष्टदोषयोरपि व्याध्योः प्रभावपार्थक्यं भवत्येव। परस्परोपहतानां नानारसात्मकानां द्रव्याणामेकरसेन यत्रापररसस्योपघातो भवेत् यथा लवणाधिक्ये मधुरस्योपघातो भवति एवं संसृष्टदोषाणां व्याधीनामेकदोषेण विरुद्धगुणेनापरदोषस्यापि विकृतिविषमसमवाये उपघातः सर्वथा न भवत्यपि पारदगन्धकसंयोगवत् तृतीयो गुणो विकारे प्रादुर्भवत्येवेति

स एवास्योपघातो मन्तव्य: । पुनश्च नानाविधसंस्कारादियोगेनान्यथा परिणतानामपि अवयवप्रभावानुमानेन न खलु समुदायप्रभावतत्त्वं ज्ञातुं शक्यते यथा व्रीहे: मधुररसप्रधानस्य गुरुत्वेऽपि संस्काराल् लाजभूता सा लघ्येव भवतीति । एवं विकारस्यापि अन्यैर्विकल्पनै: अंशांशत: पृथग्भूतैर्दोषै: विकल्पिता अपि विकारा: न केवलमवयवप्रभावेण निर्देश्या: भवेयु: । अतएव एकस्मिन्नेव सान्निपातिके ज्वरे विकृतिविषमसमवायवशात् त्रयोदशविधत्वं तन्त्रकारा: प्राहु: ।ननु तत्र तत्र कथंतर्हि समुदायप्रभावोऽवगन्तव्य- इत्याह तथायुक्ते इति । अवयवप्रभावात् समुदायप्रभाव: पृथगिति तत्र तत्तद्- द्रव्यस्य तत्तद्विकारस्य च पृथगेव प्रभावो निर्णेय इत्यर्थ: । उपसंहरति तस्मादिति । अत: अवयवप्रभावादन्यथा यत्रावयवविप्रभाव: स्यात् तत्र सोऽपि वाच्यो भवेदिति भाव: ॥ १०-१२ ॥

एवं समासतो रसद्रव्यदोषविकाराणां प्रभावतत्त्वं निवेद्य पुनरपि केषाञ्चिद् द्रव्यविशेषाणां प्रभावान् पृथग् विवृणोति तत्रैष इति तत्र तैलादीनां त्रयाणां वातादिप्रशमकत्वं साधयति तत्र तैलमिति । तत्र तेषु मध्ये । तत्र तैलस्य त्रयो गुणा: वातगुणविपरीता इति तद्विशेषात् तस्य ह्यसहेतु: भवत्येव । तत्रौष्ण्यात् पित्तवृद्ध्या स्नेहगौरवाच्च श्लेष्मवृद्ध्या वर्द्धितवातस्य प्रशमकं धातुसाम्यमापादयत् भवितुमर्हतीति बोध्यम् । तत्तद्द्रव्यं प्रधानगुणेनैव कर्म कुरुते इति वातगुणविरुद्धेनानेकेन वातगुणजय: सम्भवतीति तत्र हेतुं दर्शयति विरुद्धेति । न खलु तस्य सकृद्ग्रहणेन वातप्रशमकत्वं भवतीत्याह सततमभ्यस्यमानमिति । अत्राभ्यासस्य सततक्रियारूपत्वेऽपि पुन: सततमिति कथनमतिसातत्यद्योतनार्थम् । एवं सर्पिर्मधुनोऽपि अवयवप्रभावत्वेन समुदायप्रभावतत्त्वं जानीयादिति तयोरपि निदर्शनमाह सर्पिरिति एभिर्निदर्शनैरन्येषामपि प्रकृतिसमसमवेतानां द्रव्याणां प्रभावतत्त्वं ज्ञातुमतिदिशति यच्चान्यदिति ॥ १३-१७ ॥

पुनरपि त्रयाणां द्रव्याणां हितानामपि अभ्यासाद् दोषमाह अथ खल्विति । कटुकानां हि द्रव्याणां प्राय: कटुविपाकानामपि पिप्पल्यां तदन्यथात्वं दर्शयति द्रव्यप्रभावात् पिप्पल्य इति । मधुरविपाकादेव ता: गुर्व्य: । प्रक्लेदिन्य: रसप्रभावात् श्लेष्मोत्क्लेशकत्वेन । भेषजाभिमता: भेषजेषु अभिमता अनेककार्यकरत्वाच् चिकित्सकैरिति शेष: । गुणान्तरमाह ता इति । सद्यो विषादिवत् तत्क्षणादेव शुभाशुभकारिण्य: हिताहितकरा भवन्ति । कथमित्याह आपातेति । प्रयोगसमसाद्गुण्यात् यथावत् प्रयोगसामर्थ्याद् आपातभद्रा: सद्योमंगलप्रद: । सततमुपयुज्यमानास्तु अभ्यासयोगात् सेव्यमाना: दोषसञ्चानुबन्धा: क्रमेण दोषसञ्चयमनुबध्नन्ति दोषसञ्चयानुबन्धं कुर्वन्तीत्यर्थ: । दोषसञ्चयप्रकारं प्रदर्शयति हीति । हि यत: तासां श्लेष्मोत्क्लेशने पित्तवर्धने च शक्तिरस्ति अल्पस्नेहभावाच्च न वातं प्रशमयतीति दोषसञ्चयकारकत्वं युक्तमेवेत्यर्थ: । योगवाहिन्य: सर्वयोगसम्मता: । तस्मात

स्वल्पोपयोगे तासां हितकरत्वात् अत्युपयोगे च अहितकरत्वादित्यर्थः॥ १६॥

क्षारलवणयोरपि हिताहितकरत्वं दर्शयति क्षारः पुनरिति। क्लेदयति शरीरं क्लिन्नं करोति आदौ निपात एव पश्चात् पाकं गत्वा तं क्लेदं विशोषयति। संघातमस्थ्यादिदृढ़संश्लेषं भिनत्ति। भित्वा अवकाशबहुलं करोति† दहनपचनाद्यर्थत्वात्। स क्षारोऽतिप्रयुज्यमानः मात्रातिरिक्ततया सततमभ्यवहियमाणः। एनं क्षारम्। ग्रामनगरनिगमजनपदाः ग्रामादिवासिनः। तत्र ग्रामस्तु—

"विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति हि।
स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च॥" इतिलक्षणः।

नगरं नाम—

"पण्ये क्रियादिनिपुणैश्चातुर्वर्ण्यजनैर्युतम्।
अनेकजातिसम्बन्धं नैकशिल्पसमाकुलम्।
सर्वदैवतसम्बन्धं नगरन्त्वभिधीयते॥"

इतिलक्षणं स्थानम्। निगमस्तु प्राकारादिना दुर्गं योजनविस्तीर्णं नगरमेव। जनपदस्तु बहुग्रामपूर्णः प्रदेशः। खालित्यमिन्द्रलुप्तं तल्लक्षणन्तु सुश्रुते यथा—

"रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम्।
प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः।
रुणद्धि रोमकूपांस्तु ततोऽन्येषामसम्भवः।
तदिन्द्रलुप्तं खालित्यम्·····" इति॥

पालित्यमकाले केशपक्वता तल्लक्षणञ्च तत्रैव यथा—

"क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः।
पित्तञ्च केशान् पचति पलितं तेन जायते"॥ इति

हृदयापकर्तिनः वक्षसि कर्तनवत् पीडावन्तः॥ २०॥

लवणस्य हिताहितत्वमाह लवणं पुनरिति। विस्रंसनसमर्थं शरीरभेदनसमर्थम्। तल्लवणमत्यर्थमुपयुज्यमानं मात्रातिरिक्तं सेव्यमानं ग्लानिः शरीरस्य कृशता शैथिल्यं मांसादीनां शिथिलता तेषामभिनिर्वृत्तिकरम् उत्पादकं भवति। एनत् लवणम्। ते भूयिष्ठं बाहुल्येन ग्लास्नवः कृशशरीराः। अपरिक्लेशसहाः अबलवत्त्वात्। भूमेर्दृष्टान्तेनार्थमिमं समर्थयति येऽपीति। अत्यूषराः लवणबहुलाः। ओषध्यादिना सर्वेषामुद्भिदां परिग्रहः कृतः। उपसंहरति तस्मादिति नात्युपयुञ्जीत नात्यर्थं भुञ्जीत। अन्यदेशीया अपि ये अतिलवणाभ्यस्तास्तेषामपि खालित्यादिकं भवतीत्याह ये हीति। हिरवधारणो अत्र खालित्येन्द्रलुप्तयोरेकत्र पृथङ्निर्देशात् नूनं तयोः किञ्चित् पार्थक्यं वर्तते। सुश्रुतस्तु तदिन्द्रिलुप्तं खालित्यमित्युक्त्वा तयोः पर्यायत्वमाह अत्र कार्तिककुण्डस्तु इन्द्रलुप्तं श्मश्रुणि भवति खालित्यन्तु शिरोरुहेष्वेव

† अत्र "दहति पचति भिनत्ति संघातम्" इत्यतिरिक्तः पाठो गृहीतः।

इति पार्थक्यमाह । वृद्धवाग्भटस्तु इन्द्रलुप्तलक्षणं सुश्रुतमनुकृत्य निवेद्य खालित्यस्य पृथग्लक्षणमाह यथा—"खलतेरपि जन्मैवं शातनं तत्र तु क्रमात् ।" इति पार्थक्यमाह । परमाचार्य: गंगाधरस्तु अत्र इन्द्रलुप्तेति न पठति । बलय: गात्रत्वचां कुञ्चनरूपा: । प्रकरणमिदमुपसंहरति तस्मात्तेषां तत: सात्म्यत: तस्मादभ्यासात् । क्रमेण क्रमपूर्वकम् । अपगमनं परीहार: । श्रेय: कल्याणकरं भवति । अहितस्यापि अभ्यस्तद्रव्यस्य अक्रमेण त्यागोऽहितायैव भवेदित्याह सात्म्यमिति । यदुक्तम्—

"उचितादहिताद्धीमान् क्रमशो विरमेन्नर: ।
हितं क्रमेण सेवेत ....."इति ।

तत्रैव क्रमोऽपि उपदिष्ट: ॥ २१-२२ ॥

ननु किन्नाम सात्म्यमित्याह सात्म्यं नामेति । यद् द्रव्यमभ्यवहृतं भुक्तमात्मनि उपशेते यस्योपयोग: सुखावहो भवति औचित्यादपि न विकृतिकृद् भवतीत्यर्थ: । तत्र प्रमाणमाह सात्म्यार्थ इति । अवधारणार्थोऽयं हि शब्द: इतरं व्यवच्छिद्य तमेवार्थं समर्थयति । सात्म्यं हि देशादिभेदेन विविधभेदमप्यत्र ओकसात्म्यमेव गृह्णाति तच्चोपशयाभिन्नं भवतीत्यर्थ: । तदित्योकसात्म्यम् । तत्तु प्राक् प्रवरादिभेदेन त्रिविधं भवति । परन्तु रसभेदात् तत् सप्तविधं भवति । तत्र तेषु रसभिन्नेषु सात्म्येषु मध्ये सर्वरसं सात्म्यं प्रवरं श्रेष्ठम् । प्रवरावरमध्यस्थन्तु कतिपयरससात्म्यमित्यर्थ: । प्रवरमुपपादयेत् अभ्यसेत् । पुनरपि तत्र किमपि वैशेष्यमाह सर्वरसमपीति । तथा सर्वरसं प्रवरं सात्म्यमुत्पन्नमभ्यस्तमपि तत्र आहारविधिविशेषायतनानि आहारविधिविशेषस्य हिताहितरूपस्य आयतनानि कारणानि अभिसमीक्ष्य तत्सात्म्यं हितमहितं वा विचार्य हितमेव अनुरुध्येत सेवेत इत्यर्थ: ।२३-२४।

ननु कानि तानीत्याह तत्र खल्विति । तानि खलु इदं भोक्तव्यमिदं नेति विशेषस्य कारणानि भवन्तीत्यर्थ: । तेषां क्रमश: विवृतिमाह तत्र प्रकृतिरिति । अयमर्थ:—स्वभावत: किञ्चिद् द्रव्यं गुरु किञ्चिद्वा लघु भवति । तेषां गुरुत्वे लघुत्वे वा प्रकृतिरेव कारणं भवति । यथैकस्मिन्नेव क्षेत्रे एकदैव जातयोर्माषमुद्गयो: माषो गुरु: मुद्गश्च लघुर्भवतस्तद्वत । करणं विवृणोति करणं पुनरिति । स्वाभाविकानां स्वभावतो गुणविशिष्टानां द्रव्याणाम् । अभिसंस्कारो गुणान्तराधानम् । ते गुणा: । संस्कारागता: गुणा: कथमत्राधीयन्ते इत्याह तोयाग्नीति । तत्र तोयसन्निकर्षाद् अधौततण्डुलान्ने गुरुत्वं सुधौततण्डुलान्ने च लघुत्वं द्रष्टव्यम् । अग्निसन्निकर्षाद् गुरोर्व्रीहिधान्याल्लाजा लघवो लघोश्च शालिधान्यात् पृथुकाया: गुरुत्वम् । शौचं धावनादिना मलापकर्षणम् । तेन गुरोरपि लघुत्वं भवति । मन्थनेन च दध्न: तक्ररूपेण परिणतस्य लघुत्वं दृश्यते । देशवशेन मरुजाद् द्रव्यादानूपदेशजस्य गुरुत्वम् । कालवशेन नवीनशूकधान्यादे: प्रत्नस्य लघुत्वं भवति । भावनया स्वरसादिना दिवाशुष्कस्य गुणान्तरं भवति । भाजनेन

कांस्यपात्रस्थं घृतं दशरात्रपर्युषितं विषवद् भवति। आदिना चात्र पेषणाभिमन्त्रणादयो गृह्यन्ते संस्कारविरुद्धानां द्रव्याणां गुणान्तराधानं प्रसिद्धमेव ॥ ॥ २७-२८ ॥

संयोगस्तु द्वयोर्बहूनां वा द्रव्याणां मेलनम्। एकस्यैव द्रव्यस्योपभुक्तस्य शरीरे या क्रिया भवति तत्र द्वयोर्बहूनां वा मेलने कदाचित्ततो गुणान्तरमुत्पद्यते। जीवनीययोर्मधुघृतयोः समधृतयोः। पुष्टिकरयोरपि क्षीरमत्स्ययोः संयोगो विषायैव भवति एवं सर्वत्रैव संयोगविरुद्धे द्रव्ये ज्ञातव्यम्। राशिं व्याचष्टे राशिरिति। राशिरत्र मानम्। स च सर्वग्रहपरिग्रहाभ्यां भिद्यमानो मात्रायाः फलस्य शुभस्य विनिश्चयप्रयोजनः अमात्रायाश्च फलस्याशुभस्य विनिश्चायको भवति। तत्र सर्वग्रहं व्याचिख्यासुः सर्वेषामाहारद्रव्याणामन्नविदलयूषघृतादीनां साकल्येन मानग्रहणरूपं विवृणोति तत्र सर्वस्येति। परिग्रहस्तु प्रत्येकेषामाहारद्रव्याणां पृथङ्मानग्रहणमित्याह परिग्रह इति। तमेवार्थं निरुक्त्या निरूपयति सर्वस्येति। देशं व्याचष्टे देश इति। भोक्तृणां निवासस्थानमपि विचार्यं भवति। तेन मरुजे देशे यत् सात्म्यं न तदानूपे। द्रव्याणामुत्पत्तिस्थानमपि एवं विचार्यम्। आहारविधौ कालोऽपि विचार्यः। तेन कालसात्म्यं निरूप्यते। स च काल आवस्थिकः भोक्तुः शरीरावस्थां विचार्य निर्धार्यते अपरस्तु नित्यगः तत्र तत्र ऋतौ तत्तद्द्रव्यसात्म्यता तेनैव नियता भवेदित्यर्थः। उपयोगसंस्थामाह उपयोगेति। उपयोगे आहारे वक्ष्यमाणाः उष्णं स्निग्धमित्यादिनियमाः अत्र अन्तर्भवन्ति। जीर्णलक्षणन्तु प्राधान्येनोक्तम्। उपयोक्तारमाह उपयोक्तेति। उपयोक्ता भोक्ता। स च प्रतिपुरुषसात्म्यमपेक्षते। तेन चास्य इदमुपशेते इदं न इत्योकसात्म्यता निर्णीयते इत्यर्थः। प्रकरणमुपसंहरति इत्यष्टाविति ॥ २८-३३ ॥

एषामिति। एषामष्टानामाहारविधिविशेषायतनानां विशेषा भेदाः शुभाशुभफलाः केचिद् हिताः केचिद्वाऽहिताः परस्परोपकारकाः आहारफलजनने इतरेतरसहायाः भवन्ति। अतस्तान् तत्र के हिताः के वा अहिताः एवंरूपेण बुभुत्सेत् बोद्धुमिच्छेत्। बोधे फलमाह बुद्ध्वेति। मोहादज्ञानात् प्रमादादनवधानतया। असुखोदर्कमहितभाविफलम्। अन्यदाहारविहारादिकम्। तत्र च त्रिविधबुद्धिवेद्यतया कानिचिदाहारविधानानि वक्तुमुपक्रमते तत्रेदमिति। तत्र आहारकाले इदं वक्ष्यमाणम् आहारविधिविधानम् आहारक्रमस्य विनियोगप्रणाली भुञ्जानानाम् अरोगाणां स्वस्थानां सर्वेषां केषाञ्चिद् आतुराणां रोगिणाञ्च हिततममातिशय्येनहितं भवति। न खलु तत् सर्वेषामातुराणां हितं भवति अतिसार्यादेरुष्णभोजननिषेधात्। तद्विधानमुद्दिश्यति उष्णमिति। तस्याहारविधिविधानस्य सादृगुण्यं सद्गुणसमूहान्। उष्णमिति ईषदुष्णमित्यर्थः। अत्युष्णस्य सर्वेषामेव अहितत्वात्। औदर्य्यमग्निं पाचकमग्निमुदीरयति वर्धयति तत् सामान्यादित्यर्थः। स्निग्धस्य गुणान् प्राह स्निग्धमिति। स्निग्धं घृतादिस्नेहयुक्तम्। स्निग्धस्याग्निवर्धकत्वं

दीपतैलन्यायेन स्वत:सिद्धमेवेत्याह भुक्तमिति । भुक्तं भुक्तद्रव्यम् । स्नेहस्य वातप्रत्यनीकत्वाद् वातमनुलोमयति । शरीरोपचयं शरीरधातुवर्धनम् । मात्रावत आहारस्य गुणानाह मात्रेति । वातपित्तकफानपीडयदिति खाद्यजरणाय हि तत्र तत्र कफादीनां च्यवनमामाशयादौ प्रयोजनं भवति, सर्वरसमपि तमाहारं मधुरादिभावमापादयितुम । मात्रातिरिक्ते आहारे तेषामवकाशाभावात् ते उदीरणोन्मुखा अपि स्थानाभावादनुदीर्णा: पीडिता विकृतिमापद्यन्ते इत्यर्थ: । अत: प्रकृतिस्थे वातादौ शरीरोपचयं कृत्वा आयुर्वर्धयत्येव । केवलमिति पूर्णतयेत्यर्थ: । उष्माणं कायाग्निम् । गुदमनुपर्येति यथावज् जीर्णे सति तस्य मलांशो गुदद्वारेण निर्गच्छति ॥ ३४-३६ ॥

जीर्णभोजनगुणान् विवक्षुरादौ अजीर्णे भोजनदोषान् निर्वक्ति अजीर्णे हीति । अभ्यवहृतं भुक्तमाहारजातमाहारसमूह: । सम्यग्जीर्णावकाशाभावात् पूर्वाहारस्यापरिणतम् अपक्वमाममित्यर्थ: । रसमुत्तराहारस्य जीर्णावकाशसद्भावात् सम्यक्परिणतेन रसेन सह उपसृजत् मेलयत् सर्वमेवाहाररसमामसंसृष्टं कृत्वेत्यर्थ: । एवमामबाहुल्याद् दोषा अपि सामा: प्रकुप्यन्तीत्यर्थ: । जीर्णे पूर्वाहारे जीर्णे सति । तुकार: पक्वान्तरसूचक: । दोषेषु परिपाकसहायेषु मधुराद्यापादकेषु कफादिषु स्वस्थानेषु आमाशयादिस्थेषु सत्सु अग्नौ चोदीर्णे पूर्वव्ययितांशपूरणादित्यर्थ: । अतएव बुभुक्षायां क्षुधायां सञ्जातायां स्रोतसाम् आमाशयादिषु कफादिवह्यानां स्रोतसां मुखेषु आमाशयादिगतेषु द्वारेषु विवृतेषु अनवरुद्धे तद्गतेऽन्ने स्रावसातत्यात् तेषां मुखान्यवरुद्धानि भवन्ति इति ज्ञेयम् । उद्गारे च विशुद्धे भुक्तादिगन्धरहिते हृदये च विशुद्धे उरोलाघवे एवमवस्थायामभ्यवहृतमाहारजातं सम्यक्परिणतं सत् शरीरधातून् दोषधातुमलान् अप्रदूषयत् न विकृतिमापादयत् तद् उपचयं यथावत् कृत्वेत्यर्थ: । केवलं निरवच्छिन्नमायु: वर्धयति ॥ ४० ॥

वीर्यविरुद्धाहारगुणानाह वीर्येति । वीर्यविरुद्धभोजनस्य दोषा: क्षीरमत्स्यसंयोगवत् शोणितदूषणादिका: प्रागेवोक्ता: ॥ इष्टे देशे इष्टसर्वोपकरणस्य भोजनगुणानाह इष्टेति । अनीप्सिते देशे अनिष्टोपकरणस्य हि भोजनं मनोव्याघातकरं भवति अतस्तद्दोषपरिहाराय इष्टे देशे इष्टसर्वोपकरणो भुञ्जीत ॥ नातिद्रुतभोजनस्य गुणान् विवक्षु: द्रुतभोजनदोषानाह अतिद्रुतमिति । भोजनस्य खाद्यस्य उत्स्नेहनं लालादिरूपकफस्रावसमयाल्पत्वात् कफसंसर्गाल्पतया न खाद्यस्य सम्यक् स्नेहनं भवतीत्यर्थ: । कफो हि खाद्यं स्नेहयति । अवसदनं अव मार्गमतिक्रम्य सदनं गमनं तेन प्राणवहस्रोतसि प्रवेश: तेन चाहारस्याप्रतिष्ठानं न यथास्थानावस्थानमित्यर्थ: । अप्रतिष्ठानमथवा निरर्थकम् सम्यगपरिपाकात् श्वासवहस्रोतोगमनेन विकारकरत्वादित्यर्थ: । भोज्ये ये च दोषा: ये वा सद्गुणा: सन्ति तेषामुपलब्धिर्ज्ञानं न नियता न सर्वथा भवति ॥ नातिविलम्बितभोजनस्य

गुणान् विवक्षुरतिविलम्बितभोजनस्य दोषानाह अतिविलम्बितमिति । तृप्तिमनधिगच्छन् अतिभुङ्क्ते इत्यर्थः । विषमं पच्यते प्राग्भुक्तस्य आदिपाकान्तेऽपि पुनर्भोजनात् विषमपाको भवति ॥ तन्मनस्कस्य भोजनगुणान् वक्तुम् आलापं कुर्वतो हसतोऽन्यमनस्कस्य भोजने दोषानाह जल्पत इति ॥ आत्मानमभिसमीक्ष्य भोजनगुणानाह आत्मानमिति । उपशेते आत्मधात्वानुकूलत्वात् सात्म्यीभवति ॥ रसद्रव्यादिप्रभावज्ञान् स्तौति भवति चात्रेति । अतिरोहितार्थमन्यत् ॥ ४१–४७ ॥

अध्यायार्थं निवेद्य तं समापयति तत्र श्लोकाविति ॥ ४८–४९ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां विमानस्थाने रसविमानं नाम प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ।

पूर्वाध्याये आहारविधिविशेषायतने राशिविवृतौ मात्रावदाहारमुपयुक्तमित्यभिहितम् । साम्प्रतं मात्रामात्रप्रमाणं तत्फलञ्चोपदेष्टुमध्यायान्तरमारभते अथात इत्यादिना । तत्र किन्नाम मात्राप्रमाणं कथं वा तद् विज्ञातव्यमिति शिष्यजिज्ञासानिवृत्त्यर्थमादौ कुक्ष्यंशपूरणप्रमाणेन मात्राप्रमाणं निर्दिशति त्रिविधमिति । अत्र कुक्षिशब्देन तदंशस्यामाशयस्यैव परिग्रहः स्यात् । तत्रैव ह्याहारजातमभ्यवहृतं प्राक् तिष्ठति पाकाय । आहारस्यावस्थानायेति शेषः अवकाशांशं स्थानांश त्रिविधं त्रिविभागेन विभक्तं स्थापयेत् रक्षेत् आहारमुपयुञ्जानः भुञ्जानः । कथमेवं कुर्यादित्याह तद्यथेति । एकमवकाशांशं त्रिभागैकभागमित्यर्थः । मूर्त्तानां संहतपदार्थानामन्नशाकमांसादीनामवस्थानायेति शेषः । एकं द्रवाणां क्षीरपानीयादीनाम् एकञ्च वातपित्तश्लेष्मणामिति । द्रवरूपा हि कफपित्तवाताः आमाशयादितो निःसृत्य आहारेण संमिश्रय तं मधुरमम्लं कटुकञ्च क्रमशः करोतीति ग्रहणीचिकित्सिते निवेदयिष्यते । अतस्तेषां स्थानं तृतीयांशं विहायैव आमाशयः संहतद्रवाभ्यामाहाराभ्यां पूरणीय इति निष्कर्षः । एवमामाशयावकाशमानेन प्रतिपुरुषमाहारमानं पृथगेव भवतीति ज्ञेयम् । एतावतीमाहारेणामाशयांशद्वयपूरयित्रीमित्यर्थः । अमात्राहारजमजीर्णादिकम् । अशुभं व्याध्यादिकम् ॥ १–३ ॥

न केवलं मात्रावदाहारेणैव कश्चिदाहारफलं कृत्स्नं प्राप्तुमलमित्याह न चेति । कथमित्याह प्रकृत्यादीनामिति । तत्र आहारविधिविशेषायतनेषु अष्टसु मात्रामात्रफलविनिश्चयरूपोऽयमर्थः आहारराशिमेकमधिकृत्य प्रकृतः वर्णितः । स च राशिरूप आहारविधः द्विविधिः मात्रावत्त्वममात्रावत्त्वञ्चेत्याह एतावानिति । विकल्पो भेदः ॥ ननु न खलु कश्चिदन्तःकोष्ठवर्तित्वेन दृश्यस्यामामाशयस्य कियान् भागः पूर्णं आहारेणेति आहारकाले द्रष्टुं प्रभवति इति तथा कुक्ष्यंशविभागेन पूर्णे आमाशये यानि यानि लक्षणानि

भवन्ति तान्येव मात्रावदाहारस्य लक्षणानीति प्रतिपादयति तत्रेति। आहारेण आहारग्रहणात् परस्तादित्यर्थः। कुक्षेरिति बाह्यनाभेरूर्ध्वमित्यर्थः। अपीडनं भेदगौरवादिबोधाभावः। आहाराधिक्यादतिस्फीते आमाशये तदूर्ध्वसंस्थितस्य हृदयस्य अवपीडनं संगच्छत एवेत्याह हृदयस्यानवरोध इति नावपीडनमित्यर्थः। पार्श्वयोः सव्यापसव्ययोः वक्षःपृष्ठान्तर्देशयोः अविपाटनं न विपाट्यते इत्यवबोधः। स्थानं दण्डायमानेन अवस्थानम्। आसनमुपवेशनम्। सायं प्रातर्भुक्तस्य प्रातश्च सायंभुक्तस्य सुखेन न विष्टम्भादिलक्षणं कृत्वा परिणमनं जरणम्॥ मात्रावतो लक्षणं निर्दिश्य अमात्रावतो लक्षणान्याह अमात्रावत्त्वमिति। द्विविधं हीनमात्रावत्त्वमधिकमात्रावत्त्वञ्चेति। तत्र हीनमात्रावतो दोषानाह तत्र हीनमात्रमिति। उपचयः शरीरस्वाभाविकापचयपूरणम्। अनौजस्यं ओजःक्षयकारकम्। सारविधमनं शरीरसाराणां रसादीनां विधमनं ह्रासकम्। अलक्ष्म्यावहं शरीरकान्तिनाशकम्। आयतनं निदानम्। हीनमात्रस्याहारस्य दोषानुल्लिख्य अतिमात्राहारस्य दोषानाचष्टे अतिमात्रमिति। कथमयं सर्वदोषप्रकोपणो भवतीत्याह यो हीति। मूर्त्तानामिति संहतानामित्यर्थः द्रवस्यापि मूर्तत्वात्। सौहित्यं गत्वा भोजनेन तृप्तिं प्राप्य भूयः पुनरपि तृप्तिमापद्यते, आमाशयस्य द्विभागं तदतिरिक्तं वा संहतैर्द्रव्यैः पूरयित्वा शिष्टमप्यवकाशं द्रवैः पूरयेत्, सर्वमेवामाशयावकाशमाहारेणैव संपूर्य वातादीनामवकाशं न दद्यादित्यर्थः। अभ्यवहारेण भोजनेन प्रपीड्यमानाः अवकाशमलभमानाः युगपन् मिलित्वा सर्व एवैकदा। ते च प्रकुपिताः कुक्ष्येकदेशमाश्रिताः आमाशयाद्यन्तःपृष्ठाद् अवकाशाभावात् प्रच्योतुमसमर्था उत्क्लिष्टा अपि तत्तत्स्थाने संश्रयं कृत्वा आमं तदन्नं विष्टम्भयन्तः स्तम्भितं कुर्वन्त अलसकं जनयितुम्, अथवा सहसा बलात् तदन्नमुत्तराधराभ्यां मार्गाभ्यां मुखगुदाभ्यां प्रच्यावयन्तः वमनेन विरेचनेन च निष्काशयन्तः विसूचिकामापादयितुं पृथक् पृथग् इमान् वक्ष्यमाणान् विकारान् शूलानाहादीन् अभिनिर्वर्तयन्ति जनयन्ति। के ते विकारा इत्याह तत्र वात इति। तत्र तेषु दोषेषु मध्ये। सिरासंकोचनमिह खल्वी। स्तम्भनञ्च सर्वशरीरस्येति ज्ञेयम्॥ ७-९॥

ननु पश्यामो वयं बहुशः मात्रया पथ्यमपि अन्नं भुक्तं न जीर्यति तत् कोऽस्य हेतुरित्याह न च खल्विति। आमप्रदोषकरम् अजीर्णतापादकम्। अपितुः पक्षान्तरे। अकाले अनवाप्तकाले अतिक्रान्तकाले वा। कामादिभिः प्रत्याकुलमनसाऽपि यदन्नं भुज्यते तदपि अजीर्णं सद् दोषाय भवतीत्याह कामेति। आममेव अपक्वं सदेव प्रदूषयति शरीरमिति शेषः। तमेवार्थं पुनः पद्येन शिष्यबुद्धिव्यवसायार्थं प्राह भवति चात्रेति। प्रजागरैः रात्रिजागरणैः। आमप्रदोषमिति आममन्नमेव दुष्टिकर्तृत्वात् प्रदोषमित्यर्थः। स च द्विविधः विसूचिका अलसकश्चेति। तत्र विसूचिकालक्षणमाह तत्र विसूचिकामिति। युगपद् ऊर्ध्वमधश्च प्रवृत्तामदोषां वमनेन विरेचनेन च

स च आमदोषः तत्रातिमात्रं निरेतीत्यर्थः। यथोक्तरूपाम् अत्रैवाध्याये तंत्र वात इत्यादिना गौरवेत्यन्तेन ग्रन्थेन निवेदितलक्षणाम्। एतदतिरिक्तानि अतिप्रवृत्तछर्द्यतिसारोपद्रवा अप्यत्रोहनीया दृष्टकर्मणा भिषजा। अलसकस्य विशेषसंप्राप्तिलक्षणान्याह अलसकमिति। दुर्बलस्य प्रागपरेण व्याधिना क्षयेण वा अतएवाल्पाग्नेरिति। अन्नरसस्य सर्वधातुपोषकस्य क्षयेणैव मानवो दुर्बलो भवति, स चान्नरसो जाठराग्नेरपि पोषक इति दुर्बलस्याल्पाग्नित्वं संगच्छते नान्यथा इत्यवधेयम्। बहुश्लेष्मण आदावेव निदानोपसेवादिना सञ्चितबहुकफस्य। अधोवातादेर्वेगरोधेन च वातप्रकोपो भवति। स्थिर-गुर्वादिगुणं ह्यन्नम् अजीर्णकारणं भवति। अतिप्रपीडितञ्च तदामान्नं विबद्धमार्गं कफोपरोधेन च विबद्धबहिर्गमनमार्गं सद् अतिमात्रप्रलीनं वायुना कोष्ठैकदेशे अतिमात्रसंबद्धम्। अलसत्वान् मन्दत्वाद् गतिविरहितत्वादित्यर्थः। न बहिर्मुखीभवति नोर्ध्वं वमनरूपेण न बाधः विरेचनेन बहिर्गन्तुं चेष्टते इत्यर्थः। तत्र पूर्वोक्तान्यामदोषलिंगानि वमनविरेचने विहाय भवन्तीत्याह तत इति। तस्यैवावस्थाविशेषं संज्ञाविशेषं प्रभावविशेषञ्च प्राह अति-मात्रेति। प्रदुष्टेति। प्रदुष्टेनामेन आबद्धमार्गत्वाद् ऊर्ध्वमधश्च गन्तुमसमर्थाः तिर्यगत्वा शाखादि सर्वं शरीरं व्याप्य तं दण्डवत् स्तम्भयति। विरुद्धा-ध्यशनशीलस्य स एव आमदोषो विषमिव सद्यःप्राणघातकत्वेन आमविष-मिति कथ्यते इत्याह विरुद्धेति। विरुद्धोपक्रमत्वादिति आमदोषे स्वेद-एवाद्य उपक्रमः विषे च स विरुद्धः इति विरुद्धोपक्रमत्वम्॥ १०-१५॥

तयोरुपक्रमान् विवक्षुर्यत्रालसके वामयितुं शक्यते यत्र वा वर्त्यादि-प्रयोगेणाधःस्थं मलं निष्काशयितुं शक्यते स एव साध्यः स्यादित्याह तत्र साध्यमाममिति। सलवणमुष्णं वारीति अत्र पलद्वयं लवणं शरावमिते उष्णो-दके गालयित्वा पाययन्ति दृष्टकर्माणो भिषजः। एष एव वमनोपचारः सर्वत्र सुगमो निरत्ययश्चेति तं प्रशंसन्ति कुशलाः। स्वेदनमुदरे। वर्तिश्च उदावर्तघ्नी। ताञ्च हिंगुनो माषकं सैन्धवस्य माषकचतुष्टयं मधुनश्च कर्ष-मैकध्यं विपाच्य विनिर्माय स्नेहोपलिप्तां स्नेहाभ्यक्ते गुदे चतुरंगुलं प्रणि-धित्सन्ति कुशलाः॥ विसूचिकाक्रमं समासतो निवेदयति विसूचिकाया-मिति। विसूचिकायां प्रागेव आमपाचनार्थं निर्हरणार्थञ्च न कापि क्रिया लंघनं विहाय कर्तव्या ततश्च आनुपूर्वी अनुक्रमो विरिक्तवत् सम्यग् वमितं विरिक्तं लंघितञ्च ज्ञात्वा पेयादिक्रमेण संसर्जनक्रमं विदध्यात्। यदुक्तं:—

"वमितश्च विरिक्तश्च मन्दाग्निश्च विलंघितः।
अग्निप्राणविवृद्ध्यर्थं क्रमं पेयादिमाचरेत्॥" इति।

पुनश्च पेयादिक्रमानन्तरं किं कुर्यादित्याह आमेति। आमप्रदोषेषु विसूचिकालसकादिषु अजीर्णव्याधिषु अन्नकाले लंघनादनन्तरमित्यर्थः। यदा पेयादिकं पेयं भवेत् तदेत्यर्थः। जीर्णाहारं प्रागामावस्थं खाद्यं जीर्ण-

मित्यसमीक्ष्य वमनादिना निर्हृतेऽप्यामेऽन्ने यत्किञ्चिदामं शिष्टं स्यात् तज्जीर्णमिति ज्ञात्वेत्यर्थः। न खल्वामे वर्तमाने इति वक्ष्यत्यग्रे। औषधपानप्रयोजनमाह पुनरिति। शिष्टं सामान्यं परिपक्वमतिदोषावलिप्तामाशयम्। आमाशयस्यान्तःक्लिन्नं तल्लक्षणन्तु स्तिमितगुरुकोष्ठं स्तिमितमार्द्रपटावगुण्ठितमिव गुरु च कोष्ठमामाशयम्। पुनरनन्नाभिलाषिणं क्षुद्बोधरहितञ्च ज्ञात्वा दोषशेषपाचनार्थम्। अग्निसन्धुक्षणार्थं च औषधं पाचनं दीपनञ्चेति शेषः। परन्तु अजीर्णाशनं खाद्यमजीर्णमामम् अभिसमीक्ष्य तदापि आमं वर्तत इति ज्ञात्वेत्यर्थः। नौषधं पाचनं दीपनमपि न पाययेत्। कथमित्याह आमप्रदोषेति। हि यतः आमप्रदोषदुर्बलोऽग्निरेकदा आमान्नं दोषमामान्नञ्च पक्तुं न समर्थः स्यात्। अर्थमिमं पुरस्कृत्य कश्चित् पद्येन प्राह यथा—

"तीव्रार्त्तिरपि नाजीर्णी पिबेत् शूलघ्नमौषधम्।
आमसन्नोऽनलो नालं पक्तुं दोषौषधाशनम्॥" इति।

न केवलमत्र औषधाजीर्णमेव परन्तु दोषाहारौषधाजीर्णाद् अतिबलवतो नष्टानलस्य दुर्बलस्य जन्तोः सहसा मरणमपि भवितुमर्हतीत्याह अपि चेति॥ १६-१८॥

नन्वौषधादृते कथंकारं व्याधिनिवृत्तिर्भवेत् इत्याशंकां निराकर्तुमाह आमेति। अपतर्पणेन लंघनेन। यद्यपि केवलेनोपवासेन तदनुबन्धिनां विकाराणां निवृत्तिर्न भवेत् तदा किं कार्यमित्याह सतीति। तुः पक्षान्तरे। कृतापतर्पणानां सम्यग्लंघितानां पक्वदोषाणामपि व्याधीनामामजोपद्रवरूपाणां छर्दिशूलानाहातीसारादीनाम् अनुबन्धे सति तन्निग्रहे निमित्तविपरीतं हेतुप्रत्यनीकमौषधमपास्य विहाय आतंकविपरीतं तत्तद्व्याधिप्रत्यनीकं व्याधिविपरीतार्थकारि वा भेषजमवचारयेत् युञ्ज्यात्। विपरीतकथनेन विपरीतार्थकारिणामपि परिग्रहः स्यादिति बोधयितुं सर्वव्याधीनां चिकित्सितसूत्रं स्मारयति सर्वेति। अत्र हेतुव्याधिविपरीतमिति हेतुव्याध्योः व्यस्तसमस्तयोरेव ग्रहणं पूर्ववत् कर्तव्यम्। ननु हेतुविपरीतमेव भेषजं व्याधिनिग्रहे समर्थं स्यात् उपादानभूतानां दोषाणां निग्रहान्नूनं व्याधिनिग्रहो भवत्येवेति चेत् कथ्यते। न खलु सर्वत्र व्याधि प्रति दोषाणां समवायिकारणता वर्तते क्वचित् क्वचित् निमित्तकारणताऽपि भवति इति। यत्र दोषाः केवलं समवायकारणं भवन्ति तत्र हेतुविपरीतं यथा प्रायशो नानात्मकेषु व्याधिषु। पुनश्च यत्र ते निमित्तकारणं स्युः तत्र व्याधिविपरीतमर्थादसमवायिकारणरूपायाः संप्राप्तेर्विपर्यस्तं भेषजं योज्यम्। यत्र च दोषाः व्याध्युत्पत्तौ युगपदेव समवायि निमित्तञ्च कारणं स्युः तत्रोभयविपरीतं भेषजं प्रयोज्यमिति ज्ञेयम्॥ १९॥

पुनरपि तत्र पश्चात् कर्तव्यमाह विमुक्तेति। पुनरेवं लंघनेन आमप्रदोषं निराकृत्य व्याधिप्रत्यनीकेन चोपद्रवान् प्रशाम्य अभ्यंगादीन् विधि-

वत् तेषां विधिमनुसृत्य युक्त्या प्रयोज्यम् । का सा युक्तिरित्याह प्रसमीक्ष्येति । दोषादीनामवस्थान्तराणि विकारान् विकारप्रकृतींश्च प्रसमीक्ष्य सम्यग्विचार्येत्यर्थः । इति प्रकरणोपसंहारे ॥ २० ॥

पुनश्च व्याधेरनुत्पत्तौ सामान्यतः स्वस्थविधिसूत्रं निर्दिशति भवन्ति चात्रेति । हितोपयोगेषु यः कश्चिदन्यो मार्गो विहारादिः अस्ति तं भजेत । पुनरत्र परिपाकक्रियानिष्पत्तेः कोष्ठे स्थानं विज्ञापयितुं शिष्यप्रश्नमुत्थापयति अशितमिति । तत्र अशितं नाम चर्वणेन गलाधःकृतमन्नम् खादितन्तु दन्तव्यापारनिष्पन्नमित्यनयोर्भेदः । क्व कुत्र । विपच्यते सम्यक् पाकं प्राप्य सारकिट्टरूपेण परिणमति इत्यर्थः । उत्तरयति नाभीति । अत्र स्तनसाहचर्यान् नाभिरपि बाह्या ज्ञेया । कोष्ठन्तु खलु आमाशयपक्वाशयरूपं तत्र आमाशय एव आहारः पूर्णतया पक्वः सर्वाशयं धमनीभिर्गच्छत्यन्नरसरूपेण । अत्र पाकशब्दः पूर्णः परिणामः न केवलं वह्निसंयोगाद्रूपान्तरवाप्तिरूपो ज्ञेयः । अतएवास्य आमाशयसंज्ञा प्रकृतिगता । पुनराकृतिगतसंज्ञादामाशयादारभ्यास्य स्थानं क्षुद्रान्त्रस्यान्तिमं यावद् भवति । ततस्तु पक्वाशयप्रवृत्तिः । यद्यपि महास्रोतसः स्थूलतमोऽंशोऽपि आमाशयशब्देन कथ्यते तथाप्यत्र कृत्स्नं पाकं प्राप्य धमनीभिः क्षुद्रान्त्रसंसक्ताभिः सर्वाश्रयं सर्वशरीरं याति इति स्पष्टवचनादामाशयस्थानं क्षुद्रान्त्रं यावत् प्रकृतिगतसंज्ञया भवतीत्यवधार्यम् । आशयानां स्थानं संस्थानं विवरणञ्च मदीये 'शारीरविनिश्चये' द्रष्टव्यम् ॥ २१–२५ ॥

अध्यायार्थं निवेद्य तं समापयति तत्र श्लोक इति ॥ २६ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां विमानस्थाने त्रिविधकुक्षीयो नाम द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

ननु सर्व एव व्याधयः प्रतिपुरुषमाहारविहारयोरेव नियमलंघनाद् भवन्तीति न सत्यम् । दृश्यन्ते हि केचिद् व्याधयो युगपदेवासमप्रकृत्यादीन् मानवान् नियमालंघनेऽपि आक्रामन्तीति वर्तते तत्र कोऽप्यसाधारणो हेतुर्नूनम् इति तं व्याचिख्यासुरध्यायान्तरमारभते अथात इत्यादिना । जनपदानामुद्ध्वंसनं मरकेण तत्रत्यानां बहूनां मानवानां मरणेनेत्यर्थः । तदधिकृत्य प्रवृत्तमध्यायं जनपदोद्ध्वंसनीयम् । तत्र शिष्यप्रश्नक्रमं विवक्षुरादौ तद्गतमितिहासमाह जनपदेति । पाञ्चालक्षेत्रे पाञ्चालैरध्युषिते प्रदेशे । जनपदमण्डले बहुजनाध्युषिते कस्मिंश्चिदंशे । पुनश्च तत्र द्विजातिवराध्युषिते इत्यनेन द्विजातयो धार्मिका अपि अधर्मप्राबल्येन तत्रापि मरको भवतीति सूच्यते । अन्तेवासिनः शिष्याः । पश्चिमे घर्ममासे घर्मस्य ग्रीष्मस्य अन्तिमे मासे ज्येष्ठे इत्यर्थः । वनविचारं वने विचर्य विचर्य इत्याभीक्ष्ण्येणामुल् ॥ १–३ ॥

गुरुवाक्यमाह दृश्यन्त इति। नक्षत्रादीनां दिशाञ्च ऋतुवैकारिका: यस्मिन्नृतौ यादृशा भावा भवितुमर्हन्ति तद्विरुद्धा: भावा: अवस्था: लक्षयामीत्यर्थ:। अचिरादितो अस्मात् कालात् समनन्तरमेव। तद्वियोगाद् भैषज्यानां यथावद्रसाद्यभावात्। आतंकप्रायता व्याधिबहुलता नियता निश्चितं भविष्यतीत्यर्थ:। उद्ध्वंसाद्जनपदोद्ध्वंसारम्भात्। भूमेर्विरसीभावादेव औषधीनां रसादय उपहता भवन्तीत्याह प्राक् भूमेरिति। यद्यपि द्रव्याण्येवोदयुज्यन्ते भैषज्यार्थं तथापि तेषां रसादिभिरेव प्राय: शरीरे क्रिया भवतीति तेषामेवोपयोग: प्राधान्येनाह वयमिति। कानुपयोद्यामहे इत्याह ये इति। अस्मान् वैद्यान् अनुकांक्षन्ति चिकित्सार्थं प्रार्थयन्ते, यांश्चानुकांक्षाम: चिकित्साम इत्यर्थ:। कथमित्याह न हीति। हि यत: सम्यक यथाकाले भैषज्येषु नोद्धृतेषु न वा सम्यग्विहितेषु विधानानुसारेण निर्मितेषु न च सम्यगवचारितेषु यथावत् प्रयुक्तेषु सत्सु जनपदोद्ध्वंसकराणां विकाराणां प्रतीकारस्य चिकित्सितस्य गौरवं गुरुत्वं किञ्चित् स्वल्पं भवतीत्यन्वय:। यदि हि औषधादिकं सम्यक संगृहीतं विधिमनुसृत्य च कृतं यथावच्च प्रयुक्तं स्यात् तदा देशव्यापिनो व्याधेरस्य प्रशमाय समर्था भवेम इत्याशय:॥ ४॥

शिष्यास्तु गुरोरनुशासनं सम्पाद्य जनपदोद्ध्वंसकराणां व्याधीनां निदानादिकं शुश्रूषव: स्वसंशयं पृच्छन्ति अपित्विति। अपि प्रश्ने। संशयस्त्वत्र एकस्यैव व्याधेर्निदानमेकमेव। ये तु मानवा विभिन्नाहाराचारा: येषां च प्रकृतिसत्त्वादीनां पार्थक्यं सदैवानुभवामस्ते कथमेकेनैव व्याधिना युगपद् आक्रम्यन्त इति। तमेव निराकरिष्णुर्भगवानाह तमुवाचेति। प्रकृत्यादिभिर्भावैरसामान्यवतां विभिन्नप्रकृत्यादीनाम्। ये भावा: सामान्या: यांश्च भावान् सर्व एव समानतया उपभुञ्जन्ति। समानकाला एकदैवागता:। समानलिंगा अनन्या इत्यर्थ:। के ते भावा: समाना इत्याह तद्यथेति। तत्र वातवैगुण्यलक्षणमाह तत्र वातमिति। यथर्तुविषमं यस्मिन्नृतौ यद्विगागतवायुप्रवाहो भवितुं युक्तस्तद्विपरीत इत्यर्थ: शीतोष्णवैपरीत्यं वा। अतिस्तिमितं मन्दम्। अत्यभिष्यन्दिनमतिवर्धितवेगम्। अतिभैरवारावमतिभयंकरशब्दविशिष्टम्। अतिप्रतिहतं प्रतिहतपरस्परगतिं द्राक् दिक्परिवर्तेन परस्परसंघर्षशीलम्। अतिकुण्डलिनमभीक्ष्णं वातावर्तरूपेण परिणतम्। असात्म्यगन्धोपहतमनभ्यस्तगन्धविशिष्टं दुर्गन्धं वा। वाष्पोपहतमाकालिकधुम्रघटिकावृतम्। सिकतोपहतं वालुकापूर्णम्। पांशूपहतं धूलिकणासमाच्छन्नम्। एवंविधं वातमनारोग्यकरं विद्यादिति योजना। विगुणोदकलक्षणान्याह उदकमिति। विकृतगन्धता दुर्गन्धता। विकृतवर्णता शुक्लेतरवर्णता। विकृतरसता च मधुराव्यक्तरसभिन्नता। विकृतस्पर्शता चातिशीतोष्णता ज्ञेया। क्लेदबहुलं वार्षिकनादेयसलिलवत्। उपक्षीणजलेशयं स्वल्पमत्स्यादिकम् अप्रीतिकरं सर्वजीवानामिति शेष:। अनारोग्यकरदेशलक्षणमाह देशमिति। प्रकृतीति। आनूपादिभेदेन यत्र यादृशी वर्णादीनां

सत्ता आसीत् तद्विपर्यस्तवर्णादिमत्त्वम् । क्लेदबहुलं पंकादिबहुलम् । सरीसृपेति सरीसृपादिभिरुपसृष्टमाधिक्येन युक्तम् । सरीसृपाः सर्पादयः । शलभाः पतंगाः शस्यभक्षकाः 'पंगपाल' इति लोके । मशकमक्षिकामूषिकादिबाहुल्येन अद्यत्वेऽपि जनपदोद्ध्वंसकराणां व्याधीनां प्रादुर्भावो दृश्यते । उलूपा दर्भजातयः । अपूर्ववदिति सर्वत्रैवान्वीयते । अवपतितशस्यमनुत्पन्नशष्पम् । ध्मातपतत्रिगणं प्रकृष्टेन शब्दितपक्षिसमूहम् । उत्क्रुष्टश्वानमाक्रन्दितकुक्कुरम् । उद्भ्रान्तेति उद्विग्नपीडितनानापशुपक्षिसमूहमित्यर्थः । उत्सृष्टेति यत्र जानपदा धर्मादिगुणत्यागिनो तेषां नाशकाश्च भवेयुस्तमित्यर्थः । शश्वद् अनवरतं क्षुभितः तरंगायितः उदीर्णश्च जलप्लावनादिना आशयमुत्क्रम्य गतो जलाशया यत्र तम् । प्रताताः सततसंघटिताः उल्कापातवज्रपातभूमिकम्पाः यत्र तम् । प्रतिभयारावरूपं भयंकरशब्दबहुलम् । ससम्भ्रमेति सम्भ्रमो भीतिजन्यत्वरा तेन सह य उद्वेगस्तद्विशिष्टो यथा आक्रन्दति तद्वत् । त्रासाद्रोदनविशिष्टो यथा आक्रन्दति तद्वत् । संहारकारकतमोऽभ्युदयाद् यथा जन आक्रन्दति तद्वच्च । गुह्यकैः कुबेरानुचरैराक्रान्तो यथाक्रन्दति तद्वच्च आक्रन्दितशब्दबहुलं निःसहायानामिव विलापशब्दबहुलं देशमहितं विद्यात् ॥ अहितं कालमाचष्टे कालमिति । अयमर्थः—शीतोष्णवर्षलक्षणो हि कालः यदा स्वलक्षणं जहाति यदा वातिलक्षणं प्रकाशयति तदा तत्तद्तुलक्षणविपरीतलक्षणं प्रादुर्भवति । स च कालः अहित इति विद्यात् ॥ ५–१० ॥

उपसंहरति इमानिति । इमान् पूर्वोक्तान् चतुरो भावान् वातमुदकं देशं कालञ्च । तदात्वे कर्तव्यमाह विगुणेष्विति । अपिरत्र समुच्चये । भेषजेनोपाद्यमानानां यथावदाहारभेषजादिग्रहणेन चिकित्स्यमानानाम् । इत्युपसंहारे ॥ ११–१२ ॥

ननु विगुणेषु वाय्वादिषु कः खलु गरीयान् इत्याह वैगुण्यमिति । हेतुमत् हेतुना सहेत्यर्थः । गरीयस्त्वं श्रेष्ठत्वम् । स्वभावतो दुष्परिहार्यत्वात् दुःखेन परिहर्तुं शक्यत्वात् तद्देशे वसन्नपि निर्वातगृहादिवासेन कथञ्चिद् दुष्टवायुपरीहारः सम्भवति, ततश्च स्तोकं क्लेशं स्वीकृत्यापि नारिकेलोदकादिपानेन दुष्टं जलं परिहर्तुं शक्यते । ततस्तु कष्टमाश्रित्य देशान्तरं गत्वा दुष्टदेशपरिहारोऽपि भवितुमर्हति परन्तु कालवैगुण्ये तत परिहारो दुष्कर एवेत्यर्थः । अतस्तु विगुणः काल एव गरीयानिति भावः । पुनश्च वातादीनां ततो लघुत्वे हेतुमाह वाय्वादिष्विति । प्रतिकारस्य सौकर्ये इति विगुणीभूते वायौ क्वचित् क्वचिदग्निप्रज्वालनेन धूपगन्धकाद्यौषधिदहनादिना च तस्य संशोधनं सम्भाव्यते । जलस्य क्वथनादिना देशस्य यज्ञादिना परित्यागेन च प्रतीकारस्ततो दुष्कर एव । कालस्य प्रतीकारस्त्वसम्भाव्य एवेत्यर्थः । परिहाराशक्ये किं कर्तव्यमित्याह चतुर्ष्विति । तुः पक्षान्तरे परिहाराशक्ये इत्यर्थः । कालान्तेषु वातजलदेशकालेषु भेषजेन जनपदोद्ध्वंसकव्याधि-

प्रत्यनीकेनेत्यर्थ: ॥ १३-१६ ॥

ननु किन्तद् भेषजम्, पुनश्च तथाविधेन भेषजेनोपक्रम्यमाणा अपि केचिन् म्रियन्ते आतुरा वा भवन्ति इत्यभीक्ष्णं दृश्यते इति शंका-निरासाय येषामायु:क्षयात् कर्मविपाकाद्वा तथा मृत्युर्नियत: येषाञ्चैहिका-मुष्मिककर्मवशादातुर्यं नियतं तान् प्रति न काचिद् भेषजव्यवस्था शास्त्रसम्मता इति तान् विहायैव शारीरदोषसंशोधनाय युक्तिव्यपाश्रयं पञ्चविधं कर्म वमनविरेचनादिकं प्रयोज्यमित्याह येषामिति । मृत्युसामान्यं नियतमृत्युसमानता । कर्मणामैहिकामुष्मिककर्मविपाकानाम् । विद्यत इति शेष: । शारीरसंशोधनान्ते कर्तव्यमाह रसायनानामिति । रसायनं नाम "यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम्" इति तन्त्रान्तरोक्तलक्षणम् । विधिवद् इति पञ्चकर्मभि: शारीरशोधनान्तरं कुटीप्रावेशिकादिविधिनेत्यर्थ: । तच्च पञ्चकर्मार्थं रसायनार्थञ्च सम्भृतं भेषजं वातादिदुष्टे: प्रागेवाहर्तव्य-मित्युपदेष्टि शास्यते इत्यादिना । जनपदोद्ध्वंसकराणां मूलत्वेन वक्ष्यमाणा-धर्मस्य वारणाय दैवव्यपाश्रयं सत्त्वावजयञ्च निर्दिशति सत्यमिति । सत्यममृषाभाषित्वम् । भूतेषु सर्वप्राणिषु दया उपकारप्रवृत्ति: । बलयो भूतयज्ञ: तस्य देवपित्राद्युद्देश्यकत्वेन बहुविधत्वाद् बहुवचनम् । सद्वृत्तस्य सूत्रस्थाने व्यासत: प्रोक्तस्य अनुवृत्तिराचरणम् । एतत् सर्वमात्मनो गुप्ति: रक्षाकरं भवतीति शेष: देशकालदुष्टौ प्रतीकारमाह हितमिति । शिवानां कालादिदुष्टिराहित्येन मंगलकराणाम् । जनपदानां देशानाम् । उपसेवनं दुष्टं देशं विहाय तद्देशगमनं हितम् । ब्रह्मचर्यस्य अष्टांगमैथुनराहित्यस्य । ब्रह्मचारिणाञ्च सेवनमाश्रयग्रहणमित्यर्थ: । संकथा आलाप: । आस्या एकत्रवास: । तस्मिन् सुदारुणे मरकप्रादुर्भावात् । अनियतो मृत्यु: येषां तदा मृत्युर्न नियत: तेषामायुष: परिपालनं प्रोक्तम् ॥ १७-२२ ॥

कथं हि वातादयो वैगुण्यमापद्यन्ते इति शिष्यप्रश्नमाह इति श्रुत्वेति । उत्तरयति तमुवाचेति । अधर्मस्यापि मूलमाह तन्मूलमिति । पूर्वकृतमिति इहैव वातादिदुष्टे: प्रागेव कृतं न तु जन्मान्तरीयम् । न खल्वेकस्यैव जन्मान्तरकृताज् जनपदानामुच्छित्ति: सम्भवति । अतो जानपदानां सम्भूय कृतापराधेन च जनपदोद्ध्वंसनीयो भवतीति निष्कर्ष: । तमेवार्थं व्यासतो दर्शयति तद्यथेति । देश: अंगवंगादय: । नगराणि दिल्लीकलिकाता-प्रभृतीनि । निगमा: ताम्रलिप्तादयो वाणिज्यभूमय: । जनपदास्तु बहुजन-समाकीर्णग्रामसमष्टि: । तेषां प्रधानास्तन्मुख्या: शासकादय: स्वयं धर्म-मुत्क्रम्य त्यक्त्वा प्रजामधर्मेण अधर्ममाश्रित्य वर्तयन्ति पालयन्ति । तदा राज्ञोऽधर्माचरणमभिवीक्ष्येत्यर्थ: । आश्रितोपाश्रिता: आश्रिता: कर्मचारिण: कटुम्बिनश्च उपाश्रिता: तानेवाश्रित्य ये वर्तन्ते ते । पौरजानप्रदा: नगर-वासिनो ग्रामीणाश्च । व्यवहारोपजीविन: न्यायालये कर्मकरा: प्राड्विवाका-दय: तं शासककृतमधर्मं वर्धयन्ति । सर्वे राजानमनुकृत्य अधर्मशीला भवन्त:

वर्धने हेतवो भवन्तीत्यर्थः। स एवंसम्भृतः अधर्मः प्रसभं बलात्कृत्य धर्मम् अन्तर्धत्ते अन्तर्धापयति अन्तर्भूतणिजर्थोऽयम्। अन्तर्हितधर्माणः सर्व एवाधर्माचारिणः। ऋतवो व्यापद्यन्ते शीतोष्णवर्षलक्षणानामृतूनां विकृतिर्भवति। ततः उद्ध्वंसन्ते मरकपादुर्भावात् जानपदा नाशं गच्छन्ति इत्यर्थः। तत्र मरकाभिव्याप्तेः प्रकारमाह स्पर्शाभ्यवहार्यदोषादिति। ते च व्याधयः स्पर्शदोषमाश्रित्य अभ्यवहार्यदोषञ्चाश्रित्य जनाञ्जनं संक्रामन्तीत्यर्थः। यदुक्तं सुश्रुते—

"प्रसंगाद् गात्रसंस्पर्शान् निःश्वासात् सहभोजनात्।
सह शय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्॥
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च।
औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्॥" इति।

अत्र औपसर्गिकरोगाः जनपदोद्ध्वंसनीया व्याधय इत्यर्थः। एवं स्पर्शदोषात् तानाश्रित्य मरको भवति। अन्ये च अभ्यवहार्यमाहारमाश्रित्य विसूचिकादयः इति विशेषः॥ २३-२४॥

ननु जनपदोद्ध्वंसश्चतुर्विधो दृश्यते तद्यथा—व्याधिप्रभवः, शस्त्रप्रभवः, भूतप्रभवः, अभिशापप्रभवश्चेति। तेषु व्याधिप्रभवस्यमूलमधर्मो भवतु न त्वितरेषामिति शंकां निराचिकीर्षुस्तेषामपि अधर्ममूलत्वं प्रतिपादयति तथेति। तथा पूर्ववत्। शस्त्रप्रभवस्यापि पक्षद्वयस्य लोभादिप्रभवत्वं दृश्यत इत्याह ये इति। लोभक्रोधमोहमानानामतिप्रवृद्धिस्तु अधर्मएव। अभिक्रामन्ति परस्परमभिलक्ष्यीकृत्य आक्रामन्ति इत्युभयोरेव लोभादिवशता। परानिति स्वपक्षस्य, परैरिति लुब्धस्यापरपक्षस्य अधर्मो भवति। भूतप्रभवस्यापि उत्पत्तिर्विनाऽधर्मेण न भवति। ते हि अधर्मरूपं छिद्रमेव लब्ध्वा जनपदानाक्रामन्तीत्याह रक्षोगणेति। अपचारान्तरम् अपचाररूपं छिद्रम्। अभिशापप्रभवस्यापि अधर्ममूलत्वमाह तथाभिशापेति। प्रागपि पुराकालेऽपि अभूदनेकपुरुषकुलविनाशायः अभिशाप इति शेषः इति निदर्शनं प्रदत्तम। ननु सर्वेषामेव एकदा मरणे को हेतुरिति शंकां निराकरिष्णुः अधर्मादेव सर्वे अनियतायुष्काः भवन्तीति प्रतिपादयति नियतेति। नियतप्रत्ययोपलम्भात् शास्त्रनिर्दिष्टाचारपरिग्रहात् धर्मानुपातिककर्मकरणादित्याशयः। एतत्तु नियतायुष्ट्वानियतायुष्ट्वप्रतिपादनावसरे व्यक्तीभविष्यति। नियताः नियतायुषः। परे केचिज्जना भवन्तीति शेषः। अनियतप्रत्ययोपलम्भात् अनीतिकारम्भरतत्वात् परे केचिद् अनियताः अनित्यायुषो भवन्तीति शेषः।† एतेषां चतुर्विधानां जनपदोध्वंसनीयानामधर्ममूलत्वं व्यतिरेकेण प्रमाणयति प्रागपि चेति। अन्यतो अन्यस्मात

‡ 'प्रागप्यभूदनेकपुरुषकुलविनाशाय' इति पाठोऽत्रादृतः।

† "नियतप्रत्ययोपलम्भान्नियताश्च परे अनियतप्रत्ययोपलम्भादनियताश्च परे" इति पाठोऽत्रादृतः।

कारणात् ॥ २५-२८ ॥

नन्वधर्मस्य प्रभाव: कुतोऽभूदिति मानवसृष्टेरनन्तरं सत्ययुगादारभ्य अधर्मोत्पत्तेर्विवृतिमाह आदिकाले इति । आदिकाले मानवसृष्टेरनन्तरं प्रथमे युगे सत्ययुगप्रारम्भे इत्यर्थ: । अदितिसुता: देवा: । शैलसारवत् पाषाणवत् संहतं घनसन्निविष्टधातुमतएव स्थिरं दृढं शरीरं येषां ते । अभिरूपा: मनोहरा: प्रमाणादयस्तद्वन्त: । अमितायुष: दीर्घायुष: । तेषां पूर्वोक्तगुणसम्पन्नानां पुरुषाणां कर्मणामुदारसत्त्वगुणै: श्रेष्ठसत्त्वगुणै: ये धर्मा भवन्ति तेषामचिन्त्यत्वाद् अचिन्त्यशक्ते: प्रभावात् ‡ पृथिव्यादीनां महाभूतानां सर्वगुणसमुदितत्वात् शस्यानि रसादिगुणयुक्तानि प्रादुर्बभूवु: । तेन न केवलं जन्मना ते दीर्घायुष आसन् , तादृशशस्यादिनाम्प्युपयोगोऽपि अमितायुष्ट्वे कारणं भवतीति ज्ञेयम् । कृतयुगस्य सत्ययुगस्य ॥ २८ ॥

सत्ययुगस्य प्रथमावस्थायां नासीदधर्मस्य गन्धोऽपीति तत्र सर्व एव अमितायुष आसन् ततस्तस्यान्तिमेऽंशे अधर्मस्य प्रादुर्भाव: कथमभूदिति प्रतिपादयति भ्रश्यतीति । भ्रश्यति कृतयुगे सत्ययुगस्यान्तिमे काले केषाञ्चित् साम्पन्निकानां आढ्येषु केषाञ्चिन् नतु सर्वेषामित्याशय: । सत्त्वानामिह मानवानामित्यर्थ: । अत्यादानाद् बहुबृंहणद्रव्यसेवनात् शरीरगौरवं मेदोबाहुल्येनेत्यर्थ: । गौरवात् श्रम: स्वल्पेऽपि व्यायामे परिश्रमबोध: सर्वत्र प्रादुरासीदित्यन्वय: । श्रमाद् आलस्यं सत्यपि शक्तौ कर्मविमुखता । तत: सञ्चय: उपलब्धस्य रक्षाप्रवृत्ति:, कदाचिदकर्मवशाद् द्रव्यसंग्रहो न भविष्यतीति बुद्ध्वा पूर्वसंगृहीतस्य रक्षणे प्रवृत्ति: स्वाभाविक्येव भवतीत्याशय: । तत: परिग्रह: अन्योपार्जितस्य ग्रहणम् । ततो लोभ: परद्रव्यग्रहणाकांक्षा प्रादुरासीत् कृते सत्ययुग एव । ततस्त्रेतायां द्वितीये युगे । अभिद्रोह: परान् निर्जित्य तद्द्रव्यं जिघृक्षया तदनिष्टचिन्तनम् । अनृतवचनं मिथ्याभाषणम् । तत: कामादय: प्रवृत्ता: ततस्तस्मात् कामक्रोधादिबाहुल्यात् धर्मपादस्यान्तर्धानन्तु तद्युगमानवानां चतुर्थांश: पापपरायणोऽभूदित्याशय: । युगवर्षप्रमाणस्य पादह्रास इति सत्ययुगस्य यतिवर्षप्रमाणमासीत् त्रेतायां ततश्चतुर्थांशहीनमानमभवदित्यर्थ: । एवं पृथिव्यादेर्भूतगणस्यापि गुणानां चतुर्थांशस्य नाशोऽभूत् । तद्गुणपादह्रासाच्च तदुत्पन्नशस्यानां मानवानामाहार्यभूतानां स्नेहादिगुणानामपि पादह्रासोऽभवत् । अयथावत् पोषितप्राणिदेहा: व्याध्यभिभूता: सन्त: प्राणिनामायुषोऽपि ह्रासे कारणमभूवन्नित्याह पृथिव्यादिनामित्यादि ॥ २९-३० ॥

अर्थमिमं समासत: पद्येनाह भवत इति । एवमनेन क्रमेण युगे युगे सत्यत्रेतायां ततो द्वापरे ततश्च कलौ युगे धर्मपादो हीयते ह्रस्वतामेति । तत एव भूतानां पृथिव्यादीनां शस्यादीनां मानवानाञ्च गुणपादो हीयत इत्यन्वय: । एवंक्रमेण लोको भुवनं प्रलीयते लयं गच्छति । मानवाना-

‡ तेषामुदारसत्त्वगुणैः कर्मणां धर्माणामचिन्त्यत्वात्" इति पाठोऽत्राहृतः ।

मायुषो ह्रासे आपेक्षिकमानमाह संवत्सरेति । यत्र काले युगे यन्मानं युगवर्षमानमिष्यते तस्य संवत्सरशते पूर्णे शतवर्षे अतीते सति देहिनामायुषः संवत्सरः क्षयं याति । तत्र सत्ययुगमानमाह मनुः—"चत्वार्याहुः सहस्राणि वर्षाणां तत कृतं युगम्" इति । एवं चतुर्षु युगेषु मानवामायुःप्रमाणमपि तत्रैवोक्तम् यथा—

"अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः ॥" इति ।

अत्र सत्ययुगे चतुःशतवर्षमानं युगस्य प्रतिशतवर्षेऽतिक्रान्ते वर्षमेकं जहाति इति त्रेतारम्भे त्रिशतवर्षायुर्मानवो भवति एवं द्वापरारम्भे द्विशतवर्षायुः कल्यारम्भे च शतवर्षायुर्भवतीत्यर्थः । यदुक्तं भगवता उदयनाचार्येण—

"जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः ।
ह्रासदर्शनतो ह्रासं सम्प्रदायस्य मीयताम्" ॥ इति ।

इति प्रकरणसमाप्तौ । प्रागुत्पत्तिः प्रथमाविर्भावः इत्यर्थः ॥३१–३३॥

ननु अत्रैवोक्तं भगवता केचिन्नियतायुष्का भवन्तीति अतः सर्वमेवायुः नियतकालप्रमाणं किन्नवेति संशयमुत्थापयति शिष्यः एवंवादिनमिति । नियतायुष्काणामायुः शतवार्षिकमशीतिवार्षिकमित्यादिक्रमेण कं नियतमिति प्रश्नार्थः । नेत्याह भगवान् इहेति । इह संसारे । युक्तिः कर्मकौशलम् । कर्म च द्विविधं दैवम् पुरुषकारश्चेति । हि यतः अस्य आयुषः बलाबलं दीर्घादीर्घत्वादिकम् । दैवं पुरुषकारश्च आयुषो दीर्घादीर्घत्वे कारणं भवतीत्याशयः । कथं तौ कारणं भवतः इति विवक्षुरादौ तयोर्लक्षणमाह दैवमिति । पौर्वदैहिकं पूर्वपूर्वजन्मनि आत्मना कृतं यत् कर्म तद्दैवम् । इह अस्मिन् जन्मनि यदपरं कृतं कर्म स च पुरुषकारः स्मृतः । एवमेव कर्म कथं दीर्घायुष्ट्वस्य तद्विपरीतस्य वा कारणं भवतीत्याह बलाबलेति । अपि च तयोः कर्मणोः दैवपुरुषकारयोः बलाबलविशेषः उत्तममध्यमाधमैर्बलविशेषोऽस्ति । तस्य विवृतिमाह दृष्टमिति । तत्र किं वा दीर्घस्यायुषः किं वा अल्पायुष्ट्वस्य कारणमित्याह तयोरिति । उदारयोरुत्तमबलयोस्तयोर्दैवपुरुषकारयोर्युक्तिर्योगः सत्तेति यावत् । नियतस्य निश्चितस्य दीर्घस्य सुखस्य चायुषो हेतुर्भवतीति शेषः । इतरा तद्विपरीता अधमकर्मणोर्युक्तिः विपरीतस्य अनियतस्य अदीर्घस्य असुखस्य च आयुषो हेतुरिति योजना । मध्यमा युक्तिस्तु उत्तमाधममिश्रयोः मध्यमबलयोस्तयोरित्यर्थः मध्यमस्यायुषः । ननु असमानबलयोस्तयोः किं फलं भवेदित्याह कारणमिति । पुरुषकारेण बलवता दुर्बलं दैवमुपहन्यते जन्मान्तरीयदुर्बलकर्मणः फलमुपहत्य पुरुषकारफलमेव भवतीत्यर्थः । एवं विशिष्टेन दैवेन इतरत् कर्म पुरुषकारः । एवं सति इह कदाचित् महत्यपचारे केचिन् नातुरा भवन्ति केचिद्वा स्वल्पेनैवेति विशेषो लक्ष्यते । एतदेव लक्ष्यीकृत्य केचिन् नियतायुर्मानवादिनो भवन्ती-

त्याह दृष्ट्वेति। तत्तु न सम्यगिति प्रतिपादयति कर्मेति। किञ्चित् कर्म दैवं पुरुषकारो वा क्वचित् काले कदा कदा विपाके परिणामे परिणतावस्थायामिति यावत्। नियतं निश्चितफलप्रदं स्यात्। पुनश्च किञ्चिन्महदपि कर्म क्वचित् काले विपाके अकालनियतं न तदैव नियतफलदं स्यात्। तत्तु प्रत्ययैः फलदायकैर्हेत्वन्तरैः प्रतिबोध्यते फलदानक्षमं भवेत्। अतएव कृतएव कर्मणि तदैव फलं भवितुं नार्हति। एवं महत्यपचारेऽपि तदा प्रतिबोधकाभावान् न तदैवातंको मृत्युर्वा भवतीत्याशयः॥ ३४-४१॥

सिद्धान्तमाह तस्मादिति उभयदृष्टत्वात् नियतानियतफलदानदर्शनात् एकान्तग्रहणम् एकपक्षाश्रयः असाधु न्यायविगर्हितमित्यर्थः। निदर्शनैर्युक्तिभिश्चार्थमेनं समर्थयति निदर्शनमिति। यदि मानवानामायुषो मानं नियतं स्यात् तदा आयुषो वर्धनार्थं मन्त्राद्या दैवव्यपाश्रयाः क्रियाः इष्टयो यज्ञाश्च न प्रयोज्येरन् जनैः। न चैते परिहार्याः स्युः के ते इत्याह प्रमत्तेति। प्रमत्ताः मादकद्रव्यसेवया। उन्मत्ताः व्याधिना। उद्भ्रान्ताः भयादिवशान् निरंकुशाः। चण्डाः कोपनस्वभावाः। चपलाः स्वभावचञ्चलाः गवादयः। दुष्टाः विषादिना रोगबीजादिना वा। पवनादय इति आदिपदेन देशकालयोः परिग्रहः। प्रपाताः जलप्रपाताः। गिरयो अनारुह्याणि पर्वतशिखराणि। विषमाम्बुवेगाः जलावर्ताः। दुर्गाम्बुवेगाः दुस्तरनदीस्रोतांसि। प्रमत्तादयो जन्तवः। अरयः शत्रवः। प्रवृद्धोऽग्निः ग्रामदाहक इत्यर्थः। सरीसृपोरगादय इत्यादिना अलर्कविषकीटमूषकाणां परिग्रहः। साहसं शक्त्यतिरिक्तं श्रमादिकम्। अदेशचर्या श्मशानादिगमनमथवा ग्रीष्मप्रधाने देशे शीतप्रधानदेशवदाचरणमित्यादि। अकालचर्या महानिशादौ भ्रमणम् अथवा ग्रीष्मे हैमन्तिकविधिग्रहणमित्यादि। नरेन्द्रप्रकोपः राजद्रोहादिना सञ्जातः। सर्वत्रैव लिंगवचनव्यत्यासेन परिहार्य्याः स्युरित्यन्वीयते। तत्रापरिहार्य्यत्वे हेतुमाह एवमादय इति। आयुषो नियतमानत्वात् कथमपि एतैः कारणैः केऽपि म्रियेरन्। अतएव परिहार्याणां परिहाराभ्यां जीवनमरणयोर्दर्शनात् न कदाप्यायुषो मानं नियतं भवितुमर्हतीति निर्गलितार्थः। यदि हि मानवो नियतायुः स्यात्तर्हि अकालमरणं न स्यादेवेति तत्रानभ्यस्तानां मानवानां न तन्निवारणे प्रवृत्तिरासीत्, न वा ततस्ते भीताः स्युरित्याह नचानभ्यस्तेति। रसायनाधिकारे महर्षीणामारम्भबुद्धिः उपक्रमप्रवृत्तिः, कथाबुद्धिः अभिधेयत्वेन स्वयं रचनाबुद्धिः, प्रयोगबुद्धिः दीर्घायुष्कामिषु इत्यर्थः न स्युः। नियतायुष्का मानवाः न चेन्द्रवज्रेण हता अपि म्रियेरन्, न वा अश्विनीकुमाराभ्यां चिकित्सिता अपि जीवेयुरित्याह नापीन्द्रइति। तपःप्रभावात् आयुर्वर्धनमसंभाव्यं भवेदिति आह न महर्षय इति। विदितवेदितव्याः सर्वज्ञाः ससुरेशाः इन्द्रेण सह महर्षयो भरद्वाजादयः सम्यक् आयुष्कामीयं रसायनं दिव्यचक्षुषा न पश्येयुः शिष्येभ्यो न उपदिशेयुः स्वयं वा नाचरेयुः। यदि मानवाः नियतायुष्काः स्युस्तर्हि

ते नैवं कुर्युरित्याशयः। पुनरपि प्रत्यक्षेणापि मानवानामनियतकालप्रमाणायुष्कतां साधयति अपिचेति। दिव्यं चक्षुः भूतभाविवर्तमानासन्निहितितिरस्कृतादि सर्वद्रव्यदर्शनसामर्थ्यात् परं श्रेष्ठम्। इदं वक्ष्यमाणं, तेन दिव्यचक्षुषा। किन्तदित्याह पुरुषेति। पुरुषसहस्राणां मध्ये उत्थायोत्थाय नित्यं सदैवेत्यर्थः। आहारं कुर्वतामकुर्वतामतुल्यायुष्ट्वम् आहारात् दीर्घं जीवति अनाहाराच्च त्वरितं म्रियत इत्यर्थः।‡ तथैव जातमात्राणां व्याधीनामिति शेषः। प्रतिकाराज्जीवति अप्रतिकाराच्च म्रियत इत्यतुल्यायुष्ट्वम्। एवं अविषप्राशिनां आहारेण सह विषाक्तं विषीभूतं वा द्रव्यं ये न अश्नन्ति तेषां ये वा अश्नन्ति तेषां न तुल्यायुष्ट्वं भवति। अर्थमिमं दृष्टान्तेन द्रढयति न च तुल्य इति। उदपानघटानाम् उदकार्थं व्यवह्रियमाणानां अतएव उत्सीदतां नित्यं जलादिसंस्पर्शात् क्षयं गच्छतां पुनश्चित्रघटानां गृहशोभार्थं शिक्यस्थापितानां न च योगक्षेमः स्थायित्वमित्यर्थः तुल्यो भवति। उदपानघटस्तु त्वरितं नश्यति चित्रघटस्तु चिरं तिष्ठति। तद्वत् शरीरे यत्नतो रक्षिते चिरं तिष्ठति अयत्नतश्च तूर्णं नश्यतीत्याशयः। निगमयति तस्मादिति। विपर्ययात् विपरीतात् अहिताहाराचारोपसेवया इत्यर्थः। तदेव विवृणोति अपि चेति। देशकालात्मगुणविपरीतानां देशगुणविपरीतानां यथा शीतप्रधाने देशे उष्णवीर्यम् आहारविहारादिकम् एवमादि। आत्मगुणविपरीतं यथा पित्तप्रकृतेर्मधुराद्युपसेवा इत्येवमादीनां कर्मणां विहाराणाम् आहारविकाराणाञ्च क्रमोपयोगः क्रमेण वर्धिं मात्राञ्चाभिवीक्ष्य व्यवहारः। सर्वस्य कायवाङ्मनसामिन्द्रियार्थानाञ्च अतियोगादीनां सम्यक्त्यागो वर्जनम्। गतिमतां वातमूत्रपुरीषादीनां अनुपस्थितवेगानां सन्धारणं उदीर्णानाञ्चासन्धारणम्। अत्र "सन्धारणमनुदीर्णानाम्" इति पाठः साधीयान्। "सर्वातियोगसन्धारणम्" इति चक्रसम्मते पाठे पुनरुक्तत्वात् अधिकतादोषापातः स्यात्। आरोग्यानुवृत्तौ स्वास्थ्यलाभाय हेतुमुपलभामहे जानीमः अन्वयव्यतिरेकाभ्यां अनुमिनुमः। एवं तथैव उपदिशामः शिष्येभ्यः, पुनः पश्यामो दिव्यचक्षुषेति सम्बन्धः॥ ४२॥

अत्र सिद्धान्ते पुनः शिष्याणां संशयमाह अतः परमिति। अयमाशयः—ननु चेदायुषः प्रमाणं सर्वेषामेव अनियतं स्यात् तर्हि सर्व एव यथाकालं म्रियेरन् तदा कस्यचित् कालमृत्युः कस्य वाऽकाले इति व्यवहारः कथं समीचीनः स्यादिति। दृष्टान्तोपन्यासेन संशयं निराकारोत्याचार्यः यथेति। यानसमायुक्तः गवादिवाहनसंयुक्तः सततं वाह्यमान इत्यर्थः। एतेन मृच्छकटिकादेः पर्युदासः कृतः। अक्षः शकटः प्रकृत्यैव स्वभावतः अक्षगुणैः अकीटदष्टसारवत्काष्ठादिनिर्मिततया उपेतः युक्तः स्यादिति शेषः। सर्वगुणोपपन्नोऽपि सः अप्यर्थोयं चशब्दः वाह्यमानः वक्ष्यमाणवाह्यवाहकादि दोषादिराहित्येनेत्याशयः। यथाकालं क्रमशः स्वप्रमाणक्षयात्

‡ 'आहारं कुर्वतामिति' पाठोऽत्रादृतः।

अवसानं गच्छेत् भग्नतामाप्नुयात्। तथा तद्वत् प्रकृत्या शरीरोपगतं बलवदपि आयुः यथावदुपचर्यमाणं वक्ष्यमाणान्यथाबलारम्भादिराहित्येनेत्यर्थः। यथाकालं स्वप्रमाणक्षयात् वार्धक्येन जरादिना अवसानं गच्छति क्षयमेति। स एव कालमृत्युरित्याभाष्यते। को नामाकालमृत्युरिति तेनैव निदर्शनेन प्रतिपादयति यथा चेति। अत्र एवकारेण प्रकृत्यैव शकटगुणैरुपेतः इत्याकृष्यते। अतिभाराधिष्ठितत्वादिति यादृशस्य शकटस्य यावद् भारवहने शक्तिः तदतिरिक्तभारवहनादित्यर्थः। विषमपथात् नतोन्नतपथि चालनात्। अपथात् पथरहितकृष्टक्षेत्रादिषु चालनात्। अक्षचक्रभंगात् दुर्बलतया धूश्चक्रभंगात्। वाह्यवाहकदोषात् वाह्यानां गवादीनां वाहकानां चालकानां वा दोषात्। अणिमोक्षात् अणेश्चक्रोधार्थकीलस्य मोक्षादभावात्। पर्यासनात् पथोऽतिक्रम्य पतनात्। अनुपांगात् चक्रादिषु यथावत् स्नेहाभ्यंगाभावात्। अन्तरा स्वाभाविकक्षयप्राप्तेः प्रागेव। तथा तद्वत् अयथाबलमारम्भात् शक्त्यतिरिक्तश्रमात्। अयथाग्न्यभ्यवहारात् अमात्रिकभोजनात्। विधार्याणां कामक्रोधादीनां वेगाविधारणात् वेगस्यानिग्रहात्। भूतोपतापात् भूतशब्देनात्र ग्रहादयो व्याला जन्तवश्च परिगृह्यन्ते 'अभिघातात् केनचिदिति शेषः। आहारप्रतीकारविवर्जनादिति आहारस्य आह्रियते उपचीयते शरीरमनेनेति निरुक्त्या शरीरोपचयकरस्य द्रव्यस्य प्रतिकारस्य चिकित्सितस्य च वर्जनात्। आयुर्यावदन्तरा शिष्टेऽप्यायुषीत्यर्थः। स च मृत्युरकालमृत्युरित्यभिधीयते। अपिच वयं दिव्यचक्षुषा सुचिरं पर्यवेक्षणेन च ज्वरादीन् व्याधीन् अकालमृत्युञ्च मिथ्योपचरितान् मिथ्याहारविहारावेव जनयतः इति पश्यामः॥ ४४॥

ननूक्तं भगवता देशकालात्मगुणविपरीतानामाहारविकाराणां क्रमेणोपयोगः आरोग्यानुवृत्तौ हेतुरिति, तत्र संशयः, दृश्यते हि शीतसाध्ये आग्नेये ज्वरेऽपि सर्वभिषजः उष्णमेव पानीयं भूयिष्ठत्वेन प्रयच्छन्ति पातुं, न शीतं तत् कथं संगच्छते इत्याह किन्नु इति। किन्नु प्रश्ने। शीतसाध्यो धातुः आग्नेयं पित्तम् इति। यदुक्तं तन्त्रान्तरे "उष्मा पित्तादृते नास्ति ज्वरो नास्त्युष्मणा विना" इत्यादि। उत्तरयत्याचार्यः ज्वरितस्येति। पाचनार्थमामदोषपाकाय। आमाशयश्रिता एव दोषाः ज्वरान् कुर्वन्तीति पाचनं प्रयोजनमेवेत्याह प्राय इति। तत्रोष्णोदकपानफलमाह तच्चैषामिति। तद् उष्णोदकम् एषां ज्वरितानाम्। उदर्यमग्निं पाचकाग्निम्। अपवादमाह तथायुक्तमिति। अत्यर्थोत्सन्नपित्ते अतिपित्तप्रधाने तत्र दाहादिकमत्यर्थत्वेन वर्तत इत्याह सदाहेति॥ ४५-४६॥

प्रसंगात् सर्वव्याधीनामेव समुत्थानविपर्यस्ता क्रिया कर्तव्येत्याह शीतेति। भिषग्विदः विद्वांसो भिषजः। दृष्टान्तेनार्थमिमं समर्थयति एवमिति। अपतर्पणनिमित्तानामत्यपतर्पणमिथ्यापतर्पणनिमित्तजानाम्। पूरणं वृंहणम्। अपतर्पणभेदानाह अपतर्पणमिति। तानि तु स्वल्पमध्यमेषु

दोषबलेषु यथाक्रमं प्रयोज्यानीत्याह तत्र लंघनमिति। लंघनमत्रोपवासरूपम्। पांशुभस्मावकिरणैः प्रचुरधूलिप्रक्षेपैः भस्मप्रक्षेपैश्च। केदारसेतुः क्षेत्रस्थालवालम्। पल्वलः क्षेत्रगत उदकसञ्चयः। तस्य प्रसेकः सेचनं शुष्कता इत्यर्थः॥ ४७-५२॥

केषाञ्चिदातुराणां चिकित्सा अकर्तव्या तानाह दोषेति। अन्यद्वा भेषजं पाचनलंघनादिकं संशमनीयम्। अनपवादप्रतीकारस्येति नास्ति अपवादो यस्मादित्यनपवादः बहुनिन्दाकरः प्रतीकारो यस्य तस्येत्यर्थः। यस्य प्रतीकारे कृते व्याधेरसाध्यत्वादिना निन्दैव फलं भवतीत्याशयः। अधनस्य पथ्यभेषजादिसंग्रहाभावादित्यर्थः। अपरिचारकस्य शुश्रूषकाभावान्न फलावाप्तिः। वैद्यमानिनो हि वैद्ये भेषजे च श्रद्धा न तिष्ठति। चण्डः कोपनस्वभावो हि त्वरितफलालाभेन वैद्यं तिरस्करोति। असूयको हि स्वभावतो वैद्यगुणेषु दोषानारोपयति। अधार्मिकस्य कर्मप्रातिकूल्येन न फलं भवति। अतिक्षीणबलादिकस्यापि न फलावाप्तिः॥ ५३॥

उक्तमर्थं पुनः पद्येन समर्थयति तदात्वे इति। तदात्वे तस्मिन्काले। अनुबन्धे परवर्त्तिकाले। संगतेरभावादत्र जांगलदेशादिलाक्षणिकः केचित्कः पाठः नाद्रियते। अतिरोहितार्थमन्यत्॥ ५४-५६॥

अध्यायार्थं निवेद्याध्यायं समापयति तत्र श्लोका इति॥ ५७-६०॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां विमानस्थाने जनपदोद्ध्वंसनीयो नाम तृतीयोऽध्यायः॥ ३॥

चतुर्थोऽध्यायः।

पूर्वाध्याये साधारणेन जनपदोध्वंसनीयानां व्याधीनां मानमुपदिष्टम्। सम्प्रत्यवसरवशात् विकारविशेषविज्ञानायाध्यायान्तरमारभते अथात इत्यादिना। खलु निर्धारणे तेन त्रिविधमेव न त्वधिकं नाल्पं वेत्यर्थः। तत्र त्रिविधेषु प्रमाणेषु ह्याप्तागमस्य प्राधान्यात्तमेवाह प्राक्। न खलु किञ्चिदनुपदिष्टं प्रत्यक्षादिनोपलभ्यते। तत्रेति। तत्र तेषु मध्ये उपदेश आप्तवचनम्। ननु के नामाप्ता इत्याह आप्ता हीति। अवितर्कस्मृतिविभागविद इति अवितर्काः संशयरहिताः या स्मृतयः कर्तव्याकर्तव्यविनिर्देशकानि धर्मानुशासनानि तेषां विभागः सामान्यधर्मावच्छिन्नानामेव बहूनां परस्परविरुद्धतद्व्याप्यधर्मप्रकारेण प्रतिपादनं तं विदन्तीत्यर्थः। निष्प्रीत्युपतापदर्शिनः समदर्शिन इत्यर्थः। एवं गुणयोगात् सर्वशास्त्रज्ञत्वेन निःस्वार्थत्वेन चेत्यर्थः। मत्ताः पुनर्मादकसेवया उन्मत्तास्तु व्याधिताः। मूर्खाः शास्त्रज्ञानरहिताः ये वक्तारः ‡ तेषां दृष्टवचनं यथावदनुभूतेरभावाद् अदृष्टवचनं तु अप्रत्यक्षीकृतमनुमितमित्यर्थः॥ २-४॥

प्रत्यक्षमाह प्रत्यक्षमिति। तज्ज्ञानमिति शेषः। अपरप्रत्यक्षस्य

‡ "मत्तोन्मत्तमूर्खवक्तृदृष्टादृष्टवचनम्" इति पाठोऽत्रादृतः।

उपदेशान्तर्भावात् स्वयमिति । मृतशरीरे ज्ञानाभावात् आत्मना इति । आत्मेन्द्रियविषयसन्निकर्षजं ज्ञा प्रत्यक्षमित्यर्थः । अत्रेन्द्रियशब्देन मनसोऽपि परिग्रहो भवति । अनुमानमाह अनुमानमिति । युक्त्यपेक्षस्तर्कः व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानमित्यर्थः । एतेन प्रमाणत्रयेण प्रागरोगं सर्वप्रकारेण परीक्ष्य या या निश्चयात्मिका बुद्धिर्भवति परस्तात् सा सर्वथा दोषशून्या भवति इत्याह त्रिविधेनेति । अध्यवसानं निश्चियात्मकं ज्ञानम् । ज्ञानस्य त्रैविध्ये हेतुमाह नहीति । केवलेन प्रत्यक्षेणानुमानोपदेशेन वा न कोपि निखिलान् ज्ञेयान् ज्ञातुं समर्थो भवेदित्यर्थः । तत्र प्रागेव सर्वेषां आप्तोपदेशादेव ज्ञानं भवति, न खलु अनुपदिष्टवृक्षस्य कस्यचिद् दृष्टेऽपि वृक्षे ज्ञानं भवति न वानुपदिष्टवह्निधूमस्य धूमदर्शनादपि वह्न्यनुमानं भवतीत्याह त्रिविधेति । उपसंहरति तस्मादिति । ज्ञानवतां प्रागुपदिष्टानामित्यर्थः । अन्येषां तु त्रिविधैव ॥ ५-७ ॥

अथ रोगविज्ञाने आप्तोपदेशप्रकारं प्रदर्शयति तत्रेदमिति । एकैकं रोगं प्रतिरोगमित्यर्थः । प्रकोपणं मिथ्याहारादिकं योनिर्वातादिकम् । एवमुत्थानमेवंसंप्राप्तिकम् । एवमात्मानमेवंस्वभावम् । अधिष्ठानं शरीरं मनश्च । एवं वेदनाऽनुभूतिः यस्य तम् । संस्थानं लिङ्गम् । एवं वृद्धिस्थानक्षयसमन्वितं उपशयानुपशयाभ्यां दोषाणामित्यर्थः । एवमुदर्कं भविष्यत्येवं फलदम् । एवं योगमेवं दोषदूष्यसम्मिश्रणम् । तस्मिन् व्याधौ उपदेशात् शास्त्रोक्तलक्षणाद्यनुशीलनात् साध्यत्वे प्रतीकारार्था प्रवृत्तिः असाध्यत्वे च निवृत्तिरिति ज्ञायते इति योजना ॥ ८ ॥

पुनश्च प्रत्यक्षेण ज्ञातव्यान्युपदेष्टि प्रत्यक्षत इति । बुभुत्सुः बोद्धुम् इच्छुः । इन्द्रियार्थानत्र शब्दस्पर्शरूपगन्धानित्यर्थः । रसज्ञानस्य इन्द्रियेण परीक्षाऽसम्भवात् तद्व्यावर्तयति अन्यत्रेति । ननु आतुरशरीरगतं रसमपि भिषग्भिः रसनेन्द्रियेण ग्राह्यमेव यदुक्तं सुश्रुते "रसनेन्द्रियविज्ञेयाः प्रमेहादिषु रसविशेषाः" इति । इति चेन्न तत्रैव अपवादविधिना तस्य प्रतिषिद्धत्वात् यदुक्तं तत्रैव—"आत्मासदृशेषु विज्ञानाभ्युपायेषु ततस्थानीयैर्विजानीयात्" इति । दृष्टान्तैरर्थमेनं विस्पष्टयति तद्यथेति । अन्त्रकूजनं अन्त्रगतवायोरव्यक्तशब्दविशेषम् । संस्थानमाकृतिः । छाया कान्तिः । ननु आतुरगतं रसं कथं विजानीयादित्याह रसन्विति । इन्द्रियवैषयिकं रसनेन्द्रियग्राह्यम् । रसज्ञानप्रकारमाह तस्मादिति । यूकापसर्पणेन आतुरकेशादिगतयूकानां शरीरत्यागेन । स्नातानुलिप्तस्यापि शरीरमाधुर्यात् मक्षिकास्त्वेनं गृध्नन्तीत्याह मक्षिकोपसर्पणेनेति । यदि कस्यचिन्मुखतो रक्तं निर्गच्छेत् तद् रक्तं रक्तपित्तस्योरःक्षतस्य वेति संशये रक्तपित्तस्य रक्तस्य तिक्तत्वात् न कुक्कुरादिनामिष्टम्, उरःक्षतस्य च शरीरधारकं रक्तं न च तिक्तमिति काकादिनामिष्टं भवतीति तैर्भक्षणादभक्षणाच्च व्याधिरनुमेयो भवतीत्याह लोहितेति । एवं रसज्ञाने अनुमानादिकमेव प्रमाणं भवति न प्रत्यक्ष-

मित्याह एवमिति। एवं गन्धान् स्पर्शञ्च प्रकृतिविकृतियुक्तं स्वैरेवेन्द्रियैः भिषक् परीक्षेतेत्याह गन्धानिति। अत्रैन्द्रियकेषु विषयेषु त्रिविधप्रमाणेनैव परीक्षा कर्तव्येति उपसंहरति प्रत्यक्ष इति ॥ ९ ॥

अथ केवलेनानुमानेन ज्ञातव्यानाह इमे इति। अग्निं पाचकाग्निं जरणशक्त्या परिपाकशक्त्या। व्यायामशक्त्या परिश्रमशक्त्या। श्रोत्रादीनि इन्द्रियाणि अविकृतानीति शेषः। अव्यभिचारेण शब्दादीनां यथावत् परिग्रहेण। विज्ञानं शास्त्रादिज्ञानं व्यवसायेनानुष्ठानेन क्रिययेत्यर्थः। संगेन आसक्त्या। अभिद्रोहेण आजिघांसया। हर्षस्तु संतोषजन्यनृत्यगीतादिक्रियाकरणप्रवृत्तिः प्रीतिस्तु संतोषमात्रम्। धैर्यं स्थरचित्तता अविषादेन सत्यपि दुःखकारणे इति शेषः। वीर्यं दुष्करकार्येष्वप्यनिवृत्तिः। अवस्थानं धारणां अविभ्रमेण स्मृत्यविभ्रंशेन। ग्रहणेन ग्रन्थादिकण्ठकरणेन। संज्ञां अविसंवादिज्ञानं नामग्रहणेन अमुकोऽयमिति परिचयशक्त्या। उपाधिं धर्मचिन्तां अनुबन्धेन यज्ञाद्यनुष्ठानेन। धृतिमिन्द्रियनियमनम् अलौल्येनालोभेन। विधेयतया आज्ञानुकारितया। वय इति। वयः कालविशेषेण बाल्यादिकालविशेषेणेत्यर्थः। भक्तिः तत्तद्विषयिणी इच्छा देशविशेषेण विभिन्नदेशीयाणां विभिन्नरुचिर्भवतीत्यर्थः। सात्म्यमुपशयविशेषेण किमस्योपशेते किं वा नेति विचार्य सात्म्यानुमानं कर्तव्यमित्यर्थः। व्याधिसमुत्थानानि व्याधिकारणानि वेदनाविशेषेण व्याधेरिति शेषः। अपचारः मिथ्याहारविहारादिः। अविकारेण चित्तस्येति शेषः। अमलं रजस्तमोरहितं आतुरग्रहण्यास्तु मृदुदारुणत्वमित्यादिविषयाः आतुरं दृष्ट्वा तदुत्तरेणैवानुमानग्राह्या भवन्तीत्याह ग्रहण्या इति ॥ १० ॥

अर्थमिमं समासतः पुनः पद्येनाह भवन्तीति। सर्वथा उपदेशादिप्रमाणत्रयेणेत्यर्थः। आतुरगतरसज्ञानस्य प्रत्यक्षत्वेऽपि तदसम्भवात् अनुमानेनैव ज्ञातव्यतां निर्दिशन्नाह यथासम्भवमिति। तत्त्वे व्याधिनिर्णये अध्यवस्येत् निश्चयात्मिकां बुद्धिं कुर्यात्। कार्ये चिकित्सायाम्। कार्ये तत्त्वे च अध्यवसानफलमाह कार्येति। प्रतिपत्तौ सिद्धौ आतुरनिरामयीकरणे इत्यर्थः। अतः व्याधेस्तत्त्वपरिज्ञानं चिकित्सातत्त्वपरिज्ञानञ्च उभयमेव भिषग्भिर्ज्ञेयमिति व्यतिरेकेण प्रमाणयति ज्ञानेति। योगवित् औषधतत्त्वज्ञोऽपि यः ज्ञानबुद्धिप्रदीपेन शास्त्रज्ञानजन्या या बुद्धिस्तद्रूपप्रदीपेन आतुरस्यान्तरात्मानं अन्तः शरीरं तस्य चाप्रत्यक्षत्वात् तमोवृतं गृहमिवेत्यर्थः। न आविशति बुद्ध्या आतुरान्तःशरीरमवगाहते, तत्र तत्र का का विकृतिर्जाता इति न निश्चीयते स रोगान्न चिकित्सति चिकित्साक्षमो भवतीत्यर्थः ॥ ११–१४ ॥

अध्यायार्थं निवेद्याध्यायं समापयति तत्र श्लोकाविति ॥ १५–१६ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां विमानस्थाने त्रिविधरोगविशेषविज्ञानीयो नाम चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्याय: ।

पूर्वाध्याये बुद्ध्या आतुरान्त:शरीरमपि परीक्ष्यं भिषग्भिरित्युक्तम् अतो विनान्त:शरीरज्ञानं न तथा सम्भवतीति तज्ज्ञानार्थं शरीरान्त:स्थानामसंख्यानां स्रोतसां ज्ञानमपेक्ष्यत इति स्रोतोविमानं व्याचिख्यासुराचार्य: अध्यायान्तरमारभते अथात इत्यादिना । स्रोत:शब्दोऽत्र यत्किञ्चिदभिवाहिप्रणालीसामान्यवाची । तेनात्र सिराधमनीनामपि परिग्रहो भवति । तयोरप्यभिवाहित्वेन स्रोतोवाचकत्वमविरुद्धं भवति । अतएव शिरादिशब्दानां स्रोत:पर्यायत्वं प्रतिपादयिष्यत्यग्रे । तत्र जीवितशरीरे स्रोतसां प्राधान्यमाह यावन्त इति । पुरुषे इत्युल्लेखात् जीवितशरीर एव यावन्तो भावविशेषा: उत्पत्तिशीलानि द्रव्याणि सन्ति इत्यर्थ: । मूर्तिमन्त इति विशेषणेन अमूर्तिमत: आकाशात्मनो व्यवच्छेद: कृत: । तेन मनस इन्द्रियाणामप्रत्यक्षाणामपि स्रोतांसि जीवितशरीरे वर्तन्त एवेति ज्ञेयम् । एवं सामान्यत: स्रोतांसि उद्दिश्य तत्र प्राधान्येन प्रयोजनानां देहधातूनां स्रोतांसि सप्रयोजनकानि विवृणोति । हि यत: सर्वे भावा: अत्र देहधातव: स्रोतांसि स्वस्वगमनमार्गान् अन्तरेण विना अभिनिर्वर्तन्ते उत्पद्यन्ते क्षयं नाशं वा अभिगच्छन्ति प्राप्नुवन्ति । कथमित्याह स्रोतांसीति । परिणाममापद्यमानानां सन्ततचयापचयेन अन्यथाभावं प्राप्नुवतां धातूनां देहधातूनामयनार्थं गमनागमनविषये अभिवाहीनि भवन्ति तांश्च स्थानात् स्थानान्तरं प्रापयन्ति ॥ १–३ ॥

मतान्तरमुपन्यस्य दूषयति अपिचेति । अपिरयं निन्दायाम् । पुरुषस्य स्रोत:समुदायत्वं साधयति सर्वगतत्वादिति । सर्वगतत्वात् शरीरस्य सूक्ष्मातिसूक्ष्मेऽप्यंशे गतत्वात् स्रोतसामिति शेष: । पुनश्च दोषप्रकोपणानामपथ्यानामित्यर्थ: । दोष: प्रशमनानां पथ्यानाञ्च सर्वसरत्वात् । स्रोतांसि सर्वस्मिन्नेव शरीरांशे वर्तन्ते एवम् अतिसूक्ष्मेऽप्यंशे पथ्यापथ्यानां फलं गच्छतीति तत्र तत्र दोषाणां प्रकोप: प्रशमश्च दृश्यते अत: पुरुष: स्रोत:समुदाय एवेति पक्ष: । मतमेतन् न्यक्करोति न त्वेतदेवमिति । यस्य प्राणादे: स्रोतांसि यच्च रसरक्तादिकं वहन्ति, यच्च रसवहं स्रोत: रक्तादिकं अवहन्ति न वहन्ति, यत्र कोष्ठादौ चावस्थितानि, तत् सर्वं दोषधात्वादय: कोष्ठाद्यवयवाश्च तेभ्य: स्रोतोभ्य: अन्यत् पृथग्भवतीति शेष: । पुरुषस्य स्रोत:समुदायत्वे दोषधातुमलादीनामपि स्रोतस्त्वमापद्येत तच्च न सम्भवतीति पक्षोऽयं न संगच्छत इत्याशय: ॥ ४ ॥

ननु स्रोतांसि परिसंख्येयान्युतापरिसंख्येयानि इति विचार्यते अतिबहुत्वादिति तत्रैकैकश: परिगणनेनापरिसंख्येयत्वेऽपि क्रियासामान्यात् समस्य गणनया त्वेषां परिसंख्येयत्वं भवतीति पक्षयोरुभयो: सामञ्जस्यं भवतीत्याशय: । अतएवैषाम् अपरिसंख्येयानां पृथगेकैकशो वर्णनमसंभाव्य-

मिति स्थूलतो व्याचिख्यासुराह तेषामिति। तेषामतिबहूनाम्। यथास्थूलं स्थूलतः। कतिचित् प्राणवहादीनि मूलतः मूलज्ञानेन सह प्रकोपविज्ञानतः तत्र तत्र दोषप्रकोपलक्षणेन च सहेत्यर्थः। ये व्याख्याता विषयाः ज्ञानवतामनुक्तार्थज्ञानाय अत्रानुक्तानामश्रुतन्यादिवहानामपि स्रोतसां स्वबुद्ध्या उट्टंकनाय, अज्ञानवतामबुद्धिमतान्तु विज्ञानाय उक्तार्थमात्रज्ञानायालं भविष्यन्ति ॥ ५ ॥

कानि तानि इत्याह प्राणेति। जीवितशरीरप्रकृतिवर्णने हि शरीरे त्रिविधपदार्थानां ज्ञानमेव प्रयोजनं भवति। तद्यथा—केचित् शरीराहार्याः बहिस्तः शरीरे प्रविशन्ति, केचिच्च शरीरे स्थायिरूपेण निवसन्ति, केचिद्वा शरीराद्बहिर्निर्गच्छन्तीति। एतेषां प्रवेशमार्गः चलाचलमार्गः बहिर्गमनमार्गश्च ज्ञातव्यत्वेनात्रोदाह्रियन्ते, तेषु प्राणान्नोदकानामाहार्याणां मार्गाः बहिस्तोऽन्तःशरीरे विशन्ति। स्थायिधातूनां रसादिनाञ्च अन्तःशरीरमेवाधितिष्ठन्ति। मूत्रपुरीषस्वेदानाञ्च बहिर्मुखानां मलानां मार्गास्तु अन्तःशरीराद् बहिः सरन्तीति स्थूलतः त्रिविधानां पदार्थानां स्रोतोज्ञानेनैव सर्वेषां स्रोतसां ज्ञानं ज्ञानवतां भवितुमर्हतीति ज्ञेयम्। ननु शरीरान्तश्चारिणां मूलधातूनां वातादिनामपि पृथक् स्रोतांसि भाव्यानीत्याह वातेति। सर्वशरीरचराणामिति हेतुगर्भं विशेषणम्। तेषामुपादानभूतानां रसादिसप्तधातुस्रोतश्चारित्वं सिध्यति निमित्तकारणभूतानाञ्च कर्म-पाचनश्लेषणादिना च प्राणादिनाहार्याणां मलभूतानाञ्च मूत्रादिनां स्रोतश्चारित्वमव्याहतं भवतीत्याशयः। अतस्तेषां पृथक्स्रोतोवर्णनमनावश्यकमित्याह सर्वस्रोतांस्ययनभूतानीति। ननु मनस इन्द्रियाणां च सर्वशरीरचारित्वमुपलभ्यते तेषामपि स्रोतांसि वक्तव्यानीत्याह। तद्वदिति सर्वस्रोतांस्ययनभूतानि, पुनश्च कानिचिदिन्द्रियाधिष्ठानेभ्यः बुद्ध्यात्मनः स्थानं हृदयं यावत् प्रसृतानि स्रोतांसि अतीन्द्रियाणि इन्द्रियाग्राह्याणि न खलु मृतकखण्डनादुपलभ्यानीति न पृथक् परिगणितानीति निष्कर्षः। सत्वादीनां मनसः इन्द्रियाणाञ्च। तथा तेषामनुपलभ्यत्वे पृथक्कारणमाह केवलमिति। केवलं चेतनावदिति मृतशरीरव्यवच्छेदार्थम्। मृतशरीरे च ज्ञानवाहीनि स्रोतांसि नश्यन्तीत्यर्थः। अर्थमेनं सुश्रुताचार्यः समर्थयति यथा—

"पञ्चाभिभूतास्त्वथ पञ्चकृत्वः पञ्चेन्द्रियं पञ्चसु भावयन्ति।
पञ्चेन्द्रियं पञ्चसु भावयित्वा पञ्चत्वमायान्ति विनाशकाले॥" इति।

अयमर्थः—पञ्चाभिभूताः पञ्चभूतोत्पन्नाः धमन्यः पञ्चकृत्वः पञ्चवारान् पञ्चेन्द्रियं पञ्चसु शब्दादिषु विषयेषु भावयन्ति प्रापयन्ति जीवितावस्थायामिति शेषः। पुनश्च विनाशकाले उपस्थिते मृत्युसमये पञ्चेन्द्रियं पञ्चसु उपादानभूतेषु भूतेषु भावयित्वा स्वयं पञ्चत्वं पञ्चभूतावशेषत्वमायान्तीति। अतो मृतशरीरे मनस इन्द्रियाणाञ्च स्रोतांसि नोपलभ्यन्ते इत्याशयः। अतएव जीवितशरीरविशकलनासम्भवात् मृतशरीरेऽपि सत्वादि-

स्रोतसां नाशात् तान्यतीन्द्रियाण्येवेति तात्पर्यम् । पुनश्च वातादीनामपि सचेतनं शरीरमयनभूतमधिष्ठानभूतमिति ज्ञेयम् । ननु मृतेऽपि शरीरे आध्मान दर्शनाद् वायो: कार्यं कोथनाच्च पित्तस्य कार्यमुपलभ्यते इति चेन्न तानि च पञ्चभूतान्तर्गतवाय्वग्न्यो: कार्याणीति ज्ञेयानि यदुक्तं भेलसंहितायाम्— "तावेव यदा शरीरादपक्रामतस्तदा तद् भवति निर्वातो निरुष्मा प्रेतो मृत इति । नेत्याह भरद्वाज: मृतोपि जन्तुर्वायुना ध्मायते अग्निना शोष्यते । नेत्याह भगवानात्रेय: न वा तस्याग्निमारुतौ जीवयत: तयोरुत्क्रान्तयो- र्बाह्याग्निमारुतावाविशत:" इति (शा० ६) तौ पित्तवाताविति्यर्थ: ॥ ६-७ ॥

यावच्चैतानि स्रोतांसि अविकृतानि वर्तन्ते तावदेव शरीरं विकारै- र्नाक्रम्यते इत्याह तदिति । तत्तस्मात् एतत् शरीरमिति योजना ॥ ८ ॥

उद्देशक्रमात् प्राक् प्राणवहस्रोतांसि मूलत: प्रकोपविज्ञानतश्च व्या- चष्टे तत्रेति । तत्र तेषु मध्ये प्राणवहस्रोतांसि तु नासापुटादारभ्य उर:कोष्ठं व्याप्य वर्तन्ते यानि श्वासप्रश्वासवाहीनि गलदेशात् तरुणास्थिमयानि शाखा- प्रशाखाभि: फुप्फुसयन्त्रस्यान्त: तच्च सर्वतो व्याप्यावतिष्ठन्ते । तेषां मूलं प्रभवस्थानन्तु हृदयं स्तनयोर्मध्ये उर:कोष्ठे अधोमुखपद्मकलिकाकारं यन्त्रम् पुनर्महास्रोतश्च । महास्रोत: कोष्ठमित्यनर्थान्तरम् । यदुक्तं "कोष्ठं पुनरुच्यते शरीरमध्यंम हानिस्नामपक्वाशयश्चेति पर्यायशब्दैस्तन्त्रे" इति (सू० ११ अ०) तस्य कोष्ठार्थत्वेऽपीह तस्यैकदेशस्य उर:कोष्ठस्यैव परिग्रहो भवति तेन तद्गतं फुप्फुसयन्त्रमवहननाख्यमेव गृह्यते । तदेव प्राणवहानां प्रभवस्थानं भवति । तेषां दुष्टिलक्षणमाह प्रदुष्टानामिति । अतिसृष्टमतिबहुलम् । प्रकुपितं दुष्टम् । अभीक्ष्णं पुन: पुनरतिद्रुतमित्यर्थ: । सशब्दशूलं शब्देन घड घड़ा- यनेन शूलेन उर:शूलेन च सहितं उच्छ्वसन्तं श्वासं गृह्णन्तम् ॥ ९ ॥

क्रमागतत्वादुदकवहानि विवृणोति उदकेति । शरीरयात्रार्थं यावन्ति उदकानि प्रयोजनानि तानि पीतानि तु उदकवहस्रोतोभिराकृष्टानि तेषां मूलस्थाने सञ्चिन्वन्ति, तत: प्रच्यवमानानि शरीरकृत्यं निर्वाहयन्ति । यद् वक्ष्यति—"दशोदकाञ्जलय: शरीरे स्वेनाञ्जलिप्रमाणेन । यत्तु प्रच्यवमानं पुरीषमनुबध्नाति अतियोगेन, तथा मूत्रं रुधिरमन्यांश्च शरीरधातून्" इति । अतस्तालुप्रदेशादारभ्य क्लोमानं यावदसंख्येयानि उदकवहानि स्रोतांसि वर्तन्ते । तेषां मूलं प्रभवस्थानं ऊर्ध्वतस्तालु (अत्र तालुपदेन जिह्वागल- योरपि परिग्रह: कर्तव्य:) च उत्तरदन्तवेष्टस्य पृष्ठत: आरभ्याभ्यन्तरतो मुख- कुहरस्य नासागतच्छिद्रं यावत् उत्तरप्रदेश: । क्लोमा चामाशयस्य पृष्ठत: पृष्ठाभ्यन्तरभागे संसक्त: तिलसंज्ञ: । दक्षिणे पार्श्वेऽस्य शिरोभाग: स्थूलतम: अन्तर्नाभ्या वेष्टित आस्ते । अयं दक्षिणपार्श्वात् वामपार्श्वस्थं प्लीहानं यावत् प्रसार्य तिर्यगभूय वर्तते । आयामत: प्राय: दशांगुलमित: प्रस्थतश्च प्राय: त्रिचतुरंगुलमित: । अस्य विशेषतो विवृति: मदीये "शारीरविनिश्चये" कोष्ठांगविनिश्चयाध्याये द्रष्टव्या । तेषां प्रदुष्टिलक्षणान्याह प्रदुष्टानामिति ।

जिह्वादीनां शोषः तत्र तत्रोदकाभावः अवयवान्येतानि सन्ततं सञ्चितेनोदकेन सिक्तानि तिष्ठन्ति । तेषां शोषं दृष्ट्वा उदकवहस्रोतसः परमसञ्चयस्थानस्य क्लोम्नोऽपि शोषोऽनुमेयो भवति ।

अन्नवहस्रोतांसि व्याचष्टे अन्नवहानामिति । अन्नवहस्थूलस्रोतस्तु गलकुहरादारभ्यामाशयं याव्द् वर्तते । सु द्मान्यन्नवहस्रोतांसि तु आमाशयवामपार्श्वं व्याप्य वर्तन्ते । तत्र स्थूलस्य मूलं प्रभवस्थानमामाशय एव । आमाशयस्तु चतुर्विधस्याहारस्य प्रथमः आधारः महास्रोतसः स्थूलतमोंऽशः स च पूर्वतः स्थूलतमो मध्यांशश्च स्थूलतरस्ततः क्रमशः सूक्ष्मो भूत्वा अन्तर्नाभिसम्बद्ध आस्ते । आयामतश्चायं षोडशांगुलमितः विस्तारतश्च अंगुलद्वयात् षडंगुलं यावत् मानं भवति । अयं हि आकृतिगतसंज्ञया आमाशयोऽत्र गृहीतः । स्थूलान्नवहस्रोतसोऽयमेव मूलं भवति । सूक्ष्मान्नवहस्रोतसां अमाशयपृष्ठगतानामणुमितानान्तु मूलं वामं पार्श्वम् । वामपार्श्वपदेनात्र तस्य बाह्यांगत्वात् तद्गतकोष्ठावयवः प्लीहैवावबुध्यते । स चामाशयवामपार्श्वसंसक्तः सुसूक्ष्मैः स्रोतोभिरामाशयगतस्यान्नस्य सुसूक्ष्ममंशं गृह्णन् पुष्टिं लभते । अतएव प्लीहावृद्धिनिदाने "अत्याशितस्य संक्षोभात्" इत्याद्यक्तं वाग्भटेन । तेषां दुष्टिलक्षणमाह प्रदुष्टानामिति । अनन्नाभिलषणमल्पधा ॥ ११ ॥

रसवहान्याचष्टे रसवहानामिति । रसवहस्थूलस्रोतस्तु पक्वाशयाद् धमनीभिरानीतेन रसेन पूर्णाद् रसस्थानादारभ्य हृदयं यावत् वर्तते तस्य मूलं हृदयम । ततः सुसूक्ष्माणां रसवहस्रोतसां तत्तद्धातुपोषणस्थानगानां मूलन्तु दशधमन्यः हृदयात् संप्रसृताः दश शिराः । याभिरन्नरसः कृत्स्नं शरीरं रक्तेन सहानुगच्छन् सर्वान् धातून् पोषयति । स च शिराभिर्गच्छन्नपि ततः सुसूक्ष्मेषु रसवहस्रोतःसु प्रविश्य ततश्च्युतः पोषयितुमलं भवति । इति तेषां सुसूक्ष्मस्रोतसां मूलं शाखाप्रशाखाभिः सह हृदयनिबद्धा दश शिरा भवितुमर्हति । शोणितवहानि विवृणोति शोणितेति । सूक्ष्माणि हि रक्तवहस्रोतांसि यकृत्प्लीह्नोरन्तःस्थानि तानि रक्तोत्पादनकाले स्थानात् स्थानान्तरं प्रापयन्ति । स्थूलानि तु यकृत्प्लीहभ्यां हृदयमभिवहन्ति रक्तमिति तेषां मूलं यकृत् प्लीहा च भवतः । यकृत्तु हृदयादधो दक्षिणपार्श्वस्थं कालखण्डं "कलेजा" इति लोके । प्लीहा वामपार्श्वस्थः आमाशयसंसक्तः प्रसिद्ध एव । मांसवहान्याह मांसेति । अत्र स्नायुः मांसाग्रसंसक्ता कण्डरा बोद्धव्या । त्वगत्र मांसधरैव । ते च सुसूक्ष्माणां द्रवरूपाणां मासानां वाहकानां स्रोतसां मूलं भवति । मेदोवहान्याह मेद इति । तत्र सूक्ष्माणां मेदसामभिवहानां स्रोतसां मूलं वृक्कौ । तौ च वस्तिशिरसोरुपरि संसक्तौ ग्रन्थिविशेषौ भवतः । तयोर्विवृतिर्मदीये "शारीरविनिश्चये" द्रष्टव्या । स्थूलानां च स्रोतसां मूलं वपावहनम् । स चान्तःकुक्षौ सर्वयन्त्राच्छादको जरायुविशेषः, तत्रैवातिरिक्तं मेदः सञ्चिनोतीति वपां मेदो वहतीति तस्य तथा

संज्ञा भवति। अस्थिवहान्याह अस्थिवहानामिति। सर्वदेहव्यापिभ्यः मेदोभ्यः अनन्तरमन्नरसः अस्थीनि पोषयतीति द्रवरूपाणामस्थ्नां सूक्ष्मस्रोतसां मूलं मेद एव भवति। स्थूलानान्तु मूलं जघनं कटिकपालं भवति। मज्जवहान्याह मज्जेति। अत्र सूक्ष्माणां स्रोतसां मूलमस्थीनि भवन्ति स्थूलानान्तु सन्धयः अस्थिसन्धयः इत्यर्थः। शुक्रवहानां विवृतिराह शुक्रेति। सुसूक्ष्माणां सर्वशरीरचराणां शुक्राणां सर्वशरीरगानि यानि स्रोतांसि तेषां मूलं वृषणौ भवतः। तत्रैव तत् संहृत्य सर्वशरीरादेत्य मनाक्स्थूलं सञ्चिनोति। पुनश्च ततो द्वाभ्यां स्थूलस्रोतोभ्यां मूत्राधारस्याधः सञ्चीय वस्तिद्वारस्य द्वयंगुलादधः शेफोगतं मूत्रप्रसेकं यावदागत्य तेन संगच्छत इति तयोर्मूलं शेफ एव भवति। यदुक्तं सुश्रुताचार्येण—

"द्वयंगुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधः।
मूत्रस्रोतःपथाच्छुक्रं पुरुषस्य प्रवर्तते॥" इति।

स्त्रीणान्तु स्थूलशुक्राभावात् तस्य चाकिञ्चित्करत्वात्तासां शुक्रवहस्रोतसां वर्णनमत्र न कृतमित्यवधेयम्। नन्वेषां सप्तधातुस्रोतसां प्रकोपतो लिङ्गानि नोक्तानीत्याह प्रदुष्टानामिति। ननु विविधाशितपीतीये न क्वचित् स्रोतोदुष्टिलक्षणान्युक्तानीत्याह यान्येवेति। धातुदुष्टिलक्षणैर्नैव स्रोतोदुष्टिलक्षणमभिहितं तत् सामान्यादित्यर्थः॥ १२-१३॥

आहार्यधातूनां स्थायिधातूनाञ्च स्रोतांसि निवेद्य मलधातूनां बहिर्मुखानां स्रोतसां विवृतिमाह मूत्रेति। परिपक्वादाहारादुत्पन्नकिट्टान्तर्गतानां सुसूक्ष्ममूत्राणां शिराभिर्वस्तिशिरोगतानि सूक्ष्मस्रोतसां मूलं प्रभवस्थानं वस्तिरेव भवति। स्थूलयोस्तु द्वयोर्मूत्रवहस्रोतसोरुभयोः पार्श्वयोर्वंक्षणगतयोस्तु मूलं वंक्षणावेव भवतीत्याह मूलं वस्तिर्वंक्षणौ चेति। अत्र वस्तिपदेन अन्तर्वस्तिशीर्षाभ्यां मूत्राधारं यावत् स्थानं मूत्राशय एव परिगृह्यते। वस्तेर्विवृतिस्तु मदीये "शारीरविनिश्चये" कोष्ठांगविनिश्चयाध्याये द्रष्टव्या। प्रदुष्टानां तेषां लक्षणान्याह प्रदुष्टानामिति। अतिसृष्टं मानातिरिक्तं निर्गतम्। बहलं सान्द्रम्॥ १४॥

पुरीषवहानां विवृतिमाह पुरीषेति। परिपक्वादाहाराद् जातानां किट्टानामन्तर्गतस्य सुसूक्ष्मपुरीषस्य स्रोतांसि तु पक्वाशयगतानीति तेषां मूलं प्रभवस्थानं पक्वाशय एव भवति संघातरूपाणां स्थूलानां पुरीषाणां स्थानं तु स्थूलान्त्रे गुदे च भवतीति तेषां स्रोतसां मूलं स्थूलान्त्रं गुदं च भवितुमर्हतीत्याह मूलं पक्वाशयः स्थूलान्त्रं गुदञ्चेति। प्रदुष्टानां तेषां लक्षणान्याह प्रदुष्टानामिति। अतिग्रथितम् अतिकठिनम्। उपविशन्तं पुरीषं त्यजन्तम्॥ १५॥

स्वेदवहानि व्याकरोति स्वेदेति। स्वेदस्त्विह दृश्यते अन्नकिट्टाज्जातः मेदोमलरूपश्च। तत्र तौ किट्टांशात् परिपक्वान् मेदसश्च पृथग्भूय तत्संसक्तैः सुसूक्ष्मैः स्वेदवहस्रोतोभिर्गच्छन्तौ तिर्यग्गा धमनीरभिप्राप्य

ताभिरुद्वाह्यमानौ रोमकूपसंसक्तेषु स्रोतःसु प्रविशतः ततश्च रोमकूपमुखैर्बहिर्निर्गच्छत इत्याह मेदोमूलं रोमकूपाश्चेति। अत्र सुसूक्ष्मस्रोतसां मूलं प्रभवस्थानं मेदः। यद्यप्यन्नकिट्टोद्भवानां स्वेदानां यानि स्रोतांसि तेषां मूलं पक्वाशय एव तथापि तानि पक्वाशयावरकं वपावहनं निर्भिद्य गच्छन्तीति मेदोमूलत्वमेषां युज्यते एव। स्थूलानां स्रोतसां तु प्रभवस्थानं रोमकूपा एव। प्रदुष्टानां तेषां लक्षणान्याह प्रदुष्टानामिति। अंगस्येति तदवयवभूतायास्त्वच इत्यर्थः। मेदोमलस्वेदाधिक्ये तस्या अतिश्लक्ष्णता अतिमसृणता अस्वेदने च पारुष्यम् इति ज्ञेयम्। परिदाहोऽप्यंगस्य ॥ १६ ॥

ननु सुश्रुते एवं स्रोतोलक्षणमभिहितं यथा—

"मूलात् खादन्तरं देहे प्रसृतन्त्वभिवाहि यत्।
स्रोतस्तदिति विज्ञेयं शिराधमनीवर्जितम्॥"

इत्येतेन शिरा वा धमनी वा न स्रोतःपदेन तत्राभिहिता, इह तु प्रकरणेऽस्मिन् ते अपि स्रोतःपदेनाभिहिते इति विरोध इति चेत् कथ्यते। शल्यतन्त्रे तु स्रोतसां मूलविद्धलक्षणप्रसंगेन स्रोतांस्युदाहृतानि इति स्रोतःशब्देन सर्वेषामवकाशानां परिग्रहत्वेऽपि अधिकारभेदादभिधेयार्थं संकोच्य कतिचिदेवावकाशाः परिगृहीताः अतएव तत्रैवोक्तं "येष्वधिकारः" इति। एवं सत्स्वप्यस्थ्यादिवहेषु स्रोतःसु अनधिकृतत्वात् तेषामनुल्लेखो न दोषावहः। इह तु कायचिकित्सायां दोषाः सर्वानेवावकाशान् दूषयित्वा विकारान् जनयन्तीति सर्वेषामेवावकाशानां परिग्रहः कृतः। एवं परिस्थितौ सर्वावकाशपरिग्रहार्थं स्रोतांसीत्यादयो निकेतान्ताः पर्यायशब्दाः इति प्रतिपादयितुमाह स्रोतांसीति। शिराधमनीस्रोतसां क्रियापार्थक्येऽपि सर्वाण्येतानि कानिपि शरीरधातूनभिवहन्तीति सर्वेषां स्रोतःसंज्ञा अविरुद्धा इति ज्ञेयम्। अत्र शिराश्चतुर्विधाः रक्तवहाः प्रणाल्यः। धमन्योऽत्र पृथग्रसायन्यादीनामुल्लेखात केवलं वातवाहिन्यो असुषिरा एव मन्तव्याः। रसायन्यस्तु स्थायिरसस्यायनभूतानि स्रोतांसि। रसवाहिन्यस्तु शरीरपोषणार्थं अन्नरसवाहिन्यः सुषिरा धमन्यो ज्ञेयाः। संवृतासंवृतानीति कानिचिदग्रे संवृतानि शरीरच्छिद्राणि, कानि वा असंवृतानि उभयतो मुखानि शरीरच्छिद्राणि इत्यर्थः। क्षया इति निलयपर्यायोऽयं क्षयशब्दः। अत्र केचिदतीन्द्रिया अवकाशाः केचिद्वा इन्द्रियग्राह्या इत्याह लक्ष्यालक्ष्याणामिति। पर्यायानुक्त्वा तेषां प्रकोपफलमाह तेषामिति स्रोतसाम्। स्थानस्थाः क्षयं वृद्धिं वा नाप्नुवन्तो मार्गगाः स्वस्वमार्गचारिणः नतून्मार्गगामिनः। शरीरधातवस्त्वत्र धातवो मलाश्च। इतरेषां शरीरधातूनां प्रकोपाद् इतराणि तत्तद्वहस्रोतांसि प्रकोपमापद्यन्त इति योजना। एवं दुष्टानि स्रोतांसि इतरस्रोतांसि प्रदुष्टाश्च धातवः इतरान् धातून् प्रदूषयन्ति अप्रतिक्रियमाणे इति शेषः। अप्यर्थोऽयमेवशब्दः। दूषयितारस्त्वत्र वातादय एव उपादानत्वात् यथा दुष्टेषु गृहोपादानेषु गृहोऽपि दुष्टो भवति तद्वदित्यर्थः। निमित्तकारणरूपा एव ते

स्रोतांसि दूषयन्ति इत्याह तेषां सर्वेषामिति। दोषस्वभावाद् विकृतिवशादित्यर्थः। अतएवैषामुपादानत्वेऽपि दोषसंज्ञा न विरुद्धा। इत्युपसंहारे॥१७॥

नन्वेतेषां स्रोतसां किं दुष्टिनिदानमिति तानि व्याचिख्यासुरादौ प्राणवह स्रोतसां दुष्टिनिदानमाह क्षयादिति। क्षयाद् अनुलोमविलोमक्षयात्। सन्धारणात् मलमूत्रादेर्वेगधारणात्। क्षुधितस्य च व्यायामात् क्षुधा तु शरीरक्षयं सूचयति ततोऽपि व्यायामादधिकः क्षयो भवतीत्याशयः। अन्यैश्च दारुणैः उरःक्षतनिदानोक्तमहानदीतरणादिरूपशक्त्यतिरिक्तश्रमापादकैरित्यर्थः। अम्बुवहस्रोतोदुष्टिनिदानमाह औष्ण्यादिति। औष्ण्याद् अग्न्यातपादिना। आमाद् आमाजीर्णात्। पानाद् अतिमद्यपानात्। तृष्णाया अतिपीडनात् तृष्णावेगनिग्रहात्। अन्नवहस्रोतोदुष्टिनिदानमाह अतिमात्रस्येति। मात्रामतिक्रम्य भोजनादिति मात्राधिकस्य न्यूनमात्रस्य च भोजनादित्यर्थः। अकाले कालातीते पूर्वकाले वा। पावकस्य जाठराग्नेर्वैगुण्यात् मन्दविषमतीक्ष्णत्वात्। रसवहस्रोतोदुष्टिनिदानमाह गुर्विति। अत्र गुर्विति द्रव्यगुरु। गुर्वादिगुणयुक्तं द्रव्यमतिमात्रं मात्रामतिरिच्य समश्नतां भुञ्जानानाम्। रक्तवहदुष्टेर्निदानमाह विदाहीति। विदाहीनि—

"द्रव्यस्वभावादथ गौरवाद्वा स्निग्धेन पाकं जठराग्नियोगात्।
पित्तप्रकोपं विदहत् करोति तदन्नपानं कथितं विदाहि॥" इति

लक्षणानि। भजतामिति सर्वत्रान्वयः। मांसवहदुष्टेर्निदानमाह अभिष्यन्दीनीति। अभिष्यन्दि तु—

"हृदयस्थान्ननिर्यासबहिःस्रोतोमुखानि यत्।
भुक्तं लिम्पन्ति पैच्छिल्यात् अभिष्यन्दि तदुच्यते॥"

इति लक्षणम्।

एवंविधानि द्रव्याणि भुक्त्वा दिवास्वपतामिति योजना। मेदोवहस्रोतोदुष्टिनिदानमाह अव्यायामादिति। मेद्यानां मेदोबहुलानाम्। वारुणी मद्यविशेषः। अस्थिवहदुष्टेर्निदानमाह व्यायामादिति। व्यायामाद् अतिश्रमात्। अतिसंक्षोभाद् अतिसञ्चालनात्। अस्थिविघट्टनात् परस्परमतिसंघर्षात्। मज्जवहानां दुष्टिनिदानमाह उत्पेषादिति। उत्पेषाद् अस्थ्युत्पेषणात्। अत्यभिष्यन्दादतिक्षरणात्। विरुद्धानां संयोगादिविरुद्धानाम्। शुक्रवहदुष्टिनिदानमाह अकालेति। अकाले बाल्ये जरायां वा अथवा पर्वादिवर्जनीये काले ग्रीष्मादावृतौ वा गमनात् स्त्रीसंसर्गात्। अयोनिगमनात् कृत्रिमोपायेन पश्वादिगमनाद्वा। निग्रहात् प्राप्तशुक्रस्य वेगरोधात्। शस्त्रेति शस्त्रादिना शुक्रवहेषु तन्मूलेषु वा हतेष्वित्यर्थः। मूत्रस्रोतोदुष्टिनिदानमाह मूत्रितेति। मूत्रितस्य समुपस्थितमूत्रवेगस्य उदकादिसेवनात्। अभिक्षतस्य मूत्रवहस्रोतःसु। पुरीषवहस्य दुष्टिनिदानमाह विधारणादिति। विधारणान् मलवेगरोधात्। स्वेदवहदुष्टिनिदानमाह व्यायामादिति। शीतोष्णाक्रमसेवनादिति अक्रमेण शीतोष्णसेवनादित्यर्थः॥ १८-३०॥

पृथक् पृथक् स्रोतोदुष्टिनिदानं निवेद्य सामान्यतः सर्वस्रोतोदुष्टिनिदानमाह आहारश्चेति । दोषगुणैः सम इति तत्सामान्याद् दोषवर्धकइत्यर्थः । धातुभिर्विगुण इति तत्तत्स्रोतोबाह्यधातुवैगुण्यकारक इत्यर्थः । नतु विपरीतगुणः मेद्यस्यापि मेदोवहस्रोतोदुष्टिकारकत्वात् । पृथक् स्रोतोदुष्टिलक्षणानि प्रागभिहितानि साम्प्रतं समासतः सर्वस्रोतोदुष्टिलक्षणान्याह अतिप्रवृत्तिरिति । अत्रातिप्रवृत्तिः स्रोतोबाह्यपदार्थानामिति ज्ञेयम् । संगो विमार्गगमनमपि तेषामेव । सिराणामत्र स्रोतसामित्यर्थः । ग्रन्थयः कुण्डलीभावो विबद्धता वा विमार्गगमनं प्रतिलोमगमनम् अन्यस्रोतसि वा गमनम् ॥ ३१–३२ ॥

स्वतन्त्रानुकूलस्रोतोलक्षणमाह स्वधात्विति । स्वधातुसमवर्णानीति अत्र धातुपदेन प्राणोदकान्नानामपि परिग्रहः स्यात् शरीरधारकत्वात् । अभ्यन्तरतस्तद्वर्णमित्यर्थः । प्रतानसदृशानि लताप्रतानसदृशानि शाखाप्रशाखाभिः सर्वतो विसृप्तानीत्यर्थः ॥ ३३ ॥

स्रोतोदुष्टेः समासतः क्रियाक्रमं विवक्षुः श्वासव्याधिचिकित्सया प्राणवहस्रोतोदुष्टिं तृष्णोपशमनीयेन उदकवहदुष्टिम् आमपरिपचनविधिना च अन्नवहदुष्टिं प्रतिचिकीर्षन्ति विद्वांसः इति प्रतिपादयन्नाह प्राणेति । दुष्टेषु रसादिषु याः खलु क्रियाः विविधाशितपीतीये अभिहिता ता एव तत्तत्स्रोतोदुष्टिमपि अपाकुर्वन्तीत्याह विविधेति । मूत्रवहानां मूत्रकृच्छ्रप्रतीकारं पुरीषवहानामतीसारक्रियां स्वेदवहानाञ्च ज्वरचिकित्सतमतिदेष्टुमाह मूत्रेति । सुगममन्यत् ॥ ३४–३६ ॥

अध्यायार्थं निवेद्य तं समापयति तत्र श्लोका इति । केवलं कृत्स्नम् । सर्वभावतः सर्वस्रोतोविज्ञानेन अंगप्रत्यंगकोष्ठांगादिज्ञानेन देहधातुज्ञानेनेत्यादिनेत्यर्थः ॥ ३७–३९ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां विमानस्थाने स्रोतोविमानं नाम पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ।

विमानस्थानप्रारम्भे रसादीनां मानं भिषग्भिर्ज्ञेयत्वेनोक्तम् । तत्र दोषविकाराणां मानमपि ज्ञातव्यमिति तज्ज्ञानावसरे प्राप्ते अध्यायान्तरमारभते अथात इत्यादिना । रोगानीकं भिषग्भिः रोगैः सह युद्धे कर्तव्ये तत्र विपक्षसैन्यसाम्याद् रोगाणामनीकं सैन्यसमूहः समष्टिरिति यावत् । रोगानीकं रोगसमूह इत्यर्थः । स च द्विधाभिन्नो भवति भेदकभेदेन । उदाहरति प्रभावभेदेनेति । अयमर्थः—प्रभावभेदात् साध्यमसाध्यञ्च भवति । बलभेदेनाल्पबलं महाबलञ्च भवति । अधिकरणभेदेन शारीरं मानसञ्च भवति । निमित्तभेदेन दोषजमागन्तुकञ्च भवति । इत्येवं प्रभावादिभेदेन तद् द्वैधं लभत इति । पुनश्चैवं प्रभावादिभेदेन द्विधाभिन्नमपि रोगानीकं

भेदप्रकृत्यन्तरेण विभिन्नेन भेदकेन भिन्नं सद् बहुधा भवति सामान्यधर्मानुसारेण च सन्धीयमानं समस्य एकमपि भवति इत्याह एवमिति। दृष्टान्तेन विशदयति एकत्वमिति। रुक्सामान्यात् व्यथाजनकत्वसाम्यात तस्यैकत्वं भवति। तु: पक्षान्तरे प्रभावादिभेदकभेदेन च बहु भवति। बहुत्वेऽपि संख्याकरणयोग्यं संख्याकरणायोग्यञ्च भवतीत्याह बहुत्वमिति। तस्योदाहरणमाह तत्रेति ॥ १-३ ॥

नन्वैकस्यैव पदार्थस्य संख्येयत्वमसंख्येयत्वञ्च कथमुपपद्यते इति शंकामुपन्यस्य निरस्यति न चेत्यादिना। भेदप्रकृत्यन्तरीयेषु पृथग्भेदकृतेषु संख्येयाग्र्येषु ‡ पूर्वपूर्वसंख्येयेषु विगीति: परस्परं विरोध: स्यादिति शेष:। परवर्तिभेदेन परस्परविरोधात् पूर्वपूर्वभेदा: निरस्यन्ते इत्याशय:। इत्यत: अनेन हेतुना अत्र इहाध्याये काचित् प्रतिज्ञा द्वे रोगानीके एकं रोगानीकं बहूनि रोगानिकानि इत्येवंरूप: साध्यनिर्देश: दोषवती हेत्वाभासयुक्ता स्यादिति न वाच्यमिति शेष:। शंकां परिहरति न चाविगीतिरिति। अविगीति: तत्र परस्परं विरोधो नास्ति इत्यत: प्रतिज्ञा दोषवती न स्यात्। अर्थमिमं साधयति भेत्ता हीति। हि यतो भेत्ता भेद्यमन्यथा भिनत्ति भेत्तुरभिप्रायवशेनैव एकस्य भेद्यस्य नाना भेदा भवितुमर्हन्तीत्यर्थ:। अन्यथा विभिन्नभेदकेन पुरस्ताद् भिन्नं भेद्यं पुनर्भेदप्रकृत्यन्तरेण अपरप्रकारभेदकेन भिन्दन् भेदं कुर्वन अनेकधा अनेकप्रकारं भेदसंख्याविशेषमापादयति किन्तु तेन पूर्वभेदाग्र्यं पूर्ववर्तिभेदं नोपहन्ति न निरस्यति। ननु भेदप्रकृतौ समानायां का गतिरित्याह समानायामिति। अपितु पक्षान्तरे भेदप्रकृतौ भेदके समानायां समानसंख्यकायामपि प्रकृत्यनुप्रयोगान्तरं प्रकृतेर्भेदकस्य अपरोऽनुप्रयोग: अपेक्ष्यं भवति। पुनरपि भेदकमुल्लिख्य पृथग्भेदा: कर्तव्या इत्याशय:। नन्वत्र रोगशब्देन कोऽर्थ: परिगृह्यते व्याधिर्दोषो वेत्येतत्शंकां परिहर्तुं प्रबन्धान्तरमवतारयति सन्तीत्यादिना। अर्थान्तराणि पृथक्पदार्था:। अनर्थान्तराणि एक एव पदार्थ:। पर्यायशब्दाभिहितानि एकार्थबोधकशब्दगम्यानि। यथैकेन रोगशब्देन व्याधिदोषावुभावेव बुध्येते तथैव दोषस्य व्याधेश्च पृथक्पर्याया अपि वर्तन्ते इत्युदाहरणमुखेन विवृणोति समान इति। तत्रेति। तत्र तेषु पर्यायेषु रोगशब्द: रोगेषु दोषेषु च द्विधार्थेषु समान:। तु: पक्षान्तरे शेषेषु रोगवर्जितेषु इतरेषु अर्थेषु दोषरूपो व्याधिरूपश्चार्थ: विशेषवान् नतु उभयसामान्यं भजते इत्याशय:। तत्र तयोर्मध्ये अतिबहुत्वाद् व्याधय: अपरिसंख्येया: असंख्या: भवन्ति, दोषस्तु अनतिबहुत्वात परिसंख्येया भवन्ति। तस्माद् व्याधीनामसंख्येयत्वात् दोषाणाञ्च संख्येयत्वाद् उदाहरणार्थं विकारान् यथोचितं यथाविन्यस्तं तन्त्रेऽस्मिन् ये ये व्याधय उल्लिखितास्तानेव असंख्येयत्वात् नतु सर्वान् विकारान् दोषांश्च संख्येयत्वात् अनवशेषेण सर्वानेव अनुव्याख्यास्याम: सम्यग् व्यासतो व्याख्या-

‡ 'न च संख्येयाग्र्येषु भेदप्रकृत्यन्तरीयेषु विगीति:" इति पाठ:।

करिष्यामः । तत्र दोषव्याकरणं प्रकृत्य तत्र मानसशारीरभेदात् दोषस्य द्वैविध्यात् प्राङ् मानसदोषमाह रज इति । तयोः रजस्तमसोः । तत्र चिन्ता-हर्षयोः प्रकृतत्वेऽपि अतिमात्रयोस्तयोर्दुःखहेतुत्वात् वकारत्वं युज्यत-एव । शारीरान् दोषानाह वातेति । च विकृत्य एव दोषशब्दभाजो भवन्ति नतु प्रकृतिस्था इत्यवधेयम् । इति प्रकरणोपसंहारे। केवलाः कृत्स्नाः ॥४-५॥

दोषाणां प्रकोपणमाह तत्रेति । द्वयानां शारीरमानसानाम् । प्रकोपणं प्रकोपकारणम् । असात्म्येन्द्रियार्थसंयोगादित्रयाणां विवृतिः (सू० ११ अ०) कृता । पुनश्च शारीरे आद्ये अध्याये आचार्यः स्वयमेव व्याकरिष्यति । ननु त्रिभिर्दोषैरेव व्याधयो भवितुमर्हन्ति इत्याशंकां निरस्यति प्रकुपिता इति । व्याधेरपरिसंख्येयत्वे प्रकोपणवैशेष्यं दूष्यवैशेष्यञ्च हेतुर्भवतीत्यर्थः । न केवलं प्रकोपणादिवैशेष्यमेव व्याधिवैशिष्ट्ये हेतुर्भवति दोषाणां व्याधीनाञ्च संसर्गवशादपि व्याधेर्भेदः अनिवार्य एवेति सिद्धान्तं प्रदर्शयन् आदौ शारीरमानसयोर्विकारयोः परस्परसंसर्गं व्याकरोति ते इति । विकाराः शारीराः ज्वरादयः मानसाश्च कामादयः परस्परमनुबध्नन्ति परस्परसंसृष्टतां यान्ति। एवं विकारसंसर्गमभिधाय दोषसंसर्गमभिधित्सुरादौ मानसदोषयोः नित्यसंसर्गतां प्रतिपादयति नियत इति । नियतः नित्यः । तत्र हेतुमाह नहीति । रजस्तमसोर्नित्यसम्बन्धादित्यर्थः । मानसदोषयोः नित्यसंसर्गमभिधाय शारीरदोषाणां संसर्गं विवक्षुः तेषां दोषाणां संश्लेषो नैवंविधो नियत इति तेषां क्वचित् कथं वा संसर्गो भवतीति प्रतिपादयन्नाह प्राय इति । अत्र प्रायःशब्दो न सर्वत्र एवंविधः संसर्गो भवति व्याधीनामेकदोषजत्वमपि दृश्यत इति सूचयति । एकाधिष्ठानीयानामेकत्र सञ्चितानाम् एकहेतुसमुद्भूतानां वा हेतुगर्भविशेषणमेतत् । समानगुणत्वात् संसर्गः द्वयोर्मेलनं सन्निपातस्तु त्रयाणां भवतीति शेषः । कथं समानगुणत्वमित्याह दोषा हीति । हि यतः तैः संश्लिष्टाः दोषाः दूषणैक्यात् समाना एव भवन्ति । दोषाणां परस्परं ये ये गुणाः समानाः भवन्ति तत्समानधर्मैर्दूषणैस्तत्तदंशे प्रकुपिता दोषाः समानगुणत्वेन संसर्गतामाप्नुवन्ति इत्याशयः । ननु दोषाणां परस्परं विपर्यस्ता अपि गुणाः सन्ति तत्कथं विपरीतगुणैरितरदोषं क नोपहन्ति इति वक्ष्यति—

"विरुद्धैरपि न त्वेते गुणैर्घ्नन्ति परस्परम्।
दोषाः सहजसात्म्यत्वाद् घोरं विषमहीनिव ॥" इति ॥ ६-१० ॥

पुनश्च संसर्गे सन्निपाते न खलु दोषाः सर्व एव समाना वर्तन्ते अनुबन्ध्यानुबन्धभेदात्तु तेषां वैशिष्ट्यं भवतीत्याह तत्रेति । तत्र संसर्गे सन्निपाते च । ननु कोऽयमनुबन्ध्यानुबन्धभाव इत्याह स्वतन्त्र इति । स्वतन्त्रः स्वाधीनः न च क्रियायां कमप्यपेक्षत इत्यर्थः । अनुबन्धस्तु स्वकार्यसाधने अनुबन्ध्यमपेक्षते । व्यक्तलिंगः परिस्फुटलक्षणः । अनुबन्ध्यस्य लक्षणानि परिस्फुटानि भवन्ति न त्वनुबन्धस्येत्यर्थः । यथोक्तसमुत्थानप्रशमः तत्प्रकोपणैः

भेदप्रकृत्यन्तरेण विभिन्नेन भेदकेन भिन्नं सद् बहुधा भवति सामान्यधर्मानुसारेण च सन्धीयमानं समस्य एकमपि भवति इत्याह एवमिति। दृष्टान्तेन विशदयति एकत्वमिति। रुक्सामान्यात् व्यथाजनकत्वसाम्यात् तस्यैकत्वं भवति। तु: पक्षान्तरे प्रभावादिभेदकभेदेन च बहु भवति। बहुत्वेऽपि संख्याकरणयोग्यं संख्याकरणायोग्यञ्च भवतीत्याह बहुत्वमिति। तस्योदाहरणमाह तत्रेति ॥ १-३ ॥

नन्वैकस्यैव पदार्थस्य संख्येयत्वमसंख्येयत्वञ्च कथमुपपद्यते इति शंकामुपन्यस्य निरस्यति न चेत्यादिना। भेदप्रकृत्यन्तरीयेषु पृथग्भेदकृतेषु संख्येयाप्रेयेषु ‡ पूर्वपूर्वसंख्येयेषु विगीति: परस्परं विरोध: स्यादिति शेष:। परवर्तिभेदेन परस्परविरोधात् पूर्वपूर्वभेदा: निरस्यन्ते इत्याशय:। इत्यत: अनेन हेतुना अत्र इहाध्याये काचित् प्रतिज्ञा द्वे रोगानीके एकं रोगानीकं बहूनि रोगानिकानि इत्येवंरूप: साध्यनिर्देश: दोषवती हेत्वाभासयुक्ता स्यादिति न वाच्यमिति शेष:। शंकां परिहरति न चाविगीतिरिति। अविगीति: तत्र परस्परं विरोधो नास्ति इत्यत: प्रतिज्ञा दोषवती न स्यात्। अर्थमिमं साधयति भेत्ता हीति। हि यतो भेत्ता भेद्यमन्यथा भिनत्ति भेत्तुरभिप्रायवशेनैव एकस्य भेद्यस्य नाना भेदा भवितुमर्हन्तीत्यर्थ:। अन्यथा विभिन्नभेदकेन पुरस्ताद् भिन्नं भेद्यं पुनर्भेदप्रकृत्यन्तरेण अपरप्रकारभेदकेन भिन्दन् भेदं कुर्वन अनेकधा अनेकप्रकारं भेदसंख्याविशेषमापादयति किन्तु तेन पूर्वं भेदाढ्यं पूर्ववर्तिभेदं नोपहन्ति न निरस्यति। ननु भेदप्रकृतौ समानायां का गतिरित्याह समानायामिति। अपितु पक्षान्तरे भेदप्रकृतौ भेदके समानायां समानसंख्यकायामपि प्रकृत्यनुप्रयोगान्तरं प्रकृतेर्भेदकस्य अपरोऽनुप्रयोग: अपेक्ष्यं भवति। पुनरपि भेदकमुल्लिख्य पृथग्भेदा: कर्तव्या इत्याशय:। नन्वत्र रोगशब्देन कोऽर्थ: परिगृह्यते व्याधिर्दोषो वेत्येतत्शंकां परिहर्तुं प्रबन्धान्तरमवतारयति सन्तीत्यादिना। अर्थान्तराणि पृथक्पदार्था:। अनर्थान्तराणि एक एव पदार्थ:। पर्यायशब्दाभिहितानि एकार्थबोधकशब्दगम्यानि। यथाह्येकेन रोगशब्देन व्याधिदोषावुभावेव बुध्येते तथैव दोषस्य व्याधेश्च पृथक्पर्याया अपि वर्तन्ते इत्युदाहरणमुखेन विवृणोति समान इति। तत्रेति। तत्र तेषु पर्यायेषु रोगशब्द: रोगेषु दोषेषु च द्विधार्थेषु समान:। तु: पक्षान्तरे शेषेषु रोगवर्जितेषु इतरेषु अर्थेषु दोषरूपो व्याधिरूपश्चार्थ: विशेषवान् नतु उभयसामान्यं भजते इत्याशय:। तत्र तयोर्मध्ये अतिबहुत्वाद् व्याधय: अपरिसंख्येया: असंख्या: भवन्ति, दोषस्तु अनतिबहुत्वात् परिसंख्येया भवन्ति। तस्माद् व्याधीनामसंख्येयत्वात् दोषाणाञ्च संख्येयत्वाद् उदाहरणार्थं विकारान् यथोचितं यथाविन्यस्तं तन्त्रेऽस्मिन् ये ये व्याधय उल्लिखितास्तानेव असंख्येयत्वात् नतु सर्वान् विकारान् दोषांश्च संख्येयत्वात् अनवशेषेण सर्वानेव अनुव्याख्यास्याम: सम्यग् व्यासतो व्याख्या-

‡ 'न च संख्येयाप्रेयेषु भेदप्रकृत्यन्तरीयेषु विगीति:" इति पाठ:।

करिष्यामः । तत्र दोषव्याकरणं प्रकृत्य तत्र मानसशारीरभेदात् दोषस्य द्वैविध्यात् प्राङ् मानसदोषमाह रज इति । तयोः रजस्तमसोः । तत्र चिन्ता-हर्षयोः प्रकृतत्वेऽपि अतिमात्रयोस्तयोर्दुःखहेतुत्वात् वकारत्वं युज्यत-एव । शारीरान् दोषानाह वातेति । च विकृत्य एव दोषशब्दभाजो भवन्ति ननु प्रकृतिस्था इत्यवधेयम् । इति प्रकरणोपसंहारे। केवलाः कृत्स्नाः ॥४-५॥

दोषाणां प्रकोपणमाह तत्रेति । द्वयानां शारीरमानसानाम् । प्रकोपणं प्रकोपकारणम् । असात्म्येन्द्रियार्थसंयोगादित्रयाणां विवृतिः (सू० ११ अ०) कृता । पुनश्च शारीरे आद्ये अध्याये आचार्यः स्वयमेव व्याकरिष्यति । ननु त्रिभिर्दोषैस्त्रय एव व्याधयो भवितुमर्हन्ति इत्याशंकां निरस्यति प्रकुपिता इति । व्याधेरपरिसंख्येयत्वे प्रकोपणवैशेष्यं दूष्यवैशेष्यञ्च हेतुर्भवतीत्यर्थः । न केवलं प्रकोपणादिवैशेष्यमेव व्याधिवैशिष्ट्ये हेतुर्भवति दोषाणां व्याधीनाञ्च संसर्गवशादपि व्याधेर्भेदः अनिवार्य एवेति सिद्धान्तं प्रदर्शयन् आदौ शारीरमानसयोर्विकारयोः परस्परसंसर्गं व्याकरोति ते इति । विकाराः शारीराः ज्वरादयः मानसाश्च कामादयः परस्परमनुबध्नन्ति परस्परसंसृष्टतां यान्ति । एवं विकारसंसर्गमभिधाय दोषसंसर्गमभिधित्सुरादौ मानसदोषयोः नित्यसंसर्गतां प्रतिपादयति नियत इति । नियतः नित्यः । तत्र हेतुमाह नहीति । रजस्तमसोर्नित्यसम्बन्धादित्यर्थः । मानसदोषयोः नित्यसंसर्गमभिधाय शारीरदोषाणां संसर्गं विवक्षुः तेषां दोषाणां संश्लेषो नैवंविधो नियत इति तेषां क्वचित् कथं वा संसर्गो भवतीति प्रतिपादयन्नाह प्राय इति । अत्र प्रायःशब्दो न सर्वत्र एवंविधः संसर्गो भवति व्याधीनामेकदोषजत्वमपि दृश्यत इति सूचयति । एकाधिष्ठानीयानामेकत्र सञ्चितानाम् एकहेतुसमुद्भूतानां वा हेतुगर्भविशेषणमेतत् । समानगुणत्वात् संसर्गः द्वयोर्मेलनं सन्निपातस्तु त्रयाणां भवतीति शेषः । कथं समानगुणत्वमित्याह दोषा हीति । हि यतः तैः संश्लिष्टाः दोषाः दूषणैक्यात् समाना एव भवन्ति । दोषाणां परस्परं ये ये गुणाः समानाः भवन्ति तत्समानधर्मैर्दूषणैस्तत्तदंशे प्रकुपिता दोषाः समानगुणत्वेन संसर्गतामाप्नुवन्ति इत्याशयः । ननु दोषाणां परस्परं विपर्यस्ता अपि गुणाः सन्ति तत्कथं विपरीतगुणैरितरदोषं क नोपहन्ति इति वक्ष्यति—

"विरुद्धैरपि न त्वेते गुणैर्घ्नन्ति परस्परम् ।
दोषाः सहजसात्म्यत्वाद् घोरं विषमहीनिव ॥" इति ॥ ६-१० ॥

पुनश्च संसर्गे सन्निपाते न खलु दोषाः सर्व एव समाना वर्तन्ते अनुबन्ध्यानुबन्धभेदात्तु तेषां वैशिष्ट्यं भवतीत्याह तत्रेति । तत्र संसर्गे सन्निपाते च । ननु कोऽयमनुबन्ध्यानुबन्धभाव इत्याह स्वतन्त्र इति । स्वतन्त्रः स्वाधीनः न च क्रियायां कमप्यपेक्षत इत्यर्थः । अनुबन्धस्तु स्वकार्यसाधने अनुबन्ध्यमपेक्षते । व्यक्तलिंगः परिस्फुटलक्षणः । अनुबन्ध्यस्य लक्षणानि परिस्फुटानि भवन्ति न त्वनुबन्धस्येत्यर्थः । यथोक्तसमुत्थानप्रशमः तत्प्रकोपणैः

यस्य समुत्थानं वृद्धि: तत्प्रशमकैश्च यस्य प्रशमो भवेदित्यर्थ:। अनुबन्धस्तु अनुबन्ध्यस्य प्रकोपप्रशमनैरेव प्रकुप्यति प्रशाम्यति नैति विशेष:। ननु कोऽयं सन्निपात: संसर्गो वेत्याह अनुबन्ध्यानुबन्धेति। त्रिभिरनुबन्ध्यानुबन्धलक्षणसमन्वितै: दोषैरेकत्र मेलनं सन्निपातं द्वयोश्च संसर्गमाचक्षते- ऽस्मिन् तन्त्रे। अत्र केचिद् अनुबन्ध्यलक्षणसमन्विता: इति पठन्त: स च पाठश्चक्रसम्मत इत्याहु:। द्वित्राणामनुबन्ध्यत्वे क्रियासांकर्यात् असाध्यत्व- मेव स्यादिति प्राय: अनुबन्ध्यानुबन्धभावेनैव संसर्ग: सन्निपातो वा भवितु- मर्हति। चक्रोऽपि "तेनाप्रधानानुगमनीये सन्निपाते" इत्युक्त्वा तमेवार्थं समर्थयति। नापि तथाविध: पाठस्तेन धृत:। एतयोरेवानुबन्ध्यानुबन्धयो: वैशिष्ट्याच्च संसर्गसन्निपातात्मको दोषभेदोऽपि बहुधा भवतीत्याह अनु- बन्ध्येति। एवमनेन प्रकारेण नानाप्रकृतिविशेषात् दोषाणां व्याधीनाञ्चे- त्यर्थ:। एष: पूर्वोक्तरूप: संसर्गादिभेदादित्यर्थ:। भिषजां संज्ञाप्रकृतो व्यूह: चिकित्साविज्ञानस्य परिभाषासमूहो भवतीति शेष:॥ ११॥

अस्मिन् कायचिकित्सातन्त्रे प्राय: सर्व एव व्याधय: अग्निदोषाद् भवन्तीति वक्तव्ये व्याधिमाने कायाग्नयो वर्णनीया भवन्ति यदुक्तं भेले—

"यस्तं (अग्निम्) चिकित्सेद् दुष्यन्तं व्याधीनां चापि देहिनाम्।
आयुर्वेदाभियोगेन स वै कायचिकित्सक:॥" इति।

अतएवाह अग्निष्वति। तु: प्रकरणान्तरे। शारीरेषु अग्निषु काया- ग्निषु। तत्र कायाग्निलक्षणमाह भेलो यथा "अथास्योष्मा तेजश्च शरीरस्थ- माहारं पचत: ते कायाग्निरिति विद्यात्" इत्यत: शरीराग्निपदेन परस्ताद् वक्ष्यमाणा: पञ्चभूताग्नय: सप्तधात्वग्नय: एकश्च पाचकाग्निरिति त्रयोदशा- ग्नयोऽभिहिता:। तेषु भूताग्नीनां धात्वग्नीनाञ्च तत्तद्द्रव्यगतोष्मरूपत्वं पाचकाग्नेस्तु तेजोरूपत्वं ज्ञेयम्। स च पाचकाग्नि: सर्वेषां कायाग्नीनां मूलं यद्वक्ष्यति—

"अन्नस्य पक्ता: सर्वेषां पक्तृणामधिपो मत:।
तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मका:॥" इति।

स च जाठराग्नि: शरीरावयवविशेष: इति तस्यापि पोषणं शरीरस्येव त्रिधातुमूलं भवति। एवंत्वे शरीरचातुर्विध्याद् उपादानानां त्रिधातूनामेकैकवृद्ध्या समतया च तदवयवस्य जाठराग्नेरपि चातुर्विध्यं सम्भवति नान्यथा इत्यव- धेयम्। बलभेदेन एकैकस्योपादानस्य पृथग आधिक्येन साम्येन च सर्वेषां चतुर्विधो विशेषो भवति। के ते विशेषा इत्याह तद्यथेति। तत्र तीक्ष्ण: पित्तधातुप्राबल्यात् मन्दस्तु श्लेष्मधातुबाहुल्यात् समस्तु त्रिधातुसाम्यात् विषमस्तु वातधातुप्राबल्याज ज्ञेय:। आहाररसेनैव सर्वे अवयवा: पोष्यन्त- इति जाठराग्नेरपि शरीरावयवत्वात् त्रिधातुसमवायरूपान्नरसपोष्यत्वं सिध्यति। अन्यथा विकृत्या अपि तस्य तीक्ष्णत्वादित्रैविध्यं न सम्भवति। अत्र तु प्रकृतित: चतुर्विधानां पुरुषाणां जाठराग्नेश्चातुर्विध्यमाह तेषां धातु-

विधानामग्नीनामनुमानगम्यानां लक्षणान्याह तत्र तीक्ष्ण इति। सर्वापचार-सहः मात्रातिमात्रिकमप्याहारं सुखेन जरयतीत्यर्थः। तद्विपरीतलक्षण इति मात्राबल्लघ्वप्यन्नं न सम्यक् पचतीत्यर्थः। अपचारतः आहारस्य मिथ्यातियोगात्। अनपचारतः आहारविधिविशेषायतनान्यनुसृत्य भोजनादित्यर्थः। समलक्षणविपरीतः अपचारतो नापचारतो वा कदाचित् पच्यते कदा वा नेत्यर्थः। चतुर्विधानां पुरुषाणामिति पित्तलानां श्लेष्मलानां समसर्वधातूनां वातलानाञ्चेत्यर्थः। तेषामग्निभेदे कारणमाह तत्र समवातेति। समसर्वधातवो हि प्रकृतिस्था ज्ञातव्याः। तत्र त्रिधातूनां साम्यन्तु यथायोग्यमानेनावस्थानं ज्ञेयम् नतु समपरिमाणता। शरीरेऽपि पाञ्चभौतिके अम्भः पृथ्वीभाग एव सर्वाधिको वर्तत इति तत्र कफस्य मानं सर्वाधिकं स्यात्। वातपित्तयोस्तु न्यूनमेव। ननु पित्तश्लेष्मणोरञ्जलिमानेन न्यूनमानमेवाभिधास्यते यथा—"षट् श्लेष्मणः पञ्च पित्तस्य" इति चेत् कथ्यते। न खल्विदं शरीरोपादानभूतयोः पित्तकफयोर्मानं भवति। मूत्रपुरीषमानान्तर्गतत्वेन मलरूपयोस्तयोर्मानं तत्र लिखितमास्ते इत्यवधेयम्। अतएव सुश्रुतः प्राह—

"एषां समत्वं यच्चापि भिषग्भिरवधार्यते।
न तत् स्वास्थ्यादृते शक्यं वक्तुमन्येन हेतुना॥
दोषादीनाञ्च समतामनुमानेन लक्षयेत्।
अप्रसन्नेन्द्रियं वीक्ष्य पुरुषं कुशलो भिषक्॥" इति
(सू० १५ अ०)

अग्निवैषम्ये हेतुमाह वातलानामिति। अग्न्यधिष्ठाने अग्न्यधिकरणके द्रव्ये। तच्च स्वभावतो मानवशरीरे अन्तर्नाभ्यां वर्तते। अस्य वर्णनं भेलेनोक्तम् यथा—

"अनादिमध्यनिधनः कायाग्निः परिपठ्यते।
प्रभावलक्ष्यसंयुक्तो जीवस्येह सनातनः॥
नाभिमध्ये शरीरस्य विज्ञेयं सोममण्डलम्।
सोममण्डलमध्यस्थं विद्यात्तत् सूर्यमण्डलम्॥
प्रदीपवच्चापि नृणां तस्य मध्ये हुताशनः।
देहिनां भोजनं भुक्तं नानाव्यञ्जनसंस्कृतम्।
सूर्यो दिवि यथा तिष्ठन् तेजोयुक्तो गभस्तिभिः॥
विशोषयति सर्वाणि पल्वलानि पयांसि च।
तद्वत् शरीरिणां भुक्तं जाठरो नाभिसंस्थितः॥
मयूखैः क्षिप्रमादत्ते सूर्यकान्तो मणिर्यथा।
क्षिप्रं सम्यक् प्रदहति गोमयं काष्ठमेव वा
स्थूलकायेषु सत्त्वेषु यवमात्रप्रमाणतः।
ह्रस्वकायेषु सत्त्वेषु तिलमात्रप्रमाणतः।
कृमिकीटपतंगेषु वायुमात्रोऽवतिष्ठति॥" इति (शारीर०)

अतोऽग्नेरधिष्ठानं मूर्तमेव एवं शरीरावयवत्वात् त्रिधातुपोष्यं भवति। एवंपरिस्थितौ वाताभिभूते प्रथमोत्पादे उपादानेषु वातबाहुल्यात् अग्न्यधिष्ठानस्य वातबाहुल्यं संगच्छत एव । एवं पित्तलानां श्लेष्मलानामपि व्याख्येयम् ॥ १२-१३ ॥

कथं स्वस्थानां वातादिप्रकृतित्वमिति परमतं न्यक्कृत्य स्वमतमुपन्यस्यति तत्रेति । अयमर्थ:—सर्वाण्येव द्रव्याणि वातपित्तकफात्मकानि तानि वैषम्येन अभ्यवहर्तार: सर्व एव विषमधातवो भवन्ति अतो न कोऽपि समवातपित्तश्लेष्माणो भवितुमर्हन्ति तेषु केचिद् वातप्रकृतय:, केचित् पित्तप्रकृतय:, के वा श्लेष्मप्रकृतयो भवन्तीति पूर्वपक्ष: इति । तं दूषयति तच्चेति । अयमाशय: एवञ्चेत् तर्हि जगति केचित स्वस्था नास्थास्यन् । दोषाणां साम्यावस्थैव स्वस्थता । अपिच आरोग्यं प्रकृतिरित्यनर्थान्तरमत: समवातपित्तश्लेष्माण एव स्वस्था: इति मन्तव्या: न तत्र भेषजप्रवृत्तिर्दृश्यते । तामेव मानवा: प्रार्थयन्ति इति । एवं स्वमतं संस्थाप्य परमतं दूषयति । नतु खल्विति । वातादिप्रकृतेस्तु भवदुक्तस्य तत्तद्दोषाधिक्यान् न प्रकृतित्वं युज्यते। विषमेषु धातुषु प्रकृतित्वेन कथनमन्याय्यमेव विकृतिरेव सा । अतो वातादिप्रकृतिरित्युक्ति: न युक्तियुक्ता भवतीत्यर्थ: । ननु दृश्यन्ते हि केचन जन्मत: प्रभृति वाताधिका:, के वा पित्ताधिका:, के वा श्लेष्माधिका: ते पुन: कयाऽभिधयाऽभिधीयेरन् इत्याह सन्तीति । ते तु अप्रकृतिस्था:, न तत्र प्रकृतिसंज्ञायुक्ता इत्यर्थ: ॥ २४ ॥

एवंपरिस्थिताविह मानवाश्चतुर्विधा: भवन्ति । केचित् समसर्वधातव:, केचिद् वातबहुला:, केचित्पित्तबहुला:, के वा श्लेष्मबहुला: भवन्तीति तेषामारोग्याय किं कर्तव्यमित्याह तेषामिति । अनुप्रणिधानानि भागश: प्रयत्ना: श्रेयस्कराणि आरोग्यदानि । सर्वाकारसममिति सर्वैराकारै: रसवीर्यविपाकप्रभावदेशकालादिभि: समं यथा न कस्यचिद् वैषम्यं भवेत्तथा अनुप्रणिधानं कर्तव्यमित्यर्थ: । अधिकदोषाणां त्रयाणां वातजादीनां दोषप्रतिकूलयोगीनि अनुप्रणिधानानि तत्तद्दोषप्रत्यनीकानि आहारविहारादीनि । अग्ने: समतां यावदेवं कर्तव्यमित्याह यावदिति । यदाग्ने: समता एयात् तदा सर्वाकारसमं कुर्यादित्याह समेत्विति । आहारविहारप्रकारं निवेद्य सत्यावश्यके भेषजप्रयोगोऽपि कर्तव्य इत्याह एवञ्चेति । अपरे भेषजप्रयोगा: तत्तद्दोषोपशमार्थमित्यर्थ: । इष्टा अभिमता भिषग्भिरिति शेष: । तान् प्रयोगान् विवक्षु: त्रयाणां तेषां दोषाणाह त्रयस्त्विति । तन्त्रान्तरीयाणां भिषजामित्यनादरे षष्ठी ॥ १५-१६ ॥

तत्र वातलस्य लक्षणान्युक्त्वा क्रियाक्रममाह तत्र वातलस्येति । यथोक्तै: वातकलाकलीये सौत्रीये कथितैरशीतिप्रकारै: । अवजयनं चिकित्सितम् । विधियुक्तै: वातव्याधिचिकित्सिते उक्तेन विधिना । तद्वदिति । स्नेहोष्णमधुराम्ललवणयुक्तानि इत्यर्थ: । अभ्यवहार्याणि खाद्यानीत्यर्थ: ।

सर्वशः प्रयोगार्थाः पानाभ्यञ्जनादिना प्रयोगाय स्नेहा इति योजना। वस्तिनियमः वस्तिप्रयोगे ये ये नियमाः प्रतिपाल्यास्तैः ॥ १७ ॥

पित्तलस्य लक्षणान्यनुप्रणिधानञ्चाह पित्तलस्येति। अधश्च दोषहरणं विरेचनेन पित्तनिर्हरणम्। मुक्तेति। पवनमत्र शीतं ज्ञेयम्। तेषु संस्थितत्वेन शीतानां मुक्तादीनाम् उरसा वक्षःस्थलेन धारणम्। क्षणे इति स्रजादियुक्तत्वेन शीतैर्वारिभिः पद्मादियुक्तैश्च अभि सर्वतः प्रोक्षणं वर्षुणिकादियन्त्रैरित्यर्थः। अभ्युदयानां 'पुत्रस्ते जातः' इत्यादिवाक्यानाम्। शैलान्तरमुपत्यकाभूमिः। पुलिनं नद्यास्तीरम्। उपवातो व्यजनादिकृत्रिमोपायेन सृष्टो वातः। मारुतस्तु स्वाभाविक एव नलिनादिहस्तानां पुरुषाणामिति शेषः ॥ १८ ॥

श्लेष्मलस्य लक्षणेनानुप्रणिधानमाह श्लेष्मलस्येति। सुखप्रतिषेधः व्यायामशीलता इत्यर्थः। सुखार्थमारोग्याय भवति। इत्युपसंहारे। सर्वज्ञं भिषजं स्तौति भवति चात्रेति। प्राणपतिः प्राणरक्षकः राजवैद्य इत्यर्थः। निगदार्थमन्यत् ॥ १६–२० ॥

अध्यायार्थं निवेद्य तं समापयति तत्र श्लोका इति ॥ २१–२३ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां विमानस्थाने रोगानीकं विमानं नाम षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः।

पूर्वाध्याये दोषविकारयोर्मानमुक्तं जाठराग्नेर्मानेन साकम्। साम्प्रतं मानज्ञानावयवेन ज्ञाने बहुशोऽज्ञा भिषजः स्खलन्ति इत्यतोऽध्यायान्तरेण व्याधितपरीक्षाप्रकारं व्याचिख्यासुर्भगवानाह अथात इत्यादि। चिकित्सारम्भे हि व्याधेर्गुरुता लघुता वा निर्णेया भवति। इत्याह इहेति। इह संसारे व्याधितरूपौ गुरुलघुव्याधितसदृशावित्यर्थः। तत्र तयोर्मध्ये एको गुरुव्याधितोऽपि सन् सत्त्वबलशरीरसम्पदुपेतत्वात् सत्त्वबलेन शरीरसंपदा दृढत्वादिगुणेन च युक्तत्वात् लघुव्याधित इव स्वल्पबलेन व्याधिना आक्रान्त इव दृश्यते। अपरः कश्चित् लघुव्याधितोऽपि सन् सत्त्वादीनां सत्त्वबलशरीराणामधमत्वात् निकृष्टबलत्वात् मनोदौर्बल्याद् अल्पबलत्वात् शरीरस्य च दार्ढ्यादिगुणाभावादित्यर्थः। गुरुव्याधितः प्रबलेन व्याधिनाक्रान्त इव दृश्यते। तयोर्गुरुलघुव्याधितयोः केवलं रूपं रूपमात्रं चक्षुषा दृष्ट्वा एव नान्यैरिन्द्रियैर्वेति तात्पर्यम्। अध्यवस्यन्तः निश्चयं कुर्वन्तः अतएव अकुशलाः असर्वज्ञाः भिषजो विप्रतिपद्यन्ते गुरुव्याधितं लघुव्याधितं लघुव्याधितञ्च गुरुव्याधितं मन्यमानाः स्खलन्तीत्यर्थः ॥ १–३ ॥

तत्र हेतुमाह नहीति। हि यतः ज्ञानावयवेन एकेनेन्द्रियज्ञानेन एकेन वा प्रत्यक्षादिप्रमाणान्तरेण। कृत्स्ने सर्वविधे ज्ञेये पदार्थे ज्ञानमुत्पद्यते। तर्हि का क्षतिरित्याह विप्रतिपन्ना इति। रोगज्ञानविप्रतिपन्नाः असम्यग्-

ज्ञानसम्पन्ना उपक्रमयुक्तिज्ञाने चिकित्साप्रयोगेऽपि विप्रतिपद्यन्ते प्रमाद्यन्ति । अर्थमिमं दृष्टान्तद्वारेण विशदयति ते इति । संशोधनकाले वमनविरेचनादिप्रयोगसमये । क्षिण्वन्ति नाशयन्ति । विदितवेदितव्या: कुशला: । तु: पक्षान्तरे । सर्वथा सर्वप्रकारैर्ज्ञानावयवै: यथासम्भवं यत्र या परीक्षा सम्भवति तदनुसारम् । यथेष्टमर्थमारोग्यरूपम । अभिनिर्वर्तयन्ति सम्पादयन्ति ॥ ४ ॥

अर्थमेनं पुन: पद्येन समर्थयति भवन्ति चात्रेति । विकल्पेन बलवत्ताबलवत्ताभ्याम् । विप्रतिपद्यन्ते विपरीतं मन्यन्ते । बाला: अज्ञा: । अयोगेन योगविरुद्धेनेति अयोगातियोगाभ्यामित्यर्थ: । अतियोगाद् व्याधितानां विनाश: अयोगाच्च महान् क्लेशो भवतीति ज्ञेयम् । प्राज्ञा: कुशलास्तु परीक्ष्यं व्याध्यादिकं सर्वथा सर्वै: प्रमाणै: आज्ञाय विशेषेण बुद्ध्वा ॥५-७॥

ननु क्रिमिजव्याधिषु केषाञ्चित् क्रिमीणामभ्यन्तरगतत्वेन अतिसूक्ष्मत्वेन च व्याधिनिर्णये कृत्स्नो हि ज्ञानावयवोऽक्षम: स्यादतस्तेषां समुत्थानादिविशेषा: पृथगज्ञातव्या: इति शिष्याणां प्रश्नावसरं प्राप्य विषयान्तरमारभते इति व्याधितेत्यादिना । इति पूर्वोक्तेन प्रकारेण व्याधितरूपाधिकारे व्याधितरूपाख्ये अधिकरणे व्याधितरूपसंख्याग्रसम्भवं व्याधितरूपस्य या संख्या द्वावित्यर्थ: । तत्र अग्र: प्रधान: सम्भव: कारणं सत्त्वादीनां बलवत्त्वाबलवत्तादिकमित्यर्थ: । तं निशम्येति योजना । पुनश्च व्याधितरूपहेतुप्रतिपत्तौ तथाविधव्याधितरूपहेतुज्ञाने सापवादं सदोषं कारणं ज्ञानावयवेन ज्ञानमित्यर्थ: । पुनरनपवादं निर्दोषं सप्रतिपत्तिकारणं सम्यग्ज्ञानकारणं सर्वेण प्रमाणेन विज्ञानमित्यर्थ: । निशम्येत्यन्वय: । पुरुषसंश्रयाणां मनुष्यशरीरगतानां न तु सर्वजागतिकानाम् । समुत्थानविशेष: निदानविशेष: । स्थानविशेष: केशाद्यधिकरणविशेष: । संस्थानविशेष: आकृतिविशेष: । वर्णविशेष: नामविशेष: प्रभावविशेषस्तद्गतकार्यविशेष: चिकित्सितविशेषश्च तान् ॥ ८ ॥

उत्तरयति अथेति । अथ शिष्यप्रश्नानन्तरम् । पूर्वं सू० १६ अध्याये एते हि विंशतिविधा: कृमयो जातस्योत्तरकालमेव जायन्ते व्याधिरूपेण । शरीरं हि जगद्वत् नानाविधकृमीणां सूक्ष्मातिसूक्ष्माणामाश्रयभूतं भवति । ते च कृमयोऽव्यापन्ने शरीरदोषे न कदाचिद् विकारमभिनिर्वर्तयन्ति ऊषरपांशुधाने उप्तबीजवत् , अतस्तेषां व्याध्युत्पत्तौ कारणतां न्यक्करोति अन्यत्र सहजेभ्य इत्यनेन । ते च सहजा: कृमय: शरीरेण सममेवोत्पन्ना: शरीरैकदेश इव समसर्वधातौ सर्वथा व्याधिकरणासमर्था इति तेषामस्मिन् तन्त्रे विवरणाभाव: समादृत इत्याशय: । ननु दृश्यन्तेऽद्यत्वे प्रतीच्यविज्ञानवादिभिर्यन्त्रादिसहायेन चर्मचक्षुषैव कतिषुचिद् व्याधिषु शरीरे केषाञ्चित् क्रिमिविशेषाणामाधिक्यम् । प्रतिपाद्यन्ते च तेषां मशकादिसाहाय्येन मानवशरीरे संक्रमणम् , तदाधिक्याच्च तत्तद्व्याधेरुत्पत्ति:, तन्नाशाच्च

तस्योपशमः इति अत्र तेषामनुल्लेखात् तन्त्रेऽस्मिन् न्यूनतादोषो दुष्परिहार्य एवेति चेन्न। सहजानां क्रिमीणामुल्लेखेन तेषामनुल्लेखवचनमपास्तम्। परन्त्वत्र तेषां व्याधेरसाधारणकारणताभावात् व्याधिनिदानत्वेन अनुल्लेखः समीचीन एव। तेषां तेषां कृमीणां सद्भावे ज्ञातेऽपि तत्तद्व्याधेरुत्पत्ति-दर्शनात् तेषां निदानत्वं न स्वीकार्यं भवति। अस्मिन् ह्यत्युष्णप्रधाने देशे क्रिमीणामुत्पत्तिबाहुल्यात् तेषां साकल्येनोच्छित्तिः देहे संक्रमणप्रतिरोधो वा दुष्परिहार्य एव। अतः क्रिमेरसाधारणकारणतायां तेषामुच्छेदेन स्वस्थस्य स्वास्थ्यरक्षणकल्पना मत्तोन्मत्तस्यैव सम्भवति। पुनश्च व्याध्युत्पत्तौ शस्योत्पत्तिवद् गुणसम्पदुपेतस्य क्षेत्रस्य बीजस्य च सत्ता नूनमपेक्ष्यते। न ह्यनुपयोगिनि क्षेत्रे बीजप्ररोहः स्यादिति समधातौ शरीरे परःसहस्रैः व्याध्युत्पादकक्रिमिभिः संक्रान्तेऽपि न कदाचिद् व्याध्युत्पत्तिर्भवतीति प्रतीच्यैः बहुशः परीक्षितमस्ति। अपिच ते ते क्रिमयः सहजा एव। तस्मिन् तस्मिन् व्याध्यनुकूले शरीरे तेषामाधिक्यमेव भवतीति आदौ धातुवैषम्याद् व्याध्युत्पत्तिस्ततः क्रिमिबाहुल्यम् उतादौ क्रिमिबाहुल्यं पश्चात् व्याध्युत्पत्तिरिति कैश्चित् प्रतीच्यपण्डितैरुत्थापितः संशयो नाद्यापि मीमांसितः क्रिमिवादिभिः इत्यस्मिन् तन्त्रे तेषां सर्वव्याधिनिदानत्वेनानुल्लेखो न न्यूनतादोषाय भवतीति सर्वमवदातम्। ते इति। ते व्याधिभूताः कृमयः। प्रकृतिभिः स्थानसंस्थानादिभिः। स्थानभेदाच्चतुर्विधानां नामान्याह पुरीषजा इति ॥ ९ ॥

तत्र सूचीकटाहन्यायेन आदौ मलजानाह तत्रेति। तत्र तेषु मध्ये मलजान् प्रचक्ष्महे इत्यन्वयः। यद्यपि मलो बाह्याभ्यन्तरभेदात् द्वेधा भिद्यते तथाप्यत्र बाह्यमलजानेव मलजसंज्ञितान् प्रचक्ष्महे। सत्यपि प्रायः सर्वस्मिन्नेव क्रिमौ मलजे बाह्यमलजानामेवात्र विशेषसंज्ञेत्याशयः। तेषां निदानमाह मृजावर्जनमिति। शौचस्नानाद्यभावात् शरीरे वस्त्रे च मलबाहुल्यं भवत्येवेत्यर्थः। स्थानमाह स्थानमिति। वासांसीत्यनेन शय्यादिकमपि परिगृह्यते। आकृतिमाह संस्थानमिति। संस्थानमाकृतिः। तिलाकृतयः चिपिटा इत्यर्थः। तेषु खर्वतराकाराः यूकाः ततो दीर्घाः पिपीलिकाः। कार्यमाह प्रभाव इति। कोठपिडकाभिनिवर्तनं कोठादिजननम्। चिकित्सामाह चिकित्सितमिति। अपकर्षणं हस्तेन कंकतिकादिना वा। मलोपघातः शरीरवस्त्रादीनां निर्मलीकरणम् मलकराणाञ्च भावानां मलिनवस्त्रशय्यादीनामनुपसेवनमनभ्यवहारः ॥ १० ॥

मलजान् निवेद्य शोणितजानाह शोणितेति। कुष्ठैः समानमिति कुष्ठस्य यन्निदानं तदेव रक्तजानां कृमीणामित्यर्थः। स्थानमाह रक्तेति। अत्र रक्तवाहिन्य इति विशेषणेन धमनीशब्दः शिरार्थको ज्ञेयः। संस्थानमाह संस्थानमिति। अत्र अणवोऽणुपरिमिताः परन्तु दृश्याः परस्ताद्दृश्यानां पृथगुल्लेखात्। वर्णमाह ताम्र इति। ताम्रः ताम्रवर्णः रक्तसदृशवर्ण इत्यर्थः।

कार्यमाह प्रभाव इति। व्रणगतानामित्यनेन तेषामेव व्रणकर्त्तृत्वं न्यते। हर्ष: झिन्झिनसंज्ञको वातजवेदनाविशेष:। तोद: सूचीवेधवद्वेदना। संसर्पणम् अन्त:पिपीलिकासञ्चार इव वेदना। उत्तरकालं कुष्ठचिकित्सिते ॥ ११ ॥

श्लेष्मजानाह श्लेष्मजा इति। पिष्टान्नं पिष्टतण्डुलनिर्मितमपूपादिकम्। परमान्नं क्षीरतण्डुलशर्करापक्वम्। कुसुम्भस्नेह: कुसुम्भबीजतैलम्। अजीर्णादिपदै: भोजनशब्दस्यान्वय:। पूतिभोजनं पर्युषितत्वाद्विरसं विगन्धञ्च भोज्यम् क्लिन्नभोजनन्तु अतिपूतित्वाद् गलितम्। स्थानमाह तेषामिति। आमाशय: भुक्तद्रव्यस्य प्रथमपरिणतिस्थानं महास्रोतस: स्थूलतमो भाग:। प्रवर्धमाना: संख्यात: अधिका: सन्तानादिना। ऊर्ध्वमामाशयतो अन्नवहस्रोतसा मुखनासाभ्यां नि:सरति। अधश्च पक्वाशयतो गुदतो नि:सरतीत्यर्थ:। आकृतिवर्णावाह संस्थानेति। पृथुब्रध्नसंस्थाना: पृथूनां स्थूलानां ब्रध्नानां मनाग् गोलचिपिटानां लताविशेषाणां सदृशा इत्यर्थ:। वृत्तपरिणाहा: गोलाकारा:। दीर्घा गण्डुपदाकृतय: किञ्चुलुकसदृशा:। ते च द्विविधवर्णा भवन्ति, केचित् श्वेता:, के वा ताम्रावभासा: मनाग रक्तवर्णा भवन्ति। केचिद् अणव: सूक्ष्मपरिणाहा:, परं दीर्घा:, कदाचित् ते द्वित्र्यामदीर्घा अपि भवन्तीत्यर्थ:। तन्वाकृतय: सूत्रसदृशा: श्वेता: श्वेतवर्णा: भवन्ति। तेषां त्रिविधानां ब्रध्नसदृशानां किञ्चुलुकसदृशानां तन्तुसदृशानाञ्चेत्यर्थ:। नामान्याह उदरादा इति। तेषां कर्माण्याह प्रभाव इति। हृल्लासो विवमिषा। आस्यस्रवणं निष्ठीविकाधिक्यम्। पारुष्यं कर्कशता शरीरस्येति शेष: ॥१२॥

पुरीषजानाह पुरीषजा इति। निदानमस्य श्लेष्मजै: समानमित्यर्थ:। स्थानन्तु पक्वाशय:। पुरीषजत्वेनात्र पक्वाशयशब्देन स्थूलान्त्रस्यैव परिग्रहो भवति तत्रैव केवलमलस्य स्थानत्वात्। प्रवर्धमानास्ते अधो गुदद्वाराद् विसर्पन्ति नि:सरन्ति। चेत् ते यदन्तरं यदा ऊर्ध्वगा: सन्त: आमाशयाभिमुखा: स्युस्तदन्तरं तदा उद्गारादौ पुरीषगन्धोऽनुभूयेत इत्याह यस्येति। तेषामाकृतिवर्णावाह संस्थानेति। सूक्ष्मवृत्तपरिणाहा: सूक्ष्मपरिणाहा: वृत्तपरिणाहाश्च। परं दीर्घा ऊर्णांशुसंकाशा: मेषलोमसदृशा: ते च श्वेता:। अपरे केचित् स्थूलवृत्तपरिणाहा: ततो मनाक्स्थूलपरिणाहा: वृत्तपरिणाहाश्च ते च श्यावादिवर्णा:। कर्माण्याह प्रभाव इति। पुरीषभेद: अतीसार:। त एव पुरीषजा: गुदमुखं परितुदन्त: रोगिणो गुदबलिषु सूचीवेधवद् वेदनामुत्पादयन्त: कण्डूञ्च तत्र जनयन्त: परि समन्तत: आसते अधिवसन्ति। ततस्ते जातहर्षा: ईरिता: अतिवेलमिति वेलां सीमामतिक्रम्य अत्यर्थं पुन: पुनमित्यर्थ:। गुदनिष्क्रमणं कुर्वन्ति गुदतो बहिर्नि:सरन्ति ॥ १३ ॥

समासतश्चिकित्साक्रममाह चिकित्सितमिति। तत्र चिकित्साक्रमे आदित: प्रथमत: अपकर्षणं निर्हरणम्। तत: प्रकृतिविघात: तन्नाशाय तत्प्रत्यनीकानां द्रव्याणामभ्यवहार:। ततो निदानपरिवर्जनम् इति

त्रय एव उपायाः सन्ति । अपकर्षणोपाये वक्तव्ये प्राग् बाह्यकृमीणामपकर्षणोपायानाह तत्रेति । उपकरणवता कंकतिकामुचुंट्यादियन्त्रसहायेन अनुपकरणवता केवलेन हस्तेन वा । विमृश्य लक्ष्यीकृत्य अभिसंगृह्य समन्ततो वृत्या बहिष्कृत्य अपनयनम् आभ्यन्तरकृमीणामपकर्षणोपायानाह स्थानेति । स्थानगतानामामाशयादिगतानाम् । शिरोविरेचनं क्रिमिजशिरोरोगे, वमनमामाशयगतानाम्, विरेचनं पक्वाशयगतानाम्, आस्थापनञ्च मलाशयगतानां क्रिमीणामपकर्षणे न्यायतः प्रयुज्येत । अपकर्षणविधिं व्याख्याय प्रकृतिविघातमाह प्रकृतीति । कटुतिक्तादयः स्वभावत एव कृमीणां विघाताय मारणाय सम्पद्यते इति तेषामुपयोगः कृमीणां प्रकृतिविघात इत्युच्यते । अपि च तदाश्रयीभूतश्लेष्मपुरीषादिप्रत्यनीकानां द्रव्याणामुपयोगः प्रकृतिविघातत्वेन निर्दिष्ट इत्याह यच्चेति । तृतीयं कार्यमाह अनन्तरमिति । यद् आहारविहारादिकं कृमिनिदानत्वेनोक्तं तथाप्रायाणां तत्प्रधानानामपरेषां निदानेऽनुक्तानामपीत्यर्थः ॥ १४-१८ ॥

समासतश्चिकित्साक्रमं निवेद्य विस्तरेण चिकित्सामाह अथैनमिति । अथ क्रिमिव्याधिनिश्चयानन्तरम् । अग्रे प्रथमतः भिषक् क्रिमिकोष्ठकमेनम् आभ्यन्तरक्रिमिव्याधितं षडरात्रं सप्तरात्रं वेति, त्रिरात्रं स्नेहविधिना, त्रिरात्रिञ्च स्वेदेन, मध्ये एकाहं वा विश्रम्येत्यर्थः । श्वोभूते परस्मिन्नहनि संशोधनं वमनविरेचनानुकूलं भेषजं पाययितास्मि इति निर्णीयेति शेषः । क्रिमीणां समुदीरणार्थं तेषां स्वस्वावासाद् बहिर्निष्काशनार्थं कोष्ठे महास्रोतसि अभिसरणार्थमागमनार्थञ्च क्षीरादिभिः क्रिम्युत्क्लेशकैर्द्रव्यैः सायं प्रातश्चोभयकालमुपपादयेद् भोजयेत । कृमयो हि तथाविधाहारेण जातहर्षाः स्वं स्वमावासं विहाय स्रोतसि निरालम्बाः यदा अभिसरन्ति तदा संशोधनेन निर्हरणं सुकरं भवतीत्याशयः । अथ पूर्वेऽहनि तथैवाहारादनन्तरं व्युष्टायां विगतायां रजन्यां प्रभाते इत्यर्थः । सुखोषितं सुनिद्रितं सुप्रजीर्णभुक्तं सम्यग्जीर्णाहारं विज्ञाय प्रश्नादिना विशेषतो ज्ञात्वा तदहरेव तदिनं व्याप्य उपपादयेत् वक्ष्यमाणक्रमेण प्रागास्थापनं त्रिवारं दत्त्वा तत उभयभागहरैः वमनं विरेचनञ्च कारयेत् । तदहरेवेत्येवकारेण यदैव संशोधनं कर्तव्यं भवेत् तत्पूर्वेद्युस्तथैव क्रिमिसमुदीरणार्थं भोज्यं देयमिति सूच्यते । उपपादनीयश्चेत् स्यादिति यदि व्याधितोऽवम्योऽविरेच्योऽनास्थाप्यश्च न स्यादित्यर्थः । अतएवाह सर्वानिति । विशेषान् अवम्यादिकान् भावान् समीक्ष्य विविच्य ॥ १९ ॥

ततो भूयो विस्तरेणास्थापनादिकर्म विवक्षुराह अथेति । शिग्रुः शोभाञ्जनम् । मधुशिग्रुः रक्तशोभाञ्जनम् । खरपुष्पा अपामार्गः । भूस्तृणं गन्धतृणम् । गण्डीरः शालिञ्चः । क्षवको राजिका । सुमुखादयः सर्व एव तुलसीभेदाः । अत्र शरावमितं द्रव्यं गोमूत्रप्रस्थेन तत्समेन चोदकेन काथविधिना पचेत् । पादावशेषे वस्त्रपूतं गृह्णीयादित्युपदेशः । प्राक् सर्जिकाक्षारस्य अर्धकर्षं पलमितेन तैलेन पात्रे तलेन मथ्नीयात् । सम्यङ् मिश्रिते

सति मदनफलादिकल्कं सुपिष्टं पलमितं दत्त्वा तत्कषायञ्च शनैः शनैर्दत्त्वा खजेन संमथ्य पुनर्वस्त्रप्रस्तुतमुष्णोदके संरद्ध्येषदुष्णं कृत्वा वस्तौ निधाय यथाविधानमास्थापयेदित्याह तानीति । सर्जिका 'सज्जी' इति भाषा । योगान्तरमाह तथेति । अर्कालर्कौ श्वेतरक्तपुष्पभेदेनार्कद्वयम् । कैटर्यो निम्बः । पीलुः उत्तरपथिकः फलमज्जविशेषः 'आखरोट' इति भाषा । कुस्तुम्बुरुः तुम्बुरुः । अत्र सर्षपपदेन राजिकैव ग्राह्या क्रिमिहन्तृत्वात् । पिचुमर्दो निम्बः । एवं त्रिरात्रं सप्तरात्रं वा आस्थापयेत् ॥ २० ॥

वस्तिदानदिवस एव वमनविरेचनमेकत्र दद्यादित्याह प्रत्यागत इति । न खलु द्वित्रान् वारानुपवेशनादृते वस्तिद्रव्याणि सदोषाणि कात्स्न्येन निर्हरतीत्याह पश्चिमे वस्ताविति वस्तिशेषे इत्यर्थः । प्रत्यागते निर्हृते सति प्रत्याश्वस्तं क्षणं विश्रम्य विगतक्लमम् । उभयतोभागहरं एकत्रैव वामकं विरेचकञ्च भेषजम् । तदहरेव वस्तिदानदिवस एव । युक्त्या मात्रां कालादिकञ्च वीक्ष्येत्यर्थः । तदर्थं योगमेकमाह मदनेति । मात्राप्रमाणञ्चात्र तात्कालिकातिबलपुरुषस्य ज्ञेयम् । अद्यत्वे तु त्रिवृत्कल्कस्य शानमेव सर्वोच्चा मात्रा भवति । वमनविरेचनानन्तरं कर्तव्यमाह अथैनमिति । अथ वमनविरेचनानन्तरम् । शैखरिककषायेण अपामार्गकाथेन शश्वत् सर्वदा । मूत्रक्षारैः गोमूत्रैः मृदुक्षारोदकैर्वा । निवातं बाह्यवायुप्रवाहरहितमित्यर्थः । क्रमेण इति संशोधनानन्तरसंसर्जनक्रमस्तु उपकल्पनीये सौत्रीये व्यासतो निवेदितः । तत्रानुवासनविधिमाह विलेप्या इति । विडंगतैलन्तु वक्ष्यत्यग्रे । एकान्तरमेकदिवसं विश्रम्य । द्विस्त्रिर्वा द्विवारं त्रिवारं वा अनुवासयेदित्यर्थः । यदि शिरस्यपि क्रिमीणां सत्ता ज्ञायेत तर्हि शिरोविरेचनं कर्तव्यमित्याह यदीति । शीर्षादान् शिरोगतान् तत्र तेषामभिसर्पणेन निर्णेयान् ॥ २१–२३ ॥

संशोधनेन कोष्ठगतानाम् अपकर्षणक्रमं निवेद्य द्वितीयमुपक्रमं प्रकृतिविघातं व्याचष्टे यस्त्विति । अभ्यवहार्यः सेवनीयः । मूषिकपर्णी जलजो हठविशेषः "इन्दुरकानीपाना" इति वंगे । पूपलिका तनुरोटिका यदुक्तं पाकशास्त्रे :—

"कुर्यात् समितयातीव तन्वी पर्पटिका ततः ।
स्वेदयेत् तप्तके तान्तु पोलिकां तां जगुर्बुधाः ॥" इति ।

एवंविधेन मूषिकपर्णीस्वरसेन शालितण्डुलपिष्टेन पूपलिका विधेया । तस्यानुपानमाह अनन्तरमिति । उदस्विद् अर्धोदकं तक्रम् । पिप्पल्यादि पञ्चवर्गस्य पञ्चकोल इति संज्ञा । विधिमेनमन्यैरपि स्वरसैः कर्तुमुपदेष्टि अनेन कल्पेनेति । कल्पेन कल्पनाविधिना । मार्कवो भृंगराजः सहचरो झिण्टी । नीपः कदम्बः । सुवर्णक्षीरी 'सत्यानाशी' इति भाषा पीतवर्णक्षीरो गुल्मविशेषः । किणिही अपामार्गः । सुवहा गोधापदी । मधुविलुलितान् प्रक्षेपविधिना मधु संमिश्रयेत्यर्थः ॥ २४–२५ ॥

योगान्तरमाह अथाश्वशकृदिति । अश्वशकृत् अश्वपुरीषम् । किलि-

ञ्जके कटे। दृशदि प्रस्तरखल्ले। अनुगुप्तं सावधानतया घटमुखं शराववस्त्रादिना बद्ध्वेत्यर्थः। योगान्तरमाह तथा भल्लातकेति। भल्लातकास्थीनि भल्लातकबीजानि तानि सुपक्वफलानामेव ग्राह्याणि। तत्परीक्षाप्रकारश्च सलिले प्रक्षिप्य सारवत्तया निमज्जितान्येवादेयानि। पुनश्च तानि इष्टकाचूर्णैः संघृष्य सलिलेन प्रक्षाल्यातपे शुष्काण्येव संशोधितानि भवन्तीति समानतन्त्रवचनाद् इहानुक्तमपि कर्म तत्र कर्तव्यम्। यदुक्तं भेलसंहितायाम्—

"भल्लातकानां पवनाहतानां वृन्तच्युतानामिह चाढकं स्यात्।
तदिष्टकाचूर्णकणैर्विघृष्य प्रक्षालयित्वा विसृजेत् प्रतापे॥
शुष्कं पुनस्तद्विदलीकृतञ्च॥" इत्यादि।

कलशप्रमाणेन उपरिस्थः कलशो यावता पूर्णो भवति तावत्प्रमाणेन। संपोथ्य खण्डशः कृत्वा। सूक्ष्मानेकछिद्रब्रध्ने इति अत्र ब्रध्नशब्देन वृक्षमूलपर्यायत्वात् घटस्य तलदेश एव नेयः। द्वितीयकलशमुखमानेनैव अस्य तलदेशे बहूनि सूक्ष्माणि छिद्राणि कर्तव्यानीत्यर्थः। उडुपेन घटमुखप्रमाणेन शरावेण। अयमर्थः--द्वितीयघटमुखपरिणाहमानेन बहुसूक्ष्मछिद्रसमन्विततलदेशमेकं घटमापोथितभल्लातकेनापूर्य तन्मुखे शरावमेकं निधाय मृद्गोमयादिना सन्धिं संलेपयेत्। पुनस्तस्य घटस्य सच्छिद्रं तलदेशमन्यस्य घृतभावितस्य कुम्भस्य मुखे संस्थाप्य तत्सन्धिमपि पूर्ववत् दृढं संयोज्य संलेपयेत्। ततोऽधःस्थं घटं भूमौ निखातयेत्। तत ऊर्ध्वस्थकुम्भं समन्ततः शुष्कगोमयकरीषेण परिवार्य प्रज्वाल्येदित्युपदेशः। तेन चाग्निसन्तापाद् भल्लातकात् स्नेहो विलायितः तलच्छिद्रेण अधःस्थे कुम्भे पतति इति। विधिरयं भद्रदार्वादिस्नेहनिष्काशनेऽतिदिशति एवमेवेति। एवमेव पूर्वोक्तकल्पेन स्नेहं निष्काश्येत्यर्थः॥ २७-२८॥

अथ विडंगतैलद्वयं वक्तुं प्रक्रमते अथ आहरेति। शारदान् शरत्कालभवान् कृष्णानित्यर्थः। शोधयित्वा तन्मिश्राण्यन्यद्रव्याणि पृथक्कृत्य सुनिष्पूतान् सूर्पादिना धूल्यादिरहितान् कृत्वा सुखोष्णे विडंगकषाये प्रक्षिप्य आदोषशमनान् निर्वापयेत् तद्गतमृत्तिकादीनि प्रक्षाल्य निष्काशयेदित्यर्थः। गतदोषान् अभिसमीक्ष्य तत्र नान्यद्रव्यं मिश्रितमास्ते इति दृष्ट्वा। सुप्रलूनान् प्रलुच्य यथा सर्वथा त्वग्रहितान् स्यात् यथा तिलघर्षकयन्त्रेण संघृष्येत्यर्थः। पुनः सुनिष्पूतान् निष्पूय सूर्पादिना सम्यक् त्वगादीन् निष्काश्य शोधयित्वा अन्यद्रव्यरहितान् कृत्वा विडंगकषायेण त्रिसप्तकृत्वः एकविंशतिवारं भावयित्वा आतपे संशोष्य उलूखले संक्षुद्य सञ्चूर्ण्य पुनर्दृषदि प्रस्तरमये यन्त्रे श्लक्ष्णपिष्टान् कृत्वा द्रोण्यां प्रशस्तमुखे महति पात्रे अभ्यवधाय प्रक्षिप्य विडंगकषायं पुनः पुनः दत्त्वा उभाभ्यां पाणितलाभ्यां दृढं मर्दयेत्। ततस्तेभ्यः पिष्टतिलेभ्यो यत् तैलं द्रव्यस्योपरि उदीयात् तदादाय अग्नितापेन द्रवांशं संशोष्य पात्रान्तरे रक्षेद् इति प्रथमविडंगतैलपरिपाटी। पुनश्च तत्तैलं प्रस्थमितं तिल्वकादीनां यथोक्तमात्राणां

विडंगकषायपिष्टानां कल्केन आढकमात्रेण च विडंगकषायेण चैकध्यं स्थाल्यां समावाप्य पाकाद्द्वितीयं विडंगतैलं स्यादित्यर्थ: । तिल्वको लोध्र: । उद्दालक: श्लेष्मान्तक: । विल्वमात्रं प्रत्येकं पलपरिमितम् । श्यामा श्यामूला त्रिवृत् । त्रिवृत्पदेन चारुणमूलाया: परिग्रह: स्यात् । द्रवन्ती लघुदन्ती । पर्योगे कटाहे । पाकशेषज्ञानमाह स इति । प्रसादमापद्यते कल्काद् विविक्तं भवेत् । भैषज्यं पक्वतैलकल्क: । मृद्यमानमावर्त्तितमंगुलिभ्यां न अंगुलिग्राहि अंगुल्यां लिप्तम् । तत: पाकानन्तरम् अपहृत्य चुल्लीतोऽध:श्रित्य । आनुपूर्वी पथ्यादिविधानम् । विधिरेष: सर्षपादितैलेष्वतिदिशति एतेनैवेति ।२९-३०।

सामान्यत: श्लेष्मपुरीषजानां क्रिमीणां चिकित्सितमभिधाय पृथक् तेषां विशेषविधिमाह विशेषत इति । तेषु औषधेषु अपकर्षणप्रकृतिविघातनिदानपरिवर्जनेषु यदौषधमल्पमात्रमास्थापनादिभूयिष्ठञ्च चिकित्सितं पुरीषजानां, पुनर्मात्राधिक शिरोविरेचनादि भूयिष्ठञ्च चिकित्सितं श्लेष्मजानां कार्यमित्यर्थ: । इति प्रकरणोपसंहारे । एवं चिकित्सितमभिधाय तृतीयमुपायं निदानपरिवर्जनमाह तमिति । तं चिकित्साविधिमनुतिष्ठता आरभमाणेन ॥ ३१-३२ ॥

अर्थमिमं पुन: पद्येन प्राह भवन्तीति। क्रिमिचिकित्सितस्य सामान्यविधिं सर्वेष्वेव व्याधिषु अतिदिशति अयमेवेति । क्रिमिषु यदपकर्षणं तदेवान्येषु संशोधनं यश्च प्रकृतिविघात: तच्च संशमनम् । अतिरोहितार्थमन्यत् ॥ ३३-३५ ॥

अध्यायार्थं निवेदयति तत्र श्लोकाविति ॥ ३६-३७ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां वमानस्थाने व्याधितरूपीयं नाम स मोऽध्याय: ॥ ७ ॥

अष्टमोऽध्याय:।

प्राक् सप्तभिरध्यायै: रसदोषद्रव्यविकारादीनां मानं बहुशो निरूपितम् । तेनैव सुभिषजां पुष्कलं ज्ञानं भवेत् परन्तु विना सुभिषज: सूत्राकारेणोपनिबद्धं तद् बोद्धमलं भवन्ति केऽपीति सुभिषग्जननानुकूलान् उपायान् शिष्टविषयाणां मानेन साकं विवक्षुरध्यायान्तरमारभते अथात इत्यादिना । क्रियाया: रसादिमानायत्तत्वात् अध्यायेऽस्मिन् पूर्णतया रसादिज्ञानं भविष्यतीति रोगभिषग्जितं चिकित्सितमधिकृत्य कृतोऽयमध्याय इत्यस्य रोगभिषग्जितीय इति संज्ञा भवति । तच्च सम्यग्ज्ञानवतामेव भिषजामेवायत्तमिति प्राक् सम्यग्ज्ञानार्थानुपायान् अध्ययनाध्यापनतद्विद्यसम्भाषारूपान् व्याचिकीर्षुरध्ययनाध्यापनार्थानां तन्त्राचार्यशिष्याणां परीक्षाप्रकारं निवेदयति बुद्धिमानिति । बुद्धिमान् कार्यगुरुलाघवं चिकित्साया: बह्वल्पप्रयाससाध्यत्वं कर्मफलमारोग्यम् । अनुबन्धमायु: देशकालौ च युक्तिदर्शनात् युक्तिप्रमाणमनुसृत्य विदित्वा भिषग्बुभूषु: सुचिकित्सको भवितु-

मिच्छुः नतु सुवैद्यानां पुस्तकभाण्डादिसंग्रहेण भिषग्छद्मचरं सिद्धसाधितं वा भवितुमिच्छुरित्यर्थः । तच्च शास्त्राध्ययनसापेक्षमिति आदितः प्राक् आत्मनः शास्त्रम् अध्येयमायुर्वेदग्रन्थं परीक्षेत । ननु अथर्ववेदस्योपांगभूते आयुर्वेदे कथं परीक्षा अवेक्ष्या भवेद् विना संशयं परीक्षाप्रवृत्तेरसम्भवादिति चेत्र । न खलु आयुर्वेदत्वेनेह प्रथिताः सर्व एव ग्रन्थाः वेदवत् शाश्वतत्वेनार्षत्वेन चाप्तवचनवत् संशयरहिता भवन्ति इत्याह विविधानीति । लोके इह भुवि भिषजां शास्त्राणि आयुर्वेदत्वेन प्रथितानि प्रचरन्ति । तत्र तेषु यत् सुमहद्यशस्विधीरपुरुषसेवितादिगुणवद् भवति तच्छास्त्रमभिप्रपद्येत इति योजना । महापुरुषैः यशस्विभिः । धीरैः पण्डितैश्च आसेवितमाप्तवाक्यत्वेन परिगृहीतमित्याह महदिति । अर्थबहुलं विषयबहुलम् । आप्तजनपूजितं शिष्टैरुपादेयत्वेन परिगृहीतम् । त्रिविधशिष्यबुद्धिहितम् उत्तममध्यमाधमबुद्धिभिः शिष्यैर्बोद्धुं योग्यम् । अपगतपुनरुक्तदोषं दोषत्वेन गृहीतपुनरुक्तिदोषरहितम् । एतेन न सर्वत्र पुनरुक्तिः दोषरूपा स्यादिति ज्ञेयं भवति । आर्षमृषिप्रोक्तम् । सुप्रणीतसूत्रभाष्यसंग्रहक्रममिति तत्र सूत्रलक्षणं यथा—

"स्वल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम् ।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः ॥" इति ।

तच्च षड्विधं यथा—

"संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥" इति ।

भाष्यलक्षणन्तु—

"सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥" इति ।

यत्र सूत्रभाष्ययोः संग्रहक्रमः सुसन्निविष्टो वर्तते तदित्यर्थः । स्वाधारं सु सुन्दरः आधारः उपजीव्यत्वेन वेदादिर्यस्य तत् । अनवपतितशब्दं शब्दच्युतिवर्जितम् । अकष्टशब्दं न दुरूहार्थशब्दबहुलम् । पुष्कलाभिधानं श्रेष्ठाभिधेयम् । क्रमागतार्थं प्रक्रमभंगदोषरहितम् । अर्थतत्त्वविनिश्चयप्रधानं यथार्थविषयाणां सिद्धान्तबहुलम् । संगतार्थम् असंगतिरहितम् । असंकुलप्रकरणं यत्र प्रकरणानि न परस्परं संकीर्णानि भवन्ति तत् । आशुप्रबोधकं त्वरितबुद्धिगम्यम् । लक्षणवद् आयुर्वेदलक्षणान्वितम् । उदाहरणवद् उदाहरणैर्व्याख्यातसर्वविषयम् । एवम्भूतं शास्त्रमभिप्रपद्येत अध्ययनार्थं स्वीकुर्यात् । तम इति आदित्यपक्षे अन्धकारः शास्त्रपक्षे चाज्ञानता ॥ १–३ ॥

शास्त्रपरीक्षानन्तरमाचार्यपरीक्षाप्रकारमाह तत इति । आचार्यमध्यापकम् । पर्यवदातश्रुतं सम्यगधीतसर्वशास्त्रम् । परिदृष्टकर्माणं पुनः पुनः सम्यग्दृष्टचिकित्सितम् । दक्षं स्वभ्यस्तकर्माणं कर्मकुशलमित्याशयः । दक्षिणमनुकूलम् । जितहस्तं शास्त्राद्यवचारणाय मनोऽनुगतहस्तपरिचालन-

समर्थम् । उपकरणवन्तं संगृहीतसर्वौषधादिसम्भारम् । प्रकृतिज्ञं शिष्यप्रकृतिं समीक्ष्याध्यापनकुशलम् । प्रतिपत्तिज्ञं कर्तव्याकर्तव्यकुशलम् । अनुपस्कृतविद्यमविकृतज्ञानम् । अध्यापकमध्यापनकुशलम् । ज्ञापनसमर्थं त्रिविधं शिष्यं बोधयितुं समर्थम् । अत्राचार्यगुणा एव परीक्ष्या भवन्तीति ज्ञेयम् । आर्तव: ऋत्वनुरूप: वार्षिक इत्यर्थ: । तत: किं कुर्यादित्याह तमुपसृत्येति । उपसृत्य समीपं गत्वा उपचरेत् सेवेत अप्रमत: सावधान: । तत आचार्यस्य सेवया तत्प्रसादात् तस्यानुग्रहात् कृत्स्नं निखिलं शास्त्रमायुर्वेदतन्त्रमधिगम्य अधीत्य शास्त्रस्य दृढतायां पुन: पुनरनुशीलनेन यथाशास्त्रज्ञानं दृढं स्यात् तत्र । अभिधानस्य उच्चारणस्य सौष्ठवे अर्थस्य विज्ञाने शब्दार्थज्ञाने वचनशक्तौ शंकां निरस्य विचारपूर्वकं कथनाय ॥ ४-५ ॥

नन्वेवं प्रयत्नाय के खलूपाया: इत्याह तत्रोपाया इति । तत्र तथाविधप्रयत्ने । त्रिविधेषु उपायेषु क्रमागतमध्ययनविधिमाह तत्रेति । तत्र तेषूपायेषु । कल्यकृतक्षण: कल्ये प्रातरेव कृतावसर: अन्यकार्यव्यापारोऽध्ययनप्रत्यूहो भवतीत्याशय: । उपव्यूषम् ऊषसि इत्यर्थ: सप्तम्यर्थेऽव्ययीभाव: । आवश्यकं मलत्यागदन्तधावनादिकम् । उदकमुपस्पृश्य स्नात्वा आचम्य वा । मन:पुर:सराभि: समनस्काभि: । अनुक्रामन् उच्चारयन् पुन: पुनरावर्तयेत् उल्लिखेत् । यथोच्चारणकाले एव अर्थबोध: स्यात् तथा पुन: पुनरावृत्तिं कुर्यादित्यर्थ: । आयत्ते हि ग्रन्थे आत्मनो न्यूनतादिदोष: परिहृतो विवादिनोऽपि दोषज्ञाने योग्यता भविष्यतीति आह स्वदोषेति । शश्वद् अनारतम् । अपरिहापयन् अधीतविषयं न परित्यजन् ॥ ६-७ ॥

प्रथमुपायं निखिलेनोपदिश्य द्वितीयमुपायं व्याचक्षते अथेत्यादिना अध्यापने कृतबुद्धि: अध्यापिपयिषु: । शिष्यगुणानाह तदिति । प्रशान्तं शमगुणसम्पन्नम् । आर्यप्रकृतिं साधुजनोचितस्वभावम् । अक्षुद्रकर्माणम् अनीचकर्माणम् । केकराक्ष्यादिविकृतावयवानान्तु चिकित्सकत्वे जनानां तेन अश्रद्धा स्यादिति तथाविधानां शिष्याणामयोग्यत्वमाह ऋज्विति । अमिनमिनम् अनासाभाषिणम् । धृतिमन्तं धैर्यशीलम् । उदारसत्त्वम् उदारमनस्कम् । तद्विद्यकुलजं भिषजां वंशजम् । तद्विद्यवृत्तं चिकित्सावृत्तिकम् । तत्त्वाभिनिवेशिनं यथार्थज्ञाने मनोयोगिनम् । अव्यंगं छलरहितम् । निभृतं विश्वस्तम् । अव्यसनिनं क्रीडादावासक्तिरहितम् । अर्थविज्ञाने कर्मदर्शने च अनन्यकार्यमिति अन्यत्कार्यं परिहृत्य आयुर्वेदार्थतत्त्वविज्ञाने तथा शास्त्रावचरणादिकर्मदर्शने प्रतिनिविष्टचित्तमित्यर्थ: । आचार्यसर्वानुशिष्टिप्रतिपत्तिकरम् अध्यापकानां सर्वानुशासनप्रतिपालकम् ॥ ८ ॥

एवंगुण: शिष्यश्चेदध्ययनार्थी स्यात्तर्हि तमाचार्य: यत्कर्तुमुपदिशेत्तदाह उदगयन इति । उदगयने उत्तरायणे । तिष्य: पुष्या । अश्वयुग् अश्विनी । कल्याणे शशिनि शिष्यस्य चन्द्रशुद्धौ । मैत्रे मुहूर्ते शुभे क्षणे । मुण्ड: केशान् वापयित्वा । कषायवस्त्रसंवीत: गैरिकादिरञ्जितवस्त्रपरिहित: ।

गन्धहस्तः गन्धद्रव्याणि हस्ते कृत्वा । माल्यमत्र मूर्ध्नि न्यस्तं दाम । दामं तु कण्ठे धारणार्थमिति विशेषः । हिरण्यमत्र सुवर्णनिर्मितांगुरीयकादौ हेममाषकमितं स्वर्णम् । क्षौमपरिधिस्तु अतसीतन्तुनिर्मितं परिधेयवस्त्रम् । सुमनसो ग्रथिताग्रथिताः इत्यत्र पूर्वं माल्यदामोल्लेखात् ग्रथितपुष्पं गुच्छत्वेनेति ज्ञेयम् ॥ ९-१० ॥

अथ वेदारम्भहोमविधिमाह तमिति । तं शिष्यम् । प्राक्प्रवणे पूर्वस्यां दिशि दीर्घे उदकप्रवणे उत्तरस्यां वा दीर्घे देशे । चतुष्किष्कुमात्रं चतुरस्रं चतुरस्रं समसर्वबाहुकोणम् । स्थण्डिलं होमवेदीं कृत्वेति योजना । किम्भूतं तदित्याह गोमयेत्यादिना । परिधिभिः चन्द्रातपादिभिर्वस्त्रैः सूपविहितं सम्यग्वेदोक्तविधिनाच्छादितम् । यथोक्तेन वेदोक्तेन चन्दनादिना चतुर्दिशमलंकृतं कृत्वा तथा च मेध्यभक्ष्यादिना उपशोभितं कृत्वेत्यन्वयः । पालाश्यादिभिः समिद्भिः यज्ञीयैः काष्ठैः अग्निमुपसमाधाय प्रज्वाल्य प्राङ्मुखः शुचिराचार्य इति शेषः । अध्ययनविधिमनुविधायेति वेदारम्भविधिनेत्यर्थः । त्रिस्त्रिः प्रत्येकं त्रिवारं पूर्वं ब्रह्मादीन् आशीःसंप्रयुक्तैः मन्त्रैरभिमन्त्रयमाणः स्वाहेति मधुसर्पिर्भ्यामग्निं जुहूयादिति योजना । ब्रह्मणे स्वाहा अग्नये स्वाहा इत्यादिक्रमेणेत्यर्थः । शिष्यश्च एवं अनु पश्चाद् आरभेत शिष्येण चैवं त्रिस्त्रिराहुतिं दापयेत् इत्याशयः । हुत्वा होमानन्तरं प्रदक्षिणं दक्षिणतो अग्निमनु लक्ष्यीकृत्य अग्निं दक्षिणतः संरभ्य परि चतुर्दिक्षु क्रामेत् प्रदक्षिणं कुर्य्यादित्यर्थः ॥ ११-१२ ॥

अथेति । अथ भिषक् पूजानन्तरं एनं शिष्यमनुशिष्यात् अनुशासनं दद्यात् । निर्मत्सरेण अक्रोधेन । अशस्त्रधारिणेति जीवहत्यार्थमस्त्रधारणं निषिध्यति नतु चिकित्सार्थं योग्याकरणार्थं वा । राजद्विष्टात् राजशासनविगर्हितात् अर्थात् विषयात् । प्राणहरात् येन कस्यचित् प्राणहानिर्भवेत् तद्रूपाद् विषयात् । मदर्पणेनेति मह्यमात्मानं समर्प्येत्यर्थः । उपचरता सेवमानेन । अनुत्सेकेन उत्कण्ठारहितेन । अवहितेन मनोयोगिना विनीतेन जितेन्द्रियेण । अवेक्ष्यावेक्ष्य पुनः पुनर्विशेषतो विविच्य । अनसूयकेन परदोषोद्घाटनरहितेन । अभ्यनुज्ञातेन गुरोराज्ञां गृहीत्वा । कर्मसिद्धिं चिकित्सायां साफल्यम् । अर्थसिद्धिं धनोपार्जनसाफल्यम् । प्रेत्य परे लोके । सर्वप्राणभृतां सर्वप्राणिनाम् । प्राक् गवां ब्राह्मणानां मंगलमाशासनीयं ततोऽन्येषां प्राणिनां मनुष्याणाञ्चेत्याह गोब्राह्मणेति । अहरहरुत्तिष्ठता चोपविशता चेति प्रत्यहं सदैवेत्यर्थः । सर्वात्मना सर्वभावेन स्वस्य वृत्तिहेतोरपि न रोगिणामनिष्टं कर्तव्यम् इत्याह जीविते ति । मनसेत्यनेन किमुत कार्येणेति बोध्यम् । सर्वमेवेत्यनेनातितुच्छमपि परस्वमिति ज्ञेयम् । तैः प्रसाधनं वस्त्रादिकञ्च यथा अनुद्धतमौद्धत्यसूचकं न भवेत् तथा कर्तव्यमित्याह निभृतेति । अशौण्डेन सुरावेश्याद्यनासक्तेन । अपापेन पापकर्मवर्जकेन । अपापसहायेन पापिनामसहायकेन । श्लक्ष्णं मनोहरं

शुक्लं शुचि धन्यं श्रेष्ठं मितमन्यूनाधिकं देशौपयौगिकं यथा स्यात् तथा विचार्यकारिणेत्यर्थः। स्मृतिमता विशेषतो विचिन्त्य कारकेण। ज्ञानस्य शास्त्रबुद्धेः उत्थानस्य उद्यमस्य। उपकरणानाञ्च चिकित्साप्राभृतीयोक्तानां द्रव्याणां सम्पत्सु गुणोत्कर्षेषु सदैव यत्नशीलेन भवितव्यमिति योजना। त्वयेति शेषः। राजद्विष्टानां राजा प्रतिकूलत्वेन यान् द्वेष्टि तेषाम् राज-द्वेषिणां ये राजशासनं न्यक्कृत्य राजानं द्विषन्ति तेषाम्। महाजनद्विष्टानां असत्पुरुषत्वेन साधवो यान् द्विषन्ति तेषाम्। महाजनद्वेषिणामित्यनादरे षष्ठी। नौषधमनुविधातव्यम् अचिकित्स्यास्ते त्वयेति शेषः। अत्यर्थेति अत्यर्थं विकृतं वीभत्सं शीलं चरित्रं दुष्टो निन्दित आचारो व्यवहारः दुःखञ्च उपचारचिकित्साक्रमश्च येषां तेषाम्। अल्पवादप्रतीकाराणां ‡ असाध्यव्याध्याक्रान्तानाम्। मुमूर्षूणां सद्योमरणीयारिष्टक्रान्तानाम्। असन्निहितेश्वराणाम् अनुपस्थितपतीनाम्। अनध्यक्षाणामभिभावकरहितानां वा स्त्रीणाम्। नौषधमनुविधातव्यम् इति सर्वत्रैवान्वयः। आमिषं भोग्यं वस्तु। आतुरकुलं रोगिणोऽन्तःपुरम्। विदितेन सम्यगज्ञातेन अन्तःपुर-चारिभिरिति शेषः। अनुमतप्रवेशिना गृहस्वामिना अनुज्ञातेन। सुसंवीतेन स्वाच्छादितशरीरेण। अवाक् शिरसा शिरो नमयित्वा समन्ततो दृष्टिमनि-क्षिप्येत्याशयः। स्तिमितेनाचञ्चलेन मनसा। बुद्ध्या सर्वं सम्यगाचरता तदात्मीयेन पुरुषेण सार्धमनुप्रवेष्टव्यम्। आतुरान्तःपुरं च प्रविश्य तत्-सम्बन्धिन्येव विषये तदुपकारकविषयेषु वा वाङ्मनोबुद्धीन्द्रियप्रवृत्तयः प्रयोज्याः नत्वन्यत्रेत्याह अनुप्रविश्येति। आतुरगृहगता काऽपि वार्ता नत्वन्यत्र प्रकाशनीयेत्याह न चेति। मुमूर्षन्तं रोगिणं निश्चित्यापि न तदातुरसन्निधौ न वा तदात्मीयसकाशे प्रकाश्यं, तेन चातुरस्य मनोबलहानात् त्वरितं मृत्युर्भवति, आत्मीयानामपि हताशावशाद् आतुरशुश्रूषायामादरा-भावो भवितुमर्हतीत्याह हसितमिति। विज्ञानवता आयुर्वेदे भूम्ना ज्ञान-विशिष्टेनापि विकत्थितव्यं न आत्मश्लाघा कर्तव्या। विकत्थमानात् श्लाघां कुर्वतः आप्तात् भ्रमप्रमादरहितादपि अनेके उद्विजन्ति बिभ्यन्ति॥ १३॥

कथं श्लाघा न कर्तव्येत्याह न चैवेति। हि यस्माद् आयुर्वेदस्य पारमन्तं नास्ति, तस्माद् अस्मिन् अपारे आयुर्वेदे शश्वत् सततं अप्रमत्तः सावधानतया योगमभिगच्छेत् आत्मनो मनसा बुद्ध्या च योगं कृत्वा आलोचयेत्। पुनश्च न केवलं शास्त्रालोचनेन पूर्णमायुर्वेदज्ञानं भवति सर्वेभ्य एव तदाहर्तव्यमित्याह एतदेवमिति। एतत् कार्यमेवं कार्यं करणीयं भूयः पुनःपुनः एवं प्रवृत्तस्य क्रियां कुर्वतस्ते सौष्ठवं कार्यसौष्ठवं स्यादिति ज्ञानं परेभ्यः शत्रुभ्योऽपि आगमयितव्यमादातव्यं शिक्षणीयमित्याशयः। अनसूयता तत्राकृतदोषारोपेण त्वयेति शेषः। नन्वनिष्टेभ्यः कथं ज्ञानमा-हर्तव्यमिति प्रमाणयति कृत्स्नो हीति। हि यतः कृत्स्नो लोको भूतग्रामः।

‡ 'अल्पवादप्रतीकाराणामिति' पाठोऽत्राहृतः।

खलु बुद्धिमन्तस्ते सर्वविधपार्थिवपदार्थादेव ज्ञानमाहरन्ति अबुद्धिमन्तस्तु अयं शत्रुरिदं मित्रं व्यवस्यन्तीत्याशयः। अतः युक्तमुपदिशतः अमित्रस्यापि शत्रोरपि धन्यं पुण्यवत्, पौष्टिकंपोषणाय हितं लौकिकं लोकाय हितं प्रेक्षावदित्यर्थः; वचः श्रोतव्यमनुविधातव्यञ्च तदनुसृत्य क्रिया च कर्तव्या। अभिसमीक्ष्येति तद्वक्यस्य धन्यत्वादिगुणवत्त्वं विविच्येत्यर्थः। पुनरपि अनुशास्ति अतः परमिति। ते त्वया देवतादिषु सम्यग् यत्र यादृक् सेवादि कर्तव्यं तादृग् वर्तितव्यम्। अ यं पुरतो वर्तमानम्। सर्वगन्धादीनि यज्ञार्थमाहृतानि यथेरिताः ब्रह्माग्निधन्वन्तर्यादयः। शिवाय मंगलाय। तथेति ब्रूयात् तथा कर्तुं प्रतिजानीत। स यदि तथा कुर्यात् तर्हि अध्यापयेत् अन्यथा नेत्याह यथोपदेशमिति ॥ १४॥

अध्ययनाध्यापननियमावुक्त्वा तद्विद्यसम्भाषां विवृणोति सम्भाषेति। सम्भाषा शास्त्राण्यनुसृत्य विचारविनिमयः। तद्विद्यसम्भाषा तु तन्त्रकुशलेन सह शास्त्रानुयायिनौ वादप्रतिवादौ। तस्याः गुणानाह तद्विद्येति। ज्ञानाभियोगसंहर्षकरीति ज्ञानकरी अभियोगे च पूर्वपक्षे संहर्षकरी स्पर्धावर्धिकेत्यर्थः। वैशारद्यं पाण्डित्यम्। वचनशक्तिर्वादप्रतिवादपटुत्वम्। यशः सभायां परपक्षनिरासेन। पूर्वं श्रुते अनालोचनया मलिने इत्यर्थः। अध्यवसायं स्थिरनिश्चयम्। शुश्रूषवे शुश्रूषापरायणाय। गुह्याभिमतं गुरुपरम्परक्रमादाप्तम्, अन्यतो वाऽप्रकाशितं प्रतिभाबलेन वा स्वयमुट्टंकितम्। पण्डेन‡ निर्बोधेन। विजिगीषुः प्रतिपक्षमिति शेषः। संहर्षात् स्पर्धावशात् ॥ १५॥

कतिविधा सेत्याह द्विविधेति। सन्धाय सम्भाषा प्रतिपक्षेण सन्धिं कृत्वा विचारः। एषा तु शास्त्रतत्त्वनिर्णयायाश्रियते। विगृह्यसम्भाषा तु प्रतिपक्षेण विग्रहं कृत्वा तं निर्जेतुमिति ज्ञेयम्। सन्धायसम्भाषाविधिं विवक्षुः केन सह कर्तव्या सा इत्याह तत्र ज्ञानेति। ज्ञानविज्ञानौ तु "मोक्षेधीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः" इति लक्षणौ बुद्धिभेदौ। वचनप्रतिवचनशक्तिः वादप्रतिवादक्षमता ताभ्यां सम्पन्नेन युक्तेन। अनुपस्कृतविद्येन अविकृतविद्येन। अनुनेयेन अनुनयेन आत्मीकर्तुं शक्येन। अनुनयकोविदेन विनयदर्शनाय पण्डितेन। कथंकारं सम्भाषां कुर्याद् इत्याह तथाविधेनेति। संकथयन् संभाषां कुर्वन्। विश्रब्धः सरलतया सह। विश्रब्धाय विश्वस्ताय। विशदं व्यक्तमनूह्यमित्यर्थः। निग्रहभयात् पराजयभयमाकल्प्य। निगृह्य विजित्य। परेषु अन्येषु विकत्थेत श्लाघां कुर्वीत। मोहाद् अज्ञानात्। एकान्तग्राही सिद्धान्तं न्यक्कृत्य एकपक्षाश्रयी। अनुविदितं हीनज्ञातम्। अनुवर्णयेत् उपस्थापयेत् वितण्डामाश्रित्येति शेषः। न चानुलोमसम्भाषायामौद्धत्यमाश्रयेत् विनयेन च स्वपक्षं समर्थयेत् इत्याह सम्यगिति। नवा विनयेन असमीचीनं परपक्षं स्वीकुर्यात् परन्तु समीचीनस्वपक्षसमर्थने सावधानो भवेदित्याह अनुनयादिति। तत्र वादे ।१७।

‡ 'पण्डनेति' पाठोऽत्रादृतः।

सन्धायसम्भाषाविधिमभिधाय विगृह्यसम्भाषाविधिमभिधत्ते अत-ऊर्ध्वमिति। इतरेण ज्ञानविज्ञानादिशक्तिसम्पन्नत्वादिगुणविपरीतगुणयुक्तेन। यत्रैव विगृह्य वादं कुर्वत आत्मनो यशोऽर्थादिलाभरूपं मंगलं भवेत्तत्रैव विगृह्यवादं कुर्वीत नत्वन्यत्रेत्याह श्रेयसे इति। तथाचिकीर्षोः पूर्वकर्माह प्रागिति। जल्पाद् वादारम्भात् प्रागेव जल्पान्तरमत्र जल्पो वितण्डा वा आश्रयणीया इति। परावरान्तरं वादिविवादिनोर्भेदम्। परिषद्विशेषान् परिषदि यत्र सभायां वादोऽयं प्रवर्तिष्यते सा च कीदृशी इति। परीक्षायाः फल-माह सम्यगिति। हि यतः कार्यप्रवृत्तिनिवृत्तिकालौ तथा वादः कर्तव्यो नवेति सिद्धान्तं शंसति परीक्षाफले अनुकूले विगृह्यसम्भाषाप्रवृत्तिः प्रति-कूले च निवृत्तिरेव वरमिति बोधयतीत्यर्थः। तत्र परावरान्तरं केनोपायेन परीक्ष्यमित्याह परीक्ष्येति। जल्पकयोः वादिविवादिनोर्गुणान् धर्मान् श्रेयस्करान् मंगलजनकान् दोषवतश्च परीक्षेत। तत्र श्रेयस्करान् धर्मानाह तद्यथेति। श्रुतं गुरुमुखात् शब्दतोऽधिगतम्। विज्ञानमर्थतत्त्वं तदधिगमः। धारणमभ्यासात् कण्ठकरणम्। प्रतिभानं प्रत्युत्पन्नमतित्वम्। वचनशक्तिः वक्तृताशक्तिः। दोषानाह कोपनत्वमिति। कोपनत्वं क्षणक्रोधत्वम्। अवै-शारद्यमपाण्डित्यम्। अधारणत्वं विस्मृतिरित्यर्थः। अनवहितत्वमसाव-धानता। एतान् पूर्वोक्तान् धर्मान् गुणान् दोषांश्च। आत्मनः परस्य विवा-दिनश्च तुलयेत्। आत्मनि के के गुणाः के के वा दोषाः वर्तन्ते, एवं प्रति-वादिनि वा के के इति विचार्य गुणाधिक्येन आत्मनो गुरुत्वं, दोषाधिक्येन वा लघुत्वम्, एवं परस्य च तुलनां कुर्यात्॥ १८॥

एवंतुलनया प्रतिपक्षस्त्रिविधो भवति श्रेष्ठो हीनः समगुणो वेत्याह तत्रेति। परो विपक्षः। गुणविनिक्षेपत इति पृथक्पृथगांशिकगुणतुलनया न कात्स्न्र्येन, न सकलगुणतुलनया पक्षप्रतिपक्षयोर्ये ये गुणा दोषा वा वर्तन्ते, तेषु केषाञ्चिद् गुणानामाधिक्येन दोषाणामल्पतया वा विपक्षः प्रवरः स्यात्, तेषां समत्वाद्वा समः स्यात्, गुणानामल्पतया दोषाधिक्येन च प्रत्यवरः हीनः स्यादित्यर्थः। वितर्कसभाया अपि भेदान् वक्ति परिषदिति। परिषद् वितर्कसभा। ज्ञानवती शास्त्रज्ञानसम्पन्नैस्तद्विद्यैरन्विता। भेद-कान्तरेण भिद्यमाना सा पुनस्त्रिविधा भवतीत्याह सैवेति। सुहृत्परिषत आत्मनोऽनुकूलैः सदस्यैरन्विता। उदासीनपरिषत्तु स्वपक्षे विपक्षे च पक्ष-पातरहितैः सदस्यैरन्विता। प्रतिनिविष्टपरिषच्च प्रतिवादिनि निविष्टैः पक्ष-पातिभिः सभासद्भिर्युक्ता। अथ वादप्रकारानाह तत्रेति। तत्र तासु परिषत्सु मध्ये प्रतिनिविष्टायां विवादिपक्षपातिसदस्यबहुलायाम्। सा ज्ञानवती मूढा वा भवतु, केनचित् प्रवरावरसमेन वा विवादिना जल्पः विगृह्य-सम्भाषा न विधीयते युज्यते। पक्षान्तरे चेत् सा आत्मनोऽनुकूलैः सदस्यै-रन्विता, अथवा सा उदासीनाऽपि मूढा स्यात्, तर्हि आत्मनो ज्ञानादिशक्तेर-भावेऽपि प्रथितयशसा प्रधानविपक्षेणापि सह विगृह्यसम्भाषा कर्तव्येत्याह

मूढायामिति। दीप्तयशसा प्रथितकीर्तिना। महाजनविद्विष्टेन श्रेष्ठमानवेन विपक्षेण सह। ननु तादृशेन प्रतिवादिना सह विचारयतः ज्ञानादिविहीनस्यात्मनः पराजयोऽवश्यम्भावीति तत्र वितण्डाप्रकारं प्रदर्शयति तद्विधेनेति। तद्विधेन प्रवरेण सह कथयता विगृह्य सम्भाषयता वादिना। आविद्धेति आविद्धैः परस्परसंकीर्णैः अतएव दीर्घैः सूत्रैः शास्त्रवचनैः संकुलाः तैः वाक्यदण्डकैः दण्डवद्बहुग्रन्थियुतैः सुदीर्घैः वाक्यैः वाक्योपन्यासेन कथयितव्यं पूर्वपक्षः स्थापनीयः। ततस्तु त्रिरभिहितस्य पूर्वपक्षस्य अपरिज्ञानात् प्रतिवादिनो निग्रहस्थानं भविष्यतीत्याशयः। ततोऽपि चेत् पूर्वपक्षः सुगृहीतो भवेत् प्रतिवादिना, तर्हि किं कर्तव्यमित्याह अतिहृष्टमिति। अतिहृष्टं यथा स्यात् तथा परं विवादिनं मुहुर्मुहुरुपहसता आकारैरिंगितैरंगभंगादिभिः परिषदं निरूपयता प्रतिवादिनोऽयौक्तिकत्वं ज्ञापयता ब्रुवतः उत्तरं वक्तुमारभमाणस्य अस्य प्रतिपक्षस्य वचनावकाशः उत्तरयितुं समयो न देयः वादिनेति शेषः। पुनराह्वयमानः तथापि स्पर्धमानः प्रतिवादी कष्टशब्दमित्यादिवचनं प्रतिवक्तव्यः। कष्टशब्दं कृच्छ्रेणार्थबोधकं शब्दं यस्य उच्चारणमंकारेण चमत्क्रियन्ते परिषद्याः, न तु तत्रार्थानां गाम्भीर्यं वर्तत इत्याशयः। ब्रुवता त्वया प्रतिवादिना वक्तव्यं प्रतिपाद्यविषयो नोच्यते इति। अथवा ते प्रतिज्ञा साध्यार्थः हीना सव्यभिचारादिदोषदुष्टत्वेन निकृष्टा इति। पुनरपि एवं वक्तव्यः सः, परिसंवत्सर इत्यादि। परिसंवत्सरः संवत्सरं परिप्राप्तः गुरुमुपासितः उपासीनो भवान् नूनं निश्चितं शिक्षितामिति योजना। अथवा ते तव एतावत् पर्याप्तं, निरस्तो भव अलंवागाडम्बरेणेत्याशयः। विवादिनो यथार्थपक्षस्यापि निरासाय मूढान् परिषद्यान् येन केनापि छलादिना बोधयित्वा वक्ष्यमाणो वितर्कसमयः कर्तव्यः इत्याह सकृदिति। कथञ्चित् येन केनाऽप्युपायेन एवं न्यासयोगः‡ वादमर्यादा कर्तव्यः। कासौ मर्यादा सकृदिति एकवारमेव निहतं सम्भाषायां परिवर्जितं परिक्षेपिकम् अवाच्यवचनं न्यूनं कालातीतवचनं वा निहतं निग्रहस्थानमाहुः परिषद्या इति शेषः। एवमुक्तप्रकारेण श्रेयसा प्रशस्यतमेनापि विवादिना सह विगृह्य वितण्डामाश्रित्य वक्तव्यः सम्भाषा कर्तव्या इति एके केचित् पण्डिताः वदन्तीति शेषः। तन्मतं न्यक्कृत्य स्वमतमाह नत्वेवमिति। कुशलाः पण्डिताः, ज्यायसा प्रवरेण ॥ १९-२० ॥

प्रवरेण सह वादविधिं निरवशेषत निवेद्य प्रत्यवरसमाभ्यां सह वादनियमान् व्याचष्टे प्रत्यवरेणेति। विगृह्यजल्पता जल्पं वितण्डां वा आश्रित्य वितर्कं कुर्वता। सुहृत्परिषदि मूढायां ज्ञानवत्यां वा अथवा वक्ष्यमाणगुणायामुदासीनपरिषदि कथयितव्यं सम्भाषा कर्तव्या। किम्भूतायाम् अवधानेति। अवधाने मनोयोगे श्रवणे पूर्वोत्तरपक्षयोर्यथावत्श्रवणे ज्ञानविज्ञानयोः उपधारणे श्रुत्वा च सम्यगवबोधे च वनप्रतिवचनयोः प्रश्नोत्तर-

‡ 'न्यासयोगः' इति पाठोऽत्राहृतः।

कथनयो: शक्तिसम्पन्नायामित्यर्थ: । कथयता वितर्कमारभमाणेन अवहितेन प्रमादरहितेन सता परस्परसाद्गुण्यदोषबलम् आत्मन: परस्य च गुणदोषयो: बलमवेक्षितव्यम् कुत्र कुत्र वा आत्मन: परस्य वा दुर्बलता वर्तते इति विशेषतो निर्णेयमित्यर्थ: । तत: किं कुर्यादित्याह समवेक्ष्येति । समवेक्ष्य विचार्य यत्र यस्मिन् विषये एनं प्रतिपक्षं श्रेष्ठं मन्येत, तत्र तस्मिन् विषये आत्मन: अनाविष्कृतम् अनधिकृतम् जल्पम् अयोगं कुर्वन् अयुक्तियुक्तमिति ख्यापयन् न योजयेत् तदंशे वितर्कं नोत्थापयेत् । तु: पक्षान्तरे । यत्रैनमवरं हीनं मन्येत तत्रैव जल्पं योजयेदिति योजना । निगृह्णीयात् पराजयेत् । कस्मिन् कस्मिन् क: को निग्रहोपाय इत्याह तत्रेति श्रुतहीनम् अकण्ठस्थशास्त्रम् । महता दीर्घेण सूत्रपाठेन अभिभवेत् पराजयेत्, पूर्वपक्षे शास्त्रप्रमाणं दर्शयितुं सुदीर्घसूत्राणामुल्लेखात् त्रिरुच्चारितस्य पूर्वपक्षस्याधारणात् विवादी निग्रहं लप्स्यत इत्याशय: । विज्ञानहीनं शास्त्रार्थज्ञानहीनं कष्टशब्देन दुरूहार्थशब्दयुक्तेन वाक्येन । सर्वत्रैव अभिभवेदिति योजना । वाक्यधारणाहीनम् आविद्धदीर्घसूत्रसंकुलै: परस्परसंकीर्णसुदीर्घशास्त्रवचनसमन्वितै: वाक्यदण्डकै: । प्रतिभाहीनं "प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता" इत्युक्तलक्षणा प्रतिभा तया हीनम् । अनेकार्थवाचिना एकविधेन वचनेन । वचनशक्तिहीनं हृद्गतं वाचा प्रकाशयितुमसमर्थम् अर्थोक्तस्य तस्य वाक्यस्य आक्षेपेण वक्तुं प्रवृत्ते प्रतिवादिनि अन्तरान्तरा 'पर्याप्तमेतावत्ते' इत्याद्युक्त्वा बाधाप्रदानेन । अविशारदं भाषाज्ञानहीनम् अपत्रपणेन तस्य च्युतसंस्कृत्यादिदोषमुद्घाट्य लज्जितीकरणेन । कोपनमायासेनेति "आयस्तो क्षुपित: क्षिप्त:" इति कोषप्रामाण्यात् कोपं विवर्ध्य इत्यर्थ: । अनवहितम् असावधानं नियमेन त्रिरभिहितस्य वाक्यस्यापरिज्ञानेन निग्रहो भविष्यतीत्यादिवादसमयं कृत्वेत्यर्थ: ॥ २१ ॥

श्लोकद्वयेन विगृह्यसम्भाषां निन्दति तत्र श्लोकाविति । युक्त्या युक्तिमाश्रित्य युक्तं युक्तियुक्तं प्रतिपक्षस्योत्तरम् । न निवारयेत न वितण्डामाश्रित्य बाधां सृजेत् । हि यत: विगृह्य भाषा वितण्डा केषाञ्चिद् वादिविवादिनां मध्ये तीव्रं द्रोहं कलहमावहेत् जनयेत् । सतां समितौ पण्डितानां परिषदि ॥ २२-२३ ॥

पुनश्च प्रतिपक्षजयाय उपायमाचष्टे एवंप्रवृत्ते इति । एवंप्रवृत्ते वादे सुहृत्परिषदीत्यर्थ: । कार्यात ‡ वादारम्भात् प्रागेव । परिषदा परिषत्सदस्यै: सह सन्धाय आत्मन: अयनभूतं सम्यगायत्तं प्रकरणमादेशयितव्यं यत्र वादिन: सम्यग् ज्ञानं वर्तते तद्विषयकमेव पूर्वपक्षादिकं भवत्विति परिषदा सन्धिं कृत्वा मध्यस्थेन कथयितव्यमित्यर्थ: । पक्षान्तरमाह यद्वेति । परस्य प्रतिपक्षस्य भृशदुर्गम् अत्यर्थदुर्गमं प्रकरणं स्यात्, अथवा यत् परस्य पक्षं भृशमत्यर्थं विमुखमानयेत् अफलं कुर्यात् तद्वा आदेशयितव्यमिति योजना।

‡ 'कार्यात' इति पाठोऽत्रादृत: ।

ततः किं कुर्यादित्याह परिषदीति । उपसंहितायां पण्डितैः सभासद्भिरेकत्र मिलितायां परिषदि अस्माभिः वादिविवादिभ्यां वक्तुं वादं वादमर्यादाञ्च निर्णेतुमशक्यम् । एषैव परिषत् ते तव यथेष्टं रुच्यनुसारं यथाभिप्रायं अभिप्रायानुरूपं यथायोगं योग्यं वादं वादमर्यादाञ्च स्थापयिष्यति निर्णेष्यति इति उक्त्वा तूष्णीमासीत नीरवं स्यादित्यर्थः ॥ २४-२५ ॥

ननु कथम वादमर्यादा इत्याह तत्रेदमिति । इदं वाच्यं वक्तुं योग्यम् अवाच्यम् आयुर्वेदवितर्के दर्शनमतोपन्यासवद् वक्तुमयोग्यम् । एवं सति पराजितो भवति अत्रैव निग्रहस्थानमिति निर्णयो हि वादमर्याद इत्यर्थः । कर्तव्यायां सम्भाषायां भिषग्भिः स्वतन्त्रे वादमार्गज्ञानार्थं वितर्क-कौशलज्ञानाय केचिद् विषया ज्ञातव्या भवन्ति, तान् विषयान् व्याचिख्यासु-रुद्दिशति इमानीति । इमानि वक्ष्यमाणानि वादादीनि । एते खलु चतु-श्चत्वारिंशत् पदार्थाः क्रमशो लक्षणतः उदाहरणतश्च निवेदयन् आदौ वाद-लक्षणादिकमाह तत्रेति । परः कश्चित् शास्त्रज्ञः परेण तादृशेनापरेण शास्त्रज्ञेन सह विगृह्य विजिगीषां पुरस्कृत्य शास्त्रपूर्वकं शास्त्रानुसारं कथयति पक्ष-माश्रित्य वितर्कं करोति । यदुक्तं न्यायदर्शने "प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः" इति । तस्य भेदावाह स इति । संग्रहेण संक्षेपेण । जल्पलक्षणमाह पक्षेति । पक्षाश्रितयोः स्थापनाप्रतिष्ठापनाभ्यां स्वस्वपक्षसमर्थकयोः पक्षप्रतिपक्षयोर्वचनं तर्क इत्यर्थः । तस्यैवोदाहरणमाह यथेति । पुनर्भवः पुनर्जन्म । हेतुभिः हेतुदृष्टा-न्तोपनयनिगमनैः स्वपक्षस्थापनपुरःसरमेव परपक्षोद्भावनं परपक्षे दोषारोपणं जल्पः । वितण्डा तु स्वपक्षमनुत्थाप्य परपक्षदूषणमात्रम् ॥ २६-२८ ॥

क्रमागतानि द्रव्यादीनि व्याचिख्यासुस्तेषां तेषां पूर्वव्याख्यातत्वं स्मारयति द्रव्येति । श्लोकस्थाने सूत्रस्थाने प्रथमेऽध्याये इति शेषः । प्रतिज्ञां व्याचष्टे अथेति । साध्यवचनं पक्षे साध्यस्य निर्देशः यदुक्तं गौतमीये "साध्यनिर्देशः प्रतिज्ञा" इति । उदाहरणेन विस्पष्टयति यथेति । अत्र पुरुषे पक्षे नित्यत्वं साध्यम् । एवं पर्वतः वह्निमान् इति प्रतिज्ञायां पर्वते पक्षे वह्नेः साध्यस्य निर्देशः । स्थापनां व्याकरोति अथ स्थापनेति । दुष्टानुभूतैर्हेतुभि-रनुमानप्रमाणेन तस्यार्थस्य पक्षे समन्वयः इत्यर्थः । हेत्वादयः स्फुटीभवि-ष्यत्यग्रे । पक्षे सत्तानुमानमेव स्थापना । अतः साध्यनिर्देशात् परस्तात् तस्य स्थापना भवेदित्याह पूर्वमिति । दृष्टान्तेन विशदयति यथेति । अकृत-कत्वात् उत्पत्तेरभावात् । जल्पे विरुद्धपक्षावतारणा कर्तव्येति तद्विरुद्धार्थ-स्थापनाद्वारेण प्रतिष्ठापनामाह अथेति । ऐन्द्रियकत्वात् इन्द्रियग्राह्यत्वात् । कृत्स्नो हीन्द्रियग्राह्यः पदार्थोऽनित्यः इति तात्पर्यम् ॥ २९-३२ ॥

हेतुं व्याचष्टे अथ हेतुरिति । उपलब्धिकारणं पक्षे साध्यस्य ज्ञान-कारणम् । तच्च ज्ञानकारणं प्रत्यक्षादिभेदाच्चतुर्विधमित्याह तदिति । ऐतिह्यं शाब्दं प्रमाणम् । यद्यप्यत्र औपम्यस्य पृथक् प्रामाण्यं न स्वीक्रियते तथापि

सांख्यादिमतानुमतत्वादुल्लिखितम् । यत् कारणमेभिर्हेतुभिः प्रमाणैर्ज्ञान-कारणैरुपलभ्यते तत् तत्त्वम् सम्यक्प्रमाणैरुपलब्धत्वात् संशयादिविरहित-मित्यर्थः । तथा च गौतमीये "उदाहरणसाधर्म्याद् वैधर्म्याद्वा साध्यसाधनं हेतुः" इति । साध्यसिद्धानुकूलज्ञापकत्वबोधकः इत्यर्थः । दृष्टान्तं व्या-करोति अथ दृष्टान्त इति । अत्र मूर्खः अनवाप्तशास्त्रपरिशीलनजन्यबुद्धि-प्रकर्षः, विद्वांश्च शास्त्रचर्चाबुद्ध्यतिशयः । तयोर्बुद्धिसाम्यं यमर्थं मूर्खा-अपि बुध्यन्ति तथा विद्वांसोऽपि, सोऽर्थो दृष्टान्तः, तेन मूर्खावगतेन आदि-त्यस्य प्रकाशकत्वादिधर्मेण वर्ण्यं सांख्यज्ञानस्य प्रकाशकत्वम् । उदाहरणेन विशदयति यथेति । अग्न्यादेरुष्णत्वादिकेषु मूर्खपण्डितयोर्बुद्धिसाम्यं मस्त्येवेति तस्य दृष्टान्तत्वमव्याहतं भवति । तथा च अक्षपाददर्शने "लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः" इति । उपनय-निगमनयोरुदाहरणं स्थापनाप्रतिष्ठापनाव्याख्यानावसरे कृतमित्यतिदिशति उपनय इति । तयोर्लक्षणन्तु नेहोक्तमिति न्यायदर्शनादुल्लिख्यते यथा— "उदाहरणापेक्षः तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः" इत्युपनय-लक्षणम् । "हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम्" इति निगम-नस्य ॥ ३३-३५ ॥

उत्तरं व्याचष्टे अथ उत्तरमिति । साधर्म्योपदिष्टे हेतौ हेतुसमान-धर्मे साध्ये प्रतिपाद्ये वैधर्म्यवचनं हेतुविपरीतधर्मापादनम् । एवं वैधर्म्योप-देशेऽपि बोद्धव्यम् । उदाहरणमाह यथेति । कोथः पूतिभावः । सविपर्ययं विपरीतम् । सिद्धान्तं व्याकरोति अथ सिद्धान्त इति । यो निर्णयः हेतुभिः प्रमाणैर्बहुविधं परीक्ष्य प्रमाणानुगत इति समीक्ष्य निश्चितत्वेन स्थाप्यते स्वीक्रियते असौ निर्णयः सिद्धान्त इत्यर्थः । तस्य भेदानाह सर्वेति । तानु-दाहरणैर्विस्पष्टयति तत्रेति । तत्र तेषु मध्ये सर्वस्मिन् तन्त्रे शल्यकायादि-प्रधाने धन्वन्तरिभेलाग्निवेशकाश्यपादितन्त्रे प्रसिद्धं यं सिद्धान्तं सर्वे स्वी-कुर्वन्ति तमित्यर्थः । सन्ति निदानानीत्यादीनि उदाहरणानि । अक्षपादास्तु सर्वतन्त्राविरुद्धं तन्त्रेऽधिकृतमर्थं सर्वतन्त्रसिद्धान्तमाहुः । प्रतितन्त्रसिद्धान्त-स्तु सः, यं न सर्वे स्वीकुर्वन्ति परन्तु तस्मिन् तन्त्रे तत्प्रयोजनसंसिद्ध्यर्थ स्वीकृतम् यथा-'अस्मिन् तन्त्रे पञ्चमहाभूतशरीरिसमवायः पुरुषः इत्युच्यते' इति । तथा च न्यायदर्शने 'समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः' इति । अधिकरणसिद्धान्तमाह अधिकरणेति । यस्मिन् अधिकरणे विषये प्रस्तूयमाने व्याचिख्यास्यमाने अन्ये अन्ये विषयाः स्वयमेव सिध्यन्ति, ते तेऽर्थाः अधिकरणसिद्धान्तः । यथा आयुर्वेदे प्रस्तूयमाने विकारदोष-निदानादीनि स्वयमेव सिध्यन्ति । तथा च "यत्सिद्धावन्यप्रकरणसिद्धिः सो-ऽधिकरणसिद्धान्तः" इति नैयायिकाः । अभ्युपगमसिद्धान्तं व्याकरोति अभ्युपगमेति । असिद्धं प्रमाणैरिति शेषः । अपरीक्षितं परीक्षकैरिति शेषः । अनुपदिष्टमस्मिन् तन्त्रे इति शेषः । अहेतुकं हेतुभिर्न सिद्धम् । यमर्थं वाद-

क ले वादिप्रतिवादिनौ स्वीकुरुतः सोऽभ्युपगमसिद्धान्तः । उदाहरणमाह तदिति । "अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः" इति गौतमीये ॥ ३५-३६ ॥

शब्दलक्षणमाह अथ शब्द इति । वर्णसमाम्नायः क्रमानुमता वर्णसमष्टिः अर्थयुक्त इति शेषः । निरर्थकस्य शब्दत्वाभावात् । दृष्टार्थो नाम प्रत्यक्षतोऽनुभूय यं शब्दं वक्ति सः । अदृष्टार्थस्तु अनुमानेन आप्तोपदेशेन वा अनुभूतः । सत्यो नाम अर्थानुरूप एव प्रमाणादिभिरुपलभ्यते, अनृतस्तु अर्थाननुरूपः यथ शुक्तौ इदं रजतमिति । तेषामुदाहरणान्याह तत्र दृष्टार्थ-इति । प्रत्यक्षलक्षणमाह अथ प्रत्यक्षमिति । आत्मेन्द्रियमनःसन्निकर्षजं ज्ञानं प्रत्यक्षमाहुरायुर्वैदिकाः । यदुक्तम्—

"आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात् प्रवर्तते ।
व्यक्ता तदात्वे या बुद्धिः प्रत्यक्षं सा निरुच्यते ॥" इति ॥३७॥

अनुमानमाह अथानुमानमिति । युक्त्यपेक्षः व्याप्त्यनुगतः तर्कः तच्च हेतुसाध्यसामान्याधिकरण्यात् अप्रत्यक्षस्य साध्यस्य ज्ञानम् । तस्योदाहरणान्याह यथोक्तमिति । ऐतिह्यं लक्षयति अथैतिह्यमिति । आप्तोपदेशः आप्तवचनम् । वेदादिरित्यादिपदेन वेदानुगतस्मृतितन्त्रादयो गृह्यन्ते । औपम्यं व्याकरोति अथौपम्यमिति । सादृश्यं नाम तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् अत्र भूयस्त्वमविवक्षितं तेन एकेनापि धर्मेण सादृश्यं भवितुमर्हति ॥ ३८-४२ ॥

संशयमाह अथ संशय इति । सन्देहलक्षणैः अनु पश्चात सन्दिग्धेषु शुक्तिर्वा रजतं वा, स्थाणुर्वा पुरुषो वेति चैवम्भूतेषु अर्थेषु अनिर्णीतेषु विषयेषु अनिश्चयः एवमेवेति निर्णयाभावः । उदाहरणेन विशदयति यथेति अयमर्थः—इहैवाध्याये वक्ष्यमाणैः श्रेष्ठसारसंहनादिलक्षणैरुपेता केचित् यथावच्चिकित्सिता अपि त्वरितं म्रियन्ते, केचिद्वा दीर्घजीविनो भवन्ति, तथा च केचित् तथालक्षणवर्जिताः अचिकित्सिता अपि त्वरितं म्रियन्ते, केचिच्च चिरायुषो भवन्तीति दृष्ट्वा संशयो भवति अकालमृत्युरस्ति नवेति । शीघ्रभंगाः स्वल्पायुषः इत्याशयः ॥ ४३ ॥

प्रयोजनमाह अथ प्रयोजनमिति । यदर्थं यत्प्रयोजनकम् । आरम्भाः क्रियाः । उदाहरणे आत्मनोऽकालमृत्युरोध एव प्रयोजनम् । प्रसहेत मारयेत् । सव्यभिचारमाह अथेति । सव्यभिचारो नाम यद् व्यभिचरणमिति अनैकान्तिकहेतुत्वं हेतुसाध्ययोरसामान्याधिकरण्यमित्यर्थः । जिज्ञासां निर्वक्ति अथेति । परीक्षा प्रत्यक्षादिभिः प्रमाणैर्यथार्थता परीक्षणम् । उत्तरकालमिहैव अध्याये । व्यवसायमाह अथेति । निश्चयः निश्चयात्मिका बुद्धिः । प्रत्यक्षादिभिः परीक्षाविशेषैः सम्यक्परीक्ष्य यद् अध्यवस्यति तदित्यर्थः । अर्थप्राप्तिं व्याकरोति अथेति । यथैव पीनो देवदत्तः दिवा न भुङ्क्ते इत्युक्ते तस्य रात्रौ भोजनमर्थापत्त्या आयाति इत्याह यत्रेति ॥ ४३-४८ ॥

सम्भवम ह अथेति। सम्भवो नाम कारणम् यतः पदार्थाद् यः सम्भवति स तस्य सम्भवो भवति। षड् धातवः पञ्च महाभूताः शरीरी चेति। अनुयोज्यं विवृणोति अथेति। वाक्यदोषयुक्तमिति। वाक्यदोषस्तु वक्ष्यमाणो न्यूनादिरूपः। दुष्टे हि वाक्ये अनुयोगः सम्भवति। विशिष्टे चिकित्साविधाने वक्तव्ये यत्र सामान्येनोक्तिः स्यात्, तत्रैव परस्यानुयोगो भवति किम्भूतोऽयमिति। अ दृष्टान्तमाह यथेति। दृष्टान्तेऽस्मिन् वक्तव्ये वैशिष्ट्ये सामान्येनोक्तत्वात् न्यूनतैव वाक्यदोष आपद्यते इत्याशयः। अननुयोज्यमाह अथेति। यस्मिन् वाक्ये परस्य प्रश्नावकाशो न स्यात् तदेव अननुयोज्यमित्यर्थः। अनुयोगमाह अथेति। अनुयोगो नाम परस्य प्रश्नः प्रश्नैकदेशो वा। तद्विद्यानां तत्तच्छास्त्रनिष्णातानां तद्विद्यैः तच्छास्त्रज्ञैः सह तदेवाधिकृत्य प्रतिपक्षस्य ज्ञानादिपरीक्षार्थं प्रयुज्यते इत्यर्थः। उक्तायां प्रतिज्ञायां परस्य तत्साधनोपायजिज्ञासापि अनुयोगो भवतीत्याह अथवेति। प्रत्यनुयोगमाह अथेति। प्रत्यनुयोगो नाम विवादिनामनुयोगे वादिनां साधनोपायजिज्ञासा भवतीति दृष्टान्तमाह यथेति॥ ४६–५३॥

वाक्यदोषं व्याकरोति अथेति। अस्मिन् अर्थे अत्र प्रकरणे। हेत्वाभासादीनामपि वाक्यदोषत्वात् तेषां पृथगुल्लेखाद् अत्र न्यूनतादिकमेव वक्तव्यमित्यर्थः। तानि न्यूनाधिकादीनि विना प्रकृतः प्रक्रान्तः अर्थः विषयो न प्रणश्येत् ‡ अतः एतेषां वाक्यदोष इति संज्ञा। तान् भेदान् क्रमशो व्याचिख्यासुरादौ न्यूनं व्याकरोति तत्र न्यूनमिति। प्रतिज्ञादिकं प्रागेव व्याख्यातम्। तेषामन्यतमहीनं वाक्यं दोषवद्भवतीत्यर्थः। बहुभिर्हेतुभिर्या प्रतिज्ञा साध्या सा चेदेकेन हेतुना साध्येत तर्हि तद्वाक्यमपि न्यूनं भवतीत्याह यद्वेति। अधिकं विवृणोति अथाधिकमिति। न्यूनविपरीतमधिकमिति एकहेतुकप्रतिज्ञासाधने बहूनां हेतुनामुपन्यासः। पक्षान्तरमुपन्यस्यति यद्वेति। बार्हस्पत्यं नीतिशास्त्रम्। औशनसं शुक्रकथिता राजनीतिः। एतच्छास्त्रमन्यदपि वा सद्वृत्ताख्यानादिप्रसंगादुच्यमानमपि नाधिकं भवतीत्याह अप्रतिसम्बद्धार्थमिति अनौपयौगिकमित्यथः। तेन शारीरव्याख्यानप्रसंगे सांख्यादिशास्त्रोपदेशः उपयोगित्वान्न अधिको भवतीत्यर्थः। पुनः पक्षान्तरमाह यद्वेति। सम्बद्धार्थं सम्यग्युक्तमपि द्विः वारद्वयश्चेदभिधीयते। तर्हि तत् पुनरुक्तत्वादधिकं भवति। तच्च पुनरुक्तं द्वेधा भिद्यते, शब्दतः पुनरुक्तमर्थतश्चेति। तद्द्वयमुदाहरणेन विशदयति तच्चेति। अनर्थकं व्याकरोति अथानर्थकमिति। अक्षरग्राममात्रं कचटतादिवन् निरर्थकाक्षरसमष्टिमात्रम्। पञ्चवर्गः कवर्गादिः। अपार्थकं व्याचष्टे अथेति। यत् पदग्राममर्थवत् पृथक् पृथगर्थविशिष्टमपि योग्यताकांक्षासत्तिरहितं तदेवापार्थकम्। यत्र साकल्येनार्थबोधो न जायत इत्यर्थः। विरुद्धमाह

‡ 'न तानि विनाप्रकृतोऽर्थः प्रणश्येत' इति पाठः भेदकथनानन्तरमेव वक्तुं युज्यत इति तथैवादृतः, नतु न्यूनव्याख्यानादनन्तरम्।

अथेति। तद्धि त्रेधा भिद्यते यथा दृष्टान्तविरुद्धं सिद्धान्तविरुद्धं समय-विरुद्धञ्चेति। समयस्तु नियमः स्वतन्त्रसिद्धान्त इति निष्कर्षः। तत्र दृष्टान्त-विरुद्धं यथा अग्नौ शैत्यमादित्येऽप्रकाशत्वमित्यादिकम्। सिद्धान्तविरुद्धं यथा गुणपदार्थे गुणक्रियावत्त्वेत्यादि। समयस्त्वत्र त्रिविधो भवति आयु-र्वैदिकसमयः यञ्च चिकित्सार्थं सर्वतन्त्रविरुद्धमपि स्वतन्त्रसिद्धान्तं स्वी-करोति यथा इहैव "खादयश्चेतनाषष्ठधातवः पुरुषः स्मृतः" इति। तस्य विरुद्धं निराकारस्य निर्गुणस्य निर्विकल्पस्य पुरुषस्य स्वीकारः आयुर्वेद-समयविरुद्धम्। याज्ञिकसमयस्तु आलभ्याः हन्तव्याः इत्यर्थः। यजमानैर्यज्ञ-कर्तृभिः पशवश्छागादयः। मोक्षशास्त्रिकसमयस्तु सर्वभूतेषु सर्वप्राणिषु अहिंसा हत्याऽभावः। अतएव तत्तच्छास्त्रे स्वसमयविरुद्धं वाक्यं विरुद्धं भवतीत्यर्थः। एतद्विपरीतां वाक्यप्रशंसामाह अथेति। अस्मिन्नर्थे प्रकरणे। अधिगतमर्थं वक्तुं प्रक्रमते तदर्थबोधकमित्यर्थः॥ ५४-५५॥

छलं विवृणोति अथेति। परिशठं शठतामूलकं मोहयितुकामेन प्रत्यु-क्तम्। अर्थाभासं वक्तुरभीप्सितार्थं विहाय अन्यार्थे प्रयुक्तम्। निरर्थकं निष्प्रयोजनम्। वाग्वस्तुमात्रं वाक्यजालविस्तारमात्रम्। 'वचनविघातोऽर्थ-विकल्पोपपत्त्या छलम्' इति गौतमीयाः। वाक्छलं वक्तुरभिप्रायं न्यक्-कृत्यार्थान्तरकल्पनेत्यर्थः। यदुक्तं न्यायदर्शने "अविशेषाभिहितेऽर्थे वक्तु-रभिप्रायादर्थान्तरकल्पना वाक्छलम्" इति। तत्रोदाहरणमाह तत्रेति। सामान्यच्छलं नाम "सम्भवतोऽर्थस्यातिसामान्ययोगाद् असम्भूतार्थकल्पना सामान्यच्छलम्" इति अक्षपादोक्तलक्षणम्। सामान्ययोगादसम्भवद् अर्थ-कल्पनया दूषणमित्यर्थः। तस्य दृष्टान्तमाह यथेति॥ ५६॥

अहेतुं व्याचष्टे अथेति। प्रकरणसमः प्रकरणस्य पक्षस्य समः य-एव पक्षः स एव चेद् हेतुः स्यात्। संशयसमः य एव हेतुः स एव चेत् साध्यो भवेत्। साध्ये पदार्थे हेतोरसिद्धत्वात् संशय एव वर्तते अतः सोऽ-हेतुः। वर्ण्यसमो नाम सः, यो हेतुः प्रमाणैर्न सिद्धः, हेतुसाध्ययोः हेतु-दृष्टान्तयोश्च सम्बन्धश्चेद् वर्णनीयः स्यात्। तेषामुदाहरणान्याह यथेति। अतीतकालं वर्णयति अथेति। अयमर्थः—प्रवृत्ते वादे यस्तर्कः पूर्वमेवो-त्थापयितुं योग्य आसीत्, स चेत् परस्तादुत्थाप्यते तर्हि अतीतकालत्वात् सोऽग्राह्यो भवेदिति। पुनश्च परपक्षस्य वाक्यदोषादीन् न लक्ष्यीकृत्य निग्रह-स्थानमधिगत्यापि तमनिगृह्य तत्रान्यं तर्कमुत्थापयन् पश्चात् तस्य पूर्वोत्था-पितं निग्रहस्थानमुल्लिख्य न तं निग्रहीतुमर्हदतीतकालत्वादिति। असमर्थ-समाह्वयम्॥ ५७-५८॥

उपालम्भमाह अथेति। हेतोर्दोषवचनमिति भवदुत्थापितो हेतुरेषः अहेतुर्हेत्वाभासो वेत्युक्तिः इत्यर्थः। परिहारमाह अथेति। नित्यमिति यत्र यत्र शरीरे जीवलिंगं तत्र तत्र आत्मसत्तोपलब्धिरिति नियमेनेत्यर्थः। प्रतिज्ञाहानिं व्याचष्टे अथेति। पर्यनुयुक्तः स्थानावसरे उत्तरवादिना वाक्य-

दोषादिभिरधिक्षिप्त: परित्यजति पूर्वोक्तां प्रतिज्ञां परित्यज्य काञ्चिन् नवीनां प्रतिज्ञामाश्रयते इत्यर्थ: । अभ्यनुज्ञां व्याकरोति अथेति । इष्टानिष्टाभ्युपगम: इति स्वपक्षदोषान् अनिराकृत्य परपक्षदोषोद्भावनम् । एतेन स्वपक्षदोषस्वीकृतिरेव स्यादिति तस्याभ्यनुज्ञा संज्ञा भवति । हेत्वन्तरमाह अथेति । प्रकृतहेतौ ‡ वातवृद्धिं प्रति रूक्षत्वादिके • तौ वाच्ये विकृतिहेतुं प्रत्यनीकहेतुं स्निग्धत्वाहिहेतुकथनम् । अर्थान्तरमाह अथेति । वक्तव्ये निदानग्रन्थे चिकित्साकथनमिति ॥ ५९-६४ ॥

अन्तिमं निग्रहस्थानं व्याकरोति अथेति । विज्ञानवत्यां परिषदि विदुषां सभायाम् । अयमर्थ:—तत्सभायां पूर्वपक्षादिके वारत्रयमुपस्थापितेऽपि अपरपक्षश्चेद् बोद्धं न शक्नुयात्, तदा तस्य निग्रहस्थानत्वेन पराजय: स्यादिति । पक्षान्तरमाह यद्वेति । अननुयोज्यस्य वाक्यदोषादिरहितस्यापि पक्षस्य अनुयोग: प्रश्नेन आक्षेप: । अनुयोज्यस्य वाक्यदोषादियुक्तस्यापि पक्षस्य अननुयोग: प्रश्नादिराहित्यम् । एतदन्तरेणापि प्रतिज्ञाहान्यादिकमपि निग्रहस्थानं मन्यन्ते कुशला: इत्याह प्रतिज्ञाहानिरिति । कालातीतवचनमतीतकालम् । व्यर्थमपार्थकम् । उपसंहरति इति वादेति । यथोद्देशं यथाक्रमम् ॥ ६५-६६ ॥

वादमर्यादापदानि साकल्येन यथाक्रमं व्याख्याय भिषजां वादविषयमाह वादस्त्विति । तु: अवधारणे । खलु निश्चितम् । भिषजां वर्तमान: भिषग्भि: प्रवर्तमान: । नान्यत्र न धर्मशास्त्रादौ । विस्तरतो वादप्रणालीं निर्दिश्य उपसंहरन् संक्षेपतो वादमर्यादां निर्दिशति तत्रेति । तत्र वादे । हीत्यवधारणे । सर्वाधिकरणेषु आयुस्तन्त्राणां विषयादिपञ्चांगात्मकेषु । यदुक्तं—

"विषयोऽविषयश्चैव पूर्वपक्षस्तथोत्तरम् ।
निर्णयश्चेति पञ्चांगं शास्त्रेऽधिकरणं स्मृतम् ॥" इति ।

तत्र विषयो विचारार्हवाक्यम् । अविषय: अस्यायमर्थो नवेति संशय: । पूर्वपक्षस्तु प्रकृतार्थविरोधितर्कोपन्यास: । उत्तरं सिद्धान्तानुकूलतर्कोपन्यास: । निर्णयस्तु सिद्धान्तसिद्धविचार्यवाक्यतात्पर्यावधारणम् । एवंक्रमेण विवेचनमत्राधिक्रियत इत्यधिकरणम् । तेषु पञ्चांगेषु मध्ये या: केवला: कृत्स्ना: निर्णीता: उपपत्तय: सिद्धान्ता: सन्तीति शेष: । किम्भूतास्ता: वाक्यप्रतिवाक्यविस्तारा: वाक्यानां पूर्वपक्षानां प्रतिवाक्यानामुत्तरपक्षाणां विस्तारो यासु ता: सर्वा: सम्यगवेद्य अवेद्य विशेषतो लक्ष्यीकृत्य सर्वं वाक्यं ब्रूयात् । न च किञ्चिद् वाक्यं सिद्धान्तविरोधि स्यादित्यर्थ: । यथेदं सिद्धांतविरोधि न स्यात्, तथा पुनरपि विशेषणैर्द्रढयति नाप्रकृतेति । अप्रकृतिकमहेतुकम् । अशास्त्रं शास्त्रविरोधि अपरीक्षितं विविधै: प्रमाणैरप्रमाणितम् । असाधकं यथार्थनिर्णये अप्रयोजकम् । आकुलं विपरीतार्थकम् । अव्यापकं व्याप्तिरहितम् । न ब्रूयादिति योजना । पुनरपि विशेषयति सर्वमिति । हेतु-

‡ 'प्रकृतहेतौ' इति पाठोऽत्रादृत: ।

मत् कारणानुयायि सर्वं वाक्यमिति शेषः। कथमित्याह हेतुमन्त इति। हि यतः वादनिग्रहाः वादांगाः प्रतिज्ञादिनिगमनान्ताः। हेतुमन्तः सहेतुकाः। अकलुषाः दोषरहिताः। चिकित्सिते कारणभूताः भवन्तीति शेषः। कथं प्रशस्तबुद्धिवर्धकत्वात् हेतुमता तर्केण निर्मलबुद्धिर्वर्धत एवेत्यर्थः। तत्रापि हेतुमाह सर्वेति। हि यतः अनुपहता निर्मला बुद्धिः सर्वारम्भसिद्धिं सर्वप्रकारचिकित्सायां सिद्धिमावहति प्रददाति। तदेव आयुर्वेदस्य प्रयोजनमित्यर्थः॥ ६७॥

ननु केवलेन वादमर्यादाज्ञानेनैव न भवति सर्वारम्भसिद्धिः अपितु अपराण्यपि ज्ञातव्यानि सन्ति भिषग्भिरित्याह इमानीति। ज्ञानपूर्वकं सर्वप्रकारं ज्ञानं लब्ध्वा। कानि तानि प्रकरणानि इत्याह ज्ञात्वा इति। कर्ता चिकित्सकः अनतिमहता प्रयत्नेन स्वल्पायासेन एतानि कारणादीन्युपायान्तानि ज्ञात्वा कार्याभिनिर्वृत्तौ चिकित्सायामभिनिर्वर्त्यमानायां सम्यक्कार्यं कुर्वन् इष्टफलानुबन्धम् आरोग्यप्रदं कार्यमभिनिर्वर्तयति सम्पादयति ६८

परीक्ष्यविशेषान् कारणादीन् व्याकरोति तत्रेति। य इति विधेयप्राधान्यात् पुँल्लिंगम्। तत्र तेषु मध्ये कार्याभिनिर्वृत्तौ कार्यसम्पादनाय प्रयतमानस्य सचेष्टस्य कर्तुर्यद् द्रव्यमुपकरणाय साधनभूताय उपकल्पते यथावद् आहृतं प्रयुक्तञ्च भवति तत् कारणम्। कार्ययोनिमाह कार्येति। कार्यस्य योनिः समवायिकारणं यस्या विकृत्या कार्योत्पत्तिर्भवेदित्यर्थः। कार्यमाह कार्यमिति। अभिनिर्वृत्तिं सम्पादनम् अभिसन्धाय उद्दिश्य। कार्यफलमाह कार्येति। यत्प्रयोजना यदर्था। इष्यते कर्तुमारभते। अनुबन्धमाह अनुबन्ध इति। कार्यात् कार्यसम्पादनाद् उत्तरकालं परस्तात् कार्यनिमित्तः तत्कार्यजन्यः यः शुभः मंगलावहः अशुभोऽमंगल्यो वा भावः कर्तारमवश्यमनुबध्नाति स भावोऽनुबन्धः। देशमाह देश इति। अधिष्ठानं कार्यस्याधिकरणम्। कालमाह काल इति। परिणामः ऋत्वादयः पुनरित्यखण्डं कालं व्यावर्तयति। प्रवृत्तिमाह प्रवृत्तिरिति। कर्तुश्चेष्टा कार्यार्था कार्यसम्पादनाय तस्या एव पर्यायानाह सैवेति। उपायमाह उपाय इति। उपायः कार्यकार्यफलानुबन्धवर्ज्यानां त्रयाणां कारणादीनां कारणकरणकार्ययोनीनां सौष्ठवं गुणवत्त्वं सम्यगभिसन्धानं † स्थितिश्चेति। हि यतः तत्कारणादीनां सौष्ठवमभिसन्धानञ्च कार्याणामभिनिर्वर्तकं ‡ सम्पादकम् इत्यतः स उपायः। ननु कार्यादीनामपि सौष्ठवमुपायत्वेन केनचित् परिगण्यते नेत्याह कृते इति। कृते कार्योत्पत्त्यनन्तरं उपायार्थः उपायस्य प्रयोजनं नास्ति, तदात्वे तदानीं कार्योत्पत्त्यनन्तरमित्यर्थः। न विद्यते उपाय इति शेषः। कृतात् कार्योत्पत्तेरुत्तरकालं तस्य फलं स्यात् फलादनन्तरमनुबन्धो भवतीति शेषः। अग्रे कार्यकरणात् प्रागेव एतद्दशविधं परीक्ष्यं कारणादिकं परीक्ष्यं भवति।

† 'आभसन्धानम्' इति पाठः।

‡ 'तद्धि कार्याणामभिनिर्वर्तकमित्यस्तूपायः' इति पाठोऽत्राहृतः।

ततोऽनन्तरं परीक्षाया उत्तरकालम् । निगमयति तस्मादिति । केवलं कृत्स्नम् ॥ ६८-७९ ॥

दशविधानि परीक्ष्याणि समासत उद्दिश्य पुनस्तानि व्यासत उपदिदिक्षु: पञ्चकर्माणि कर्तुकामेन कथंकारमेतानि परीक्ष्याणि भवन्ति इति तत्र कतिपयान् प्रश्नानुत्थापयति तत्र चेदिति । तत्रैते सप्त प्रश्ना: १-परीक्षा कतिविधा ? २-परीक्ष्यं कतिविधं किन्नाम वा तत् ? ३-कथं वा परीक्ष्यम् ? ४-किन्नाम परीक्षाया: प्रयोजनम् ? ५-कुत्र कुत्र वा वमनादिकं कर्तव्यं कुत्र वाऽकर्तव्यम् ? ६-एकत्रैव कर्तव्याकर्तव्यत्वविचारे कथमन्यतरनिष्ठायां प्रवृत्ति: कर्तव्या ? ७-पञ्चकर्मोपयोगीनि भेषजद्रव्याणि च कानि इति ॥ ८० ॥

एवं प्रवृत्ते वादे चेदुत्तरवादी वितण्डामाश्रित्य प्रष्टारं छलयितुमिच्छेत् तर्हि यदुत्तरं देयं तदाह स एवमिति । एनं प्रष्टारम् । परीक्ष्यविधिभेद: परीक्ष्याणां विधिना समानेन धर्मेण भेदानां परिग्रहो यत्र क्रियते तेन कृतो भेद: । वर्तत इति शेष: । एवं सति भवतां प्रश्न: अज्ञापको भवतीति प्रतिपादयति । बहुविधासु परीक्षासु बहुविधेषु च परीक्ष्येषु कया परीक्षया कस्य परीक्ष्यस्य भेदो भवत: प्रश्नार्थो भवतीत्याह कतमेनेति । विधिभेदप्रकृत्यन्तरेण भेदकधर्मान्तरेणेत्यर्थ: । आख्यायमानं भेदाग्रं भेदमानं मयेति शेष: । प्रत्यनुयोगस्य तात्पर्यमाह नेदानीमिति । अन्यया परीक्षया अन्यस्य परीक्ष्यस्य अर्थं श्रोतुं भवतोऽभिलषितं ततोऽन्यविधया परीक्षया अन्यविधेन धर्मान्तरेण परीक्ष्यं भित्त्वा अहम् अन्यप्रकारेण आचक्षाण: न इच्छां पूरयेयम् इत्येवं ब्रूयादिति योजना । स प्रश्नकर्ता इति श्रुत्वा यदुत्तरं ब्रूयात् तद् विविच्य पूर्वोक्तं वादनियमं सम्यक् प्रणिधाय उत्तरं वाच्यमित्याह स यदिति । वितण्डामनाश्रित्य चेद् विश्रब्धमुत्तरं विवक्षु: स्यात तदा किं कुर्यादित्याह यदीति । ‡ तु: पक्षान्तरे । प्राप्तं वचनकालं मन्येत वाक्यावसरश्चेत् स्यात । तर्हि अस्मै प्रश्नकर्त्रे कामं निखिलेन साकल्येन आप्तमेव विप्रलिप्सारहितमेवार्थं ब्रूयात् ॥ ८१-८२ ॥

अथ तेषां सप्तप्रश्नानां विश्रब्धमुत्तरं विवक्षु: का नाम परीक्षेति प्रथमप्रश्नस्योत्तरमाह द्विविधेति । ज्ञानवतां शास्त्रज्ञानसम्पन्नानाम् । तेषां शास्त्राध्ययनजन्य: आप्तोपदेश आसीदेवेति भाव: । उपदेशो हि अज्ञानानां परीक्षा न ते किञ्चिदनुपदिष्टं प्रत्यक्षेण ज्ञातुं शक्नुवन्तीत्याशय: ॥ ८३ ॥

कतिविधं परीक्ष्यमिति द्वितीयप्रश्नस्योत्तरमाह दशविधमिति । संसार्यं उदाहरणेन प्रतिपाद्य । इह आयुर्वेदे । कार्याप्राप्तौ चिकित्सायाम् । सुखावाप्ति: आरोग्यलाभ: । भूमि: व्याध्युत्पत्तिस्थानम् । आतुरावस्था बाल्ययौवनादिकम् । प्रतिकर्मसमारम्भ: चिकित्सारम्भ: । भिषगादीनां भिषग्भेषजधातुवैषम्याणाम् । सौष्ठवं गुणवत्त्वम् । अभिसन्धानं सर्वत:

‡ 'य द तु नैन मोहयितुमिच्छत' इति पाठोऽत्रादृत:

स्थितिः। विषयोऽभिधेयः पूर्वेण पूर्वोक्तेन आनुपूर्व्या पूर्वापरभावेन ॥८४॥

तेषां दशविधानां परीक्ष्याणां परीक्षाप्रकारं व्यासत उपदेष्टुं प्रतीजानीते तस्येति। कारणस्य परीक्षामाह कारणमिति। अत्र अग्रे प्रागित्यर्थः। भिषज्यति रुजं जयति। ननु जाल्मोऽपि कश्चित् छद्मचरः कुचिकित्सयाऽपि कांश्चिदुत्थापयति इति सोऽपि भिषग् भवतु इति पुनर्विशिनष्टि सूत्रेति। सूत्रार्थकुशलः सम्यगधीतायुर्वेदः। न च केवलेन रुग्जयेन शास्त्रज्ञानेन च भिषग् भवितुमर्हति आयुरपि सर्वथा ज्ञातव्यं तैरित्याह यस्येति। सर्वथा सर्वप्रकारेण हिताहिततः सुखासुखतः मानप्रमाणतश्चेति। स तथाविधगुणसम्पन्नो भिषक् सर्वधातुसाम्यं चिकीर्षन् चिकित्सां कर्तुमुद्युञ्जान आदितः कार्यारम्भात् प्रागेव। कीदृशी सा परीक्षा इत्याह तदिति ।‡ गुणिषु गुणवत्पुरुषेषु गुणतः स्वगुणैः कार्याभिनिर्वृत्तिं कार्यसम्पादनं पश्यन् यत्र यत्र गुणवत्त्वं तत्र तत्र कार्यसिद्धिरिति व्याप्तिं दृष्ट्वेत्यर्थः। क्वचित् प्रश्ने। अहञ्चेद् भिषग्गुणैरुपपन्नः स्यां तदास्य व्याध्यपाकरणे योग्यो भवेयमिति आत्मानं परीक्षेत इति तात्पर्यम्। के ते भिषग्गुणाः इत्याह तत्रेमे इति। तत्र धातुसाम्याभिनिर्वृत्तौ। पर्यवदातश्रुतता तन्त्रज्ञता। परिदृष्टकर्मता पुनः पुनः कर्म दृष्ट्वा लब्धज्ञानता। दाक्ष्यं कर्मदक्षता। जितहस्तता अष्टविधे शस्त्रकर्मणि वस्त्यादिप्रयोगे च पुनः पुनः योग्यां कृत्वा स्ववशहस्तता। उपकरणवत्ता सम्भृतसम्भारता। प्रकृतिज्ञता व्याध्यातुरदेशकालप्रकृतिज्ञता। प्रतिपत्तिज्ञता प्रतिपत्तिर्नाम तत्, यस्तु विकारो यथा प्रतिपत्तव्यस्तस्य तथानुष्ठानं तां जानाति तस्य भावः॥ ८६॥

करणपरीक्षामाह करणमिति। किन्नाम भेषजमित्याह यदुपकरणायेति। धातुसाम्याभिनिर्वृत्तौ व्याधिनिवारणे प्रयतमानस्य भिषजः यदुपकरणाय द्रव्यभूताय कारणाय उपकल्प्यते निर्दिष्टो भवति। ननु भेषजमद्रव्यभूतमपि भवितुमर्हति दैवव्यपाश्रयत्वात् इत्याह विशेषत इति। तेभ्यः द्रव्यभूतेभ्यः उपकरणेभ्यः विशेषतो विशेषान् उपायांश्च चण्डीपाठादिरूपान् दैवव्यपाश्रयान् भयाद्भुतादिप्रदर्शनादीन् युक्तिव्यपाश्रयांश्च। अत्र द्वितीयान्तात् तसिल्। तद् भेषजम्। दैवव्यपाश्रयं नाम तद् यत् कर्मजमौपसर्गिकञ्च व्याधिं शमयितुं कर्मक्षयाय ग्रहादिशान्त्यर्थञ्च प्रयुज्यते मन्त्रौषध्यादिधारणादिकम्। युक्तिव्यपाश्रयञ्च धातुसाम्यार्थः प्रयोगः द्रव्यभूतः चेष्टाश्च दृष्टफलाः स्वप्नसम्बोदनादयोऽद्रव्यभूताः। पुनश्चैनद् भेषजं भेदप्रकृत्यन्तरेण भिनत्ति एतदिति। तत्र अद्रव्यभूतं भेषजं व्याकरोति तत्रेति। तत्र तयोर्मध्ये। उपायाभिप्लुतम् उपायसंज्ञकम्। कः स उपाय इत्याह उपाय इति। संवाहनं गात्रादिमर्दनरूपम्। यथोक्ता सिद्ध्युपायाः सप्तशतीपाठादयः। द्रव्यभूतस्य भेषजस्य परीक्षाप्रकारं निवेदयति यदिति। वमनादिषु वमनविरेचनास्थापनानुवासनशिरोविरेचनेषु इदं वमनाद्यर्थं प्रयुक्तं

‡ 'तद्यथा गुणिषु गुणतः' इत्यादि पाठोऽत्राहृतः।

भेषजं द्रव्यम्। एवं प्रकृतिः स्वभावो यस्य तत्। एवंगुणं रसवीर्यविपाकत-
इत्यर्थः। एवं प्रभावं प्रभावोऽस्यैवमित्यर्थः अस्मिन्नृतौ जातं, तदैव एवं
गृहीतमाहृतम्। एवं निहितमेवंरूपेण रक्षितम्। एवमुपसंस्कृतं चूर्णवटक-
क्काथादिरूपेण प्रयोगयोग्यं कृतम्। एतावन्तं दोषमपकर्षति संशोधनेन भेषजेन।
उपशमयति संशमकेन भेषजेन। अन्यत् संशोधनसंशमनातिरिक्तम्। द्रव्य-
भूतञ्चेद् अनेन पूर्वोक्तेन प्रकारेण अद्रव्यभूतञ्चेद् अन्येण विशेषेण युक्तं
परीक्ष्यमिति शेषः॥ ८७॥

कार्ययोनिपरीक्षामाह कार्येति। ननु कथं धातुवैषम्यं निरूप्यत इति
तस्य लिंगमाह तस्येति। व्याध्युत्पत्तिं दृष्ट्वा धातुवैषम्यमनुमीयते इति
विकारागम एव तस्य लिंगं भवति। तस्य परीक्षाप्रकारमाह परीक्षेति।
विकारप्रकृतेर्व्याधिनिदानस्य दोषस्य ऊणातिरिक्तलिंगविशेषावेक्षणम्। अयं
व्याध्युत्पादको दोषो न्यूनलक्षणत्वादल्पबलः अधिकलिंगत्वाद् अधिकबलो
वा इत्याद्यवेक्षणम्। पुनश्चायं व्याधिः साध्योऽसाध्यो वा मृदुर्दारुणो वा
इति लिंगादीनि पर्यवेक्ष्य निर्धारणं परीक्षा इत्यन्वयः॥ ८८॥

कार्यपरीक्षां निवेदयति कार्यमिति। तत्तु व्याध्युपशमनेनैवोपलभ्यते
इत्याह तस्येति। तस्य के विषयाः परीक्ष्यास्तानाह रुगिति। रुगुपशमनं
यन्त्रणानिवृत्तिः। स्वरवर्णयोगः स्वरस्य शरीरवर्णस्य च स्वाभाविकता-
वाप्तिः। अभ्यवहार्याभिलाषः नित्यं व्यवह्रियमाणानां खाद्यानामभीप्सा।
अभ्यवहृतस्य भक्षितस्य खाद्यस्य काले यथासमयं सम्यग्जरणं परिपाकः।
वैकारिकाः स्वप्नाः निवेदयिष्यन्तेऽग्रे। सुखेन प्रतिबोधनं निद्रया सम्यक्
तृप्तिरित्यर्थः। सर्वाभिरवस्थाभिः। अव्यापत्तिः यथावद् विषयग्रहणे
सामर्थ्यम्। कार्यफलमाह कार्येति। सुखावाप्तिरारोग्यप्राप्तिः। अत्र तुष्टि-
रित्यसुखाभावः भारापगमे सुखिनः संवृत्ताः स्म इति बोधवत्। अनुबन्ध-
माह अन्विति। संयोगः शरीरस्येति शेषः। देहप्राणसंयोगकाल एवायु-
रित्यर्थः॥ ८९-९१॥

देशपरीक्षां विवक्षुर्देशस्यार्थमाह देश इति। अत्र भूमिरिति आतु-
रस्य जन्मभूमिः व्याध्युत्पत्तिस्थानं भेषजोत्पत्तिदेशश्चेत्यर्थः। तस्य परीक्षा-
माह तत्रेति। भूमिपरीक्षया कथमातुरगतं ज्ञानं भवतीति दृष्टान्तेन विवृणोति
तदिति। कस्मिन् भूमिदेशे भूखण्डस्य कस्मिन् प्रदेशे। अस्यां भूमि-
परीक्षायामेतद् विशेषतोऽवधेयं यद् यदि कश्चिद् उष्णप्रधाने देशे जातः
संवर्धितोऽपि शीतप्रधानदेशानुमताहारोचिताभ्यां पितृभ्यां जातः स्यात्,
तद्रूपाहारादिना च संवर्धितः स्यात्, तर्हि तस्य शीतप्रधानदेशोचितानि
आहारादीनि व्यवस्थेयानि स्युरिति। सत्त्वं मनः। दोषो वातादिरेवंविधः
देशप्रभावाद् वातादिप्रधान इत्याशयः। इमे व्याधयस्तस्मिन् देशे प्राधा-
न्येन भवन्तीति शेषः। इयं भक्तिरिच्छा। एतद्देशवासिनः एवं कर्तुमिच्छ-
न्तीत्यर्थः। कल्पेषु कल्पस्थाने॥ ९३॥

चिकित्साधिकरणत्वादातुरस्यापि देशत्वं व्याचिकीर्षन् तत्परीक्षा-प्रकारं व्यासतो व्याचष्टे आतुर इति । कथं वा तस्य परीक्षा कर्तव्या इत्याह आयुषः प्रमाणज्ञानहेतोः बलदोषप्रमाणज्ञानहेतोर्वा । वेत्ययं समुच्चये । बल-दोषप्रमाणज्ञानप्रयोगं विवृणोति तत्रेति । इयं परीक्षा । इह हि भैषज्यमात्रा-प्रमाणविज्ञानम् आतुरस्य बलप्रमाणं दोषप्रमाणञ्चापेक्षते । न ह्यातुरस्य बल-दोषयोर्मानानभिज्ञः कश्चिद् भेषजमात्राप्रमाणं विज्ञातुमर्हतीत्याह दोषेति । तत्र हेतुमाह सहसेति । अपरीक्षकप्रयुक्तम् आतुरस्य बलदोषप्रमाणानभिज्ञेन व्यवस्थितम् अतिबलमुत्तममात्रया व्यवहृतं सहसा बलात्कृत्य अतिपात-येत् मारयेत् । कानि तान्यतिबलानि भेषजानीत्याह आग्नेयवायवीयानि अग्निसंस्कारशस्त्रकर्माणि च । अल्पबलस्य शस्त्रादीनामसहत्वात् आग्नेयाद्यौष-धानाञ्च तीक्ष्णवेगत्वेनेत्यर्थः । अविषादकरैः नातिदुःखप्रदैः । उत्तरोत्तर-गुरुभिः प्राग्लघ्वीं मात्रां प्रदाय क्रमशस्ततस्ततो गुरुभिः । अविभ्रमैः यस्य प्रयोगाद् विभ्रमः अयोगादिकं न भवितुमर्हति तादृशैः । अनात्ययिकैः यत्र काचिदत्ययाशंका न स्यात तादृग्भिः । उपचरन्ति चिकित्सन्ति कुशला इति शेषः । बलविचारे सर्वासामेव नारीणामल्पबलत्वं प्रतिपिपाद-यिषुस्ताः सर्वा एव मृदुवीर्यैरौषधैरुपचरितव्या इति प्रतिपादयति विशेषत इति । ता नार्यः अनवस्थितेति अनवस्थितं चञ्चलं मृदु कोमलं विवृत-मगम्भीरविषयग्रहणयोग्यं विक्लवं स्वल्पेऽपि दुःखागमे विह्वलं हृदयं चित्ता-धिष्ठानं यासां ताः । प्रायः आधिक्येन सुकुमाराः मृदुलप्रकृतयः । अबलाः अल्पबलाः । परमसंस्तभ्याः विशेषतः सर्वव्यापत्तिभयाद् रक्षणीयतमाः भवन्तीति शेषः । पश्चान्तरमुपन्यस्यति तथेति । अपरीक्षकप्रयुक्तं दोषबल-मातुरबलञ्चापरीक्ष्यैव प्रयुक्तम् । असाधकमकिञ्चित्करम् । तस्मात् पूर्वोक्तात् कारणात् आतुरं परीक्षेत इति निगमनम् । परीक्षाप्रकारमाह प्रकृतितश्चेति । एषु सर्वत्रैव तृतीयान्तात्तसिल् । प्रकृत्यादिना करणेन पृथक् परीक्षेत इति योजना । परीक्षायाः हेतुमाह बलप्रमाणविशेषज्ञानहेतोरिति आतुरबलस्य प्रमाणानां वैशिष्ट्यज्ञानार्थमित्यर्थः ॥ ६४-६६ ॥

तत्र प्रकृत्यादीन् भावान् व्यासतो व्याचिकीर्षुः प्रतिजानीते तत्रेति । तत्र प्रकृतिं विवक्षुः गर्भशरीरमेतेषां प्रकृतीरनुसरत् स्वां प्रकृतिं लभते इत्याह तद्यथेति । तत्र शुक्रशोणितयोः मातुराहारविहारयोश्च प्रकृतिः उपादानत्वेन गर्भशरीरप्रकृतिमारभते इति ज्ञेयम् । कालस्य कैशोरयुवप्रौढ-त्वादिकालभेदात् शुक्रस्य वैशेष्यात् एवं कालभेदाद् गर्भाशयस्यापि भेदात् शोणितवैशेष्यं भवेदिति अतो विभिन्नकाले जातस्य सन्तानस्य एकयोरेव पित्रोः शुक्रशोणितारब्धत्वेऽपि प्रकृतिवैशेष्यं भवतीति युज्यते मातुराहार-विहारौ च गर्भकालीनौ ज्ञातव्यौ । तत्रापि महाभूतविकाराणां नानात्वेन मातुराहारविहारप्रकृतिरपि वैशेष्यमापद्यते तेन च सन्तानस्य प्रकृतिवैशेष्यं भवतीति चतुर्विधा एव प्रकृतयः सन्तानस्य प्रकृतौ कारणा भवन्ति । एतानि

शुक्रशोणितादीनि एकेन अनेकेन वा अधिकतमेन दोषेण वातादिना अनुबध्यन्ते अधिकवातादियुक्तानि भवन्ति. गर्भ: गर्भशरीरमपि तेन तेन दोषेण अनुबध्यते तत्तच्छरीरे तस्य तस्य दोषस्याधिक्यं सदैवोपलभ्यत इति तत्तद्दोषप्रकृतिरुच्यते गर्भादिप्रवृत्ता आजन्मन इत्यर्थ:। अतएव केचिद् आजन्मन: श्लेष्मप्रधाना: केचिद्वा वातप्रधाना: केचिच्च पित्तप्रधाना: के वा संसृष्टदोषप्रधाना: के पुन: समसर्वदोषप्रकृतयो भवन्तीत्याह तस्मादिति। प्रकृत्या स्वभावेन। समधातव: समश्लेष्मानिलपित्ता: ॥ ६७ ॥

तत्रादौ श्लेष्मलानां लक्षणानि उदाहरति श्लेष्मा हीति। श्लेष्मणो यति गुणा वर्तन्ते तेन तेनैकेन श्लेष्मशरीरं यद्गुणं भवति तदेवाह तस्येति। न खलु त्रिधातूनां शरीरोपादानत्वे तेषां गुणा: शरीरगुणारम्भका न भवितुमर्हन्ति यदुक्तं "कारणगुणा: कार्यगुणमारभन्ते" इति। न वा तेषां निमित्तकारणमात्रत्वे तद्गुणवत् शरीरं भवितुमर्हति न च कुलालगुणा: घटे संक्रामन्ति। अतो नूनमकामतोऽपि वातादीनां शरीरोपादानत्वं स्वीकर्तव्यम्। अतएव श्लेष्मण: एकैकं गुणमुल्लिख्य तद्गुणविशिष्टत्वं शरीरस्य प्रतिपादयतीत्यवधेयम्। श्लक्ष्णांगा: मसृणांगा:। दृष्टिसुखानि नयनतृप्तिकारकाणि सुकुमाराणि कोमलानि अवदातानि शुभ्रवर्णानि गात्राणि येषां ते दृष्टिसुखसुकुमारावदातगात्रा:। उपचितांगा: परिपुष्टांगा:। मन्दचेष्टा: स्वल्पव्यायामशीला:। मन्दव्याहारा: स्वल्पवाच:। स्तैमित्येति। स्तैमित्याज् जडभावात् अशीघ्रा धीरगतय: आरम्भा: कार्याणि क्षोभ: चित्तचाञ्चल्यं विकारश्च येषां ते इत्यर्थ:। सारेति साराणि शरीरगुरुत्वाद् दृढसम्बद्धानि अधिष्ठितमासनम् अवस्थितं दण्डवदवस्थानं गतिर्गमनञ्च येषां ते तथाविधा इत्यर्थ:। विज्जलेति विज्जले पिच्छिले अच्छे निर्मले च प्रसन्ने स्मितान्विते च दर्शनं नेत्रमाननं मुखञ्च येषां ते तथाविधा इत्यर्थ:। वसुमन्त: धनवन्त: शान्ता: शमगुणयुक्ता: ॥ ६८ ॥

पित्तलमाह पित्तमिति। अत्रापि पित्तगुणा एव आधिक्येन शरीरे संक्रामन्तीति गुणानादावुल्लिख्य एकैकेन शरीरस्य तद्गुणवत्त्वं कृत्स्नशो दर्शयति। शुष्कसुकुमारावदातगात्रा: शुष्कमल्परूक्षं सुकुमारं मृदु अवदातं निर्मलञ्च गात्रं येषां ते तथाविधा:। पिप्लवो 'जडुल' इति वंगे। क्षिप्रं वार्धक्यात् प्रागेव बलिदोष: कुञ्चितत्वक्त्वं पलितदोष: शुक्लकेशता खालित्यदोष: केशोच्छित्तिश्च येषां ते। उष्णगुणप्रकृतिमुक्त्वा तीक्ष्णगुणप्रकृतिमाह तैक्ष्ण्यादिति। दन्दशूका: पुन: पुन: चर्व्यद्रव्यभोजनप्रिया:। विस्रत्वाद् आमगन्धित्वात्। कक्षादिषु प्रभूत: पूतिगन्धो जायत इति प्रभूतपूतिकक्षास्यशिर:शरीरगन्धा:। वातलानाह वातस्त्विति। सततसन्धिशब्दगामिन इति येषां गतौ सन्धयो नित्यं पट्पटायन्ते ते इत्यर्थ:। ननु वातलादीनामल्पवित्तोपकरणवत्त्वे नास्ति कश्चित् सम्बन्ध: तै: सहेत्यसम्बद्धस्य कार्यत्वस्वीकारे दोष एव स्यादिति चेन्न। वातलादीनां तथाविधशरीरमनसां

वित्तोपकरणसंग्रहे योग्यताल्पत्वात् तथा भवितुमर्हत्येव ॥ संसृष्टलक्षणास्तु संसर्गदोषप्रकृतयो भवन्तीत्याह संसर्गादिति । सर्वलक्षणसम्पन्ना अपि गुणप्रधानाः दोषरहितास्तु समधातुप्रकृतयो भवन्तीत्याह सर्वगुणेति ॥९९-१०२॥

प्रकृतित आतुरपरीक्षां निवेद्य विकृतितः परीक्षाप्रकारं प्रकाशयति विकृतित इति । आतुरं परीक्षेत इति योजना । विकृतिशब्दोऽयं विकारार्थकइति तस्यैव परीक्षा विधेया इत्याह विकृतिरिति । आतुरस्य विकारं तात्कालिकीं विकृतिम् । हेतुं निदानं, दूष्यं रसरक्तादिकं, दोषाः वातादयः, एकैकशः संसृष्टाः सन्निपतिता वा । प्रकृतिस्तु आतुरस्यैव । देशो भूमिः । कालः ऋत्वादिः, तेषां विशेषैः । लिंगतः रूपैश्च । हेत्वादीनां कालान्तानां बलविशेषज्ञानादेव व्याधीनां बलज्ञानं भवतीत्याह नहीति । व्याधीनां बलविशेषं पुनः व्यासतः प्राह यस्य हीति । हिरवधारणे । दोषादीनां साम्यं यथा—यत्र दोषः पित्तं, दूष्यं रक्तं, पित्तला च प्रकृतिः, देशस्तु मरुप्रायः, कालश्च निदाघ इत्यादिवज् ज्ञेयम् । तद्विपर्ययात् हेतुलिंगयोश्चाल्पबलत्वादित्यर्थः ॥ १०३ ॥

सारतः आतुरपरीक्षामाह सारत इति । इह हि पुरुषोऽष्टविधसारो भवति तद्यथा—त्वक्सारश्च रक्तसारश्च मांससारश्च मेदःसारश्च अस्थिसारश्च मज्जसारश्च शुक्रसारश्च सत्त्वसारश्चेत्याह साराणीति । क्रमशः एतेषां लक्षणान्याह तत्र स्निग्धेति । सूक्ष्माणि अल्पानि गम्भीराणि दीर्घसंसक्तमूलानि सुकुमाराणि मृदूनि रोमाणि यत्र सा सूक्ष्माल्पगम्भीरसुकुमारलोमा । सा चासौ स्निग्धश्लक्ष्णमृदुप्रसन्ना चेति तादृशी त्वक् । प्रसन्ना निर्मला । त्वक्सारः सुखसौभाग्यादिभाजो भवन्तीत्याह सेति । येषां कर्णाद्यादिकं स्निग्धरक्तवर्णं शोभायुक्तं दीप्तिमच्च भवति ते रक्तसारा इत्याह कर्णेति । मेहनं शिश्नम् । श्रीमत् कान्तिमत् । भ्राजिष्णु दीप्तिमत् । उद्धतां मेधां श्रुतिधरयोग्यां मेधाम् । शंखौ भ्रुवोः पुच्छान्तयोरुपरि कर्णललाटयोर्मध्ये वर्तेते । ललाटं नाम भ्रुवोरुपरि प्रायश्चतुरंगुलोच्छ्रायं केशांतं यावत् स्थानम् । कृकाटिका अवटुः ग्रीवापृष्ठसन्धिदेशः किञ्चिदुन्नतः । गण्डौ तु सृक्किण्योरूर्ध्वं नयनयोरधः नासाप्रान्ताभ्यां हनुसन्धिद्वयं यावत् स्थानम् । हनुर्नाम अधोदन्तवेष्टाधिष्ठानमुभयतः शंखपार्श्वयोः सन्नद्धं स्थानम् । ग्रीवा शिरोधरा । स्कन्धौ नाम ग्रीवाया उभयतोऽष्टांगुलायामौ प्रदेशौ । कक्षौ नामोभयतो बाहुसन्धेरधः अष्टांगुलौ स्थानविशेषौ । अत्र सन्धिशब्दः शंखादिभिः सर्वैरन्वीयते । अलौल्यम् अलोभः । आर्जवं सारल्यम् । मेदःसारस्तु स्निग्धवर्णः अरूक्षभाषी स्निग्धदृष्टिश्च भवति, तस्य च केशलोमदन्तोष्ठाः स्नेहलिप्ता इवाभान्ति । मूत्रपुरीषयोश्च रूक्षता न वर्तते इत्याह वर्णेति । प्रदानं दानशीलताम् । सुकुमारोपचारतां मृद्वौषधेन चिकित्स्यत्वम् । अस्थिसारानाह पार्ष्णीति । तत्र पार्ष्णिर्नाम उभयतः पादतलस्यान्तिमं चतुरंगुलायतं चतुरंगुलविस्तृतं स्थानम् । गुल्फौ नामोभयतः पादजंघयोः सन्धी ।

जानू नाम जंघोर्वो: सन्धी। अरत्निर्नाम कूर्परसन्धितो मणिबन्धसन्धि यावत् षोडशांगुलायामं स्थानं प्रकोष्ठापरपर्यायम्। जत्रु नाम पूर्वतो ग्रीवाया-अधो मध्यविन्दौ यत्र अक्षकास्थिद्वयं संयुज्यते। चिबुकं नाम अधरस्याधो हनुमध्यवर्ति चतुरंगुलं स्थानम्। पर्वाणि तु एकैकस्या अंगुल्या: पृथगस्थि-निर्मिता अंशा:। पाष्ण्यर्यादिपर्वान्ता: अवयवा: स्थूला:। सारस्थिरशरीरा: सारेण बलेन स्थिरं संहतं शरीरं येषां ते तथाविधा:। न कदाचिद् दुर्बला: सहसा भवन्तीत्याशय:। मज्जसारानाह मृद्वंगा इति। सन्धयस्त्वत्रास्थिसन्धयो ज्ञेया:। श्रुतभाज: वेदज्ञा:। विज्ञानभाज: शिल्पकलादिज्ञा:। शुक्रसारानाह सौम्या इति। सौम्या: मनोज्ञाकृतय:। सौम्यप्रेक्षिण: अनुग्रं यथा स्यात्तथा पश्यन्तीत्यर्थ:। स्निग्धेति स्निग्धानि वृत्तानि साराणि दृढावयवानि समानि संहतानि परस्परसंश्लिष्टानि शिखरिणि सूक्ष्माग्राणि दशनानि येषां ते इत्यर्थ:। सत्त्वासारानाह स्मृतीति। समरविक्रान्तयोधिन: समरे विक्रमेण युध्यन्ते इत्यर्थ:। कल्याणाभिनिवेशिन: सर्वेषां मंगलप्रार्थका:॥ १०४-११२॥

पृथक् त्वगादिसारान् लक्षणतो गुणतश्चाख्याय सर्वसारसम्पन्नानां गुणानाचष्टे सर्वारम्भेषु सर्वकार्येषु आत्मनि जातप्रत्यया: कर्तुं समर्थोऽहमिति कृतनिश्चया:। सानुनादेति सानुनाद: अनुनादेन सुदीर्घध्वनिना सह वर्त-मान: स्निग्धो गम्भीरो महांश्च स्वरो येषां ते तथाविधा:। तुल्यगुणविस्तीर्णा-पत्या: स्वसमगुणबहुसन्ताना:। एतद्गुणविपरीतगुणास्तु असारा इत्याह अत इति। मध्यसारानाह मध्यानामिति। सारोल्लेखप्रयोजनमुखेन तान्युप-संहरति इतीति। नन्वातुरशरीरदर्शनादेव तद्गतं बलं सर्व एव अनुमातुं शक्नुयादिति निरर्थकोऽयं सारोल्लेखप्रसंग: इत्याशंकां परिहरति कथमिति। उपचितत्वात् परिपुष्टशरीरत्वात्। यथा पिपीलिका: स्वदेहचतुर्गुणमपि भारं वोढुं प्रभवन्ति तद्वद् ह्रस्वशरीरा: कृशा अपि केचिद् बलवन्तो भव-न्तीति दर्शनात् केवलशरीरदर्शनेन बलाबलनिर्णयो न संगच्छते। अतश्च सारत: परीक्षा कर्तव्या इत्याह दृश्यन्ते इति॥ ११३-११७॥

क्रमागतां संहननत: परीक्षामाह संहननेति। संयोजनमंगप्रत्यंगानामिति शेष:। समसुविभक्तास्थि समानि सुविभक्तानि अस्थीनि यत्र तत्। सुनिविष्टे प्रमाणानुरूपे यथावद् विन्यस्ते च मांसशोणिते यत्र तत्। तादृशं शरीरं सुसंहतमित्युच्यते॥ प्रमाणत: परीक्षामाह प्रमाणेति। अत्र प्रमाणं शरीरांगप्रत्यंगानामित्यवधेयम्। ननु शरीरं केन मानेन परिमातव्यं यवोदरादि सामान्यपरिमाणेन परिमापस्तु न सर्वथा सर्वत्रैवान्वेति, मानवा-कारणां ह्रस्वदीर्घत्वेनानिर्देश्यत्वात् इत्याह स्वेनांगुलिप्रमाणेनेति। तत्र पुरुषो ह्रस्वो दीर्घो वा भवतु, सर्व एव स्वांगुलिमानेन प्राय: समप्रमाण एव भवेदित्याशय:। पादतलात् क्रमशो मानमाह तत्रेति। उत्सेधविस्तारायामै: वेधत: प्रस्थतो दैर्घ्यतश्च पादौ तु चत्वारि अंगुलानि उत्सेधेन षडंगुलानि विस्तारेण चतुर्दशांगुलानि दैर्घ्येणेत्यर्थ:। जंघेतु गुल्फसन्धितो जानुसन्धि

यावत्। अष्टादशांगुले आयामेन। परिक्षेपः परिधिः। ऊरू तु जानुसन्धितो वंक्षणसन्धिं यावत्। अष्टादशांगुलौ अष्टादशांगुलदीर्घौ। शेफः पुंलिंगम्। वस्तिशिरो नाभेरधः रोमान्तं यावत् स्थानम् बाह्यांगमेतत्। कोष्ठांगस्य वस्तेरपि अग्रभागस्य वस्तिशिरो वस्तिमुखं वेति संज्ञा दृश्यते। दशांगुलमुत्सेधतः। उदरं द्वादशांगुलमुत्सेधेन तच्च नाभेरूर्ध्वं वुक्कं यावत्। स्तनान्तरं स्तनयोरवकाशः। द्व्यंगुलं स्तनपर्यन्तमिति स्तनयोर्व्यासः पुरुषस्य द्व्यंगुलमित्यर्थः। उरो वक्षःस्थलं चतुर्विंशत्यंगुलविशालं चतुर्विंशत्यंगुलविस्तारम्। अनेन वक्षःपरिणाहो अष्टचत्वारिंशदंगुलो ज्ञेयः। अंसौ बाहुस्कन्धयोरन्तरालरूपौ। प्रबाहू बाह्वंससन्धितः कूर्परसन्धिं यावत्। प्रपाणी कूर्परसन्धेर्मणिबन्धसन्धिं यावत्। हस्तौ तु मणिबन्धसन्धितः अंगुल्यग्रं यावत् तौ च दशांगुलायामौ। त्रिकमिति त्रिकमूलात् कटिसन्धिं यावत्। शिरोधरा ग्रीवा। आननं केशान्ताच्चिबुकपर्यन्तम्। आस्यं मुखविवरम्। अक्षिमध्यं एकाक्षिकणीनकसन्धितो अपराक्षिकणीनकसन्धिं यावत। शिरस्तु पुरःकेशान्तात् पश्चात् केशान्तं यावत् स्थानम्। केवलं कृत्स्नं शरीरे पादतलात् शीर्षपर्यन्तम्। चतुरशीतिरंगुलिपर्वाणि उत्सेधतो ज्ञेयानि। तच्छरीरं पूर्वोक्तरूपेणायामेन विस्तारस्य समं समभुच्यते कथ्यते। विस्तारस्तु संप्रसारितयोर्हस्तयोः मध्यमांगुलाग्राद् अपरमध्यमांगुलाग्रं यावत् व्यामसमित्यर्थः। व्यामस्यापि आयाममानं चतुरशीतिरंगुलिपर्वाणि। तत्र प्रमाणवति शरीरे इति योजना॥ ११८-११९॥

सात्म्यतः परीक्षामुपदेष्टि सात्म्यत इति। सात्म्यलक्षणमाह सात्म्यं नामेति। तत् सातत्येनोपयुज्यमानं नित्यमभ्यस्यमानं उपशेते स्वास्थ्यरक्षणाय व्याधिप्रशमनाय च भवति तत्। ये नित्यं घृताद्यभ्यस्ताः सर्वरसानि च द्रव्याणि नित्यमुपभुञ्जते, ते बलवन्तः दीर्घजीविनः क्लेशसहाश्च भवन्तीत्याह तत्रेति। रूक्षसात्म्याः स्नेहवर्जिताहारशीलाः॥ १२०॥

सत्त्वत आतुरपरीक्षां निवेदयति सत्त्वत इति। तत् सत्त्वमात्मसंयोगात् शरीरस्य तन्त्रकं परिचालकं भवतीति शेषः। मध्यसत्त्वाः अपरान् अतद्गतात्मगुणान् आत्मनि मनसि उपनिधाय समारोप्य आत्मना स्वयमेव आत्मानं संस्तम्भयन्ति मनःस्थिरीकुर्वन्ति। दुःखाभिभूते मनसि तत्र शमगुणमारोप्य दुःखं जयतीत्याशयः। अथवा परैरात्मीयबान्धवादिभिः हितोपदेशादिना शोकापनोदनेन संस्तभ्यन्ते अविक्लवाः क्रियन्ते। हीनसत्त्वानाह हीनेति। सत्त्वबलं मनसो वेगं प्रति प्रतिकूलं यथा स्यात्तथा उपस्तम्भयितुमात्मना परैर्वापि न शक्यन्ते न तेषां शोकार्तं मनः तत्प्रतिकूलगुणं मनसि समारोप्य आत्मना परैर्वा शोकापनयनादिना संस्तभ्यं भवतीत्यर्थः। तेषां लक्षणान्याह महाशरीरा इति। सन्निहितेति सततमेवैते भयाद्याक्रान्ता दृश्यन्त इत्यर्थः। रौद्रादिसंकथासु अपि किमुत दर्शनेन पशोर्मानवस्य वा आहतस्य मांसशोणितानि दृष्ट्वा विषादादिकं मरणं वा

आप्नुवन्तीति योजना ॥ १२१ ॥

आहारशक्तित: परीक्षामाह आहारेति । अभ्यवहरणशक्त्या भोजनशक्त्या । येऽत्यधिकं भुञ्जते भुक्त्वापि सम्यग् जरयन्ति तेषामाहारशक्तिरधिका तत एव तेषां बलमायुश्च अधिकं भवतीत्याह बलेति । व्यायामशक्तित: परीक्षामाह व्यायामेति । व्यायामशक्ति: परिश्रमशक्ति: । तयैव मानवानां त्रिविधं बलमनुमीयते इत्याह कर्मेति । वयस्त: परीक्षां विवक्षुर्वयोलक्षणमाह कालेति । कालप्रमाणभेदाद् या शरीरावस्था पृथग् भवति, सा वय इत्यभिधीयते पण्डितै: । तत्र बालं द्विविधमपरिपक्वधातुं विवर्धमानधातुञ्चेति विद्यात् । अपरिपक्वधातुम् अपरिपुष्टसर्वधातुकम् । व्यञ्जनं स्त्रीपुरुषव्यञ्जकं श्मश्रस्तनादिकम्, तच्च अजातमनागतं यस्य तम् । अनवस्थितसत्त्वं चञ्चलमनस्कम् । अतो जन्मत: त्रिंशद्वर्षपर्यन्तं बाल्यम् । तत: षष्टिवर्षं यावत् मध्यं वय:, तत ऊर्ध्वं जीर्णमिति निश्चय: । एतत्तु प्रायिकमित्याह सन्तीति । आयुष: शतवर्षमानं स्वीकृत्य पूर्वोक्तं वयसो भेदं प्रदर्श्य अधिकोनशतवर्षजीविनां वयसां भेदं निरूपयति तेषामिति । तेषामधिकोनशतवर्षजीविनाम् । विकृतिवर्ज्यै: विकृतिं विहाय प्रकृत्यादिबलविशेषै: प्रकृतिसारसंहननादिबलविशेषै: लक्षणत: आयुष्मत्त्वानायुष्मत्त्वलक्षणैरिन्द्रियस्थाने जातिसूत्रीये चोपदिश्यमानैरायुषो मानमुपलभ्य तदनुसृत्य वयसस्त्रित्वं विभजेत् । आतुरपरीक्षां बलप्रमाणज्ञानहेतोर्या परीक्षा कर्तव्या तां निरवशेषतो निवेद्य उपसंहरति एवमिति । एवं प्रकृतिसारसंहननप्रमाणसात्म्यसत्त्वाहारव्यायामशक्तीनामुत्तमाधममध्यमबलविशेषेण बलस्यापि उत्तमादित्वमुदकनीयं भवतीत्याह प्रकृत्यादिनामिति । दोषबलविभेदे तु विकृतिबलमपेक्षणीयमित्याह विकृतीति । एवमातुरबलं दोषबलञ्च निर्धार्य यथादोषं यथाबलं तीक्ष्णमध्यममृदुविभागेन भेषजमवचारणीयमित्याह तत इति । आतुरबलविज्ञानार्थमातुरपरीक्षामुक्त्वा आयुषो मानज्ञानार्थं तत्परीक्षायां विवक्षितायां सा चाग्रे निवेदयिष्यते इति प्रतिजानीते आयुष इति । इन्द्रियेषु इन्द्रियस्थानाध्यायेषुजातिसूत्रीये च शारीरे । न खल्वस्मिन् तन्त्रे इन्द्रियस्थाने दीर्घायुष्ट्वस्य स्वल्पायुष्ट्वस्य वा किमपि लक्षणं दृश्यते । प्राञ्चस्तु तत्रेन्द्रियवर्णादिविकृत्या रिष्टरूपया ह्रसितमायुर्ज्ञातव्यमिति समाहितवन्त: । अस्यैव ग्रन्थकारस्य सतीर्थस्य भेलस्य ग्रन्थे इन्द्रियस्थाने प्रथमेऽध्याये एकमासादारभ्य शतवर्षं यावत् पृथक् पृथग् लक्षणैरायु:प्रमाणं विवेचितमास्ते । दृष्ट्वैतन् नानुमानमप्रमाणं भविष्यति अत्रापि एवं कश्चिदध्याय आसीत् कालवशाद् विलुप्ततां गत इति ॥ १२२-१२३

क्रमागतत्वाद् देशपरीक्षामभिधाय कालपरीक्षां विवृणोति कालेति । तन्त्रेऽस्मिन् कालशब्देन संवत्सररूप: व्याधितस्य सामयिकी अवस्था च अभिप्रेयेते । तत्र संवत्सररूप: काल: अयनभेदाद् द्विधा, शीतोष्णवर्षलक्षणात् त्रिधा, ऋतुभेदाच्च षोढा, मासभेदाच्च द्वादशधा, प्रविभज्यते

पुनरपि तत्तत्कार्यसमयमभिप्रेत्य ततोऽधिकधापि भिद्यते इत्याह तत्रेति। षोढा षट्प्रकारेण। कार्यं चिकित्सा। साधारणलक्षणेषु ऋतुषु प्रावृट्शरद्वसन्तेषु इतरेषु ग्रीष्मवर्षाहेमन्तेषु। अविकल्पकाः विकृतिरहिताः औषधस्यायोगातियोगरहिताः शरीरस्य च अपरिवर्तनशीलता इत्यर्थः। पुनरपि हेमन्तादिषु कथं संशोधनमकर्तव्यमिति व्यासतः प्रतिपादयति तत्र हेमन्त इति। अतिशीतवाताध्मातम् अतिशीतलेन वायुना प्रपीडितम्। अतिदारुणीभूतम् अत्यर्थमशिथिलीभूतमतएव अवबद्धदोषं स्रोतःसु अतिसंश्लिष्टदोषं शरीरं भवति। अतोऽनिहार्यदोषं भवतीत्याशयः। एवं शरीरस्य संशोधनानर्हत्वं प्रदर्श्य भेषजस्यापि मन्दवीर्यत्वं दर्शयति भेषजमिति। वातोपद्रवा यसम्यग्दोषनिर्हरणाभावादित्यर्थः। ग्रीष्मेऽपि संशोधनमतियोगाय कल्पते इत्याह ग्रीष्मे इति। पिपासोपद्रवाय शरीरस्य संशोधनातियोगाज् जलीयधातुक्षयात् पिपासाधिक्यं भवत्येव। वर्षायामपि संशोधनाकर्तव्यतां दर्शयति वर्षास्विति। विहतस्वभावेषु अल्पवीर्यत्वाद् विहतो विकृतः स्वभावोऽधोगादिस्वभावो येषां तथाविधेषु केवलेषु कृत्स्नेषु औषधग्रामेषु त्रिवृदादिसंशोधकेषु सर्वौषधेषु सत्सु। पुनश्च अवचारितान्यपि वमनादीनि तोयानुगतमारुतसंसर्गाद् अतिशीतवातसंस्पर्शाच्च गुरुप्रवृत्तीनि सुदीर्घेण प्रवृत्तिकारकाणि भवन्ति, तदा न त्वरितं वमनादिप्रवृत्तिर्भवतीत्यर्थः। शरीराण्यपि तथाप्रवृत्तेर्गुरुसमुत्थानतमानिगुरु सुचिरसाध्यं समुत्थानं संसर्जनादिक्रमेण प्रकृतिभावो येषां तेषु श्रेष्ठानि भवन्ति। तदा प्रयोगे उपक्लिन्नशरीरत्वान् नातुरस्त्वरितं प्रकृतिभावमापद्यते इत्याशयः। निगमयति तस्मादिति। वर्षाभागान्तेषु हेमन्तग्रीष्मवर्षासु। तदा विषपीतादीनामपि वमनं प्रतिषिद्धं किंस्वित्? नेत्याह नचेदिति। आत्ययिके विषपानादिनिमित्ते चेत् कर्म वमनादि न स्यात्, तेषु तदापि कर्म कर्तव्यमन्यथा जीवितनाशादित्याशयः। तत्रापि कर्तव्ये कर्मणि प्रयोगप्रकारमुपदिशति आत्ययिके इति। कृत्रिमगुणोपधानेन कामं यथेष्टमृतुं विकल्प्य ऋतुगुणं यथासम्भवं परिवर्त्य। तथा चोक्तं सुश्रुते—

"शीते शीतप्रतीकारमुष्णे चोष्णनिवारणम्।
कृत्वा कुर्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत्॥" इति।

एवं भेषजमपि संयोगसंस्कारादिभिः कालस्वभावान् मृदुवीर्यं तीक्ष्णं कृत्वा, तीक्ष्णं वा मृदु कृत्वा सावधानतया प्रयोज्यमित्याह भेषजमिति॥ १२७–१२८॥

संवत्सररूपं कालं व्याख्याय आतुरावस्थारूपं कालं व्याकुरुते आतुरेति। आतुरावस्थाविशेषात् कार्यमिदं कर्तव्यमकर्तव्यं वेति तस्य तदा कालाकालसंज्ञा भवतीत्यर्थः। अर्थमिमं दृष्टान्तेन परिष्करोति तद्यथेति। यथा ज्वरस्यामावस्थायां संशोधनसंशमनयोरकालः लंघनस्यैव कालः। पुनः पक्वावस्थायां संशमनादेः कालो भवतीत्याह एतदपीति। निगमयति तस्मादिति। तस्य परीक्षामाह तस्येति। भेषजं हि यथाकालं प्रयुज्यमानं फलदं

भवति न च कालमतीत्य न वाऽनागते काले इत्याह न हीति ॥ १३२ ॥

कालपरीक्षामभिधाय प्रवृत्तिं परीक्षते प्रवृत्तिरिति । प्रतिकर्मसमारम्भ: चिकित्साया उद्योग: । तस्य लक्षणं गुणवतां भिषगादिचतुष्पादानामेकत्र क्रियायां मेलनमित्यर्थ: । अवसरसंगत्या शिष्टं परीक्ष्यविशेषमुपायं विवृणोति उपाय इति । भिषगादीनां भिषग्द्रव्यसेवकातुराणां सौष्ठवं पूर्वोक्तषोडशगुणसमन्वितत्वम् । अभिसन्धानं यथावत् प्रयोगश्च । पुनर्व्याकरोति तस्य लक्षणमिति । यथोदितगुणसम्पदादिभि: सिद्धिकारणै: आरोग्यहेतुभि: सम्यगुपपादितस्य औषधस्य अवचारणं प्रयोग: । तस्य सप्तसु प्रश्नेषु त्रयाणां प्रश्नानामुत्तरमुपसंहरति एवमेते इति ॥ १३३-१३५ ॥

परीक्षाया: किं प्रयोजनमिति चतुर्थप्रश्नस्योत्तरमाह परीक्षाया इति । प्रतिपत्तिज्ञानं विकाराणां क्रियाक्रमज्ञानम् । प्रतिपत्तव्य: केन क्रमेण का क्रिया कर्तव्या, तस्या: अनुष्ठानज्ञानं प्रतिपत्तिशब्दार्थ: । विना भिषगादिपरीक्षया न खल्वनुष्ठानज्ञानं भवेदिति परीक्षाया: प्रयोजनं वर्तत एवेत्यर्थ: ॥ १३६ ॥

क्वचित्क्वचित् वमनादिकं कर्तव्यं क्वचित् वाऽकर्तव्यमिति पञ्चमप्रश्नस्योत्तरं सिद्धिस्थाने वक्ष्यतीति प्रतिजानीते यत्र त्विति ॥ १३७ ॥

एकत्रैव कर्तव्याकर्तव्यत्वविचारे कथमन्यतरनिष्ठायां प्रवृत्ति: कर्तव्या इति षष्ठस्य प्रश्नस्योत्तरमाह प्रवृत्तीति । प्रवृत्तिनिवृत्तिलक्षणसंयोगे एकस्मिन्नेव आतुरे वमनादे: कर्तव्याकर्तव्यनिश्चये गुरुलाघवं सम्प्रधार्य, कृते अकृते वा वमनादौ एवं हितमहितं वा भविष्यतीति विविच्य। अथवा एष: सामान्यविधिरेतच्च विशेषविधानमित्यवधार्य कर्तव्याकर्तव्यावधारणे यदेव हिततरं स्यात् तदेव कर्तुं निश्चिनुयादित्याह सन्तीति । हि यत: उपक्रमं प्रतिचिकित्सायां उत्सर्गापवादै: सामान्यविशेषविधिभि: निर्दिष्टा व्याधयो भवन्तीति शेष: । यथा हि 'वमनं श्लेष्महराणाम्' इति सामान्यविधौ "न वामयेत् तैमिरिकं न गुल्मिनम्" इति विशेषविधिना श्लैष्मिकेऽपि गुल्मे वमननिषेध: प्राप्त: । पुनरपि "मन्दोऽग्निर्वेदना मन्दा ..... सगुल्मी वमनोपग:" इति ततोऽपि विशेषविधिना अवस्थाविशेषे कफगुल्मिनोऽपि वमनसाध्या: स्युरिति विशेषतो विविच्य अन्यतरनिष्ठायां कर्तव्याकर्तव्यावधारणे निश्चिनुयादित्यर्थ: ॥ १३८ ॥

क्रमागतत्वात् शिष्टस्य कानि वमनादीनां भेषजद्रव्याणीति प्रश्नस्योत्तरं विवक्षुरादौ वमनद्रव्याण्याह यानि त्विति । फलं मदनफलं 'मयनाकाँटा' इति भाषा । जीमूत: घोषकभेद: । इक्ष्वाकुस्तिक्तालाबु: । धामार्गव: घोषकभेद: 'तितधूमा' इति वंगे । कृतवेधनं श्वेतपुष्पघोषक: । आरग्वध: स्वर्णालु: । वृक्षक: कुटज: । स्वादुकण्टक: विकंकत: । पाठा 'आगनति' इति भाषा । शार्ङ्गेष्टा महाकरञ्ज: । मूर्वा 'सूचमुखी' इति भाषा । नक्तमाल: नाटाकरञ्ज: । पिचुमर्द: निम्ब: । सुषवी कारवेल्ल: । सोमवल्क: विट्खदिर: । द्वीपी कण्टकारी । मधूक: 'महुआ' इति भाषा । मधुकं यष्टीमधु ।

कोविदारकर्बुदारौ काञ्चनारभेदौ । नीपः कदम्बः । निचुलः इज्जलः । बिम्बी 'कुन्दुरु' इति भाषा । शणपुष्पी घण्टारवा । सदापुष्पी रक्तार्कः । प्रत्यक्-पुष्पी अपामार्गः । एला स्थूलैला । हरेणुः रेणुका । पृथ्वीका सूक्ष्मैला । कुस्तुम्बुरुः तुम्बुरुः । नलदः जटामांसी । ह्रीवेरं बालकम् । काण्डेक्षुः काशतृणम् । इक्षुबालिका 'खागडा' इति भाषा । दर्भः उलपः । पोटगलः नलः । कालंकतः कासमर्दः । सुमना जातीपुष्पम् । सौमनस्यायनी मालती-पुष्पकलिका । वृश्चीरः श्वेतपुनर्नवा । पुनर्नवा तु रक्ता । महासहा माषपर्णी । क्षुद्रसहा मुद्गपर्णी । शाल्मलकः मोचरसः । भद्रपर्णी गाम्भारी । एलापर्णी रास्ना । उदालकः श्लेष्मान्तकः । उपोदिकाः पूतिका 'पुँई' इति भाषा । धन्वनः 'धाम्नी' इति लोके । राजादनः 'क्षीरणी' इति भाषा । उपचित्रा मूषिकपर्णी । गोपी अनन्तमूलम् । शृंगाटिका 'पानिफल' इति भाषा । मदनादीनां फलानि तेषां पत्रपुष्पाणि वा आरग्वधादीनां कषायैः सह पुनः पिप्पल्यादीनां कषायैश्च यथालाभं यथेष्टमिच्छानुरूपम् उपसंस्कृत्य संयोज्य पुनरेतैर्द्रव्यैः वर्तिक्रियादिकमनुविधाय कृत्वा यथार्हं यथायोग्यया मात्रया विधिवद् वमनविधिमनुसृत्य वमनं वमनाय औषधं दद्यादिति योजना । कल्पो व्यवहारविधिः उत्तरकालं कल्पस्थाने ॥ १३६ ॥

विरेचनद्रव्याण्याह विरेचनेति । श्यामा श्यामामूला त्रिवृत् । त्रिवृत् तु अरुणमूला । चतुरंगुलं स्वर्णालुः । तिल्वकं लोध्रम् । महावृक्षः स्नुही । सप्तला चर्मकषा । शंखिनी चोरपुष्पी । द्रवन्ती लघुदन्ती । अत्र महावृक्षस्य क्षीरं श्यामात्रिवृद्दन्तीद्रवन्तीनां मूलं चतुरंगुलशंखिन्योश्च फलं पत्रं पुष्पाणि च तिल्वकस्य च त्वक् विरेचनार्थमादित्सन्ति भिषजः । विक्लिन्नाविक्लिन्नैः बहुभिर्द्रव्यैरेकैकशः मिलित्वा वा कृतकल्पनैः । अजगन्धा 'फौकान्दि-जोयान्' इति भाषा । अजशृंगी 'गाडलशिंगा' इति भाषा । क्लीतकं यष्टी-मधु । प्रकीर्या नाटाकरञ्जः । उदकीर्या महाकरञ्जः । मसूरविदला श्यामा-लता । कम्पिल्लकः 'कमलागुँडि' इति भाषा । गवाक्षी गुडुम्बा । पीलुः 'आखरोट' इति भाषा । पिपालः 'चिरौञ्जी' इति भाषा । परुषकः 'फालसा' इति भाषा । विदारीगन्धादिकं स्वल्पपञ्चमूलम् ॥ १४० ॥

आस्थापनद्रव्याणि निवेदयति आस्थापनेष्विति । भूयिष्ठकल्पानि प्रचुरप्रायाणि । आतुराणां तेषु तेष्ववस्थान्तरेषु व्याधितानामवस्थाभेदेषु । इष्ट इति नातिसंक्षेपविस्तरोपदेशेनैव ज्ञानं भवतीत्यर्थः । नन्वसत उपदेशेऽपि अतिबहुत्वाशंका न निरस्ता समवेतदोषाणामंशांशभेदबहुत्वाद् इत्यतो रस-प्राधान्यात् प्रभावादि प्राधान्यात् संसृष्टरसमपि द्रव्यमेकरसमिति कृत्वा व्याख्याने अतिबाहुल्यशंकायाः निरासः स्यादिति यथोपदेष्टं युक्तिं प्रदर्शयति रसेति । रसैकैकश्येन पृथग्रसप्राधान्येन । रसकैवल्येन रस-संसर्गत्वेन । नामलक्षणार्थं नामज्ञानार्थम् । स्कन्धः समूहः । रसतोऽनु-विभज्य मधुरादिरसतया उल्लिख्य ॥ १४१ ॥

तत्रादौ मधुरस्कन्धं व्याचष्टे यत्तु इति । स्वादे अन्यरसान्यपि यानि

विपाकत: प्रभावतो वा मधुराणि तान्यपि मधुरस्कन्धे पठितानीत्याह तस्मादिति। वीरा एलबालुका। छत्रा मधुरिका। अतिछत्रा मधुरिकाभेद:। श्रावणी मुण्डीरी। महाश्रावणी मुण्डीरीभेद:। सहदेवा दण्डोत्पला। विश्वदेवा अरुणमूलदण्डोत्पला। शुक्ला शर्करा। क्षीरशुक्ला शुक्लभूमिकूष्माण्डभेद:। तथा चोक्तम्—

"क्षीरकन्दो द्विधा प्रोक्तो विनालस्तु सनालक:।
विनालो रोगहर्ता स्याद् वय:स्तम्भी सनालक:॥" इति।

द्विविधा क्षीरविदारी ज्ञेया। क्षुद्रसहा इन्द्रवारुणी। महासहा इन्द्रवारुणीभेद:। ऋष्यगन्धा 'ऋषिजांगाल' इति भाषा। पयस्या दुग्धिका। मोरटं मूर्वा। संहर्षा वन्दाक:। शीतपाकी गुञ्जा। ओदनपाकी महासमंगा। ऋष्यप्रोक्ता शूकशिम्बीभेद:। द्वारदा भूमिसहवृक्ष:। भारद्वाजी वनकार्पासी। अभीरुपत्री शतावरीभेद:। क्षीरवल्ली 'क्षीरुइ' इति भाषा। कपोतवल्ली नलिका। गोपवल्ली मूर्वाभेद:। मधुवल्ली यष्टीमधुभेद:। सोमवल्ली ब्राह्मीभेद:। उपयुक्तभूयिष्ठे अपगतभूयिष्ठोदके गतरसेषु निष्काशितकाथेषु तदर्थं पादशेषो ग्राह्य:। न तथा द्रवं शोषयेद् यथाक्षीरमपि दग्धं स्यात् इत्याह पयसीति। स्थालीमुपहृत्य पात्रं चुल्लीतोऽधिश्रित्य परिस्रुत्य वस्त्रादिनेति शेष:। तदेव पक्वं क्षीरं सुखोष्णं घृतादिमिश्रं वातविकारिणे पुनश्च सुशीतं मध्वादिमिश्रं पित्तविकारिणे दद्यात् वस्तिविधिनेति शेष:॥ १४२॥

अम्लस्कन्धमाह आम्रेति। अत्राम्रमामं पक्वं वाऽत्यम्लं ग्राह्यम्। लकुचं डहु:। करमर्द: 'करमचा' इति भाषा। अम्लवेतस: 'थैकड' इत्युत्तरवंगे प्रसिद्ध: फलविशेष:। कुवलबदरौ बदरभेदौ अत्यम्लौ। करीरक: जम्बीरभेद: 'कयेर' इति भाषा। अश्मन्तक: 'लोहाचुर' इति भाषा। अम्लीका 'तेतुल' इति भाषा॥१४३॥

लवणस्कन्धमाह सैन्धवेति। काललवणं सौवर्चलगुणं निर्गन्धं विट्लवणसदृशम्। पाक्यं पाकेन निष्पन्नम्। रोमकं साम्भरीलवणम्॥ १४४॥

कटुकस्कन्धमाह पिप्पलीति। अजमोदा यवानी। किलिमं देवदारु। खरपुष्पा अपामार्ग:॥ तिक्तवर्गमाह चन्दनेति। कर्कशस्तिक्तपटोल:। कषायस्कन्धमाह प्रियंग्विति। सप्तपर्ण: 'छातिम' इति भाषा। परिपेलवं कैवर्तमुस्तकम्। जिंगिनी मञ्जिष्ठा। माटीको देवदारु:। अजकर्ण: शालभेद:। कुम्भी 'पाना' इति भाषा। विसं क्षुद्रमृणालकम्। तालखर्जुरतरुणानि तयोरंकुराणि। एषु च यानि द्रव्याणि द्वित्रेषु स्कन्धेषु पठितानि तानि मिश्ररसत्वेन सर्वत्र योगिनि ज्ञातव्यानि॥ १४५-१४७॥

षड्रसस्कन्धानुक्त्वा तेषामास्थापने प्रयोगविधिमाह भवन्ति चात्रेति रसभेदतो य एते षड्वर्गा: परिसंख्याता: तत्तद्रसप्रधानानि द्रव्याणि तत्तद्रसानीति कृत्वा ये उपदिष्टा:। सार्वयौगिकान् आस्थापनसाध्येषु सर्वविकारेषु योग्यान्। सर्वश: सर्वप्रकारेण प्रणिहिता: आस्थापनेन प्रयुक्ता:। जानता ज्ञानिना वैद्येनेति शेष:। न खलु सर्वेषु व्याधिषु सर्वे वर्गा: प्रयोज्या:

इत्याह येषामिति। ये ये वर्गा येषां येषां विकाराणां प्रशान्त्यर्थं परिकीर्तिताः, यथाहि मधुरवर्गा वाते पित्ते च परिकीर्तिताः, नतु कफे एवं सर्वत्र। ये वर्गाः येषां परिकोपकाः, यथा मधुरवर्गाः श्लेष्मप्रकोपकाः, अम्लवर्गाः पित्तश्लेष्मप्रकोपका इत्यादि। उपसंहरति इत्येते इति। पुनश्च वर्गोक्तेष्वपि द्रव्येषु यानि तत्र तत्र व्याधावयौगिकानि भवेयुस्तानि विहायैव योगकल्पना कर्तव्या इत्याह तेभ्य इति। तेभ्यो मधुरादिवर्गेभ्यः। परिसंख्यातं तत्र तत्र वर्गे परिपठितम्। अयौगिकं तत्तद्व्याध्यप्रत्यनीकम्। एकं वर्गमन्येनैकेन अनेकेन वा वर्गेण संयुज्य तत्तद्व्याधौ योग्यतां वीक्ष्य प्रयोजयेदित्याह वर्गमपीति। तमेवार्थं दृष्टान्ताभ्यां विस्पष्टीकरोति प्रचरणमिति। अयमर्थः- यथाहि भिक्षुकस्याल्पप्रचरणम् अनल्पभिक्षालाभाय, यथा वा कृषकस्याल्पं बीजमनल्पशस्यलाभाय भवेत्, तथैव अल्पाक्षरेणोपदिष्टोऽर्थः महते ज्ञानाय भवेदिति। सिद्धान्तमाह तस्मादिति। ऊहः अतिरिक्तः संयोगः। अपोहस्ततो निष्कासनम्। वितर्कश्च अत्रायं योगिको नवेति विचारः। मन्दबुद्धिस्तु यादृशमुक्तं तथैव करोति। एवं कुर्वन् उदाहरणस्य नातिमहत्त्वे व्याधितं निरुजयति, अतिह्रस्वत्वे अतिमहत्त्वे वा मारयति इत्याह मन्दबुद्धेरिति॥ १४८-१५२॥

अनुवासनद्रव्याण्याह अतः परमिति। अनुवासनन्तु स्नेहवस्तिः। तत्र द्विविधः स्नेहः प्रयुज्यते इति तं विशिनष्टि स्नेहस्त्विति। तैलं तिलभवः स्नेहः। अतैलन्तु अन्यान्यस्नेहः। तैलप्राधान्यात् सर्वानेव स्थावरस्नेहास्तैलपदेनाभिधीयन्ते इत्याह तद्द्वयमिति। सर्वतः सर्वेषु स्थावरस्नेहेषु। संस्कारविशेषात् तत्तद्दोषहरैः द्रव्यैः सह पाकात्॥ १५३॥

शिरोविरेचनद्रव्याण्याह शिर इति। श्वेता श्वेतापराजिता। अजाजी कृष्णाजीरकम्। सुरसादयस्तुलसीभेदाः। त्वक्: 'हाँचिया' इति भाषा। तर्कारी जयन्ती। अलर्कः रक्तपुष्पार्कः। गवाक्षी गुडुम्बा। गण्डीरपुष्पी शमठः। वृश्चिकाली 'बिछाती' इति भाषा। वयःस्था ब्राह्मी। तेजोवती चवी। वरांगं गुडत्वक्। अनुक्तानि सैन्धवस्फटिककर्पूरादीनि। इन्द्रियोपशयानि यस्य घ्राणेन्द्रिये यान्युपशेरते तानि॥ १५४॥

अध्यायपरिसमाप्तिसूचिकां सूचीं वक्ति तत्र श्लोका इति। लक्षणं तन्त्रम्। अध्येयस्य अध्ययनस्य। षड्भिरूनानि पञ्चाशदिति चतुश्चत्वारिंशदित्यर्थः। पुनश्च विमानस्थानमुपसंजिहीर्षुः तत्स्थानोक्तमर्थजातं समासतोऽभिधत्ते बहुविधमिति। अर्थकान्तं कमनीयार्थम्। विमानस्थानस्य निरुक्तिमाह दोषादीनामिति॥ १५५-१६०॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां विमानस्थाने रोगभिषग्जितीयो नामाष्टमोऽध्यायः॥ ८॥

कृता ज्योतिषचन्द्रेण चरकार्थप्रदीपिनी।
समाप्तैतावता सर्वा विमानस्थानटिप्पणी॥

शारीरस्थानम्

प्रथमोऽध्यायः

विमानस्थाने आयुःप्रमाणजिज्ञासूनां शरीरमानं ज्ञातव्यम्, निदान-जिज्ञासूनां तत्तदङ्गप्रत्यङ्गगतवेदनाविशेषज्ञानार्थम् अङ्गादिज्ञानमावश्यकम्, वक्ष्यमाणस्य च चिकित्सितस्याधिकरणत्वेन शारीरज्ञानं प्रयोजनम्, इती-दानीमवसरवशाच्छारीरस्थानमुपदिदिक्षुर्भगवान् 'शारीरस्थानमारभते' । तत्र प्रथमतः पुरुषज्ञानादृते तदङ्गादिविज्ञानं न भवतीति पुरुषज्ञानार्थं कतिधापुरुषीयं नाम शारीरं प्रथमाध्यायमाह 'अथे'त्यादिना । 'अथे'-त्ययमधिकारार्थः । कतिधापुरुषीयं शारीरमधिकृत्य व्याख्यास्याम इत्यर्थः । तेषु तेषु शास्त्रेषु पुरुषो बहुधा व्याख्यायत इति पश्यतां शिष्याणां स्वत-एव तत्स्वरूपे जिज्ञासा उत्पद्यत इति सैव जिज्ञासोत्थाप्यते 'कतिधा पुरुष' इत्यादिभिस्त्रयोविंशत्या प्रश्नैः । 'कतिधा' कतिप्रकारं यथा स्यात्तथा । 'भिद्यत' इत्यन्वयः । 'धातुभेदेन' उपादानभेदेन । 'प्रभवः' उत्पत्तिहेतुः । 'शैलकुड्यतिरस्कृतं' पर्वतभित्त्यन्तराले स्थितम् । वस्त्विति शेषः ॥१-१४॥

एवमग्निवेशकृतांस्त्रयोविंशतिं प्रश्नानुल्लिख्य यथाक्रमं तदुत्तरमाह 'इती'ति । तत्रायं प्रथमः प्रश्नः "उपादानभेदेन पुरुषः कतिधा भिद्यत" इति । तस्योत्तरं 'खादय' इति । 'खादयः' पञ्चमहाभूतानि क्षित्यप्तेजोमरुद्-व्योमसंज्ञकानि । 'चेतनाधातुषष्ठाः' चेतनाधातुरात्मा षष्ठो येषां ते तथोक्ताः उक्तं हि सुश्रुते (१।१) । "इह खलु पञ्चमहाभूतशरीरिसमवायः पुरुष-इत्युच्यते" इति । इहास्मिन्नायुर्वेदतन्त्र इत्यर्थः । 'चेतने'त्यादि । 'एको'-ऽद्वितीयः पञ्चमहाभूताद्यसंसृष्ट इत्यर्थः । 'चेतनाधातुः' आत्मा 'पुरुष-संज्ञकः स्मृतः' । 'अपी'ति भिन्नक्रमे । 'पुनश्चे'त्यादि । 'धातुभेदेन' प्रकृति-विकृतिभेदेन 'चतुर्विंशतिकः' चतुर्विंशतिपदार्थसमवायः पुरुषः 'स्मृतः' अस्माभिरिति शेषः । कानि तानि चतुर्विंशतितत्त्वानीत्याह 'मन' इति । 'अर्थाः' शब्दादयो विषयाः । मनआद्यर्थान्ता एते षोडशपदार्था विकारसंज्ञका महाभूतादिकार्य्यत्वात् । 'अष्टधातुकी प्रकृतिः' बुद्धिरहङ्कार आत्मा पञ्च महाभूतानि चेत्यष्टौ धातवः । एतच्च "खादीनि बुद्धिरव्यक्तमहङ्कारस्तथा-ऽष्टमः" इत्यनेनानुपदमेव स्वयं विवरिष्यति । अत्राव्यक्तपदेनात्मैव परि-गृहीतः । तेन पुरुषस्य चतुर्विंशतिकत्वम् । अव्यक्तशब्दस्य प्रकृत्यर्थकत्वे तु पञ्चविंशतिकत्वमापद्येत । अयमायुर्वेदसम्मतः पदार्थविवेक ईश्वरकृष्णादि-सम्मतात् सांख्यनयाद् भिद्यत इति ज्ञेयम् । अत्रोक्तायुर्वेदनयात् महाभारते बुद्धचरिते चोक्तं सांख्यदर्शनमभिन्नमेव । तथाहि महाभारते मोक्षधर्म्मे—

"श्रूयतामवनीपाल यदेतदनुपृच्छसि ।
योगानां परमं ज्ञानं सांख्यानाञ्च विशेषतः ॥ ८ ॥
... ...
अष्टौ प्रकृतयः प्रोक्ता विकाराश्चापि षोडश ।
आसान्तु सप्त व्यक्तानि प्राहुरध्यात्मचिन्तकाः ॥ १० ॥
अव्यक्तञ्च महांश्चैव तथाऽहङ्कार एव च ।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ॥ ११ ॥
एताः प्रकृतयस्त्वष्टौ विकारानपि मे शृणु ।
श्रोत्रं त्वक् चैव चक्षुश्च जिह्वा घ्राणञ्च पञ्चमम् ॥ १२ ॥
शब्दः स्पर्शश्च रूपञ्च रसो गन्धस्तथैव च ।
वाक् च हस्तौ च पादौ च पायुर्मेढ्रं तथैव च ॥ १३ ॥
एते विशेषा राजेन्द्र महाभूतेषु पञ्चसु ।
बुद्धीन्द्रियान्यथैतानि सविशेषाणि मैथिल ॥ १४ ॥
मनःषोडशकं प्राहुरध्यात्मगतिचिन्तकाः ॥" १५ ॥
(शान्ति० ३१५ अ०)

बुद्धचरिते च :—
"अत्र तु प्रकृतिं नाम विद्धि प्रकृतिकोविद ।
पञ्च भूतान्यहङ्कारं बुद्धिमव्यक्तमेव च ॥ २० ॥
विकार इति बुध्यस्व विषयानिन्द्रियाणि च ।
अस्य क्षेत्रस्य विज्ञानात् क्षेत्रज्ञ इति कथ्यते ॥ २१ ॥
क्षेत्रज्ञ इति चात्मानं कथयन्त्यात्मचिन्तकाः ।
जायते जीर्य्यते चैव बाध्यते म्रियते च यत् ॥ २२
तद् व्यक्तमिति विज्ञेयमव्यक्तञ्च विपर्य्ययात् ॥" इति ।
(१२ सर्गे)

ननु पञ्चमहाभूतशरीरिसमवायस्यायुर्वेदसम्मतस्य पुरुषस्य कथं युगपच्चतुर्विंशतिकत्वमेकत्वञ्च सङ्गच्छत इति चेन्न । एकस्यैव प्रकृतिरूपस्याव्यक्तसंज्ञकस्य पुरुषस्य कारणतयैकत्वम्, त्रयोविंशत्या तद्विकारैः सह वर्त्तमानस्य व्यष्टिरूपेण गणनया चतुर्विंशतिकत्वम् । बुद्ध्यादीनाम् आत्मकार्य्यत्वन्तु अस्मिन्नेवाध्याये उपरिष्टात् प्रतिपादयिष्यते । तथा च—

"अव्यक्तमस्य क्षेत्रस्य क्षेत्रज्ञमृषयो विदुः ।
जायते बुद्धिरव्यक्ताद् बुद्ध्याहमिति मन्यते ॥
परं खादीन्यहङ्कार उपादत्ते यथाक्रमम् ॥" इति ॥ १५-१७ ॥

तेषां विवरणायादौ मनस इन्द्रियातिरिक्तत्वे प्रमाणमाह 'लक्षणम्' इति । 'लक्षण'मनुमानरूपम् । 'आत्मेन्द्रियार्थानाम्' आत्मनश्चक्षुरादीनामिन्द्रियाणामर्थानां शब्दादिविषयाणां 'सन्निकर्षे सति' 'ज्ञानस्याभावो भाव

एव च मनसो लक्षणम्' ज्ञानस्याभावाद् भावाच्च मनोऽनुमीयत इति भाव:। कदाचित् पुन: सत्यपि सन्निकर्षे 'मनसो वैधृत्यात्' मन:संयोगाभावात् 'ज्ञानं न वर्त्तते' न भवति। 'सान्निध्यात्' मन:सन्निकर्षाच् 'च' 'तत्' ज्ञानं 'वर्त्तते' भवति। इति दृष्ट्वा इन्द्रियातिरिक्तं मनोऽनुमीयते इति भाव:। तद्गुणावाह 'अणुत्व'मिति। 'अणुत्वम्' अतिसूक्ष्मत्वम्। 'तच्च' मन: 'एकमेव' नाधिकम्। तस्य विषयमाह 'चिन्त्य'मिति। 'मनसोऽर्थसंज्ञकं' विषय इत्यर्थ:। तस्य कर्म्माह 'इन्द्रिये'ति। 'इन्द्रियाभिग्रह:' इन्द्रियस्य कर्म्मज्ञानोभयरूपस्य अभिग्रह: सर्वतोग्रह: सर्वेषु विषयेषु प्रेरणेति यावत्। 'अस्य' इन्द्रियस्य च 'निग्रह:' विषयान्निवर्त्तनम्। 'ऊह:' तर्क:। 'विचार:' संकल्प: इदमेवमित्याकार इत्यर्थ:। 'तत: परं' मनसा संकल्पानन्तरं 'बुद्धि: प्रवर्त्तते' घटमहं जानामीत्याद्याकारं ज्ञानं भवतीत्यर्थ:। तदेव विवृणोति इन्द्रियेणेति। 'इन्द्रियार्थ:' शब्दादि: 'ऊर्द्ध्वम्' इन्द्रियैर्विषयग्रहणानन्तरं 'मनसा गुणतो दोषत: कल्प्यते' अत्र गुणात् प्रवृत्ति: दोषान्निवृत्तिर्वा विधेया इति मनसा विचार्य्यते। 'तत्र विषये या निश्चयात्मिका बुद्धिर्जायते' 'तया' बुद्ध्या 'व्यवस्यते' प्रवृत्यते॥ १८-२३॥

इन्द्रियाणि व्याचिख्यासु: प्रथमतस्तेषां पाञ्चभौतिकत्वं प्रतिपादयति 'एकैके'त्यादि। 'एकैकाधिकयुक्तानि' एकैकेन अधिकेन युक्तानि। पञ्च-महाभूतात्मकेष्वपि तेषु एकैकस्मिन्निन्द्रिये एकैकस्य भूतस्याधिक्यं वर्त्तत-इत्यर्थ:। तथाचोक्तं सूत्रस्थाने इन्द्रियोपक्रमणीये "पञ्चमहाभूतविकारसमु-दायात्मकानामपि सतामिन्द्रियाणां तेजश्चक्षुषि खं श्रोत्रे घ्राणे क्षितिः आपो रसने स्पर्शनेऽनिलो विशेषेणोपपद्यते।" इति। उक्तञ्चान्यत्र तन्त्रे—

"खं श्रोत्रे स्पर्शने वायुर्दर्शने तेज उत्कटम्।
सलिलं रसने भूमिर्घ्राणे तज्ज्ञैर्निरूपितम्॥
रजोऽंशै: पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु।
वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे॥" इति।

तानीन्द्रियाण्यप्रत्यक्षाणीत्याह 'पञ्चे'ति। 'पञ्चकर्म्मानुमेयानि' पञ्चभि: कर्म्मभि: श्रवणादिभि: अनुमेयानि तत्तदर्थग्रहणात्तत्तदिन्द्रियस्य सत्ता उपलभ्यत इत्यर्थ:। 'येभ्य:' कर्म्मभ्योऽनन्तरं बुद्धि: प्रवर्त्तते।' कर्म्मेन्द्रियाण्याह 'हस्ते'ति। जिह्वेन्द्रियं वागपरपर्य्यायम्। 'वाक् च' द्विविधा 'सत्या ज्योति:' ज्योति:स्वरूपा सत्त्वगुणेत्यर्थ:। अनृता तम: तमोगुणाश्रया इत्यर्थ:॥ २४-२६॥

षोडशविकारेषु इन्द्रियाण्येकादश व्याख्याय क्रमतोऽर्था: पञ्चाभि-धातव्या इति तेषां महाभूतगुणत्वात् सार्थानि महाभूतान्याह 'महे'ति। 'ख'माकाशम्। 'तद्गुणा:' तेषां महाभूतानां गुणा:। 'तेषां' मध्ये 'पूर्व:' प्रथम:। खमित्यर्थ:। 'एकगुण:' शब्दमात्रगुण:। 'परे परे' महाभूते 'गुणवृद्धि:' द्वितीयो द्विगुणस्तृतीयस्त्रिगुण एवं 'क्रमश:' यथाक्रमं 'गुणिषु'

खादिभूतेषु 'पूर्वः पूर्वो गुणः' स्वगुणातिरिक्तः पूर्ववर्त्तिगुणश्च 'स्मृतः' तत्र वर्त्तत इत्याख्यातः। तद् यथा खं शब्दमात्रगुणम्। वायुः स्पर्शगुणः शब्दगुणश्च। अग्नी रूपगुणः शब्दस्पर्शगुणश्च। आपो रसगुणाः शब्दस्पर्शरूपगुणाश्च। क्षितिश्च गन्धगुणा शब्दस्पर्शरूपरसगुणा चेति ॥२७-२८॥

तेषामसाधारणं लक्षणमाह खरेति। भुवः खरत्वं जलस्य द्रवत्वं वायोश्चलत्वं तेजस उष्णत्वम् 'आकाशस्य' च 'अप्रतिघातः' बाधाविरहितत्वं 'लिङ्गं' ज्ञानकारणम्। ननु तल्लक्षणं कैरिन्द्रियैर्ज्ञायत इत्याह 'लक्षण'मिति। 'लक्षणं' पूर्वोक्तं खरत्वादिकं 'स्पर्शनेन्द्रियगोचरम्' एकेन स्पर्शनेन्द्रियेणैव ज्ञायत इत्यर्थः। नन्वाकाशस्य स्पर्शनेन्द्रियगोचरत्वं कथं संगच्छत इत्याह 'स्पर्शने'ति। 'हि' यतः 'सविपर्य्ययः' अभावसहितः 'स्पर्शः' 'स्पर्शनेन्द्रियविज्ञेयः' स्पर्श इव स्पर्शाभावोऽपि स्पर्शनेन्द्रियेणैव गृह्यते। अतः सर्वथा स्पर्शाभावरूपत्वाद् आकाशोऽपि त्वगिन्द्रियग्राह्यएव। ननु खरत्वादयः गुणा एवेति ते कथमिन्द्रियग्राह्या भवन्तीत्याह 'गुणा' इति। 'गुणिनां' द्रव्याणां 'शरीरे गुणा निर्दिष्टाः' समवायसम्बन्धेन वृत्तिमत्त्वादपृथग्भूताः 'चिह्नमेव' गुणिज्ञानस्य लिंगमेव। 'शब्दादयोऽर्था गुणाः' अतो 'विषयाः' श्रवणेन्द्रियादेरिति शेषः। 'गोचराः' तत्तदिन्द्रियग्राह्याः अतएव 'ज्ञेयाः' ॥ २६-३१ ॥

"खादीनि बुद्धिरव्यक्तमहङ्कारस्तथाष्टमः। भूतप्रकृतिरुद्दिष्टा" इति निर्देशात् खादीनि व्याख्याय बुद्धिं विवृणोति 'या' इति। या बुद्धिरिति योजना। 'तेन' इन्द्रियेण 'सा' बुद्धिः 'निर्देशं याति' चक्षुर्बुद्ध्याद्याकारेण निर्दिष्टा भवति। 'मनोभवा' बुद्धिः 'मनसा च' चकारान् निर्देशं यातीत्यन्वयः। बुद्धेर्बहुत्वं प्रतिपादयति 'भेदा'दिति। 'कार्य्येन्द्रियार्थानां' कार्य्याणामिन्द्रियाणामर्थानाञ्च 'भेदाद्' बहुविधाकारात् मानवानां 'बुद्धयो वै' अप्यर्थोऽयं वै शब्दः। 'बह्वयः' बहुविधाकाराः स्मृताः। एकापि विभिन्नसन्निकर्षाद् विभिन्नाकारा जायत इति भावः। 'आत्मेन्द्रियमनोर्थानां' प्रतिपुरुषं स्थितानाम् आत्मनाम् इन्द्रियाणां मनसाम् अर्थानाञ्च 'सन्निकर्षजा' या बुद्धिर्जायते सा 'एकैका' सर्वा एव पृथगित्यर्थः। उदाहरणेन तमर्थं स्पष्टयति 'अंगुली'ति। 'यथा अंगुल्यंगुष्ठतलजः' मध्यमांगुल्यंगुष्ठतलसंयोगाज्जातः यः 'शब्दः' छोटिकाशब्द इत्यर्थः। 'तन्त्रीवीणानखोद्भवः' तन्त्र्या वीणागुणस्य वीणाया नखस्य च संयोगाज्जातः 'शब्दो यथा दृष्टः' यथा शब्दत्वसामान्येऽपि द्वौ शब्दौ पृथगित्यनुभूयेते इत्यर्थः। 'तथा संयोगजा' भिन्नानामात्मेन्द्रियमनोऽर्थानां 'सन्निकर्षजा बुद्धिर्दृष्टा' बुद्धिरपि परस्परं भिद्यत इत्यर्थः। अतस्तस्या बहुत्वमिति भावः॥ ३२-३४ ॥

बुद्धिं निरूप्य क्रमागतत्वादव्यक्तमाह 'बुद्धी'ति। 'परम्' अव्यक्तम् आत्मेति निष्कर्षः। 'बुद्धीन्द्रियमनोऽर्थानां योगधरं' सन्निकर्षप्रापकं

'विद्यात्' मृतशरीरे ज्ञानाभावदर्शनादिति भाव: । क्रमप्राप्तस्याहङ्कारस्यात्मधर्म्मत्वात् तद् व्याख्यानमनावश्यकमित्युसंहरति चतुर्विंशतिक इति। 'एष' पूर्वोक्त: एकादशेन्द्रियाणि पञ्चार्था: पञ्चमहाभूतानि बुद्धिरात्माऽहंकारश्चेति 'चतुर्विंशतिको राशि:' चतुर्विंशतितत्त्वसमन्वित: पदार्थविशेष: 'पुरुषसंज्ञक:' पुरुष इत्युच्यते ॥ ३५

ननु स्थूलशरीरनाशाद् भवदुक्तस्य पुरुषस्य नाशो भवति । अतस्तादृशे पुरुषे ऐहिकपारत्रिककर्म्मफलादेरनुबन्ध: कथं सङ्गच्छत इत्याह रज इति । 'रजस्तमोभ्यां युक्तस्य पुरुषस्यायं संयोगोऽनन्तवान्' स्थूलदेहनाशान्न नश्यति परन्तु सूक्ष्माकारेणायं चतुर्विंशतिको राशि: देहादेहान्तरं संक्रामतीत्यर्थ: 'ताभ्यां' रजस्तमोभ्यां 'निराकृताभ्यां' 'सत्त्वबुद्ध्या'‡ विशुद्धसत्त्वोद्रेकेण 'निवर्त्तते' न संसरति मुक्तिमाप्नोतीत्यर्थ: । 'अत्र' रजस्तमोभ्यां युक्ते कर्म्मपुरुषे कर्म्मफलादिकं सर्वं प्रतिष्ठितं सत्त्वप्रधानं मुक्तपुरुषं तु कर्म्मफलादिकं किञ्चिदपि न लिम्पतीत्याशय: । 'स्वता' अहमिका 'प्रलयोदयौ' मुक्ति: संसारश्च ॥ ३६-३८ ॥

'पुरुष: कारणं कस्माद्' इति द्वितीयप्रश्नस्योत्तरमाह 'पारम्पर्य्य'मिति । 'यदि पुरुष:' पञ्चमहाभूतशरीरिसमवाय: चतुर्विंशतिको वा कर्म्मपुरुष: "कर्त्ता वेदिता न भवेत्' तर्हि देहात्मवादापातात् 'पारम्पर्य्य' ज्ञानस्मृत्यादे: 'भास्तम:' ज्ञानमज्ञानञ्चेत्यादिकं 'न स्यात्' नोपपद्यते । देहस्य भंगुरत्वादिति भाव: । पुनरपि कार्य्यान्तरप्रदर्शनेन मतमेतद् द्रढयति 'नाश्रय' इति । आश्रय: अधिकरणम् व्याध्यारोग्यादीनामित्यर्थ: । मृतशरीर एतेषामदर्शनात् । 'तस्मात् पुरुष:' पञ्चमहाभूतशरीरिसमवाय: कर्म्मपुरुष: कारणम् ॥ ३९-४१ ॥

ननु केवलात्मन: कर्त्तृभोक्तृत्वादिश्रवणात् स एव, तस्य नि:सङ्गत्वादिश्रवणाद् देह एव वा कारणं भवतु न तु भवदुक्त: पुरुष इत्याशङ्क्य निराकरोति 'न'चेति । 'आत्मा' केवलो देहाद्यसंसृष्ट इत्यर्थ: । 'कारणं' कार्य्यादीनामित्यर्थ: । 'न स्यात्' देहव्यतिरिक्तस्य तस्य कर्म्मकरणासम्भवादिति भाव: । 'खादय:' पञ्चभूतानि देहमात्रमित्यर्थ: । पुन: 'अहेतुका:' कारणं न स्यु: । हेतुदृष्टान्ताभ्यां तत् प्रतिपादयति 'ने'ति । 'एषु' खादिषु 'ज्ञानं न सम्भवेत्' मृतशरीरे व्यभिचारादित्यर्थ: । 'तै'रनात्मकै: खादिभि: 'प्रयोजनं' किमपि कार्य्यं 'न स्यात्' । 'य:' पुरुष: 'कुम्भकाराहते' कर्त्तारं विना केवलं 'मृद्दण्डचक्रै: घटं कृतं वदेत्' 'गृहकाराद् विना च' केवलं 'मृत्तृणकाष्ठै: गृहं कृतं वदेत् ।' 'स युक्त्यागमबहिष्कृत:' अनुमानादिप्रमाणं वेदादिशास्त्रप्रमाणञ्च न्यक्कृत्य 'अज्ञानात्' नास्तिक्यमाश्रित्य 'कर्त्तारं विना' कञ्चिच्चेतनं कर्त्तारं विना 'देहं सम्भूय करणै: कृतं' मदशक्तिवदचेतनपदार्थसम्मेलनात् प्राप्तचैतन्यं 'वदेत्' । कुम्भकारादि विना घटाद्युत्पत्तिवत्

‡ 'सत्त्वबुद्ध्या' इति पाठ: ।

कर्त्तारं विना कार्य्यं भवतीति वदेदित्यर्थः। 'येभ्यः सर्वेभ्य आगमेभ्यः' श्रुतिभ्यः 'प्रमेयं' पुरुषः 'प्रतीयते' उपलभ्यते तैः 'सर्वैः प्रमाणैः पुरुषः कारणमुपलभ्यते ॥ ४२-४५ ॥

देहात्मवादं निरस्य क्षणभङ्गवादिनां बौद्धानां मतमुपन्यस्य निराकरोति 'न त' इत्यादि। तेषां मते सर्वे भावाः क्षणिकाः सदैव परिवर्त्तन्ते। अस्मिन् क्षणे वर्त्तमानस्य परस्मिन् अतादवस्थ्यात्। 'नरात् † पारम्पर्यसमुत्थिताः' क्षणिकदेहसन्तानक्रमेण जाता 'ये नराः सारूप्यात्' सादृश्यात् 'त एवेति निर्दिश्यन्ते' त एव पुरुषा इति जनैरुपलभ्यन्ते 'न ते' पूर्वानुभूता नरा भवन्तीति शेषः। 'तु' किन्तु 'तत्सदृशाः च अन्ये भावाः' पूर्वनरसदृशा अन्य एव ते। नन्वेक एव कार्य्यस्य कर्त्ता भोक्ता च भवितुमर्हति इत्याह 'तेषा'मिति। 'तेषां' क्षणादुत्पादविनाशशीलानां नराणां भावानां वा 'समुदयः' सन्तानः 'निरीशः' स्थिरात्मरहितः 'सत्त्वसंज्ञकः' 'कर्त्ता भोक्ता च' भवतीति शेषः। 'न स' भवदुक्तः पञ्चमहाभूतशरीरिसमवायः 'पुमान्' पुरुषः कर्त्ता भोक्ता चेति शेषः। 'इति केचित्' क्षणभङ्गवादिनो बौद्धाः 'व्यवस्थिताः'। तदेतत् खण्डयति 'तेषा'मिति। 'यैरात्मा' स्थिरो 'नोपदिश्यते' 'तेषां' मते 'अन्यैर्भावैः' स्थिरात्मविहीनैः क्षणिकैरित्यर्थः। 'कृतस्य' कर्म्मणः 'फलम्' 'अन्ये' पश्चादुत्पन्नाः 'सदृशा भावा नराः'‡ न तु कर्त्तार इत्यर्थः। 'भुञ्जते इति प्राप्तम्' इत्यन्वयः। ननु देहसन्तान एव कर्तृत्वे भोक्तृत्वे कारणं भवत्वित्याह 'कारणे'ति। 'कारणान्यान्यता' कारणयोः कर्त्तृभोक्तुश्च अन्यान्यता पृथक्ता भेद इति यावत्। 'दृष्टा' अनुभूता सर्वैरिति शेषः। 'तु' पक्षान्तरे 'स एव' एक एव भावः 'कर्त्ता भोक्ता च' भवितुमर्हतीति शेषः। 'हि' यतः 'कर्त्ता करणैर्युक्तः' कारणसामग्रीभिः सहितः 'सर्वकर्म्मणां कारणं' भवतीति शेषः। 'भावानां' भवदुक्तनिरीशसत्त्वसंज्ञकानाम् 'अत्यये' ध्वंसे अपेक्षितः 'कालो निमेषकालाच्छीघ्रतरः' अतो 'भग्नानां' क्षणान्नष्टानां पुरुषाणां 'कृतं कर्म्म' 'पुनर्भावे' पुनरुत्पत्तौ 'अन्यं' पश्चादुत्पन्नं पुरुषं 'न उपैति' न तेन सह सम्बध्नाति। अतोऽसम्बद्धस्य कर्म्मफलभोगो नोपपद्यत इति भावः। 'यस्मादेतत्तत्त्वविदां मतं' 'तस्माद् भूतानां' पदार्थानां 'क्रियोपभोगे' क्रियायामुपभोगे च 'स नित्यः पुरुषसंज्ञकः' पञ्चमहाभूतशरीरिसमवायः चतुर्विंशतिको वा 'कारणम्' इति। उपसंहरति अहङ्कार इति। 'देहमन्तरा' शरीरं विना 'कारणे' स्थिरात्मरूपे 'सति' विद्यमाने 'भूतानां' पुरुषाणाम्' 'अहङ्कारादिकं विद्यते' सत्येव देहातिरिक्ते कस्मिंश्चित् कारणे स्थिरात्मरूपे अहङ्कारादिकं सम्भवति नान्यथेति भावः ॥ ४६-५२ ॥

"पुरुषस्य प्रभवः कः" इति प्रश्नस्योत्तरमाह प्रभव इति। 'परमात्मनः' देहव्यतिरिक्तस्येत्याशयः। 'अनादित्वात्' 'प्रभव' उत्पत्तिहेतुर्न-

† 'नरान्नराः' इति पाठः। ‡ 'भावैर्नराः फलम्' इति पाठः।

विद्यते'। 'तु' पक्षान्तरे 'राशिसंज्ञ: पुरुष:' पञ्चमहाभूतशरीरिसमवाय: 'मोहेच्छाद्वेषकर्म्मज:' मोहेच्छाद्वेषादिकर्म्मवशाज्जायते तथा चोक्तं याज्ञवल्क्यस्मृतौ (३।४।१२५)

"अनादिरात्मा सम्भूतिर्विद्यते नान्तरात्मन: ।
समवायी तु पु ो मोहेच्छाद्वेषकर्म्मज: ॥" इति ॥ ५३ ॥

"किमज्ञो ज्ञ:" इति प्रश्नोत्तरमाह 'आत्मे'ति । 'आत्मा ज्ञ:'। ननु कदाचित् सत्यप्यात्मनि ज्ञानाभावो दृश्यत इति विशिष्याह 'करणै'रिति । 'करणै'र्मनोबुद्ध्यादिभि'र्योगात्' 'तस्य' आत्मनो 'ज्ञानं प्रवर्त्तते'। ज्ञानाभावकारणं दृष्टान्तेन विशदयति 'करणाना'मिति । 'करणानां' चक्षुरादीनाम् 'अवैमल्याद्' दोषाद् 'अयोगाद्वा' आत्मेन्द्रियमन:सन्निकर्षाभावाद्वा 'न वर्त्तते' ज्ञानमिति सम्बन्ध: । 'यथा संक्लिष्टे' मलिने 'आदर्शे' दर्पणे 'कलुषे' आविले 'वा जले' पश्यतोऽपि दर्शनं नास्ति' न प्रतिच्छाया दृश्यत इत्यर्थ: । 'तद्वच्चेतसि' अत्र चेत:पदस्यान्त:करणानामुपलक्षणाद् बुद्धौ चेतसि ज्ञानेन्द्रिये च 'उपहते' दुष्टे ज्ञानं न भवतीति शेष: । कानि तानि करणानि इत्याह 'करणानी'ति । कर्त्तु'रिति । 'कर्त्तु'रात्मन: 'कर्म्म' 'वेदना' ज्ञानसामान्यम् 'बुद्धि'र्निश्चयात्मिका एतत्त्रयं 'संयोगजं' करणादिभि: सह संयोगाज्जायते । 'भूतात्मा' जीवात्मा 'एक:' भूताद्यसंसृष्ट: 'न कर्त्त प्रवर्त्तते न वा फलमश्नुते' भुङ्क्ते । 'संयोगाद्' भूतादिसंसर्गात 'सर्व' कर्म्मकर्म्मफलज्ञानादिकं 'वर्त्तते' भवति । 'तमृते' संयोगं विना 'किञ्चन नास्ति' । नन्वनात्मकादेव पदार्थाज् ज्ञानं भवत्वित्याह 'नही'ति । 'हि' यत: 'भाव:' पदार्थ: 'एक' अनात्मको 'न वर्त्तते' ज्ञानाय न प्रवर्त्तते, 'अहेतुकोऽपि' आत्मरहितश्च भाव: 'न वर्त्तते' न तिष्ठति तस्य क्षणविध्वंसित्वात् । अपितु 'शीघ्रगत्वात् स्वभावाद् भावो न व्यतिवर्त्तते' क्षणभङ्गशीलत्वं स्वभावं कदाचिन्न त्यजतीत्यर्थ: ॥ ५४-५८ ॥

स किं नित्योऽनित्यो वेति प्रश्नस्योत्तरमाह अनादिरिति । 'अनादि: पुरुष:' परमात्मा केवल इत्यर्थ: 'नित्य:' । तु पक्षान्तरे 'हेतुज:' राशिरूप: पुरुष: पञ्चमहाभूतशरीरिसमवाय: कर्म्मपुरुष इत्यर्थ: । 'विपरीत:' अनित्य: । नित्य इत्युक्तं किन्नाम नित्यत्वमित्युच्यते 'सदि'ति यद् 'अकारणवत्' कारणहीनं 'सद्' विद्यमानञ्च तन् 'नित्यम्' तदुक्तं वैशेषिकदर्शने (४।१।१) "सदकारणवन्नित्यम्" इति । 'हेतुमत्' कारणवद् 'अन्यथा' अनित्यमिति 'द्रष्टम्' । तदेवेति । 'तदेव' अकारणवदेव प्रकृत-आत्मेति भाव: । 'भावाद्' आत्मनो भावात् स्वभावादित्यर्थ: । 'अग्राह्य'-मिन्द्रियैरिति शेष: । तादृश एव हि तस्य स्वभावो येनेन्द्रियैर्न गृह्यत-इत्यर्थ: । पूर्वोक्तं नित्यत्वं पुनर्द्रढयति नित्यत्वमिति । 'कुतश्चन न भावान् नित्यत्वम्' यस्मादेव आत्मा कुतोऽपि भवति तस्मान्नित्य: इति भाव: । 'तदव्यक्तमचिन्त्यं ज्ञेय'मिति योजना । 'व्यक्तमन्यथा' इन्द्रियग्राह्यम-

नित्यमित्यर्थः। तदव्यक्तमेव 'आत्मा क्षेत्रज्ञः शाश्वतो' नित्यः 'विभुरव्ययश्च' तथाचोक्तमहिर्बुध्न्यसंहितायां द्वितीयेऽध्याये—

"आप्नोति जगदित्येवमात्मत्वेन निरूपितः ।
रूपात् प्रकारतोऽव्यक्तेरव्यक्तः परिगीयते ॥
इयत्तयाप्यचिन्त्यत्वादचिन्त्यः परिकीर्त्तितः
सर्वप्रलयभूमित्वादव्ययो व्ययनाशनात् ॥" इति ।

'तस्माद् यदन्यत्' हेतुमदित्यर्थः । 'तद्व्यक्त'मिन्द्रियग्राह्यम् । पुनरपि व्याकृत्य विशदयति 'वक्ष्यत' इति । 'अपरं द्वयं' व्यक्तमव्यक्तञ्च यदिन्द्रियैर्गृह्यते तदेव 'व्यक्तमैन्द्रियकञ्च' । 'पुनरतोऽन्यत्' यदिन्द्रियैर्न गृह्यत इत्यर्थः । 'तदतीन्द्रियम्' इन्द्रियाग्राह्यं 'लिंगग्राह्यं' लिङ्गेनानुमातुं शक्यमित्यर्थः । तदव्यक्तम् ॥ ५६-६२ ॥

"प्रकृतिः का विकाराः के" इति प्रश्नस्योत्तरमाह 'खादीनी'ति । 'खादीनि' पञ्चमहाभूतानि 'अव्यक्त'मत्र आत्मा तथा चोक्तमिहैव—

"अव्यक्तमात्मा क्षेत्रज्ञः शाश्वतो विभुरव्ययः ।" इति ।

"इति क्षेत्रं समुद्दिष्टं सर्वमव्यक्तवर्जितम् ।
अव्यक्तमस्य क्षेत्रस्य क्षेत्रज्ञमृषयो विदुः ॥" इति ।

'स हि हेतुः कारणं निमित्तं.....नित्यो गुणी.....अव्यक्तो जीवो.....अन्तरात्मा चेति ॥" इति (शारीर० ४ अ०)

स्पष्टमिह यद् आयुर्वेददर्शने यदव्यक्तं नाम पुरुषः, क्षेत्रज्ञो, जीवो वा, नतु प्रकृतिर्यथा ईश्वरकृष्णादिपरिगृहीते सांख्यदर्शने । तमेतं विवेकमनुपलभमानाः केचिदत्राप्यव्यक्तपदेन मूलप्रकृतिमेव व्याचक्षाणाः "इति क्षेत्रं समुद्दिष्टं सर्वमव्यक्तवर्जितम्" इत्यादिव्याख्याने विभ्रान्ताः स्वतन्त्रसिद्धान्तविरुद्धं बहुधा जल्पन्ति ।

खादीनामिन्द्रियादिप्रकृतित्वं प्रागेवोक्तम्, "जायते बुद्धिरव्यक्ताद्" इत्यादिना चानुपदमेव स्पष्टीभविष्यति । विकारानाह । विकारा इति । 'बुद्धीन्द्रियाणि' श्रवणादीनि 'पञ्च' कर्म्मेन्द्रियाणि' वागादीनि 'पञ्च' । 'समनस्काश्च पञ्चार्थाः' मनः शब्दादयः पञ्चविषयाश्च । एताभ्यामेव अव्यक्तवर्जिताभ्यां प्रकृतिविकाराभ्यां क्षेत्रं भवतीत्याह 'इति क्षेत्र'मिति । 'इति' पूर्वोक्तौ प्रकृतिविकारौ 'अव्यक्तवर्जितम्' आत्मानं विना 'क्षेत्रं समुद्दिष्टम्' अस्मिंस्तन्त्र इति शेषः । 'बुद्ध्यादित्रयोविंशतितत्त्वसमन्वितं क्षेत्रम् अव्यक्त'मात्मानं तु 'क्षेत्रज्ञं' विदुरित्यन्वयः । क्षेत्रक्षेत्रज्ञयोर्योगादेव चतुर्विंशतिकः पुरुषो भवतीत्यर्थः । तथाचोक्तं याज्ञवल्क्यसंहितायाम् (३।४।१७७-७८

"बुद्धीन्द्रियाणि सर्वाणि मनः कर्म्मेन्द्रियाणि च ।
अहङ्कारश्च बुद्धिश्च पृथिव्यादीनि चैव हि ॥
अव्यक्तमात्मा क्षेत्रज्ञः क्षेत्रस्यास्य निगद्यते ।

ईश्वर: सर्वभूतस्थ: सन्नसन् सदसच्च य: ॥" इति ॥ ६३-६५॥

विकारसंज्ञकानामेकादशानामिन्द्रियाणां पञ्चानाञ्चार्थानाम् उत्पत्ति-क्रम: प्रागेवोदाहृत: । अथ प्रकृतीनामुत्पत्तिक्रमपूर्वकं कर्म्मपुरुषोत्पत्ति-प्रकारं दर्शयति 'जायत' इति । 'अव्यक्तात्' सगुणाद् आत्मनो 'बुद्धि-र्जायते' । 'बुद्ध्याहमिति मन्यते' बुद्धितोऽहङ्कारोत्पत्तिर्भवतीत्यर्थ: । 'अहङ्कार: खादीनि' पञ्चमहाभूतानि 'परं' केवलं नतु ईश्वरकृष्णसम्मत-सांख्यवत् पञ्चतन्मात्रमेकादशेन्द्रियाणि चेति भाव: । 'यथाक्रमम्' आकाशवाय्वग्निजलभूमिक्रमेण उपादत्ते अहंबुद्ध्यैवात्मा सृजतीत्यर्थ: । तथाचोक्तमत्रैव (४।४।४) ।

"स (आत्मा) गुणोपादानकालेऽन्तरीक्षं पूर्वतरमन्येभ्यो गुणेभ्य: उपादत्ते । यथा प्रलयात्यये सिसृक्षुर्भूतान्यक्षरभूत: सत्त्वोपादानमाकाशं सृजति । तत: क्रमेण व्यक्ततरगुणान् धातून् वाय्वादिकांश्चतुर: ।" इति ।

तैत्तिरीयेऽपि (२।१।१) "तस्माद्वा एतस्मादात्मन आकाश: सम्भूत:" इति । याज्ञवल्क्यस्मृतौ च (३।४)—

"सर्गादौ स यथाकाशं वायुं ज्योतिर्जलं महीम् ।
सृजत्येकोत्तरगुणांस्तथादत्ते भवन्नपि ॥"७० ॥
"यथात्मानं सृजत्यात्मा तथा व: कथितो मया ।
विपाकात्त्रिप्रकाराणां कर्मणामीश्वरोऽपि सन् ॥ १८१ ॥
सत्त्वं रजस्तमश्चैव गुणास्तस्यैव कीर्त्तिता: ।
रजस्तमोभ्यामाविष्टश्चक्रवद्भ्राम्यते ह्यसौ ॥" १८२ ॥
"अव्यक्तमात्मा क्षेत्रज्ञ: क्षेत्रस्यास्य निगद्यते ।" २७८—
"बुद्धेरुत्पत्तिरव्यक्तात् ततोऽहङ्कारसम्भव: ।
तन्मात्रादीन्यहङ्कारादेकोत्तरगुणानि च ॥ १७६ ॥
शब्द: स्पर्शश्च रूपञ्च रसो गन्धश्च तद्गुण: ॥" १८०—इति ।

'तत'स्तेभ्य: खादिभ्य: 'सम्पूर्णसर्वाङ्ग:' विषयेन्द्रियादिसमन्वित: 'पुरुषो जातोऽभ्युदित:' आविर्भूत 'इत्युच्यते' तथा चोक्तं याज्ञवल्क्य-स्मृतौ—

"निमित्तमक्षर: कर्त्ता बोद्धा ब्रह्म गुणी वशी ।
अज: शरीरग्रहणात् स जात इति कीर्त्यते ॥" इति (३।४।६६)

इदमत्रावधेयम् । आयुर्वेदनये "एकैकाधिकयुक्तानी"त्यादि (४।१।२४) चरकवचनात् । "भौतिकानि चेन्द्रियाण्यायुर्वेदे वर्ण्यन्ते तथे-न्द्रियार्था: ।" (३।१) इति सुश्रुतवचनाच्च सविषयाणीन्द्रियाणि भौति-कान्येव न त्वाहङ्कारिकाणि यथेश्वरकृष्णादिसम्मते सांख्यनये । अपि-चोक्तं भेलसंहितायाम् (शारीरम् २ अ०)

"घ्राणं गन्धश्च भौमं हि रूपं चक्षुश्च तैजसम् ।
संस्पर्श: स्पर्शनं वायो: श्रोत्रं शब्द: खजन्तथा ॥

रसनञ्च रसाः ह्याप्यं तस्मादेतैरिहेन्द्रियैः ।
यथास्वं तुल्ययोनित्वाद् विषयग्रहणं स्मृतम् ॥" इति ।

तदेतदविविच्य केचित् स्वतन्त्रसिद्धान्तविरोधेन ईश्वरकृष्णादिमतमेव उपादाय प्रकृतसन्दर्भं व्याचक्षते (दृश्यतां चक्रपाणिप्रभृतीनां व्याख्या) । तदत्र सुधिय एव प्रमाणम् ।

पुरुषोत्पत्तिक्रममुक्त्व तस्य ध्वंसक्रममाह 'प्रलय' इति । 'प्रलये' मृत्युकाले स्वकारणलय इति भावः । 'इष्टैर्भावैः' स्थूलदेहादिभिः पदार्थैः 'वियुज्यते' । 'एवं' पूर्वोक्तरीत्या 'रजस्तमोभ्यामाविष्टः' पुरुषः 'अव्यक्ताद् व्यक्तताम्' इन्द्रियग्राह्यतां 'याति' प्राप्नोति आविर्भावकाल इति भावः । 'पुनः' प्रलयकाले' व्यक्तात' स्थूलदेहरूपाद् 'अव्यक्तता' सूक्ष्मरूपत्वादतीन्द्रियतां यातीत्यन्वयः । एवं 'चक्रवत् परिवर्तते' आमोक्षादिति शेषः । तमेवार्थं पुनर्विवृणोति 'येषा'मिति । 'द्वन्द्वे' रजस्तमोरूपे 'परासक्तिः महानुरागः अस्तीति शेषः । 'ये' च पुरुषाः 'अहङ्कारपराः' अहं कर्त्तेति मन्यमाना भवन्तीति शेषः । 'तेषामुदयप्रलयौ' जन्ममृत्यू भवत इति शेषः । 'ये त्वतोऽन्यथा' रागादिविरहिता मुक्ता इत्यर्थः । 'तेषां न' उदयप्रलयौ भवत इति योजना ॥ ६६-६६ ॥

'किं लिङ्गं पुरुषस्य चे'ति प्रश्नस्योत्तरमाह 'प्राणे'ति । एतानि प्राणापानादीनि जीवात्मनो लिङ्गानीत्यन्वयः । प्राणापानावित्येताभ्यां श्वासप्रश्वासादिसर्वविधवातकर्माणि परिगृह्यन्ते । 'निमेषाद्याः' शरीरस्य स्वाभाविक्यः क्रियाः । 'इन्द्रियान्तरसञ्चारः' इन्द्रियान्तरेण ज्ञातेऽर्थे इन्द्रियान्तरस्य सञ्चारः यत्पुष्पमहमद्राक्षं तदेवाहं जिघ्रामीत्येवंरूपः । 'प्रेरणम्' इन्द्रियाणां विषयसंसर्गः । 'धारणं' तदवगमः । 'स्वप्ने देशान्तरगतिः' । 'पञ्चत्वग्रहणम्' पञ्चभूतावशेषत्वप्रापणम् मरणमित्यर्थः । 'दक्षिणेनाक्ष्णा दृष्टस्य' विषयस्य 'सव्येन' वामेन चक्षुषा दर्शनाद् 'अवगमः' सोऽयमित्यवबोधः प्रत्यभिज्ञेत्यर्थः । कथमेतान्यात्मलिङ्गानीत्याह 'यस्मा'दिति । 'यस्माज्जीवतः' प्राणिनः 'एतानि' प्राणापानादीनि । 'लिङ्गानि समुपलभ्यन्ते' 'मृतस्य न' समुपलभ्यन्त इति योजना । 'तस्मादेतान्यात्मलिङ्गानि' आत्मानुमापका हेतवो 'महर्षय आहुः' । पञ्चत्वग्रहणं व्याकरोति 'शरीर'मिति । 'तस्मिन्' आत्मनि । 'शून्यागारं' जनपरित्यक्तवासगृहमिवेत्यर्थः ॥ ७०-७४ ॥

'निष्क्रियस्य क्रिया तस्य भगवन् विद्यते कथम्' इत्याशङ्कां निरस्यति 'अचेतन'मिति । 'मनः' अत्र मनःशब्देन करणानि गृह्यन्ते । क्रियावद्'अचेतनञ्च' । 'पर' आत्मा 'चेतयिता' । 'तस्य विभो' 'रात्मनःमनसा युक्तस्य क्रिया निर्दिश्यन्ते' । अत्र चेतयितृत्वादात्मनः कर्तृत्वं नतु क्रियावतोऽचेतनस्य मनस इत्याह 'चेतनावान्' इति ॥ ७५-७६ ॥

स्वतन्त्रस्यापि तस्यानिष्टयोनिषु जननं प्रतिपादयति 'यथास्वेने'ति ।

'यथास्वेन' स्वकर्म्मानुसारेण 'आत्मन' एव 'सर्वयोनिषु' इष्टानिष्टेषु कर्म्मानुपातिष्विति भावः। 'आत्मानं नयति'† आत्मेति शेषः। 'प्राणी प्राणैः' वायुभिः 'तन्त्रयते' उत्पादयति आत्मानमिति शेषः। तथा चोक्तं सुश्रुते (३।३।२) "क्षेत्रज्ञः.....पुरुषः.....स्रष्टा गन्ता साक्षी धाता वक्ता योऽसावित्येवमादिभिः पर्य्यायवाचकैर्नामभिरभिधीयते..... भूतात्मना सह अन्वक्षं सत्त्वरजस्तमोभिः.....वायुनाभिप्रेर्य्यमाणो गर्भाशयमनुप्रविश्यावतिष्ठते।" इति। 'हि' यतः 'अस्य' आत्मनः 'अन्यस्तन्त्रको नास्ति ॥ ७७ ॥

'वशी यद्यसुखैः कस्माद् भावैराक्रम्यते बलाद्' इति सन्देहमपनुदति 'वशी'ति। कर्म्मानुरूपं फलं भवतीति वशी सन्नपि अशुभं कर्म्म कृत्वाऽसुखैर्भावैर्युज्यत इत्याशयः। तर्हि कुत्रास्य वशित्वमित्याह 'वशी चेतः' इति। 'समाधत्ते' अभ्यासयोगेनेति शेषः। 'निरस्यति' वैराग्येणेति शेषः। अवशित्वे चित्तसमाधिः सर्वसंकल्पत्यागश्च नायातीत्यर्थः ॥ ७८ ॥

'सर्वाः सर्वगतत्वाच्च वेदनाः किं न वेत्ति सः' इति शङ्कामपाकरोति 'देहीति'। 'हि' यतः 'सर्वगतोऽपि आत्मा देही' तत्तद्देहगतः सन् 'स्वे स्वे संस्पर्शनेन्द्रिये' तत्तच्छरीरगतस्पर्शनेन्द्रियाधिकरणे 'सर्वा वेदना वेत्ति'। 'अत आत्मा' 'सर्वाश्रयस्थाः' पराधिकरणगताः 'वेदना न' वेत्तीति योजना ॥ ७९ ॥

'न पश्यति विभुः कस्माच्छैलकुड्यतिरस्कृतम्' इति तर्कं समाधत्ते विभुत्व'मिति। 'यस्मात् सर्वगतो महानात्मा' 'मनसः समाधानात्' योगबलात् 'तिरस्कृतं' शैलादिव्यवहितं 'पश्यति'। 'अत एवास्य' आत्मनो 'विभुत्वं' युज्यत इति शेषः। मनःसमाधेरन्तरेण कथं न पश्यतीत्याह 'नित्ये'ति। 'देहकर्म्मानुपातिना' तत्तद्देहकर्म्मानुसारिणा 'मनसा नित्यानुबन्धं' नित्यसम्बन्धं 'सर्वयोनिगतमप्यात्मानं' विभुत्वादित्यर्थः। 'एकयोनौ' एकस्मिन्नेव शरीरे 'स्थितं विद्यात्' परिमितिकायसंसर्गाद् अपरिमितोऽपि परिमित एव भवतीत्यर्थः ॥ ८०-८१ ॥

'क्षेत्रज्ञः क्षेत्रमथवा किं पूर्वम्' इति संशयं निराकरोति आदिरिति। 'आत्मनः' क्षेत्रज्ञस्य पुरुषस्य 'आदिर्नास्ति' नित्यत्वादनादिरित्यर्थः। 'क्षेत्रपारम्पर्य्यम् अनादिकम्' तत्तत्क्षेत्रस्यानित्यत्वेऽपि तत्पारम्पर्य्यमनादि प्रथमक्षेत्रस्योत्पत्तिकालकल्पनायां कृतनाशादि दोषापातात्। 'अतस्तयोरनादित्वात् किं पूर्वमिति नोच्यते' पूर्वापरकल्पना न युज्यत इत्यर्थः ॥ ८२ ॥

'साक्षिभूतस्य कस्यायं कर्त्ता हान्यो न विद्यते' इति प्रश्नस्योत्तरमाह 'ज्ञ' इति। 'ज्ञः' चेतनः 'साक्षीत्युच्यते' साक्षी भवितुमर्हति। 'अज्ञः' अचेतनः 'न' साक्षी भवितुमर्हतीत्यर्थः। 'सर्वभावाः' सर्वकर्म्माणि ॥ ८३ ॥

अविकारस्य तस्यात्मनोऽनुभवसिद्धे भेदे हेतुमाह 'नैक' इति।

† नयतिसर्वयोनिषु' इति पाठः

'एकः' पञ्चमहाभूतासंसृष्टः 'भूतात्मा' जीवात्मा 'न लक्षणैरुपलभ्यते' न ज्ञानगम्यो भवतीत्यर्थः। 'एकस्य' अतएव 'अनुपलभ्यस्य' अवाङ्मनसगोचरस्य 'तस्य' आत्मनः 'विशेषः' भेदो न विद्यते'। 'संयोगपुरुषस्य' पञ्चमहाभूतशरीरिसमवायस्य 'वेदनाकृतः' अनुभवसिद्धः 'विशेषः' भेद 'इष्टः' पण्डितैरिति शेषः। 'यत्र' संयोगपुरुषे या 'वेदना' अनुभूतिः 'नियता' निर्दिष्टा 'तत्र' तस्मिन् पुरुषे 'तत्कृतः' तया वेदनया कृतः 'विशेषः' भेदो भवतीति शेषः ॥ ८४-८५ ॥

'अथ चार्त्तस्य भगवंस्तिसृणां कां चिकित्सति' इत्यादि शङ्कां निरस्यति 'चिकित्सती'त्यादिना। 'भिषक् त्रिकाला वेदनाश्चिकित्सती'ति सिद्धान्तः। तत्रातीतवेदनाया अतीतत्वादेव चिकित्सा न सम्भवतीति केषाञ्चिदाशङ्कां निरसितुकाम आह, यद् अतीतोऽपि व्याधिः पुनर्दृश्यते यथा 'पुनस्तच्छिरसः शूल'मागतमित्युच्यते। ततश्चास्य चिकित्सा अतीतवेदनाचिकित्सेति प्रतिपादितम् 'एभिः प्रसिद्धैर्वचनैरतीतागमनं मतम्' इति। उपशान्ते च व्याधौ पुनरागते ननु स वर्त्तमान एव स्यान्नत्वतीतः, ततश्च तच्चिकित्सा नातीतचिकित्सेति, तत्रोत्तरमाह, काल'श्चेति। 'अतीतानां' पूर्वपूर्ववर्षसम्भूतानाम् 'आर्त्तीनां' व्याधीनाम् 'अयं कालः पुनरागतः' गते वर्षे अस्मिन्नेव समये अयं व्याधिः सम्भूत इति मत्वेति भावः। 'तमर्तिकालमुद्दिश्य' लक्ष्यीकृत्य दोषनिर्हरणादिरूपा 'या चिकित्सा क्रियते' सैवातीतव्याधिप्रशमिकेत्यर्थः। उदाहरणेन विशदयति 'आप' इति। 'याभिरद्भिः पुरा शस्यं हतं' 'ता आपः पुनर्मा आगुः' इति मत्वा 'यथा सेतुः' मृण्मयादिरूपा आलिः (बाँध इति वङ्गेषु प्रसिद्धा) 'प्रक्रियते' तथा प्रतिकर्म्म प्रतीकारम् 'आश्रयेत्' पूर्वव्याधिभोगं स्मृत्वा तत्प्रतिरोधकः प्रतीकार एव अतीतवेदनायाश्चिकित्सेत्यर्थः ॥ ८६-९० ॥

पूर्वरूपावस्थायां प्रतीकारकरणं ह्यनागतव्याधिचिकित्सेत्याह 'पूर्वरूप'मिति। 'प्रादुर्भविष्यतां' ये प्रादुर्भविष्यन्ति तेषाम्। मुहुः परिवर्त्तमानस्य वर्तमानस्यापि व्याधेरेकरूपावस्थानाभावात् कथं तस्य चिकित्सा सम्भवतीति प्रतिपादयति 'पारम्पर्य्येति'। 'सुखहेतूपचारेण' आरोग्यप्रदपथ्यौषधव्यवहारेण 'दुःखानां' व्याधीनां 'पारम्पर्य्यानुबन्धः' क्षणविध्वंस्यपि दुःखं परम्परयानुबध्यमानं मानवं पीडयतीति सोऽयं व्याधेरनुबन्धः 'विनिवर्त्तते' नश्यतीत्यर्थः। 'सुखञ्चापि' आरोग्यञ्चापि 'प्रवर्त्तते' परम्परयानुबध्नाति। तदेव मतं युक्तचन्तरेण द्रढयति 'ने'ति। 'समा देहधातवः न वैषम्यं यान्ति' प्राप्नुवन्ति स्वभावत इति तात्पर्य्यम्। 'विषमाः च ते न समतां' यान्ति। 'हेतुभिः' समैर्विशिष्टैश्चेत्यर्थः। 'नित्यं सदृशः' समाना 'जायन्ते'। देहधातुसाम्यमेव स्वास्थ्यस्य लक्षणं न च कारणमन्तरेण देहधातवो विषमाभूत्वा व्याधिमुत्पादयन्ति न वा विषमास्तेऽकारणमेव साम्यमापन्नाः नैरुज्यमापादयन्तीति भावः। अनयैव युक्त्या चिकित्सको भूतभविष्यद्-

'यथास्वेन' स्वकर्म्मानुसारेण 'आत्मन' एव 'सर्वयोनिषु' इष्टानिष्टेषु कर्म्मानुपातिष्विति भावः। 'आत्मानं नयति'† आत्मेति शेषः। 'प्राणी प्राणैः' वायुभिः 'तन्त्रयते' उत्पादयति आत्मानमिति शेषः। तथा चोक्तं सुश्रुते (३।३।२) "क्षेत्रज्ञः.....पुरुषः.....स्रष्टा गन्ता साक्षी धाता वक्ता योऽसावित्येवमादिभिः पर्य्यायवाचकैर्नामभिरभिधीयते..... भूतात्मना सह अन्वहं सत्त्वरजस्तमोभिः.....वायुनाभिप्रेर्य्यमाणो गर्भाशयमनुप्रविश्यावतिष्ठते।" इति। 'हि' यतः 'अस्य' आत्मनः 'अन्यस्तन्त्रको नास्ति ॥ ७७ ॥

'वशी यद्यसुखैः कस्माद् भावैराक्रम्यते बलाद्' इति सन्देहमपनुदति 'वशी'ति। कर्म्मानुरूपं फलं भवतीति वशी सन्नपि अशुभं कर्म्म कृत्वाऽसुखैर्भावैर्युज्यत इत्याशयः। तर्हि कुत्रास्य वशित्वमित्याह 'वशी चेतः' इति। 'समाधत्ते' अभ्यासयोगेनेति शेषः। 'निरस्यति' वैराग्येणेति शेषः। अवशित्वे चित्तसमाधिः सर्वसंकल्पत्यागश्च नायातीत्यर्थः ॥ ७८ ॥

'सर्वाः सर्वगतत्वाच्च वेदनाः किं न वेत्ति सः' इति शङ्कामपाकरोति 'देहीति'। 'हि' यतः 'सर्वगतोऽपि आत्मा देही' तत्तद्देहगतः सन् 'स्वे स्वे संस्पर्शनेन्द्रिये' तत्तच्छरीरगतस्पर्शनेन्द्रियाधिकरणे 'सर्वा वेदना वेत्ति'। 'अत आत्मा' 'सर्वाश्रयस्थाः' पराधिकरणगताः 'वेदना न' वेत्तीति योजना ॥ ७९ ॥

'न पश्यति विभुः कस्माच्छैलकुड्यतिरस्कृतम्' इति तर्कं समाधत्ते 'विभुत्व'मिति। 'यस्मात् सर्वगतो महानात्मा' 'मनसः समाधानात्' योगबलात् 'तिरस्कृतं' शैलादिव्यवहितं 'पश्यति'। 'अत एवास्य' आत्मनो 'विभुत्वं' युज्यत इति शेषः। मनःसमाधेरन्तरेण कथं न पश्यतीत्याह 'नित्ये'ति। 'देहकर्म्मानुपातिना' तत्तद्देहकर्म्मानुसारिणा 'मनसा नित्यानुबन्धं' नित्यसम्बन्धं 'सर्वयोनिगतमप्यात्मानं' विभुत्वादित्यर्थः। 'एकयोनौ' एकस्मिन्नेव शरीरे 'स्थितं विद्यात्' परिमितिकायसंसर्गाद् अपरिमितोऽपि परिमित एव भवतीत्यर्थः ॥ ८०-८१ ॥

'क्षेत्रज्ञः क्षेत्रमथवा किं पूर्वम्' इति संशयं निराकरोति आदिरिति। 'आत्मनः' क्षेत्रज्ञस्य पुरुषस्य 'आदिर्नास्ति' नित्यत्वादनादिरित्यर्थः। 'क्षेत्रपारम्पर्य्यम् अनादिकम्' तत्तत्क्षेत्रस्यानित्यत्वेऽपि तत्पारम्पर्य्यमनादि प्रथमक्षेत्रस्योत्पत्तिकालकल्पनायां कृतनाशादि दोषापातात्। 'अतस्तयोरनादित्वात् किं पूर्वमिति नोच्यते' पूर्वापरकल्पना न युज्यत इत्यर्थः ॥ ८२ ॥

'साक्षिभूतस्य कस्यायं कर्त्ता हान्यो न विद्यते' इति प्रश्नस्योत्तरमाह 'ज्ञ' इति। 'ज्ञः' चेतनः 'साक्षीत्युच्यते' साक्षी भवितुमर्हति। 'अज्ञः' अचेतनः 'न' साक्षी भवितुमर्हतीत्यर्थः। 'सर्वभावाः' सर्वकर्म्माणि ॥ ८३ ॥

अविकारस्य तस्यात्मनोऽनुभवसिद्धे भेदे हेतुमाह 'नैक' इति।

† नयतिसर्वयोनिषु' इति पाठः

'एकः' पञ्चमहाभूतासंसृष्टः 'भूतात्मा' जीवात्मा 'न लक्षणैरुपलभ्यते' न ज्ञानगम्यो भवतीत्यर्थः। 'एकस्य' अतएव 'अनुपलभ्यस्य' अवाङ्मनसगोचरस्य 'तस्य' आत्मनः 'विशेषः' भेदो न विद्यते'। 'संयोगपुरुषस्य' पञ्चमहाभूतशरीरिसमवायस्य 'वेदनाकृतः' अनुभवसिद्धः 'विशेषः' भेद 'इष्टः' पण्डितैरिति शेषः। 'यत्र' संयोगपुरुषे या 'वेदना' अनुभूतिः 'नियता' निर्दिष्टा 'तत्र' तस्मिन् पुरुषे 'तत्कृतः' तया वेदनया कृतः 'विशेषः' भेदो भवतीति शेषः ॥ ८४-८५ ॥

'अथ चार्त्तस्य भगवंस्तिसृणां कां चिकित्सति' इत्यादि शङ्कां निरस्यति 'चिकित्सती'त्यादिना। 'भिषक् त्रिकाला वेदनाश्चिकित्सती'ति सिद्धान्तः। तत्रातीतवेदनाया अतीतत्वादेव चिकित्सा न सम्भवतीति केषाञ्चिदाशङ्कां निरसितुकाम आह, यद् अतीतोऽपि व्याधिः पुनर्दृश्यते यथा 'पुनस्तच्छिरसः शूल'मागतमित्युच्यते। ततश्चास्य चिकित्सा अतीतवेदनाचिकित्सेति प्रतिपादितम् 'एभिः प्रसिद्धैर्वचनैरतीतागमनं मतम्' इति। उपशान्ते च व्याधौ पुनरागते ननु स वर्त्तमान एव स्यान्नत्वतीतः, ततश्च तच्चिकित्सा नातीतचिकित्सेति, तत्रोत्तरमाह, काल'श्चेति। 'अतीतानां' पूर्वपूर्ववर्षसम्भूतानाम् 'आर्त्तीनां' व्याधीनाम् 'अयं कालः पुनरागतः' गते वर्षे अस्मिन्नेव समये अयं व्याधिः सम्भूत इति मत्वेति भावः। 'तमर्तिकालमुद्दिश्य' लक्ष्यीकृत्य दोषनिर्हरणादिरूपा 'या चिकित्सा क्रियते' सैवातीतव्याधिप्रशमिकेत्यर्थः। उदाहरणेन विशदयति 'आप' इति। 'याभिरद्भिः पुरा शस्यं हतं' 'ता आपः पुनर्मा आगुः' इति मत्वा 'यथा सेतुः' मृण्मयादिरूपा आलिः (बाँध इति बङ्गेषु प्रसिद्धा) 'प्रक्रियते' तथा प्रतिकर्म्म प्रतीकारम् 'आश्रयेत्' पूर्वव्याधिभोगं स्मृत्वा तत्प्रतिरोधकः प्रतीकार एव अतीतवेदनायाश्चिकित्सेत्यर्थः ॥ ८६-९० ॥

पूर्वरूपावस्थायां प्रतीकारकरणं ह्यनागतव्याधिचिकित्सेत्याह 'पूर्वरूप'मिति। 'प्रादुर्भविष्यतां' ये प्रादुर्भविष्यन्ति तेषाम्। मुहुः परिवर्त्तमानस्य वर्तमानस्यापि व्याधेरेकरूपावस्थानाभावात् कथं तस्य चिकित्सा सम्भवतीति प्रतिपादयति 'पारम्पर्य्येति'। 'सुखहेतूपचारेण' आरोग्यप्रदपथ्यौषधव्यवहारेण 'दुःखानां' व्याधीनां 'पारम्पर्यानुबन्धः' क्षणविध्वंस्यपि दुःखं परम्परयानुबध्यमानं मानवं पीडयतीति सोऽयं व्याधेरनुबन्धः 'विनिवर्त्तते' नश्यतीत्यर्थः। 'सुखञ्चापि' आरोग्यञ्चापि 'प्रवर्त्तते' परम्परयानुबध्नाति। तदेव मतं युक्तयन्तरेण द्रढयति 'ने'ति। 'समा देहधातवः न वैषम्यं यान्ति' प्राप्नुवन्ति स्वभावत इति तात्पर्य्यम्। 'विषमाः च ते न समतां' यान्ति। 'हेतुभिः' समैर्विशिष्टैश्चेत्यर्थः। 'नित्यं सदृशाः' समाना 'जायन्ते'। देहधातुसाम्यमेव स्वास्थ्यस्य लक्षणं न च कारणमन्तरेण देहधातवो विषमाभूत्वा व्याधिमुत्पादयन्ति न वा विषमास्तेऽकारणमेव साम्यमापन्नाः नैरुज्यमापादयन्तीति भावः। अनयैव युक्त्या चिकित्सको भूतभविष्यद्

वर्त्तमानान् रोगांश्चिकित्सतीत्याह युक्तमिति । हन्तीत्यत्रेतिशब्दो वाक्यसमाप्तौ । 'चिकित्सा' त्रिकालेत्यर्थ: ॥ ६१-६४- ॥

चिकित्सा हि द्विविधा, तात्कालिकी नैष्ठिकी च, तत्र प्रथमां व्याख्याय द्वितीयामाह 'सा नैष्ठिकी' इति । 'नैष्ठिकी' आत्यन्तिकदु:खनिवृत्तिलक्षणा 'या उपधां' चेतोदोषं विना भवतीति शेष: । उपधाया: कार्य्यमाह उपधेति 'हि' यत: 'उपधा' चित्तदोष: रागमदमात्सर्य्यादि: । तथा चोक्तं वैशेषिकदर्शने 'भावदोष उपधा' इति । (६।२।४) । 'दु:खदु:खाश्रयप्रद:' दु:खप्रद: साक्षात् सम्बन्धेन दु:खदायक: यश्च दु:खाश्रयप्रदो भाविदु:खप्रदायकत्वात् दु:खबीजोत्पादक: । 'पर:' अद्वितीयो 'हेतु'र्भवतीति शेष: । उदाहरणेनार्थमेतं विशदयति 'कोषकार' इति । 'कोषकार:' कौषेयसूत्रोत्पादक: कीटविशेष: ('गुटीपोका' इति वङ्गे) 'यथा बधप्रदान्' बन्धनदायकान् 'अंशून्' सूत्राणि 'उपादत्ते' स्वशरीरादेव सूक्ष्मसूत्राण्युत्पाद्य तैरेवाबद्धो भवति तद्वत् । 'अज्ञ: अर्थेभ्य:' इष्टेभ्य: शब्दस्पर्शरूपरसगन्धेभ्य: 'तृष्णां' पुन: पुन: प्राप्तीच्छारूपाम् 'उपादत्ते' दृढं गृह्णाति । अत एव 'सदातुर:' भवतीति शेष: । 'यो ज्ञ:' आत्मज्ञानसम्पन्ना: 'अर्थानग्निकल्पान् दु:खदायकान् 'ज्ञात्वा तेभ्यो निवर्त्तते' वैराग्यमाश्रित्येति भाव: । 'अनारम्भात्' नैष्कर्म्यात् 'असंयोगात्' विषयै: सह संयोगाभावात 'तं जनं दु:खं नोपतिष्ठते' तस्य दु:खसङ्गो न भवतीत्यर्थ: ॥ -६४-६७ ॥

'कारणं वेदनानां किम' इति प्रश्नस्योत्तरमाह 'धीधृती'ति । 'धीधृतिस्मृतिविभ्रंश:' वक्ष्यमाण: प्रज्ञापराध इत्यर्थ: । कालकर्म्मणां कालस्य ऋत्वादिरूपस्य 'कर्म्मण:' जन्मान्तरीयस्य च संप्राप्ति: योग: । अयमेव परिणाम इत्युच्यते । 'असात्म्यार्थागम:' असात्म्येन्द्रियार्थसंयोग: शब्दादीनामयोगातियोगमिथ्यायोगरूप: । 'इति' एतेत्रयो ' दु:खहेतवो ज्ञातव्या'- इत्यन्वय: । एतत्त्रयं व्यासेन व्याख्यातुकाम: प्रथमतो बुद्धिविभ्रंशं व्याचष्टे विषमेति । 'नित्यानित्ये हिताहिते च विषमाभिनिवेश:' नित्ये अनित्यमिति, अनित्येनित्यमिति, हितेऽहितमिति, अहिते च हितमिति, बुद्धिं बुद्धिविभ्रंशं विद्यादित्यर्थ: । 'हि' यत: 'बुद्धि:' 'समं' यथा स्यात्तथा 'पश्यति' हितं हितमेव निश्चिनोति न त्वहितमित्येवं सर्वत्र । धृतिविभ्रंशमाह विषयेति । 'धृतिविभ्रंशात्' संयमविरहात 'विषयप्रवणं' विषयाभिलाषि 'चित्तं अहितादर्थाद्' विषयात् 'नियन्तुं' निवारयितुं 'न शक्यते' । 'हि' यत: सा 'धृति: नियमात्मिका' विषयेभ्यश्चित्तस्य संयमनस्वरूपा । स्मृतिविभ्रंशं व्याचष्टे 'तत्त्वज्ञान' इति । 'रजोमोहावृतात्मन:' सत्त्वगुणाल्पत्वाद् रजस्तमोगुणबहुलस्य 'यस्य' पुरुषस्य 'स्मृतिस्तत्त्वज्ञाने भ्रश्यते' तत्र न प्रवर्त्तत- इत्यर्थ: । तस्य स स्मृतिभ्रंश इत्युच्यते । 'हि' यत: 'स्मर्त्तव्यं' तत्त्वज्ञानं 'स्मृतौ' सत्त्वोद्रेकाद् यथार्थज्ञाने 'स्थितम' । एतत्त्रयमेव प्रज्ञापराधं विद्यादित्याह 'धीधृती'त्यादि । तं पुनरुदाहरणैर्विवृणोति 'उदीरण'मिति । 'गति-

मतां' वातमूत्रपुरीषादीनाम् अनुपस्थितवेगानामिति शेषः। 'उदीरणं' प्रयत्नेनैतेषां कृत्रिमवेगोत्पादनमित्यर्थः। 'उदीर्णानां' जातवेगानां तेषां 'निग्रहः' वेगधारणमित्यर्थः। 'साहसानां' शक्त्यतिरिक्तपरिश्रमाणाम। 'नारीणाञ्चातिसेवनम' अतिमैथुनं कृत्रिमोपायेनातिशुक्रक्षयोऽप्यस्मिन्नेवान्तर्भवतीति बोध्यम। 'कर्म्मकालातिपातः' कर्त्तव्यस्य कालेऽकरणम। 'कर्म्मणां' वाङ्मनःशरीरजानां 'मिथ्यारम्भः' मिथ्यायोगः अनुचितव्यापार इत्यर्थः। 'अभिधर्षणम' अवमानना। 'औन्मादिकानाम' उन्मादकराणां 'प्रत्ययानां' निदानानाम। 'अकालदेशसञ्चारौ' अकाले सञ्चारः झटिकावज्रादिसङ्कुले काले बहिर्निगमनम। अदेशसञ्चारश्च श्मशानादौ भ्रमणम। 'संक्लिष्टकर्म्मभिः' निन्दितकर्म्मकरैः 'मैत्री'। 'इन्द्रियोपक्रमोक्तस्य' सूत्रस्थाने इन्द्रियोपक्रमणीयेऽध्याये कथितस्य। ईर्ष्यादयः स्वत एव प्रज्ञापराधः। 'तज्जम' ईर्ष्यादिप्रसूतम। तैर्वा 'क्लिष्टं' संसृष्टम। 'क्लिष्टं देहकर्म्म' निन्दितं शारीरं कर्म्म। 'शिष्टाः' विद्वांसः। समासतः प्रज्ञापराधं लक्षयति 'बुद्ध्या' इति। विषमविज्ञानं हितेऽहितबुद्ध्यादिवज्ज्ञानम। 'विषमम' अयथावत् प्रवर्त्तनं वाङ्मनःशरीरव्यापारः। 'प्रज्ञापराधं जानीयात्'। 'तद्धि' कर्म्म 'मनसो' विशुद्धमनस एव नतु रजोमोहावृतमनस इत्यर्थः। 'गोचरं' विषयम्॥ ९८-१०९॥

सन्ति व्याधयः कालजाः। कालजत्वञ्चैषां बहुधा भिद्यते। तदेतत् सर्वं प्रपञ्चयन कालस्य संप्राप्तिमाह निर्दिष्टेति। 'हेतुसंग्रहे' पूर्वोक्तसूत्रस्थाने तिस्रैषणीयेऽध्याये 'व्याधीनां' वातादिजानां 'कालसंप्राप्तिः' तत्तत्काले समुत्पत्तिः 'निर्दिष्टा'। 'पुरा' सूत्रस्थाने कियन्तः शिरसीयेऽध्याये। 'वर्षान्ताः' शीतोष्णवर्षलक्षणा ऋतवः। 'मिथ्यातिहीनलिङ्गाः' मिथ्यायोगातियोगायोगयुक्ताः। 'जीर्णे'ति। 'जीर्णभुक्तप्रजीर्णान्नकालाः' जीर्णान्नकालः भुक्तमात्रान्नकालः जीर्य्यमाणान्नकालश्चेत्यर्थः। 'कालस्थितिः' कालं व्याप्य शरीरपरिणतिः एतेन बालयुववृद्धत्वरूपं वयोऽभिधीयते। पूर्वमध्यापराह्णश्च' पूर्वाह्णः मध्याह्नोऽपराह्णश्च। 'रात्र्या ये त्रयो यामाः' पूर्वमध्यापरभेदेनेत्यर्थः। 'तेषु' पूर्वोक्तेषु कालेषु 'ये रोगा नियताः' नियमेन भवन्ति 'ते च कालजाः' कालसंप्राप्तितो जायन्त इत्यर्थः। तद्यथा—वर्षासु, अन्नस्य जीर्णावस्थायां, पुरुषस्य वृद्धे वयसि, अहोरात्रस्य च चरमे भागे वातजानां व्याधीनां नियमेनोत्पत्तिः। तथा शरदि, अन्नस्य जीर्यमाणावस्थायां, यौवने वयसि, दिवारात्र्योश्च मध्यमे भागे पित्तजानाम। एवं वसन्ते, अन्ने भुक्तमात्रे, बाल्ये वयसि, दिवसस्य रजन्याश्च प्रथमे भागे कफजानामिति। एते व्याधयस्तत्तत्कालनियतत्वात् कालजा एवेति भावः। अन्यानपि कांश्चित् कालजान् व्याधीनाह 'अन्येद्युष्क' इति। 'द्वयहग्राही' चातुर्थकविपर्य्ययापरपर्य्यायः। 'अनागते' व्याधिकाले। स्वाभाविकान् कालजान् व्याधीनाह 'कालस्ये'ति। 'जरामृत्व्वनिमित्तजाः' जराव्याधयः स्वाभाविक-

मृत्युव्याधय: अनिमित्तजा व्याधय: क्षुन्निद्रापिपासादय: । 'कालस्य परिणामेन' कालातिवाहनेन स्वत एवैते भवन्तीत्येते 'स्वाभाविका दृष्टा:' मता: । एतेषां चिकित्साऽपि नास्तीत्याह 'स्वभावो निष्प्रतिक्रिय:' इति । औषधादिना अचिकित्स्य इत्यर्थ: ॥ ११०-११५ ॥

अथ कर्म्मजानाह 'निर्दिष्ट'मिति । असात्म्यार्थागम: प्रज्ञापराध: परिणामश्चेति व्याधेस्त्रीण्येवायतनानीति सिद्धान्त: इह पुन: कर्म्मजव्याधेरवतारणाच्चतुर्थमायतनं सम्पद्यत इति कथं न प्रतिज्ञाहानि: । अत्रोच्यते तस्य जन्मान्तरीयप्रज्ञापराधजत्वात् प्रज्ञापराधे, कालपरिपाकफलप्रदत्वात् परिणाम एव वान्तर्भाव: । 'पौर्वदेहिकं' जन्मान्तरीयम् । 'तदपि कालेन' कालपरिणामाद् 'रोगाणां हेतुरुपलभ्यते' ज्ञायते । प्रसङ्गात् तत्प्रशमोपायोऽपि निर्दिश्यते 'नही'ति । 'महद्' अतिपातकादिकरं 'किञ्चित्' स्वल्पं वा 'कर्म्म न' अस्तीति शेष: । 'हि' निश्चये 'यस्य फलं न भुज्यते' । अत: 'कर्म्मजा रोगा: क्रियाघ्ना:' युक्तिव्यपाश्रयकर्म्मणा न प्रशाम्यन्तीत्यर्थ: । 'तत्क्षयात्' दैवव्यपाश्रयकर्म्मणा भोगेन वा कर्म्मक्षयादित्यर्थ: ॥११६-११७॥

वेदनानां तृतीयं कारणमसात्म्यार्थागमं व्याचिख्यासुरादौ शब्दस्यातियोगादिकं विवृणोति 'अत्युग्रे'ति । 'अत्युग्रशब्दश्रवणा'दित्यत्युग्रश्रवणं शब्दस्यातियोग: । शब्दानां 'सर्वशो न श्रवणात्' 'अतिहीनानां' च 'शब्दानां' 'श्रवणात्' 'जडा' बधिरा भवन्तीति शेष: । एताभ्यां शब्दस्यायोगो व्याख्यात: । परुषादिशब्दै: 'श्रवणसंयोग:' शब्दस्य मिथ्यायोग: । 'अशस्त:' अमाङ्गल्य: पुत्रस्ते मृत: धनञ्च तेऽपहृतमित्यादिव्यसनसूचक इत्यर्थ: । स्पर्शस्यायोगादित्रयं व्याचष्टे असंस्पर्श इति । 'अकालेनागत: स्नेहशीतोष्णस्पर्श:' यस्मिन् काले यस्य स्नेहशीतादे: स्पर्शो नेष्ट:, तस्मिन् काले तस्य स्पर्श: अकालेनागत इति ज्ञेयम् । यथा अजीर्णे स्नेहाभ्यङ्ग: कफजे व्याधौ शीते च शीतस्पर्श: । पैत्तिके रक्तजे च व्याधावुष्णे च काले उष्णसंस्पर्श इति । रूपस्यायोगादिकमाह 'रूपाणा'मिति । 'अतिश्लिष्टम्' अतिसन्निहितम् । 'तामसानाञ्च रूपाणां' दर्शनमित्यन्वय: । रसस्यायोगादिकमाह 'अत्यादान'मिति । 'अत्यादानं' मात्रातिरिक्तभोजनम् । ओकसात्म्यादिभिरित्यादिना देशसात्म्यं कालसात्म्यं च परिगृह्येते । 'ओकसात्म्यं' स्वभ्यस्तम् । तै: सह 'विषमादानं' नित्यमन्नभोजिभि: रोटिकादिग्रहणम् । गन्धस्यायोगादिकमाह 'अतिमृद्वि'ति । 'पूतिभूतविषद्विष्टगन्धा:' पूतिगन्धो भूतगन्ध: तथा चोक्तं "राक्षसास्त्वात्मगन्धमाघ्रापयन्त:" इति (निदानम् ७ अ६) विषगन्धो द्विष्टगन्धश्च । उपसंहरति 'इत्यसात्म्ये'ति ।' त्रिविध:' अयोगातियोगमिथ्यायोगरूप: । असात्म्यलक्षणमाह असात्म्यमिति । 'यद्' द्रव्यं सहात्मतां न याति' स्वदेहानुकूलतां न प्राप्नोति ॥ ११८-१२७ ॥

असात्म्यार्थसंयोगाद् यो व्याधिर्जायते स ऐन्द्रियक इति पण्डितै: कथ्यत इत्याह मिथ्येति । 'इत्येते' अयोगातियोगमिथ्यायोगा: अशातानाम

असुखानां "शर्म्मशातसुखानि च" इत्यमरः। 'वेदनानाम्' अनुभवानां व्याधिरूपाणामित्यर्थः। 'समयोगस्तु एकः' अद्वितीयो नान्य इत्यर्थः। 'सुखहेतुः' आरोग्यहेतुः। 'स तु सुदुर्लभः'। व्याध्युत्पत्तावारोग्ये च नेन्द्रियाणि नवा अर्था हेतवो भवन्तीत्याह—'नेन्द्रियाणी'ति 'चतुर्विधो योगः' समातिमिथ्याहीनयोगरूपः। तत्र हेतुं दर्शयति 'सन्ती'ति। सत्स्वपीन्द्रियेष्वर्थेषु वा योगाभावान्न रुग्भवति न वा सुखम् अतश्चतुर्विधयोग एव सुखदुःखयोः कारणमित्यर्थः॥ १२८-१३१॥

'कारणं वेदनानां किम्' इति प्रश्ने सुखदुःखयोर्वेदनयोः दुःखवेदनायाः व्याधिरूपायाः कारणं व्याख्याय साम्प्रतं द्वयोरपि तयोः सामान्यं कारणं विवक्षुः सुखदुःखयोः प्रवृत्तिमाह नात्मेति। आत्मेन्द्रियमनोबुद्धिगोचरं कर्म्म' अनुभूतिरूपं 'विना' 'न' 'सुखदुःखं' भवतीति शेषः। 'यच्च' द्रव्यं 'यथा' सुखात्मकं दुःखात्मकं वा बोद्धव्यं 'तत्' द्रव्यं 'तथा' सुखात्मकं दुःखात्मकं वा 'उच्यते'। कोऽत्र तयोः प्रवर्तक इत्याह स्पर्शने'ति। 'स्पर्शनेन्द्रियसंस्पर्शः' सर्वेन्द्रियाणां व्यापकस्पर्शकृतः संयोगः 'द्विविधः' प्रवृत्त्यात्मको निवृत्त्यात्मकश्च। 'मानस्पर्श एव' मनःसंयोग इत्यर्थः। 'सुखदुःखानां वेदनानां' सुखदुःखानुभवानां 'प्रवर्त्तकः' उपशयात् सुखानुभवः अनुपशयाच्च दुःखानुभव इत्यर्थः। तं द्विविधं संस्पर्शं विवृणोति 'इच्छे'ति। 'इच्छाद्वेषात्मिका तृष्णा' प्रवृत्तिर्निवृत्तिश्च 'सुखदुःखात् प्रवर्त्तते' तत्तज्जातीयद्रव्येषु सुखदुःखानुभवात् तत्तद्द्रव्येषु प्रवृत्तिर्निवृत्तिर्वा भवेदित्यर्थः। 'पुनश्च तृष्णा' प्रवृत्तिनिवृत्तिरूपा 'सुखदुःखानां कारणमुच्यते' एवमिच्छाद्वेषात् सुखदुःखं सुखदुःखाच्चेच्छाद्वेषं भवतीति अन्योन्यकारणत्वम्। सैव तृष्णा वेदनानां मूलकारणमित्युसंहरति 'उपादत्त' इति। 'सा हि' इच्छाद्वेषात्मिका तृष्णा 'वेदनाश्रयसंज्ञकान् भावान्' सुखदुःखालम्बनत्वेन निर्दिष्टान् पदार्थान् 'उपादत्ते' दृढं गृह्णाति इच्छाद्वेषबलादेव सर्वपदार्थस्य ज्ञानं भवतीत्यर्थः। 'अनुपादानः' अभ्यासवैराग्याभ्यां तृष्णारहितः 'न स्पृश्यते' पदार्थैरिति शेषः। 'अस्पृष्टश्च' पदार्थैः सह संसर्गरहित इत्यर्थः। 'वेदनाः' सुखदुःखात्मिकाः 'न वेत्ति' संसर्गराहित्यात् सुखदुःखाभाव इत्यर्थः॥१३२-१३५॥

'वेदनानां किमधिष्ठानमुच्यते' इत्यस्य प्रश्नस्योत्तरमाह 'वेदनाना'मिति। ननु देहश्चेद् वेदनानामधिष्ठानं तर्हि छिन्ने केशादौ कथं न सुखदुःखानुभूतिरित्याह 'केशे'ति। 'अन्नमलं' मलमूत्रशिङ्घाणकादि। 'द्रवगुणाः' द्रवधातवः शोणितादयः॥ १३६॥

'क्व चैता वेदनाः सर्वा निवृत्तिं यान्त्यशेषतः' इति प्रश्नस्योत्तरं वक्ति 'योग' इति। 'योगे' वक्ष्यमाणलक्षणे। मोक्ष इति। 'निःशेषा निवृत्तिः' अत्यन्ताभावः सुखदुःखानामिति शेषः। 'योगश्च मोक्षप्रवर्त्तकः' मोक्षप्राप्तेरुपायः अतस्तत्र वेदनानां प्रवृत्तिर्नास्तीति भावः। योगं विवृणोति

आत्मेति। 'आत्मेन्द्रियमनोऽर्थानां' आत्मन इन्द्रियाणां मनसोऽर्थानाञ्च 'सन्निकर्षात् सुखदु:खं प्रवर्त्तते'। 'अनारम्भात्' योगावस्थायां क्रिया-राहित्यात् 'मनसि' चञ्चलस्वभावेऽपीति शेष:। 'आत्मस्थे' अतएव विषया-ग्रहणात् 'स्थिरे' अचञ्चले। चित्तवृत्तौ निरुद्धायां सत्यामित्यर्थ:। तथा-चोक्तं योगदर्शने "योगश्चित्तवृत्तिनिरोध:" इति (१।१) 'तदुभयं' सुखदु:खं 'निवर्त्तते'। अतएव 'सशरीरस्य' शरीरग्रहणादिन्द्रियस्यापि ग्रहणम्। 'मनस:' 'वशित्वमुपजायते' 'योगज्ञा:' ऋषय: 'त'मेवमवस्था-विशेषं 'योगं विदु'रित्यन्वय: ॥ १३७-१३९ ॥

योगस्य ऐश्वर्य्यमाह 'आवेश' इति। 'आवेश:' परशरीरप्रवेश:। 'चेतसो ज्ञानं' परिचित्तभावज्ञानम्। 'छन्दत:' स्वाभिप्रायानुसारेण 'अर्था-नां' शब्दादीनां 'क्रिया'। 'इष्टत:' स्वेच्छानुसारेण 'दृष्टि:' दर्शनम् यद्-द्रष्टुमिच्छति तदेव पश्यतीत्यर्थ:। 'श्रोत्रं' यत् शुश्रूषते तदेव शृणोति। 'स्मृति:' यत् स्मर्त्तुमिच्छति तदेव स्मरति। 'कान्ति:' कामावसायिता सत्यसंकल्पतेति यावत्। 'अदर्शनम्' अन्तर्द्धानम्। 'इत्यष्टविधं योगिनामैश्वरं बलं' विभूतिरित्यर्थ:। 'शुद्धसत्त्वसमाधानात्' रजस्तमोरहिते विशुद्धसत्त्वे समाधौ 'तत्सर्वम्' अष्टविधमैश्वर्य्यम् 'उपजायते' ॥ १४०-१४१ ॥

योगं व्याख्याय मोक्षं व्याचष्टे मोक्ष इति। 'रजस्तमोऽभावात्' शुद्ध-सत्त्वस्योद्रेकात् 'बलवत्कर्म्मसंक्षयात्' ऐहिकपारत्रिकाणि यानि बलवन्ति कर्म्माणि तेषां भोगेन कर्म्मान्तरेण च संक्षयात् 'कर्म्मसंयोगैर्वियोग:' सर्व-सन्न्यासात् कर्म्मकर्म्मफलासंयोग: अतएव 'अपुनर्भाव:' पुनर्जन्माभाव: 'मोक्ष इत्युच्यते' ॥ १४२ ॥

तत्प्राप्त्युपायान् व्याचष्टे सतामिति। 'सतां' साधूनाम् 'उपासनम्' उपसेवा। 'असतां परिवर्जनम्' असत्सङ्गत्याग:। 'व्रतचर्य्या' चान्द्रायणा-देरनुष्ठानम्। 'उपवास:' विधिविहित एकादश्यादौ। 'पृथग्विधा नियमा:' शौचसन्तोषतप:स्वाध्यायेश्वरप्रणिधानरूपा:। 'धर्म्मशास्त्राणां धारणम्' अभ्यास:। 'विज्ञानं' तदर्थज्ञानम्। 'विजने' जनशून्ये स्थाने 'रति:' वासं कर्त्तुमिति शेष:। 'विषयेषु' शब्दादिषु 'अरति:', 'मोक्षे व्यवसाय:' प्रयत्न:। 'परा धृति:' सर्वसहनशक्ति: सुखदु:खेष्वनुद्वेग इत्यर्थ:। स्मृतेरुदयादनन्तरं किं भवतीत्याह 'कर्म्मणा'मिति। 'कर्म्मणां' कायवाङ्मनोभवानाम् 'असमा-रम्भ:' अप्रवृत्ति: त्याग इति यावत्। 'कृतानां' इह पूर्वेषु वा जन्मसु सञ्चितानां 'परिक्षय:' भोगात् कृत्यान्तराद्वा। 'नैष्क्रम्यं' गृहपरित्याग:। 'अनहङ्कार:' कृतेऽपि कार्य्ये अहंबुद्धेरभाव:। 'संयोगे' पुनरपि विषयादिना संसर्गे 'भयदर्शनं' तच्च महद्दु:खकारणमिति ज्ञात्वा भीति:। 'मनोबुद्धि-समाधानं' मन:समाधि: बुद्धिसमाधिश्च मनसो बुद्ध्याश्च आत्मनि लय इत्यर्थ:। 'अर्थतत्त्वपरीक्षणम्' शब्दादीनां विषयाणां यथार्थस्वरूपनिरूप-णम्। 'एतत् सर्वं' कर्म्मणामसमारम्भादि अर्थतत्त्वपरीक्षणान्तं सर्वं 'तत्त्व-

स्मृतेरुपस्थानात्' उदयात् परमिति शेषः 'प्रवर्त्तते' स्वयमेवागच्छति । तत्त्वस्मृतेरुदये के उपाया इत्याह स्मृतिः सत्सेवनाद्यैरिति । 'सत्सेवनाद्यैः धृत्यन्तैः' सतामुपासनमित्यादिभिः परा धृतिरित्यन्तैः पूर्वोक्तैः कर्मभिः संसेवितैः 'स्मृतिरुपलभ्यते' प्राप्यते तत्त्वस्मृतेरुदयो भवतीत्यर्थः । एतत्-स्मृतिबलेनैव सर्वं कारणवदनित्यमित्यादिपदार्थस्वरूपं स्मृत्वा नैतन्मम नाहमेषः अतो नाहं सुखदुःखभागिति ज्ञाने उदिते दुःखनिरोधः स्यादित्याह स्मृत्वेति ॥ १४३-१४९ ॥

तत्त्वस्मृत्युपस्थापने उपायात् तत्फलानि च व्याख्याय केन हेतुना तदुपायात् स्मृतिरुपस्थास्यतीति विवृणोति वक्ष्यन्ते इति । वक्ष्यमाणैरष्टाभि-र्हेतुभिस्तेभ्य उपायेभ्यः स्मृतिरुपजायत इत्यर्थः । के ते हेतव इत्याह 'निमित्ते'ति । 'निमित्तरूपग्रहणात्' पितृमातृशुक्रशोणितोत्पन्नोऽयं देहो नाय-मात्मा इति स्मृतिर्जायते । 'सादृश्यात्' सति सादृश्ये जीवितमृतयोः स्त्री-शरीरयोः मांसपिण्डत्वबुद्ध्या नास्ति तत्र सुखदुःखकारणतेति स्मृतिर्भव-तीत्यर्थः । 'सविपर्य्ययाद्' इत्यनेन असादृश्यादिति गम्यते । तेन एकस्यैव बालयुववृद्धावस्थायामसादृश्यं दृष्ट्वा नाहं बालो न युवा नवा वृद्ध इति स्मृतिरुपजायत इत्यर्थः । 'सत्त्वानुबन्धात्' रजस्तमोविरहितशुद्धसत्त्वो-द्रेकात् । 'अभ्यासात्' अभ्यासो हि सर्वतः समाहृत्य चित्तस्यैकस्मिन्ना-लम्बने बाह्ये आभ्यन्तरे च पुनः पुनः स्थापनम् , तत्क्रियायोगात् । 'ज्ञान-योगात्' ज्ञानयोगो हि—

"एकत्वं बुद्धिमनसोरिन्द्रियाणाञ्च सर्वशः ।
आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमम् ॥"

इति मोक्षधर्म्मीयोक्तो ज्ञानविशेषस्तस्मात् । 'पुनः श्रुतात्' "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृहदारण्यक २, ४. ५, ४. ५. ६.) इत्यादि श्रुतेः पुनः पुनरात्मस्वरूपश्रवणात् । 'दृष्टश्रुतानु-भूतानां' पदार्थानां 'स्मरणात्' 'सर्वं कारणवद्दुःखमस्वञ्चानित्यमेव च' इत्यादि रूपेण वस्तुतत्त्वानुशीलनात् । पूर्वोक्तैः सत्सेवनाद्यैरुपायैर्निमित्त-रूपादिग्रहणं 'स्मृतिरुच्यते' ॥ १४८-१४९ ॥

पूर्वोक्ततत्त्वस्मृतिबलादेव मोक्षलाभो भवेदित्याह एतदिति । 'तदे-तत्' पूर्वोक्तं तत्त्वस्मृतिबलं 'मोक्षस्य एकमयनम्' अद्वितीयः पन्थाः । 'येन' तत्त्वस्मृतिबलेन 'गताः' मृता 'न' केचित 'पुनरागताः' न पुनर्जायन्ते मुक्ता भवन्तीत्यर्थः । 'एतत् पुनः' तत्त्वस्मृतिबलं 'संख्यातधर्म्मैः' विज्ञात-धर्म्मैः 'सांख्यैः' आत्मतत्त्वज्ञैः 'योगिभिः योगस्यायनम्' उपायः 'आख्या-तम्' । 'मुक्तैः' जीवन्मुक्तैश्च 'महर्षिभिः' 'मोक्षस्य च' अयनमाख्यातमिति योजना ॥ १५०-१५१ ॥

तत्त्वस्मृतिबलादेव सत्या बुद्धिर्जायत इत्याह 'सर्व'मिति । 'कारण-वत् सकारणम् उत्पत्तिधर्म्मकमित्यर्थः । 'सर्वं' वस्तु 'दुःखं' दुःखजनकम

'अस्वम्' अनात्मीयम् 'अनित्यं' प्रध्वंसशीलमेव। 'तत्' सर्वं 'न आत्मा' आत्मा त्वतो भिन्न एवेत्यर्थ:। तत्सर्वं 'कृतकम्' आत्मा त्वकृतक: न केनापि सृष्ट इत्यर्थ:। इत्यादि 'सत्या बुद्धिर्यावन्नोत्पद्यते' तावत् 'तत्र' तस्मिन् सर्वस्मिन् पदार्थे 'स्वता' आत्मात्मीयता एतदहं इदं ममेत्याकारकं ज्ञानम् 'उत्पद्यते'। 'यया' सत्यया बुद्ध्या 'नैतदहं' नाहं देवमनुष्यादि: 'नैतन्मम' एतत् पुत्रधनादिकं न मम 'इति विज्ञाय' समुपलभ्य 'ज्ञ:' ज्ञानी सन् 'सर्वमतिवर्त्तते' अतिक्रम्य वर्त्तते। तत: किं भवतीत्याह 'तस्मिन्' इति। 'तस्मिंश्चरमसन्न्यासे' पूर्वोक्तायां सर्वातिवर्त्तनरूपायामवस्थायां 'समज्ञाज्ञानविज्ञानात्' † समज्ञा कीर्तिर्लौकिकी, ज्ञानमैन्द्रियकं विज्ञानं शिल्पशास्त्रादिज्ञानं एततत्रितयात् 'समूला:' सकारणा: मिथ्याज्ञानरूपा: 'सर्ववेदना:' सुखदु:खाद्यनुभव: 'अशेषतो निवृत्तिं यान्ति' चरमसंन्यासावस्थायां बद्धस्येव पुरुषस्य सुखदु:खसंश्लेषो न वर्त्तत इत्यर्थ:। इयमेव जीवन्मुक्तावस्था ॥ १५२-१५४ ॥

एवं जीवन्मुक्तावस्थां प्रदर्श्य सर्वसंयोगरहितायां चरममुक्तावस्थायां "कैर्लिङ्गैर्भूतात्मोपलभ्यते" इति चरमप्रश्नस्योत्तरमाह अत: परमिति। 'अत: परं' चरममुक्तावस्थायां 'भूतात्मा' जीवात्मा 'ब्रह्मभूत:' परमे ब्रह्मणि लीन: स्यादत: 'नोपलभ्यते' न ज्ञायते केनापि लिङ्गेनेति शेष:। कस्मादित्याह 'नि:सृत' इति। 'सर्वभावेभ्य:' सर्वपदार्थेभ्य: 'नि:सृत:' अतिक्रान्त: अत एव 'यस्य चिह्नं न विद्यते' लिङ्गाभावान्नोपलभ्यत इति भाव:। 'ब्रह्मविदां' मुक्तानां 'गति:' इयमवस्था 'ब्रह्म' ब्रह्मस्वरूपा। 'यद्धि' ब्रह्म 'अक्षरं' क्षयाभावान्नित्यम्। तथा चोक्तमहिर्बुध्न्यसंहितायाम्। (२। ३२) "अक्षयादक्षर: प्रोक्त:" इति। 'अलक्षणं' लिङ्गरहितम्। 'अत्र च' अस्मिन् विषये ब्रह्मविदां ज्ञानं वर्त्तत इति शेष:। 'अज्ञस्तज्ज्ञातुं नार्हति' तदुक्तमहिर्बुध्न्यसंहितायाम् (२। ४१—४२)

"अनेकजन्मसंसिद्धपुण्यपापपरिक्षये।
निवृत्ते वासनाजाले सम्यग् विज्ञानशास्त्रत:॥
त्रैगुण्योपरमे तत्तु स्वेनानुभवितुं क्षमम्।
साक्षादिदमिति व्यक्तं वाचा वक्तुं न शक्नुम:॥" इति।

अतिरोहितार्थमन्यत् ॥ १५५-१५६ ॥

अध्यायसमाप्तिवाक्यमाह तत्र श्लोक इति ॥ १५७ ॥

इति भिषगाचार्य्यश्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां शारीरस्थाने प्रथमोऽध्याय: ॥ १ ॥

---

† 'समज्ञाज्ञानविज्ञानात्' इति पाठ:।

द्वितीयोऽध्यायः ।

प्रथमेऽध्याये आदिसर्गरूपमायुर्वेददर्शनमभिधाय वक्तव्ये शारीरस्थाने शरीरस्यैव उपादानं शरीरिशरीरसंयोगादिप्रकारञ्च व्याचिख्यासुः भगवान् शिष्यप्रश्नोत्तरप्रसंगेन सिद्धान्तं प्रतिपिपादयिषुः अध्यायान्तरमारभते अथात इत्यादिना । तत्र शिष्यस्य अग्निवेशस्य प्रथमप्रश्नमाह अतुल्येति । अतुल्यगोत्रस्य मिथुनीकृतस्य पुंसः स्त्रीषु रजःक्षयान्ते ऋतौ दिवसत्रयात्परं षोडशरात्राभ्यन्तरे विसृष्टं चतुष्पात्प्रभवं षड्भ्यश्च प्रभवमिति शेषः । किं स्यात् यद् गर्भत्वमुपैति इति प्रश्नः । उत्तरयति शुक्रमिति । हीयते त्यज्यते स्त्रीयोन्यां पुंसा इति शेषः । चतुष्पात्प्रभवत्वं दर्शयति वाय्वग्नीति । आकाशस्य सर्वगतत्वात् शुक्रस्य तत्प्रभवत्वं गमने चाप्रयोजनत्वात् नोक्तमित्यवधेयम् । षड्भ्यः प्रभवमाह षड्भ्य इति । षड्रसादाहाराज् जातस्य साररूपस्य अन्नरसस्य सर्वधातूपादानत्वात् शुक्रस्य षड्रसप्रभवत्वं सिध्यति ॥ १–४ ॥

पुनः प्रश्नान् आह सम्पूर्णेति । कथं केन प्रकारेण गर्भः सम्पूर्णदेहः समये यथाकालं सुखञ्च यथा स्यात्तथा जायते ? कथं वा सप्रजा अबन्ध्याऽपि स्त्री चिरात् सुदीर्घकालानन्तरं गर्भं विन्दति लभते ? अथ केन कथं वा गर्भो भूत्वा नश्यति अदर्शनतां याति ? इति त्रयः प्रश्नाः यथाक्रममुत्तरयति शुक्रेति । शुक्रासृगात्माशयकालसम्पदिति–शुक्रशोणितयोः संयुक्तयोः गर्भकरयोः मध्ये आत्मसम्पत् सचेतनता । न खलु सर्वत्र शुक्रशोणिते आत्मनः सत्ता वर्तते । कर्मक्षयाज् जीवो यदा पर्जन्येन पृथ्वीं गत्वा ओषध्यादिषु स्थानं लभते, यदा च तदभ्यवहारान् मानवशरीरे संक्रम्य तच्छुक्रम् अधितिष्ठति, तदैव तच्छुक्रसंसर्गाद् गर्भो भवति नान्यथा । पुनश्च आशयस्य गर्भाशयस्य सम्पद् अदुष्टता दुष्टे हि गर्भाशये गर्भो भवितुं नार्हति । तथा कालसम्पत् ऋतुकालः अनृतुकाले हि स्त्रीबीजस्याभावात् सात्मकमपि शुक्रं गर्भं निर्वर्तयितुं नालं भवतीत्यर्थः । न केवलं शुक्रशोणितसंयोगादेव गर्भः पुष्टो भवितुमर्हतीत्याह यस्येति । यस्य शुक्रशोणितसंयोगरूपस्य गर्भस्य हितैरर्थैः रसगन्धादिभिः उपचारः गर्भावस्थायां पोषणम् । स गर्भः सुखं प्रसूते इत्यन्वयः । द्वितीयप्रश्नस्योत्तरमाह योनीति । योनिप्रदोषात् योनिव्यापद्भिः व्याधिभिः गर्भाशयदोषात् । मनसोऽभितापात् मैथुनकाले इति शेषः । तेन चायथावत् शुक्रशोणितं स्रवति ततश्च गर्भाभावः । शुक्रासृग्दोषात् तत्र शुक्रशोणितयोः दोषस्तु तन्त्रान्तराज्ज्ञातव्यं यदुक्तं सुश्रुते—"वातपित्तश्लेष्मकुणपग्रन्थिपूतिपूयक्षीणमूत्रपुरीषरेतसः प्रजोत्पादने न समर्था भवन्ति ।.....कुणपगन्धि रक्तेन, ग्रन्थिभूतं श्लेष्मवाताभ्याम्, पूतिपूयनिभं पित्तश्लेष्मभ्याम् क्षीणं पित्तमारुताभ्याम् मूत्रपुरीषगन्धि सन्निपातेन.....आर्तवमपि त्रिभिर्दोषैः शोणितचतुर्थैः

पृथग्द्वन्द्वै: समस्तैश्च उपसृष्टमबीजं भवति इति। अत्र अबीजं भवतीति निर्देशात् शुक्रशोणितयोर्बीजभाग एव गर्भोपादक इति ज्ञेयम्। अकालयोगात् ऋतुकालमतीत्य मिथुनीभावात् बलसंक्षयात् दुर्बलत्वात् मिथुनयो: अल्प-शुक्रशोणितस्रावाद् गर्भाभाव:। अबन्ध्यापि चिराद् गर्भं विन्दति। तृतीय-प्रश्नस्योत्तरमाह असृगिति। कदाचित् पवनेन अपानवायुना असृग् ऋतु-शोणितं निरुद्धं मासि मासि अस्रुतं दृष्ट्वेति शेष:। अबुधा: असर्वज्ञा: गर्भं व्यवस्यन्ति गर्भोऽभूदिति निश्चिन्वन्ति। हि यत: तस्या: तदा अस्राव्यि असृक विवर्धमानं गर्भस्य रूपं कुक्षे: प्रसारणादिकं करोति। पुनश्च अग्नि-तापादिसंसर्गात् अथवा उष्णान्नपानैश्च सन्निरुद्धमसृक प्रवृत्तं दृष्ट्वा परन्तु तत्र गर्भं गर्भशरीरं न पश्यन् केचित् तद् भूतहृतं नैगमेषादिभि: भक्षितं वदन्ति। तन्निश्चयं युक्त्या प्रतिषिध्यति ओज इति ओजोऽशनानां ओज एव अशनं येषां नतु शरीरं तेषां रजनीचराणां राक्षसादिनाम्। आहारहेतो: शरीरं न इष्टम् लब्धावकाशा: प्राप्तछिद्रा: प्रसूतिशरीरप्रवेशे इत्यर्थ:, ते गर्भश्छेद् हरेयु: तर्हि कथं मातुरोजो न हरेयु:। अत: सिद्धान्तोऽयमयौक्तिक: इत्याशय:॥ ५-१०॥

पुनरप्यष्टौ शिष्यप्रश्नानाह कन्यामिति। कस्मात् प्रसूते इति सर्वत्रै-वान्वय:। ते च प्रश्ना: (१) पृथक् कन्याम् (२) पृथक् सुतम् (३) सहितौ कन्यां सुतम् (४) सहितौ सुतौ (५) सहिते सुते (६) बहून् तनयान् (७) कथं वा सुचिरेण दशमासान् अतिक्रम्य गर्भं प्रसूते (८) कथं वा यमे एक: अभिवृद्धिमुपैति अपरो न, इत्यष्टौ प्रश्ना:। क्रमश एतेषां प्रश्नानामुत्तरमाह रक्तेनेति। (१) अत्र रक्तेनेति स्त्रीबीजेन किम्भूतेन अधिकेन पुंबीजादधिक-बलवता इत्यर्थ:, नतु परिमाणाधिक्येन, कन्यां सूते। (२) शुक्रेण पुंबीजेन तथैव स्त्रीबीजादधिकबलेन पुत्रं सूते। (३) तेन द्विविधीकृतेन बीजेन यदि तत्र संयोगे द्वयो: द्वयो: स्त्रीपुंबीजयो: सत्ता स्यात्। यथास्वं बीजान्यतरा-धिकेनेति एकस्मिन् संयोगे स्त्रीबीजस्य बलाधिक्यम्, अन्यस्मिंश्च पुंबीजस्ये-त्यर्थ:। तर्हि तत्र एकां सुतां एकं सुतञ्च सूते। (४) एवं द्वयो: मिलित-बीजयो: संयोगे यस्या: बीजं शुक्राधिकं द्वैधमुपैति द्वयोरपि संयुक्तबीजयो: पुंबीजप्रधानता भवेदित्यर्थ:। सा सहितौ यमौ सतौ सूते। (५) तथा द्वयोर्द्वयो: बीजसंयोगे यद्यभयत्र रक्ताधिक्यं स्त्रीबीजयो: प्राधान्यं स्यात् तर्हि सहिते द्वे सुते सूते। एवं यमलप्रसवस्यापि कर्मात्मकत्वात् एकत्रैव बीजद्वयस्य प्रादुर्भावो भवति यच्चोक्तं सुश्रुतेन—

"बीजेऽन्तर्वायुना भिन्ने द्वौ जीवौ कुक्षिमागतौ।
यमावित्यभिधीयेते धर्मेतरपुर:सरौ॥" इति।

(६) अतिप्रवृद्धो वायु: शुक्रार्तवं प्रपन्न: शुक्रार्तवयो: उपादानीभूतेषु त्रिधातुषु अत्यधिके वाते इत्यर्थ:। बहुषु सजीवबीजेषु सत्स्वेव एवं शुक्रा-र्तवौ भवितुमर्हत इत्याशय:। यावत् यतिसंख्यकं बहुधा द्वयोरधिकेन

भिनत्ति भेदमापादयति पृथक् पृथक् स्त्रीबीजेन पृथक् पृथक् पुंबीजसंयोगेन यतिसंख्यकं भेदमवाप्नोतीत्यर्थः। तावन्त्यपत्यानि प्रसूते। तत्र हेतुमाह कर्मात्मकानि इति अतएव अस्ववशादित्याह। सर्वत्रैव मैथुने एकस्यैव स्त्रीबीजस्य स्रावो भवतीति नियमः, तेन च सह एकस्य सजीवस्य पुंबीजस्य संयोगाद् गर्भो भवति। जन्मान्तरीयकर्मवशादेव कदाचिद् द्वे त्रीणि ततोधिकानि वा स्त्रीबीजानि स्युः, शुक्रे च द्वयोर्बहूनां वा पुंबीजानां सत्ता भवेत्, तदैव एवं बह्वपत्यसृष्टिर्भवितुमर्हेदिति तात्पर्यम्॥ (७) यदा गर्भः आहारं मातुरन्नरसं पोषणाय नाप्नोति स्रोतोरोधान् मातुरन्नरसाल्पत्वाद्वा, तदा शोषं परिस्रुतिं वा समाप्नोति। तं गर्भमित्यत्र शुष्कस्यैव ग्रहणम्। परिस्रुतस्य प्रागेवाकालस्रावात्। यदा स शुष्को गर्भः वर्षगणैरपि पुष्टः स्यात् तदा स्त्री सुचिरेण प्रसूते॥ (८) कर्मात्मकत्वात् शुक्रासृजोः द्वयोर्बीजयोः विषमांशभेदात् सबलयोर्बीजयोः संयोगात् एकः अधिकः सबलः स्यात्, पुनः यमे अन्यतरः दुर्बलयोर्बीजयोः संयोगात् न्यूनतरः दुर्बलः स्यात्॥ ११-१६॥

अष्टधा विकृतेन्द्रियस्य सन्तानस्य उत्पत्तौ कारणं जिज्ञासूनां शिष्याणां प्रश्नानाह कस्मादिति यथाक्रममुत्तरं विवक्षुः प्राग्द्विरेतसः उत्पत्तौ कारणमाह बीजादिति। उपतप्तबीजात् उपतप्तं दुष्टं बीजं बीजावयवे यो बीजभागः स्त्रीपुरुषलिङ्गञ्च यस्य तस्मात् बीजात्, पुनः किम्भूतात् समांशादिति। स्त्रीपुरुषबीजयोः बलसाम्यं यत्र सम्मिलिते बीजे वर्तते तथाविधाद् बीजात् द्विरेताः भवति। कीदृशः सः स्त्रीपुंसलिंगीति। तत्र गर्भशरीरे स्त्रीपुंसयोः लिंगे भगशिश्ने वर्तेते इत्यर्थः। परन्तु ते अकर्मण्ये भवतः नपुंसकत्वात्। तन्त्रान्तरेऽपि बीजयोरुभयोः समबलत्वे नपुंसकमेव भवतीति प्रोक्तम् यथा सुश्रुते—"साम्यादुभयोर्नपुंसकमिति"। पवनेन्द्रियास्त्र्यं नपुंसकं व्याकरोति शुक्रेति। पवनवददृश्यम् इन्द्रियं पुंलिंगं स्त्रीलिंगं वा यस्य सः पवनेन्द्रियः। गर्भगतस्य मिलितबीजस्य अवयवं शुक्राशयं वृषणौ स्थूलशुक्रवहे स्रोतसी शेफश्च हत्वा विनाश्य वायुः पवनेन्द्रियत्वं करोति। स च मुष्कादिविहीन एव जायते इति निष्कर्षः। तृतीयं संस्कार वाहिनं नपुंसकमाह शुक्राशयेति। संस्कारेण बाजीकरणादिना मैथुनाय संवाह्यते इति संस्कारवाही इत्यसौ आवस्थिकः क्लीब एव भवति। शुक्राशयद्वारविघट्टनेन शुक्राशयाणां वृषणादीनां द्वारस्य सूक्ष्मशुक्रवहस्रोतोमुखस्य विघट्टनेन पिधानेनेत्यर्थः। यदुक्तं वृद्धवाग्भटे—"यदा तु कात्स्न्र्येन नोपहन्ति, अनुपघ्नन् एव वा स्रोतोमुखं पिधत्ते, तदा संस्कारवाह्यं भवति, तत्र संस्कारो बाजीकरा वस्तयोऽभ्यवहाराश्चेतोहर्षणानि चैतानि शुक्रे बलमादधानानि स्रोतांस्यस्य आप्याययन्ति" इति। चतुर्थं पञ्चमं नरषण्डं नारीषण्डं चाभिधत्ते मन्देति। मन्दाल्पबीजौ मन्दं मन्दवेगं अल्पं च बीजं ययोस्तौ। अबलौ मैथुनशक्तिरहितौ अहर्षौ कामप्रवृत्तिरहितौ क्लीबौ विकृतिद्वयस्य नरनारीषण्डरूपस्य हेतुरत्र लिंगं भवतीति शेषः। षष्ठं वक्तिणमाह

मातुरिति । वक्री नाम वक्रध्वज: तस्य ध्वजो न कदाचित् स्तभ्यते इति सर्वथा मैथुनासमर्थ: । मा तु पितुश्च बीजदौर्बल्यात् व्यवायप्रतिघेन मैथुने अतृप्ततया यो गर्भो भवति, स वक्री स्यात् । सप्तममीर्ष्यारतिम् आह ईर्ष्येति । ईर्ष्यारतिस्तु परस्य मैथुनं दृष्ट्वा ध्वजोच्छ्रायं लभत इति आवस्थिकक्लीवोऽयम् । यदुक्तं सुश्रुते—"दृष्ट्वा व्यवायमन्येषां व्यवाये य: प्रवर्तते । ईर्ष्यक: स च विज्ञेय:" इति । ईर्ष्या परोत्कर्षासहिष्णुता, तया अभिभूतौ परस्परं मैथुने अतिक्रमिष्यामीति कांक्षयेत्यर्थ: । अतएव मन्दहर्षौ मन्दकामौ अपि मैथुने प्रवृत्तौ पितरौ ईर्ष्यारतेर्हेतुं वदन्ति । अष्टमं वातिकषण्डकमाह वाय्वग्निदोषादिति । वायो: अग्ने: पित्तस्य च दोषात् संयुक्तबीजस्य स्थूलशुक्राधारे तयोराधिक्यात् श्लेष्मप्रधानौ वृषणौ नाशं यात: । पुरुषगर्भस्यैव एवं विकृतिर्भवति नतु स्त्रीगर्भस्य त एते विकृतगर्भा: तेषां जन्मान्तरीयकर्मविपाकादेव एवं परिणतिं लभन्ते इत्याह इत्येवमिति ॥ १७–२१ ॥

पुनरपि पञ्च शिष्यप्रश्नान् उत्थापयति गर्भस्येति । सरूपतां समानरूपताम् । येन कारणेन । तत्र प्रथमप्रश्नस्योत्तरं सद्योगृहीतगर्भाया: लक्षणमाह निष्ठीविकेति । न खलु सर्वस्मिन् एव मैथुने अपत्यं जायते, अतो यन्मैथुनाद् गर्भो भवति, तदनन्तरमेव तानि लक्षणानि भवन्तीत्याशय: । निष्ठीविका स्त्रिया: मुखे लालासञ्चार: । तृप्ति: मैथुनादिति शेष: । योन्या: गर्भाशय्याख्येन तृतीयेन आवर्त्तेन बीजग्रहणं शुक्रशोणितयोरवबन्ध: इत्यर्थ: । गर्भिण्या: स्त्रीगर्भे लक्षणान्याह सव्येति । सव्यांगचेष्टा गर्भिण्या: प्राधान्येन भवति । स्त्रीस्वप्नपानाशनशीलचेष्टा इति स्त्रीलिंगस्य द्रव्यस्य स्वप्ने दर्शनं तथैव द्रव्याणां पाने अशने च शीलं चेष्टा च यस्या स्तथाविधेत्यर्थ: । सव्यांगगर्भा यस्या गर्भशय्याया वामभाग एव प्राधान्येन गर्भस्तिष्ठति तथाविधा । सव्यप्रदुग्धा वामस्तने यस्या: प्राक् पयोदर्शनं भवति सा । पुंगर्भलक्षणान्याह पुत्रमिति । अतो विपर्ययेण विपरीतेन यथा यस्या: दक्षिणे भागे गर्भावस्थानं पुन्नामधेये वस्तुनि अभिलाषादिकं तथैव स्वप्नदर्शनं दक्षिणे च स्तने प्राक्पयोदर्शनं गर्भस्य वृत्तता चेत्यादि । नपुंसकगर्भस्य लक्षणमाह व्यामिश्रेति । तृतीयां प्रकृतिं नपुंसकमित्यर्थ: । अन्तिमप्रश्नस्योत्तरं गर्भस्य सरूपताया कारणमाह गर्भेति । गर्भोपपत्तौ मैथुनकाले स्त्रिया मनो यं जन्तुं व्रजेत् यं प्राणिनं सा मनसा ध्यायेत् तत्सदृशमपत्यं प्रसूते । पुनरपि आकृत्यादिवैशिष्ट्ये हेत्वन्तरं दर्शयति गर्भस्येति । सर्वस्य गर्भस्य देहे सर्वाण्येतानि चतुर्विधानि चत्वारि भूतानि नित्यप्रेजोमरुद्रूपाणि भवन्ति । कानि तानि मातृसम्भवानि स्त्रीबीजेन सहागतानि, पितृसम्भवानि पुंबीजेन सह आगतानि, आहारजानि मातुरन्नरससम्भवानि, आत्मकृतानि आत्मना सहागतानि इति चतुर्विधानि चत्वारि भूतानि । आकाशस्य सर्वगतत्वात् कुतोऽप्यस्यागमनासम्भव: इत्याह चत्वारीति । एतानि षोडशभूतांशा एव गर्भदेहं निर्मापयन्ति इति तान्येव

गर्भरूपोत्पादने कारणानि भवन्ति। आत्मापि चतुर्भिः भूतैः सह देहाद् देहान्तरं यातीति प्रतिपादयिष्यत्यग्रे। तेषां षोडशभूतांशानां मध्ये मातापितृकर्मजानि मातृपित्रात्मजानीत्यर्थः। कर्मवशादेव जीवः विभिन्ने गर्भे जायते इति कर्मजानि [illegible] विशेषाद् यानि बलवन्ति भवन्ति तानि चत्वारि भूतानि सदृशत्वलिंगे कारणं व्यवस्येत्। तत्र यदा मातृजभूतानां प्राधान्यं भवेत्, तदा स गर्भो मातृसदृशो भवेत्। यत्र वा पितृजभूतानां, तत्र पितृसदृशः, यत्र च आत्मज भूतानां, तत्र कर्मानुरूपः स्यादिति निष्कर्षः। ननु कर्मानुरूपं किंविधं भवतीत्याह सत्त्वमिति। अनुकं सदृशं सत्त्वं जन्तुम्। कर्मफलेन मातापित्रसदृशं विभिन्नजीवानुकारेण विभिन्नप्रकृतिकम् अपत्यं भवेदित्यर्थः। एतद् व्यासतो निवेदयिष्यत्यग्रे॥ २२-२७॥

पुनरपि शिष्याणां प्रश्नत्रयमुपन्यस्यति कस्मादिति। कथं केन प्रकारेण। कैरनुबन्ध्यते इति देहाद् देहान्तरोपसर्पणकाले आत्मना सह के के यान्तीत्यर्थः। तत्र प्रथमप्रश्नस्योत्तरमाह बीजेति। बीजात्मकर्माशयकालदोषैरिति बीजस्य तद्गर्भोत्पत्तौ कारणीभूतस्य पित्रोः शुक्रशोणितगतस्य बीजस्य, आत्मकर्मणः जन्मान्तरीयकर्मानुबन्धस्य यदुक्तं शातातपीये कर्मविपाके—"मातृहा अन्धो भवति, भ्रातृहा मूकः स्यात्" इत्यादि। आशयस्य गर्भाशयस्य कालस्य च दोषैः। तथा गर्भावस्थायां मातुराहारविहारदोषैः गर्भोपघातकरद्रव्याद्युपसेवया दौहृदविमाननया च दुष्टाः दोषाः वातादयः विविधानि काणमूकत्वादीनि, संस्थानस्य आकृतेः, वर्णस्य, इन्द्रियाणां च वैकृतं कुर्वन्ति। ननु मातुराहारविहारैः ये दोषाः प्रकुप्यन्ति ते तु मातुः शरीरस्यैव विकृतिं सम्पादयितुं प्रभवाः, न ततः पृथग्भूतस्य गर्भस्येति शंकां निराकुर्वन् दृष्टान्तेन विशदयति वर्षास्विति। नदीतः पृथग्भूतोऽपि वृक्षो यथा नद्यामेव जातानां काष्ठादीनां वेगैर्विकृतिं याति, तथैव पृथग्भूतोऽपि गर्भः स्त्रीकुक्षौ स्थितत्वेन तदन्नरसेनैव च पोषितत्वेन तद्गत मातृशरीरगतदोषादेव विकृततां याति। दोषसमवायरूपस्य अन्नरसस्य गर्भपोषकत्वात् तद्द्वारेणैव गर्भशरीरे दोषाः प्रविश्य तं विकृतं कुर्वन्तीत्यर्थः॥ २८-३०॥

द्वितीय प्रश्नस्य केन प्रकारेण आत्मा देहादेकस्मादपरं यातीत्यस्य उत्तरमाह भूतैरिति। स आत्मा सुसूक्ष्मैश्चतुर्भिर्भूतैः क्षित्यप्तेजोमरुद्भिः सहितः देहाद् देहान्तरम् उपैति। केन रूपेण गच्छतीत्यत्र हेतुगर्भं विशेषणमाह मनोजव इति। मन एव जवः देहाद्देहान्तरं गन्तुं वेगो यस्य सः। मनोवेगेन आत्मेच्छयैव गच्छति। कथं तथा इच्छाभवेदित्याह कर्मात्मकत्वादिति। कर्मफलवशात् यस्य यादृशि योनौ जननं विहितं भवेत्, तद्योनौ स्वेच्छयैव आत्मा गच्छतीत्यर्थः। कथं न कोऽपि तं पश्यतीत्याह नत्विति। तस्य आत्मनो रूपं दिव्यं दर्शनं विना योगादिबलेन अलौकिकीं दर्शनशक्तिं विना न दृश्यं भवतीति योजना। तस्य सर्वदेहगमने शक्तिं विशेषणैर्व्यक्ति स सर्वग इति। सर्वगः सर्वत्र गन्तुं सक्षमः। विश्वरूपः कर्मवशान्न

नानारूपतां भजते इत्यर्थ: । नित्ययुक् नित्यं देहेन युनक्ति । सानुशय: सानुबन्ध: सूक्ष्मैर्भूतैरित्यर्थ: ॥ ३१-३२ ॥

तृतीय प्रश्नस्य 'आत्माकैरनुबध्यते' इत्यस्योत्तरं विवक्षु: देहे कति-विधानि भूतानि सन्तीति प्रतिपादयति रसात्मेति । दश षट च षोडश भूतानि, तानि चतुर्विधानि रससम्भवानि आत्मसम्भवानि मातृसम्भवानि पितृसम्भवानि च प्रत्येकं चत्वारि चत्वारि चेति। तत्र तेषु चत्वारिभूतानि आत्मसंश्रितानि इति तेषु भूतेषु आत्मा स्थित इति तै: भूतैरनुबध्यते इत्यर्थ: । तानि षोडशभूतानि विवृणोति भूतानीति । तत्र गर्भे मातृसम्भवानि चत्वारि भूतानि रज: स्त्रीबीजं भवति । पितृसम्भवानि तु शुक्रं पुंबीजं वदन्ति । एवं रसोद्भवानि भूतानि तानि यै: मातुरन्नरसगतै: चतुर्भि र्भूतै: । शुक्रमसृक्चेति मिलितस्त्रीपुंसोर्बीजं गर्भांकुरमित्यर्थ:, आप्यायते पुष्टं भवति । आत्मसम्भवानि भूतानि विवृणोति भूतानीति । तानि भूतानि कर्मजानि जन्मान्तरीयकर्मवशादेव यानि आत्मलीनानि आत्मसम्बद्धानि गर्भं विशन्ति आत्मना सहैवेत्यर्थ: । स बीजधर्मा बीजस्वरूपात्मलीनो भूतवर्ग: अपरापराणि देहान्तराणि विभिन्नशरीराणि याति गच्छति, आत्मनि सति तानि तानि शरीराणि याति । ननु सर्वएव पुरुषा श्चैवं भूतसमन्विता देहाद्देहान्तरं गच्छेयुस्तर्हि सर्वएव समानरूपा: समानमनसश्च भवेयु: नेत्याह रूपादिति । कर्मात्मकानां स्वस्वकर्मानुसारेण सत्त्वरजस्तमसां न्यूनातिरेकेण जातानां भूतानां रूपात् विरूपप्रभव: पृथकपुरुषस्य विशिष्टरूपस्योत्पत्ति: प्रसिद्ध: "कारणगुणा: कार्यगुणमारभन्ते" इति हि न्याय: । एवं तथा-विधमनस: प्रभवोऽपि प्रसिद्ध: । अतएव नानापुरुषाणाम् आकृतिबुद्धि-भेदे च जन्मान्तरीयं कर्म तदनुपाती च सत्त्वादीनां न्यूनातिरेक एव हेतु-र्भवतीत्याह भवन्तीति । अत: कै: पदार्थै रात्मा अनुबध्यते इत्यस्य सिद्धान्त माह अतीन्द्रियैरिति । अतिसूक्ष्मरूपै: तै: चतुर्भि: भूतै: कर्मणा मनो-मतिभ्याम् अहंकारविकारदोषै: अहंकार: तद्विकारश्च मनस्तयो र्दोषै: संसार-हेतुत्वेन दोषत्वेनाख्यातै: न कदांचिद् वियुक्तरूप: आमोक्षादित्यर्थ: । भवे-दिति शेष: । पुनरपि नित्यनिरनुबन्धस्य आत्मन: अनुबन्ध्यत्वे हेतुं विश्लेष-यति रज इति । ज्ञानं तत्त्वज्ञानं विना यावत् तत्त्वज्ञानं नोत्पद्यते तावदित्यर्थ: । मन: सात्त्विकमपि रजस्तमोभ्यामनुबद्धं भवतीति शेष: । तत्र तादृशि मनसि सर्वदोषा: सन्ति इति शेष: । हि निश्चये । तादृशं सदोषं रजस्तमोऽनुबद्धं मन: बलवत् कर्म च आत्मनो गत्यां देहाद् देहा-न्तरगमने प्रवृत्तौ संसारप्रवृत्तौ च निमित्तमुक्तं पूर्वपूर्वैराचार्यैरिति शेष: । तादृशमन: संयोगाद् दैवसंयोगाच्च आत्मा संसरतीत्यर्थ: ॥ ३३-३८ ॥

पुन: पञ्च शिष्यप्रश्नान् उत्थापयति रोगा इति । कुत: कस्मात् कार-णात् । विकाराश्चेत् मन: शरीरप्रभवास्तर्हि मन: शरीरतादवस्थ्यात् शान्ता-नामपि तेषां पुनरागमनं युक्तमेव कारणतादवस्थ्यात् इति पञ्चमं प्रश्नमाह

शरीरेति । कथं केनोपायेन । क्रमश एतान् उत्तरयति प्रश्नेति । विषमास्तदर्थाः असात्म्येन्द्रियार्थसंयोग इत्यर्थः । हेतुमभिधाय द्वितीय प्रश्नस्योत्तरमाह सर्वेति । ज्ञानार्थकालाः समयोगयुक्ता इति ज्ञानस्य धीधृतिस्मृतीनाम् अर्थानां शब्दादीनां कालस्य शीतोष्णवर्षलक्षणस्य समयोगः इति त्रिविधा शान्तिः संशमनं भवतीति शेषः । तृतीयचतुर्थयोरुत्तरमाचष्टे धर्म्या इति । धर्म्याः धर्मादनपेताः अतो अन्यथा अधर्म्या इत्यर्थः । पञ्चमप्रश्नस्योत्तरं विवक्षुस्तत्रादौ विकाराणामात्यन्तिकनिवृत्तौ उपायमाह शरीरेति । रोगास्तु शरीरसत्त्वप्रभवाः तयोः शरीरमनसोः आत्मसंसर्गाभावात् भूयो न भवन्ति तेषां नैष्ठिकी निवृत्तिर्भवतीत्यर्थः । कथं तयोः साकल्येनोच्छित्तिर्भवतीत्याह रूपस्येति । रूपस्य शरीरस्य सत्त्वस्य मनसश्च या सन्ततिः धाराप्रवाहः तस्य आदिः कदेयं प्रवृत्तेति न उक्तः कुत्रापि तन्त्रे। कथमित्याह नेति । हि यतः कश्चित् स आदिः नास्ति । ननु तर्हि कथमनयोरवृत्तिं कर्तुं पार्यते इत्याह तयोरिति । तयोः शरीरमनसोः पराभ्यां योगादिनालब्धाभ्यां धृतिस्मृतिभ्यां परया ब्रह्मपरया धिया च बुद्ध्या च सर्वं कारणवद् दुःखमित्यादि पूर्वाध्यायोक्तरूपयेत्यर्थः । अवृत्तिः क्रियते योगिभिरिति शेषः । नन्वेष चेन् नियमः तर्हि सति शरीरे आमोक्षलाभाद् व्याधेः पुनः पुनरावर्तनं सदैव सम्भवत्येवेति पुनरपि शरीरसत्त्वयोः सतोरपि व्याधेः पुनरागमननिवारणाय उपायान्तरमाह सत्याश्रये इति । वा पक्षान्तरे । द्विविधे यथोक्ते आश्रये शरीरसत्त्वरूपे सत्यपि गदेभ्यः पूर्वं व्युत्पत्तेः प्रागेव दोषाणां सञ्चयाद्यवस्थायामेव प्रतिकर्म तत्तद्दोष प्रत्यनीकभूतं कर्म नित्यमहरहः क्रियमाणं जितेन्द्रियं च जनं रोगाः न अनुपतन्ति आक्रामन्ति । ननु तथा कुर्वाणानामपि कस्यचिद् व्याध्याक्रमणं दृश्यते इत्याह तत् कालेति । तत् कालयुक्तं तस्मिन्नेवकाले परिणाम्यं यदि दैवं पूर्वकृतं कर्म नास्ति न वर्तते । जन्मान्तरे यब्रह्मवधादिना जितेन्द्रियस्य प्रतिकर्मनित्यस्यापि कुष्ठाद्युत्पत्तिर्भवत्येवेत्याशयः ॥ ननु किन्नाम तद्दैवमित्याह दैवमिति । सः दैवपुरुषाकाररूपः विषमः अधर्म्य इत्यर्थः प्रवृत्तिहेतुः रोगस्येति शेषः । समो धर्म्यः । ननु तथापि कालजव्याधेर्निष्कृतिर्नास्ति इति नेत्याह हैमन्तिकमिति । हैमन्तिकं दोषचयं कफसञ्चयं वसन्ते प्रवाहयन् वमनेन निर्हरयन्, ग्रैष्मिकं ग्रीष्मकालभवं वातसञ्चयं अभ्रकाले प्रावृषि वस्तिना प्रशामयन्, पुनश्च वार्षिकं पित्तसञ्चयं घनात्यये शरदि विरेचनेन रक्तमोक्षणेन च बहिष्कुर्वन्, जातु कदाचिद् ऋतुजान् व्याधीन् न आप्नोति । पूर्वोक्तं विच्छिन्नं वाक्यचयं समस्य भूतार्थं ब्रवीति नरः इति । पुनश्चाह मतिरिति । निगदार्थमन्यत् ॥ २६-४७ ॥

अध्यायार्थं निवेद्य तं समापयति तत्र श्लोक इति ॥ ४८ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां शारीरस्थाने अतुल्यगोत्रीयो नाम द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्याय:।

पूर्वाध्यायद्वयेन पञ्चमहाभूतशरीरिसमवेतस्य आयुर्वेदोक्त पुरुषस्य उपादानभूतपदार्थानां विवरणं, शुक्रस्यापि विवृतिमुपदिश्य गर्भस्य उत्पत्तिप्रकारं निविवेदयिषु: क् समासतो वक्तुकाम: खुड्डीकां गर्भावक्रान्तिमध्यायान्तरमारभते अथात इत्यादिना। खुड्डिकां स्वल्पां क्षुद्रिका-शब्दस्य अपभ्रंशोऽयं शब्द:। गर्भावक्रान्ति गर्भप्रजननविषयकम् ॥१-२॥

तत्रादौ आयुर्वेदसिद्धान्तमाह पुरुषस्येति। अनुपहतरेतस: अनुपहतं दोषैरनाक्रान्तं सचेतनबीजं रेतो यस्य। पुरुषस्य नरस्य। अप्रदुष्टयोनि-शोणितगर्भाशयाया: इत्यत्र योनिशब्दस्य तस्या: तृतीय आवर्त: गर्भशय्या परिगृह्यते तस्या श्चाप्रदुष्टत्वम् अव्याधिमत्त्वम् शोणितं स्त्रीबीजं गर्भा-शयश्चात्र योन्या: पृथग्ग्रहणेन तद्व्यतिरिक्तयो: फलबीजवाहिस्रोतसोश्च परिग्रह: कर्तव्य: यस्या: तादृश्या: स्त्रियाश्च, यदा ऋतुकाले रक्तदर्शनात षोडशदिनं यावत्, संसर्ग: संगमो भवति। पुनश्च यदा अनयो: स्त्रीपुंसो: तथैव युक्ते यथाविहिते मैथुने सति। गर्भेच्छया तु मैथुनविधानं वक्ष्यत्यग्रे। यदा जीव: लिंगशरीरसमन्वित: आत्मा अन्तर्गर्भाशयगतं गर्भाशय्यान्तर्गतं शुक्रशोणितसंसर्गं पुंबीजस्त्रीबीजयो: संयोगम् अवक्रामति शुक्रगत एव आत्मा तयोर्बीजयो: संयोगमधितिष्ठतीत्यर्थ:। तथैवावक्रमणे हेतुमाह सत्त्वसंयोगादिति। जन्मा न्तरीयकर्मजन्यमनोवेगादित्यर्थ:। यदुक्तं "मनो-जवो देहमुपैति देहात्" इति। अवक्रमणप्रकारस्तु आत्मनो व्यासत: छान्दोग्यश्रुतौ निर्दिष्ट आस्ते, तमनुसृत्य संगीतरत्नाकरे पिण्डोत्पत्तिप्रकरणे प्रोक्तं यथा—

"क्षेत्रज्ञ: स्थित आकाशे आकाशाद् वायुमागत:।
वायोर्धूमं समाश्राभ्रमभ्रान्मेघेऽवतिष्ठते॥
यदा वर्षति वर्षेण सह जीवस्तदा भुव:।
वनस्पत्यौषधीर्जात: संक्रामत्यभिलक्षित:।
ताभ्योऽन्नं जातमन्नञ्च पुरुषे शुक्रतां गतम्।
शुद्धार्तवाया योषाया निषिक्तं स्मरमन्दिरे॥
सहार्तवेन शुद्धञ्चेद् गर्भाशयगतं भवेत्।
जीव: कर्मप्रेरितस्तद् गर्भमारभते तदा॥" इति।

तदा गर्भोऽभिनिवर्तत इति च्छेद:। तत: किं भवतीत्याह स इति। स गर्भ:। सात्म्यरसोपयोगात् गर्भपोषकरसाभ्यवहारात् गर्भिण्या इति शेष:। पुनश्च उपचारै: गर्भहितैर्विहारादिभि: सम्यग् उपचर्यमाण: सेव्यमान: अभि-वर्धते क्रमश: संवर्धितो भवति। तत: तदनन्तरं प्राप्तकाल: नवममासाद् द्वादशमासाभ्यन्तरमेव एषां वक्ष्यमाणानां मातृजादीनां भावानां समुदायात् सर्वेन्द्रियाद्यपपन्नादिगुणयुक्तो गर्भ: सुखेन जायते इत्यन्वय:। के ते कारण-

समुदायाः इत्याह मातृज इति। सत्त्वसंज्ञकं मनः उपपादुकम् उत्पत्तेः कारणमस्ति ॥ ३ ॥

सिद्धान्तश्चैतं संशयनिरसनेन द्रढयितुं संशयप्रकारं प्रदर्शयति नेति भरद्वाज इ ति। न खलु गर्भो मात्रादिजः इति पिण्डार्थः। मात्रादीनां गर्भजनकत्वं प्रत्येकशः प्रदिदर्शयिषुः प्राक् पित्रोः गर्भजननासामार्थ्यं निरूपयति यदि होति। अयमर्थः--यतो यथेप्सितपुत्रकन्याजनने अपत्योत्पादने वा पित्रोरपि प्रभुत्वं न कदा च वर्तते अतो गर्भस्य मातापितृजत्वं न सिध्यतीति। परिदेवेरन् शोकग्रस्ता भवेयुः ॥ ४-५ ॥

आत्मनोगर्भजनकत्वं निरस्यति न चात्मेति। कथंकारम् आत्मा आत्मानं जनयेत्, जातो वा अजातो वा, उभयमप्येतदयुक्तमिति प्रदर्शयति नहीति। हि यतः सत्त्वाद् अनादित्वात् स जातः जन्यो भवन्, न जनयति नात्मानं जनयितुं। प्रभवति पुनश्च अजातश्चेत् तर्हि असत्त्वात् न जनयति कारणभूतस्य जनने सामर्थ्यं न वर्तते इत्यर्थः। इत्युभयथापि गर्भस्य आत्मजत्वानुपपत्तिः। यदि वा कथञ्चिदात्मनो गर्भोत्पादने शक्तिः स्वीक्रियेत, तथापि तन्नोपपद्यत इत्याह यद्ययमिति। स्वेच्छया जन्मग्रहणे स्वाभिप्रेतास्वेव योनिषु जन्मग्रहणं युज्यते, नतु तत्तथा, इत्याह नत्वेनमिति। आत्मनः इष्टान् योनीन् आह वशिनमिति। वशिनं जितेन्द्रियम। अप्रतिहतगतिं जले स्थले नभोमार्गे वा अव्याहतगतिम्। कामरूपिणं स्वाभिप्रायानुरूपरूपधारिणम्। संहननं शरीरम्। एवंविधं पूर्वोक्तरूपं। इत्यतो वा भूयः ततोऽधिकं वेत्यर्थः। एतत् सर्वं न भवतीति आत्मनो गर्भजनकत्वं वाग्वस्तुमात्रमित्याशयः ॥ ६ ॥

गर्भस्यअसात्म्यजत्वं प्रतिपादयति असात्म्यज इति। एकान्तेन नियमेन। निखिलेन साकल्येन। उभयत्र सात्म्यसेविनि असात्म्यसेवाशीले च। उभयं सुप्रजस्त्वम् अप्रजस्त्वञ्च। आहाररसस्य च गर्भजनकत्वं दर्शयति अरसजइति। रसस्य गर्भजनकत्वे न केचिन् निरपत्याः स्युः, सर्व एव हि रसान् उपयुञ्जते। रसज इत्यस्य श्रेष्ठरसज इत्यर्थे अभिप्रेते सचापि अयुक्तो भवतीत्याह श्रेष्ठेति। आजादिभिः भूतानां पुष्टानाम्। आजेन छागमांसेन, औरभ्रेण मेषमांसेन। मार्गेण मृगमांसेन। उभयत्र श्रेष्ठरसाहारेषु निकृष्टरसाभ्यवहारेषु च उभयं श्रेष्ठरससेविनामनपत्यता निकृष्टरसोपयोगिनाञ्च बहुपत्यता ॥ ७-८ ॥

न च मनः परलोकादेत्य गर्भमवक्रामतीति प्रतिपादयति न खल्विति। मनः पौर्वदेहिकं यतः किञ्चिदपि न स्मरति अतो न कदापि परलोकात् मनः आगच्छति। पृथग् हेतून् उदाहृत्य उपसंहरति तस्मादिति ॥ ९-१० ॥

भरद्वाजोत्थापितं तर्कं निराकरोति नेत्यादिना भगवान्। कारणसमुदायादेव कार्योत्पत्तिर्भवति न हि पृथक् कुललादिना घटस्योत्पत्तिः सम्भवति इति दर्शयति सर्वेभ्य इति। एभ्यः पूर्वोक्तेभ्यः सर्वेभ्यो भावेभ्यः

भ्यो मात्रादिभ्य: समुदितेभ्यो मिलितेभ्यो गर्भो अभिनिर्वर्तते उत्पद्यते नतु कारणैकदेशादिति निष्कर्ष: । मातुर्गर्भकारणत्वं विशदयति मातृज इति । ननु स्वेदजोद्भिज्जानां मातृप्रसूताण्डानां पर:सहस्राणां कीटादीनां परम्परया मातृकारणत्वे सद्भावेऽपि पूर्णतया तेषां शरीरोत्पादने हेतुत्वं नास्तीत्याह न चेति । जरायुजानामेव मातृबीजं मातुरन्नरसश्च शरीरोत्पादने पूर्णतया कारणं भवति तेषां जन्मनि पूर्णशरीरतया उत्पादे इत्याह जन्मेति । जन्म तु पूर्णचेतनतया पूर्णशरीरतया च उत्पत्ति: । अण्डजादीनां तु न खलु मातृशरीरत: तथैवोत्पत्तिर्भवति जरायुजानामेव माता पूर्णतया कारणं भवतीति निष्कर्ष: । कीटादीनामण्डजत्वेऽपि तानि स्वेदेन उद्भिदा च पोष्यन्ते इति तेषां पृथक् स्वेदजोद्भिज्जसंज्ञा भवतीत्यवधेयम् । तत्र गर्भस्य यान्यंगप्रत्यंगानि मातृत: सम्भवन्ति तान्याह यानीति । सम्भवतो जायमानस्य अस्य गर्भस्य इति योजना । कानि तानीत्याह तद्यथेति । त्वग् व्याकृता भविष्यत्यग्रे । लोहितं रक्तं गर्भादावेषा मुत्पत्तिकारणं स्त्रीबीजं भवति पश्चात्तु मातुरन्नरसतोऽस्य पोषणं भवति । नाभिरयम् आमाशयपक्वाशययोर्मध्यभाग: कोष्ठांगत्वेन परिगृहीत: । हृदयं स्तनयोर्मध्यस्थं सततस्पन्दनशीलमधोमुखपद्मकलिकाकारं चेतनास्थानम् । क्लोम तु तिलकं आमाशयपृष्ठतस्तिर्यगवस्थितं कृकलासाकारम् उदकवहस्रोतसां मूलम् 'प्यांक्रिया' इति प्रतीच्या: । यकृत्तु हृदयादधो दक्षिणपार्श्वे आमाशयस्योर्ध्वं गौरिकवर्णं रक्तोत्पत्तिस्थानम् । प्लीहातु हृदपादधो वामपार्श्वे आमाशयसन्नद्धं मनाक् कृष्णवर्णं यन्त्रम् । वृक्कौ तु वस्तिशिरसो रुपरि सन्नद्धौ पृष्ठवंशयोरुभयत: त्रिकोणाकारौ ग्रन्थिविशेषौ स्त: मेदोवहस्रोतसां मूलौ । वस्ति स्तु मूत्राशय: वृक्कयोरधस्तालादारभ्य मूत्राधारान्तं यावत् अवस्थित:द्वे वस्तिशिरसी द्वे मूत्रवहस्रोतसी मूत्राधारश्चैक: मिलित्वा मूत्रनि:सारको यन्त्रविशेष: । पुरीषाधानन्तु क्षुद्रान्त्रस्थूलान्त्रयो र्मध्ये सपुच्छो गोलो यन्त्रविशेष: उण्डुक: इत्यपरपर्याय: । आमाशयस्तु भुक्तद्रव्यस्य प्रथमपरिणतिस्थानं महास्रोतस: स्थूलतमो भाग: । उत्तरगुदन्तु स्थूलान्त्रे साक्षात् सन्निबद्धमष्टांगुलं स्थानम् । अधरगुदन्तु तस्याध: सन्नद्धं त्रिबलिसमन्वितं चतुरंगुलमागुदोष्ठं वर्तते । क्षुद्रान्त्रं नाम आमाशयाधोसन्निविष्टस्य प्रायो द्वादशांगुल मितस्य नाभेरधस्तात् पुरीषाधानं यावत् महास्रोतस: स्वल्पतमपरिणाहो नाडीविशेष: । स्थूलान्त्रन्तु पुरीषाधानादारभ्य उत्तरगुदं यावत् कुक्षेरूर्ध्वाधस्तिर्यग्गो मलाशय: । वपावहनन्तु उदरयन्त्राच्छादिका महाकला अत्रैव मेदस्विनां मेद: सञ्चीयते इत्यतो वपावहनमिति संज्ञा । अवहननं फुफुसाख्यो हृत्कोष्ठेऽवस्थित: श्वासयन्त्रविशेष: ।† अत्र पक्वाशयस्यान्तर्भाव: वपा च वपावहनञ्चेति च पाठ: लेखकप्रमादप्रसूत: । विचारसरणिस्त्वत्र मदीये शारीरविनिश्चये

† त्वक् च.....आमाशयश्चोत्तरगुदश्च.....स्थूलान्त्रञ्च वपावहनञ्चावहननञ्च" इत्येवं पाठ: साधीयस्त्वनात्रादृत: ॥

कोष्ठांगविनिश्चयाध्याये द्रष्टव्या । कोष्ठांगव्याकरणेऽपि मनाग् व्याख्याता भविष्यत्यग्रे ॥ ११-१२ ॥

पितुर्गर्भस्य कारणत्वं दर्शयति पितृज इति । पितृजान्यंगान्याह तद्यथेति । सिरा नाम रक्तवहाः प्रणाल्यः । स्नायवस्तु सन्धिबन्धनकारिण्यः, प्रतानवत्यः, वृत्ताः, पृथुलाः, सुषिराश्चेति चतुर्विधाः । धमन्यस्तु चतुर्विंशतिविधाः काश्चित् सुषिराः रसादिवाहिन्यः, का वा असुषिरा पवनधमनत्वेन ज्ञानकर्मवाहिन्यो भवन्ति । गर्भस्य आत्मजत्वं युक्त्या साधयति आत्मज इति । गर्भस्य आत्मैव अन्तरात्मा यमृषयो जीवात्मेत्याहुः । यञ्च अनादिनिधनादिभिः विशेषणैः विशेषयन्ति सांख्याः इत्याह गर्भात्मेति । गर्भस्य य आत्मा स एव वेदादिषु जीवात्मा इत्युपदिश्यते इत्यर्थः । अजन्योऽपि सः शुक्रगतो गर्भाशयमनुप्रविश्य स्त्रीबीजेन संयोगमेत्यात्मानं गर्भत्वेन जनयति इत्याह स इति । आत्मनात्मानं जनयतीत्यत्र द्वितीय आत्मशब्दो गर्भार्थकः । अनादेश्चेतनाधातोः न खलु जन्म सम्भवतीत्याह आत्मसंज्ञेति । तस्य वेदोक्तस्य अनादिनिधनस्य । अतएव गर्भजनकत्वात् तस्य अजन्यस्यापि जात इति संज्ञा भाक्ता एवेत्याह तस्मादिति । जातोऽपि शाश्वत्वात् सदैव वर्तमानोऽपि अजातम् अनागतं गर्भं जनयति । तस्यैव जातत्वम् अजातत्वञ्च दृष्टान्तोपन्यासेन विशदयति सचैवेति । यथा एकएव पुरुषो बाल्यावस्थायां वर्त्तमानः तस्यां जात इति संज्ञां लभते, युवावस्थायाश्च अनागतत्वात् तत्र तत्र च अजातो भवति, तद्वद् गर्भावस्थायाः प्रागपि वर्तमानः आत्मा जातएव, गर्भत्वेन अजातो भवितुमर्हति इति तात्पर्यम् । पुरस्कृता भविष्यन्त्यवस्था । जनिष्यमाणः अजात इत्यर्थः । अतएव एकस्मिन् पुरुषे एकस्यैव जातत्वमजातत्वञ्च सम्भवति, न तत्रोभयथा अनुपपत्तिरित्याह तस्मात् स इति । तमेवार्थं पुनरपि विशदयति सचेति । न खलु मातुर्गर्भान् निष्क्रमणमेव जन्म इत्युच्यते इत्याह सतोहीति । सतः सदैव विद्यमानस्य अवस्थान्तरावाप्तिरपि जन्म भवितुमर्हतीत्यर्थः । यथा सतः सुवर्णस्य कुण्डलरूपेण परिणतिरपि कुण्डलस्य जन्म इत्युच्यते तद्वत् सर्वत्रेत्यर्थः । तमेवार्थमुदाहरणेन परिस्फोटयति यथेति । निगमयति तथेति । अतएव तस्य आत्मनो गर्भस्य तस्यां तस्यामवस्थायाम् उत्पत्तेः प्राग् अजातत्वं परस्तात्तु जातत्वं सम्भवति, नास्ति तत्र संशयलेशोऽपीत्यर्थः । अथ गर्भस्यात्मजत्वे इष्टासु योनिषु जन्मग्रहणासामर्थ्यरूपायाः भरद्वाजस्य द्वितीयाया अनुपपत्तेरुत्तरमाह न खल्विति । पित्रोरात्मनश्च गर्भस्य सर्वभावेषु इष्टासु योनिषु जनने वशित्वादिरूपपरिग्रहेषु च यथेष्टकारित्वं इच्छानुसारेण करणशक्तिर्नास्ति । किञ्चित् कार्यं स्ववशात् स्वचेष्टाबलेन । कर्मवशात् जन्मान्तरीयकर्मफलेन । करणशक्तेः सत्वादिकरणसम्पत्सम्पन्नत्वात् क्वचित् कदा किञ्चित् कर्म भवति क्वचित् कुत्रचिद्वा स्थले तथा सम्पदभावात् न भवति । तमेवार्थं विशदयति यत्रेति । यथाबलं करण-

शक्तेर्बलानुसारेण । अतोऽन्यथ करणसम्पद्राहित्याद् विपर्यय: न यथेष्ट-कारित्वं विद्यते । नन्वात्मनश्चेद् गर्भजनने यथेष्टकारित्वं न स्यात् तर्हि आत्मा गर्भजनक इति वाग्वस्तुमात्रं भवति । कुलालस्य घटोत्पत्तौ यथेष्ट-कारित्वं वर्तत एव, न खलु निर्व्यापार: स तदुत्पत्तौ कारणं भवितुमर्हती-त्याह न चेति । करणदोषादेव गर्भजनने यथेष्टकारित्वं न भवतीति नात्मा अकारणं भवति । यत्रापि करणवैमल्यं वर्तते तत्रतु यथेष्टकारित्वं दृश्यत-एवेत्याह दृष्टमिति । आत्मविद्भि: करणवैमल्यात् इष्टयोन्यादिकमात्मा-यत्त्वं स्वायत्तं कृतमिति दृष्टम् । पुनश्च न हि अन्य: आत्मातिरिक्त: कोऽपि सुखदु:खयो: कर्ता उपलभ्यते इति शेष: । जायमानो गर्भ: शुक्रशोणित-योगे सत्यपि अन्यत: आत्मव्यतिरिक्तात् न जायते आत्मसंक्रमणाभावे तदापि न गर्भो भवतीत्यर्थ: । तत्र हेतुगर्भं दृष्टान्तमाह न चेति । अबीजात् नष्टबीजात् अंकुरोत्पत्तिर्यथा न भवति तथैव अबीजात् आत्मसम्पकाभा-वात् शुक्रशोणितात् न कदाचिद् गर्भोत्पत्तिर्भवतीत्याशय: ॥ १३-१५ ॥

गर्भस्य ये ये विषया: आत्मत: सम्भवन्ति तानाह यानि त्विति । सम्भवतोऽस्य गर्भस्य । तासु तासु मनुष्यपशुपक्ष्यादिषु योनिषु । प्रेरणं धारणञ्चेन्द्रियाणाम् । प्रयत्न: प्रवृत्ति: निर्वृत्ति: जीवनयोनिश्चेति ॥ १६

गर्भस्य सात्म्यजत्वं प्रतिपादयति सात्म्यज इति । स्त्रीपुंसोर्वन्ध्यत्वं प्रति असात्म्यसेवित्वं कारणं भवत्येवेत्यर्थ: । असात्म्यसेविनामपि सन्तानं कथं भवतीत्याह यावदिति । अयमर्थ: – असात्म्यसेवनमात्रेणैव न खलु कस्यापि वन्ध्यत्वमायाति, यावदसात्म्ययोगजन्या: प्रकुपिता दोषा: शुक्र-शोणितयो र्बीजभागं न दूषयन्ति, तावत् ताभ्यां गर्भोत्पत्तिर्भवत्येवेति । सात्म्यसेविनामपि सन्तानानुत्पत्तौ कारणं दर्शयति सात्म्येति । तत्र जीवस्य अनवक्रमात् कर्मवशात् तद्गतशुक्रे आत्मसंक्रमणाभावान्न गर्भ: सम्पद्यते । कारणसमुदायो हि कार्योत्पत्तौ हेतुर्भवति न केवलमन्यतममित्याह नहीति । गर्भस्य सात्म्यजान् भावानाह यानि खल्विति । इन्द्रियप्रसाद: प्रसन्नेन्द्रिय-त्वम् । बीजसम्पत् तस्य सन्तानस्य अव्याहता सन्तानोत्पादिका शक्ति-रित्यर्थ: । यद्यपि स्वरवर्णवैशेष्ये आत्मकर्मैव कारणं भवतीति तस्यात्मजत्व-मुक्तं, तथापि स्वरवर्णयो: सम्पदि उत्कृष्टत्वे सात्म्यमेवकारणमिति तत्र सात्म्यजत्वमपि संगच्छते । प्रहर्षभूयस्त्वमारोग्यप्राधान्यम् ॥ १७ ॥

गर्भस्य रसजत्वं प्रतिपादयति रसज इति । मातुराहाररसादेव गर्भस्य पोषणं भवति, तदभावे मातुरपि जीवनयात्रा व्याहता स्यादित्याह नहीति । रसोपयोगिनाम् अनपत्यताया: कारणमाह न केवलमिति । कारणसमुदायेषु कस्यचिद् अभावात् न गर्भोत्पत्तिर्भवतीत्यर्थ: । गर्भस्य रसजान् भावान् आह यानीति । शरीरस्य षडंगरूपस्य अभिनिर्वृत्ति: प्रादुर्भाव: । वृद्धिस्तु आकृतित: । पुष्टिस्तूपचय: । प्राणानुबन्ध: बलानुबन्ध: ॥ १८

गर्भेतु जन्मान्तरात् सत्त्वावक्रमणं प्रतिपादयति अस्तीति । सत्त्वं

मनः। औपपादुकं गर्भाभिनिर्वृत्तौ कारणम्। जीवस्पृक् आत्मना सम्बद्धम्। शरीरेण अभिसम्बध्नाति आत्मसंक्रमणादेव गर्भोत्पत्तिर्भवति अतः शरीरेण सहापि मनः संबध्यते उत्पत्तिकाले। यस्यापक्रमादेव शरीरस्य ध्वंसो भवेदिति दर्शयति यस्मिन् इति। अपगमनपुरस्कृते जीवनान्तकाले शरीरं त्यक्तुमुद्यते यस्मिन् मनसि। शीलं स्वभावः। व्यावर्तते अन्यथा भवति। भक्तिः भंगिः शरीरविन्यास इति यावत् विपर्यस्यते विपरीता भवति। पुनर्गते च मनसि प्राणा अपि यान्ति इत्याह यस्माद् हीन इति। इन्द्रियाणामभिग्राहकं प्रेरकम्। शुद्धं सात्त्विकम्। पूर्वस्मात् जन्मनो मनस्यायाते कथं न जन्मान्तरीयं स्मरतीति शंकामपनुदति येनेति। येन गुणेन सत्त्वेन रजसा तमसा वा भूयिष्ठं बहुलम् अस्य अस्मिन् जन्मनि वर्तमानस्य मनो भवति, तेनैव गुणेन द्वितीयायामाजातौ परस्मिन् जन्मनि संप्रयोगो भवति तद्गुणबहुलं मनो भवतीत्यर्थः। यदातु अस्मिन् जन्मनि तेनैव शुद्धेन संयुज्यते सत्त्वबहुलं मनो भवति, तदा परस्मिन जन्मनि अतिक्रान्तायाआजातेः पूर्वस्य जन्मनः अपि स्मरति विषयानिति शेषः। तथैव मनसोऽनुबन्धादेव एतत् सम्भवतीत्याह स्मार्तमिति। स्मृतेरात्मानुबन्धित्वेऽपि तस्यैव सत्त्वबहुलस्य अनुबन्धादेव परलोके अनुवर्तते ज्ञानानुवर्तनादेव मानवो जातिस्मरो भवतीत्यर्थः॥ गर्भस्य सत्त्वजान् भावानाह यानीति। त्यागो दानशक्तिः। ते भक्त्यादिकाः सत्त्वविकाराः सत्त्वजा भेदाः। उत्तरकालमागामिन्यध्याये। तानि नानाविधानि सत्त्वानि एकस्मिन्नेव पुरुषे उपलभ्यन्ते नरघातकस्यापि दयादाक्षिण्यादिदर्शनात्। परन्तु नैककालं प्रवर्तत इत्याह नानेति। ननु तर्हि सात्त्विकमस्य मनः राजसमस्येत्यादि प्रयोगः कथं भवतीत्याह एकन्त्विति। प्रायोवृत्त्या आधिक्येन वर्तनेनेत्यर्थः। उपसंहरति एवमिति। कूटागारं वलभी॥ १६-२०॥

पुनरपि भरद्वाजः स्वसंशयं पृच्छति यद्ययमिति। अयमर्थः-मात्रादिकारणसमुदायो गर्भस्य कारणमिति चेत् तेषामेकत्र सन्धाने किं कारणम् इति प्रथमः प्रश्नः। यदि वा कथञ्चित् सन्धीयते, तर्हि स गर्भः कथं मनुष्यशरीरं भवति? मनुष्यान् मनुष्यः गोर्गौरिति सिद्धान्तश्चेत्, जडान्धादिभ्यो जडान्धादयः कथं न जायन्ते? ननु आत्मा इन्द्रियसाहाय्येनैव विषयान् गृह्णाति अतः सत्सु इन्द्रियेषु नान्धाद् अन्धो जायते इति चेत्, आत्मनो नित्यचैतन्ये प्रतिज्ञाहानिर्दोषो भवति। सतीन्द्रिये आत्मा ज्ञः तदभावे चाज्ञः इति चेत्, तर्हि आत्मा सविकारी भवति एवं तथैव इन्द्रियरहितआत्मा गर्भे कारणमपि भवितुं नार्हति इति पूर्वपक्षः। अनर्थं वाग्वस्तुमात्रम् अर्थरहितं शब्दसमष्टिमात्रम्॥ २१॥

उत्तरयति भगवान् पुरस्तादिति। पुरस्तात् पूर्वाध्याये। कारणसमुदायस्य सन्धाने कारणं पुरस्तादेवोक्तम् सत्त्वं जीवस्पृगित्यादिना। सच सम्बन्धः जन्मान्तरीयकर्मवशादेव भवतीत्याशयः। कथं मनुष्यान् मनु-

ष्यएव जायते इत्यस्योत्तरमाह भूतानामिति। एते गर्भकराभावा: यां योनिमापद्यन्ते तद्विग्रहेणैव जायन्ते बिम्बानुरूपत्वात्। बिम्बं 'छाँच' इति वंगीयैराभाष्यते। विग्रह: शरीरम्। कथं जडादिभ्यो जडादयो न भवन्तीत्याह यच्चोक्तमिति। बीजे मिलिते स्त्रीपुंसो बीजे बीजभाग: बीजगतस्वरयन्त्रद्यवयव: उपतप्त: दोषाक्रान्तत्वान्नष्ट:। तस्माज् जडाद् अपि मातु: पितु वा जातो न जडो भवति तथा अजडाच्चापि जडो भवति। बहिर्दृश्यमानं हि श्रोत्रादिकम् इन्द्रियाधिष्ठानमात्रम्। बीजगततत्तदंगावयवे उपतप्ते तत्तदंगावयवविकृत्या सत्स्वपि इन्द्रियेषु तस्य अन्धत्वादिकं जायते। कदाचिद्वा सत्स्वपि इन्द्रियाधिष्ठानेषु अविकृतेषु इन्द्रियाभावादपि अन्धत्वादिकं भवितुमर्हतीत्याह सर्वस्येति। इन्द्रियाणि तु आत्मजानि आत्मना नित्यसम्बद्धानि तानि। चात्मातै: सहैव गर्भमवक्रामति। तत्र कस्यचिदिन्द्रियस्याभाव: जन्मान्तरीयकर्मवशाद् भवति इत्याह तेषामिति। दैवं जन्मान्तरीयं कर्म। यदुक्तं शातातपीये कर्मविपाके "मातृहा अन्ध: स्यात्, भ्रातृहा मूक: स्यात्" इति। निगमयति तस्मादिति। एकान्ततो नियमेन। आत्मन: सर्वावस्थासु ज्ञत्वं प्रतिपादयति न चेति। असत्त्व: करणविहीन:। ज्ञानवैशिष्ट्ये सत्त्ववैशिष्ट्यमेव कारणं भवतीत्याह सत्त्वविशेषादिति। इति प्रकरणोपसंहारे ॥ २२-२६ ॥

पुनरपि साकल्येन भरद्वाजसंशयं निराकरिष्णुस्तमेवार्थं व्यासत: पद्येनाह भवन्ति चात्रेति। कर्तुरात्मन: ज्ञानं प्रति नैकस्य आत्मन एव कारणत्वमस्ति कारणसमुदाय एव ज्ञानोत्पत्तौ हेतुर्भवति इति इन्द्रियाभावात् ज्ञानाभावे आत्मनो अज्ञत्वं न सिध्यति। अर्थमिमं दृष्टान्तेन विस्पष्टीकरोति जानन् इति। मृदोऽभावात् कुम्भकारस्य घटाकरणं यथा नाज्ञतासूचकं तथैवेन्द्रियाभावाद् आत्मापीति निष्कर्ष:। पुनश्च न चेन्द्रियाभावाद् आत्मनो अज्ञत्वं सिध्यतीति प्रतिपादयति श्रूयतामिति। अध्यात्मं आत्मसम्बन्धि वेदं ज्ञानं श्रूयताम्। आत्मज्ञानबलं महद् भवति इति शेष:। आत्मज्ञोहि इन्द्रियाणि संक्षिप्य बाह्यविषयादुपसंहृत्य चञ्चलं च मन: संगृह्य विषयान् निवर्त्य चित्तवृत्तिं निरुध्य इत्यर्थ:। अध्यात्मम् आत्मनि प्रविश्य स्वे ज्ञाने पर्यवस्थित: आत्मज्ञानमात्रे सम्यगवस्थित: सन् अपि सर्वत्रावहितज्ञान: सर्वस्मिन्नेव विषये ज्ञानं नियोज्य सर्वभावान् सर्वविषयान् परीक्षते विशेषतो ज्ञात्वा बुद्ध्या अध्यवस्यति। आत्मज्ञानावस्थायां समनस्कानामिन्द्रियाणां व्यापाराभावेऽपि तस्य सर्वविषयपरीक्षाशक्तिर्यतो वर्तते अतएव नात्मा अज्ञ इत्याशय:। नन्वात्मज्ञानावस्थायां किं भवतीति प्राकृतजनानां ज्ञानबहिर्भूतत्वान् न तेषाम् उक्तप्रमाणेन नि:संशयत्वं भवतीति पुनरपि प्राकृतजनोचितयुक्त्यन्तरेण आत्मनो ज्ञत्वं साधयति गृह्णीष्वेति। अपरं विनिर्णयं सिद्धान्तमूलकं वेदं ज्ञानं गृह्णीष्व। यदा तु सुप्तो मानव: निवृत्तेन्द्रियत्वात् अचेष्टो भूत्वा स्वप्नगतो भवति, तदा विषयान्

इन्द्रियग्राह्यान् स्पर्शादीन् सुखदुःखे मनो ग्राह्येऽपि वेत्ति अनुभवति अतआत्मा न अज्ञः स्मृतः। इन्द्रियादिव्यापारमन्तरेणापि कथं स्वप्ने पश्यति शृणोति इत्यादौ स्थूलसिद्धान्तमाह नात्मेति। ज्ञानादृते आत्मा न एको वर्तते † न कदाचिज् ज्ञानरहितो भवतीत्यर्थः। न च आत्मानं विना किञ्चिज् ज्ञानं प्रवर्तते अतो भावः आत्मा नैकः समनस्कमिन्द्रियं विहाय न वर्तते अमुक्तावस्थायामिति शेषः। नापि अहेतुको अप्रवर्तकोऽपि वर्तते। निगमयति तस्मादिति। आत्मा ज्ञः प्रकृतिः सर्वपदार्थानामित्यर्थः। निगदार्थमन्यत् ॥ २७–३३ ॥

अध्यायार्थं निवेद्य तं समापयति तत्र श्लोकाविति ॥ ३४–३५ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां शारीरस्थाने खुड्डिकागर्भावक्रान्तिर्नाम तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः।

पूर्वाध्याये समासतो गर्भस्योपादानं निवेद्य व्यासतस्तद्विवक्षुरध्यायान्तरमारभते अथात इत्यादिना। महतीं व्यासतो वर्णनेन पूर्वाध्यायतो अधिकतरामित्यर्थः ॥ अध्यायेऽस्मिन् ये ये अर्था निवेद्यन्ते तानुपदिशति यतश्चेति। यद्विकारः यदुपादानः। आनुपूर्व्या अनुक्रमेण। अजन्म अनुत्पत्तिः ॥ १–३ ॥

तत्र यतश्च गर्भः सम्भवतीति व्याकरोति मातृत इति। अग्रे पूर्वाध्याये। यस्मिंश्च मर्भसंज्ञा इत्यस्य विवरणमाह शुक्रेति। शुक्रशोणितशब्देनेह स्त्रीपुंसोर्बीजमभिहितम। तत्रापि जीवसंयोगे जीवान्वितपुंबीजस्य संयोगे एव गर्भो भवति नान्यथा। तत्र संयोगाधिकरणमाह कुक्षिगते इति। कुक्षिशब्देनात्र कुक्ष्येकदेशः गर्भाशय एव लक्ष्यते। गर्भसंज्ञां निर्दिश्य यन्मयो गर्भस्तन्निर्दिशति गर्भस्त्विति। गर्भस्य पञ्चभूतोपादानत्वेऽपि पृथगयुक्तिवशाच् चतुर्विंशतिकोऽपि भवति। मातृजादिभेदेन पृथगुपादानकः पुनर्वातादिभेदेनापि पृथगुपादानको भवितुमर्हति। न चैतैर्युक्तिभेदैः विरोधमापद्यते, चतुर्विंशतिके आत्मप्रकृतिविकारसम्मूर्छितो गर्भः न खलु पञ्चमहाभूतशरीरिसमवायाद् अतिरिच्यते। मातृजादीनां वातादीनाञ्च पञ्चभूतविकारत्वात् न तत्रापि कश्चिद् विरोधः सम्भवति अतएवाह अनया युक्त्येति। भूतविकाररूपया योजनयेत्यर्थः। तस्य पञ्चमहाभूतविकारसमुदायात्मकत्वेन वातादीनामपि पञ्चमहाभूतविकारत्वेन च "वातपित्तश्लेष्माण एव देहसम्भवहेतवः" इत्यनेन सौश्रुतवाक्येन सह नास्य कश्चिद् विरोधो वर्तते। स चेतनाधातुः आत्मा इत्यर्थः ॥ ४–६ ॥

ययानुपूर्व्या गर्भो अभिनिर्वर्तते तामाह ययेति। आनुपूर्वी परिपाटी अनुक्रम इति यावत्। पुराणे रजसीति रजःशब्दोऽत्र गर्भशय्यावाची।

† 'नात्मा ज्ञानादृते चैको ज्ञातुं किञ्चित् प्रवर्तते' इति पाठोऽत्रादृतः।

गर्भशय्या हि स्त्रिया: प्रतिमासं निर्म्मीयते मासेनोपचितेन गर्भाशयशिरागतेन रक्तेन। सा च अगृहीते गर्भे निष्फलो भवतीति, मासान्ते तद्गतसिराविदारणात् तद्रक्तवेगेन सा रजोरूपेण बहिर्निःसरति, पुनर्नवीनाया: गर्भशय्याया: निर्माणारम्भ: स्यात्। एषैव स्थिति: स्त्रिया आद्वादशवर्षाद् आपञ्चाशद्वर्षात् प्रचलति। अतएव आर्तवस्रावेणानुमीयते तत्र गर्भधारणयोग्या नवीना गर्भशय्या निर्मीयत इति, तदेव निवेदयति गते पुराणे रजसि नवे चोपस्थिते इत्यनेन। शद्धस्नातां शोणितस्रावप्रवृत्ते रतिक्रान्तत्रिरात्रामित्यर्थ:। यदुक्तं धर्मशास्त्रे—"शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला।" इति। अव्यापन्नयोनिशोणितगर्भाशयामिति—योनिव्यापद्रहितां, ताश्च व्यापद: चि० ३० अ० निवेदयिष्यन्ते। शोणितस्य व्यापदस्तु सुश्रुत: प्राह यथा—"आर्तवमपि त्रिभिर्दोषै: शोणितचतुर्थै: पृथग् द्वन्द्वै: समस्तै श्चोपसृष्टमबीजं भवति" इति। तैश्च दोषै रनाक्रान्तामित्यर्थ:। अव्यापन्नयोनित्वेन अव्यापन्नगर्भाशयत्वस्य परिग्रहेऽपि पृथङ्निर्देश: सहजगर्भाशयविकृतिपरिग्रहार्थं ज्ञेयम्। अत्र ऋतुमतीमिति गर्भधारणयोग्यामित्यर्थ:। अव्यापन्नबीज: शुक्रदुष्टिलक्षणैरेव व्यापन्नबीजत्वमनुमीयत इति शुक्रदुष्टिलक्षणमाह सुश्रुतो यथा—"वातपित्तश्लेष्मकृमिपन्थि-पूतिपूय-क्षीण-मूत्रपुरीषरेतस: प्रजोत्पादने न समर्था भवन्ति" इति। मिश्रीभावं गच्छति मैथुनमापद्यते। तदा तस्य पुरुषस्य अंगादंगात् सर्वशरीरात् शुक्रस्य तु सर्वशरीरव्यापित्वमायुर्वेदसमय:। हर्षोदीरित: संगमहर्षेण संहत्य स्थूलतामापन्न:। परोऽन्तिम: शरीरधात्वात्मा शरीरधातुस्वरूप: शुक्रभूत: स्थूलशुक्रतामापन्न: सम्भवति उत्पद्यते स्थूलशुक्रवहस्रोतसो: मूले वृषणद्वये इति शेष:। तथा पूर्वोक्तेन प्रकारेण हर्षभूतेन उदीरित: आत्मना अधिष्ठितश्च चेतनाधातुसमन्वित: स बीजरूपो धातु: पुरुषशरीरादभिनिष्पत्य वृषणाभ्यां स्थूलशुक्रवहस्रोतोभ्यां वस्तिद्वारसमीपे संभृत्य तदधो द्व्यंगुले मूत्रप्रसेके प्रस्रुत: तेनैव मार्गेण निर्गत्य इत्यर्थ:। यदुक्तं सुश्रुते—

"द्व्यंगुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यध:।
पथाच्छुक्रं पुरुषस्य प्रवर्तते॥" इति।

उचितेन पथा योनिद्वारेण इत्यर्थ:। प्राय: स्त्रिया: योन्या द्वितीये आवर्ते स्त्रीन्द्रियरूपे पुरुषस्य शुक्रच्युतिर्भवति पश्चात् चेतनाधातुसमन्वित: तद्गतो बीज: सचेतनत्वेन आत्मचेष्टयैव योन्यास्तृतीये आवर्ते प्रविशति स्त्रीबीजेन संसर्गमाप्तुमित्याह गर्भाशयमिति। अनुच्यवनानन्तरं गर्भाशयं योन्यास्तृतीयमावर्तमित्यर्थ:। आर्तवेन स्त्रीबीजेन संसर्गमेति संयुक्तो भवतीत्यर्थ:। यदुक्तं वृद्धजीवकीये—"प्रविष्टमात्रं बीजं हि रक्तेन परिवेष्ट्यते" इति। अत्र रक्तेन स्त्रीबीजेनेत्यर्थ:। तत: किं भवतीत्याह तत्र पूर्वमिति। तत्र मिलितस्त्रीपुंबीजे अवस्थित: चेतनाधातु: ससत्त्वकरण: मनोबुद्धीन्द्रियसहित:। यदुक्तं सुश्रुते—"क्षेत्रज्ञ:.....भूतात्मना सह

अन्वक्तं सत्त्वरजस्तमोभिः देवासुरैः रपरैश्च भावैः वायुना अभिप्रेर्यमाणो गर्भाशयमनुप्रविश्य अवतिष्ठते" इति। अत्र भूतात्मनेति सुसूक्ष्मैश्चतुर्भिः भूतैः सहेत्यर्थः। अन्वक्तमिति अक्षैरिन्द्रियैः सहेत्यर्थः। शुक्रे ससत्त्व-करणस्य आत्मनः सत्ता "तदन्तरप्रतिपत्तौ रंहति संपरिषक्तः" इत्युत्तर-मीमांसासूत्रभाष्ययोः (३।१।१) पुनः "तस्मिन् यावत् सम्पात-मुषित्वा" इत्यादि छान्दोग्योपनिषत्श्रुतौ (५।१०।३) भाष्ये च अनु-सन्धेया। गुणग्रहणाय स्थूलभूतादिग्रहणाय। प्रवर्तते आत्मशरीरं सिसृक्षु-रिति शेषः। तस्य च तथा भूतग्रहणे सामर्थ्यं हेतुगर्भविशेषणैः प्रतिपाद-यति स हीति। हि यतः सः हेत्वादिभिर्विशेषणैः विशिष्यते अतएव आत्मानं स्रष्टुमर्हतीत्याशयः। गुणीति सत्त्वादित्रिगुणान्वितः। न खल्वायुर्वेदे निर्गुणस्यात्मनः प्रयोजनमस्ति इति प्रागेव प्रतिपादितम्। पुरि शरीरे गलति संक्रामतीति पुद्गलः। तस्मिन् गुणोपादानकाले अन्येभ्यः गुणेभ्यः वा-य्वादिभ्यः पूर्वतरं प्राक् अन्तरीक्षमाकाशमुपादत्ते। तमेव सृष्टिप्रकारं दृष्टान्तेन विशदयति यथेति। अक्षरभूतः परमात्मा प्रलयात्यये महा-प्रलयान्ते भूतानि सिसृक्षुः सत्त्वोपादानं सत्त्वगुणप्रधानम् आकाशम्। सत्त्वोपादान इति पाठेतु सत्त्वमेवोपादानमाकाशनिर्माणे यस्य सः। तथा च तैत्तिरीयश्रुतौ "एतस्माद् आत्मनः आकाशः सम्भूतः" इति। ततः आकाशसृष्टेरनन्तरं व्यक्तरगुणान् स्पर्शरूपादिगुणविशिष्टान्। देह-ग्रहणेऽपि प्रवर्तमानः जीवशरीरं सिसृक्षुः गर्भे चेतनसंसर्गान् निमेषमात्रा-देव कालात् पञ्चभूतग्रहणं भवतीत्याह सर्वमिति॥ ७-८॥

ततः किं भवतीत्याह स इति। स चेतनाधातुः सम्मूर्छितः मिलित-स्त्रीपुंबीजेन संसृष्टः सर्वधातुकलनीकृतः सर्वेषां धातूनां त्रयोदशानां देहधातूनां परमसूक्ष्माणां कलनेन एकत्र संग्रहेण कृतः। शरीरस्य पाञ्चभौतिकत्वेऽपि जीवितशरीरस्य देहधातुसमुदायात्मकत्वात् गर्भएव देहधातूनां सूक्ष्मरूपेण आकलनं भवतीत्याशयः। खेटभूतः श्लेष्मसिंघाणकप्रतिमो भवति। एवं देहधातूनां संयोगात् द्रवप्रायात् शुक्रशोणितात् ईषद्घनत्वमापन्नः खेटभूतः गर्भशय्यायामेकस्थाने संलग्नस्तिष्ठति। पुनश्च कीदृशः अव्यक्तविग्रहः इति तदापि मनुष्याणां आकृतिर्व्यक्ता न भवतीत्यर्थः। तत्रैव हेतुगर्भं विशेषण-माह सदसद्भूतांगवयव इति। सद्भूताः पञ्चादाविर्भावात् असद्भूताः अव्यक्तत्वेन अननुभवात् अंगावयवाः यस्य सः। तत्र सूक्ष्मरूपेण सर्वेषा-मेव अंगप्रत्यंगानां सत्ता वर्तत इति तेषां सत्त्वम् एवमव्यक्तत्वादसत्त्वम्। तत्र तु सर्वशरीरसमन्वितमव्यक्तं जीवमावेष्ट्य सर्वदेहधातवः सूक्ष्मा-कारेण वर्तन्त इति स गर्भः तदा न द्रवो न वा घनो भवतीत्याशयः। गर्भोपनिषदि च प्रथमे मासि इतः किञ्चिद् वैशिष्ट्यं दृश्यते तद् यथा—"ऋतुकाले सम्प्रयोगाद् एकरात्रोषितं कललं भवति। सप्तरात्रोषितं बुद्बुदं भवति, अर्धमासाभ्यन्तरे पिण्डो भवति, मासाभ्यन्तरे कठिनो भवति"

इति । द्वितीये मासि प्रथममासातिक्रमे स गर्भः घनः कठिनः सन् पिण्डः पेशी अर्बुदं वा सम्पद्यते । तत्र पिण्डादीनामाकृतिमाह भोजतन्त्रे यथा—

"चतुरस्रा भवेत् पेशी वृत्तः पिण्डो घनः स्मृतः ।
शाल्मलमुकुलाकारमर्बुदं परिचक्षते" ॥ इति ।

एवमेव द्वितीयमासान्ते गर्भस्य लिंगज्ञानमपि अनुमेयं स्यादित्याह तत्रेति । घनः पिण्डाकारो वृत्तः ॥ ९-१० ॥

तृतीये मासि सर्वेन्द्रियाणि सर्वावयवाश्च परिस्फुटानि भवन्तीत्याह तृतीय इति । यौगपद्येन एककालमेव । अभिनिर्वर्तन्ते परिस्फुटानि भवन्ति । के ते अंगावयवाः इत्याह तत्रास्येति । केचित् न सर्वे । पूर्वं तृतीयेऽध्याये । अत्र तु महाभूतविकारप्रविभागेन के के अवयवाः कस्मात् कस्मान् महाभूताज्जातास्तद्विभागेन । तान् मातृजादीन् । पर्यायान्तरेण भेदप्रकृत्यन्तरेण । अपरान् मात्रादिजेषु अनुक्तान् । यद्यपि महाभूतविकारजा अंगावयवाः सर्वएव न मात्रादिजेभ्यः पृथक्, तथापि वैशिष्ट्यज्ञानार्थं पृथगुच्यते इत्याशयः । विवेकः पृथग्भावः सावकाशता इत्यर्थः । स्पर्शनं स्पर्शनेन्द्रियम् । प्रेरणमात्मप्रयत्नवशात् देहावयवानां सर्वतः सञ्चालनम् । धातुव्यूहनं सर्वेषां देहधातूनां यथावत् सम्यगवस्थापनम् । शारीर्यश्चेष्टाश्च प्रवृत्तिनिवृत्तिवशात् । दर्शनं दर्शनेन्द्रियम् । घ्राणं घ्राणेन्द्रियम् । मूर्त्तिः संघातः ॥ सर्वविधवस्तुसामग्रीसत्त्वात् भुवनेन पुरुष उपमीयते एवमयमिति । लोकसम्मितः पृथिवीसदृशः । तमेवार्थं विवृणोति यावन्त इति । भावविशेषाः पदार्थविशेषाः । इति हेतोः । बुधाः मुमुक्षवो तत्त्वज्ञानिनः एवं पृथिवीसादृश्येन । एवं लोकपुरुषसादृश्यं व्यासतो व्याख्यास्यते पुरुषविचये शारीरे ॥ ११-१३ ॥

पृथक् पृथग् अंगावयवस्य प्रागुत्पत्तौ मतमतान्तरं वक्ष्यमाणं निराकरिष्णुः पुनरपि दृढतया सर्वेषामंगावयवानां यौगपद्येनोत्पत्तिं निर्दिदिक्षति एवमस्येति । ननु चेत् सर्वांगावयवा स्तदा सम्पद्येरंस्तर्हि दशनादिकमपि किं तदैव जायते इत्याह अन्यत्रेति तेषां तु जातस्योत्तरकालभावित्वान् न तदा दर्शनाद्युत्पत्तिरित्यर्थः । व्यञ्जनानि पूर्णतया स्त्रीपुंसोर्व्यञ्जकानि स्तनगुम्फादीनि । व्यक्तीभावश्च शुक्रशोणिताविर्भावात् पौरुषादेरित्यर्थः । ननु कदाचित् सदन्तानां बालानां जन्म दृश्यते इत्याह एषा प्रकृतिः विकृतिः पुनरतो अन्यथेति । सदन्तानां बालानां जन्म विकृतिरेवेत्यर्थः । ननु कथं सा विकृतिरित्यंगावयवानां नित्यानित्यत्वं दर्शयति सन्तीति । नित्यत्वंयावच्छरीरस्थायित्वमिह बोद्धव्यम् । अनित्यत्वन्तु उत्तकालोत्पन्नत्वं प्रागेवापगतत्वञ्च ज्ञेयम् । अतो दशनस्यानित्यत्वेन नित्यतावाप्तिः विकृतिरेव भवेदित्यर्थः । नित्यावयवेष्वेव योनिलिंगादिकं तस्य लिंगव्यञ्जकं भवतीत्याह तस्येति । पुनश्च गर्भस्य लिंगव्यञ्जकाः केचिद् भावाः गर्भिणी शरीरे लक्षणीया भवन्तीत्याह तत्रेति । प्रधानसंश्रयाः आत्मसंश्रयाः गुणसंश्रयाः

शरीरसंश्रयाश्च, ये स्त्रीपुरुषयोः वैशेषिकाः स्त्रीपुंसौ विशेषयितुं लक्षणानि तेषां यस्मिन् गर्भे भूयस्त्वं आधिक्यं भवति, ततः तस्मिन् गर्भे अन्यतरभावः स्त्रीत्वं पुंस्त्वं नपुंसकत्वं वा भवतीति शेषः। तान् भावानाह तद्यथेति। क्लैब्यं विक्रमहीनत्वम्। अवैशारद्यम् उद्यमहीनता। अनवस्थानं चाञ्चल्यम्। असंहननमनिविडावयवता। शैथिल्यमंगावयवानां शिथिलतया संयोगः। तथायुक्तान्यपराणि सव्यांगचेष्टादीनि प्रागुक्तानि। अतो विपरीतानि अक्लैब्याभीरुत्वादीनि। मिश्रलिंगानि तु नपुंसककराणीत्याह उभयेति॥ १४॥

तस्मिन्नेव मासि स्त्रियाः द्वैहृदस्य माविर्भवति इत्याह तस्य यावत्कालमिति। ननु सुश्रुते चतुर्थएव मासि द्वैहृदस्याविर्भावः कथितइति तेनास्य विरोध इति चेन्न। सुश्रुतेऽपि तृतीयएव मासि अंगप्रत्यंगविभागः सूक्ष्मो भवतीत्युक्तम्, तेन सूक्ष्मतया हृदयस्यापि अभिव्यक्तिर्भवत्येव। ततश्च तद्गतबुद्धीन्द्रियाणां सूक्ष्मतया अभिव्यक्तिवशात् तदापि प्रार्थना ईषद्व्यक्ततया सम्भवति, चतुर्थे तु तस्या एव प्रव्यक्तीभावात तदैव दौहृदस्योत्पत्तिकथनं नातो विरुद्धं भवतीत्याह यत्कालमिति। यत्कालं तृतीयचतुर्थमासाभ्यन्तरे। नहि सर्वेषामेव गर्भाणामेककालमिन्द्रियव्यक्तता भवेदिति तात्पर्यम्। अतएव द्वैहृदस्यकालनियमे मतमतान्तरं दृश्यते। वृद्धजीवकीये कौमारभृत्ये तु तृतीय एव मासि दौहृदस्यकालप्रवृत्तिरुक्ता। यथा—

"सर्वेन्द्रियाणि गर्भस्य सर्वांगावयवास्तथा।
तृतीयेमासि युगपन्निर्वर्तन्ते यथाक्रमम्॥
प्रस्पन्दते चेतयति वेदनाश्चावबुध्यते॥" इति।

वृद्धवाग्भटस्तु नानार्षग्रन्थान् मतान्याहृत्य पञ्चत्रयात् प्रभृति आपञ्चमासाद् दौहृदं कालमाह। सन्तिष्ठन्ते व्यक्तीभवन्ति। वेदनानिबन्धम् अनुभूतिसमूहम्। तस्माद् अनुभूतेः प्रादुर्भावात। तदा प्रभृति तृतीयमासादारभ्य। कथं गर्भस्य प्रार्थना व्यक्तीभवतीति गर्भस्य मातृद्वारेणैव प्रार्थना प्रकटीभवतीत्याह मातृजमिति। अस्य गर्भस्य मातृजं हृदयं मातृहृदयेन रसवाहिनीभिः सम्बद्धं भवति, एताभिरेव मातुरन्नरसेन गर्भः पोष्यते। यदुक्तं सुश्रुते—"मातुस्तु खलु रसवहायां नाड्यां गर्भनाभिनाडी प्रतिबद्धा सास्य मातुराहारसवीर्यमभिवहति। तेनोपस्नेहनेनास्याभिवृद्धिर्भवति" इति। तत्र प्राङ्निर्मिता गर्भशय्यैव गृहीते गर्भे क्रमादुपचीयमानशोणितेन स्थूलासत्यपरा भवति। अस्याः बहिर्गर्भपार्श्वस्थोभागः श्लक्ष्णः कूर्मपृष्ठो भवति। अभ्यंतरस्तु नतोन्नता गर्भाशयपेशीषु संसक्ता भवति। तत्र गर्भाशयपेश्यन्तर्गताभिः सुसूक्ष्माभिः धमनीभिः मातृहृदयादागतोऽन्नरसः अपरायाः प्रथमे पटले सञ्चीयते, ततो गर्भादागताभिः धमनीभिराकृष्टः नाभिनाडीगताभिः शिराभिः गर्भशरीरे गच्छति तं पोषयितुम्। यदुक्तं वृद्धवाग्भटे—"ततो

व्यक्तीभवदंगस्यास्य नाभ्यां प्रतिबद्धा नाडी, नाड्या मपरा, तस्यां मातृहृदय । ततो मातृहृदयाहाररसो धमनीभि: स्यन्दमानोऽपरामुपैति तत: क्रमान् नाभिम । ततश्च पुनर्गर्भस्य पक्वाशये स्वकायाग्निना पच्यमान: प्रसादबाहुल्यात् धात्वादिपुष्टिकर: सम्पद्यते" इति (शां० १ अ०)। तस्माद् एवं सम्बद्धत्वात् ताभिर्धमनीभि: तयोर्मातुर्गर्भस्य च हृदययो: भक्ति रिच्छा सम्पद्यते गतागतिं करोति । गर्भस्येच्छा मातुरिच्छारूपेण प्रकाशते इत्यर्थ: । तच्चैव कारणम् अवेक्षमाणा भिषज इति शेष: । न गर्भं द्वैहृदय्यविमानितं कर्तुं गर्भिण्या आकांक्षामपूरयन् दौहृदं न्यक्कर्तुमिच्छन्ति । तत कस्य हेतोरित्याह विमानने इति । विमानने अपूरणे विनाश: अधिकविमाननेन स्वल्पेन च विकृतिर्भवतीत्यर्थ: । कथमित्याह समानेति । हि यत: माता गर्भिणी केषुचिदर्थेषु विषयेषु पोषणादिषु समानयोगक्षेमा इति मातृगर्भयोस्तु हिताहितयोगायोगौ समानौ भवत: इत्यर्थ: । गर्भिण्या: शारीरमानसोपघाताभ्यां गर्भस्यापि शारीरमानसोपघातौ स्यातामिति निष्कर्ष: । निगमयति तस्मादिति ॥ १५ ॥

विना गर्भिणीज्ञानं दैहृदय्यं पालनीयं नवेति न केऽपि ज्ञातुमर्हन्तीति गर्भिणीज्ञानार्थं लिंगानि वक्तुमुपक्रमते तस्या इति । दैहृदय्यस्य विज्ञानार्थं कर्तव्यं नवेति ज्ञानार्थं तस्या: गर्भिण्या: गर्भापत्ते: जातस्य गर्भस्य लिंगानि । हि यत: अस्य गर्भस्य ज्ञाने सति उपचारसम्बोधनं कथमुपचरितव्या सा इति ज्ञानं भवतीति शेष: । तच्च गर्भस्य ज्ञानं लिंगत: गर्भिणीलक्षणै: भवतीति शेष: । कानि तानि लिंगानीत्याह तद्यथेति । आर्तवादर्शनं प्रतिमासमृतुशोणितस्रावरोध: । अनन्नाभिलाष: भोक्तुमनिच्छा । अरोचक: भुक्तद्रव्ये स्वादुत्वाज्ञानम् । विशेषेण उच्चावचेषु भावेषु नानाप्रकारद्रव्यादिषु श्रद्धाप्रणयनम् आकांक्षाप्रकाश: । चक्षुषो: ग्लानि: ईषत्कोटरप्रवेश: । स्तनयो: स्तन्यं स्तन्याविर्भाव: । स्तनमण्डलयो: कृष्णमण्डलचूचुकयो: अत्यर्थं काष्ण्यं कृष्णवर्णता । रोमराज्युद्गम: योनिमण्डललोमान्तादारभ्य नाभिं यावत् अव्यक्तरोमरेखाया विस्पष्टीभाव: । चाटालत्वं विस्ताराधिक्यम् । पर्यागते वर्धिते सति । सुश्रुतेन तु अन्यान्यपि लक्षणानि लिखितानि तद्यथा—

"स्तनयो: कृष्णमुखता रोमराज्युद्गमस्तथा ।
अक्षिपक्ष्माणि चाप्यस्या: सम्मील्यन्ते विशेषत: ॥
अकामतश्छर्दयति गन्धादुद्विजते शुभात् ।
प्रसेक: सदनञ्चापि गर्भिण्यालिंगमुच्यते ॥" इति ।

एवं गर्भिणी लक्षणानि निवेद्य पुनर्दैहृदय्यप्रकरणमारभते सेति । अन्यत्र गर्भोपघातकरेभ्यो भावेभ्य: द्रव्यकर्मभ्य: । ननु के ते गर्भोपघातकरा भावा इत्याह गर्भेति । दारुणा: चेष्टा: कठिनश्रमसाध्यो व्यायाम: । देवतेति देवताद्यनुचरेभ्यो रक्षणाय । बिभृयात् परिदध्यात् औषधार्थं स्तोक-

मात्रं मद्यपानं न प्रतिषिद्धमित्याह मदकराणि मत्ततापादकानि । यानमिति सामान्येनोक्तेऽपि संद्योभियानमत्राभिप्रेतम् । स्त्रियो ग्रामवृद्धाः इति शेषः । ननु उक्तेषु भावेषु चेत् तीव्रा आकांक्षा स्यात् तदा किं कार्यमित्याह तीव्रायामिति । हितोपहितं बहुतरहितकरद्रव्योपयोगेन स्वल्पमप्यहितं कामं दद्यात् अकामतोऽपि दातुं स्वीकुर्यात् । कथमित्याह प्रार्थनेति । प्रार्थनासन्धारणात् इच्छावेगरोधात् । आपाद्यमानस्येति गर्भस्यातितरुणत्वात् स्वल्पोऽपि वातप्रकोपो अहिताय भवेदित्याशयः ॥ १६-१९ ॥

चतुर्थे मासि गर्भपरिणतिमाह चतुर्थ इति । स्थिरत्वे सर्वांगप्रत्यंगानां व्यक्ततरत्वान् मानवाकारत्वमापन्ने । गुरुगात्रत्वञ्चास्याः गर्भस्य पूर्वस्मात् गुरुत्वाधिक्याद् भवति । पञ्चमे मासि गर्भपरिणाममाह पञ्चम इति । मातुर्मांसशोणितपोषकान्नरसस्य गर्भपोषणाय अधिकतरव्ययात् तस्याः कृशत्वं युज्यत एव । षष्ठे तु मातुबलवर्णपोषकेण अन्नरसेन गर्भस्य बलवर्णौ अधिकतरं पोष्येते इति तस्याः बलवर्णहानिर्युक्तैवेत्याह षष्ठे इति । सप्तमे मासि गर्भपरिणतिमाह सप्तम इति । सर्वैः भावैः देहधातुभिः । सहसा युगपदेव । सर्वाकारैः सर्वधातुह्रासजन्यैः क्लान्ततमा बलवर्णादिह्रासेन क्षीणतमा ॥ २०-२३ ॥

अष्टमे तु गर्भस्य पूर्णांगत्वाद् ओजो विहाय सर्वधातुसमन्वयाच्च मातुर्हृदयगतं परमोजः ततः क्षणे क्षणे गर्भहृदयं गच्छति रसवाहिनीभिर्धमनीभिरित्याह अष्टम इति । परस्परमाददाते एकमेवौजः कदाचिन् मातृहृदये, कदा वा गर्भहृदये तिष्ठतीत्यर्थः । गर्भस्येति गर्भस्यौजस इत्यर्थः । एवं यदा ओजो मातृहृदये तिष्ठति तदा सा प्रहृष्टा, यदा च गर्भहृदये तदा म्लाना भवतीत्याह तस्मादिति । गर्भोऽपि एवं भवतीत्याह तथा गर्भ इति । गर्भस्यौजसोऽसम्पूर्णत्वाद् गर्भस्य जन्म ओजोहीनत्वेन मरणायैव भवतीत्याह तस्मादिति । तच्चैवार्थं गर्भव्यापत्तिरूपमर्थमभिसमीक्ष्य । अगण्यं गर्भिणीसकाशे न गणनीयम् । तथा कृते गर्भव्यापत्तिभयान् मातुर्गर्भस्य वा हानाय भवतीत्याशयः ॥ २४ ॥

अष्टममासातिक्रमे नवममासप्रवृत्तिकालादेव स्वभावसिद्धः प्रसवकालः प्रवर्तते इत्याह तस्मिन्निति । आद्वादशमासात् † द्वादशमासप्रवृत्तिं यावदित्यर्थः । अत्र केचिदादशमादिति पठन्ति व्याचक्षते च दशमातिरिक्तस्थायित्वे गर्भस्य विकार एव मन्तव्यः इति । वृद्धजीवकीयेऽपि गर्भस्य कालातीतस्थितिः कर्मवशाद् भवतीत्युक्तम्, तद्यथा—

"नवमादिषु मासेषु जन्मचास्य यथा क्रमम् ।
पूर्वदेहकृतं कर्म गर्भवाससुखासुखम् ॥" इति ।

सुश्रुतेऽपि "नवमदशमैकादशद्वादशानामन्यतमस्मिन् जायते" इत्येवं पाठदर्शनादत्रापि तथैव पाठ आदृतो मया एकवाक्यतारक्षणाय । अतः परं

† 'आद्वादशमासात्' इति पाठोऽत्रादृतः ।

द्वादशमासातिक्रमे गर्भस्य कुक्षौ गर्भाशये स्थानमवस्थानं वैकारिकं भवति, अतश्चिकित्स्यं भवतीत्यर्थः । चतुर्थप्रश्नस्य उत्तरमुपसंहरति एवमिति ॥ २५-२६ ॥

क्रमागतत्वाद् "यश्चास्य वृद्धिहेतुः" इति प्रश्नस्योत्तरमाह मात्रादीनामिति । मातापित्रात्मसत्त्वसात्म्यरसानां सम्पदः तथावृत्तसौष्ठवात् ‡ गर्भपरिपोषकत्वातिशय्यात् इत्येको हेतुः । मातृतः मातुरुपस्नेहेन मातुरन्नरसोपस्नेहेनेत्यर्थः । यदुक्तं सुश्रुते—"मातुस्तु खलु रसवहायां नाड्यां गर्भनाभिनाडी प्रतिबद्धा, सास्य मातुराहाररसवीर्यमभिवहति, तेनोपस्नेहेनास्याभिवृद्धिर्भवति । असंजातांगप्रत्यंगविभागमानिषेकात् प्रभृति सर्वशरीरावयवानुसारिणीनां रसवहानां तिर्यग्गाणां धमनीनामुपस्नेहो जीवयति" इति। उपस्वेदस्तु मातुः कायाग्न्युष्मभिरित्यर्थः । ताभ्यामिति द्वितीयो हेतुः । कालपरिणामात् कालापगमात् स्वभावसंसिद्धेः अवृद्धिकरहेत्वभावात् स्वभावत एव गर्भस्य अभिवृद्धिर्भवति ॥ २७ ॥

कुतस्त्वस्य अजन्म भवतीत्यस्य प्रश्नस्योत्तरमाह मात्रादीनामिति । मात्रादिभावानां व्यापत्तिस्तु मातुः शोणितदुष्टिः, पितुश्च शुक्रदुष्टिः, कर्मवशात् शुक्रे आत्मनोऽसंक्रमणमित्यादिका ज्ञेया । अजन्म गर्भानुत्पत्तिः ॥२८

यतश्च जायमानः कुक्षौ विनाशं प्राप्नोति इति प्रश्नस्योत्तरमाह येह्यस्येति । वृद्धिहेतुसमाख्याताः पूर्वोक्ताः मात्रादीनां गर्भकराणां भावानां सम्पदः इत्यादिना ग्रन्थेन । विपर्ययात् विपरीतभावात् । मृतं सन्तानं प्रसूते दोषाधिक्येन, अचिरजात एव वा प्रसवादनन्तरमेव म्रियते मनाग् दुष्टे इत्यर्थः ॥ २९ ॥

अधुना शिष्टस्य अष्टमप्रश्नस्योत्तरमाह यतस्त्विति । जन्मवन्ध्यादीनां जीवितानामपि मृतवद् व्यवहारात् तथा विकृतसन्तानानां प्रसूतानां जीवितत्वेऽपि आंशिकमृत्युमवधारयन् विशेषयति कात्स्न्येनेति । स्त्रियाः शोणितगर्भाशययोः स्त्रीबीजगर्भाधिकरणयोः । न कात्स्न्येन उपघाताय आंशिकविकाराय सम्पद्यन्ते, सर्वथा संदुष्टत्वे हि गर्भोत्पत्तेरसंभावात् । तदा इयं स्त्री यं गर्भं लभते, तस्य गर्भस्य मातृजानामवयवानां पूर्वाध्यायोक्तानां लोहितमांसादीनामेकोऽथवा अनेकोऽवयवः विकृतिमाप्नोतीत्यर्थः । बीजे स्त्रीबीजे यस्यावयवस्य बीजभागे । स्त्रीबीजे हि मातृजानामवयवानां सूक्ष्मतया सत्ता वर्तत इति बीजस्य तस्मिन् अंशे इत्यर्थः । उदाहरणार्थं कतिचिद् विशिष्टनामधेयान् विकृतान् गर्भान् उल्लिखति यदेति । शोणिते स्त्रीबीजे गर्भाशयबीजभागः तद्गतगर्भाशयरूपबीजांशः प्रदोषमापद्यते साकल्येन दुष्टत्वान् नष्टो भवति, तदा बन्ध्या गर्भाशयहीनत्वात् प्रजोत्पादने असमर्थां कन्यां जनयति । पुनरपि स्त्रीव्यापदन्तरं व्याकरोति यदेति । गर्भाशयबीजभागावयवः स्त्रीबीजगतगर्भाशयबीजांशस्यैकदेशः । पूतिप्रजा

‡ 'तथावृत्तसौष्ठवात्' इति पाठः ।

मृतवत्सा । पुनः प्रकारान्तरमाह यदा त्वस्या इति । स्त्रीकराणां शारीरबीज-भागानां भगादीनामेकदेशः प्रदोषमापद्यते दोषदुष्टो भवति । स्त्र्याकृति-भूयिष्ठं बाहुल्येन स्त्रीशरीरं परन्तु अस्त्रियं स्त्रीन्द्रियरहितां वार्तां नाम कन्याकारां जनयति । अस्याः नामान्तरं स्त्रीव्यापदिति । तां पुनरद्यत्वे 'हिजरा' इतिकथ्यते । त्रिविधां स्त्रीव्यापदमभिधाय तथैव त्रिविधं पुंव्यापदमाह एव-मेवेति । पुरुषस्य बीजदोषे पितृजानामवयवानां विकृतिर्भवति । † पूर्ववदु-दाहरणत्रयं लिखति यदेति । बीजे पुंबीजावयवे बीजभागः शुक्राशयगतो-ऽशः प्रदोषमापद्यते दोषदुष्टतया साकल्येन नाशं गच्छति, तदा वन्ध्यः साकल्येन शुक्राशयाभावाद् अप्रजो भवति । तस्यैव एकदेशदुष्टौ पूति-प्रजो भवति, यदास्य सन्तानं भवेत्तत् मृतमेव भवेत् । तृतीयप्रकारमाह यदात्विति । पुरुषाकृतिभूयिष्ठं बाहुल्येन पुरुषाकारं परन्तु अपुरुषं पुंलिंग-रहितं तृणपूलिकं नाम नपुंसकं भवति । 'खोजा' इति यावनाः । एवं सात्म्यादिजानामपि अवयवानां प्रदुष्टानां विकृतिर्भवतीति आह एते-नेति ॥ ३०–३३ ॥

नन्वात्मजानामवयवानां विकृतिः कथं नोक्ता इत्याह निर्विकार-इति । विकृतिमतां मनःशरीराणां विकृतिवशादेव निर्विकारस्यापि आत्मनः खञ्जत्वाद्यपलब्धिः भवति, अहं खञ्जः अहं काणः इत्यादि । वस्तुतस्तु तस्य निर्विकारत्वात् सा च बुद्धिः भ्रान्ता एवेत्यर्थः । तस्याश्च बुद्धौ कारणं हेतुगर्भविशेषणेनाह सर्वभूतानां निर्विशेषः इति । सर्वप्राणि-शरीराणां तुल्यत्वेनैव बद्धावस्थायां ज्ञानं भवतीत्याशयः । ननु के ते दोषाः शरीरसत्त्वे दूषयन्तीत्याह तत्र त्रय इति । त्रयो वातपित्तकफाः शरीरं दूष-यन्ति । ननु ते कथंकारं शरीरस्य सर्वत्र गत्वा सर्वान् धातून् दूषयन्ति । न च ते चेतनाः स्वेच्छया सर्वत्र गन्तुं समर्थाः इति चेत् कथ्यते । शारीर्यः सर्वा क्रियाः आत्मनस्त्रिविधप्रयत्नवशादेव भवन्ति । वातादीनान्तु शरीरे सञ्चालनं तु न प्रवृत्तिवशात् न वा निवृत्तिवशाद् भवितुमर्हति । अतो जीवयोनिप्रयत्नवशादेव तेषां सर्वशरीरव्यापित्वं युज्यते । ननु शरीर-दूषणे आत्मनो जीवनयोनिप्रयत्नो न सम्भवति कर्मैतन् मरणायोन्येव भव-तीति चेन्न । वातादयो हि शरीरोपादानभूताः तैरेव सप्त धातवः पोष्यन्ते यदुक्तं वृद्धजीवकीये—"वातादीनान्तु धातूनामितरे धातव आप्या-यिता भवन्ति" इति । अत्र वातादीनामिति तृप्त्यर्थधातुयोगेन करणे षष्ठी अतो वातादिभिरित्यर्थः । अतएव सप्तधातुपोषणे वातादयः उपादा-नानि भवन्ति । चेत् ते दुष्टाः भवेयुः, तदापि जीवनयोनिप्रयत्नवशात् पोषणव्यपदेशेन तान् तान् अंगावयवान् संविश्य उपादानवैकृत्या तान्

† 'पुरुषस्य' इत्यनन्तरं 'बीजदोषे पितृजावयवविकृतिं विद्यात्' इत्यतिरिक्तः पाठोऽत्र परिगृहीतः ।

दूषयितुं समर्था भवन्ति नान्यथा। एवं मनसोऽपि सत्त्वप्रधानत्रिगुणोपादानत्वं संसिद्धमस्ति। तत्र आहारविहारात् रजोगुणाधिक्ये तमोगुणाधिक्ये वा दुष्टं भवेदिति रजस्तमसोः मनोदूषकत्वं सिध्यति नान्यथा। एवमुपादानदुष्ट्या एव तयोर्दुष्टिर्भवतीति तयोर्विकृतिः लौकिकी भवितुमर्हति। अप्रदुष्टेषूपादानेषु न ते कदापि दुष्टे भवतः, नवा अन्या कापि विकृतिर्भवेदित्याह ताभ्यामिति ॥ ३४-३५ ॥

तयोर्दोषान् निरूप्य शरीरसत्त्वे निरूपयति तत्रेति। योनिविशेषात् जरायुजाण्डजोद्भिज्जस्वेदजभेदात्। अग्रे खुड्डिकागर्भावक्रान्तौ। शरीरं निरूप्य मनो निरूपयति त्रिविधमिति। सत्त्वं मनः। शुद्धं सात्त्विकम्। अदोषं सत्त्वबाहुल्यात् रजस्तमोभ्यामनाक्रान्तत्वम्। कल्याणांशत्वादिकं विस्तरशः प्रतिपादयति। एवं त्रिविधानां सत्त्वानां स्थूलतः कतिचित प्रकारान् प्रकृतिभेदेन निर्दिश्य दर्शयति तेषामिति। तेषां मध्ये एकैकस्य सात्त्विकादेः भेदाग्रं भेदसमूहः अपरिसंख्येयं संख्यातुमशक्यम्। तरतमयोगाद् अंशविभागे न्यूनाधिक्यात पृथक् पृथक् जीवानां प्रत्यकशो मनसि सत्त्वगुणस्य एतावानंशो रजसश्चैतावान् तमसोऽप्येतावान् इत्यादिभेदेनेत्यर्थः। शरीरयोनिविशेषेभ्यः शरीरविशेषात् सात्त्विकेभ्यो जातेऽस्मिन् सत्त्वगुणाधिक्यमित्यादिवदित्यर्थः। अन्योन्यानुविधानात् शरीरमनसोः परस्परमनुवर्तनात् सत्त्वं मनः शरीरमनुविधीयते अनुवर्त्यते शरीरं च मनः। तस्माद् अपरिसंख्येयत्वात् कतिचित् सत्त्वभेदान् अनुकाभिनिर्देशेन प्रकृतिभेदं निर्दिश्येत्यर्थः। निदर्शनार्थमुदाहरणार्थम् ॥ ३६-३७ ॥

तत्र क्रमशः शुद्धसत्त्वस्य तरतमयोगात् सप्तभेदान्, राजसस्य च षड्भेदान्, तामसस्य च त्रीन् व्याकरोति तद्यथेति। सत्याभिसन्धं सत्याश्रयिणम्। जितात्मानं जितेन्द्रियम्। संविभागिनं दातारम्। कामादिरहितमित्याह कामेति। सर्वभूतेषु सर्वप्राणिषु समं समद्रष्टारम्। अतिथिव्रतम् अतिथिसेवापरायणम्। आदेयवाक्यं सर्वेषामनुमतवाक्यकथनशीलम्। अक्लिष्टकर्माणं अक्षुद्रकर्माणम्। दीर्घदर्शिनं दूरदर्शिनम्। लेखास्थवृत्तं नियमानुवर्तिनम्। प्राप्तकारिणं सर्वकर्मकुशलम्। असंहार्यम् अपश्चात्पदम्। उत्थानवन्तम् उद्यमवन्तम्। स्थाने कोपप्रसादं यथोपयुक्तस्थान एव कोपशीलं प्रसादशीलं वा। उल्लापको नाम हास्यरसप्रधानो वक्रोक्त्यादिः। कल्याणांशत्वात् मंगलप्राधान्यात्। तत्संयोगाद् अत्यन्तकल्याणप्राधान्यात्। अत्यन्तशुद्धं विशुद्धसत्त्वप्रधानम् ॥ ३८-४५ ॥

सादृश्यमुखेन राजससत्त्वभेदान् वक्ति शूरमिति। औदरिकं स्वोदरपूर्तिपरायणम्। अननुक्रोशकं निर्दयम्। अनुबन्धकोपं चिरस्थायिक्रोधम्। छिद्रमवकाशं निरूप्य प्रहरतीति तं छिद्रप्रहारिणम्। क्रूरं निष्ठुरम्। स्त्रीरहःकामं स्त्रीसमाजं निर्जनञ्च कामयते इत्यर्थः। क्रुद्धशूरं क्रुद्धे प्रतिपक्षे शूरवदाक्रमणशीलम्। अक्षुद्धाच्च जनात् पलायनपरमित्यक्षुद्धभीरुम्। आयास-

बहुलं श्रान्तिबहुलम्। मन्त्रसुगोचरं † प्रकाशत एव मन्त्रणां कुर्वन्तम्। अतिदुःखशीलाचारोपचारम् अतिदुःखशीलवद् आचरन्तमुपचरन्तञ्च। असंविभागिनम् अदातारम्। अनुपक्तकामं सदैव कामुकम्। अनवस्थितमस्थिरम्। रोषांशत्वात् क्रोधप्राचुर्यात्॥ ४६-५२॥

तामसस्य सत्त्वस्य भेदान् कथयति निराकरिष्णुमिति।‡ निराकरिष्णुं स्वजनद्रोहिणमित्यर्थः। अबुधं निर्बुद्धिम्। केवलमाहारे अभिनिविष्टं सर्वं कर्म परित्यज्य सदैवाहारे रतम्। सर्वबुद्ध्यं गहीनमिति सर्वबुद्धयो हि चक्षुर्बुद्ध्यादिकाः तैरंगैश्च हीनं सत्स्वपि तत्तदंगेषु तत्तत्कार्याकरणात् ततो हीनं कथ्यते इत्यर्थः॥ ५३-५६॥

ननु मरणशीलस्य मानवस्य ब्रह्मादिसत्त्वं दुर्बलस्य च असुरादिसत्त्वं बुद्धिजीविनश्च पाशवादिसत्त्वं कथं सम्भवतीत्याह शुद्धस्येति। न खलु वस्तुतो ब्राह्मेन्द्रादिसत्त्वं मानुषे शरीरे आविशति परन्तु गुणविभागेन सत्त्वादिगुणाधिक्यात् तदनुकारेण तत्सादृश्यमहिम्ना भेदप्रतीतिं स्थगयति इति ब्राह्मादिसत्त्वप्रयोगः उपचारेण भवतीत्यर्थः। एवं सप्तविधः षड्विधस्त्रीविधश्च उपचारः कथञ्च कथञ्चित् यथार्थं सत्त्वंसत्त्वमनुकृत्य स्यादित्यन्वयः। यदुक्तं "उपचारो हि नामात्यन्तविशकलितयोः पदार्थयोः सादृश्यातिमहिम्ना भेदप्रतीतिस्थगनमात्रम्" इति। उपसंहरति केवलश्चेति। गर्भावक्रान्तिसंप्रयुक्तः अस्मिन् अध्याये उल्लिखितः अयं केवलः कृत्स्नः उद्देशः यथोद्देशम् उद्देशक्रममनुसृत्य अभिनिर्दिष्टो भवति अभिनिर्दिशति। तस्य गर्भावक्रान्त्युद्दिष्टस्य अर्थस्य विषयस्य विज्ञाने च सामर्थ्यं योग्यताञ्च अभिनिर्दिष्टं भवतीति पूर्वेणान्वयः। पुनश्च गर्भकराणां भावानां मातृजादीनाम् अनुसमाधिः भागशोविचारश्च अभिनिर्दिष्टो भवतीत्यन्वयः। तथा विघातकराणां गर्भोपघातकराणां भावानामपि भागशो विचारः अभिनिर्दिष्टो भवति। इत्युपसंहारे। अतिरोहितार्थमन्यत्॥ ५७-५८॥

अध्यायार्थं निवेदयति तत्र श्लोका इति॥ ५९-६२॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां शारीरस्थाने महती गर्भावक्रान्तिर्नाम चतुर्थोऽध्यायः॥ ४॥

पञ्चमोऽध्यायः।

पूर्वाध्याये पुरुषस्य भुवनसादृश्यं वाङ्मात्रेणोदाहरत्। साम्प्रतमवसरसंगत्या तमेवार्थं व्यासतो व्याचिख्यासुरध्यायान्तरमारभते अथातः इत्यादिना। पुरुषविचयं पुरुषस्य पञ्चमहाभूतशरीरिसमवायरूपस्य विचयं विज्ञानम्। पुरुष इति। लोकसम्मितः भुवनसदृशः। हि यतः लोके त्रिभुवने यावन्तो मूर्तिमन्तो मूर्ताः भावविशेषाः पदार्थाः। पुरुषे जीवितशरीरे। अस्मिन्

† 'मन्त्रसुगोचरम्' इति पाठोऽत्रादृतः।

‡ 'निराकरिष्णुम्' इति पाठोऽत्र गृहीतः।

गुरुवाक्ये शिष्याणां व्यासतः शुश्रूषूणां प्रार्थनामाह इत्येवमिति । एतावता इयत्प्रमाणेन वाक्येन भगवत । उक्तं वाक्यार्थं बुद्धया न अवगाहामहे न स्वल्पया बुद्धया बोद्धुं शक्नुमः अतो भूयस्तरं व्यासतो व्याख्यायमानं शुश्रूषामः श्रोतुमिच्छामः । इत्युवाचेत्यन्वयः । एवं प्रचोदितो भगवान् व्यासतो व्यष्टे तमुवाचेति । असंख्यानां भुवनपुरुषयोरवयवानां सादृश्यद्वारेणोल्लेखो न सम्भवतीतिस्थूलतस्तेषु केषाञ्चित् सादृश्यं प्रदर्शयितुकामः प्राह अपरिसंख्येया इति । तेषामपरिसंख्येयानां कतिचित् यथास्थूलं यथा यथा प्रधानं सामान्यमभिप्रेत्य सादृश्यद्वारेण उदाहरिष्यामः । समुदिताः समवेताः षड्धातवः लोक इति शब्दं लभन्ते † भुवनशब्दभाजो भवन्ति । के ते षड्धातवः इत्याह तद्यथेति । ब्रह्म परमात्मा तस्यैव अपरा संज्ञा अव्यक्तमिति । पुरुषेऽपि तत् सादृश्यं दर्शयति एत एवेति । पुरुषे षण्णां धातूनां सत्तां दर्शयति तस्येति । मूर्तिः शरीरस्य संघातांशः । शरीरजक्लेदश्च उपधातुः । अभिसन्तापः उष्मा च तेजोधातुः । प्राणश्च वायुधातुः । सुषिराणि शरीरगतछिद्राणि वियत् आकाशधातुः ब्रह्म च अन्तरात्मा चेतनाधातुः । मूलतः सादृश्यं प्रदर्श्य प्राधान्येन केषुचिद् भावेषु सामान्यं दर्शयति यथाखल्विति । ब्राह्मी विभूतिः जगत्स्रष्टृत्वशक्तिः सा च पुरुषे शरीरसृजनाय आत्मनो विभूतिः । तदेव विवृत्य दर्शयति ब्रह्मण इति । जगत्सृष्टौ यथादौ ब्रह्मा प्रजापतिं दक्षं ससर्ज तथैवान्तरात्मा सत्त्वं मनः, एवं जगद्गतैः परमब्रह्मसृष्टैरिन्द्रादिभिः सह अहंकारादीनामौपम्यं दर्शयति । आदानं हस्तेन्द्रियम् । सर्गादिः प्रलयान्ते आदिसृष्टिः । कृतयुगं सत्ययुगम् । आतुर्यं जराग्रस्तता । युगान्तः प्रलयः । अनुक्तानां बुद्धिकामादीनां बृहस्पतिगन्धर्वादिभिः साम्यं ज्ञेयम् ॥ १-५ ॥

पुनरपि शिष्यः पृच्छति इत्येवमिति । सामान्योपदेशस्य लोकपुरुषयोः साम्यप्रदर्शनस्य । उत्तरयति भगवान् शृण्विति । सादृश्यप्रदर्शनस्य आत्मज्ञानमेव प्रयोजनमित्याह सर्वलोकमिति । सत्या बुद्धिः पूर्वोक्ता नैतदहं नैतन् ममेत्यादिरूपा । तमेवार्थं विवृत्य दर्शयति सर्वेति । हि तथाहि आत्मनि सर्वलोकं पश्यतः निर्विकारे निर्विकल्पे असंगे चात्मनिषड्धातुसमन्वितं सर्वलोकं पश्यतो जनस्य कर्मात्मकत्वात् आत्मकर्मायत्तत्वात् सुखदुःखयोः कर्ता आत्मैव नान्यः इति बन्धस्य हेतुभूतं ज्ञानं भवति । पुनरपि अहं हेत्वादिभिः कर्मकर्मफलादिभिः अयुक्तः‡ असंग इत्यर्थं । सर्वलोकः सर्वभुवनस्वरूपश्च 'सर्वं खल्विदं ब्रह्म' इत्याकारक इत्याशयः । इति ज्ञानं तत्त्वस्मृतिरूपं विदित्वा समुपलभ्य पूर्वं प्रथममेव अपवर्गाय मोक्षाय उत्थाप्यते उद्योज्यते जनेन इति शेषः । हि यतः सामान्यतः सादृश्येन सर्वलोकः पुरुषः भुवनञ्च षड्धातुसमुदायः अतो लोकशब्दः लोकशब्द-

† 'लोक इति शब्दम्' इति पाठः साधीयस्त्वेनात्र परिगृहीतः ।

‡ 'हेत्वादिभिरयुक्तः' इति पाठोऽत्रादृतः ।

वाची पदार्थः संयोगापेक्षी आत्मना महाभूतसंसर्गमपेक्षते। तस्यैव संयुक्तपुरुषस्य हेतुरुत्पत्तिः वृद्धिः उपप्लवो वियोगश्च वर्तन्ते नत्वसंगस्य पुरुषस्येत्याशयः। हेत्वादीन् व्याचष्टे तत्रेति। उत्पत्तिकारणं शुक्रशोणितसंयोगइत्यर्थः। दुःखागमः जराव्याध्यादिना आक्रमणम्। षड्धातुविभागः मृत्युरित्यर्थः तस्यैव पर्यायान् आह स इति। तस्य मृत्योः सर्वोपप्लवानाञ्च सर्वदुःखानां मूलं प्रवृत्तिः, इच्छाद्वेषवासनामूलं हि दुःखमित्यर्थः। निवृत्तिस्तु तयोर्मरणोपप्लवयोः उपरमः शान्तिर्भवतीति शेषः। एवं विचार्यमाणे प्रवृत्तिर्दुःखकारणं निवृत्तिस्तु सुखकारणमिति सत्या बुद्धिरुदेति इत्याह प्रवृत्तिरिति। तस्य सत्यज्ञानस्य हेतुः सर्वलोकस्य लोकपुरुषयोः सामान्यज्ञानम्। निगमयति एतदिति॥ ६-८॥

पुनरपि शिष्यः पृच्छति अथेति। तदुत्तरं विवक्षुर्भगवान् प्राक् प्रवृत्तेर्मूलान्याह मोहेति। प्रवृत्तेर्मूलं मोहः, इच्छा, द्वेषः, कर्म च। ततस्तु प्रवृत्तिवशादेव अहंकारादय उत्पद्यन्ते इत्याह तज्जा इति। त एवाहंकारादयः विपुलशाखा वृक्षा इव स्वल्पकायं वृक्षमिव आत्मानमाच्छाद्य सम्यङ् निर्जित्य च उपरि तिष्ठन्तीत्याह तरुणमिवेति। यैरहंकारादिभि रभिभूतः आक्रान्तः पुरुषः सत्तामति संसारमतिक्रम्य अथवा प्रवृत्तिं विहाय न वर्तते स्थातुं शक्नोति मोक्षायोत्थातुमिति भावः। अहंकारादीन् व्याकरोति तत्रेति। तत्र तेषु मध्ये। एवं जातीति-एवं जातिसम्पन्नोऽहम् एवंरूपवानहम् एवं वित्तादिसम्पन्नोऽहम् इत्याकारकं ज्ञानम् अहंकार इत्युच्यते इत्यर्थः। अभिजनः आत्मीयः। संगमाह यन्मनः इति। मनसो वाक्यस्य कायस्य च यत् कर्म मोक्षाय न भवेत् तत्संगः आसक्तिरित्यर्थः। संशयमाह कर्मफलेति। तत्र कर्मफले संशयस्तु सुकृतदुष्कृतयोः फलमिह परे वा जन्मनि भविष्यति नवेति। मोक्षे तु जीवात्मनः परमात्मनि लयादिरूपोऽस्ति नवेति संशयः। पुरुषे तु देहातिरिक्तः आत्मा अस्ति नवेति। अविनाशी आत्मा जीर्णवस्त्रमिव देहमिमं विहाय देहान्तरं गच्छति नवेति प्रेत्यभावे परलोके संशयः। अभिसंप्लवमाह सर्वावस्थास्विति। सर्वासु बाल्ययौवनादिषु अवस्थासु अहमनन्यः अपृथक् शरीरादिति शेषः। अहमेव स्रष्टा पुत्रकन्यादिरूपेण इतरमानवानामित्यर्थः। स्वभावादेवोत्पन्नः शरीरेन्द्रियादिराशिरूपः न खलु तत्र आत्मरूपं किञ्चिद् द्रव्यं वर्तते मदशक्तिवदत्र चैतन्यमित्यर्थः। इत्यादिसिद्धान्तग्रहणमभिसंप्लवः। अभ्यवपातमाह ममेति। एते मातापित्रादयो ममैव, अहञ्च तेषामिति बुद्धिः अभ्यवपात इत्यर्थः। विप्रत्ययमाह कार्येति। कार्येषु अकार्यबुद्धिः, अकार्ये वा कार्यबुद्धिः, एवं हिताहितेषु शुभाशुभेषु च विपरीतबुद्धिः विप्रत्यय इत्यर्थः। अविशेषमाह ज्ञाज्ञयोरिति। ज्ञाज्ञयोः चेतनाचेतनयोः प्रकृतिविकारयोः कारणकार्ययोः प्रवृत्तिनिवृत्त्योश्च सामान्यदर्शनं समताज्ञानम्। अनुपायानाह प्रोक्षणेति। प्रोक्षणादयो हि भावाः कर्मकाण्डोक्ताः न कदाचिन् मोक्षाय सम्भवन्तीति तेषामनुपायसंज्ञा। पूर्वोक्ताः

अहंकारादय: बन्धहेतुभूतत्वात् सर्वदु:खानां मूलं भवन्तीत्याह एवमिति। अधीधृतिस्मृतिरिति-धीर्ज्ञानं धृतस्तु सत्कारस्तुतिगर्हापमानक्षमित्वम्। स्मृतिश्च सर्वकारणवद् दु:खमस्वञ्चेति अभ्युपगम: तै: रहितमित्यर्थ:। अहंकाराभिनिविष्ट: अहमेवंजातिगुणादिसम्पन्न: इत्याकारज्ञानवान्। सक्त: संसारासक्तियुक्त: ससंशय: परलोकादिषु संशयवान्। अभिप्लुतबुद्धि: अहमेव शरीरेन्द्रियादिराशिरूप: अनात्मक: इतरमानवानां स्रष्टा इत्याकारकज्ञानवान्। अभ्यपतित: सदैव मातृपित्राद्यात्मीयेषु ममत्वबुद्धिसम्पन्न:। अन्यथादृष्टि: कार्याकार्यादिषु विपरीतबुद्धि:। अविशेषग्राही प्रवृत्तिनिवृत्त्यादौ समतादर्शी। विमार्गगति: मोक्षोपायान् विहाय अनुपायाश्रयी। यो निवासवृक्ष: शरीररूपमात्मन: आश्रयस्थानम्। सत्त्वशरीरदोषमूलानां मन:शरीरजदोषसम्भवानां सर्वदु:खानां मूलं भवतीति योजना। † पूर्वोक्तैरहंकारादिभि: प्रवृत्तिवशात् शरीरधृक् स्वयमेव एवंविधं दु:खं चिनोतीत्यर्थ:। भ्राम्यमाण: पुन: पुनर्जीवनमरणे लभमान: प्रवृत्तिं नातिवर्तते प्रवृत्तिं त्यक्तुं न शक्नोतीत्यर्थ:। सा च प्रवृत्ति: अघस्य सर्वविधपापरूपस्य दु:खस्य मूलं भवतीति शेष:॥ १०॥

प्रवृत्तेर्मूलं निरवशेषतो निवेद्य निवृत्तेरुपायं व्याचिख्यासु: निवृत्तिं स्तौति निवृत्तिरिति। अपवर्ग इति मोक्षे असाधारणकारणत्वात् उपचारत: प्राह 'आयुर्वै घृतम्' इतिवत्। अक्षरं शाश्वतम्। मुक्तेरुपायानाह तत्रेति। उदयनानि मोक्षस्योपाया:। लोकदोषदर्शिन: संसारे दु:खबाहुल्यं दृष्ट्वा मुमुक्षोर्मुक्तिमिच्छत:। आचार्याभिगमनं गुरोरुपसेवा, तस्य गुरोरुपदेशानुष्ठानम् उपदेशानुसारेण यमनियमादेरभ्यास:। अग्नेरुपचर्या आहुत्यादिप्रदानेन पूजा। धर्मशास्त्रानुगमनं धर्मशास्त्राध्ययनम्। अवष्टम्भ: प्रारम्भ: मुक्तिप्रदानां क्रियाणामिति शेष:। तत्र प्रारम्भे यथोक्ता: क्रिया: ध्यानधारणादीनामित्यर्थ:। तस्य वचनं कीदृक् स्यादित्याह सत्यमिति। अनतिकाले यत्र यत् प्रयोज्यं तत्कालमनतिक्रम्य। परोक्ष्य अत्रैतद् वाक्यं वक्तव्यं नवेति प्रणिधाय। आत्मवत् सर्वभूतेषु पश्येदित्याह सर्वेति। सर्वासां स्त्रीणामस्मरणं स्त्रीचिन्तावर्जनम्। असंकल्पनम् अमैथुनकामता अप्रार्थनं मैथुनार्थमिति शेष:। अनभिभाषणं वाक्यालापत्याग:। एतेन पूर्णतया ब्रह्मचर्याभ्यासो निवेदित:। सर्वपरिग्रहत्याग: कस्मादपि न किमप्यादेयमित्यर्थ:। तस्य शरीररक्षार्थं यद् यद् द्रव्यं प्रयोजनं स्यात् तत्तदेव गृह्णीयान् नाधिकमिति तानि निर्दिशति कौपीनमिति। कौपीनं कौपीनधारणम्। प्रच्छादनार्थं बहिर्वासार्थं धातुरागनिवसनं गौरिकादिरञ्जितं वस्त्रम्। कन्थासीवनहेतोरिति शीतात् शरीररक्षार्थं कन्था आवश्यकी स्यादिति तस्या: सीवनार्थं सूचीपिप्पलकं सूची सीवनसूत्रञ्च। जलकुण्डिका कमण्डलु:। दण्डधारणं पालाशवैणवादिदण्डधारणम्। भक्ष्यचर्यार्थं भिक्षया खाद्यसंग्रहार्थम्। पात्रं तैजस-

† 'मूलं सर्वदु:खानाम्' इति पाठोऽत्रादृत:।

मतैजसं वा। अग्राम्य इति गृहस्थानां नित्याभ्यस्तखाद्यानां मांसशाकापूपादीनां वर्जनम्। यथोपपन्नः विना प्रभूतायासेन संगृहीत इत्यर्थः। येन चाहारेण प्राणयात्रानिर्वाहः स्यात्, न तदतिरिक्तः एककालमभ्यवहरेदित्यर्थः। श्रमापनयार्थं रात्र्यनार्थं। शीर्णैतिगलितशुष्कपत्रतृणादिरचिता शय्येत्यर्थः। ध्यानहेतोः ध्यानकालीनशरीराश्रयहेतोः कायनिबन्धनं शरीराश्रयौपयौगिकः काष्ठदण्डविशेषः। वनेषु अनिकेतवासः वृक्षतलादौ गूहायां वा। निद्राशब्देनात्र प्रयोजनातिरिक्ता निद्रा गृह्यते, सर्वथा निद्रापरिवर्जसम्भवात्। सर्वेषु इन्द्रियार्थेषु शब्दस्पर्शादिषु अनुरागोपतापनिग्रहः इच्छाद्वेषसंयमः। सुप्तेति सर्वविधकार्येषु कार्यकरणात् प्रागेव स्मृतिपूर्विका प्रवृत्तिः इदं कर्तव्यमकर्तव्यं वेति विशेषतो विचार्य ततः कार्यारम्भः इत्यर्थः। पूजायां स्तुतौ निन्दायामवमाने वा निर्विकारत्वमित्याह सत्कारेति। क्षुधादीनां संस्पर्शे सहत्वं क्षुधादिभिः अकातरता इत्यर्थः। शोकादिभिरसञ्चलनं तैस्तु न मनसश्चाञ्चल्यम्। अहंकारादिषु अहंकार-संग-संशय-अभिलाषाभ्यपात-विप्रत्ययाविशेषानुपायेषु उपसर्गसंज्ञा दुःखोत्पादकहेतुत्वकल्पनम्। लोकपुरुषयोः भुवनानां पुरुषाणाञ्च सर्गादिसामान्यावेक्षणं सर्गस्थितिलयेषु समताविचारः। कार्यकालात्ययभयं कार्याणां करणे कालस्यालये अतिक्रान्ते भयबोधः। कार्यं यथाकालमेव यथा भवेत् न कालातिपातः स्यात् इति प्रयत्नः सर्वदा स्यादित्यर्थः। पुनश्च योगारम्भे योगाभ्यासकाले अपवर्गाय अपवर्गं लब्धुं सततं नित्यम् अनिर्वेदः आत्मनि दृढः प्रत्ययः। सत्त्वोत्साहः मनसः उद्यमः। बुद्ध्यादीनां बलाधानम्। इन्द्रियाणां मनसि नियमनं प्रतिसंहारः। चेतसश्च आत्मनि, आत्मनश्च परमात्मनीति योजना। अभीक्ष्णं सदैव। धातुभेदेनेति शरीरावयवस्तनादिषु आसंगवारणाय तेषामुपादानानां शुक्रशोणितादीनां न्यक्कारजनकत्वमुपलभ्य ततो निवृत्तिरित्यर्थः। अभ्युपगमः स्वीकारः। सर्वमात्मातिरिक्तवस्तुजातमित्यर्थः। अभिनिवेशः दृढा धारणा। एष मार्गः अपवर्गायेति एतानि मुक्तेरुदयनानीत्यर्थः। अतोऽन्यथा तद्विपरीतानि बन्धकारणानीत्यर्थः॥ १२॥

ततः किं भवतीत्याह भवन्तीति। एतैः पूर्वोक्तैः शुद्ध्युपायैः अविमलं रजस्तमःसंसृष्टम्। कचैः केशमयकूर्चकैः। ग्रहोऽत्र राहुः। नीहारः कुज्झटिका। संवृतायने आत्मस्थे। एवंविधविशुद्धमनसः सत्त्वप्राधान्यात् सत्या बुद्धिरुदेति, सा महामोहं भिनत्ति, यया च वैराग्यमायाति, योगसाधनाय प्रवर्तयति, आत्मतत्त्वज्ञो भवति, अहंकारादिकं त्यजति, संसारकारणैर्न स्पृश्यते, सर्वसन्न्यासश्चोदेति, ततः परमात्मनि लीनो भवति। सैव सत्या बुद्धिः विद्यासिद्ध्यादिपदैरभिधीयते इत्याह शुद्धसत्त्वस्येत्यारभ्य समतेति वाक्यसन्दर्भेण। पुनश्च प्राह लोके इति। लोके त्रिभुवनस्थपदार्थसमूहे। विततं कारणभूतत्वेन व्याप्तम्। आत्मनि च स्वरूपावस्थायामवस्थिते लोके कारणलीनं पश्यतः एवं परावरदृशः परं परमात्मानमवरञ्च जगत् यो यथा-

वत् पश्यति तस्य शान्तिर्ज्ञानमूला न नश्यति ॥ १३-२० ॥

पश्यत इति । हि यतः सर्वावस्थासु स्थित्युत्पत्तिप्रलयाद्यवस्थासु शुद्धस्य चिदानन्दस्वरूपस्य अतएव ब्रह्मभूतस्य संयोगः पुनः संसारो नोपपद्यते न भवति संसारस्य आत्यन्तिकी निवृत्तिर्भवतीत्यर्थः । तदा किं भवतीत्याह नात्मन इति । करणाभावात् मनोबुद्ध्यादिसंयोगाभावात् । लिंगमनुभूतिहेतुः । मुक्तेः पर्यायानाह विपापमिति । तज्ज्ञानं स्तौति एतदिति । सुगममन्यत् ॥ २१-२४ ॥

अध्यायं समापयति तत्र श्लोकाविति ॥ २५-२६ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां शारीरस्थाने पुरुषविचयो नाम पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ।

वक्तव्ये शारीरस्थाने शरीरतत्त्वमेव प्राधान्येन वक्तव्यमिति पुरुषतत्त्वं साकल्येन निवेद्य अवसरवशात् शरीरतत्त्वं व्याख्यातुकामः पुनरध्यायान्तरमारभते अथात इत्यादिना । शरीरविचयं शरीरतत्त्वम् । अत्र शरीरशब्देन जीवितशरीरमेव जिघृक्षन्ति कुशलाः । तस्यैव चिकित्सा अभिहिता भिषक्विद्यायामित्याह शरीरेति । शरीरोपकारार्थं जीवितशरीररक्षार्थम् । ये खलु भावाः शरीरोपकारकाः कथ्यन्ते ते हि जीवितशरीराणामेवेत्याह ज्ञात्वेति । शरीरतत्त्वं शरीरस्येति देहधातूनां तदंगप्रत्यंगानाञ्चेत्यर्थः । तेषां तत्त्वं प्रकृतितो विकृतितश्च स्वभावसिद्धं रूपम् । ज्ञात्वा स्वरूपज्ञानेनैव तदुपकारकान् भावान् ज्ञातुमर्हन्ति ॥ १-३ ॥

तत्र प्राक् समष्टिरूपेण शरीरतत्त्वमाह तत्र शरीरमिति । तत्र आयुर्वेदे चेतनाधिष्ठानभूतं जीवात्मसमन्वितं जीवितमित्यर्थः । पञ्चमहाभूतविकारात्मकं पञ्चमहाभूतविकाराः वातादयस्त्रिधातव एव आत्मा उपादानकारणं यस्य तत् । यदुक्तं सुश्रुते—"वातपित्तश्लेष्माण एव देहसम्भवहेतवः" इति । तेषां तु पञ्चमहाभूतविकारत्वञ्च वृद्धवागभटः प्राह यथा—"वाय्वाकाशाभ्यां वायुः आग्नेयं पित्तमम्भःपृथिवीभ्यां श्लेष्मा" इति । अत्र तु तेषां पाञ्चमहाभौतिकत्वेऽपि तत्तद्भूतबाहुल्याद् व्यपदेशो ज्ञेयः । पुनश्च विशिनष्टि समयोगवाहीति । समेन यथोचितप्रमाणेन योगेन त्रिधातुमेलनेन वहति जीवितं चलति इत्यर्थः । एवमस्य स्थितिरपि प्रदर्शिता । यदुक्तं सुश्रुते—"तैरव्यापन्नैरधोमध्योर्ध्वसन्निविष्टैः शरीरमिदं धार्यते" इति । अत्र अव्यापन्नैः समतामापन्नैरित्यर्थः । अधः इत्यादिना उत्पत्तिकारकत्रिधातुभ्य एषां वैशिष्ट्यं दर्शयति । उपादानकारणरूपाणां तु सर्वशरीरव्यापित्वम् शरीरस्य अणुतोऽणुत एव सत्त्ववशात् । अतएवोक्तंवा गृभटे यथा 'ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः' इति । स्थितौ तु अधोमध्योर्ध्वसंश्रयाणां त्रिधातूनां निमित्तकारणत्वं ज्ञेयम् । एवमुत्पत्तौ स्थितौ च

त्रिधातूनां कारणत्वं प्रदर्श्य पुनरुध्वंसेऽप्येषां कारणतां व्याचष्टे यदा हीति। ते च धातवो यदा शरीरे वैषम्यम् असाम्ना क्षयवृद्धिभाजो भवन्ति, तदा स नरः क्लेशं विकाररूपं विनाशं वा प्राप्नोति यदुक्तं सुश्रुते "त एव च व्यापन्नाः प्रलयहेतवः" इति। व्यापन्ना विषमा इत्यर्थः। यदुक्तं "विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते" इति। ननु किन्नाम तेषां वैषम्यं, कथं वा ते विषमाः विकारकारणं भवन्ति, कथं वा विनाशयति शरीरमित्याह वैषम्यगमनमिति। न खलु स्वस्थे देहे ते विषमास्तिष्ठन्ति, हेतूपसेवयैव ते विषमतामाप्नुवन्तीत्यर्थः। वृद्धिह्रासगमनं वृद्धिह्रासप्रापणम्। तच्च असाकल्येन साकल्येन, च भवति तत्र अकात्स्न्र्येन ह्रासवृद्धिं गतेषु, क्लेशो भवति प्रकृत्या च सकलेन स्वभावेन च समस्तेषु धातेषु विषमतां गतेषु विनाशो भवतीत्यर्थः॥ ४॥

ननु कथमेषां धातूनां वृद्धिह्रासौ भवतः इत्याह यौगपद्येनेति। विरोधिनां परस्परविरुद्धगुणानां धातूनां वृद्धिह्रासौ यौगपद्येन एककालमेव भवतः। यद्धि द्रव्यं यस्य धातोर्वृद्धिकरं भवति तत् समानात्, तदेव तस्य विपरीतगुणस्य धातोर्विशेषाद् ह्रासकरं सम्पद्यते इत्याह यद्धीति। प्रत्यवायकरं ह्रासकरमित्यर्थः। एतत्तु असम्यगम्यवहारेणैव भवति, सम्यगभ्यवहारेण तु तथैव एकदैव वर्धितधातून् ह्रसयित्वा क्षीणञ्च आप्याय्य धातुसाम्यमापादयतीत्याह तदेवेति। अतएव यदेव द्रव्यमसम्यगवचार्यमाणं धातूनां वैषम्यमापादयति, तदेव सम्यगवचार्यमाणं धातुसाम्यमापादयत् भेषजं भवतीत्यर्थः॥ ५-६॥

इतएव यावन्न ह्रस्वो धातुः पूर्णो भवेत्, यावच्च वर्धितः समो न भवेत्, तावदेव भैषज्यप्रयोगः कर्तव्य इत्याह एतावदेवेति। एतावद् धातुसाम्यं यावत् न न्यूनं न चातिरिक्तम्। फलमिश्रम् एतत् फलमुद्दिश्यैव भेषजप्रयोगो भवतीत्यर्थः। समासतः स्वस्थवृत्तानुष्ठानं विवृणोति स्वस्थस्यापीति। † स्वस्थस्य समधातुत्वात् व्याध्यभावेऽपि साम्यानुग्रहार्थं समतारक्षणाय रसगुणान् मधुराम्लादीन् आहारविकारांश्च विभिन्नप्रकारान् विभिन्नरसांश्च अन्नव्यञ्जनादीन् पर्यायेण क्रमपूर्वकम् उपयोक्तुमभ्यवहर्तुमिच्छन्ति नैकरसं नैकविधं वा सदैवेत्यर्थः। ननु केचिद् विभिन्नदेशजाः मानवाः प्रतिदिनमेकविधमेवाहारं गृह्णन्ति, न च ते आतुराः दृश्यन्ते इत्येवंवादिनो निराकर्तुमाह सात्म्येति। सात्म्यसमाज्ञातान् देशसात्म्यान् ओकसात्म्यांश्च। ननु तत्र तत्र एकविधेन आहारेण कथं न धातुवैषम्यमापद्यते इत्याह एकप्रकारेति। एकप्रकारभूयिष्ठान् एकविधप्रधानान् आहारानुपयुञ्जानाः भुञ्जमानाः मानवाः तद्विपरीतकरणलक्षणसमाज्ञातया ‡ तथाविधेनाहारेण यो धातुर्वर्धितो भवेत् तद्ह्रासोपयोगिन्या चेष्टया विहारेण

† 'स्वस्थस्यापि' इति पाठः।

‡ 'तद्विपरीतकरणलक्षणसमाज्ञातया' इति पाठोऽत्राद्दतः।

समं धातुसाम्यं कर्तुमिच्छन्ति । तत एव ते अनातुरा: सन्तीत्यर्थ: । अतएव सास्थ्यानुवृत्त्यर्थं धातुसाम्यार्थं कतिपयान् आहारविहारानुपदिशति देशेति । देशकालात्मगुणविपरीतानां देशगुणविपरीतानां शीतप्रधाने देशे उष्णानाम् उष्णे च शीतानामित्यादि । एवं कालेऽपि बोध्यम् । आत्मगुणविपरीतानां पित्तप्रधाने तिक्तगुणभूयिष्ठानामेवमन्यत्रापि तत्प्रशमकानां कर्मणां विहाराणाम् आहारविकाराणां खाद्यपेयादीनां क्रमेण क्रमपूर्वकं सम्यगुपयोग: अभ्यवहार: । सर्वाभियोग: † सर्वेषां रसानाम् अभियोग: भूयिष्ठतया व्यवहार: । अनुदीर्णानां गतिमतां अनुत्थितवेगानां मलमूत्रादीनां सन्धारणं न कृत्रिमवेगोत्पादनम् । उदीर्णानामागतवेगानाञ्च तेषामसन्धारणम् । साहसानां शक्त्यतिरिक्तपरिश्रमाणाञ्च वर्जनम् । एतावत् स्वस्थवृत्तं धातूनां वातादीनां साम्यानुग्रहार्थं समतारक्षणाय उपदिश्यते ॥ ७-८ ॥

वक्तव्ये शरीरतत्त्वे तन्मूलधातुत्रयं प्रकृतितो निर्दिश्य अधुना अवसरवशात् सर्वेषां देहधातूनां वैषम्यनाशाय साम्यानुग्रहार्थञ्च आहारविहारान् निर्दिदिक्षुराह धातव इति । पुन: पक्षान्तरे शारीरा: धातव: त्रयो मूलधातव:, सप्त बलधातव:, मलधातवश्च त्रय इति त्रयोदश देहधातव: । समानगुणै: यत्र सर्वेषामेव गुणानामैक्यं वर्तते तै: । समानगुणभूयिष्ठैर्वा यत्र वा तथाविधद्रव्याणामसान्निध्यं स्यात्, सान्निध्येऽपि अयोग्यतया कारणान्तरेण वा ग्रहीतुमयोग्यत्वं पश्येत्, तत्र तु आधिक्येन तद्गुणसमन्वितै: आहारविकारै: अभ्यस्यमानै: नित्यमभ्यवहृतै: वृद्धिं गच्छति । तद्विपरीतगुणै: विपरीतगुणभूयिष्ठैर्वा ह्रास: । एवं समासतो वैषम्यगतानां देहधातूनां साम्योपाय: निर्दिष्ट: ॥ ९ ॥

ननु के ते शरीरधातुगुणा: ये सामान्येन असमानतया वा धातूनां वृद्धिह्रासकरा भवन्तीत्याह तत्रेमे इति । संख्यासामर्थ्यकरा: एकैकश्येन तत्तद्धातूनां पृथग् आप्यायनकरा: भवन्ति, त एते विंशतिगुणा: सविपरीता: दशसंख्यका इत्यर्थ: । एकचत्वारिंशद्गुणेषु एत एव गुणा: धातुसामर्थ्यकरा: भवन्तीत्यवधेयम् । पूर्वोक्तमर्थमुदाहरणेनैकेन विस्पष्टयति तेष्विति । आप्यायन्ते वर्धिता भवन्ति । एवमेव सर्वधातुगुणानां सामान्याद् वृद्धि: ह्रासस्तु तद्विपर्ययेण यदुक्तं—"सर्वदा सर्वभावानां सामान्यं वृद्धिकारणम् । ह्रासहेतुर्विशेषश्च" इति । अतएव सप्तधातुसमानगुणै: द्रव्यै: तेषाम् अन्यद्रव्येभ्योऽधिकतरा वृद्धिर्भवतीति उदाहरणैर्दर्शयति तस्मादिति । अन्येभ्यो भूयस्तरम् अन्यद्रव्येभ्य: समानगुणभूयिष्ठेभ्य: इत्याशय: । भूयस्तरमधिकतरम् । नन्वेवं चेत् शुक्रक्षये शुक्रं प्राशनीयं स्यात्, तर्हि मूत्रक्षये मूत्रं, पुरीषक्षये च पुरीषमुपयोज्यं भवेत्, तेषां सान्निध्यत: सम्भवत्यपि तस्मिन्, पुनश्च न खलु वातादिक्षये असान्निध्याद् वातादीनामुपयोग: सम्भवतीत्याह यत्र त्वेवमिति । यत्र सामान्यवतां तत्तद्धातुसमानानामाहारविकाराणाम् असान्निध्यम्

† 'क्रमोपयोग: सम्यक्सर्वाभियोग: अनुदीर्णानां सन्धारणम्' इति पाठोऽत्र गृहीत: ।

अप्राप्तिः स्यात् यथा वातादीनाम्। यत्र वा सन्निहितानां प्राप्तानामपि घृणित्वाज् जुगुप्सावशाद् अन्यस्माद्वा कारणात् असात्म्यादिकारणमाश्रित्य अयुक्तत्वाद् अभ्यवहारायोग्यत्वाद् उपयोगो ग्रहणं न सम्भवतीति शेषः। स च धातुश्चेद् वर्धयितव्यः स्यात् तस्य धातोर्ये आहारविकाराश्च समानगुणाः कात्स्न्र्येनैकगुणाः अपि असेव्याः पूर्वोक्तैः कारणैः सेवनायोग्या स्युः, तर्हि तत्र स्थले समानगुणभूयिष्ठानाम् अधिकगुणसामान्यवताम् अन्यप्रकृतीनाम अन्यरूपाणामाहारविकाराणामुपयोगः स्यात्। अर्थमेनं दृष्टान्तैर्विशदयति तद्यथेति। प्राक्घृणित्वेनानुपयोज्यानां समानगुणानां परित्यागेन तत्तद्धातूनां समानगुणभूयिष्ठानि द्रव्याण्याह शुक्रक्षये इति। वारुणी मद्यविशेषः। तस्याः मण्डः उपरितनः स्वच्छो भागः। कुल्माषोऽर्धस्विन्नयवगोधूमादयः। कुष्कुण्डं पलालछत्रिका। अजमध्यं छागास्यान्तराधिः। असन्निहितसमानगुणद्रव्याणां धातूनां समानगुणभूयिष्ठानि द्रव्याण्याह वातक्षये इति। सर्वत्रैव द्रव्याणामिति योजना। एवं क्षयवृद्धिकराणि द्रव्याण्युल्लिख्य तद्गुणान् विहारान् आह कर्मापीति। एवमन्येषां धातूनां स्तन्यार्तवादीनां वृद्धिह्रासकरान् भावान् अतिदिशति एवमिति॥ १०-११॥

देहधातूनां वृद्धिह्रासकराणि द्रव्याणि सर्वधातुवृद्धिकरत्वेन साकल्येन शरीरवृद्धिकरान् भावान् व्याकरोति कात्स्न्र्येनेति। कालयोगः बालयौवनयोः कालयोर्योगः। स्वभावसंसिद्धिः स्वभावः स्वः स्वः भावः तेन संसिद्धिः स्वाभाविकी प्रकृतिः। केचित् स्वभावत एव पुष्टशरीराः भवन्ति। आहारसौष्ठवं वृंहणानामाहाराणामुपयोगः। अविघातः विघातकराणां शुक्रक्षयातिश्रमादीनामभावः। शरीरवृद्धिकरानुल्लिख्य बलवृद्धिहेतूनाचष्टे बलेति। बलवत्पुरुषे देशे पाश्चात्यादौ हिमवत्प्रदेशे च जन्म, तत्र तत्र स्वत एव बलवन्तः पुरुषा भवन्ति। बलवत्पुरुषे काले यत्र काले सत्यादियुगे, यत्र सर्व एव अमितबला आसन्। सुखश्च कालयोगः विसर्गकाल इत्यर्थः। बीजक्षेत्रगुणसम्पत् शुक्रशोणितगर्भाशयानां गुणाधिक्यम्। आहारसम्पत् बल्यद्रव्याणामुपयोगः शरीरसम्पत् अंगप्रत्यंगादीनां गुणाधिक्यम्। सात्म्यसम्पत् वृंहणादिद्रव्यसात्म्यता। सत्त्वसम्पत् अभीरुत्वादिमनोगुणयोगः। स्वभावसंसिद्धिः प्रकृतितः केचित् सबलाः के वा दुर्बलाः भवन्तीत्यर्थः। यौवनं बालवृद्धयोर्मध्यावस्था। कर्म व्यायामसंज्ञमित्यर्थः। संहर्षः आनन्दबाहुल्यम्॥ १२-१३॥

नन्वाहारसौष्ठवं शरीरबलयोर्वृद्धिकरत्वेनोक्तम्, न खल्वपक्वे आहारे तेन शरीरबलयोर्वृद्धिर्भवितुमर्हति, यद् वक्ष्यति 'न ह्यपक्वाद् रसादयः' इति। अत आहारपरिणामकराः भावा अपि शरीरबलयोर्वृद्धिहेतवो भवन्तीति तान् व्याकरोति आहारेति। आहारपरिणामकराः आहारजीर्णकारकाः। के ते इत्याह तद्यथेति। उष्मा पाचकाग्निः। अत्र पित्तमिति वक्तव्ये उष्मेति कथनेन पाचकाग्नेः पित्ताद् भेदं दर्शयति। ननु सुश्रुते "न खलु

न खलु अदुष्टेषु तेषु कदाचित् कानपि दूषयन्ति ते इत्यर्थ:। कालान्तरे कालविशेषे धात्वन्तरे पृथग् धात्वधिकरणे गतानामिति शेष:। प्रदुष्टानां वातादीनां विज्ञानानि पृथग् रोगदर्शनात् एते खलु एतद्धात्वन्तर्गता इति ज्ञानोपाया: विविधाशितपीतीये सौत्रीये उक्तानि। ते च व्याधय: प्रकुपित-दोषाणामेव नतु धात्वादीनामित्याह एतावतीति। शरीरधातूनां रसादीनाम् इन्द्रियाणां स्नाय्वादीनां मलानाञ्च संस्पर्शनाद् यावत् तेषामाक्रमणात् प्रभृति एतावती विविधाशितपीतीयोक्तपरिमाणवती एव दुष्टदोषगति: सर्व-शरीराश्रयप्रवृत्ति: भवतीति शेष:। अतएव शरीरधातुदुष्टौ प्रकुपिता: वाता-दय एव कारणमिति तेषामावाधकरत्वान् मलभूतत्वं सिध्यति इत्याशय:। न खल्वकुपिता वातादयो मलभूता भवन्ति, ते च आरोग्यकरत्वात् अना-वाधकरत्वेन प्रसादभूता एवेति प्रतिपादयति प्रकृतीति। प्रकृतिभूतानां साम्यावस्थया स्थितानामित्यर्थ:। प्रकृतिभावे अवैषम्ये विषये प्रयतितव्यं हिताहारविहारादिभिरित्यर्थ:। शरीरज्ञानादृते आयुर्वेदज्ञानं मुधैव भवतीति ज्ञातव्यमिति प्राचीनसंवादेन प्रतिपादयति भवति चात्रेति। सर्वथा सर्व-प्रकारेण अंशांशभेदेन, कारणकार्यज्ञानेन, प्रकृतिविकृतिभावेन, आकृत्या, प्रकृत्या चेत्यर्थ:। लोकसुखप्रदं जनानामारोग्यदायकम्। इति प्रकरणोप-संहारे॥ १८-१९॥

शरीराधिकारे पुन: शिष्यप्रश्नान्तराण्याह एवंवादिनमिति। गर्भस्य किमंगं पूर्वं प्रथमं कुक्षौ गर्भाशये अभिनिर्वर्त्तते उत्पद्यते? किमाहार: केन आहारेण वर्तयति जीवति। कथंभूत: प्रसवकाले केन प्रकारेण। जात: शिशु:। कथञ्चास्य केन प्रकारेण जातस्य शिशो:†। उपलभ्यन्ते ज्ञायन्ते। आ-होस्वित् पक्षान्तरे नोपलभ्यन्ते इति योजना। कालाकालमृत्योर्भावाभावयो: कालमृत्योर्भावे अभावे वा तथा अकालमृत्योश्च सम्बन्धे अध्यवस्यति निश्चिनोति। परमायुष: आयुष: प्रकर्षस्य इत्येते नव प्रश्ना:॥ २०॥

तत्र प्रथममुत्तरयति तमेवमिति। गर्भावक्रान्तौ महतीगर्भावक्रान्ति-शारीरे। सन्तिष्ठते आविर्भवति। विप्रतिवादा: मतमतान्तराणि। पश्यति अध्यवस्यति। सर्वेन्द्रियाणां प्राय: सर्वेन्द्रियाधिष्ठानानाम्। इतिकृत्वा इति-हेतो:। चेतनाधिष्ठानत्वात् आत्मबुद्ध्यादीनां स्थानत्वात्। नाभिरन्तर्नाभि: आमपक्वाशयमध्यमित्यर्थ: अथवा गर्भस्य बाह्यनाभिप्रदेश एव तस्य आहारस्य मातुरन्नरसस्यागमत्वेनाभिप्रेत:। अन्येषान्तु आहारागम: तत्रैवा-हार: पक्व: सारकिट्टविभागं करोति इति। तत्कारणत्वात् गर्भस्य चेष्टाश्रय-त्वात्। इन्द्रियाणि भौतिकानि दशेन्द्रियाणि। बुद्धिपरोक्षत्वात्‡ बुद्ध्या-ऽग्राह्यत्वा। अचिन्त्यं मनसाऽपि अग्राह्यम्। महर्षीणां मतानुल्लिख्य धन्व-न्तरिमतमाह सर्वांगेति। युगपद् एकदैव सर्वांगाभिनिर्वृत्ति: सर्वेषामंगाना-

† 'कथञ्चास्य'.....'उपलभ्यन्ते' इति पाठो गृहीत:।

‡ बुद्धिपरोक्षत्वात्' इति पाठोऽत्रादृत:।

मुत्पत्तिः । तन्मतमेव स्वमतत्वेन परिगृह्णाति तदुपपन्नमिति अपरापराणा-
मंगानां हृदयमूलत्वान्न तेषां हृदयात् पूर्वमभिनिर्वृत्तिः सम्भवति न चापि
हृदयस्येत्याह सर्वांगानामिति । हि यतः अस्य शरीरिणो हृदयं सर्वाङ्गानां
मूलमन्वयव्यतिरेकव्याप्तिबलात् । केषाञ्चिद् भावानां बुद्धिचैतन्यादीनाम्
अधिष्ठानम् अधिकरणम् । निगमयति तस्मादिति । यस्मात् सर्वाङ्गानि पर-
स्परसम्बद्धानि अतो धन्वन्तरिमतमेव ग्राह्यमित्याह सर्वे इति । यथा भूत-
दर्शनं परस्परसम्बद्धत्वेन युगपदुत्पत्तिनिर्णयः साधु समीचीनं भवतीति
शेषः ॥ २१ ॥

द्वितीयप्रश्नस्योत्तरमाह गर्भस्त्विति । कुक्षौ गर्भाशये । जरायुवृतः
गर्भाच्छादककलयाच्छादितः । पृष्ठाभिमुखः मातुः पृष्ठाभिमुखं मुखं यस्य
तथाविधः । तृतीयप्रश्नस्योत्तरमाह व्यपगतेति । गर्भस्तु मातुराहाररसादेव
जीवति इत्याह परतन्त्रवृत्तिः अतएव व्यपगतपिपासाबुभुक्षः क्षुत्तृष्णारहितः
मातरमाश्रित्य वर्तयति जीवति वर्धते च । उपस्नेहोपस्वेदाभ्यामिति स्नेहस्य
व्यवायित्वात् तत्सदृशः उपस्नेहः तेन मातुराहाररसेन गर्भस्य सर्वकायं
विसार्य पोष्यते पुनश्च मातुर्गर्भाशयोष्मणा स्विन्नो वर्धते इत्यर्थः । एवमा-
निषेकात् प्रचरति । तदनन्तरं सदसद्भूतांगावयवः सद्भूतांगावयवः
असद्भूतांगावयवश्च अनाविर्भूतांगावयवः आतृतीयमासात् अपरोत्पत्तेः
प्रागित्यर्थः । तत्र कश्चिदसद्भूतांगावयवः लोमकूपायनैः लोमकूपद्वारैः
उपस्नेहः मातुराहाररसो हि तन्मार्गैः गर्भशरीरं प्रविश्य तं वर्तयति । कश्चित
सञ्जातांगावयवः अपरोत्पत्तेरनन्तरमित्यर्थः । नाभिनाड्यायनैः गर्भनाभि-
नाडीमार्गेणेत्यर्थः । तेन मातुराहाररसः कथंकारं गर्भशरीरे विशति तत्-
प्रतिपादयति नाभ्यामिति । अस्य गर्भस्य नाभ्यां बाह्यनाभ्यां नाडी प्रसक्ता
एका नाडी संसक्ता । तदन्तश्च तिस्रः सिराः वर्तन्ते ताभिरेव मातुः आहार-
रसः गर्भशरीरे याति । नाड्यां तदग्रभागे अपरा । गर्भाशयैकदेशे या खलु
गर्भशय्या प्रतिमासं निर्मीयते, गृहीते गर्भे सैवोपचीयमाना असृतशोणितैः
स्थूलतरा सती सैव अपरा भवति । इयं हि प्रायोवृत्ता द्वादशांगुलव्यासा
मध्ये स्थूलतमा परिधौ क्रमशस्तनुतरा भवति । अस्या मध्यकेन्द्रे गर्भस्य
नाभिनाडी सन्नद्धा आस्ते । बहिस्तः इयं श्लक्ष्णा अभ्यन्तरतस्तु नतोन्नता
गर्भाशयपेशीषु संसक्तास्ति । तत्र गर्भाशयपेश्यन्तर्गताभिः धमनीभिः सुसू-
क्ष्माभिः मातृहृदयादागतोऽन्नरसः तस्या अभ्यन्तरे प्रथमे पटले सञ्चीयते,
ततः एव गर्भशरीरादागता धमन्यः तमाकृष्य नाभिनाडीगताभिः शिराभिः
गर्भशरीरं प्रवेशयति इत्याह अपरा चास्येति । मातुर्हृदये प्रसक्ता मातुर्हृद-
यात् संप्रततशिराग्रभागेन संसक्ता । मातृहृदयं ह्यस्य गर्भस्य तां गर्भनाभि-
नाडीप्रसक्तामपरां स्यन्दमानाभिः सिराभिः धमनीभिरित्यर्थः । गर्भाशयधम-
नीतः चरितेन अन्नरसेन तामपरां तस्या अभ्यन्तरावकाशमित्यर्थः अभि-
संस्रवते स्रावितं करोति तत्राहाररसः सञ्चीयते इत्यर्थः । स रसः नाभि-

नाडीशिराभि: गर्भशरीरं गत: तस्य बलवर्णकर: सम्पद्यते। कुतस्तु एतावान् आहाररस: गर्भिणीहृदये भवतीत्याह स चेति। स च सर्वरसवान् मात्रापरिगृहीत: आहार: स्त्रिया आपन्नसत्त्वाया: त्रिधा त्रिविधो रस: त्रिविधरसरूपेण परिणम्यते। किमर्थं त्रिधा भवतीत्याह स्वशरीरेति। निगमयति तेनेति ॥ २२-२३ ॥

कथं भूतश्च निष्क्रामतीत्यस्य चतुर्थप्रश्नस्य उत्तरमाह स चेति। स तथाभूतो मातुराहाररसेन पुष्टो गर्भ: जन्मनि उपस्थितजन्मकाले प्रसवसमये आगते। प्रसूतिमारुतयोगात् अपानवायोर्बलेन परिवृत्य अवाक्शिरा: अधोमस्तक: ऊर्ध्वचरण: सन अपत्यपथेन योन्यास्तृतीयावर्तद्वारेण द्वितीयमावर्तमतिक्रम्य तद्द्वारेण निष्क्रामति। ननु पदद्वयेनापि कदाचिन् निष्क्रामतीत्याह एषा इति। एषा शिरसा निष्क्रमणमेव प्रकृति: स्वाभाविकी, अतोऽन्यथा विकृतिरेव भवति। तत: परं स्वतन्त्रवृत्ति: स्वाधीनवृत्ति: ननु मातुराहाररसादेवास्य जीविका भवतीत्यर्थ: ॥ २४ ॥

पञ्चमप्रश्नस्योत्तरमाह तस्येति। जातिसूत्रीयोपदिष्टौ परस्ताद् वक्ष्यमाणे जातिसूत्रीये शारीरे उक्तौ। ताभ्यामिति। ताभ्याम् आहारोपचाराभ्याम्। जातो बाल:। सद्य: सप्ताहाभ्यन्तरमेव। अप्रतिष्ठितमूल: अदृढनिबद्धमूल: ॥ २५-२६ ॥

अचिरजातबालानां देवादिप्रकोपनिमित्तो व्याधि: कथं ज्ञातव्य इत्यस्य षष्ठप्रश्नस्योत्तरमाह आप्तेति। आप्तोपदेशात् शास्त्रोक्ततत्तद्ग्रहलक्षणदर्शनात्। अद्भुतरूपदर्शनात् यानि रूपाणि दोषप्रकोपवशात् स्वाभाविकतया न सम्भवन्ति तेषां दर्शनात्। समुत्थानेति समुत्थानस्य उत्पत्तिहेतो: लिंगस्य ज्ञप्तिहेतो: चिकित्सितस्य च विशेषात्। दोषप्रकोपाननुरूपाच्च दोषप्रकोपजन्यानि शरीरे यानि लक्षणानि भवन्ति तत्तल्लक्षणानामसादृश्यात् ॥ २७ ॥

सप्तमप्रश्नस्य सिद्धान्तमाह कालाकालेति। कालमृत्युरकालमृत्युश्च अस्ति न वेति संशये इदं वक्ष्यमाणं नोऽस्माकमध्यवसितं निश्चयो भवतीति शेष:। तत्र आदावकालमृत्युर्नास्ति कालमृत्युरेवास्तीति केषाञ्चिन मतमुल्लिख्य दूषयति य: कश्चिदिति। काल एव अखण्डनित्यगकालमध्य एव। कालच्छिद्रं कालस्यावकाश:। यदा तु कश्चिन म्रियते, तदा चेत् कालस्याभाव: स्यात्, तर्हि तस्याकालमृत्युरिति वक्तुं युज्यते, नतु तत्तथा, अतोऽकालमृत्युर्नास्तीति केषाञ्चिदभिमति:। तन्मतमपाकरोति तच्चासम्यगिति। असम्यग् असाधु। न खलु कालस्य सच्छिद्रता अच्छिद्रता वा कालस्वलक्षणभावात् कालस्वभावादेव नोपपद्यते न संगच्छते। अतएव एवमन्यार्थग्रहणं न सम्यग् भवतीत्यर्थ:। यो यदा म्रियते स एव तस्य मृत्युकाल:, सर्व एव म्रियन्त इति मृत्यो: समक्रियत्वं अतो नास्ति अकालमृत्युरित्येवंवादिनो मतमपाकरोति तथाहुरिति। स मृत्यु: सर्वभूतानां सत्य: नियत: समक्रिय-

त्वात्। अतो मृत्योर्नियतत्वात् सर्वेषां काल एव मृत्युरायाति नत्वकाले इत्याशयः। दूषणमाह एतदपीति। अन्यर्थार्थग्रहणम् कालाकालमृत्युशब्दस्य अनभिप्रेतार्थग्रहणं भवति इति शेषः। न खलु मृत्योर्नियतत्वग्रहणमात्रा-भीष्टमित्यर्थः। समक्रियत्वस्यार्थमाह नहीति। नहि मृत्युः कश्चिद् द्वेष-वशादर्वागेव हन्ति अथवा प्रीतिवशात् कमपि न विनाशयतीति द्वयोरप्य-सम्भवात् तस्य समक्रियत्वं सिध्यति। नैवमर्थो अत्राभीष्ट इत्यपरेषां युक्ति-रपि न सम्यक्। ननु तर्हि कोऽर्थो भवतामभिप्रेतः इत्याह कालः पुनरिति। अत्र कालशब्दस्य आयुषः प्रमाणरूपोऽर्थः परिग्रहीतुमिष्टः अतः अन्यथार्थ ग्रहणं भवति। पुनश्च तथैवार्थग्रहणे दोषमाह यस्येति। मृत्योर्नियतकाल-त्वाद् यो यदा म्रियते स एव तस्य कालमृत्युश्चेत्, तर्हि आहारादीनामपि नियतत्वात् यो यदा भुङ्क्ते स एव तस्य भोजनकालः स्यात् इत्याह तस्य सर्वे भावा इति। भावा इति आहारवचनकर्मादयः इत्यर्थः। सर्व एव नित्यमाहारं करोति वक्ति च किमपि करोति चेति आहारवचनकर्मणां नियतत्वात् न कदाचिद् अकाले आहारः, अकाले वचनम्, अकाले च करणं, भवतां मते न भवितुमर्हति तच्च नोपपद्यते तेषामकालकृतानामनिष्टं फलं तद्विपरीतानाञ्चेष्टं प्रत्यक्षमेव। तमर्थमाहारादिकमभिसमीक्ष्य उद्दिश्य तासु तासु अवस्थासु तेषां यथाकालकरणे अयथाकालकरणे च कालाकालव्यक्तिः तेषां कालत्वमकालत्वं वा निर्देशः प्रत्यक्षत एवोपलभ्यते। उदाहरणेन विस्पष्टयति तद्यथेति। व्याध्यादीनामयं कालोऽकालो वेति प्रत्यक्षत उप-लभ्यते। व्याधेस्तृतीयकादिज्वरस्य तृतीयदिवसे अस्य कालः द्वितीये च अकालो भवति। आहारस्य मध्याह्नादौ कालः अन्यदा अकालः। औषध-स्यास्य शीते साधारणे उष्णे वा कालः तद्विपरीते अकालः। प्रतिकर्मणः शस्त्रावचारणस्य प्रातुर्भुक्ते च कालः, अत्युष्णे अभुक्ते च अकालः। विसर्गस्य सन्ततादिज्वरत्यागस्य सप्ताहादौ कालः, अन्यदिने अकालः, एवं चिकित्सिते बहवः कालाकालविचाराः सन्ति। भवदभिमतार्थग्रहणे इत्येतेषां सर्वेषाम-कालत्वं न सिध्यति इति प्रत्यक्षविरोधः। जनतायामपि बहुषु विषयेषु कालाकालत्वविचारो वर्तते इत्याह लोकेऽपीति। लोके जनतायाम्। निगमयति तस्मादिति। नैकान्तिकमिति न एकान्तग्रहणं कालमृत्युरेवास्तीति रूपं साधु भवतीत्यर्थः। अकालमृत्योर्नास्तित्वे पुनर्दोषान्तरं दर्शयति यदि ह्यकाल इति। अकालमृत्योरभावे सर्वमेव नियतकालप्रमाणमायुः स्यात् तन्नेष्टम्। को दोष इत्याह एवंगते इति। एवंगते सर्वस्मिन्नेव नियतायुष्के। हिताहितज्ञानमिति आयुर्वेदोपदेश इत्यर्थः। तत्र यैः खलु प्रमाणैः आयुष्यानायुष्याणि विचारि-तानि तानि अप्रमाणानि स्युः सर्वेषां नियतायुष्ट्वादित्याह प्रत्यक्षेति। उपसंहरति वागवस्त्विति। वाग्वस्तुमात्रमप्रमाणकमपरीक्षितञ्च वच-इत्यर्थः॥ २८॥

किञ्चास्य परमायुरित्यष्टमप्रश्नस्योत्तरमाह वर्षशतमिति। अस्मिन्

काले कलौ युगे। यदुक्तं मानवे धर्मशास्त्रे—

"अरोगा: सर्वसिद्धार्थाश्चतुर्वर्षशतायुष:।
कृते, त्रेतादिषु ह्येयमायुर्ह्रसति पादश:॥" इति।

अन्तिमप्रश्नस्य उत्तरमाह निमित्तमिति। तस्य पूर्णायु:प्राप्ते: निमित्तं कारणम्। प्रकृतिगुणात्मसम्पत्सात्म्योपसेवनमिति प्रकृतिगुण-सम्पत् शरीरस्य प्रकृतीनां मात्रादीनां शोणितशुक्रादीनां गुणानां सम्पत्-श्रेष्ठत्वम्। आत्मसम्पत् दीर्घायु:कराणां दैवानामुपयोग:। सात्म्यसेवनं हितकराणां स्वभ्यस्तानामाहारविहाराणामुपयोग इत्यर्थ:। अतिरोहितार्थ-मन्यत॥ २९-३०॥

अध्यायार्थं निवेदयति तत्र श्लोका इति॥ ३१-३४॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां शारीरस्थाने शरीरविचयो नाम षष्ठोऽध्याय:॥ ६॥

सप्तमोऽध्याय:

पूर्वाध्याये शरीरतत्त्वं व्यासत उपदिश्य अवसरसंगत्या संख्यात: शरीरांगप्रत्यंगानां ज्ञानाय अध्यायान्तरमारभते अथात इत्यादिना। तत्रादौ शरीरावयवानां ज्ञानाय शिष्यप्रश्नानुत्थापयति शरीरेति। अवयवश: अंग-प्रत्यंगादिविभागेन शरीरं प्रविभज्य शरीरसंख्यां पप्रच्छ इति योजना। किमर्थमित्याह सर्वेति। सर्वशरीरसंख्यानप्रमाणज्ञानहेतो: शरीरसंख्यान-ज्ञानज्ञानं षट्त्वच इत्यादिरूपेण प्रमाणज्ञानञ्च दशोदकाञ्जलय: इत्या-दिना॥ १-३॥

गुरुरुत्तरयति शृणु इति। यथाप्रश्नं प्रश्नाननुसृत्य उत्तरं शृणु इति योजना। वर्णनीयेषु शरीरांगप्रत्यंगेषु त्वच: सर्वशरीराच्छादकत्वात् तद्-वर्णनं प्राथम्येन भवतीति ज्ञेयम्। शरीरे षट् त्वच: ऊर्ध्वाधोभावेन षड्भि: स्तरैरियं त्वग् गठितेति तस्या: षट्त्वं सिध्यति। ननु धान्वन्तरीये त्वचां सप्तत्वं वर्णितमिति चेत् कथ्यते। तत्र शल्यतान्त्रिकै: आकृतिभेदात् पृथक्कृतयो: कयोश्चिद् द्वयो: समप्रकृतिकत्वाद् एकत्वमत्र स्वीकृतम्। अतएव त्वचां संज्ञा शल्ये अवभासिनी लोहितेत्यादि: आकृतिभेदात् कृता। तासु ताम्रा वेदिनी च कुष्ठसंभवाधिष्ठानत्वेन एकयैव कुष्ठसम्भवाधिष्ठानया संज्ञया कायचिकित्सायामभिहिते इत्यदोष:। तत्रेयं प्रथमा उदकधरा बाह्या त्वक् सर्वशरीरचरम् उदकं बिभर्ति इत्यस्या उदकधरेति संज्ञा। तदेवोदक-मभिप्लुष्टे व्रणे विस्फोटकादिषु च व्याधिषु अस्या बाह्यायास्त्वचोऽन्तरे लक्ष्यते। अतएवेयं संज्ञा प्रकृतिगता भवति। सुश्रुते त्वस्या: स्वच्छतया द्वितीयत्वग्गतवर्णावभासनाद् अवभासिनी संज्ञा भवति। द्वितीयात्वसृग्धरा तत्र वातरक्तवहशिराबाहुल्यात् तथा संज्ञा भवति सुश्रुते त्वस्या: अरुण-वर्णत्वात् लोहितेति आकृतिमूला संज्ञा भवति। तृतीया सिध्मकिलास-

सम्भवाधिष्ठाना। अत्रैव श्लेष्मरक्तवाहिशिराबाहुल्यात् पद्मवर्णा इति सुश्रुते त्वस्याः श्वेता इति संज्ञा। पुनश्च सिध्मकिलासयोः श्वेतवर्णत्वेन तयोः सम्भवस्य कफरक्तस्याधिष्ठानत्वेन चरके तथैव प्रकृतिमूला संज्ञा भवति। चतुर्थी कुष्ठसम्भवाधिष्ठाना। शल्ये त्वस्याः उपरिभागे पित्तरक्तवहानां शिराणामाधिक्येन ताम्रवर्णत्वात् ताम्रेति आकृतिमूला संज्ञा, अधस्तु स्पर्शज्ञानवहानां धमनीनां बाहुल्यात् स्पर्शज्ञानकर्तृत्वेन वेदिनीति संज्ञा भवति तयोर्द्वयोरपि विविधकुष्ठानां सम्भवस्याधिष्ठानत्वेन कायचिकित्सायां द्वे अपि एकीकृत्य कुष्ठसंभवाधिष्ठानेति एकैव प्रकृतिमूला संज्ञा कृतेत्यदोषः। पञ्चमी तु अलजीविद्रधिसम्भवाधिष्ठाना शल्ये त्वियं शुद्धरक्तवाहिनीनां रोहिणीनां शिराणामत्राधिक्येन रोहिणीसंज्ञया अभिहिता। रक्तवाहिशिराभिरेव दोषास्त्वत्र सञ्चीय विद्रध्यादीन् कुर्वन्तीति अलजीविद्रधिसम्भवाधिष्ठानेयं भवितुमर्हति। षष्ठी तु न कयाचित् संज्ञयात्र अभिहिता किन्तु प्रकृतिरस्याः व्यासतो निर्दिष्टा यस्यामिति। एषा च अन्तस्त्वक्। अस्यां छिन्नायामुत्कृत्य निःशेषतो निराकृतायामित्यर्थः। छिन्नशब्दस्य तु कस्यचित शरीरावयवस्य शरीराद् विच्युतिरूपोऽर्थो भवति यदुक्तं सुश्रुते—

"तिरश्चीन ऋजुर्वापि यो व्रणश्चायतो भवेत्।
गात्रस्य पातनञ्चापि छिन्नमित्यभिधीयते॥" इति।

अतएव तामुत्कृत्यापसारणेन ताम्यति तमोग्रस्तो भवति अस्यैव विवृतिः अन्ध इव तमः प्रविशति इति। अरुंषि पीडकाः पर्वसन्धिषु अवयवसन्धिषु। अस्या एव शल्ये लोममूलसंसक्तानां मांसांकुराणामत्र सत्ताबाहुल्येन मांसधरेति संज्ञा कथ्यते। वृद्धवाग्भटे चेयं प्राणधरेति अभिधीयते तदपगमे प्राणोपघातात्। ता एताः षट् त्वचः षडंगं शरीरमवत्य आच्छाद्य वर्तते॥ ४॥

ननु कानि तानि षडंगानि इत्याह तत्रायमिति। अत्र बाहुशब्देन बाहुसंससन्धितः अंगुलिपर्य्यन्तमंगं गृह्यते। सक्थिशब्देनात्र वंक्षणसन्धितः पादांगुलिपर्यन्तमंगम्। शिरोग्रीवं जत्रुसन्धेरुपरिष्टात् केशान्तं यावत्। अन्तराधिरित्यनेन ऊर्ध्वं ग्रीवांससन्धिमारभ्याधो वंक्षणसन्धी यावत् मध्यकायमित्यर्थः। एतैः षड्भिरंगैः शरीरं षडंगं कथ्यते इत्याह इति षडंगमंगम्॥ ५॥

साम्प्रतं प्रत्यंगेषु वक्तव्येषु तत्सारभूतानां शरीरस्थैर्यसम्पादकानाम् अस्थ्नां संख्यामेव प्रागाह त्रीणि सषष्टीनीति। षष्ट्यधिकशतत्रयाणीत्यर्थः। दन्तोलुखलानां नखानां च संख्या शल्यतन्त्रे नास्थिसंख्यायां पठ्यते कायचिकित्सकैस्तु तान्यस्थिषु पठ्यन्ते इत्याह सह दन्तोलुखलनखैरिति। नखा इति बाह्यतो दृश्यमानाः अंगुल्यग्रेषु संसक्ताः सततवर्धनशीलाः कठिना अवयवाः। अस्थिवत् कठिनतया अस्थ्नश्च समोपकरणतया आसामस्थित्वं सिध्यति। नन्वेते शल्यतन्त्रे अस्थिमलत्वेन पठिताः। इह तु अस्थिधातु-

त्वेनेति विरोधो दुर्निवार: स्यादिति चेत् कथ्यते । मला हि बहिर्मुखा: त्याज्याश्च भवन्ति नखेषु तु केचिदवयवा: त्याज्या भवन्तीति तेषां मलत्वे युक्तेऽपि अंगुलिषु दृढसंसक्ता: येऽवयवांशा: येषां छेदेन महती पीडा सम्भवति तेषां सततशरीरस्थायित्वेन धातुत्वमपि नायौक्तिकं भवेत् । ननु शल्यतान्त्रिकै: शतत्रयमिता अस्थिसंख्या पठ्यते अत्र तु षष्ट्यधिका इति तत्र द्वात्रिंशद् दन्तोलुखलानि विंशतिर्नखाश्च शल्यतन्त्रे अपठिता: अपि द्वापञ्चाशत् संख्या न्यूना भवितुमर्हति नतु षष्टिसंख्या इति चेत् उच्यते । शल्यतन्त्रे तु प्रधानतो द्वात्रिंशद्दन्तोलुखलानि हनुगण्डास्थ्नामंगत्वेन न पृथग्गणितानि । नखानाञ्च तेषां मते अस्थिमलत्वेन नैवैषामस्थिसंज्ञा भवति । अंसास्थि-द्वयमपि अंसफलकाभ्यां दृढसम्बद्धमिति न पृथग् गणितम् । ग्रीवायामपि गोजिह्वायां सप्त, द्वे च काकलकास्थिनी इति नवैव गणितानि, कायतन्त्रे तु तत्र त्रयोदशास्थीनि गणितानीति चत्वार्यधिकानि । एवं दन्तोलुखलनखानि विहाय नवैवास्थीनि पृथग्गणितानि इति शल्यतन्त्राद् एकषष्टिरधिकानि दृश्यन्ते । पुनस्तेषु गुदास्थ्नो गणना नात्र विद्यत इति साकल्येन षष्टिसंख्ययैव आधिक्यं युज्यते इति सर्वमवदातम् । ननु दृश्यमानास्थिपञ्जरस्थेषु प्रतीच्यसिद्धान्तेषु या संख्या कथ्यते, प्राच्यतन्त्रे ततोऽधिकानां काल्पनिकानामस्थ्नां समावेशान् न खलु सा प्रमाणं भवितुमर्हतीति चेन्न । गणनाशैलीपार्थक्यात् तरुणास्थि-दन्तादीनामस्थित्वेनापरिगणनात् संख्याभेदेनैव नाप्रमाणं भवति । ननु दन्तानां तरुणास्थ्नां च नास्थित्वं सिध्यति अस्थितो विभिन्नोपादानत्वात् इति चेन्न । ते च दन्तादय: अस्थ्युपादानकेनान्नरसेनैव पोष्यन्ते, तत्क्षयाच्च क्षीयन्ते इति तेषु स्तोकं विशिष्टपदार्थसत्तायां ज्ञातायामपि न ततोऽन्यत्वं तेषां भवितुमर्हति । तरुणास्थ्नामपि केषाञ्चित् परस्तात् अस्थिरूपेण परिणतिदर्शनात् तेषामपि अस्थित्वं युज्यत एव । ननु षष्टि: पाणिपादांगुल्यस्थीनीति नोपपद्यते प्रत्यक्ष-विरोधात् । तत्र षट्पञ्चाशदेवास्थीनि दृश्यन्ते, प्रत्यंगुलं सत्स्वपि त्रिष्वस्थिषु अंगुष्ठे तु द्वे एव दृश्यते इति चेत् कथ्यते । तत्रांगुष्ठे तु तृतीयं पर्व मांस-प्रविष्टमपि अस्थिपञ्जरे तु मूलात् त्रीण्येव पर्वाणि दृश्यन्ते । अंगुष्ठशलाका तु स्वल्पप्रमाणा, कूर्चास्थिभ्य: पृथग्वर्तमानत्वात् न तत् कूर्चास्थिषु परि-गण्यते इति साकल्येन हस्तपादतलयोरंगुलिसहितयोरस्थिसंख्या यथादृष्ट-मेव निर्दिष्टेत्यदोष: । पाणिपादशलाकास्तु कुत्र वर्तन्ते इत्याह चत्वारीति । चत्वारि पाणिपादपृष्ठान्येव आसां पाणिपादशलाकानाम् अधिष्ठानानि भवन्तीति शेष: । पार्ष्णि: गुल्फस्याध: पादस्य पश्चिमांश: । पाष्ण्यर्दीनां बाह्यांगानां विवृतिरग्रे भविष्यति । द्वे कूर्चाध इति हस्तयोस्तलस्थितास्थि-संघातस्य अध इत्यर्थ: । चत्वार: पाण्योर्मणिक: इति मणिबन्धसमीपे तल एव मणिकाख्यानि अस्थीनि । चत्वार: पादयो: गुल्फा इति । गुल्फस्तु पादतलजंघयो: सन्धि: तदधो वर्तमाना: । अरत्न्यो: प्रकोष्ठयो: मणिबन्धात् कूर्परसन्धिं यावत् एकस्मिन् द्वे इत्युभयोश्चत्वारि । जंघयो: पादगुल्फ-

सन्धित: जानुसन्धि यावत् एकैकस्यां द्वे द्वे इति चत्वारि । जानु तु जंघोर्वो: सन्धि: तयोर्द्वयोर्जानुकपालाख्ये द्वे भवत: । कूर्परस्तु बाह्वरत्न्यो: सन्धि: तत्र द्वे अस्थिनी तरुणे अरत्न्यस्थिसंश्लिष्टे । ऊर्वो: द्वे स्थूलतमे अस्थिनी भवत: । सांसयोरंसफलकसहितयो: बाह्वोर्द्वे । अक्षके अक्षकसंज्ञे अंसाभ्यां निर्गते जत्रुस्थन: उभयो: पार्श्वयो: संसक्ते द्वे । तालुनि द्वे ऊर्ध्वदन्तपंक्ते: पश्चान्नासिकाविवरं यावत् तालु वर्तते तत्रैकमस्थि करोटिभूमिभूतं जतुकास्थिसंज्ञम् , अपरञ्च तदूर्ध्वं शृंगाटकास्थिसंज्ञमिति द्वे भवत: । द्वे श्रोणिफलके कट्यध: पृष्ठवंशास्थिसंसक्ते । भगास्थ्येकं तच्च श्रोणिफलकपार्श्वाभ्यां निर्गतं पुरत: पुंसां मेढ्राध: स्त्रीणां च भगोपरि वर्तमानम् । अतएव तत् मेढ्रास्थीति कथ्यते । त्रिकसंश्रितमेकं त्रिकपुच्छरूपम् । एकं गुदास्थि तस्यैवाग्रभागे वर्तते । पृष्ठगतानि पञ्चत्रिंशदस्थीनि तानि तु शिर:करोटिसंयोगस्थलादारभ्य त्रिकं यावत् वर्तन्ते कशेरुकाख्यानि । ग्रीवायां पञ्चदशास्थीनि अत्र ग्रीवाशब्दो गलवाची तदभ्यन्तरे श्वासनलिकास्वरयन्त्रादिसंसक्तानि तरुणास्थीनि । ग्रीवाकशेरुकानां पृष्ठे गणना वर्तते । जत्रूणि द्वे इति एकं जत्रुस्थि एकं च काकलके ज्ञेयम् । हन्वस्थि तु यत्र अधोदन्तपंक्त्या: सन्निवेशो वर्तते । हनुमूलबन्धने तु ऊर्ध्वदन्तपंक्तिस्थाने उभयतो द्वे । ललाटे इति ललाटाभ्यन्तरे द्वे। अक्ष्णोर्द्वे ऊर्ध्ववर्त्मगते तरुणास्थिनी भवत: । गण्डयोर्द्वे अक्ष्णोरध उभयतो द्वे । नासिकायां त्रीणि तेषां संज्ञा घोणा इति । पार्श्वयोरुभयत: पृष्ठवंशस्य उद्भूतानि चतुर्विंशति: पर्शूकास्थीनि । चतुर्विंशतिश्च पार्श्वकानि तेषामग्रे संसक्तानि तरुणास्थीनि । तावन्ति चतुर्विंशति: अर्बुदाकाराणि प्रायोवृत्तानि स्थालिकानि पर्शूकामूलसंसक्तानि । एवमेकैकस्मिन् पार्श्वे द्वादश द्वादशपर्शूकास्थीनि त्रिभागेन गणनया द्विसप्ततिर्भवन्ति शंखकौ कर्णपांगयोर्मध्ये उभयतो द्वे । शिर:कपालानि चत्वारि एकं पुरत: एकञ्च पृष्ठत: पार्श्वयोश्च द्वे इति चत्वारि । वक्षसि जत्रवध: अग्रमांसं यावत् वक्षे इत्यर्थ:, सप्तदश इति षष्ट्यधिकानि त्रीणि शतानि अस्थीनि भवन्तीति शेष: । अद्यत्वे उपलभ्यमानानां मुद्रितचरकसंहिताग्रन्थानां नानाविधपाठदर्शनात् तेषु कतम: साधीयानिति निर्णयो दुरूह एव । मया तु परमाचार्यस्य गंगाधरस्यैव सरणिरत्रानुसृता । विशेषविचारस्तु मदीये "शारीरविनिश्चये" द्रष्टव्य: । याज्ञवल्क्यशारीरन्तु सर्वथा चरकमतमनुवदतीति अत्राध्येतृणां तुलनार्थं मुदाह्रियते तद्यथा—

"स्थालै: सह चतु:षष्टिर्दन्ता वै विंशतिर्नखा: ।
पाणिपादशलाकाश्च तासां स्थानचतुष्टयम् ॥
षष्ट्यंगुलीनां द्वे पाष्ण्र्यो: गुल्फेषु च चतुष्टयम् ।
चत्वार्यरत्निकास्थीनि जंघयोस्तावदेव तु ॥
द्वे द्वे जानुकूर्परोरूफलकांससमुद्भवे ।
अक्षतालूषके श्रोणिफलके च विनिर्दिशेत् ॥

भगास्थ्येकं तथा पृष्ठे चत्वारिंशच्च पञ्च च ।
ग्रीवा पञ्चदशास्थि: स्यात् जत्रवेकैकं तथा हनु: ॥
तन्मूले द्वे ललाटेऽक्षिगण्डे नासाघोणास्थिका ।
पार्श्वका: स्थालकै: सार्धमर्बुदैश्च द्विसप्तति: ॥
द्वौ शंखकौ कपालानि चत्वारि शिरसस्तथा ।
उर:सप्तदशास्थीनि पुरुषस्यास्थिसंग्रह: ॥" इति ॥ ६ ॥

पञ्चेति । इन्द्रियाधिष्ठानानि इन्द्रियाणि हि यानि प्रत्यंगान्याश्रित्य विषयान् गृह्णन्ति, तानि तु तस्य तस्येन्द्रियस्य पृथगधिष्ठानानि भवन्ति । अक्षिकर्णयो: प्रत्येकं द्वित्वेऽपि एककार्यत्वादेकत्वेन परिग्रह: इत्याह पञ्चेति । जिह्वा चात्र रसनेन्द्रियाधिष्ठानम् । कर्मेन्द्रियवर्णने जिह्वा तु वागिन्द्रियं तस्याधिष्ठानं गोजिह्वेति । एवं चैतन्यकारणानामिन्द्रियाणां वर्णनात् समनन्तरं तेषां स्थानं, चेतनायाश्च अद्वितीयं स्थानं हृदयं व्याकरोति हृदयमिति । हृदयं हि कोष्ठांगेषु श्रेष्ठतममंगम् । तच्च उर:कोष्ठे स्तनयोर्मध्यविन्दुतोऽधो-वामत: प्रसृतं मुष्टिमितं स्थानं व्याप्य वर्तते । फुफ्फुसस्य मध्यविन्दुत: इदं संसक्तमास्ते । तच्च स्वमुष्टिमितमन्त:सुषिरं मांसपेशीमयं च प्रायोऽधो-मुखपद्मकलिकाकारं कुम्भीकाफलसदृशं वा । वर्णतो नीलानुविद्धरक्तवर्णं कुम्भीका फलवर्णं वा । यदुक्तं भेले—

"पुण्डरीकस्य संस्थानं कुम्भीकाया: फलस्य च ।
एतयोरेव वर्णञ्च बिभर्ति हृदयं नृणाम् ॥" इति ।

ननु एकं हृदयम् इत्यनेन चेतनाधिष्ठानं ब्रह्महृदयाख्यं मस्तुलुंगाव-यवविशेषं बोधयति अपरञ्च मांसमयमुरोगतं हृदयमस्तीति हृदयद्वयस्य वर्णनमनेन सूत्रेणाभाष्यते इति चेन्न । न खल्वत्र एकशब्देन अपरस्य हृदयस्य सत्ता प्रख्यापिता आचार्येण । परन्तु शारीरे कतिधापुरुषीये यत् वेदनाना मधिष्ठानत्वेन सर्वं शरीरमुल्लिखितमिति सर्वमेव शरीरं चेतनाया अधिष्ठानं भवतु इति शंकामपनोदयितुं पुनश्च केषाञ्चित् प्रतीच्यशारीर-विदामिव "शरीरस्य सर्व एव सूक्ष्मतमा अवयवाश्चेतना:" इति मतवादं निराकर्तुम् एकमेवेति चेतनाधिष्ठानस्य विशेषणं प्रदत्तम् । अत्र एकम् अद्वितीय-मित्यर्थ: । शरीरे हृदयं विहाय न किमपि स्थानं चेतनाधातुरधितिष्ठती-त्यर्थ: ॥ ७–८ ॥

एषु शरीरावयवेषु दश अवयवा: विशेषत: प्राणाधिष्ठानत्वेन प्राणा-यतनानीत्याच्यते इत्याह दशेति । कानि तानीत्याह तद्यथेति एषु अंगाव-यवेषु विशेषत: प्राणास्तिष्ठन्ति इत एवाह तेष्वेषु प्रकुपितदोषपरीतेषु वा प्राय: प्राणा अपयान्तीत्यर्थ: । ननु दशप्राणायतनीये सौत्रीये शंखौ प्राणा-यतनत्वेन कथितौ अत्र तु तौ विहाय नाभिर्मांसञ्च पठिते । याज्ञवल्क्येऽपि वस्तिं हित्वा नाभि: पठिता । इत्यत्र का संगतिरित्युच्यते । सर्वाण्येतानि ह्यंगानि आहतानि सद्य एव प्राणान् निघ्नन्तीति प्राणायतनानीत्युच्यन्ते ।

तन्त्रान्तरसंवादात् सर्वेषामेव परिग्रहार्थमिह ऊहापोहाभ्यां वर्णयितुं प्रयत्नः कृत इति निष्कर्षः। अत्र मूर्धा इति सामान्येनोक्तेऽपि शृंगाटकान्यधिपतिं शंखकौ च प्रत्याययति विशिष्टपरत्वात्। कण्ठ इत्यनेन चतस्रः शिरा-मातृकाः प्रतीयन्ते। मांसमित्यनेन तलहृदयादिमांसमर्माण्येवाभिधीयन्ते यदुक्तं सुश्रुते—

"सोममारुततेजांसि सत्त्वरजस्तमांसि च।
मर्मसु प्रायशः पुंसां भूतात्मा चावतिष्ठते।
मर्मस्वभिहतास्तस्मान् न जीवन्ति शरीरिणः॥" इति।

षट् पूर्वाणि मूर्धातो वस्तिपर्यन्तानि। ओजआदीनि चत्वारि शरीरे श्रेष्ठधातुत्वात् तेषामपि प्राणायतनत्वमुक्तम्॥ ६॥

कोष्ठांगान्याह पञ्चदशेति। कोष्ठशब्देनेह अन्तराधेरभ्यन्तरं गृह्यते तद्गतानि अंगानि बाह्यतोऽदृश्यानीत्यर्थः। तेषां बहुत्वेऽपि प्राधान्येन पञ्चदश एवात्र लिखितानि। कानि तानीत्याह तद्यथेति। अत्रोक्ते पञ्च-दशसु कोष्ठांगेषु पक्वाशयस्योल्लेखोऽनाकारत्वेन प्रतिभाति। तत्र नाभ्या-दीनां सर्वेषामाकृतिगतैव संज्ञा दृश्यते, पुनश्चैषु कोष्ठांगेषु प्रधानस्यापि फुप्फुसस्य उल्लेखो न दृश्यते। पक्वाशयस्तु प्रकृतिगता संज्ञा, पुनरामाशय-क्षुद्रान्त्रस्थूलान्त्राणां पृथगुल्लेखान् महास्रोतसः सर्वेषु अंगेषु परिगृहीतेषु पक्वा-शयस्य स्थानं क्वचित्र भवेदिति संशयः पक्वाशयपदान्तर्भावो लेखकप्रमादो नवेति, चरकपाठयाथार्थ्यपरीक्षायामग्निवेशसतीर्थस्य भेलाचार्यस्य ग्रन्थ एव प्रथमं प्रमाणं भवति। भेलसंहितायामद्यत्वेऽपि पाठोऽयमुपलभ्यते यथा—

"पञ्चदश कोष्ठा(ङ्गा)नि तद्यथा नाभिश्च हृदयञ्च क्लोम च यकृच्च प्लीहा च वृक्कौ च वस्तिश्च पुरीषाधानञ्च(ा)माशयश्चोत्तरगुदश्चाधरगुदश्च क्षुद्रान्त्रं (च) स्थूलान्त्रञ्च निवापि(चाव)हननञ्चेति" इति। अत्र पक्वाशयस्य नाम-गन्धोऽपि नास्ति। पुनर्वपावहनमित्यत्र निवापि चावहननमित्यवयव-द्वयस्योल्लेखान्न पञ्चदशसंख्या व्याहता। पुनःचरकपाठपरीक्षार्थं याज्ञवल्क्य-विष्णुस्मृतिपाठमपि परीक्षामहे। तयोः प्रायः सर्वत्रैव चरकमतानुवादित्वं स्पष्टतः उपलभ्यते। अस्य चरकपाठस्य प्राक् दशप्राणायतनान्युक्तानि, पश्चाच्च षट्पञ्चाशत् प्रत्यंगानीति यः क्रमः परिगृहीतः, स एव भेले विष्णु-याज्ञवल्क्यस्मृतावपीति, नूनं चरकमतानुवादित्वं स्वीकर्तव्यम्। याज्ञवल्क्य-पाठो यथा—

"वपा वसा(हा)वहननं नाभिः क्लोम यकृत् प्लीहा।
क्षुद्रान्त्रं वृक्कौ वस्तिः पुरीषाधानमेव च॥
आमाशयोऽथ हृदयं स्थूलान्त्रं गुद एव च।
उद(त्त)रञ्च(श्च)गुदौ(दः)कोष्ठ्यो विस्तारोऽयमुदाहृतः॥"
इति।

एवं वर्तते। अत्रापि पक्वाशयस्योल्लेखो नास्ति। विष्णुसंहिताया-

मपि पक्वाशयपाठो न वर्तते। एवं परिस्थितौ चरकपाठे पक्वाशयप्रवेशो लेखकप्रमाद एव मन्तव्य:। प्राच्यष्टीकाकारश्चक्रपाणिरपि पक्वाशयपाठं न धृतवानिति नूनं पक्वाशयस्याविर्भाव: प्रमाद एव। ननु तर्हि पञ्चदशकोष्ठांगेषु एकस्य न्यूनता ष्परिहार्य्या भवेदिति चेत् कथ्यते। तत्रान्तिमे वपावहनमिति य: पाठोऽद्यत्वेऽपि दृश्यते, तत्रैव भेलयाज्ञवल्क्यादिसाम्यात् वपावहनञ्चावहननञ्चेत्येवं पाठे संशोधिते तेषां पञ्चदशत्वं पूर्यते पुन: फु:फुसस्यापि परिग्रह: स्यात्। अतो मयात्र पाठे पक्वाशयं विहाय अवहननञ्चेति अन्तिमे संयोज्य व्याख्यातुं यत्यते॥

तत्र नाभिरिति। अस्या: कोष्ठांगत्वेन परिग्रहात् न खल्वियं बाह्यांगविशेषरूपा कुण्डलाकारा नाभि: प्रत्येतव्या। पुनरप्यत्र अन्तर्विद्रधिरपि भवतीति सर्वतन्त्रसिद्धान्त:। अत: इयं नाभि: आमाशयादनन्तरसन्निविष्टं क्षुद्रान्त्रस्य उपरितनभागे मुष्टिमितं स्थानं व्याप्य स्थितं द्वादशांगुलमितमंगं भवतीति सिद्धान्तो न्याय्यो भवेत्॥ हृदयन्तु प्रागेव वर्णितम्। क्लोमा तु आमाशयपृष्ठत: पृष्ठाभ्यन्तरभागे तिर्यक्संसक्त: आयामत: प्रायो दशांगुलमित: प्रस्थतस्त्रिचतुरंगुलमितो यन्त्रविशेष:। शिरोऽस्य स्थूलतरं यकृतोऽधस्तात् अन्तर्नाभ्या च वेष्टितमास्ते। अयं हि उदकवहस्रोतसां मूलम्॥ यकृदिति। यन्त्रमिदं हृदयफु:फुसयोरध: शरीरदक्षिणे पार्श्वे आमाशयस्योपरि तमेव किञ्चिदाछाद्य वर्तते, वर्णश्चास्य कृष्णानुविद्धं रक्तमितिकृत्वा केचिदिदं कालखण्डं वदन्ति। अत्रैव संसक्ते मलपित्तकोषे हरिद्वर्णं मलपित्तं सञ्चिनोति। आयामत इदं प्रायो द्वादशांगुलं प्रस्थतश्च पञ्चषांगुलं भवति। प्लीहा तु वामे पार्श्वे आमाशयपृष्ठत: संसक्तो वर्तते। वर्णतश्चायं गाढकृष्णानुविद्धो रक्त:॥ वृक्कौ तु वस्तिशिरसोरुपरि संसक्तौ त्रिकोणाकारौ ग्रन्थिविशेषौ। अद्यत्वे यावयवौ अधिवृक्काविति कथ्यते। केचित्तु वस्तिशिरोद्वयमेव वृक्कशब्दवाच्यमिति प्रतिपिपादयिषन्ति। तत्त्न सम्यक्। वृक्कयो: प्रकृतौ विकृतौ वा क्वचिदपि कश्चिन् न मूत्रेण सार्धं सम्बन्ध:, नवा काचिन् मूत्रविकृतिरायुर्वेदे उपदिष्टा। अतो वस्तिमुखस्य वृक्कपदवाच्यत्वं नायुर्वेदसम्मतम्। वस्तिपदेनायुर्वेदे समग्र एव मूत्राशयोऽभिधीयते। पुनश्च तदंगस्य मूत्राधारस्यापि क्वचित् क्वचित्कदेशग्रहणेन वस्तिशब्दवाच्यत्वमुपलभ्यते। वस्ते: स्थाननिर्देशे प्रकृतिनिर्देशे विकृतिनिर्देशे च ये खलु आयुर्वेदग्रन्था विद्यन्ते तेषां साकल्येन विचारे कृते मूत्रोत्पत्तिस्थानादारभ्य वस्तिद्वारं यावत समग्रमेव यन्त्रं वस्तिशब्दवाच्यं भवति। यथाहि स्थाननिर्देशे सुश्रुत:—

"नाभिपृष्ठकटीमुष्कगुदवंक्षणशेफसाम्।
एकद्वारस्तनुत्वक्को मध्ये वस्तिरधो मुख:"॥ इति प्राह

अत: पृष्ठत: पृष्ठाद् आरभ्य कटीगुदञ्चातिक्रम्य पुरतो मुष्कशेफोवंक्षणमतिक्रम्य नाभिं यावद् अस्या: सीमानिर्देशात् नेयं मूत्राधारमात्रं वक्तुं युज्यते। एवं परिस्थितौ वस्तिशिरोद्वयस्यापि वस्तेरन्तर्गतं नूनं स्वी-

कार्यं भवेत् ॥ पुरीषाधानस्य सुश्रुते उण्डुक इति संज्ञा। यन्त्रमिदं सूक्ष्म-स्थूलान्त्रयोर्मध्ये वर्तते। आकृतिश्चास्य सपुच्छो गोलाकारः। मध्ये चास्य कोऽपि कलामयद्वारविशेषोऽस्ति, येन च स्थूलान्त्रगतस्य मलस्य सूक्ष्मान्त्रे प्रत्यावर्तनं प्रतिरुध्यते। स्थानमस्य दक्षिणवंक्षणप्रदेशे। आयामतश्चतुरंगुल-मितः पोट्टलाकारः। अधःप्रदेशे चास्य कापि पुच्छाकारा सूक्ष्मच्छिद्रा एकमुखी नलिका संसक्तास्ते ॥ आमाशयस्त्वत्र महास्रोतसः स्थूलतमोऽंशः, यत्र आहारो निगीर्णानन्तरं प्रथमं गच्छति। अन्नवहस्रोतसो मुखादारभ्य ग्रहणीं यावद् वर्तते। आयामतश्चायं षोडशांगुलप्रायः विस्तारतश्च मूले अंगुलद्वयमारभ्य ऊर्ध्वं षडंगुलं यावद् भवति। आकृतिश्चास्य प्रायो हंसाकारो भवति ॥ उत्तराधरगुदौ तु कुण्डलिकाभूते स्थूलान्त्रे संसक्तौ उभयतोमुखौ नलकाकारौ मांसपेशीविनिर्मितौ प्रायो वितस्तिमितौ भवतः। तत्रोर्ध्वदेशस्थः प्रायोऽष्टांगुलायतः उत्तरगुदो यत्र निर्गमाय पुरीषमवतिष्ठते। अधरगुदस्तु चतुरंगुलायामः येन पुरीषं निष्क्रामति। तत्रैवाधरगुदे तिस्रो बलयो वर्तन्ते। तत्र रोमान्ताद् अर्धांगुलं बाह्यं स्थानं गुदोष्ठ इत्याभाष्यते। ततस्त्वंगुलमितं स्थानं संवरणी बलिः, ततस्तु सार्धांगुलं विसर्जनी, तत ऊर्ध्वं सार्धांगुलं प्रवाहणीति। एवं गुदोष्ठाच्चतुरंगुलं स्थानमधरगुद इति कथ्यते, यदुक्तं सुश्रुते—

"शंखावर्तनिभाश्चापि उपर्युपरिसंस्थिताः।
गजतालुनिभाश्चापि वर्णतः संप्रकीर्तिताः ॥" इति।

क्षुद्रान्त्रं नाम—यद्यपि सम्पूर्णस्यापि क्षुद्रान्त्रस्य आमपक्वाशयः, आम-पक्वाशयमध्यः, नाभिरिति वा संज्ञा आयुर्वेदसम्मता, तथाप्यत्र नाभेः क्षुद्रा-न्त्रस्य च पृथगुल्लेखात् तस्योर्ध्वांशस्य द्वादशांगुलमितस्य नाभित्वेन परि-ग्रहः कृत इति शिष्टस्त्वधरांशः क्षुद्रान्त्रमिति ज्ञेयम्। महास्रोतसोऽयं भागः परिणाहतो अल्पतमत्वेन तस्य क्षुद्रान्त्रमित्याकृतिगता संज्ञा भवति। संस्था-नतः इदं प्रायः अंगुष्ठमात्रं स्थूलमुभयतो मुखं नलिकाकारं भवति। ऊर्ध्व-मुखञ्चास्य अन्तर्नाभिसन्नद्धम्, अधोमुखञ्च उण्डुकसंसक्तमास्ते। स्थूलान्त्रेण सहैवास्य दैर्घ्यं पुरुषस्य सार्धत्रिव्याममितं, स्त्रियास्तु त्रिव्याममितं भवति। समासतः समग्रं नाभिप्रदेशं व्याप्य समन्तात् पुनः पुनरावर्त्य वर्तते। यन्त्र-मिदं मांसपेशीमयमन्तःसुषिरं बहिरन्तश्च मलधरया कलया सञ्छन्नं वर्तते। अन्तःकला तु परःकोटिभिः सुसूक्ष्मैर्धमनीमुखैराचिता अन्नरस-माकर्षयितुम् ॥ स्थूलान्त्रन्तु उण्डुकात् प्रवर्तते। संस्थानञ्चास्य उभयतोमुखं क्षुद्रान्त्रात् स्थूलतरं प्रायः पादांगुष्ठवत्स्थूलम् सर्वतोबलिपरिगतं नलका-कारम्। तच्च प्राक् दक्षिणवंक्षणप्रदेशाद् ऊर्ध्वमुखीभूय यकृत्तलं यावद् याति, ततः परावृत्य तिर्यग्गत्या आमाशयाधस्तलमनुस्पृश्य वामपार्श्वे लीहान्तं गत्वा पुनः परावृत्याधोमुखीभूय मूत्राधारं यावत् गच्छत् पुनः कुण्डलिकाकारेण वक्रीभूय उत्तरगुदेन संनद्धमास्ते ॥ वपावहनं तु—'मेदस्तु

वपा वसा' इति कोषस्मरणात् उदरगतमेदोवाहकत्वाच्च उदरगतकोष्ठांगाच्छादकोऽयं जरायुरेव वपावहनमित्याख्यायते आयुर्वेदे। इयन्तु महती कला उदरकोष्ठयन्त्राणि स्तरद्वयेन प्राय आच्छाद्य वर्तते। तत्रैका बाह्या आमाशयं विना प्रायः सर्वमेवोदरकोष्ठं व्याप्याधितिष्ठति। अपरा तु तदन्तः पृथक् पृथक् यन्त्राणि। अस्यैव स्तरद्वयस्यान्तराले स्तोकः पिच्छाकारः श्लेष्मा वर्तते तयोः सन्धेराघर्षणवारणाय। तत्रैव हि जलोदरे व्याधौ प्राक् पिच्छाधिक्यं भवति ततश्च वारिप्रादुर्भावः। यद् वक्ष्यति—"तत्र पिच्छोत्पत्तौ मण्डलमुदरं गुरु स्तिमितमाकोटितशब्दं मृदुस्पर्शमपगतराजिकमाक्रान्तं नाभ्यामेव उपसर्पति। ततोऽनन्तरमुदकप्रादुर्भावः" इति। अस्यैव मेदोधरा कला इति सुश्रुते संज्ञा। अवहननम् इति तु फुःफुसस्यैवापरा संज्ञा। आयुर्वेदे सव्यापसव्यभागद्वयेन विभक्तोऽप्यसौ एककार्यकर्तृत्वात् परस्परसन्नद्धत्वाच्च एकमेवेदं यन्त्रमिति सर्वत्रैकवचनेनोक्तिः समीचीनैव। प्राणवहस्रोतसां मूलत्वेनास्य हृदयपदेनाप्युक्तिः कुत्र कुत्र दृश्यते। अत्रैव प्राणवहस्रोतांसि शाखाप्रशाखाभिः संसक्तानि। वर्णतश्चायं श्वेतमिश्रो रक्तः, अभ्यन्तरतश्च प्रायोरक्तवर्णः, अनेकैः सूक्ष्मसूक्ष्मकोषैः परिव्याप्तश्च। अस्यैव मध्यस्थले हृदयं संसक्तमास्ते। मृदुस्पर्शोऽयं स्थितिस्थापकश्च। अयन्तु वातधात्वाहारभूतस्य बाह्यवायोरामाशयश्च। अत्रैव निःश्वासेन परिगृहीतो बाह्यवायुः परिपक्वः शरीरचरं वायुं पोषयति। शरीरमलेन शिराभिरागतेन रक्तसहचरितेन सहैव मलांशश्चास्य प्रश्वासरूपेण बहिर्निर्गच्छति। इति प्रकरणोपसंहारे। तेषामेतेषां कोष्ठांगानां व्यासतो विवृतिः मदीये "शारीरविनिश्चये" कोष्ठांगविनिश्चयाध्याये द्रष्टव्या ॥ १० ॥

कोष्ठांगानि निवेद्य बाह्यांगान्युद्दिशति षट्पञ्चाशदिति। नन्वंशांशभेदात् प्रत्यंगान्यसंख्येयानि भवितुमर्हन्ति, प्रतीच्या अपि शारीरतन्त्रकाराः असंख्याभिः संज्ञाभिः यान्युल्लिलिखुः, तत्संख्येयसंज्ञाभिः निर्देशाद् आयुर्वेदतन्त्रस्य न्यूनतादोषो दुष्परिहार्यः स्याद्, इत्याशंकां परिजिहीर्षन्नाह यावतीति। पूर्वमिहैव परिसंख्यायमानेषु षट्सु अंगेषु निबद्धानि यानि प्रत्यंगानि अपरिसंख्येयानि भवन्तीति शेषः। तानि इह आयुर्वेदनिदाने चिकित्सिते च अन्यैः पर्यायैः अपराभिः पृथक्संज्ञाभिः व्याख्यातानि भवन्तीत्यन्वयः। सत्स्वपि असंख्येयेषु प्रत्यंगेषु प्रयोजनवशाद् यानि निदाने चिकित्सिते च पृथक् संज्ञाभिरुल्लिखितानि तान्येवात्र निबद्धानि अन्येषां पृथक् संज्ञाकरणं निरर्थकमेवेत्याशयः। कानि तानीत्याह तद्यथेति। जंघापिण्डिका जंघामध्यभागे स्थूलतमं मांसपिण्डम्। ऊरुपिण्डिका नाम ऊर्वोः स्थूलतमं मांसपिण्डम्। स्फिक् श्रोणिः स्त्रीणान्तु नितम्बः। वृषणौ पुंसां कोषद्वयम्। शेफस्तु मेढ्रम्। उखा तु वंक्षणसन्धिसन्निकृष्टो देशः पार्श्वयोरधस्तात्। वंक्षणौ तु अधोनाभेः कुक्षिं त्रेधा विभज्य पार्श्वयोस्त्रिकोणाकारावंशौ ऊरुसन्धिं यावत्। कुकुन्दरौ तु नितम्बयोरुपरि नातिनिम्नौ

प्रदेशौ। वस्तिशीर्षन्तु वंक्षणयोर्मध्ये कुक्षिभागः शिश्नरोमान्तान् नाभिं यावत् दशांगुलोच्छ्रितं स्थानम्। उदरं नाम नाभेरूर्ध्वं वुक्काग्रान्तं यावत् द्वादशांगुलोत्सेधो दशांगुलविस्तारश्च प्रदेशः। स्तनौ प्रसिद्धौ। श्लेष्मभुवौ तु श्लेष्मस्थानत्वेन सव्यापसव्यभेदेन उरसो द्वावंशौ। बाहुपिण्डिका तु बाह्वोर्मांसपिण्डम्। चिबुकन्तु हनोर्मध्यवर्त्ति अधरोष्ठस्याधः चतुरंगुलं स्थानम्। ओष्ठौ तु दशनाच्छादकौ चतुरंगुलायतौ प्रदेशौ। सृक्किण्यौ तु ओष्ठद्वयस्य पार्श्वयोरुभयतः सन्धिद्वयम्। दन्तवेष्टौ तु उत्तराधरभेदेन द्वौ, ययोर्दन्ताः प्रतिष्ठिताः। तालु नाम उत्तरदन्तवेष्टस्य पृष्ठत आरभ्य अभ्यन्तरस्य मुखकुहरस्य नासागतच्छिद्रं यावत् उत्तरप्रदेशः। गलशुण्डिका तु तालुशेषे मुखकुहरोन्मुक्तस्य नासाछिद्रस्य मध्यदेशे लम्बमानं मांसांकुरम्। उपजिह्विके नाम जिह्वाया मूले श्वासनाड्यवबद्धे द्विधा विभक्ते, ये च श्वासपथे अन्नस्य अन्नवहस्रोतसि च श्वासस्य प्रवेशे प्रतिबन्धकीभूते भवतः। गोजिह्विका नाम वागिन्द्रियाधिष्ठानं, सा च कण्ठमध्ये तरुणास्थिमयी। गण्डौ तु सव्यापसव्यतः सृक्किण्योरूर्ध्वं नयनयोरधः नासाप्रान्ताभ्यां हनुसन्धिद्वयं यावत् प्रदेशौ। कर्णशष्कुलिके नाम कर्णयोश्छिद्रनिर्मापकौ आवर्तकौ। कर्णपुत्रकौ तु कर्णयोर्बाह्यावयवौ। अक्षिकूटे नाम अक्षिबुद्बुदौ। अक्षिवर्त्मानि च अक्षिबुद्बुदाच्छादकानि प्रतिनयनमधरोत्तरभावेन सन्निविष्टानि पल्लवानि। अक्षिकनीनिके नाम नासादिग्गतमक्षिपल्लवसन्धिद्वयम्। भ्रुवौ तु नयनयोरुपरि ललाटस्याधः लोमावृतौ प्रदेशौ। अवटुः नाम ग्रीवापृष्ठसन्धिदेशः किञ्चिदुन्नतः। पाणिपादहृदयानि तु पाणिपादतलानि ॥ ११ ॥

पुनरपि शरीरे नव बहिर्मुखानि स्रोतांस्याह नवेति। सप्त शिरसीति कर्णनासाक्षिगतानि प्रत्येकं द्वे द्वे इति षट् एकञ्च मुखगतम्। अधश्च शिश्नगुदे च द्वे। स्त्रियास्तु अपराणि त्रीणि द्वे स्तनगते चूचुकनिबद्धे, एकञ्च स्त्रीन्द्रियगतमिति ज्ञेयानि। अपराण्यपि प्रत्यंगानि यानि अनुमानतो निर्णेयसंख्यानि ख्यामानान्याह एतावदिति। दृश्यमिति बाह्यांगानां प्रत्यक्षतः कोष्ठांगानामपि मृतकखण्डेनेत्यर्थः। अभिनिर्देष्टुं संख्यातो निर्देष्टुं शक्यम्। अतः परम् इतोऽधिकं प्रत्यंगजातम् अनिर्देश्यं प्रत्यक्षेण संख्याकरणायोग्यम् असंख्यसूक्ष्मशाखाप्रशाखादिभिर्विभेदात्। अतएव तर्क्यम् आगमादिप्रमाणेन गम्यम्। कानि तानीत्याह तद्यथेति। ननु स्नाय्वादीनि मृतकखण्डेन दृश्यन्त एवेति कथमेषामदृश्यत्वमिति चेत् कथ्यते तानि दृश्यान्यपि संख्यातो निर्देष्टुमयोग्यानीति तेषामनिर्देश्यत्वमात्रमुक्तं न त्वदृश्यत्वम्। नव स्नायुशतानीति स्नायवो हि अस्थिमांसमेदआशयादीनां बन्धनानि, तत्र तत्र विभिन्नाकाराणि भवन्ति। आयुर्वेदे ताश्चतुर्विधा आभाष्यन्ते, यथा—काश्चित् शाणसूत्राकाराः शुभ्राः 'प्रतानवत्यः' इत्याख्याः शाखाप्रशाखाभिर्गुच्छाकाराः भवन्ति। ताश्च प्रायः शाखागतास्थिसन्धिषु दृश्यन्ते। काश्चिद् वृत्ताः स्थूलाश्च कण्डराख्याः, याः खलु बृहन्मांसपेशीसंसक्ताः हस्तपादग्रीवापृष्ठेषु

दृश्यन्ते। काश्चिन् मण्डलाकारा: सुषिराख्या:, ग्रहण्यामुण्डुकमुखे, गुदे, वस्तिद्वारे चोपलभ्यन्ते। काश्चिद् विस्तीर्णा विस्तृतमांसपेश्यग्रे संसक्ता: पृथुलाख्या: उर:पार्श्वपृष्ठशिर:सु वर्तन्ते। ताश्च संख्यया नवशतानि। प्राधान्येन आसां गणना भवतीति शाखाप्रशाखाभिरसंख्येयत्वेन सा संख्या तक्र्या एव ॥ सप्त शिराशतानीति । शिरा नाम रक्तवाहिन्य: प्रणाल्य:, सुषिरा:, स्वच्छा:, रक्तधराभि: कलाभिरावृता:, अतएव शोणितवर्णभेदात् नानावर्णा भवन्ति। ता: खलु शरीरे रक्तस्य चातुर्विध्याद् चतुर्विधा भवन्ति। तद्यथा वातरक्तवाहिन्य:, पित्तरक्तवाहिन्य:, कफरक्तवाहिन्य:, सर्वसमरक्तवाहिन्यश्चेति तामेव शुद्धरक्तवाहिनीं कथयन्ति प्राञ्च: ॥

द्वे धमनीशते इति। धमन्यस्तु क्रियाद्वैविध्यात् प्राक् द्वेधा भिद्यन्ते। तत्रैका असुषिरा: ज्ञानकर्मवाहिन्य:, अपरास्तु सुषिरा: रसादिवाहिन्य:। तत्र प्रथमासु ज्ञानकर्मवाहिनीषु ज्ञानवाहिन्यो अन्तर्मुख्य:, इन्द्रियैरालोचितान् विषयान् अभिवहन्त्य: चेतनस्य अन्त:करणस्य मुख्यं स्थानं हृदयं प्रापयन्ति। पुनरपराभि: कर्मवाहिनीभि: बहिर्मुखीभि: हृदयाद् आत्मन: प्रवृत्त्या, निवृत्त्या, जीवयोनिप्रयत्नेन च, शाखागता विहाय सर्वा: शारीर्य: क्रिया: निष्पाद्यन्ते। स्थूलत: एतैरेव स्रोतोभि: वायुर्धमन् सूक्ष्मातिसूक्ष्ममपि प्रदेशं गत्वा चेतनप्रयत्नवशात् सर्वकर्माणि करोति। द्वितीयास्तु सुषिरा: रसादिवाहिन्य: । काश्चिन् नाभिसम्भूतास्तत्रोत्पन्नान् अन्नरसान् अभिवहन्त्यो रसस्थानं पूरयन्ति। पुनरूर्ध्वाधस्तिर्यग्गता: कृत्स्नं शरीरं व्याप्य जालाकारेणावतता: रसेन शरीरमाप्याययन्ति। का वा त्वग्गता: सुषिराभि: प्रणालीभि: अन्त:प्रविष्टानि स्नानाभ्यंगादिवीर्याणि त्वचि भ्राजकाग्निना विपक्वानि रसीभूतानि अन्त:शरीरमभिप्रापयन्ति। का वा तत्रैव स्थिता अन्त:शरीराद् बहिर्मुखान् मलरूपान् स्वेदान् अभिवहन्त्यो लोमकूपनिबद्धै: मुखैर्बहिर्नि:सारयन्ति। ता एता: सुषिरा असुषिराश्च नाभिप्रभवा:। अनयोर्द्विविधयोरपि धमन्यो: ध्मानाद् अनिलपूरणाद् धमनीत्वम् अव्याहतं भवेत्। वातवेगेनैव धमनीछिद्रेषु रसादीनां सञ्चालनं भवतीति ज्ञेयम्। यदुक्तं शारीरपद्धिन्याम्—

"अथ समीरसमीरणतस्तनावनुमता धमनी धमनीविदाम्।
भवति नाभिगताभिगतारसं वहति तत्त्वमिताऽप्यमिताऽप्यसौ ॥" इति

ननु सुश्रुते चतुर्विंशतिरेव धमन्य: पठ्यन्ते अत्र तु शतद्वयमिति विरोध इति चेन्न। सुश्रुते तु चतुर्विंशतिक्रियाभेदाच् चतुर्विंशतिविधा: धमन्य: प्रोक्ता:, नतु संख्याता:। अतएव तत्र चतुर्विधानां तिर्यग्गानां धमनीनामसंख्येयत्वं तत्रैव प्रोक्तम्। अत्र तु प्राधान्येन मूलधमनीनां शतद्वयत्वमुक्तमित्यविरोध:। शिराधमनीनां व्यासतो वर्णनं मदीये 'शारीरविनिश्चये' द्रष्टव्यम् ॥

पञ्च पेशीशतानीति । पेश्यो हि नाम मांसावयवसंघाता: वायुना

विभक्ताः पृथक्कलाभिर्वेष्टिताः। तास्तु नानाकाराः, प्रायः शिराभिः स्नायुभिश्च अस्थिषु निबद्धाः, स्थानभेदेन कुत्रचिद् बह्व्यः, कुत्रचिद्वा अल्पाः वर्तन्ते। काश्चित् स्थूलाः का वा सूक्ष्माः। एताभिरेव शरीरे कुत्रचिद् अस्थि, कुत्रचिद्वा सन्धिः, कुत्र कुत्र वा शिरादयः प्रच्छादिताः सन्ति। एताभिरेव प्रच्छादितानि तानि बलवन्ति भवन्ति। अत्र चत्वारि पेशीशतानि इत्यपपाठः। सर्वत्रायुर्वेदे विशेषतः चरकमतानुवादिषु भेलयाज्ञवल्क्यादिषु पञ्चानामेव पेशीशतानां निर्देशात् नवायं चक्रसम्मतोऽपि॥

सप्तोत्तरं मर्मशतमिति। मर्मशब्देनात्र म्रियतेऽस्मिन् इति निरुक्त्या उपहते तस्मिन् शरीरोपघाताय सम्पद्यत इत्यर्थः। तत्रैव मांससिरास्नाय्वस्थिसन्निपातात् विशेषेण प्राणास्तिष्ठन्ति, यान्यभिहतानि सद्यः कालान्तरेण वा प्राणान् घ्नन्ति, वैकल्यं रुजातिशय्यं वा आपादयन्ति कानि वा सशल्यानि प्राणान् धारयन्ति बलादुत्पाटितशल्यानि मारयन्ति इति तानि पञ्चविधोदर्कानि भवन्त्यपि उपादानभेदात् पुनः पञ्चविधानि भवन्ति। तद्यथा मांसमर्माणि, शिरामर्माणि, स्नायुमर्माणि, अस्थिमर्माणि, सन्धिमर्माणि चेति। तानि तु संख्यातः सप्तोत्तरशतसंख्याकान्यपि संज्ञातस्त्रिचत्वारिंशत्संख्यकानि भवन्ति। तत्र चतुर्दशसंज्ञकानि, शाखासु पञ्चदश मध्यकाये, चतुर्दश चोर्ध्वजत्रुगे सन्ति॥

द्वे सन्धिशते इति। अत्र सन्धिपदेनास्थिसन्धिरेव प्रत्येतव्यः। ते च अष्टधा विभज्यन्ते कोरोदूखलसमुद्ग-प्रतर-तुन्नसेवनी-वायसतुण्ड-मण्डल-शंखावर्त-भेदात्। तेषां वर्णनं सुश्रुते द्रष्टव्यम्। तत्र प्रयोजनवशाद् तत्तदधिकाअपि दश सन्धयो वर्णिता अभवन्। शिराधमनीनामणुशः प्रविभज्यमानानां तु मुखाग्रपरिमाणन्तु एकोनत्रिंशत् शतसहस्राणि नवशतानि षट्पञ्चाशत्कानीति षट्पञ्चाशदधिकनवशतैकोनत्रिंशल्लक्षाणीत्यर्थः। याज्ञवल्क्येऽपि तथैवोक्तम्, यथा—

"एकोनत्रिंशल्लक्षाणि तथा नवशतानि च।
षट्पञ्चाशच्च जानीयात् शिराधमनीसंज्ञिताः॥" इति।

तावन्ति पूर्वोक्तमानानि। उपसंहरति एतदिति। उभयं दृश्यं तर्क्यञ्च न विकल्प्यते नान्यथा भवति यावत्प्रकृतिभावात् शरीरस्य विकृतौ तु अन्यथाभवतीति भावः॥ १३-१४॥

पुनरपि शरीरगतानि कानिचिद् द्रव्याणि अञ्जलिमानतः प्राह यत्त्विति। अञ्जलिसंख्येयम् अञ्जलिना परिमेयम्। अञ्जलिस्तु उभे करतले संयोज्य यः सम्पुटो भवति, तत्र धार्यस्य द्रवद्रव्यस्य मानम्। परं प्रमाणम् उच्चतमं मानम्। परन्तु तन्मानं वृद्धिह्रासयोगि कदाचिद् वर्धते कदा वा ह्रसतीत्यर्थः। मानमेतदपि न दृश्यं तर्क्यमनुमेयमेव। तत्र प्राक् शरीरगतमुदकमानमाह दशोदकेति। तदुदकं शरीरे किं कर्म करोतीति विवक्षुरादौ विकृत्या तस्य कार्यमाह यत्त्विति। अतियोगेन प्रच्यवमानम् उदकवह-

स्रोतसां मूलेभ्यो महास्रोतसि अतिमात्रया प्रस्यन्दमानं पुरीषमनुबध्नाति पुरीषेण सह सम्मिश्र्य निरेति। पुनः सम्यग्योगेन तत्रैव प्रच्यवमानं अन्यान् शरीरधातून् रसादीन् द्रवधातून्। तदुदकमिश्रणेन च अन्नरसादयः सारधातवः, मूत्रादयश्च मलधातवस्तरलीभवन्ति इति निष्कर्षः। यच्च सर्वशरीरचरमुदकं बाह्या त्वक उदकधरा बिभर्ति धारयति। सर्वशरीरस्य त्वगवततत्वात् तदुदकं सर्वशरीरचरं भवतीत्यर्थः। तदेव त्वग्गतमुदकं व्रणगतं प्लुष्टविस्फोटकादिषु लसीकाशब्दभाग् भवति। पुनश्च शरीरगतं यदुदकं उष्मणा औष्ण्येन अनुबद्धं संसर्गं कुर्वाणं लोमकूपेभ्यः निष्पतद् बहिर्निर्गच्छत् स्वेदशब्दमवाप्नोति स्वेदशब्देन आभाष्यते। वस्तुतस्तु न तदुदकं मेदोमलः स्वेदः। समाननिर्गमप्रकारादस्य स्वेदशब्दवाच्यत्वं भवति इत्यर्थः। तच्च अन्नस्य मलं शरीरात् परित्याज्यमुदकमेवेत्याशयः। अतएवायुर्वेदे मेदोमलात् स्वेदाद् अतिरिक्तमन्नमलमपि स्वेदशब्देनाभिधीयते इति ज्ञेयम्। निगमयति तदुदकमिति। तदुदकमिति पूर्वोक्तानां कार्याणां सम्पादनाय यावन्त्युदकानि प्रयोजनानि तावन्तीत्यर्थः। पूर्वस्याहारपरिणामधातोरन्नरसस्येत्यर्थः। श्लेष्मणो रसमलरूपस्य, पित्तस्य च रक्तमलस्येत्यर्थः। पुरीषमूत्रयोरन्तर्गतत्वेन अनयोर्मलयोरेवात्र परिग्रहः समीचीनः स्यात्। पुनश्च मूलधातुस्वरूपयोः पित्तश्लेष्मणोस्तु सर्वशरीरोपादानभूतयोर्मानिर्देशासम्भवात्। वसा तु मांसस्नेहरूपः, यदुक्तं सुश्रुते—"शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्तिता" इति। मस्तिष्कन्तु शिरःकपालान्तर्गतः मज्जविशेषः। यदुक्तं वृद्धवाग्भटे—"तदेव शिरसि कपालप्रतिच्छन्नं मस्तिष्काख्यं मस्तुलुंगाख्यं च" इति। तावदेव अर्धाञ्जलिप्रमाणमेव। श्लेष्मलस्यौजसः सर्वशरीरव्यापिनोऽपरस्यौजसः। परस्यौजसः अष्टबिन्दुमितत्वात् अत्र श्लेष्मलस्येति विशेषणम्॥ १५॥

शरीरस्यांगप्रत्यंगानि निर्वर्ण्य तस्य च पाञ्चभौतिकत्वमपि प्रतिपिपादयिषुः तेषां पृथक् पृथक् भूतप्राधान्यं दर्शयति तत्रेति। तत्र तेषु अंगावयवेषु यदंगं विशेषतः विशेषभावेन। नखादिकं गुर्वादिगुणवत्। पार्थिवं पृथिवीभूतप्रधानं पाञ्चभौतिकमित्यर्थः। कण्डरा स्थूला स्नायुः। आप्यद्रव्येषु कफस्तु धातुरूपो मलरूपश्च पित्तन्तु मलरूपं ज्ञेयम्। धातुरूपपित्तस्याग्नेयत्वात् तस्याग्नेये परिगणनं भवति यत् पित्तमित्यनुपदमेव। भाः कान्तिः। दर्शनं दर्शनेन्द्रियम्। उच्छ्वासादिना शरीरगतं सर्वविधं कर्म तन्मूलो वायुश्च परिगृह्यते। विविक्तमवकाशबहुलम्। यथा स्थूलभेदेनेति सूक्ष्मातिसूक्ष्मभेदेन त्ववयवसंख्या अपरिसंख्येया भवेत्। पुनश्च सा शास्त्रेऽस्मिन् निदानज्ञाने चिकित्साज्ञाने च अनुपयोगित्वात् परित्यक्तेत्यर्थः॥१६

ननु परमाण्वादिभेदेन शरीरावयवास्तु बहुधा भिद्यन्ते, तेषां तेषां भेदानामनुल्लेखात् शारीरतन्त्रस्य अपूर्णता एव स्यादित्याशंकां निराकरोति शरीरेति। तेषु तेषु प्रत्यंगैकदेशेषु पृथक्संज्ञाभिरभिहितेषु शास्त्रेऽस्मिन्

अनावश्यकसंज्ञाबाहुल्याद् विदुषामश्रद्धैव आवहेदित्याह अतिबहुत्वादिति। अतिसूक्ष्मेषु अतीन्द्रियेषु प्रत्यंगेषु विकृतिज्ञानस्य नैकान्तिकत्वाद् विदुषामपि व्याधिज्ञाने भ्रान्तिर्भवेदिति प्राह अतिसौक्ष्म्यादतीन्द्रियत्वाच्चेति। ननु ते परमाणवः कथं संयुज्यन्ते कथं वा विभज्यन्ते इत्याह तेषामिति। वायुः शरीरधातुः, कर्म च तद्गतजीवस्य जन्मान्तरीयं कर्म, स्वभावः प्रकृतिश्च। पारिशेष्यात् शरीरज्ञानादेव सर्गोऽपवर्गश्च भवतीति प्रतिपादयति तदेतदिति। एतदनेकावयवं शरीरम् एकत्वेन संख्यातं दृष्टं सद्, इदं मे शरीरं शरीरादन्योऽहमित्याकारकं दर्शनं संगो भवतीति शेषः। पृथक्त्वेन दर्शनं, नाहमिदं पृथगवयवात्मकं शरीरं, नवा ममेदम् इत्याकारकं ज्ञानमेव अपवर्गः मोक्षः। तत्र उदितायां खल्वेवं तत्त्वस्मृतौ प्रधानमात्मा सर्वसन्ताननिवृत्तौ सत्यां ममात्मबुद्धिरहितं सद् असक्तं संगरहितं निवर्तते विषयेभ्य इति शेषः। इत्युपसंहारे। अतिरोहितार्थमन्यत् ॥ १७-१८ ॥

अध्यायार्थं निरूप्याध्यायं समापयति तत्र श्लोकाविति ॥ १९-२० ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यां शारीरस्थाने शरीरसंख्या नाम सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः।

साम्प्रतं पारिशेष्याद् गर्भिणीपरिचर्यादिकं शारीरमवसरसंगत्या वक्तुकामो जातिसूत्रीयं नाम शारीरमारभते अथात इत्यादिना। जातेर्जन्मनो गर्भस्येति शेषः। सूत्रं सूचनाग्रन्थः तमधिकृत्य प्रवृत्तमध्यायं जातिसूत्रीयम्। तत्र प्राग् अध्यायार्थमुद्दिशति स्त्रीपुंसयोरिति। स्त्रीणां गर्भाशयविकृत्या हि प्रसवाभावोऽव्यापन्नयोरपि शुक्रशोणितयोर्भवतीति तस्यापि पृथगुल्लेखः कृतः। श्रेयसीं गुणान्विताम्। तदर्थाभिनिर्वृत्तिकरं तत्प्रयोजनसम्पादकम्। तदर्थमेव निर्दिशति अथापीति। क्रमाद् वमनविरेचनाध्यायोक्तेन क्रमेण। प्रकृतिं स्वाभाविकीमवस्थाम्। संशुद्धौ तौ स्त्रीपुंसौ। आस्थापनानुवासनाभ्यां रूक्षस्निग्धवस्तिभ्याम्। मधुरौषधसंस्कृताभ्यामिति घृतक्षीराभ्यामिति मधुरस्कन्धोक्तद्रव्याणां काथकल्काभ्यां सिद्धं घृतं तथा क्षीरपाकपरिभाषया च पक्वं क्षीरं ताभ्यामित्यर्थः। उपाचरेत् पुरुषं मासं यावत् पाययेत्, यथा सम्यक् स्निग्धो भवति। आहारस्य घृतक्षीरप्रधानो भवेत्। स्त्रियन्तु तथैव पक्वेन तैलेन सुस्निग्धां कुर्यात्, तैलमाषप्रधानाहारांश्च कल्पयेत्। यदुक्तं सुश्रुते—"पुमान् मासं ब्रह्मचारी सर्पिःस्निग्धः सर्पिःक्षीराभ्यां शाल्योदनं भुक्त्वा, मासं ब्रह्मचारिणीं तैलस्निग्धां तैलमाषोत्तराहारां नारीमुपेयात्" इति। पुनश्च संगमविधिमाह ततः पुष्पादिति। पुष्पात् ऋतुशोणितदर्शनादारभ्य त्रिरात्रं दिवसत्रयम्। ब्रह्मचारिणी मैथुनरहिता। अधःशायिनी भूमौ दर्भसंस्तरशायिनी। पाणिभ्यां भुञ्जाना करतलपात्र एव भोजनशीला, अथवा अजर्जरपात्रे अभग्नपात्रे।

चकारोऽयं पक्षान्तरे। न मृजामापद्येत स्नानोत्सादनरहिता आसीत। त्रिरात्रमिति सर्वक्रियास्वन्वय:। तत: त्रिरात्रादनन्तरम्। उत्साद्य पिष्टहरिद्रादिना उत्सादनं कृत्वा सशिरस्कं स्नापयित्वा नद्यादावगाह्येत्यर्थ:। आच्छादयेत् परिधापयेत्। पुरुषं चेति तथा पुरुषमपि कुर्यादित्यर्थ:। स्रग्विणौ माल्यधारिणौ सुमनसौ हृष्टौ तौ स्त्रीपुंसौ संवसेयातां मैथुनं गच्छेताम्। स्नानात् प्रभृति स्नानदिनादारभ्येति पूर्वेणान्वय:। तत्र विशेषमाह युग्मेष्विति। युग्मेषु आर्तवदर्शनात् चतुर्थषष्ठादिदिवसेषु। अयुग्मेषु पञ्चमसप्तमादिषु। यदुक्तं सुश्रुते—"चतुर्थ्यां षष्ठ्यामष्टम्यां दशम्यां द्वादश्यां चोपेयात् पुत्रकाम: ..... पञ्चम्यां सप्तम्यां नवम्यामेकादश्याञ्च स्त्रीकाम:। त्रयोदशीप्रभृतयो निन्द्या:" इति॥ १-५॥

पुनश्च संगमे निषेधविधिमाह नचेति। न्युब्जामधोमुखीं विपरीतबन्धेनेत्यर्थ:। पार्श्वगतां सव्ये वामे वा पार्श्वे शयानाम्। संव्युत: † सम्पिण्डित: योनाविति शेष:। गर्भाशयं पिदधाति योनेस्तृतीयावर्तद्वारे निरुणद्धि। तेन च बीजप्रवेशासामर्थ्यात् न गर्भोत्पत्तिर्भवतीत्यर्थ:। वामपार्श्वे पित्तं भवतीति शेष:। तत् पित्तं पीडितं प्रकुपितं रक्तं स्त्रीबीजं शुक्रं पुंबीजञ्च विदहति नाशयति इत्यतो गर्भाभाव: इत्यर्थ:। मैथुनानन्तरं कर्तव्यमाह पर्याप्त इति। पर्याप्ते सम्यग्गृहीते बीजे। पुनश्च स्त्रिया अवस्थाविशेषाद् अपि गर्भो न भवतीत्याह तत्रेति। तत्र संगमे। अत्यशिता अतिभोजनेन पूर्णोदरी। मैथुने चातिकामा मैथुनातृप्ता इत्यर्थ:। विगुणां विकृताकाराम्। अतिबालामिति षोडशवर्षादर्वागित्यर्थ:। तत्र दोषमाह सुश्रुतो यथा—

"ऊनषोडशवर्षायामप्राप्तपञ्चविंशतिम्।
यदा धत्ते पुमान् गर्भं कुक्षिस्थ: स विपद्यते॥
जातो वा न चिरं जीवेज्जीवेद्वा दुर्बलेन्द्रिय:।
तस्मादत्यन्तबालायां गर्भाधानं न कारयेत॥" इति।

अतिवृद्धाया अपि बालोऽल्पायुर्भवति। तथा चोक्तं सुश्रुतेन—"निवृत्तप्रसवायास्तु पुन: षड्भ्यो वर्षेभ्य ऊर्ध्वं प्रसवमानाया: नार्या: कुमारोऽल्पायुर्भवति" इति। निवृत्तप्रसवा इति पञ्चाशद्वर्षा; तदैव प्रायस्तस्या आर्तवनाशात् तथा संज्ञा भवति। यदुक्तं सुश्रुते—"तद्वर्षाद् द्वादशाद् याति याति पञ्चाशत: क्षयम्" इति। ततोऽपि षड्वर्षादूर्ध्वं षट्पञ्चाशद्वर्षाया नार्या: इत्यर्थ:। अन्येन विकारेण योनिव्यापदित्यादिनेत्यर्थ:। पुरुषेऽपीत्यपिना अतिबाले अतिवृद्धे दीर्घरोगिणि शुक्रदोषविशिष्टे च इत्यतिदिश्यते॥ ६-७॥

पुनश्च संगमनियमानाह सञ्जातेति। सञ्जातहर्षौ कामवेगाक्रान्तौ। अतएव मैथुने अनुकूलौ तौ दम्पती स्याताम्। इष्टगन्धादियुक्तं शयनं शय्यामुपकल्प्य रचयित्वा। तदारोहेद् इति योजना। तत्र गर्भाधाने। इत्युक्त्वा

† 'श्लेष्मा संव्युत: गर्भाशयम्' इति पाठ:।

एवं मन्त्रमुच्चार्य संवसेयातां संगच्छेताम् ॥ ८-६ ॥

पृथक् कामनावशात् पुत्रीयकर्मभेदानाह सा चेदेवमिति । वृहन्तं महाकायम् । अवदातं गौरवर्णम् । हर्यक्षं पिंगललोचनम् । सत्त्वसम्पन्नं सत्त्वगुणाधिकम् । इत्येवं पुत्रमिच्छेयमित्याशासीत तर्हि कर्माण्याह शुद्धेति । अवदातयवानां तुषरहितशुभ्रयवानां मन्थम् । काले काले भोजनसमये । राजते कांस्ये इत्युपलक्षणं तेन शुभ्रवर्णे पात्रे इत्यर्थः । प्रातः सायञ्च द्वौ कालौ शाल्यादिविकारान् भुञ्जीतेति योजना । तथा गृहादिकमपि तस्याः शुभ्रं भवेदित्याह अवदातेति । शरणं गृहम् । शश्वत् पुनः पुनः । आजानेयं श्रेष्ठमश्वम् । हरिचन्दनांगदं श्वेतचन्दनानुलिप्तगात्रम् । सौम्याभिर्मधुराभिः । तथा भर्ता उपचरेदिति वचनव्यत्यासेनान्वयः । मिश्रीभावं मैथुनम् । सशिरस्कमद्भिराप्लुत्य अवगाह्य स्नात्वा । स्नानानन्तरं कर्तव्यमाह ततइति । ऋत्विक् पुरोहितः । आगारस्य यजमानगृहस्य । प्राक् प्रवणं पूर्वस्यां दिश्यायतम् । उदक्प्रवणम् उत्तरस्यां दिश्यायतम् । स्थण्डिलं यज्ञभूमिम् । परिष्कृतामनतोन्नतां मलशर्करादिरहिताञ्च । अभिसमीक्ष्य निरूप्य । अस्मिन् यज्ञभूमौ वेदीं चतुरस्रां चतुर्हस्तमितामित्यर्थः । तां पश्चिमेन पश्चिमायां दिशि । ब्राह्मणप्रयुक्तः ब्राह्मणेन यजमानेन यज्ञार्थं वृतः पुरोहितः इत्यर्थः । श्वेतार्षभे शुक्लवर्णवृषभस्य चर्मणि । अजिने हरिणस्य वा चर्मणि उपविशेदिति योजना । राजन्यप्रयुक्तः क्षत्रियेण यजमानेन वृतस्तु वैयाघ्रे व्याघ्रस्य चर्मणि, अनडुहे वृषभस्य वा । वैश्यप्रयुक्तस्तु रौरवे रुरुसंज्ञकस्य मृगस्य चर्मणि, वास्ते छागस्य वा चर्मणि उपविशेदिति योजना । वेद्याः पश्चिमतोऽखण्डितवस्त्रसमूहरचिते आसने यजमानो वर्णभेदेन पृथक् पृथक् चर्म आस्तीर्य उपविशेदित्यन्वयः । ततः किं कुर्यादित्याह तत्रेति । पालाश्यादिभिः समिद्भिः यज्ञीयैः काष्ठैः अग्निमुपसमाधाय श्रुतिविहितमन्त्रैरग्नेर्नामादिकं विधाय संस्थाप्य च । कुशैः परिस्तीर्य चतुर्दिक्षु आस्तीर्य परिधिभिः यज्ञीयपशुबन्धनार्थं याः शाखाः निखायन्ते तैः परिधाय समन्तान् निखाय । सुमनोभिः कुसुमैः उपाकिरेत् यज्ञवेद्यां लाजकुसुमानि इतस्ततो विक्षिपेत् । तत्र वेद्यां उदपात्रं जलपात्रं रक्षार्थं प्रणीय एकदेशे संस्थाप्य, आज्यार्थं यज्ञीयघृतसंस्कारार्थं पूतं पवित्रं साग्रनिर्गर्भकुशान्तरवेष्टितं प्रादेशमात्रं कुशपत्रद्वयं, सर्पिश्च उपसंस्कृत्य श्रौतेन विधिनेत्यर्थः । यथोक्तवर्णान् यद्वर्णपुत्राशंसा तद्वर्णान् । आजानेयादीन् श्रेष्ठघोटकादीन् समन्ततो वेद्याः परित इत्यर्थः । समासतो यज्ञार्थं श्रौतेन विधिना यद् यत्कर्तव्यं तत्सर्वमेव ऋत्विक् कुर्यादिति निष्कर्षः ॥ ६-११ ॥

वह्निस्थापनात् परं कर्तव्यमाह तत इति । पुत्रकामा कामनानुरूपं पुत्रमाशासाना ऋतुस्नाता स्त्री भर्त्रा सह पश्चिमतो दक्षिणतश्च ब्राह्मणानुपवेश्य† अग्निमन्त्रानभेत बल्युपहारादिभिः पूजयेत् । ततस्तस्मिन् अवकाशे आशा-

† 'पश्चिमतोऽग्निं दक्षिणतो ब्राह्मणमुपवेश्य' इति पाठः ।

सानाया: तथैव प्रार्थयन्त्या: तस्या: योनौ गर्भाशये प्रजापतिमभिनिर्दिश्य योनिं प्रजापतिदेवताधिष्ठितां विचिन्त्य, तस्या: कामपूरणार्थं यथेष्टपुत्रजननाय 'विष्णुर्योनिं कल्पयतु इत्याद्यनया ऋचा गर्भाधानोक्त-श्रौतमन्त्रेण काम्यामिष्टिं पुत्रेष्टिं निर्वपेत् तत्तन्मन्त्रेण आज्याहुतिं जुहूयादित्यर्थ:। तत: आज्येन स्थालीपाकं चरुमभिसंसार्य पक्त्वा मेलयित्वा तेन त्रि: त्रीन् वारान् जुहूयात्। यथाम्नायं स्वस्ववेदोक्तं यथा स्यात्तथा मन्त्रोपमन्त्रितमुदपात्रं उदकपूर्णं शान्तिकुम्भं सर्वोदकार्थान् कुरुष्व, गर्भाधाने यद् यद् उदककर्म वर्तते, तत्तदेतेनैव उदपात्रस्थेनोदकेन कर्तव्यमित्यनुज्ञाय, तत् तस्मै दद्याद् इति योजना। तत: कर्मणि यज्ञे समाप्ते पूर्णाहुतिदानात् परं, सा स्त्री भर्त्रा सह पूर्वं दक्षिणं पादमभिहरन्ती प्रथमतो दक्षिणं पादं निक्षिप्य अग्निं प्रदक्षिणं कृत्वा स्वदक्षिणत: कृत्वा अनुपरिक्रामेत् प्रदक्षिणं कुर्यादित्यर्थ:। तत: प्रदक्षिणानन्तरं ब्राह्मणान् पूर्वोक्तानुपविष्टान् ब्राह्मणान् स्वस्ति वाचयित्वा स्वस्ववेदोक्तं स्वस्ति सूक्तं पाठयित्वा, भर्त्रा सह आज्यशेषं हुतावशिष्टं चरुमाज्यञ्च प्राश्नीयात् भुञ्जीत। केन क्रमेणेत्याह, पूर्वं पुमान् भर्ता, तत: स्त्री प्राश्नीयाद् उच्छिष्टं नावशेषयेत् निरवशेषतो भुञ्जीतेत्यर्थ:। तत: तस्यां रात्रौ सह संवसेयातां संगच्छेताम्। अष्टरात्रमिति अष्टम्या रात्र्या आरभ्य पञ्चदशीं यावदित्यर्थ:। एतावत्कालं तथाविधपरिच्छदौ शुक्लेन वाससाच्छादितौ, तथाविधे वासगृहे, तथाविधे च शयने संगच्छेतामित्यर्थ:॥ १२॥

अवदातपुत्राशंसायां तथाविधपुत्रोत्पत्त्यर्थं विधानं निरवशेषतो निवेद्य श्यामवर्णादिपुत्रोत्पत्तिविधिमाह या तु स्त्रीति। श्यामं श्यामवर्णम्। व्यूढोरस्कं प्रशस्तवक्षसम्। कृष्णं कृष्णवर्णम्। आत्मवन्तं जितेन्द्रियम्। अनयो: कृष्णं श्यामं वा पुत्रमिच्छन्त्यो: होमविधि: पुत्रेष्टिविधानं एष: पूर्वोक्त एव। तत्र यच्च किञ्चित् पार्थक्यं वर्तते तदाह किन्त्विति। परिवर्हो यज्ञार्थं गवाश्ववस्त्रमाल्यादि: वर्णवर्ज्य: स्यादिति, यथा अवदातपुत्रकाम्ये यज्ञे शुक्लाभि: सुमनोभिर्लाजैश्च उपाकिरणं समन्तात् स्थापनञ्च श्वेतवर्णानां घोटकादीनां तथैव श्यामवर्णपुत्रकाम्ये कृष्णवर्णपुत्रकाम्ये वा तद्वर्णै: पुष्पादिभि: घोटकादिभिश्च तत्तत्कार्यं साधनीयमित्यर्थ:। यथाशीरेव प्रार्थनानुरूपमेव। ननु यज्ञीयविधि: द्विजातीनामेव भवितुमर्हति न शूद्राणामिति, तत्र किं विधानमित्याह शूद्रेति। तुकारो भिन्नक्रमे। प्रणिपातेन तानावर्ज्य तेभ्य आकांक्षां निवेदयेदित्यर्थ:। पुनरपि तत्र क्रमान्तरमाह या येति। या या शूद्रा। अयमर्थ:—तासामाकांक्षां श्रुत्वा आकांक्षितानुरूपा मानवा यद् यज जनपदवासिन: तत्तज्जनपदं मनसा परिक्रामयितुं ता उपदिशेत् भिषक्। पुनश्च तस्मिन् तस्मिन् जनपदे यथा यथा आहाराचारपरिच्छदादिकं स्यात् तथा तथा कर्तुमुपदिशेदित्यर्थ:॥ १३-१५॥

नन्वेतावतीभिरेव क्रियाभि: यथेष्टवर्ण: पुत्रो जायेत? नेत्याह न

खल्विति । गर्भस्य पञ्चमहाभूतवैशेष्यादपि वर्णानां वैशिष्ट्यं भवति इत्याह तेजोधात्विति । तेजोधातुरेव वर्णकरः स चेद् जलाकाशबहुलः स्यात्, तर्हि गर्भो गौरवर्णः, पृथ्वीवायुबाहुल्याच्च कृष्णवर्णः सर्वधातूनां साम्ये च श्यामवर्णो भवतीत्यर्थः । वर्णवैशिष्ट्ये कारणान्युल्लिख्य सत्त्ववैशिष्ट्ये हेतूनुदाहरति सत्त्वेति । सत्त्ववैशिष्ट्यन्तु गर्भावक्रान्तीये शारीरे उपदिष्टम् । मातृपितृसत्त्वानि तयोर्मानसावस्थाभेदात् पुत्रस्यापि तथा मनो भवतीत्यर्थः । अन्तर्वत्न्याः गर्भिण्याः अभीक्ष्णं श्रुतयः सत्त्वादिप्रधानलोकचरित्रादिश्रवणम् । गर्भस्य स्वोचितं जन्मान्तरीयं स्वोपार्जितं कर्म । सत्त्वविशेषाभ्यासः गर्भिण्याः सात्त्विकाद्याहारशीलता च ॥ १६-१७ ॥

ननु दृश्यते हि मिथुनीभावमापन्नयोः स्त्रीपुंसोर्गर्भानुत्पत्तिः अतः सुधैवोच्यते शुक्रशोणितसंसर्गाद् गर्भस्य जन्म इति । अतः सुशुद्धस्य शुक्रस्य विशुद्धेनार्तवेन संसर्गः परिशुद्धयोनिगर्भाशयायाः गर्भस्य जनको भवत्यवश्यमेवेत्याह यथोक्तेनेति । यथोक्तेन अत्रैवाध्याये निवेदितेन विधिना । अव्यापन्नं शुद्धं शुक्रं पुंबीजम् तल्लक्षणमाह सुश्रुतो यथा—

"स्फटिकाभं द्रवं स्निग्धं मधुरं मधुगन्धि च ।
शुक्रमिच्छन्ति केचित्तु तैलक्षौद्रनिभन्तथा ॥" इति ।

अव्यापन्नेन अदुष्टेन शोणितेन स्त्रीबीजेन । तल्लक्षणं यथा सुश्रुते—

"शशासृक्प्रतिमं यत्तु यद्वा लाक्षारसोपमम् ।
तदार्तवं प्रशंसन्ति यद्वासो न विरञ्जयेत् ॥" इति ।

योनावनुपहतायां योनिव्यापद्भिरनाक्रान्तायाम् । गर्भाशये च अप्रदुष्टे वैषम्येण वातादिना अनाक्रान्ते । अत्र योनिगर्भाशययोरेकार्थत्वेऽपि गर्भाशयस्य पृथग्ग्रहणात् योनिशब्देनेह योन्याद्वितीयमावर्तं यावद् ग्रहणीयं भवति । तेन तद्गताभिः अचरणादिभिर्व्यापद्भिरपि गर्भासम्भवः स्यादिति बोधयितुम् । गर्भाशयशब्देनेह गर्भशय्यायाः बीजवहस्रोतसोः फलयोश्च परिग्रहो भवतीति ज्ञेयम् । एकान्तेन नैश्चित्येन । दृष्टान्ताभ्यां विशदयति तद्यथेति । सुपरिकल्पिते रजकादिभिः सुधौते । समुदितगुणं यथावद्गुणयुक्तम् अकृत्रिममित्यर्थः । रञ्जनं रञ्जकद्रव्यम् । उपनिपातात् संसर्गात् । दध्यभिषुतं दधिबीजसंसृष्टम् । अभिषवणात् बीजसंसर्गात् परमेव । स्वभावं द्रवभावम् । तद्वत्शुक्रमिति-द्रवं हि शुक्रं शोणितसंसर्गात् घनत्वमापद्यते इत्यर्थः ॥ ननु गर्भस्य स्त्रीपुंसत्वे को हेतुरित्याह एवमिति । एवं पूर्वोक्तेन प्रकारेण । पूर्वमतुल्यगोत्रीये शारीरे । अनुपतप्तं कीटवातवर्षादिभिरनुपहतम् । स्त्रीपुरुषौ गर्भौ यथोक्तं हेतुविभागं "रक्तेन कन्याम्-धिकेन पुत्रं शुक्रेण" इत्यादि हेतुविभागमनुविधीयते पूर्वोक्तहेतून् अनुसृत्यैव स्त्री वा पुरुषो वा भवति । नत्वेवं सर्वत्र पुंसवनयोगात् स्त्रीकरहेतुयोगेऽपि गर्भः पुंस्त्वमापद्यते इति पुंसवनविधिमाह तयोरिति । व्यक्तीभावात् स्त्रीपुरुषलिंगप्रकाशात् प्राक् तृतीयमासात् पूर्वमेवेत्यर्थः । प्रयुक्तेन

वेदोक्तेन कर्मणा पुंसवनविधानेन तस्य विवर्तनमुपदिश्यते। तस्य फलमाह कर्मणामिति। हि यतः देशकालसम्पदुपेतानां कर्मणाम् इष्टफलत्वं नियतं निश्चितं भवति। इतरेषां देशकालसम्पद्रहितानाम् इतरत्वमनिष्टफलत्वम्। निगमयति तस्मादिति। पुंसवनं भेषजमाह गोष्ठे इति। गोचारणभूमौ। न्यग्रोधस्य वटस्य। प्रागुत्तराभ्यां शाखाभ्यां शुङ्गे इति पूर्वदिग्भवशाखातः एका उत्तरतश्चैका इति पत्रमुकुलद्वयम्। अनुपहते कीटादिभिः। सम्पदुपेताभ्यां निर्दोषाभ्यां धान्यमाषाभ्यां माषगुडकाभ्यां पुष्ये पुष्यानक्षत्रयुक्ते चन्द्रे। तथा अपरान् पुंसवनयोगान् जीवकेत्यादिनोक्तान् पिबेदित्यन्वयः। सहचरो नीलझिण्टी। यथेष्टं द्वयं त्रयं वा स्वाभिप्रायानुरूपम्। पयसा उपसंस्कृत्य क्षीरपाकविधिना पक्त्वा। कुड्यकीटकः कुड्यं भित्तिः तत्र वासगृहनिर्माता कीटविशेषः 'कुमरियापोका' इति वंगे। मत्स्यकं † पञ्चाङ्गिनाम क्षुद्रं मत्स्यम्। अनवशेषतः न किञ्चिदवशेष्य। देहली द्वाराग्रस्थानं 'हातिना' इति वंगे। तामुपाधाय उपाधानीकृत्येत्यर्थः। अन्यदपि पुंसवनं ब्राह्मणा आप्ता वा ब्रुयुः तच्चेष्टमनुष्ठेयम्॥ २०॥

पुंसवनविधिं निरवशेषत उपदिश्य गर्भास्थापनविधिमाह अत ऊर्ध्वमिति। गर्भास्थापनानि गर्भरक्षाकराणि। ऐन्द्री इन्द्रवारुणी। शतवीर्या शतावरी, सहस्रवीर्या महाशतावरी, अमोघा पाटला, अव्यथा मुण्डिरी, शिवा हरीतकी, अरिष्टा कटुकी, वाट्यपुष्पी वाट्यालकः, विष्वकसेनकान्ता प्रियंगुः। आसामौषधीनां शिरसा दक्षिणेन च पाणिना धारणं शिरसि दक्षिणे च बाहौ एताः व्यस्तसमस्ताः धारणीया इत्यर्थः। योगान्तरमाह एताभिरिति। एताभिः कल्ककाथकृताभिः सिद्धस्य। तथा चोक्तं—

"यत्राधिकरणे नोक्तिः गणे स्यात् स्नेहसंविधौ।
तत्रैव कल्कनिर्यूहाविष्येते स्नेहवेदिना॥"

इति परिभाषाबलादत्र कल्ककाथौ प्रयोज्यौ। तदयमर्थः—यत्राधिकरणे यत्र स्थाने स्नेहसंविधौ स्नेहपाके गणे द्रव्यसमूहे न उक्तिः कल्ककाथयोर्विशेषकथनं न स्यात् तत्र कल्कनिर्यूहौ इष्येते इति। पुनर्योगान्तरमाह एताभिरिति। स्नानं तत्काथेनेति शेषः। सदा सर्वत्रैव यस्मिन् कस्मिन्नपि योगे एताभिरैन्द्र्यादिभिः समालभेत प्रलेपं दद्यादित्यर्थः। पुनर्योगान्तरमाह तथेति। जीवनीयोक्तानां षड्विरेचनशताश्रितीये सौत्रीये उक्तानाम्। तैस्तैरुपयोगविधिभिः पूर्वोक्तैर्धारणादिभिः॥ २१॥

गर्भोपघातकरान् भावानाह गर्भेति। उपघातकराः नाशकाः वैकृतकराश्च। उत्कटासनसेविन्याः भूमौ नितम्बमनाश्लिष्य जानुद्वयं संकोच्य पदतलमात्रभरेण उपवेशनमुत्कटासनमुच्यते सदैव तथा उपविशन्त्याः। विषमस्थाने नतोन्नतभूमौ, कठिने काष्ठे प्रस्तरे वा आसने च। दारुणमत्यधिकश्रमजनकम्, अनुचितमनभ्यस्तञ्च व्यायामं याः सेवन्ते। सर्वत्रैव

† 'मत्स्यकमुदकेति' पाठः साधीयान्।

शीलार्थे णिन् अवगन्तव्यम्। प्रमिताशनं मात्रातो न्यूनमशनम्। कुक्षेरन्तर्म्रियते। अन्तर्मृतगर्भलक्षणमाह सुश्रुतो यथा—

"गर्भास्पन्दनभावीनां प्रणाशः श्यावपाण्डुता।
भवत्युच्छ्वासपूतित्वं शूलश्चान्तर्मृते शिशौ॥" इति।

शोषीभवति गर्भः शुष्को भवति तल्लक्षणन्तु तत्रैव यथा "स मातुः कुक्षिं न पूरयति मन्दश्च स्पन्दते" इति। पुनरपि गर्भपातहेतुं निर्दिशति तथेति। मातुरभिघातप्रपीडनैः कुक्षावाघातेन प्रपीडनेन मुष्ट्यादिना मर्दनेन च। श्वभ्रस्य महतो गर्तस्य। प्रपातस्य निरवलम्बनपर्वतादिपार्श्वस्य अभीक्ष्णमवलोकनैः अत्यर्थं तेषामधोभागदर्शनैः। अतिसंक्षोभिभिः अत्यर्थं शरीरान्दोलनकारिभिः यानैः हस्त्यश्वरथादिभिः। अकाले गर्भः पततीति योजना। साकल्येन विनाशकारणमभिधाय गर्भविकृतिकरान् भावानाह प्रततेति। प्रततं सततम्। कण्ठमनुवेष्टयति गर्भस्थस्य शिशोः कण्ठं परितो वेष्टयति। विवृतशायिनी उन्मुक्ताकाशे देशे शयनशीला। नक्तचारिणी रात्रौ भ्रमणशीला। कलिकलहशीला कलेर्युद्धस्य कलहस्य वाग्विवादस्य शीला सततावारा। व्यवायशीला मैथुननित्या। अपचितं शीर्णकायम्। अभिध्यात्री चिन्ताशीला। स्तेना चौर्यवृत्तिका। अमर्षिणी क्रोधनित्या। औपधिकमिति उपधिः छलं तच्छीलमित्यर्थः। अबुधमपण्डितम्। अनवस्थितचित्तं चञ्चलमानसम्। क्रथनं हिंसाशीलम्। मत्स्यमांसनित्या नित्यं मत्स्यसेविनी। चिरनिमेषं निमेषरहितप्रायम्। स्तब्धाक्षं सर्वथा निमेषरहितम्। अन्तर्वत्न्या आहारविहारेण गर्भस्य विकृतिं निवेद्य अनुक्ताहारादिना गर्भस्य या या विकृतिर्भवेत् तदाह यद्यदिति। यस्य यस्य व्याधेर्यद् यन्निदानं तदुपसेवमानायास्तद् रोगविशिष्टमेव सन्तानं जायते इत्यर्थः। ननु मातृजैरेवापचारैर्गर्भस्य व्यापत्तिः भवतीति नेत्याह पितृजा इति। यथा यथा मातृजैरपचारैर्गर्भस्य विकृतिर्भवति तं तमुपसेवमानस्य पितुरपि शुक्रदोषात् गर्भस्य तथा तथा विकृतिर्भवतीति मातृजविकारान् पितुः शुक्रदोषेऽपि अतिदिशतीत्यर्थः॥ २२॥

प्रतीकारव्यपदेशादपि केचिद् गर्भोपघातकराः भावाः सेविता भवितुमर्हन्तीति तान् परिजिहीर्षुर्गर्भिण्याः प्रतिकारक्रमं निगदतो निवेदयति व्याधीनिति। रक्तमवसेचयेत् शिराव्यधादिना रक्तमोक्षणं कुर्वीत। सर्वकालमिति प्रथमतः सप्तममासं यावत् वस्तिनिषेधात्। यद्वद्यति "मासान् सप्त च गर्भिणी" इति। विधानञ्चैतद् अपवदति अन्यत्रेति। आत्ययिकाद् व्याधेः यत्र अकृते वमनादौ मरणं नियतं स्यात्, तत्र सम्भवति गर्भोपघातकेऽपि गर्भिणीप्राणरक्षार्थं वमनादिकं कर्तव्यमेवेत्यर्थः। तैश्च मृदुभिरेव तदनुकारिभिर्वा उपचर्या अन्तर्वत्नी इत्याह अष्टममिति। अष्टममासमुपादाय अष्टममासादारभ्य। उपसंहरति पूर्णमिति॥ २३॥

वक्तव्ये गर्भस्थापनविधौ द्वितीये तृतीये वा मासि गर्भस्रावोपक्रमे

तच्च विधानमयौगिकमित्याह सा चेदिति । अपचाराद् अहिताहारविहारात् पुष्पं पश्येत् रक्तं स्रवेत् । प्रस्रंसमाने गर्भे प्राक् शोणितदर्शनमेव भवेदित्यनेनोन्नेयम् । मासत्रयाभ्यन्तरे हि गर्भस्थापनविधिरपार्थकः स्यादित्याह नास्या इति । शिष्यबुद्धिव्यवसायार्थं पुनरपि गर्भोपघातकरान् निर्दिशति क्रोधशोकेति । गर्भस्थापनविधिं वक्ति पुष्पदर्शनादिति । यद्यपि गर्भिण्याः रक्तस्रावस्य पुष्पत्वं न भवितुमर्हति तथापि पुष्पस्रावसादृश्यात् अस्य पुष्पसंज्ञा उपचाराज् ज्ञातव्या । एवकारोऽत्र नियोगार्थः । किं ब्रूयात् शयनमिति । अयमर्थः—शोणितदर्शनमात्रं तां शिशिरास्तरणास्तीर्णे शयने शाययेत् । तच्च शयनं मृदु सुखकरञ्च स्यात् । शिशिरास्तरणञ्च कदलीपद्मपल्लवादिना कर्तव्यम् । किम्भूतं शयनं, यथा यत्र शयितायाः पादतलात् शिरः किञ्चिदवनतं स्यात् तथा शयनखट्वायाः पाददेशवर्त्तिनोः खट्वापादयोरिष्टकादिकं संन्यस्य किञ्चिदुच्चैः कृत्वा स्थापयेदित्यर्थः । ततः शयनानन्तरं यष्टीमधुककल्कः गव्यघृतञ्च परमशिशिरवारिणि सपात्रं संस्थाप्य शीतीकृत्य ताभ्यां पिचुं निर्मलकार्पासतूलकम् आप्लाव्य योनौ योन्याः द्वितीये आवर्त्ते स्थापयेदित्युपदेशः । शतधौतमिति शतकृत्वः सहस्रकृत्वो वा धौतं सर्पिः । तेन चेदं परमशीतलं स्यादित्याशयः । शैत्यक्रियानुरोधाद्यत्वे वयं हिमशिलापूर्णं हृतिमपि अधोनाभेर्धारयितुमुपदिशामः । अधो नाभेः सर्वतश्च सर्वमेव कुक्षिमित्यर्थः । सुशीतेनेति सर्वत्रैवान्वीयते । सुशीतमुदकं हिमशिलादिस्थापनेन शीतीकृतम् अवगाहयेत् जलकोष्ठके आनाभि मज्जयेत् । क्षीरिणामिति न्यग्रोधोदुम्बरादीनाम् । कषायद्रव्याणां खदिरबब्बुलादीनाम् । चेलानि सुनिर्मलसूक्ष्मवस्त्रखण्डानि ग्राहयेत् तत्स्वरसपरिपीतं सूक्ष्मवस्त्रखण्डञ्च तर्जन्यांगुल्या योनौ द्वितीयावर्तमध्ये स्थापयेत् । न्यग्रोधेति । वटादिक्षीरिवृक्षत्वकसिद्धेन क्षीरपाकपरिभाषया । तथा तत्सिद्धेन स्नेहपाकविधिना । ताभ्यां सिक्तं पिचुं तूलकम् । अतः तच्च क्षीरं सर्पिर्वा अक्षमात्रं तोलकद्वयं पाययेत् । केवलमच्छं क्षीरसर्पिः क्षीरोत्थं घृतम् । पद्मेति । उत्पलमत्र नीलोत्पलम् । किञ्जिल्कान् पुष्पकेशरान्णि । पुष्करबीजं पद्मबीजम् । गन्धेति । गन्धप्रियंगुः प्रियंगुफलम् । असितोत्पलं नीलोत्पलम् । उदुम्बरशलाटुः अपक्वमुदुम्बरफलम् । न्यग्रोधशुंगं वटस्य पत्रमुकुलम् । अन्नमाह पयसेति मांससात्म्यानां लावादिमांसरसेन । भोजनकाले तु सा प्रवाते शीतले च स्थाने सुखेनासीतेत्याह सुखेति । गर्भस्रावोपक्रमे अप्रतीकार्यं प्राह यस्या इति । पुनः पश्चान्तरे । आमान्वयाद् आमाजीर्णवशात् । गर्भोपघातकरं गर्भस्रावकरम् । तयोरामाजीर्णगर्भस्रावयोः विरुद्धोक्रमत्वात् उष्णशीतोपचरित्वेन तयोर्विरुद्धोपक्रमत्वम् ॥ २५-२६ ॥

यद्यपि पुष्पदर्शनं गर्भस्रावसूचकं, तथापि कदाचित तथैव पुष्पदर्शने सत्यपि स्वतः क्रियान्तरेण वा चेद् गर्भो न स्रवेत्, तदा गर्भवृद्धिप्रतिरोधात् सोऽतिकालमवतिष्ठते, तां विकृतिं व्याचष्टे यस्या इति । सा च

विकृतिः जातसार एव महति गर्भे भवति नान्यत्रेत्याह महतीति । महति उत्पन्ने सर्वांगे जातसारः अपरायां सम्यग्गर्भशय्यासंसक्तायामित्यर्थः । तस्य उपविष्टक इति केचित्का संज्ञा भवतीत्याह तमिति । चतुर्थमासात् परमेव पुष्पदर्शने एषा विकृतिर्भवति । अन्यो वा योनिस्रावः गर्भोदकादिस्रावः । एवमन्येनाप्यपचारेण या अपरा विकृतिर्भवति तामाह उपवासेति । गर्भग्रहणात् परस्तादेव प्रथममासादारभ्येत्यर्थः । कदाहारायाः अपुष्टिकराहाराया: । वातप्रकोपणानि कषायतिक्तादीनि । परिशुष्कत्वात् सम्यक्पोषणाभावात् गर्भः शुष्क इव भवतीत्यर्थः । अस्पन्दनमीषत्स्पन्दनम् ॥ २७ ॥

तयोः प्रतिकारक्रममुपदेष्टि भौतिकेति । भौतिकं जान्तवं द्रव्यं छागादिमांसं गोक्षीरघृतादिकञ्च । जीवनीयबृंहणीये षड्विरेचनशताश्रितीये सौत्रीये द्रष्टव्ये । मधुरं मधुरस्कन्धोक्तं अष्टमे विमाने द्रष्टव्यम् । वातहरं दशमूलादिकम् । तैः सिद्धानां स्नेहपाकविधिना पक्वानां सर्पिषां गोघृतानां, पयसां क्षीरपाकपरिभाषया पक्वानां गोक्षीराणाम् । आमगर्भाणां दन्तहंसादिडिम्बानाम् । अत्यर्थं गुरुत्वादेतेषामुपयोगः सुबुभुक्षायामेव कर्तव्यः, अन्यथा गर्भवृद्धिकरो न स्यादित्याह बुभुक्षाया इति । अग्निबाहुल्यादेव बुभुक्षा भवतीत्यर्थः । यानेति । अत्र यानवाहने नातिसंक्षोभकरे ज्ञातव्ये । अपमार्जनैः संवाहनैः, अवजृम्भणैः गात्रप्रसारणैश्च अभीक्ष्णं पुनः पुनरुपपादनम् । पुनरवस्थाभेदेन क्रियान्तरमाह यस्या इति । अत्र श्येन इत्यनेन उत्क्रोशाख्यः श्येनो ग्रहणीयस्तन्त्रान्तरैकवाक्यत्वात् । प्रभूतसर्पिषेति माषमूलकयूषाभ्यामन्वेयम् । ईषदुष्णेन उदरादिषु तैलाभ्यंगेनोपाचरेदिति योजना ॥२८-२९॥

अनुवासनसाध्ये उदावर्तविबन्धे कर्तव्यमाह यस्याः पुनरिति । उदावर्तविबन्धः उदावर्तेन विड्विबन्धः । निरूहो निःस्नेहो वस्तिः । निपातयेत् मारयेत् । वीरणमुशीरम् । इक्षुबालिका 'खागडा' इति वंगे । परिव्याधः अम्बुवेतसः । भूतीकं यमानी । अनन्ता शारिवा । अर्धोदकेन पयसा उद्गमय्य क्षीरपाकपरिभाषया निःक्वाथ्य पियालादिबीजानि च कल्कीकृत्य ईषत्सैन्धवलवणमिश्रम् अनत्युष्णं कवोष्णं निरूहं दद्यात् । व्यपगतविबन्धां विबद्धमलनिःसरणेनेत्यर्थः । सुखेति कोष्णजलेन शरीरं परिषिच्येत्यर्थः । स्थैर्यकरं बलकरम् । अविदाहिनं विदादिलक्षणन्तु यथा—

"द्रव्यस्वभावादथ गौरवाद्वा चिरेण पाकं जठराग्नियोगात् ।
पित्तप्रकोपं विदहत् करोति तदन्नपानं कथितं विदाहि ॥" इति ।

तद्दोषरहितम् । मधुरकसिद्धेन मधुरवर्गकाथकल्कसिद्धेन । गर्भिण्याः वस्तिप्रयोगे विधिमाह न्युब्जामिति । न्युब्जामधोमुखीम् ॥ ३० ॥

अन्तर्मृतगर्भस्य निदानपूर्वकं लक्षणमाह यस्याः पुनरिति । उदरमत्र कुक्षिदेशः । स्तिमितमार्द्रपटावगुण्ठितत्वमिव । स्तब्धं जडीभूतम् । अस्पन्दनः गर्भस्य हृत्स्पन्दनरहितोऽङ्गस्पन्दनरहितो वा । शूलं शूलनिखातवद् वेदना । आध्यः प्रसववेदनाः । सा तु सामान्यशूलात् पृथक्त्वेन अनुभूयते । वेगप्रादु-

र्भाव: प्रसववेगजन्म। तत्र प्रतीकारक्रममाह तस्येति। गर्भशल्यस्य शल्यभूतस्याबाधकरस्य मृतगर्भस्य। जरायुप्रपतनं अमरापातनार्थं वक्ष्यमाणं संशमनं कर्म भेषजप्रयोग: इत्येके कायचिकित्सका:। मन्त्रादिकमाथर्वणविहितम् इत्येके दैवव्यपाश्रयिया:। शल्यहर्त्रा शल्यतान्त्रिकेण परिदृष्टकर्मणा बहुशोऽभ्यस्तकर्मणा। तच्चाहरणं उत्तानाया आभुग्नसक्थ्या: वस्त्राधारकोन्नमितकट्या: योनौ स्नेहम्रक्षितं क्लृप्तनखं हस्तं प्रवेश्य मृतगर्भमुपाहरेत्, एवमशक्ये यन्त्रं शस्त्रं वाऽवचार्येति क्रमेण। व्यासतो विवरणन्त्वस्य शल्यतन्त्रे द्रष्टव्यम्। परन्तु यावच्छक्यं त्वरितमेव निर्हर्तुं प्रयतेत अन्यथा प्रसूतेरपि जीवनाशंका भवेत्। यदुक्तं सुश्रुते—

"नोपेक्षेत मृतं गर्भं मुहूर्तमपि पण्डित:।
सह्याशु जननीं हन्ति निरुच्छ्वासं पशुं यथा॥" इति

गर्भनिष्कासनानन्तरं कर्तव्यमाह व्यपगतेति। आमगर्भा अपक्वगर्भा पञ्चममासादर्वागित्यर्थ:। अयमर्थ:—व्यपगतामगर्भां प्राक् मदिरादिकं यथाबलं पाययेत् दोषसंशोधनार्थं वेदनाविस्मरणार्थञ्च। ततश्च अस्नेहयवागूभिरुपाचरेद् आक्लेदविशोषणात्। ततस्तु स्नेहपानादिकं कुर्यात्। परिपक्वे तु गर्भे अपगते प्रागेव स्नेहपानादिकं कर्म कुर्यादिति विशेष: इति॥३१-३३॥

गर्भविघातकरान् भावान् सप्रतिकारान् उल्लिख्य अविकृतस्य गर्भस्य पोषणार्थं मासानुमासिकं कर्म उपदिशति परमत इति। परमत: अत:परम्। प्रथमे मासि गर्भस्य विशेषलक्षणाभावात् शंकितेति पदम्। अनुपस्कृतम् औषधं विना केवलं श्रृतं शीतं, काले भोजनकाले मात्रावद् यथोपयुक्तया मात्रया पिबेत्। सात्म्यं स्वभ्यस्तं भोजनं सायं प्रातर्द्विर्भुञ्जीत। सर्वत्रैव शीतमिति योजना। क्षीरनवनीतं क्षीरोत्थं नवनीतम्। क्षीरसर्पि: तस्मान्नवनीताज् जातं घृतम्। अष्टममासकृत्यं विवक्षु: सप्तममासभवान् विकारान् उल्लिख्य प्राक् तत्प्रतिकारक्रमं निवेदयति तत्र गर्भस्येति। तत्र सप्तमे मासि। स्त्रिय इति अबुधा इत्यर्थ:। विदाहनिदानं तत्त्वतो वक्ति किन्त्विति। गर्भोत्पीडनात् गर्भवृद्धिवशात् स्रोतोरोधात् ततो वातपित्तकफविदाहात्। कण्डूर्विशेषत: स्तनादावित्याशय:। किक्किशो नाम कण्डूयनात् मनाक्चर्मविदारणरूप: स्तनवृन्ते विकारविशेष:। तत्र कण्डूयने। अर्जकबीजं तुलसीबीजम्। सुरसस्तुलसीभेद:। पृषत् बिन्दुमान् मृगविशेष:। त्रिफलया वा विमृद्नीयादित्यन्वय:। कण्डूयनं नखाग्रैर्घर्षणं वर्जयेत्। अशक्यायां असहनीयायां कण्डवान्तु मर्दनघर्षणाभ्यां हस्ततलवस्त्रादिना परीहार: कण्डूयननिवृत्ति:। अष्टमे मासि पथ्यमाह अष्टम इति। क्षीरयवागूं क्षीरेण यवागूं पक्त्वा प्रभूतघृतयुक्तां तां काले काले तत्तद्भोजनकाले पिबेत्। भद्रकाप्यस्तु पैङ्गलावाधभयात् तन्निषिध्यति तन्नेति। पैङ्गलावाध: अक्ष्णो: कृष्णमण्डलस्य तथा केशादे: पिङ्गलवर्णता गर्भस्येत्यर्थ:। आचार्यस्तु गर्भस्य केशादे: पिङ्गलतायां न काचित् हानि:, किन्तु तथाकृते गर्भे बल-

वर्णाद्यपेतं सन्तानं स्यादिति नैतदकार्यमित्याह अस्त्वत्रेति। नवमे इति। अतः अस्माद् अनुवासनोक्तान् मधुरौषधसिद्धात् तैलात् पिचुमिश्रं तैलं तैलेन सिक्तं सुशुद्धं कार्पासतूलकं योनौ योन्या द्वितीये आवर्ते प्रणयेद् अंगुल्या अवस्थापयेत्। मासानुमासिकस्यास्य कर्मणः फलमाह यदिदमिति। तेन पूर्वोद्दिष्टेन कर्मणा। गर्भसमये दशममासं यावत्। गर्भधारणे विषये। गर्भधारिणी गर्भशय्या। काले यथासमयम् ॥ ३४ ॥

अथ नवममासिकं कर्तव्यं विवक्षुस्तस्मिन् एकदिवसातिक्रान्ते प्रसवकालं स्यादिति प्रसवोपयोगिनः सम्भारा आहर्तव्या इत्यतः प्राक् तान् निवेदयितुं सूतिकागारविधिमाह प्राक्चैवेति। नवमान् मासात् प्रागेव सूतिकागारं कारयेत्। स च कीदृग् भवितुमर्हति इत्याह अपहृतेति। यस्यां सूतिकागारः कार्यः तत्र यथा मृतप्राणिनामस्थीनि, सूक्ष्मोपलखण्डानि, भग्नमृत्पात्रादीनि च न स्युस्तथा कर्तव्यमित्यर्थः। शर्करा चूर्णोपकरणमुपल-खण्डं 'घुटिन' इति भाषा। भूमेः प्राशस्त्यमाह सुश्रुतो यथा—"ब्राह्मणक्षत्रिय-वैश्य-शूद्राणां श्वेतरक्तपीतकृष्णेषु भूमिप्रदेशेषु" इति। वैल्वानां बिल्वकाष्ठानाम् इत्यादिषु सम्बन्धविवक्षया षष्ठी। तैस्तैः काष्ठैः सूतिकागारस्य काष्ठकृत्यं कुर्यादित्यर्थः। तिन्दुकः 'गाव' इति वंगे परिचीयते। अपराण्यपि काष्ठानि तत्र प्रयोक्तुमतिदिशति यानीति। पुनरपि तस्य वैशिष्ट्यमाह तदिति। वास्तुविद्यात् हृदययोगेनेति वास्तुविद्याकुशलानामुपदेशानुसारतः इत्यर्थः। वास्तुविद्याहृदययोगेन * इति पाठे तु वास्तुविद्यातत्त्वानुसारतः इत्यर्थः। तद्वसनेति तेषामग्निस्थानादीनां वसनं चन्द्रातपाद्यर्थमित्याशयः। आलेपनं सुधादिभिः। आच्छादनं रौद्रवृष्ट्यादिप्रतिरोधिका छदित्यर्थः। अपिधानं द्वारगवाक्षादि तेषां सम्पदुपेतम्। ऋतुसुखं यस्मिन्नृतौ प्रसवो भविष्यति तत्र सुखकरम्। अग्निस्थानं,सलिलस्थानं,उदूखलस्थानं,वर्चःस्थानं, स्नानभूमिं, महानसञ्च कारयेदिति पूर्वेणान्वयः। तत्र च सूतिकागारे काश्चित् पृथक् कक्षाः स्युः, यासु पृथगग्निस्थानं, सदैव प्रयोजनाय यत्र शीतोष्णादिसलिलं स्यात् तत्स्थानम्, औषधादिपेषणार्थमुदूखलादियुक्तं स्थानं, मलमूत्रादिपरित्यागस्थानं, स्नानोपकरणसज्जितं स्थानं, पाकार्थञ्च स्थानं भवेयुरित्यर्थः। तत्र च रक्षणीयान् सम्भारानाह तत्रेति। तत्र सूतिकागारे। किलिमं देवदारु। चिरविल्वं करञ्जभेदः। कणः वन्यजीरकम्। कणिका गणिकारिका। बल्लीजं मरिचम्। द्वावश्मानौ औषधपेषणार्थम्। उदूखलमुसले औषधकुट्टनार्थम्। सौवर्णराजतौ च सूचीपिप्पलकौ सीवनसूत्रेण सह एका सुवर्णसूची एका रजतसूची च विदारिते भगे ततसीवनार्थमे। शस्त्राणि नाभिनाडीच्छेदनयोग्यानि। द्वौ च पर्यङ्कौ द्वे खट्वे एका प्रसूतेरेका च शिशोः। बिल्वमयौ बिल्वकाष्ठनिर्मितौ। अग्निसन्धुक्षणानि अग्निप्रज्वालनार्थं प्रयुक्तानि। बहुशः प्रजाताः बहुवारं प्रसवित्र्यः। प्रदक्षिणाचाराः अनुकूला-

* 'वास्तुविद्या हृदययोगेन' इति पाठोऽत्रादृतः।

चारा:। प्रतिपत्तिकुशला: प्रयोगकुशला: । अथर्ववेदविदो ब्राह्मणाश्चेति सन्निहिता: स्युरिति योजना । एतावन्तं द्रव्यसम्भारं कण्ठत उक्त्वा अनुक्तमप्यन्यदतिदिशति यच्चेति। समर्थं योग्यं मन्येत भिषगिति शेष: । ब्राह्मणा: धर्मशास्त्रकुशला:। वृद्धा: प्रजननकुशला: इत्यर्थ: ॥ ३५-३६ ॥

नवममासारम्भ एवैनां सूतिकागारं प्रवेशयेदित्याह तत इति। प्रवृत्ते नवमे मासे नवममासारम्भे । शशिनि चन्द्रमसि प्रशस्तनक्षत्रयोगमुपगते अश्विन्यादिनक्षत्रेण गृहप्रवेशे शुभेन योगं प्राप्ते। कल्याणे मङ्गलजनके। कल्याणे करणे ववविणिजादौ। मैत्रे मुहूर्ते वृषसिंहादिशुभे लग्ने। शान्तिं हुत्वा शान्त्यर्थं ब्राह्मणेन हवनं कारयित्वा स्त्रिया: स्वयं हवनं निषिद्धमिति अन्तर्भूतणिजर्थोऽयं प्रयोग:। नववेश्मप्रवेशे नान्दीमुखं कर्तव्यं, परन्तु स्त्रीणां तन्निषेधात् तत्प्रतिनिधिकं कृत्यं कारयितुमाह ब्राह्मणेभ्य इति। नान्दीमुखानि वृद्धिश्राद्धार्हाणि। अक्षतान यवान् सुमनस: पुष्पाणि इष्टानि च फलानि ब्राह्मणेभ्यो दत्त्वा। उदकपूर्वं स्थापितजलपूर्णकुम्भपूर्वं यथा स्यात्तथा आसनस्थेभ्य: प्रागुपविष्टेभ्यो ब्राह्मणेभ्य:। अभिवाद्य प्रणम्य। स्वस्ति वाचयेत् तै: ब्राह्मणै: स्वस्तिसूक्तं स्ववेदोक्तं पाठयेत्। तत: स्वस्तिवाचनान्तरं पुण्याहशब्देन ब्राह्मणैरुच्चार्यमाणेन सह गोब्राह्मणं प्रदक्षिणं समन्वावर्तमाना तं दक्षिणत: कृत्वा प्रदक्षिणं कृत्वा प्रविशेद् अन्तर्वत्नी स्त्रीति शेष: ॥३७॥

अथ आसन्नप्रसवाया: लक्षणमाह तस्यास्त्विति। प्रजननकालमभित: प्रसवकाले आगते। गात्रस्य क्लम: अनायासकृत: श्रम:। ग्लानि: शुष्कता। शैथिल्यमीषदवनतत्वम्। वक्षसो विमुक्तबन्धनत्वमिवेति गर्भस्य मातृहृदयसम्बद्धत्वं प्रागेवोक्तं यथा-"नाभ्यां ह्यस्य नाडीप्रसक्ता, सा नाड्याश्चामरा, अमरा चास्य मातु: प्रसक्ता हृदये, मातृहृदयं ह्यस्यामरामभिसंसवते शिराभि: स्यन्दमानाभि:" इति। तत्र यदा अमरा मातृहृदयसम्बद्धाभ्य: शिराभ्यो विच्युतिमाप्नोति, तदैव मातृहृदयबन्धनमुक्तिर्गर्भस्य भवतीति तात्पर्यम्। कुक्षेर्नाभेरधोभागस्य अवस्रंसनम् अधोगमनम्। योने: प्रस्रवणं गर्भाशयात् श्लेष्मास्राव:। आवीनां प्रसवकराणां सवेदनवेगानाम्। गर्भोदकस्य गर्भवेष्टनजलस्य जरायुप्रभेदात् प्रसेकश्च्युति:। यदुक्तं सुश्रुते—

"जाते हि शिथिले क्षुद्रौ मुक्ते हृदयबन्धने।
सशूले जघने नारी ज्ञेया सा तु प्रजायिनी॥" इति॥ ३८॥

तत: कर्तव्यमाह आवीति। शयनं शय्याम्। तदध्यासीनां तस्यां शय्यायां शायिताम्। पर्युपासीरन शुश्रूषेरन्। किं कृत्वेत्याह आश्वासयन्त्य: इति। उपदिष्टवदर्थाभिधायिनीभि: शास्त्रोक्तसान्त्वनाजनिकाभि: ग्राहिणीभि: प्रसूत्या: श्रुतिसुखप्रदाभि: वाग्भि: वाक्यै: आश्वासयन्त्य: इति योजना। आवीभि: संक्लिश्यमानाया: प्रसूत्या: प्रजननकालातिक्रमे कर्तव्यत्वेन कैश्चिदुपदिष्टान् उपायान् न्यक्कृत्य स्वाभिमतं दर्शयति सा चेदिति। अन्यतरत् मुसलं प्राक् सूतिकागारे संभृतयो: मुसलयोरित्यर्थ:। अन्तरान्तरा

मध्ये मध्ये। अवजृम्भस्व कृत्रिमां जृम्भामुत्पादय। चंक्रमस्व इतस्ततो भ्रम। सयुक्त्या तन्मतमपाकरोति तन्नेति। दारुणव्यायामवर्जनं कठिनपरिश्रमत्यागः गर्भिण्याः गर्भग्रहणादारभ्येत्यर्थः। प्रजननकाले स च विशेषतो वर्जनीय इत्याशयः। कस्मादित्याह प्रचलितेति। दुष्प्रतीकारतमा तदा चेत् कश्चिद् व्याधिर्भवेत् स दुःखेन प्रतिक्रियते इत्यर्थः। त्वरितप्रसवाय कांश्चिद् योगानाह अथास्यै इति। अथ नो चेत् प्रसूयेत तदनन्तरम्। चिरबिल्वः करञ्जः। धूमद्वयमुपजिघ्रेदित्यन्वयः अनेन कर्मणा तैलाभ्यंगानुमर्दनेन गर्भः अवाक् प्रतिपद्यते अवाक्शिराः भवति। गर्भो हि गर्भाशये प्रसवकालात् पूर्वं यावद् ऊर्ध्वशिरास्तिष्ठति, ततः प्रसवकाले सूतिमारुतेन परावृत्य अवाक्शिरा भवति। यदुक्तम् "गर्भस्तु खलु मातुः पृष्ठाभिमुखऊर्ध्वशिराः सङ्कुन्याङ्गान्यास्ते" इति। पुनश्च "स चोपस्थितकाले जन्मनि प्रसूतिमारुतयोगात् परिवृत्यावाक्शिरा निष्क्रामत्यपत्यपथेन" इति। स यदेति। हृदयमिति हृदयसमीपदेशमूर्ध्वोदरमित्यर्थः। वस्तिशिरःशब्देन नाभेरधो रोमान्तं यावद् बाह्याङ्गं प्रत्येति। त्वरयन्त्येनामाव्य इति मुहुर्मुहुः सवेदनो प्रसववेग आविर्भवतीत्यर्थः। प्रवाहयितुं कुन्थनेन प्रसववेगं वर्धयितुम्। अनुशिष्युरुपदिशेयुः। किमेतदनुशासनमित्याह अनागतेति। अनागतावीः सूतिवेगागमात् प्राक्। विकृतिमापन्ना प्रजा विकृता कौब्ज्यवाधिर्यादियुक्ता भवतीति शेषः। चार्थोऽयं वाशब्दः। यदुक्तं सुश्रुते—"अकालप्रवाहणात् वधिरं मूकं ..... कासश्वासोपद्रतं कुब्जं विकटं वा जनयति।" इति। दृष्टान्तेनार्थमेनं विशदयति यथेति। पुनः प्रसववेगधारणमपि अहिताय भवतीत्याह यथा चैषामिति। ततोऽनन्तरं गर्भस्य शिरोनिर्गमे बलवत्तरं गाढतरं प्रवाहेत इत्यन्वयः॥ ३६-४४॥

प्रसवानन्तरं तत्कालकर्तव्यमाह यदा चेति। अपरा 'फुल' इति वंगे 'सयासेएटा' इति प्रतीच्यतन्त्रे। प्रपन्ना निष्क्रान्ता। नाभेरुपरिष्टाद् बलवन्निष्पीड्येति—नाभितो योनिद्वारं यावत् हस्ततलेन निष्पीड्येत्यर्थः। सुनिर्धुतं निर्धुनुयादिति बलेन तस्या ऊर्ध्वकायं साधु कम्पयेदित्यर्थः। पाष्ण्यर्या श्रोणिमाकोटयेदिति सकथिनी संकोच्य पार्ष्णिभ्यां नितम्बदेशं पीडयेदित्यर्थः। अस्याः स्फिचौ नितम्बौ उपसंगृह्य पाणितलेनावगृह्य पीडयेत् बलेन मर्दयेदित्यर्थः। बल्वजः पार्वत्यस्तृणविशेषः। तदभावे उलपो ग्राह्यः। कौलत्थे कुलत्थकृते काथे। तीक्ष्णे इति सुरामण्डविशेषणम्। योगान्तरमाह तर्थेति। किलिमं देवदारुः। जीवतः खरवृषभस्येति जीवत एव खरस्य वृषभस्य च दक्षिणकर्णस्य कियान् भागः कर्तर्यादिना छित्त्वा आदेय इत्यर्थः। "गवाश्वादीनाम्" इति समाहारत्वेनैकवचनम्। बल्वजयूषादयः पूर्वोक्ताः। शतपुष्पेति। अत्र शतपुष्पादिभिः कल्कैः चतुर्गुणेन जलेन तैलं साधनीयम्। पिचुं तूलकम्। ग्राहयेत् तत्तैलसिक्तं तूलकं गर्भाशयद्वारि संस्थापयेत्। अत इति अनेन तैलेनेत्यर्थः। एतैरास्रावनैर्बल्वजयूषा-

दिभि: । फलादीनाञ्च कल्कमावाप्य आस्थापयेत् । आस्थापनफलमाह तदिति । कस्मादित्याह अपरामिति । हि यतो बहिर्मुखानि सततं बहिर्नि:-सर्त्तुमुन्मुखानि मलवातादीनि । अन्त: गर्भशय्यायाम् । सज्जन्ति सक्तां कुर्वन्ति ॥ ४५ ॥

तस्मिन्नेव अपरापातनावसरे यदि प्रसूतो गर्भ: अचेष्ट: स्यात्, तर्हि तत्क्षणकर्तव्यमुपदेष्टि तस्यास्त्विति । यद्यचेष्ट: स्यात् यदि सद्य:प्रसूतो बाल: न रोदिति, न वा हस्तपादादिकं सञ्चालयति, निरुच्छ्वासो मृतवत् शेते, तर्हि जातमात्रस्यैव कुमारस्य एतानि कर्माणि वक्ष्यमाणानि प्रतीकारार्थं कार्याणि भवन्तीति योजना । कानि तानीत्याह अश्मनोरिति । बालस्य कर्णयोर्मूले अश्मनो: प्रस्तरखण्डद्वयस्य संघट्टनं कुर्यात् । शीतेति बालन्तु पर्यायेण सुखोदकको ष्ठे शीतोदकको ष्ठे च पुन:पुनरामुखान् निमज्जयेदित्यर्थ: । कृष्णेति-कृष्णवर्णकपालिकया शूर्पेण कुल्येन च एनं बालमभिनिष्पुनीयु: बीजयेयुरित्यर्थ: । एतत् त्रिविधं कर्म प्राणानां प्रत्यागमनं यावत्, यावन् न रोदिति तावत् कुर्यादित्यर्थ: । तथा तद्वत् करणेन संक्लेशविहतान् प्रसव-कालातिक्रमात् तथा प्रथमत: शिरसोऽनिर्गमनेन विहतान् प्राणान् पुनर्लभेत इत्यन्वय: ॥ ४६ ॥

पुनर्बालार्थं कर्तव्यमाह तत इति । अचेष्टं प्रत्यागतप्राणमभिसमीक्ष्य अथवा प्रसूतं प्रकृतिभूतञ्चाभिसमीक्ष्य । मलापकर्षणार्थं सुखोष्णेनोदकेन स्नानम् उदकग्रहणञ्च शरीरगतस्य गर्भमलस्य शोधनार्थं ताभ्यामुपपादयेत्, सुखोदकेन स्नापयेत् शरीरमलांश्च परिष्कुर्यादित्यर्थ: । अथ मलशोधनाद-नन्तरं मुखाभ्यरगतश्लेष्ममलादिशोधनार्थं स्वतर्जनीमंगुलिं सम्यक्प्रक्षाल्य, तद्गतनखञ्च नखशस्त्रेण श्लक्ष्णीकृत्य, पुन: सुधौतकार्पासपिचुनावच्छाद्य, तया च बालस्य जिह्वादिकम् अवघृष्य परिष्कुर्यादित्याह अथास्येति । उपधाने शिरसि तदग्रभागे इत्यर्थ: । मुखप्रमार्जनानन्तरं तस्य शिरस्तैलसिक्तेन तूलकेनाच्छादयेदित्याह प्रथममिति । शिरस्तालु ब्रह्मतालु शिरस: कोमलांश-इत्यर्थ: । गलादिश्लेष्मशोधनार्थं सैन्धवमिश्रेण घृतेन अंगुल्यग्रप्रणिहितेन गलतालुनी प्रमार्ज्य मनागुल्लेखनेन श्लेष्मशोधनं कुर्यादित्याह ततोऽस्येति ।४७।

ततो बालस्य नाभिनाडीच्छेदविधिमाह तत: कल्पनमिति । कल्पनं छेदनं कार्यमिति शेष: । नाभिबन्धनात् नाभिनाडीसंयोगात् प्रभृति आरभ्य । हित्वा विहाय । छेदनावकाशस्य छेद्यस्थानस्य द्वयोरन्तरयो: द्वयो: प्रान्तयो: अभिज्ञानं कृत्वा चिह्नीकृत्य गृहीत्वा च सूत्रेणोपनिबध्य शनैरिति नातिगाढं नातिशिथिलमित्यर्थ: । स्वर्णादिनिर्मितेन तीक्ष्णेन अर्धधाराख्यशस्त्रेण छेदयेत् । कण्ठे चास्य बालस्य शिथिलम् अवसृजेत् बध्नीयात् नाभिबन्धनसूत्रैकदेश-मिति योजना । कर्तितनाडीभागस्य सततमूर्ध्वभागावस्थानेन रक्तसञ्चाल-नाल्पतया स्वत एव शुष्को नाभित: पतेदित्याशय: । कारणवशाच् चेन् नाभिनाडी पच्येत तर्हि कर्तव्यमाह तस्य चेदिति । नाभिरित्यनेन तत्र सन्नद्धो

नाड्यैकदेशो गृह्यते। लोध्रेति। अत्र लोध्रादीनां कल्कः पादांशः द्रवार्थं चतुर्गुणं जलं तैलसाधनार्थं ग्राह्यम्। तैलौषधानां तैलार्थं गृहीतानां लोध्रादीनाम्। असम्यङ् नाडीकल्पने दोषानाह असम्यगिति। आयामव्यायामौ बहिरन्तरायामौ धनुःस्तम्भव्याधिभेदौ। उत्तण्डिका नाभौ चर्मपुटकोत्पत्तिः तत्र च अन्त्रावयवस्य कियानंशः स्वां कलां विहाय प्रविश्य स्फीतिं जनयति, प्रपीडितश्च अन्तः प्रयाति। 'गोंड' इति वंगीयाः। पिण्डलिका तस्यैव भेदः नाभौ पिण्डाकारो ग्रन्थिर्भवति। विनाभिका तु नैगमेषगृहीतवत् मध्ये विनम्यते। विजृम्भिका च अत्यर्थं जृम्भते। अविदादिभिः लघुभिः पित्तघ्नैश्च। गुरुलाघवमभिसमीक्ष्येति आयामादौ त्वरितप्राणघातित्वात् गुरुत्वमिति विविच्य त्वरया उपक्रमेत्। उत्तण्डिकादीनां स्थायित्वात् कदाचिदेव च प्राणहरत्वान् मध्यमावस्थत्वं विविच्य नातिविलम्बेन विजृम्भिकायास्तु लघुत्वं विविच्य क्रियां कुर्वीतेत्यर्थः॥ ४८-४९॥

ततो जातकर्मरक्षाविधानादिकं वक्ति तत इति। ततो नाडीच्छेदानन्तरं यथाम्नायं वेदानुसारेण मन्त्रोपमन्त्रिते तत्तद्वेदमन्त्रमुच्चार्य संस्कृते मधुसर्पिषी असमधृते स्वपाणितलसम्मिते इत्यर्थः। अत ऊर्ध्वं त्रिचतूरात्रादनन्तरम् ततः परमेव प्रसूत्याः स्तन्यं प्रवर्त्तते यदुक्तं सुश्रुते—

"धमनीनां हृदिस्थानां विवृतत्वादनन्तरम्।
चतूरात्रात् त्रिरात्राद्वा स्त्रीणां स्तन्यं प्रवर्तते॥" इति

अतएव त्रिचतूरात्रं तस्याहाराय मधुसर्पिरेव प्रदद्यात् नान्यत् किञ्चित्। यदुक्तं सुश्रुते-"तस्मात् प्रथमेऽह्नि मधुसर्पिरनन्तामिश्रं मन्त्रपूतं त्रिकालं पाययेत्। द्वितीये लक्ष्मणासिद्धं सर्पिः तृतीये च। प्राङ् निवारितस्तन्यं स्वपाणितलसम्मितं द्विकालं पाययेत्" इति। अत्र स्वपाणितलसम्मितमिति बालस्यैव पाणितलेन यावन् मधुसर्पिर्ध्रियते इत्यर्थः। एतेनैव विधिना मन्त्रोपमन्त्रितमित्यर्थः। रक्षाविधानमाह अथात इति। शीर्षतः मस्तकसमीपे मन्त्रोपमन्त्रितं शान्तिसूक्तेनेत्युपदेशः। अन्यदपि रक्षाकर्म उपदेष्टि अथास्येति अथ शान्तिकुम्भस्थापनानन्तरम्। आदानी हस्तिघोषकः। कर्कन्धुः मरुजा वन्यवदरी। पीलुः गवास्थिखण्डम्। तण्डुलकणकणिकाः तण्डुलकणाः। तण्डुलबलिः काकादिभ्यो दद्यात्। होमश्च कुर्वीत। अनुतिरश्चीनं तिर्यग्भावेन। उत्तरदेहल्याम्। उत्तरभित्तिसमीपे। कणकणिकाः अतिक्षुद्रांशाः। एतां पोट्टलिकां बालस्य प्रसूतेश्च कण्ठे पात्रेषु जलकुम्भादिषु पर्यंकेषु खट्वापादेषु द्वारपक्ष्योः द्वारस्य पार्श्वकाष्ठयोश्च निबध्नीयात्। कणकण्टकेन्धनवानग्निरिति कणकण्टकेन्धनम् ऐंगुदं काष्ठम्। तद्भवोऽग्निरित्यर्थः। अत्र जागरणं दशाहं ब्राह्मणीनां, द्वादशाहं क्षत्रियाणाम्। तद्वेश्म यद्गृहे सन्तानं प्रसूतं तत्र, अनुपरतमविरतं दानादिकर्मभिर्विशदं निर्मलमानन्दपूर्णमिति यावत्। सततं प्रत्यहमुभयकालं सायं प्रातश्च स्वस्त्ययनार्थं मङ्गलप्राप्त्यर्थम्॥ ५०-५१॥

प्रसवानन्तरं बालार्थं कर्तव्यं निर्दिश्य सूतिकोपचारविधिं निर्दिशति सूतिकामिति। अत्र सामान्यसूतिकाशब्दस्य विशेषपरत्वात् जाङ्गलप्रदेशजाता बोद्धव्या, तासां प्रकृतितो रूक्षत्वाद् वातपित्तप्राधान्याच्च रूक्षशरीराणां स्नेहपानादुपकृतिरेव भवेन्नत्वानूपदेशजानाम्। अत एव भगवान् सुश्रुतः—"धन्वभूमिजातां सूतिकाम्' इत्यादिना तासां स्नेहपानविधानं कृतवान्। परमया शक्त्या श्रेष्ठमात्रया। सात्म्यीभावमभिसमीक्ष्येति यस्याः घृतादिषु यत् सात्म्यं तदेव तया प तव्यमित्यर्थः। न तं स्नेहमच्छं पिवेत्, पिप्पल्यादिचूर्णोपहितमेव। महता वाससा वितस्तिमात्रप्रस्थेन पञ्चषहस्तदीर्घेण च सुशुद्धेन वाससा प्राक् घृततैलेन नाभेरधः स्वभ्यज्य ततो नातिगाढं नातिशिथिलं वेष्टयित्वा बध्नीयादित्युपदेशः। स्नेहयवागूपानाभ्यां प्राक् उष्णोदकेन परिषेचयेत् अनुपाल्य आहारविहारविधिना उपचर्य। आप्याययेत् पोषयेत्॥ ५२॥

स्वस्थायाः सूतिकाया अनुपालनविधिमुपदिश्य व्याधितायास्तस्या उपक्रमविधिमुपदेष्टुं तस्या इति। अत्र व्याधिरित्यनेन स्वभावतः सुखसाध्योऽपीति बोध्यम्। गर्भपोषणजन्यधातुक्षयात् शिथिलता स्वाभाविकी भवति। पुनः प्रसववेदनया रक्तादिस्रावाच्च सा तु प्रायः शून्यशरीरा भवेदिति व्याधिवेगं सोढुं सर्वथा असमर्था स्यादिति जीवनीशक्तेरल्पत्वात् साध्येऽपि व्याधौ कृच्छ्रसाध्यता असाध्यता वा स्यादित्यर्थः। भौतिकं जान्तवम्॥ ५३॥

बालस्य नामकरणविधिमाह दशमे इति। दशमे अहनि। स्नानविधिमाह सपुत्रायाः सूतिकायाः। सर्वगन्धौषधैः—

"चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम्।
लवङ्गसहितञ्चैव सर्वगन्धं विनिर्दिशेत्॥"

इत्युक्तैर्भेषजैः। एतेषां पानीयपरिभाषया क्वाथं कृत्वा स्नायादित्युपदेशः। मङ्गलानि मङ्गलजनकद्रव्याणि तद्यथा—

"दूर्वादधिसर्पिरथोदकुम्भं धेनूं सवत्सां वृषभं सुवर्णम्।
मृद्गोमयं स्वस्तिकमक्षतानि लाजा मधु ब्राह्मणकन्यकाश्च॥
श्वेतानि पुष्पाणि तथा शमीञ्च हुताशनं चन्दनमर्कबिम्बम्॥"

इत्यादीनि द्रव्याणि। उचितामिष्टां देवतामर्चयित्वा। शिखिन इति सामान्येनोक्तेऽपि बद्धशिखा एव ग्राह्याः। मुक्तशिखस्याशुचित्वेन निषेधात् तत्परिहारार्थं शिखिन इत्याह। अव्यङ्गान् अहीनाङ्गान्। हीनाधिकाङ्गानां कर्मण्यनधिकारात्। प्राक्शिरसमुदक्शिरसं वा बालमिति शेषः। संवेश्य शाययित्वा। आभिप्रायिकम् आह्वायकम्। घोषवदादि घोषवद् वर्गस्य चतुर्थं वर्णं तदेवादि यस्य तत्। अन्त्यस्थान्तं अन्त्यस्थाः यरलवाः अन्त्या यस्य तत्। उष्मान्तम् उष्माणः शषसहा अन्ता यस्य तत्। वृद्धत्रिपुरुषान्तरम् ऊर्ध्वत्रिपुरुषनामभिन्नम्। अनवप्रतिष्ठितं पूर्वतः प्रचलितम्। नाक्षत्रिकञ्च नक्षत्रदेवताप्रयुक्तं बालस्य जन्मनक्षत्रानुसारतः यस्मिन् नाम्नि यद् आद्यमक्षरं निर्णीतं भवति तच्च ज्योतिःशास्त्राज् ज्ञेयम्॥ ५४॥

ततः कुमारस्य आयुःपरीक्षाविधानमाह कृते इति। एकैकजाः एकस्मिन्मूले एकाग्रविशिष्टाः नत्वग्रतो द्विधा भिन्ना इत्यर्थः। बहला घनाः। आतपत्रोपमम् ऊर्ध्वतो विस्तीर्णम्। व्यूढं सुविन्यस्तम्। सुश्लिष्टशङ्खसन्ध्यर्धं शङ्खसन्धेरर्धेन सुश्लिष्टमित्यर्थः। व्यञ्जनसम्पन्नम् आयुष्मतां लक्षणसम्पन्नम्। नीचैर्वृद्धौ निम्ने वर्धितौ। असंगते परस्परम-संयुक्ते। समाहितदर्शने समाहिते अप्रतिबद्धे दर्शने दृष्टिमण्डले ययोस्ते। व्यक्तभागविभागे व्यक्तः सम्यक् परिस्फुटः भागानां वर्त्मादीनां विभागो ययोस्ते। बलवती अधिकदृष्टिशक्तिसम्पन्ने। खड्ग इव ईषदवनतौ अपाङ्गौ ययोस्ते। वंशसम्पन्ना उच्चनासावंशयुक्ता। सुनिविष्टदन्तमिति उद्गतदन्तस्यैवेयं परीक्षा भवितुमर्हति अथवा दन्तवेष्टं परीक्ष्यैव दन्तसन्निवेश-मनुमीय अनुद्गतदन्तानामपि परीक्षा स्यात्। आयामेति युक्तदैर्घ्यविस्तार-सम्पन्नेत्यर्थः। महान् दूरतः श्रवणयोग्यः। अदीनः न दीनताव्यञ्जकः। व्यूढं विस्तीर्णम्। उपचितं मांसलम्। विप्रकृष्टान्तरौ महावकाशौ। अंसपातिनी अंसपर्यन्तविस्तीर्णे। वृत्तपरिपूर्णायतौ वृत्तौ युक्तदीर्घौ च। चकारादेतदेव विशेषणं लिंगवचनव्यत्यासेन सक्थिनी अंगुलयः इत्येताभ्यां सहान्वेयम। कूर्माकाराः मध्योन्नता अन्ते निम्नाश्च करजाः नखाः। सोत्सङ्गा प्रान्तोच्चाः गम्भीरा इत्यर्थः। उरस्त्रिभागहीना उरःपरिणाहतस्त्रिभागहीना। अनुपूर्वमिति पूर्वदेशादुत्तरदेशः हीन इत्यर्थः। हीनार्थोयमनुशब्दः करिशुण्डाकार इत्यर्थः। एणीपदे एण्या हरिणीविशेषस्य पदे इव मध्यस्थले ययोस्ते। आयासाः हस्तपादविक्षेपणानि ॥ ५५ ॥

बालस्य स्तन्यदानार्थं राज्ञो राजमात्रस्य वा धात्री पर्येष्टव्या भवतीति तत्परीक्षाऽपि कर्तव्या इत्यवसरसंगत्या तामाह अत इति। यौवनस्थामात्रि-शद्वर्षाम्। निभृतां विश्वस्ताम्। अव्यंगां न हीनांगीम्। अव्यसनाम् अक्ष-क्रीडादिव्यसनरहिताम्। देशजातीयां देशानुरूपाम्। कुले सद्वंशे जाताम्। अप्रमत्तां मदोन्मत्तव्याधिरहिताम्। अशायिनीमिति नित्ययोगे इन्, तेन न सततशयनशीलामित्यर्थः। अनुचारशायिनीम् न अमेध्यशायिनीम्। अनन्त्यावसायिनीं न चण्डालादिकुलजाम् यदुक्तं धर्मशास्त्रे—

"चण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा।
मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः॥" इति

कुशलोपचारां सर्वकर्मसमर्थाम्। ननु केयं स्तनसम्पदित्याह तत्रेयमिति ऊर्ध्वस्तनी करालं कुर्यात् अतिलम्बस्तनी च नासामुखं छादयित्वा मारयेद् इत्यतः तथाविधौ स्तनौ प्रतिषिध्यति नात्यूर्ध्वाविति। युक्तपिप्पलकौ नातिस्थूलौ चूचुकौ ययोस्तौ। अतएव सुखप्रपानौ यौ च बालः सुखेन पातुं शक्नोति तथाविधौ। स्तन्यसम्पदाह स्तन्यसम्पदिति। प्रकृतिगन्धवर्णरसस्पर्श यथावद् गन्धादिकं, यदुक्तं सुश्रुते—"शीतलममलं तनुशंखावभासमफेनिल-

मतन्तुमच्च" इति । उदकं व्येति अप्सु न्यस्तमेकीभावं गच्छति नोत्प्लवते न वा सीदतीत्यर्थः ॥ ५६-५८ ॥

अथ व्यापन्नस्तन्यलक्षणानि दोषभेदात् पृथङ्निर्दिशति तस्येति । विशेषाः पृथग् दोषभेदात् पृथग्लक्षणानि । विशदमपिच्छिलम् । लघु जले उत्प्लवते । कर्शनं बालस्य कार्श्यापादकम् । कुणपगन्धि शवगन्धि । उदकपात्रे अवसीदति जले क्षिप्तं तेन मिश्रीभावमगच्छदधः पततीत्यर्थः । क्षीरदोषस्य प्रतीकारानाह तेषान्त्विति । प्रतिविशेषं विशेषं विशेषं प्रति तत् केन दोषेण दुष्टमिति अभिसमीक्ष्य परीक्ष्य निर्णीयेत्यर्थः । तत्र श्लेष्मदुष्टे वमनं, पित्तदुष्टे विरेचनं, वातदुष्टे च आस्थापनमनुवासनञ्च देयानि । तद्दोषविशुद्ध्यर्थं संशमकान् योगानाह पाठेति । वत्सकफलमिन्द्रयवः । क्षीरजननान्याह क्षीरेति । क्षीरजननानि कारणवशात् स्तन्ये शुष्के स्वल्पक्षीराया वा धात्र्याः स्तन्यजननानि । वीरणादिकं सौत्रीये पञ्चाशन् महाकषाये उल्लिखितम् । स्तन्यदानविधिमाह धात्रीति । ऐन्द्री इन्द्रवारुणी । शतवीर्या शतावरी । सहस्रवीर्या महाशतावरी । अमोघा पाटला । अव्यथा मुण्डिरी । बला पीतपुष्पवाट्यालकः वाट्यपुष्पी तु श्वेतपुष्पः । अरिष्टा कटुकी । विष्वक्सेनकान्ता प्रियंगुः ॥ ५९-६२ ॥

अथ कुमारागारविधिमाह अतोऽनन्तरमिति । वास्तुविद्याकुशलः वास्तुशिल्पी । अतमस्कं गवाक्षादिबाहुल्यादित्यर्थः । निवातं प्रवातैकदेशमिति-शयनकक्षा तादृशी कार्या यथा तस्या एकदेशे गवाक्षादिना प्राचुर्येण वातगतागतिः स्यात् अपरे देशे यत्र बालस्य शयनं स्थापनीयं तत्र बाह्यवायुप्रवाहो न गच्छेत् तथा कुर्यादित्यर्थः । दृढमतिशय्येन । अपगतानि दूरीकृतानि श्वापदपश्वादीनि यस्मात्तम् । श्वापदपशवो हिंस्रा जन्तवः । दंष्ट्रिणः कुक्कुरादयः । पतंगशब्देनेह मक्षिकामशकादयो गृह्यन्ते । सुसंविभक्तेति-यत्र चागारे भक्तस्थानादिकमेकैकस्यां कक्षायां पृथक् संस्थापितं स्यादित्यर्थः । यथर्त्विति-तत्र च ऋत्वनुकूलं शयनादिकं सन्निविष्टं स्यादित्यर्थः । तत्र च बालस्य प्रवेशात् पूर्वमेव रक्षाविधानं बलिप्रदानं मंगलहोमादिकञ्च कर्तव्यं पुनश्च सुवृद्धवैद्याः अनुरक्तपरिचारकाश्च सन्निहिताः स्युरित्याह तथेति । शयनादिकमपि तस्य कीदृशं स्यादित्याह शयनेति । शयनं शय्या । आस्तरणं शय्याप्रच्छादकम् । आवरणमंगाच्छादकम् । शुचि सुपरिष्कृतम् । सुगन्धि वक्ष्यमाणधूपादिना सुगन्धितम् । मलशब्देनेह अंगमलो नेयः पुरीषादीनां पृथगुक्तेः । जन्तुः पिपीलिकामत्कुणादिकम् । असति सम्भवे केषाञ्चिद् अनाढ्यत्वेन मलादिजुष्टवस्त्रास्तरणादित्यागेन नवीनग्रहणे । तान्येव पूर्वव्यवहृतान्येव सुप्रक्षालितोपधानानि सम्यक्क्षारादिना परिष्कृतानि उपधानानि आवरणवस्त्राणि येषां तानि उपयोगं गच्छेयुः पुनर्व्यवहारयोग्यानि भवेयुः ॥ ६३-६४ ॥

वाससां धूपनान्याह धूपनानीति । चोरको ग्रन्थिपर्णः । वयःस्था

सूक्ष्मैला। गोलोमी भूतकेशी । जटिला जटामांसी । पलंकषा गुग्गुलुः । अशोकरोहिणी कटुकी। धारणीयानि द्रव्याण्याह मणय इति। मणयो मुक्तादयः। खड्गानां विषाणाभावात् तस्य नासिकोपरिसन्निविष्टात् शृंगाद् अग्रं ग्राह्यम्। तेषु यथायोगं यथासुलभञ्च एकं द्वे त्रीणि समस्तानि वा संगृह्य धारणीयानीत्युपदेशः। ऐन्द्राद्या औषधयः पञ्चाशन् महाकषायोक्तो बल्यो गणः । क्रीडनकानि क्रीडार्थं द्रव्याणि । घोषवन्ति शब्दवन्ति। विचित्राणि नानावर्णेन चित्रितानि, स च वर्णो यथा द्रवेण गलितो न स्यात् तथा कार्यः । अभिरामाणि द्रष्टुं मनोहराणि । अगुरूणि लघूनि । अतीक्ष्णाग्राणीति तीक्ष्णाग्रेण हि बाल आहतः स्यादित्यर्थः। अनास्यप्रवेशीनि यथा बालस्य मुखे प्रवेष्टुं न शक्नुयात् तथाकृतानि । यानि दृष्ट्वा बालो न त्रसेत् तथा निर्मितानीति अवित्रासनानि । क्रीडनकस्य वित्रासनप्रसंगात् केनापि प्रकारेणास्य वित्रासनं निषिध्यति नह्यस्येति । विधेयतामगच्छति अनुज्ञानुसारेण कर्म कर्तुमसम्मते । कुमारस्य वित्रासनार्थं राक्षसादीनां नामानि आह्वयता 'एहि राक्षस कुमारं खादय' इत्याकारेणेत्यर्थः। नामग्रहणं राक्षसादीनामिति योजना ॥ ६५-६८ ॥

व्याधिते तस्मिन् क्रियाक्रममाह यदीति। आतुर्यं व्याधिः। तत्प्रकृतिः तस्य बालस्य प्रकृतिः। निमित्तादिकं व्याधेः। सर्वविशेषान् व्याधेर्भेदान्। आतुराद्याश्रयान् भावान अवेक्षमाणः परीक्ष्यमाणः । मधुरादिसंकरं मधुरादिमिश्रम् । कर्म प्रवर्तयन् कुर्वन् चिकित्सितुं प्रारभेत इति योजना। एवं सात्म्याः मधुरादौ स्वभ्यस्ताः। शर्म आरोग्यम्। अचिराय तूर्णम्। तुः पक्षान्तरे। अरोगे स्वस्थावस्थायाम् अरोगवृत्तं स्वस्थवृत्तम् । देश-कालात्मगुणविपर्ययेणेति देशगुणविपर्ययो यथा उष्णप्रधाने देशे शीतोपचारः इत्यादिः । कालगुणविपर्ययो यथा शीतकाले उष्णोपचार इत्यादिः । आत्मगुणविपर्ययो यथा कफप्रकृतीनामुष्णोपचार इत्यादिः। तेन वर्तमानः तमनुसृत्येत्यर्थः। असात्म्यानि अनुपशयकरावाहारविहारौ। क्रमेण क्रमपूर्वकम्। उपयुञ्जानः अभ्यवहरन् हितानीति शेषः। सर्वाण्य-हितानि वर्जयंश्च वर्तमानः इति योजना ॥ ६९ ॥

एवं पूर्वोक्तेन प्रकारेण यौवनप्राप्तिं यावच्च धर्मार्थकौशलशिक्षाम् अनुपालयेत्। उपसंहरति इति पुत्राशिषामिति। पुत्राशिषां सन्तानप्रार्थनानां समृद्धिकरं यथायुक्तफलप्रदम् । अनसूयकः स्वकर्मसु दोषारोपं विनेत्यर्थः ॥ ७०-७१ ॥

अध्यायार्थं स्थानार्थञ्च निवेद्य समापयति तत्र श्लोकाविति। ज्ञः बुद्धिमान्। अस्य स्थानस्य शारीरस्थानमिति नामकरणे हेतुमाह शरीरमिति। सर्वं शरीरमंगप्रत्यंगादिसमन्वितम्। दैवमानुषसम्पदेति-शरीरस्य दैवसम्पत् देवादिभावाः मानुषसम्पच्च विशुद्धशुक्रशोणितोत्पन्नता ताभ्यामित्यर्थः। तथा च सर्वैर्भावैः मांसशिरास्नायुधमन्यस्थ्यादिभिः पदार्थैः चिन्त्यते

शरीरस्य सर्वावस्थाप्रकारान् तद्गतान् सूक्ष्मानुसूक्ष्मानपि पदार्थान् विश्लिष्य अस्मिन् स्थाने विविच्यते तस्मात् शारीरस्थानमित्यस्य संज्ञा भवतीत्यर्थः। सुगममन्यत् ॥ ७२-७३ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां
चरकटिप्पण्यां शारीरस्थाने जातिसूत्रीयो
नामाष्टमोऽध्यायः ।

आकृतिप्रकृतिस्थानैः यत्रोक्तोऽङ्गविनिश्चयः ।
सेयतावधिना र्णा शारीरस्थानटिप्पणी ॥

इन्द्रियस्थानम्।

प्रथमोऽध्यायः।

शारीरे स्थाने सर्वैर्भावैः शरीरचिन्ता कृता, साम्प्रतमवसरसङ्गत्या प्रतीकारविधिं निर्दिदिक्षुः कर्तव्ये प्रतीकारकर्मणि साध्यासाध्यताज्ञानमन्तरेण प्रतिचिकीर्षुर्वैद्योऽसाध्योपक्रमात् निन्दार्हो भवेत् तथा चोक्तम्—

"स्वार्थविद्यायशोहानिमुपक्रोशमसंग्रहम्।
प्राप्नुयान् नियतं वैद्यो योऽसाध्यं समुपाचरेत्॥" इति

अतश्चिकित्सोपदेशात् प्रागेव व्याधेः साध्यासाध्यताविज्ञानं वक्तव्यमिति तल्लक्षणमिन्द्रियस्थानमारिरिप्सुर्भगवान् वर्णस्वरीयं नाम प्रथमाध्यायमारभते अथातं इत्यादिना। इन्द्रस्य आत्मन इदमितीन्द्रियं, तस्य आत्मलिंगत्वसामान्येऽपि योगरूढया रिष्टलक्षणमेवात्र परिगृह्यते। तान्यत्र वर्तन्त इतीन्द्रियस्थानम्॥ १-२॥

इहेति। इह इन्द्रियस्थाने वर्णादीनि परीक्ष्याणि भवन्तीत्यन्वयः। भक्तिरिच्छा। ग्लानिः कृशता। तन्द्रा निद्रा। एष पूर्वोक्तानां वर्णस्वरादीनां कानिचिद् दूताधिकारोक्तानि शिष्टानि पुरुषमनाश्रितानि पुरुषं नाश्रयन्ति। वर्णादीनि च पुरुषसंश्रयाणि ज्ञातव्यानीति शेषः। तत्र परीक्षोपायानाह तत्र तेषु मध्ये उपदेशतः शास्त्रवाक्यानुसारात् युक्तितः अभीक्ष्णं भाविफलदर्शनेन गवेषणया च। प्रकृतितः विकृतितश्चेति न हि प्रकृतिज्ञानमन्तरेण विकृति-विज्ञानं सम्भवतीति तस्य तस्य पुरुषस्य प्राक् प्रकृतिभावं परीक्ष्य ततो विकृतिभावं परीक्षेत इत्यर्थः। ननु का नाम प्रकृतिरित्याह तत्रेति। तत्र तयोर्मध्ये जातिप्रसक्तां प्रकृतिं ब्राह्मणानामेव खलु आहारः विहारश्चैवं शूद्रा-णान्तु एवमित्यादिरूपेण परीक्षेत। कुलप्रसक्ता तु तत्तद्वंशरीत्यनुसारेण भवति। देशानुपातिनी च तत्तद्देशमनुसृत्य जांगले आनूपे च शीतप्रधाने उष्णप्रधाने च पृथगाहारविहारसंस्थानादिभावाश्रया। कालानुपातिनी च ग्रीष्मे वर्षायां शीते वा तदनुसृत्य नियमिता। वयोऽनुपातिनी तु बाल्ययौवन-वृद्धावस्थासु पृथङ् निर्दिष्टा। प्रत्यात्मनियता च प्रतिमानवं पृथक् पृथक् सम्भूता। ता एताः सर्वाः प्रकृतयः परीक्ष्या भवन्ति। प्रकृत्याः जात्यादिभेदे हेतुं दर्शयति जातिकुलेति। हि यतः एतावत्सु जात्यादिषु नियतास्ते ते भावविशेषाः अवस्थाविशेषाः भवन्ति अत एव प्रकृतिर्जात्यादिषु पृथक्-त्वेन निर्दिष्टा भवेदित्यर्थः॥ ३-६॥

प्रकृतिं निरवशेषतो निवेद्य विकृतिं व्याचष्टे विकृतिरिति। लक्षण-निमित्ता लक्षणानि शरीरगतस्वाभाविकचिह्नादीनि निमित्तानि यस्याः सा।

लक्ष्यनिमित्ता च लक्ष्यं दोषविकृतिजन्य: शरीरावस्थाविशेष: एव निमित्तं यस्या: सा। निमित्तानुरूपा च निमित्तस्य शकुनस्य अनुरूपा। शकुनन्तु अतद्रूपमपि तद्रूपशुभाशुभशंसि भवति। एषा विकृतिस्तु अशरीरगतापि दैवादिवशात् शरीरे उत्पन्ना भाविमरणादिख्यापिका भवेदित्यर्थ:। लक्ष्यनिमित्तया भाविप्राणघातिव्याध्युत्पत्ते: निमित्तस्यानुमानं भवतीत्याह लक्ष्यमिति। * लक्षणनिमित्तां व्याकरोति तत्रेति। तत्र तासु मध्ये शरीरे लक्षणानि शरीरगततत्तच्छिद्रादीनि यस्या: विकृतेर्हेतुभूतानि भवन्ति। कथं तथा भवतीत्याह लक्षणानीति। हि यत: कानिचित् शरीरोपनिबद्धानि आबहुतिथे: शरीरे उत्पन्नानि लक्षणानि, यानि कतमानिशरीरीयेऽध्याये वक्ष्यमाणानि यानि तस्मिन् तस्मिन् काले तत्र तत्र शरीरे अधिष्ठानमासाद्य शरीरे उत्पन्नानि सन्ति, तां तां विकृतिं मरणादिरूपां जनयन्ति, सैव विकृति-र्लक्षणनिमित्ता। लक्ष्यनिमित्तां विवृणोति लक्ष्येति। यथोक्तेषु निदानेषु तत्तद्दोषविकृतिजन्यशरीरविकारविशेषेषु निमित्तमुपलभ्यते अनुमीयते सा लक्ष्यनिमित्ता। निमित्तानुरूपां व्याचष्टे निमित्तेति। निमित्तार्थानुकारिणी निमित्तस्य शकुनस्य अर्थं फलं मरणादिरूपमनुकरोतीति। अनिमित्तां विना मिथ्याहारादिना उत्पन्नाम्। यां विकृतिमायुष: प्रमाणज्ञानस्य कियत्परिमाणमस्यायुर्वर्तत इति ज्ञानस्य निमित्तं हेतुमिच्छन्ति। भूय: पुनरपि आयुष: क्षयनिमित्तां क्षयसूचिकां प्रेतलिंगानुरूपां नियतमरणप्रद-लक्षणां यां विकृतिम् अन्त:प्रान्तं गतस्य नि:शेषितस्येत्यर्थ:। अन्तंगतस्येति पाठे सुगमम्। आयुषो ज्ञानार्थमुपदिशन्ति। याञ्चोपलभ्य तस्यायु: क्षयं गतं सद्य एव मरिष्यतीति सर्वभिषजो ज्ञातुमुत्सहन्ते इत्यर्थ:। पुनरपि विशिनष्टि यामिति। याञ्च विकृतिमधिकृत्य पुरुषसंश्रयाणि मुमूर्षतां लक्षणानि उपदेक्ष्यन्ते सद्योमरणीयेऽध्याये इत्यर्थ:। उद्देश: समासवाक्यम्॥ ॥ ७-१० ॥

समासेन स्थानेऽस्मिन् वक्ष्यमाणान् विषयानुद्दिश्य तान् क्रमशो निर्दिशति तत्रादित इति। तत्र उद्दिष्टेषु अर्थेषु मध्ये। आदित: प्रथमत:। वर्णविकृतौ वक्तव्यायां प्राक् प्रकृतिवर्णानाह कृष्ण इति। श्याम: गौरमिश्र: कृष्णवर्ण:। श्यामावदात: श्याममिश्रो गौरवर्ण:। अवदातो गौर:। य एव वर्णो मनुष्यशरीरे स्वभावतो दृश्यते स एव प्रकृतिवर्णो भवति। अत: कुत्रचित कोऽप्येतदतिरिक्तवर्ण: स्वभावतो भवितुमर्हति इत्यतिदिष्टप्रकृतिवर्णानाह यांश्चेति। अवेक्ष्यमाणान् सावधानतया दृश्यमानान् अपरान् उक्तातिरिक्तांश्चापि वर्णान् अनूकतस्तत्सदृशान् प्रकृतिवर्णसदृशान् विद्यात्। वा पक्षान्तरे। तज्ज्ञै: वर्णविशारदै: अन्यथा निर्दिश्यमानान् यथा केचिज् जानपदा: पीतवर्णा: इति कथ्यन्ते तानपि प्रकृतिवर्णौ विद्यादिति योजना। प्रकृतिवर्णा-नुक्त्वा विकृतिवर्णान् निर्दिशति नीलेति। श्याव: कृष्णमिश्रो हारिद्रवर्ण:।

* 'लक्ष्यमिति तावन् निमित्तानुमानम्' इत्यतिरिक्त: पाठोऽत्र परिगृहीत:।

विकृतिवर्णातिदेशमाह यांश्चेति । विकृतात् ।क प्रथमावस्थायाम् अवेक्ष्यमाणान् यानपरान् अदूरोत्पन्नान् स्वल्पदिनाभ्यन्तर एव जातान् विद्याद् वैकारिकारिकानिति शेषः । प्रागविकृतानभूतोत्पन्नान् इति पाठे तु प्राग विकृतान् पूर्ववर्णादन्यथाभूतान् अभूतोत्पन्नान् प्राग् यादृङ् नासन् तथोत्पन्नान् वर्णानित्यर्थः । श्यामादीनां प्रकृतिवर्णत्वेऽपि तेषामभूतोत्पत्तिः विकृतिरेव मन्तव्या ॥ ११-१२ ॥

अपरानपि रिष्टभूतान् वर्णविपर्ययानाह तत्र प्रकृतीति । द्वावपि वर्णौ प्रकृतिविकृतिवर्णौ मर्यादाविभक्तौ समसीमया विभक्तौ । अर्धशरीरे इत्यस्य व्याख्यानं यद्येवमिति । सव्यदक्षिणविभागेन वामदक्षिणपक्षविभागेन । पूर्वपश्चिमविभागेन पुरःपश्चाद्विभागेन । अधरोत्तरविभागेन नृसिंहाकारेण । अन्तर्बहिर्विभागेन दृश्यमानस्रोतसामन्तः बहिः त्वचश्च विभागेन अर्धशरीरत्वं ज्ञेयमित्यर्थः । मुखस्यान्तर्गतो वर्णभेदः जिह्वातालवादिषु एवं पूर्ववदर्धत्वेन वर्णभेद इत्यर्थः । मुखेऽप्यन्यत्र वर्तमाने इति पाठे तु मुखार्धे एकवर्ण अपरार्धे अपरवर्णः अन्यत्र हस्तादिष्वप्येवं ज्ञातव्य इत्यर्थः । वर्णभेद इव ग्लान्यादिभेदादपि रिष्टलक्षणमतिदिशति वर्णभेदेनेति । तथा पूर्ववदर्धभागेन पिल्लवादीनामुत्पत्तिरपि मरणाय भवेदित्याह तथेति । पिल्लवो जटुलः ॥ १३-१६ ॥

नखादिषु विकृतिवर्णानामकस्माज् जन्म बलवर्णेन्द्रियहीनेषु पुरुषेषु आयुषः क्षयलिङ्गं सूचयति इत्याह नखेति । व्याध्यादिना क्षीणस्यातुरस्य अकस्माद् अपूर्ववत् वर्णानामुत्पत्तिरप्येवमरिष्टलक्षणं जानीयादित्याह यच्चेति । अभूतपूर्वं पूर्वं यथा नासीत् तथा । अनिमित्तमकारणम् । वर्णाधिकारमुपसंहरति इतीति ॥ १७-१८ ॥

वर्णाधिकारं निर्दिश्य स्वराधिकारमारिरिप्सुस्तद्वैकृते वक्तव्ये प्रकृतिस्वरलक्षणमनिवेद्य न तत् सम्भवतीति प्रकृतिस्वरलक्षणमादावाह स्वरेति । क्रौञ्चः वलाका 'कोंचवक' इति वंगे । दुन्दुभिः ढक्का । कलविंकः चटकः । झर्झरः पटहविशेषः 'कड्का' इति गौडीयाः । तेषामनूकाः सदृशाः । विकृतस्वरानाह शुकेति । * शुककलः शुकस्येव सम्यगस्फुटः । ग्रहः रुद्धकण्ठस्येव । ग्रस्तः लुप्तवर्णपदः । गद्गदः 'तोतला' इति वंगे । अनुकीर्णः नानास्वरमिश्रः । आश्वभिनिर्वृत्तिः त्वरितमुत्पत्तिः । प्रकृतिवैकारिकाणां प्रकृतेरन्यथाभूतानाम् । स्वराणामेकत्वं यस्य प्रकृतितो नानाविधस्वरा आसन्, तस्य अनिमित्ततः एकत्वं यस्य चैकविधः स्वर आसीत, तस्य च तथैव नानाविधत्वमित्यर्थः ॥ १९-२१ ॥

अर्थमिदं पुनः शिष्यबुद्धिव्यवसायार्थं पद्येनाह भवन्ति चात्रेति । शरीरे सम्पूर्णे अर्धे वा अनिमित्ततो वैकारिकवर्णप्रादुर्भावो मरणायेत्याह

* 'शुककलग्रहग्रस्तेति' पाठोऽन्वादृतः ।

यस्येति। शरीरे सम्पूर्णे अर्धे वा अनिमित्ततो वैकारिको वर्णप्रादुर्भावः मरणायेत्याह यस्येति। अन्यथावर्णः एकार्धे प्रकृतिवर्णः अपरार्धे चान्यप्रकारः। नखदन्तेषु पुष्पाणि श्वेतवर्णानि तिलप्रमाणानि चिह्नानि पङ्कः पङ्कवदाधिक्येन मलसञ्चयः। चूर्णकं चूर्णवन् मलसञ्चयः। नीलौ कृष्णवर्णौ। हीयमानस्य बलमांसक्षीणस्य। मरणोदयः मृत्योराविर्भावो भवेदिति शेषः। अतिरोहितार्थमन्यत्॥ २६-३१।

अध्यायं समापयति तत्र श्लोक इति॥ ३१॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां
चरकटिप्पण्यामिन्द्रियस्थाने वर्णस्वरीयो नाम
प्रथमोऽध्यायः॥ १॥

द्वितीयोऽध्यायः।

वर्णस्वराश्रितान्यरिष्टलक्षणानि निवेद्य क्रमागतत्वाद् गन्धरसाश्रितानि अरिष्टलक्षणानि व्याख्यातुमध्यायान्तरमारभते अथात इत्यादिना। तत्रादौ अरिष्टानां नियतमृत्युलिंगत्वं प्रमाणयति पुष्पमिति। पुष्पेण सह अरिष्टस्य सादृश्यं प्रदर्श्य निश्चितफलप्रदत्वेन ततोऽप्यस्योत्कर्षं दर्शयति अप्येवमिति। तुः पक्षान्तरे। एवमपि सादृश्यसत्त्वेऽपि। फलेन अननुबन्धि इति यस्य पुष्पस्यानन्तरं न फलं भवति तालादिपुष्पवदित्यर्थः। पुनश्च यस्य वटादेः फलस्य पूर्वं पुष्पं न भवेत्। परन्तु जातस्य अरिष्टस्य मरणादृते नाशो नास्ति जाते अरिष्टलक्षणे ध्रुवं मरणं स्यादित्यर्थः। एवं मरणमपि विना अरिष्टं न भवेदिति अरिष्टस्य पुष्पादौत्कर्ष्यं भवतीत्यर्थः। ननु दृश्यते ह्यनेकत्र रिष्टं विना मरणम्, मरणेऽपि वा अरिष्टाभाव इति? नेत्याह मिथ्यादृष्टमिति। तथा दर्शनन्तु द्रष्टुरज्ञानतामेव व्यनक्तीत्यर्थः। अतएव अरिष्टज्ञानवर्धनार्थं ग्रन्थस्य प्रयोजनं वर्तत एवेत्याह ज्ञानेति। तुकारोऽत्र हेत्वर्थः॥ १-७॥

पुष्पितकलक्षणमाह नानेति। यस्य गात्रे इत्यूह्यम्। संवत्सरात् संवत्सराभ्यन्तर एव। एकपुष्पगन्धैरपि नरः पुष्पितो भवतीत्याह एवमिति। शुभगन्धयोगेन पुष्पितानुक्त्वा अशुभगन्धेनाप्येवं नानाऽशुभगन्धानामेकत्वेन पृथक्त्वेन वा गात्रे उपलम्भात् तेषामपि पुष्पितकसंज्ञा भवति इत्याह समासेनेति। पुनरिति पृथक्त्वेनेत्यर्थः। स्नातानुलिप्तस्य काये अनिमित्ततो अशुभगन्धोदयेन तथा अस्नातानुलिप्तस्य शुभगन्धोदयेन विपर्ययमेतं दृष्ट्वा तमपि पुष्पितं प्रमाणयति आप्लुतेति। आप्लुतानाप्लुते धौताधौते। व्यत्यासेन विपर्ययेण। अनाप्लुते शुभो गन्धः आप्लुते चाशुभो गन्ध इति व्यत्यासः। के ते शुभाशुभाः गन्धा इत्याह तद्यथेति। अमृतानीह * घृतानीत्यर्थः।

* 'माल्यं मूत्रपुरीषे वाऽमृतानि कुणपानि वा' इति पाठः।

कुणपानि शवगन्धीनि । मृतानीति पाठे तु मृतानि सद्योमृतानि कुणपानि तु गलितशरीराणि । अन्ये च ये विविधात्मानः पृथग्द्रव्यसम्भूताः मत्स्यादिगन्धाः विविधयोनयः नानाद्रव्यमेलनोद्भूताः धूपशलाकादिगन्धाः । अनेन पूर्वोक्तेन विचारणेन विष्कृतिं गताः विज्ञेयाः इति योजना ॥ ८-१४ ॥

सामान्यतो गन्धसंश्रयाणि अरिष्टानि निवेद्य सर्वेषामेव गन्धसंश्रयाणामरिष्टानामनुक्तानां संग्रहार्थं पुनरप्याह इदमिति । अतिदेशार्थम् अनुक्तविषयलक्षणं वक्ष्यामः इत्यन्वयः । किं तल्लक्षणमित्याह वियोनिरिति । वियोनिः निमित्तरहितः, विदुरः स्वमेव विद्यते इति कर्मकर्तरि क्विप्, दूरादपि ज्ञायमान इत्यर्थः । इष्टः सुरभिरनिष्टोऽसुरभिः । समां वत्सरम ॥१५-१६॥

गन्धसंश्रयमरिष्टं निवेद्य रससंश्रयानाह रसज्ञानमिति । चरमे काले आयुष्यन्तं गते । किन्तद् विकारद्वयमित्याह कश्चिदिति । कश्चिद् रस इत्यन्वयः । नन्वातुरशरीरगतरसप्रकारान् कथं भिषगास्वादयितुं क्षमः स्यादित्याह तमनेनेति । अनेन वक्ष्यमाणेन । विकृतिमागतं तं रसम् । मनुष्यस्य मनुष्यशरीरगतस्य । अनुमानप्रकारमाह मक्षिकेति । मुमूर्षतः क्षीणायुष्कस्य जन्तोर्मानवस्य कायात् मक्षिकादयः अपसर्पन्ति दूरं गच्छन्ति । यूकाः केशादिगताः मत्कुणाः । एतेन हेतुना तच्छरीरस्य विरसता अनुमेया भवतीत्यर्थः । कालपंकस्य मक्षिकाः उज्ज्वलहरिद्वर्णमक्षिकाः । अत्यन्तरसिकम् अतिस्वादुरसाधिकं कायं भृशमायान्ति गृह्णन्ति । सदैव काये तद्विधमक्षिकापतनात् तत्शरीरस्यातिस्वादुत्वमनुमेयं भवतीत्यर्थः । निगदार्थमन्यत् ॥ १७-२२ ॥

अध्यायं समापयति तत्र श्लोक इति ॥ २३ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यामिन्द्रियस्थाने पुष्पितको नाम द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ।

अधुना क्रमागतत्वात् स्पर्शसंश्रयमरिष्टलक्षणं निविवेदयिषुरध्यायान्तरमारभते अथात इत्यादिना । परिमर्शनं स्पर्शस्तदधिकृत्य प्रवृत्तोऽध्यायः परिमर्शनीयः । स्पर्शेति । प्रकृतिस्थेन पाणिनेति नात्युष्णेन नातिशीतेन, अकर्कशेन अश्लक्ष्णेन, स्वाभाविकावस्थया स्थितेन । अप्रकृतिस्थे तु भिषजो हस्ते अन्येन परिमशयेदिति पक्षान्तरमाह परिमर्शयेद्वान्येनेति । केवलं कृत्स्नम् । सततस्पन्दमानानां शरीरदेशानां मणिबन्धशंखमन्यादिप्रदेशानाम् । नित्योष्मणाम् अन्तर्मुखकक्षाप्रभृतिप्रदेशानाम् । मृदूनाम् ओष्ठनासाग्रकर्णपाल्यादीनाम् । श्लक्ष्णानां जिह्वादीनाम् । सतां मांसादीनाम् असद्भावः ह्रासो लोपो वा । भ्रंशः विश्लेषः । च्यवनमपसरणम । वीतीभावः अल्पतापादनम् ॥ १-४ ॥

सामान्यतो दृश्यमानान् विषयानुल्लिख्य अंगांगभेदतो व्यासेन परिमर्शनेन ज्ञेयमरिष्टलक्षणं निवेदयति तस्य चेदिति। ईषिका अक्षिगोलकः। पृष्ठेषिका इत्येकत्वे तु मेरुदण्ड इत्यर्थः। न चिरात् कालम् अचिरादेव। मणिकः मणिबन्धसन्धिः करप्रकोष्ठगतः। पर्शुकाः उरआच्छादकान्यस्थीनि। शंखौ नाम अपांगकर्णयोर्मध्यदेशौ। व्यस्तानि विक्षिप्तानि, स्कन्नानि स्वेदस्रावीणि। परासुः मृतः। मन्ये ग्रीवाया उभयतो वर्तमाने। प्रकीर्णाः विक्षिप्ताः स्वस्थानादित्यर्थः। जातशर्कराः उत्पन्नशर्करा। सर्वत्रैव अकस्माद् इत्यन्वेयम्। अत्युत्पिण्डिते अतिबहिर्निर्गते। अतिजिह्मे अतिवक्रे। अतिप्रस्रुतसततमश्रुस्राविते। सततोन्मिषिते मुद्रणरहिते। सततनिमिषिते सततमुद्रिते। निमेषोन्मेषातिप्रवृत्ते निमेषरोगाक्रान्त इव सततप्रचलितवर्त्मनी। अतिविमुक्तबन्धने वातहतवर्त्मरोगाक्रान्तस्येव वर्त्मसन्धिबन्धने मुक्ते। विपरीतदृष्टिके विपरीतदर्शनशीले। व्यस्तदृष्टिके व्याकुलदृष्टिके सर्वथा दर्शनरहिते वा। नाकुलान्धे दिवान्धे। कपोतान्धे निशान्धे। अलातवर्णे दीप्तांगारस्येव रक्तवर्णे। अक्षिगतलक्षणानि विना नेत्ररोगात् सहसा आविर्भूतानि ज्ञेयानि ॥ ५-११ ॥

पुनः केशादिपरिमर्शनेन परीक्षाविधिमाह अथास्येति। आयच्छेद् उत्पाटयितुमिच्छया आकर्षेत्। प्रलुच्येरन् स्वल्पायासेन उत्पाट्येरन् परन्तु आतुराश्चेत् तत्र न वेदयेयुः न जानीयुः। नखाः वीतमांसशोणिताः शीर्णाः पक्वजाम्बववर्णाः कृष्णवर्णाः। अंगुलिस्फोटनाभावोऽपि मरणाय स्यादित्याह अथास्येति। उपसंहरति भवति चात्रेति। सुगममन्यत् ॥ १३-१७ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां
चरकटिप्पण्यामिन्द्रियस्थाने परिमर्शनीयो
नाम तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः।

क्रमागतत्वाद् इन्द्रियज्ञानपरीक्षयारिष्टलक्षणं व्याचिख्यासुरध्यायान्तरमारभते अथात इत्यादिना। इन्द्रियाणामनीकं समूहमधिकृत्य प्रवृत्तोऽध्यायः इन्द्रियानीकः। विशेषवित् प्रमाणज्ञः। नन्विन्द्रियं हि नेन्द्रियग्राह्यमिति तेषां परीक्षा कथं भवेदित्याह अनुमानादिति। तत्त्वतः यथार्थतः। हि यतः इन्द्रियाणामतीन्द्रियाणामित्यर्थः। अद्धा यथार्थज्ञानं, वितथं मिथ्याज्ञानं वा अतीन्द्रियं भवतीति शेषः। अतोऽनुमानात् परीक्षेत इति योजना ॥ १-४ ॥

समासतः इन्द्रियज्ञानवैकृतमेव अरिष्टत्वेनोद्दिशति स्वस्थेभ्य इति। पुनरेकैकशो व्यासतः पृथगिन्द्रियज्ञानस्य विकृतिं लिङ्गिदिदिक्षुः दर्शनेन्द्रियविकृतिं दर्शयति घनीभूतमिति। घनीभूतमिव अवकाशरहितमिव। मेदिनी

पृथिवीमाकाशमिव अवकाशप्रायामित्यर्थः। विगीतं विपर्ययम्। अम्बरगोचर आकाशचारी। आदीप्तः सम्यक् प्रदीप्तः। नायाति दर्शनमिति योजना। स्थिरे स्रोतोरहिते तडागादौ गच्छति स्रोतस्विनि इव दृष्ट्वा वा अथवा गच्छति सलिले स्थिरे इव दृष्ट्वेत्यर्थः॥ ५-६॥

जाग्रदिति। प्रेतान् मृतान् मनुष्यान्। अद्भूतमसंभाव्यम्। प्रकृतवर्णस्थमिति न केनापि ताम्रादिदाहेन यस्य विकृतिर्नोत्पादिता तम्। सप्तमीं निशां व्रजति इति अष्टमेऽहनि तस्य मृत्युर्भवितेति ध्रुवमित्यर्थः। मेघात् हेतोः मेघावृताद् आकाशाद् अतएव असतो वस्तुगत्या अनागतान् मरीचीन् सूर्यकिरणानि अथवा अम्बरे असतोऽपि मेघान् अथवा मेघैर्विना असत्यपि मेघे विद्यतो यः पश्यतीति योजना॥ १०-१२॥

पुनर्दर्शनविभ्रमान् वक्ति मृण्मयीमिति। मृण्मयीं पात्रीमिव दीप्तिविहीनक्षुद्रमृण्मयं पात्रमिव। कृष्णाम्बरसमावृतां कृष्णवस्त्रेणाच्छादिताम्। शुद्धं मेघादिना अनाच्छादितम्। अपर्वणि अमावास्यापौर्णमासीव्यतिरिक्ते तिथौ। ग्रहं ग्रहणम्। तदन्तं तत्तिथ्यन्तम् अहोरात्राभ्यन्तर एव नश्यतीत्यर्थः। नक्तं रात्रौ। असच्चन्द्रम् * अमावस्यायां चन्द्ररहितायां रात्रौ चन्द्रं पश्यन् इत्यर्थः। अनग्नौ यत्र अग्निर्नास्ति तत्र। विलिंगान् अहेतुकान्। व्याकृतीनि विकृताकाराणि। विसंख्योपगतानि असंख्येयानि। विनिर्मितानि मनसा कल्पितानि नतु तत्त्वतो वर्तमानानि। चक्षुरिन्द्रियविषयान् अरिष्टलक्षणपरिगणितान् समासतो निर्दिश्य उपसंहरति यच्चेति। अदृश्यान् आकाशादीन् रूपरहितान् असतो वा पदार्थान्। दृश्यान् द्रष्टुं योग्यान् समीपस्थान् महतः सरूपान् भावान्। तौ उभौ अदृश्यदर्शिदृश्यदर्शिनौ। यमक्षयं यमालयम्॥ १३-१८॥

चक्षुरिन्द्रियजज्ञानपरीक्षानन्तरं श्रोत्रेन्द्रियज्ञानपरीक्षामाह अशब्दस्येति। विजानता अरिष्टज्ञेन भिषजा। शब्दान् श्रवणयोग्यान् इत्यर्थः। अंगुलिभिरिति तलाभ्यामंगुलिभ्यां वेति कैश्चित् कर्णशष्कुल्याच्छादकैर्द्रव्यैरिति बोधयितुं बहुवचनम्। ज्वालाशब्दम् अग्निज्वालाशब्दम्। प्रज्वलितेऽग्नौ यथा धुग्धुग्ध्वनिर्भवति तद्वतशब्दमित्यर्थः॥ १९-२०॥

श्रोत्रेन्द्रियज्ञानवैकृतमुपदिश्य घ्राणेन्द्रियज्ञानविकृतिमाह विपर्ययेणेति। साध्वसाधुतां सुगन्धदुर्गन्धताम्। तान् वा गन्धान् सर्वशः सर्वप्रकारेण॥ रसज्ञानविकृतिमाह यो रसान् इति। तत्त्वतः यथार्थतः मधुरं मधुरत्वेनेत्यादिरूपेणेत्यर्थः। मुखपाकात् सर्वसरमुखरोगात्। पक्वं पक्वफलवत पिपतिषुं मुमूर्षुमित्यर्थः॥ स्पर्शनेन्द्रियज्ञानविकृतिमाह उष्णानिति। उष्णादिगुणसम्पन्नान् स्पृश्यान् भावानित्यर्थः मुमूर्षुः स्पृष्ट्वा ततः तस्मादुष्णादिभावाद् अन्यत्वं मन्यते शीतं द्रव्यमुष्णमित्यादिरूपेण॥ २२-२३॥

* 'असच्चन्द्रम्' इति पाठोऽत्र गृहीतः।

समासतः इन्द्रियज्ञानविकृतिं निवेदयति अन्तरेणेति श्लोकत्रयेण। तीव्रं तपः तपस्यामन्तरेण विना विधिपूर्वकं तन्त्रोक्तविधानेन योगञ्च विना अधिकम् इन्द्रियज्ञानागोचरं विषयं पश्यन् अवबुध्यमानः। इन्द्रियाणामिति। इन्द्रियाणां चक्षुरादीनां दृष्टेः बुद्ध्या ऋते व्यतिरेकेन इन्द्रियार्थान् शब्दादीन् न पश्यति * नावगच्छति कोऽपीति शेषः। यो विपर्ययेण असत्यपि च चक्षुरादौ विद्यादिन्द्रियार्थानिति शेषः॥ स्वस्था इति ये स्वस्था अपि सुबहुशः † बहून् वारान् प्रज्ञाविपर्यासैः ज्ञानविपर्ययात् इन्द्रियार्थेषु वैकृतं पश्यति। अतिरोहितार्थमन्यत्॥ २४-२६॥

अध्यायं समापयति तत्र श्लोक इति॥ २७॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यामिन्द्रियस्थाने इन्द्रियानीको नाम चतुर्थोऽध्यायः॥ ४॥

पञ्चमोऽध्यायः।

क्रमागतमिन्द्रियपरीक्षाप्रकारं निवेद्य क्रमप्राप्ते सत्त्वादौ वक्तव्येऽपि तेषां प्रागपि अन्तरान्तरा निवेदनात् अबहुवक्तव्यत्वात् परस्तादपि अवसरवशाद् वक्ष्यतीति पूर्वरूपावस्थायामरिष्टलक्षणप्राचुर्यादादौ तद्गतमरिष्टलक्षणं वक्तुकामोऽध्यायान्तरमारभते अथात इत्यादिना। पूर्वेति। भिन्नाभिन्नानि स्वप्नादिवद् भिन्नानि न शरीरदोषजन्यानि, जृम्भादिवद् दोषजन्यानि अभिन्नानि पूर्वरूपाणि पृथक् प्रतिव्याधावुक्तानि। ज्वरोक्तानि ज्वरनिदाने पूर्वरूपत्वेनोक्तानि। यं विशन्ति रूपावस्थायामप्यनुवर्तन्ते। अतिमात्रया आधिक्येन। अर्थमेनमन्यत्राप्यतिदिशति अन्यस्येति॥ १-५॥

पूर्वरूपसमुदायानामरिष्टत्वं प्रतिपाद्य तदैकदेशस्यापि अरिष्टत्वं दर्शयति पूर्वरूपेति। ये पूर्वरूपैकदेशाः रोगान् अनुबध्नन्ति, रोगकालेऽपि वर्तन्ते, रोगैः सह मृत्युरनुबध्यते भाविफलत्वेनायाति। यद्मपूर्वरूपस्यारिष्टत्वं दर्शयति बलक्षयेति। नारीप्रसक्तस्य शुक्रक्षयकारिणः इत्यर्थः। अध्याये यानि लक्षणानि कथितानि तेषूपलब्धेषु। तत्र तत्र तत्तद्व्याधिर्भविष्यति तेन च तस्य मृत्युर्भवितेति सूच्यते इति सर्वत्र ज्ञेयम्। यद्मिणोऽभिन्नारिष्टरूपं पूर्वरूपमभिधाय भिन्नं पूर्वरूपमाह श्वभिरिति। श्वभिः कुक्कुरमारुह्येत्यर्थः। स्वप्ने यो याति तथा गच्छतीति स्वप्ने पश्यतीत्यर्थः। ज्वरस्य दारुणं पूर्वरूपमाह प्रेतैरिति। प्रेतैः मृतव्यक्तिभिः सह। न मुच्यते न च ज्वरेण त्यज्यते अविसर्गिज्वरमासाद्य प्राणान् जहातीत्यर्थः। सुघोरं ज्वरमासाद्य स जीवमवसृज्यते इति पाठे तु सुगमम्॥ ६-९॥

---

* "इन्द्रियाणामृते दृष्टेरिन्द्रियार्थान् न पश्यति। विपर्ययेण यो विद्यात्तं विद्याद्विगतायुषम्" इत्येवं श्लोकोऽत्र गृहीतः॥

† "पश्यन्ति ये सुबहुशः" इति पाठोऽत्रादृतः॥

अरिष्टलक्षणं रक्तपित्तपूर्वरूपमाह लाक्षेति । लाक्षारक्ताम्बराभं लाक्षारसरञ्जितवस्त्रमिव रक्तवर्णमित्यर्थः । अम्बरमाकाशम् । अन्तिकादिति अन्तिकमवस्थायेति ल्यब्लोपे पञ्चमी । तेनैव रक्तपित्तेन । अन्ताय नीयते म्रियते । यश्च स्वप्ने पश्यति यत् स रक्तवर्णं माल्यं वस्त्रं च परिधाय कयापि नार्या आकृष्यते इति स रक्तपित्तेनाक्रान्तो म्रियते इत्याह रक्तेति । रक्तं रक्तपित्तम् । सीदति म्रियते ॥ १०-११ ॥

असाध्यगुल्मस्य पूर्वरूपाण्याह शूलेति । शूलं कुक्षौ । आटोपः उदरे गुडगुडाशब्दः । अन्त्रकूजस्तु तत्र वंशीध्वनिवत् शब्दः । अन्तकरो ग्रहः इति आक्रमणं मरणायैव भवेदित्यर्थः । तस्यैव भिन्नं पूर्वरूपमाह लतेति । दारुणा भयंकरी । क्रूरोऽसाध्यः । असाध्यकुष्ठस्याभिन्नानि पूर्वरूपाण्याह कायेति । संस्पृष्टमीषदस्त्रादिनाहतम् । दीर्यते महान् व्रणो भवति । पुनश्च स न रोहति न पूर्यते । मृत्युः यमः कुष्ठैः कुष्ठमापाद्य तं हिनस्ति मारयति । नग्नस्य घृताभ्यक्तस्य अप्रदीप्तेऽग्नौ होमं कुर्वतस्तस्योरसि पद्मं जायते इति स्वप्ने पश्यन् कुष्ठी भूत्वा मरिष्यतीत्याह नग्नस्येति । यस्य खलु स्नातस्य चन्दनाद्यनुलिप्तगात्रस्यापि शरीरमाधुर्यात् हरिद्वर्णा मक्षिकाः सततं शरीरे उपविशन्ति, भृशं विताडिता अपि न त्यजन्ति, स प्रमेही भूत्वा मरिष्यतीत्याह स्नातेति । बध्यते युज्यते । अन्ताय स्पृश्यते मरणाय तथाक्रान्तो भवतीत्यर्थः ॥ १२-१७ ॥

दारुणोन्मादस्य पूर्वरूपाण्याह ध्यानेति । ध्यानं सदैव चिन्ताकुलत्वम् । आयासः श्रमाभावेऽपि श्रान्तिबोधः । उद्वेगः उत्कण्ठा । मोहोऽज्ञानता । अस्थानसम्भव इति सर्वत्रैवान्वीयते अहैतुक इत्यर्थः । आहारेति । लुप्तचित्तं व्याकुलमनसम् । उदर्दितमुदर्दरोगयुक्तम् । अतिपातिना प्रत्याख्येयेन । क्रोधनमिति । क्रोधनं सदैव क्रुद्धम् । सदैव यस्य मुखे क्रोधस्य त्रासस्य वा चिह्नं परिलक्ष्यते, कदाचिद्वा स्मितं विकशति, मूर्छया पिपासया च अर्दितो भवति, स उन्मत्तो भूत्वा मरिष्यतीत्याह क्रोधनमिति । नृत्यन्निति । भृशं घोरतरम् । इतः अस्मात् लोकात् परलोकं याति म्रियते इत्यर्थः ॥ १८-२१ ॥

असाध्यापस्मारस्य पूर्वरूपाण्याह असदिति । तमोऽन्धकारम् । स्वनान् शब्दान् बहून् एकाधिकान् । बहुविधान् नानाप्रकारान् । मत्तमिति । मत्तं मद्यादिसेवया अतएव नृत्यन्तं यं नरं प्रेतः कश्चिन् मृतमानवः आविश्य बलात्कृत्य हरति अपनयति । स्तभ्येते इति । प्रतिबुद्धस्यं जागरितस्यापि यस्य हन्वादिकं स्तभ्यते वदनव्यादानं ग्रीवासञ्चालनं नयनोन्मेषश्च न भवतीत्यर्थः । बहिरायामो धनुस्तम्भविशेषः । शष्कुलीरिति । स्वप्ने यादृशानि भोज्यानि भुङ्क्ते, जागरितश्चेत् तथैव प्रच्छर्दयेत्, तर्हि तस्य सा वमिः मरणाय भवेदित्यर्थः । उपसंहरति एतानीति । एषां पूर्वरूपाणाम् अनुबन्धम् उत्तरकालीनव्याध्युत्पत्तिरूपम् । फलं मृत्युरूपञ्च ॥ २२-२६ ॥

पूर्वरूपगतस्वप्नविवरणप्रसंगेन भाव्यहितसूचकान् कांश्चित् स्वप्ना-

नाचष्टे इमानिति। दारुणान् भविष्यद्विपत्सूचकत्वेन घोरान्। उपलक्षयेत् स्वप्नविवरणं श्रुत्वा फलं विचारयेद् भिषगिति शेष:। तेषां सामान्यफलमाह व्याधितानामिति। ये स्वप्ना भवन्तीति शेष:। अपिचेति पश्चान्तरसूचकेनाव्ययेन अव्याधितानामित्यूह्यं, तेषां महते क्लेशाय भवन्तीत्यर्थ:। के ते स्वप्ना: इत्याह यस्येति। उत्तमांगे शिरसि। वयांसि पक्षिण:। विलीयन्ते उपविशन्ति। तथाच वृद्धवाग्भटे "खगा वा मूर्ध्नि लीयन्ते" इति। मौण्ड्यमीयात् केशवापनं प्राप्नुयात्। गृध्रेति। अत्र आदिना मांसाशिनो मृगपक्षिणो गृह्यन्ते। रक्तआदिभिश्च परिवार्यते इत्यन्वय:। द्रविडान्धकैरिति तत्तद्देशवासिभिरनार्यैरित्यर्थ:। वंशेति। यो गच्छन् वंशादीनां संकटे अल्पावकाशे मार्गे प्रमुह्यति दिग्भ्रान्तस्ततो निष्क्रमणायासमर्थो भवतीत्यर्थ:। संसज्जति इति पाठे तु तत्राबद्धो भवति। भूमाविति। अत्रापि अपिना गच्छन् इत्याकृष्यते। पांशुधानायां वालुकापूर्णायाम्। कलुषे इति। कलुषे वर्णिते वैतरणीसलिलवन् मलीमसाच्छन्ने। तमसावृते अन्धकारावृते। शीघ्रेण स्रोतसा खरतरस्रोतसा। ह्रियते नदीवेगेन दूरं नीयते। स्नेहेति। अभ्यंग: स्नेहेन। हिरण्यलाभ: स्वर्णप्राप्ति:। बन्ध: कारागारादौ। उपानदिति। उपानद्युगनाश: पादुकाद्वयस्यापहृति:। पादचर्मण: उभयपदतलचर्मण: प्रपात: च्युति:। चन्द्रेति। अत्र चन्द्रादिदेवतान्तानां पतनं दीपचक्षुषोश्च प्रणाशो ज्ञेय:। अत्र ताराशब्देन मंगलादीनां षण्णां ग्रहाणां ग्रहणम्। नगस्य पर्वतस्य वृक्षस्य वा भेदो विदारणम्। रक्तपुष्पं वनं रक्तपुष्पाकीर्णं वनम्। भूमिरप्यत्र रक्तपुष्पाच्छादिता इति लिंगव्यत्यासेनान्वय:। अत्र रक्तपुष्पवनां भूमिमिति साधीयान् पाठ:। वृद्धवाग्भटस्तु तथैवाह। केवलभूमिप्रवेशे सर्वेषामेवारिष्टत्वं स्यात्। पापकर्मालय पापकर्मण: स्थानम्। गुहान्धकारसम्बाधमिति यत्र गुहायां अन्धकारेण विशेषतो बाधा भवति तत्र। रक्तमालीति। उच्चैर्हसन् दिग्वासा: नग्न: सन् कपियुक्त: कपिसहाय: प्रयाति इत्यन्वय:। काषायिणामिति। काषायिणां गैरिकरञ्जितवस्त्रधारिणां पुरुषाणामिति शेष:। स्वप्ने अनिष्टपुरुषदर्शनमभिधाय अनिष्टां स्त्रियमाचष्टे कृष्णेति। पापा पापकर्मशीला। अनाचारा आचारभ्रष्टा। विरागमाल्यवसना विशिष्टरक्तमाल्यवस्त्रपरिहिता। कालनिशा तद्वन् मृत्युप्रदा इत्यर्थ:॥ २८-३६॥

उक्तानां स्वप्नानां दर्शने फलश्रुतिमाह इत्येते इति। संशयं गत्वा गुरुतरेण व्याधिना आक्रान्त: सन् कश्चिदेव प्रमुच्यते अरोगो भवति। तत्रानेके एव म्रियन्ते इत्यर्थ:। नन्वेतेषां स्वप्नानां दर्शनेन सह व्याधीनां सम्बन्धाभावात् कथं ते तथा फलदा भवेयुरित्याह मनोवहानामिति। स्वप्नदर्शने हि मन एव प्रधानं कारणं भवति यदुक्तं सुश्रुते—

"पूर्वदेहानुभूतांस्तु भूतात्मा स्वपत: प्रभु:।
रजोयुक्तेन मनसा गृह्णात्यर्थान् शुभाशुभान्॥" इति

दुष्टे हि तद्वहस्रोतसि वातादिभिस्तथाविधस्वप्नदर्शनं युज्यत एव।

ननु सर्व एव स्वप्नास्तथाफलदायकाः स्युः किंस्विद् इत्याह नातीति। नातिप्रसुप्तः प्रसुप्तौ तु तमआधिक्यान्न स्वप्नदर्शनं भवति रजोयुक्ते नैव मनसा स्वप्नो भवतीति निर्देशात्। स्वप्नो हि प्राग् द्विविधः सफलोऽफलश्चेति तत्र कः सफलः को वाऽफलः इति निर्देष्टुं पुनः स्वप्नभेदानाह दृष्टमिति। दृष्टं यद्वस्तु स्वयमेव दृष्टं पुनस्तत् स्वप्ने दर्शनम्। प्रार्थितं निजप्रार्थनावशात् यथा मे हिरण्यनाभो भवतु इति पुनः पुनराकांक्षय यः स्वप्ने हिरण्यलाभं पश्येत् सः प्रार्थितः। जाग्रदवस्थायां यन्मनसा कल्पयति तस्यैव स्वप्ने दर्शनं कल्पितमित्युच्यते। भाविकं नाम निजकर्मफलजन्यभाविहिताहितजनकं स्वप्नदर्शनम्। दोषजस्तु मनोवहानामित्यादिना प्रागेव उक्तः। तेषां सफलाफलत्वं निर्दिशति तत्रेति। पुनरपि सफलाफलस्वप्नान् निर्दिशति दिवेति। तथैव चेति * भिषगफलमादिशेदिति योजना। सफलेष्वपि फलभेदमाह दृष्ट इति। न स्वपेत् शेषयामत्वादित्यर्थः। पुनश्च तत्रापवादमाह अकल्याणमिति। सुगममन्यत् ॥ ४०-४६ ॥

अध्यायं समापयति तत्र श्लोक इति ॥ ४७ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यामिन्द्रियस्थाने पूर्वरूपीयो नाम पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः।

पूर्वरूपावस्थायामरिष्टलक्षणानि निवेद्य रूपावस्थायां यानि लक्षणानि नियतप्राणहराणि भवन्ति तानि निर्दिदिक्षुरध्यायान्तरमारभते अथात इत्यादिना। तत्रादौ 'नापृष्टः कस्यचिद् ब्रूयाद् इत्यनुशासनात् शिष्यप्रश्नमुत्थापयति कतमानीति। अत्र शरीराणीत्यनेन एकदेशग्रहणात् पुरुषा एव प्रत्येतव्याः। आत्मरहिते मृतशरीरे व्याध्याद्यसम्भवाद् व्याधिमन्ति शरीराणि व्याधिताः पुरुषाः इत्यर्थः। कर्म चिकित्सा ॥ १-४ ॥

यस्येति। ऊर्ध्वमुरः वक्षसः ऊर्ध्वप्रदेशम्। रुजति व्यथते। अन्नं च्यवते वमनेनेति शेषः। स्थितं नापि वान्तम्। बलमिति। हृदि उरःप्रदेशे। शोणितातिसारे गम्भीरा हिक्का प्राणघातिनीत्याह हिक्केति। अपरैर्व्याधिभिर्दुर्बलस्य अकस्माद् विड्विबन्धोऽतीसारो वा प्राणान् हन्तीत्याह आनाह इति। अत्र आनाहातीसारौ वैकल्पिकौ वार्थोऽयं चकारः। आनाह इति। दुर्बलं व्याध्यादिभिरित्यर्थः। ज्वर इति। पौर्वाह्णिकः पूर्वाह्णे भवः यस्य प्रातरेव ज्वरवेगः स्यादित्यर्थः। शुष्ककासः यत्र निष्ठ्यूते कफो न निर्गच्छति सः। प्रेतो मृतः। ज्वर इति। †श्लेष्म कास इत्यनेन यत्र सान्द्रः शुक्लः कफः

---

* अतिदीर्घस्तथैव च' इति साधीयान् पाठोऽत्र गृहीतः।

† "ज्वरो यस्यापराह्णे तु श्लेष्मकासश्च दारुणः। बलमांसविहीनश्च यथा प्रेतस्तथैव सः॥" इत्यधिकः श्लोकोऽत्र व्याख्यातः॥

सदैव निष्प्रत्यूहते स: ॥ ५-१० ॥

यस्य मूत्रमिति । मूत्रं ग्रथितं सान्द्रमित्यर्थ: । निरुष्मण: अतिशीतकायस्य । जठरिण: उदरव्याधितस्य । श्वसत: श्वासग्रस्तस्य । यस्य प्राङ् नाभेरध: शोथो जायते, ततस्तु स हस्ते पादे च विसर्पति, तस्य स शोथो मरणाय भवतीत्याह श्वयथुरिति । यस्य च केवले पादे शोथ: स्यात्, जंघां च शुष्कां मांसपिण्डिकां शिथिलां कुर्यात्, तस्य सोऽपि शोथ: प्राणघाती स्यादित्याह श्वयथुरिति । शूनेति । अत्र गुह्येत्यनेन शेफोमुष्कगुदादयो ग्राह्या भवन्ति । उरोयुक्त इति । उरोयुक्त: वक्षसि आबद्ध: श्लेष्मा मलकफ: । हृष्टरोमेति विशेषणं मूत्रपरित्यागसमय एव ज्ञेयम् । सान्द्रमूत्रत्वेन शुक्रमिश्रमूत्रपरित्यागे एव रोमहर्षो भवितुमर्हति । त्रय इति । अत्र कोष्ठे इति सामान्येनोक्तावपि हृदि इति वशेषार्थग्रहणं साधु भवति * तस्यैव प्रधानमर्मत्वात् । सुचिरं शोकाक्रान्तस्य दुर्बलस्य ज्वरातिसारौ, पुनश्च ताभ्यां क्षीणस्य शोको मरणायस्यादित्याह ज्वरेति । पाण्डुर इति । पाण्डुर: पाण्डुरोगार्त: । डम्बरी उदरे गुडगुडाशब्दयुक्त: । कुपितोच्छ्वास: श्वासाक्रान्त: । हसुमन्येति । प्राणाश्चोरसि वर्तन्त इति ह्रस्वश्वासदर्शनेन प्राणवायुरस्य वक्षःस्थल एव वर्तते इत्यनुमीयत इत्यर्थ: ॥ ११-२० ॥

व्यायच्छत इति । व्यायच्छते विशेषेण दीर्घो भवति इवाभाति प्रसारितकरपादत्वात् । ताम्यति अत्यर्थमवसन्नो भवति । शर्म सुखम् । विरुद्धेति । विरुद्धयोनय: शीतोष्णस्निग्धरूक्षाद्यद्भवा: । ननु तथाविधा अपि केचित् दोषाणामल्पबलत्वात् साध्या अपि भवितुमर्हत्याह विरुद्धोपक्रमा इति । विरुद्धमार्गेण चिकित्स्या इत्यर्थ: । बलमिति । ग्रहण्या: दुर्बलत्वे हि भुक्तद्रव्यस्य अविकृत्या नि:सरणं भवति । आरोग्यमिति । प्रकृति: स्वभावो वातादिप्रकृतिर्वा । अतिरोहितार्थमन्यत् ॥ २१-२४ ॥

अध्यायं समापयति तत्र श्लोक इति ॥ २५ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यामिन्द्रियस्थाने कतमानिशरीरीयो नाम षष्ठोऽध्याय: ॥ ६ ॥

सप्तमोऽध्याय: ।

पुनरपि व्याधितानामव्याधितानाञ्च आयु:क्षये कानि लक्षणानि भवन्तीत्यावेदयितुमध्यायान्तरमारभते अथात इत्यादिना । दृष्ट्वामिति । यस्य अक्ष्णोरक्षिद्वये, दृष्ट्वां दृष्टिमण्डले, प्रतिच्छायामयीं कुमारिकामिति सर्वस्यैव द्रव्यस्य यत् प्रतिबिम्बं दृष्टिमण्डले भासते, तदेव कुमारिकेति कथ्यते, तामेव कुमारिकाञ्चेत् पन्नरूपां विगतरूपां प्रतिबिम्बरहितामित्यर्थ: । यदि कस्यचिद् दृष्टिमण्डले प्रतिबिम्बं नोपलभ्यते इति पिण्डार्थ: ॥ १-३ ॥

* 'कोष्ठेऽभिहिता: इति पाठोऽन्नादत: ॥

ज्योत्स्नायामिति । ज्योत्स्नादिषु शरीरस्य या छाया भूमौ पतति, सलिले आदर्शे च या दृश्यते, सा अंगेषु केषुचिद् चेद् विकृता स्यात्तर्हि स प्रेत इवेत्यर्थः । पुनश्च छायानां विकृतिमाह छिन्नेति । अत्र छिन्नेति एकधा द्विभागीकृतेत्यर्थः । छिद्राकुला ❀ आतपादिषु आलोकबिन्दुसमन्वितेत्यर्थः । हीना अंगप्रत्यंगादिषु कस्यचिच्छाया चेन्न लक्ष्यते । अधिका त्रिचतुर्हस्त-पदादियुक्ता इव । नष्टा प्रबलेऽपि आलोकपाते अस्पष्टा । तन्वी प्रकृतमानात् कृशा । द्विधा च्छिन्ना त्रिभागीकृता । विशिराः शिरसश्छायारहिता । न चेल्लक्ष्यनिमित्तजा इति लक्ष्यस्य पुरुषस्य अंगहीनत्वादिना चेच्छाया हीना अधिका वा भवेत्, न सा अरिष्टलक्षणं भवतीत्यर्थः ॥ ४-६ ॥

संस्थानेनेति । विवर्तते अन्यथा भवति न लक्ष्यानुरूपा भवतीत्यर्थः । ननु किन्नाम संस्थानादिकमित्याह संस्थानमिति । संस्थानमाकृतिरित्यर्थः । सा द्विविधा सुषमा समा, विषमा नतोन्नता इति । प्रमाणमपि त्रिविधं भवति अल्पमध्यममहद्भेदात् । एतद्द्वयं प्रतिच्छायायां भवतीति प्रतिच्छायाया-लक्षणमाह प्रतिप्रमाणेति । आदिनात्र दीपादिकं ग्राह्यम् । प्रमाणानुरूपा आकृत्यनुरूपा च प्रतिप्रमाणसंस्थाना । लक्ष्यस्य महत्वे महती, समत्वे च समा छाया प्राकृतिकी प्रतिच्छाया ज्ञेया इत्यर्थः । वर्णप्रभाश्रयापि छायाशब्द-वाच्या इत्याह छायावर्णप्रभाश्रया इति । तत्र वर्णाश्रयां छायां व्याचिख्यासु-स्तस्याः पञ्चविधत्वात् पृथग् लक्षणान्याह खादीनामिति । पाञ्चभौतिकेषु मानवशरीरेषु तत्तद्भूताधिक्यात् पञ्चविधा वर्णाः प्रादुर्भवन्ति, सैव वर्णा-श्रया छाया । अत्र छायाशब्देन कान्तिरेवाभिप्रेयते । नाभसीं छायामाह नाभसीति । नाभसी आकाशोद्भवा । सप्रभेव दीप्राभेव । वायवी तु प्रभा-शून्येत्याह रूक्षेति । शुद्धवैदुर्यविमलेति कृष्णपीतवर्णमणिविशेषस्य कान्ति-रिव निर्मलेत्यर्थः । तेषु वायवीनां गर्हितत्वं प्रतिपादयति वायवीति । सा तु रोगिषु अकस्मादुत्पन्ना तेषां विनाशाय, अरोगिणां प्राकृतिकी तु महते क्लेशाय भवतीति शेषः ॥ ७-१० ॥

वर्णाश्रयां कान्तिं निवेद्य प्रभाश्रयां विवृण्वन् प्रभां निर्वक्ति स्यादिति । वर्णाश्रया छाया तु पृथक् पाञ्चभौतिकी भवति, प्रभा त्वाग्नेयी, अत एव तस्याः प्रकृष्टरूपकर्तृत्वं वर्तते, तास्तु सप्त भवन्तीत्याह रक्तेति । श्यावा कृष्णपीत-मिश्रा । पाण्डुरा श्वेतमिश्ररक्ता । सिता श्वेता असिता कृष्णा । तासां शुभा-शुभोदयत्वं वक्ति तासामिति । विकाशिन्यः सर्वतो विच्छ्रिताः । विपुला अत्यधिकाः । अशुभोदयाः पूर्ववन् मरणाय क्लेशाय वा भवन्तीत्यर्थः । अतिदुर्लक्ष्यत्वेन छायाप्रभयोर्भेदमाह वर्णमिति । छायावर्णमाक्रामति वर्ण-प्रकाशे बाधिका एव भवति, अतएव सा आसन्ना समीपस्थेनैव जनेन लक्ष्यते न तु दूरात् । प्रभा तु वर्णस्यौज्ज्वल्यमापादयन्ती तं प्रकाशते अतः

❀ 'छिन्ना छिद्राकुला' इति पाठः स्वीकृतोऽत्र ।

प्रकृष्टाद् दूरादेव प्रकाशते लक्षिता भवति। वर्णप्रभाश्रयाभ्यां छायाभ्यामेव शुभाशुभज्ञानं भवतीत्याह नेति। न कश्चिन् मानवो अच्छायो अप्रभो वा भवतीति शेष:। तु: पक्षान्तरे। छायाप्रभाश्रया: विशेषा: वर्णप्रभाश्रयाणां छायानां विशेषा: वायव्यादिभेदात् स्निग्धरूक्षादिभेदाच्च विभिन्ना: भेदा: नृणां शुभाशुभोत्पत्तिं काले चिह्नयन्ति सूचयन्ति॥ १४-१७॥

छायाप्रतिच्छायागतमरिष्टं निगदतो निवेद्य अपराण्यपि कानिचिद्-रिष्टलक्षणानि निवेदयति कामलेति। अक्ष्णो: कामला हारिद्रवर्णता। पूर्ण श्वयथुग्रस्तमिव। गण्डयो: युक्तमांसता * सशोफता। सन्त्रास: सदैव त्रस्त-भाव:। अंगे उष्णता ज्वरेणेति शेष:। उत्थाप्येति। विकत्थन: अहं दीर्घं जीवामीति मिथ्याश्लाघान्वितोऽपीत्यर्थ:। संसृष्टा इति। प्रतिलोमानुलोमगा: इत्यनेन विरुद्धोपक्रमत्वं सूच्यते। व्यापन्ना स्वकर्मगुणहीनत्वेन दुष्टा, यद् वक्ष्यति "सा दुष्टा बहुशो भुक्तमानमेव विमुञ्चति" इति॥ १८—२०॥

उपरुद्धस्येति। रोगेण उपरुद्धस्य आक्रान्तस्य अत एव पुष्टेरभावात् कर्षितस्य कृशतामापन्नस्य बलमांसविहीनस्येत्यर्थ:। अल्पमश्नतोऽपि यस्य बहुमूत्रपुरीषं स्यात् मूत्रपुरीषाधिक्यं भवेत्। दुर्बल इति। प्राग्भुक्तात् स्वस्थावस्थायां भोजनात् बहु अधिकमन्नमित्यन्वय:। वर्धिष्णिवति। + वर्धिष्णुगुणसम्पन्नं वृंहणमित्यर्थ:। शश्वत् सदैव क्रमश:। प्रकुजतीति। कपोत इव कूजति। शिथिलं भिन्नं मलम्। ह्रस्वमिति ह्रस्वं व्याविद्धञ्च विच्छिन्नम्। प्रश्वसिति छिन्नश्वासाक्रान्तो भवतीत्यर्थ:। स्पन्दते अन्तरान्तरा ईषत् कम्पान्वितो भवतीत्यर्थ:॥ २१-२५॥

ऊर्ध्वञ्चेति। श्लेष्मणा मलकफेन अभिभूयते सदैवास्य कण्ठे सञ्चीय घुर्घुरकं करोतीत्यर्थ:। ऊर्ध्वाग्रे इति। ऊर्ध्वे उच्छ्रिते अग्रे उपरि-भागौ ययोस्ते नयने। ऊर्ध्वदृष्टिरित्यर्थ:। अनाहतकम्पने + सततकम्पन-शीले नयने इत्यन्वय:। यस्येति। उपचितौ नौ। व्यावृत्तमुखजिह्वस्य मुखं व्यादाय जिह्वाञ्च निष्कृष्य वर्तमानस्य। विच्युते अध:पतिते। कण्ट-कैराचिता जिह्वा गोजिह्वावदित्यर्थ:। शेफ इति। उत्सिक्तं उद्रिक्तम्। नि:सृतौ अतिलम्बमानौ। निचितमिति। निचितमपचितम्। सुगममन्यत्॥ २६—३१॥

अध्यायार्थं निवेदयति तत्र श्लोक इति॥ अभिजज्ञिवान् सम्यग् ज्ञातवान् अत एव कुशलो जन इति शेष:॥ ३२॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यामिन्द्रियस्थाने पन्नरूपीयो नाम सप्तमोऽध्याय:॥ ७॥

---

* 'गण्डयोर्युक्तमांसता' इति पाठ:।

+ 'वर्धिष्णुगुणसम्पन्नम्' इति पाठोऽत्रादृत:।

+ 'यस्यानारतकम्पने' इति साधीयान् पाठोऽत्रादृत:।

अष्टमोऽध्यायः।

पूर्वाध्याये प्रतिच्छायामधिकृत्य निरवशेषतोऽरिष्टलक्षणानि निवेदितानि। इह तु प्रतिच्छायागतं पुनरपि लक्षणमेकं सद्योमरणीयत्वेन पृथगाह अवाक्शिरा इति। अवाक्शिरा ऊर्ध्वपादा। विशिरा शिरसश्छायावर्जिता जिह्वा वक्रा। जटीति। पक्ष्माणि अक्षिवर्त्मगतलोमानि। दृष्टिः दर्शनशक्तिः। यस्येति। वर्त्मानि अक्षिपल्लवानि। न समायान्ति न सम्यक्तया निमीलन्ति। शुष्यतः शोषग्रस्तस्य। सीमन्तावर्तकानिति। केशगतान् सीमन्तान् 'सिंथी' इति भाषा। आवर्तकान् शिखागतकेशावर्तकवदन्यत्रापि आविर्भूतानित्यर्थः। अपूर्वान् प्रागसतः। अकृतान् कंकतिकादिना न कृतान्। एतेन पूर्वोक्तेन लक्षणचतुष्टयेन ॥ १-७ ॥

आयम्येति। आयम्य आकृष्य। यस्येति। निरभ्यंगाः तैलाभ्यंगरहिताः। उपरुद्धायुषं गतायुषम्। ग्लायत इति। ग्लायतः शुष्यतो यस्य नासिकावंशः बाह्यनासा पृथुत्वं स्थूलत्वम्। अशूनः न शोथग्रस्तः। जानता वैद्येनेति शेषः। अत्यर्थेति। विवृता स्फुटिता स्थूलरन्ध्रा इत्यर्थः। संवृता संकुचितरन्ध्रा इत्यर्थः। मुख इति। शब्दश्रवौ बाह्यकर्णौ। शुक्लेत्यादिविशेषणानि लिंगवचनव्यत्यासेन सर्वत्रैवान्वेयानि ॥ ८-१२ ॥

अस्थीति। द्विजाः दन्ताः अस्थिश्वेता मृतास्थिवत् श्वेतवर्णा। पुष्पिता दन्तमध्ये अतिशुभ्रैः विन्दुभिश्चिह्नितः। पंकसंवृताः आधिक्येन दन्तमलैरावृताः। विकृत्या येन रोगेणेत्यर्थः। स्तब्धेति। स्तब्धा अचला निश्चेतना रसज्ञानरहिता। विसर्पिणी सततसञ्चरणशीला। प्रेतजिह्वेति यस्य जिह्वा तादृशी स्यात् स मृत एव मन्तव्य इत्यर्थः। दीर्घमिति। लक्षणैतेन ऊर्ध्वश्वासाक्रान्तः स इति निवेद्यते। ताम्यति खिद्यते। हस्ताविति। मन्ये ग्रीवायाः पार्श्वयोः स्थूले पेश्यौ। क्रूरं कठिनम्। घट्टयन्निति। घट्टयन् चालयन्। वक्त्रं मुखमपास्यति व्यादृदाति। दन्तैरिति सुगमम्। दन्तानिति खादति किट्किटायते। असाम्ना उच्चैः। मुहुरिति। क्वेडन् क्रन्दमानः ॥ १३-२० ॥

यैरिति। पुरा स्वस्थावस्थायाम्। ग्लास्नोः क्षीणस्य। नेति। शिरोग्रीवं न बिभर्ति धारयितुं शक्नोति। हनू आस्यस्थं पिण्डं खाद्यं धारयितुं न शक्नुतः सन्धिद्वयस्य शैथिल्यादिति भावः। तस्य मुखे प्रविष्टमपि खाद्यं च्यवते इत्यर्थः। सहसेति। सहसा अकस्मात् तूर्णञ्च ज्वरसन्तापः उपजायते वर्धते। गोसर्ग इति। गोसर्गे ऊषायाम्। लेपज्वरोपतप्तस्य सन्ततज्वराक्रान्तस्य। नोपैति इति। आहारः कण्ठं न उपैति मुखात् प्रच्यवते इत्यर्थः। जिह्वा कण्ठमुपैति अन्तः आकृष्टा भवति। आयुष्यन्तं गते निःशेषिते। शिरः इति। प्रपाणिकौ पाणितलौ उपस्थातुरिति शेषः। मुञ्चयित्वा त्यक्त्वा परिचरस्य सहायतां विनेत्यर्थः। कृच्छ्रात् शिरो विक्षिपते अन्यत्र

नीयते ग्रीवायां श्लथबन्धनायामित्यर्थः । अत एवाह श्लथबन्धनः शिथिलसन्धिबन्धनः । अतिरोहितार्थमन्यत् ॥ २२-२६ ॥

अध्यायं समापयति तत्र श्लोक इति ॥ २७ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यामिन्द्रियस्थाने अवाक्शिरसीयो नामाष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः ।

पुनरपि कतिपयान्यरिष्टलक्षणानि निवेदयितुमध्यायान्तरमारभते अथात इत्यादिना । यस्येति । परिध्वस्ते विकृते नष्टे वा । अत्र दर्शने इति दृष्टिशक्तौ लोचने च पृथग् बोद्धव्ये । परिध्वस्तायां हि दृष्टिशक्तौ मानवो न पश्यति विकृतं वा पश्यति इत्यर्थः । निःसंज्ञ इति । व्याधिभिः संविद्धः बहुव्याधिसमाक्रान्तः । हरिता इति । अत्र शिरा इति त्वचि उन्नता एव शिराः प्रत्येतव्याः । संवृताः मलेनोपरुद्धाः तेन स्वेदानिर्गमो भवति । शरीरान्ता इति । शरीरान्ताः हस्तपादतलानि शोभन्ते पुष्टानीव दृश्यन्ते । अंसेति अंसयोः बाह्वोरुपर्यंशयोः अभितापः पीडा । आनाहो विड्विबन्धः । कांश्चिद् दुश्चिकित्स्यान् व्याधीनाह वातेति । रक्ती रक्तपित्ती । मन्देषु स्वल्पबलेषु तान् बलमांसविहीनान् । विरेचनेनेति । पुनराध्माति पुनरुदराध्मापनेन आनाहग्रस्तो भवति । पेयमिति । उरस इत्यनेन उरोगतान्नवहस्रोतसः । तस्य विबन्धः शुष्कत्वादित्यर्थः । स्वरस्येति । अयुक्त्या अनियमेन अकस्माद्वा । ऊर्वेति । गतोष्माणं स्वाभाविकोष्मरहितम् । वंक्षणे नाभेरध उभयपार्श्वे । शर्म सुखम् ॥ १-१३ ॥

अपस्वरमिति । अपस्वरं विकृतस्वरम् । अशब्दस्य अनुद्भूतशब्दस्य । यमिति । दुर्बलं साकल्येन बलहीनं पार्श्वादिपरिवर्तनासामर्थ्यादनुमेयम् । सहसा दोषप्रशमनात् प्रागेवेत्यवधेयम् । जीवितं संशयप्राप्तमिति स्थास्यति नवेति संशयः । तत्र कस्य जीवितं स्थास्यति कस्य वा नेत्याह अथेति । अथ एवमवस्थाया अनन्तरम् । प्रणिपातत इति अनुरोधातिशय्यं ज्ञापयितुमित्यर्थः । तर्हि तस्य दोषनिर्हरणार्थं भेषजं न दत्त्वा बृंहणार्थं मांसरसादिकमभ्यवहर्तुमुपदिशेदित्याह रसेनेति । एवं मासेन अस्य चेद् बललाभो न भवेत्, तर्हि मरिष्यतीति जानीयादित्याह मासेनेति । निष्ठ्यूतमिति । निष्ठ्यूतं कासवेगेन मुखान्निसृतो मलकफः । आयुषोऽन्तं आयुःसीमा । निष्ठ्यूते इति । पयः प्राप्य जले निक्षिप्तं सीदेन् निमज्जेत् ॥ १४-१६ ॥

साम्प्रतं शंखकं नाम नियतासाध्यं व्याधिमाह पित्तमिति । उष्मानुगं उष्णेन निदानेन वर्धितम् । अत्र पित्तमिति वातकफसहचरितमेव ग्राह्यं तन्त्रान्तरदर्शनात् । यदुक्तं सुश्रुते—

"शंखाश्रितो वायुरुदीर्णवेगः कृतानुयात्रः कफपित्तरक्तैः ।
... .
व्याधिं वदन्त्युद्धतमृत्युकल्पं भिषक्सहस्रैरपि दुर्निवारम् ॥" इति शालाक्यतन्त्रे च—

"चीयते तु यदा पित्तं शंखयोरनिलाचितम् ।
निरुणद्धि ततो मर्म परिपूरितमुल्वणम् ।
... ...
शंखको नाम शिरसि व्याधिरेष सुदारुणः ।
तृष्णामूर्छाज्वरकरस्त्रिरात्रात् परमन्तकृत् ॥" इति ।

सफेनमिति । कुक्षिः नाभेरधः । बलेति । तीव्रः अत्यधिकः । त्रीन् पक्षान् अतिक्रम्येति ल्यब्लोपे पञ्चमी ॥ २०–२२ ॥

अथ अध्यायसमाप्तिमुखेन अरिष्टलक्षणानां सर्वथा ज्ञेयत्वं निवेदयति तत्र श्लोकाविति । मनुष्याणां प्रत्युपस्थिते मरणे एतानि विज्ञानानि भवन्ति । अन्यानि चैवंविधानि अत्रानुल्लिखितानि संपश्येत् । तुः पक्षान्तरे विनशिष्यन्तं मानवं यानि सर्वाणि लक्षणानि विशन्ति, तानि सर्वाणि न लक्ष्यन्ते सदैव भिषग्भिरिति शेषः । तस्मात् सर्वशः उक्तान्यनुक्तानि सर्वाणि लक्षणानि बोध्यानि भिषग्भिरिति शेषः ॥ २३–२४ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यामिन्द्रियस्थाने यस्यश्यावीयो नाम नवमोऽध्यायः ॥ ६ ॥

दशमोऽध्यायः ॥

व्यवहितमृत्युज्ञापकान्यरिष्टान्यभिधाय सद्योमरणीयानि अरिष्टानि निवेदयितुमध्यायन्तरमारभते अथात इत्यादिना । सप्तरात्रत्रिरात्राभ्यन्तरमेव मृत्युसूचकानि लिंगानि प्रागेव व्याख्यातानि इत्यत्र सद्यःशब्देन अहोरात्राभ्यन्तररूपोऽर्थो बोद्धव्यः । तथाच प्राक् तत्र तत्र "त्र्यहमेतेन जीवन्ति लक्षणेनातुरा नराः" इति पुनः "स रोगः शंखको नाम त्रिरात्राद्धन्ति जीवितम्" इत्याद्यतीतावेक्षणात । "केचित् सद्यःशब्देनेह सप्तरात्रमिच्छन्ति अपरे त्रिरात्रम्" इत्यादि कस्यचिदाचार्यस्य व्याख्यानं साधु संगच्छते नवेति सुधिय एव प्रमाणम् । सद्य इति । ननु प्राणान् तितिक्षतः इत्यत्र इच्छायां सन् प्रयोगः कथं सम्भवति, न खलु केचित् प्राणान् त्यक्तुमिच्छन्ति इति चेदुच्यते । अत्र मरणाशंकायां सन् भवितुमर्हति, अथवात्र इच्छायाः विवक्षा कर्तव्येति न दोषः । संसृष्टः आक्रान्तः । कानि तानीत्याह वातेति । हृदि इति उरःकोष्ठे । पिण्डिके इति । पिण्डिके जंघामध्यगतमांसपिण्डद्वयम् । वायुः शरीरे विचरन् श्वासं संजनयन्नित्यर्थः । जिह्वीकृत्य वक्रीकृत्य । भ्रुवाविति । स्थानच्युते स्थानभ्रष्टे लम्बिते इत्यर्थः । क्षीणेति ।

वायुरूर्ध्वगतिश्चरन् इति ऊर्ध्वश्वासमापादयन् इत्यर्थ:। यद्यपि मन्याशब्दो ग्रीवार्थकस्तथाप्यत्र तदंगत्वात् तद्गतबृहत्पेशीद्वयस्यात्र परिग्रहादुभे मन्ये इत्याह। ते च प्रकृत्या जत्रोरुभयपार्श्वत: प्रसृते ईषत्तिर्यग्भावेन कर्णपृष्ठयो: शिर:कपालसंश्लिष्टे वर्तते। ते च श्वासवेगेन समे समान्तराले इव भवत इत्याह उभे मन्ये इति॥ १-७॥

श्वासरूपो वायु: गुदं नाभिं वङ्क्षणौ च श्वासवेगेनाकर्षन् कृशस्य मरणाय भवतीत्याह अन्तरेणेति। गुदमन्तरेण गच्छन् श्वासवेगेनोर्ध्वमुत्क्षिपन्निवेत्यर्थ:। वितत्येति। पर्शूकाग्राणि वङ्क्षआवरकाणामस्थनामग्राणि वितत्य श्वासवेगेन प्रसारितानीव कृत्वा आयताक्षस्य अतिप्रसारितनेत्रस्य। मारुतो महाश्वासरूप:। यदा हि श्वासवेगेन गुदमुर:प्रदेशं च युगपद् आकर्षतीव लक्ष्यते तदा तूर्णं प्राणान् जहाति इत्याह हृदयमिति। पुनस्तथैव गुदवंक्षणौ चाकर्षन् श्वासरूपेण वायु: जन्तो: प्राणानपहरतीत्याह वंक्षणमिति। नाभिमिति। वस्तिशिरो मूत्राधारस्य उपरिभाग: रोमान्तान् नाभिं यावत् स्थानम्। तत् नाभिञ्च विबध्य* अन्तराकुष्येव मूत्रं पुरीषञ्च विबध्य रुद्धा। भिद्येते इति। भिन्नौ भवत: इतिवत् पीड्येते भिन्नं पुरीषमतीसाराक्रान्तमिव। सर्वांगवातरोगाक्रान्त: तृष्णातिसारोपद्रुत: प्राणान् जहातीत्याह आप्लुतमिति। केवलं कृत्स्नम्। आप्लुतमाक्रान्तम्। शरीरमिति। शोफितं शूनम्। आमाशयेति। परिकर्तिका कर्तनपत्पीडा। आमाशयोऽत्र आमखाद्यस्य सर्वानेवाशयान् नाभिस्तनान्तरावस्थितान् हृदयफुफ्फुसामाशयादीन् परिगृह्णाति। पक्वेति। पक्वाशयपदेन क्षुद्रान्त्रादारभ्य गुदं यावत् सर्वाण्येव यन्त्राणि अवबुध्यन्ते। गुदग्रह: उत्तराधरगुदयोरकर्मण्यता तेन कथमपि मलनिष्काशनं न सम्भाव्यं भवेत्॥ ८-१७॥

पक्वाशयमिति। कण्ठे घुर्घुरकं कृत्वेति महाश्वासमुत्पाद्येत्यर्थ:। दन्ता इति। कर्दमदिग्धाभा: इति दन्दमलातिशय्यात्। चूर्णवत् श्वेतरजसा आकीर्णमिवाभातीत्याह चूर्णकसंयुतमिति। † सिप्रायन्ते इति-सिप्रश्चन्द्रस्तद्वदतिशैत्यादाचरन्ति हिमकरसदृशानि गात्राणि शीतलीभवन्तीत्यर्थ:। अत्र "सिप्रानदी तद्वत् स्वेदातिप्रादुर्भावादाचरन्तीति सिप्रायन्ते किंवा सिप्रायन्ते शिथिलीभवन्ति। अनेकार्थत्वाद् धातूनाम्" इति केषाञ्चिद् व्याख्यानं साधु संगच्छते नवेति सुधिय एव प्रमाणम्। तृष्णेति। शक्रद्वेदेन अतीसारेण। अतिरोहितार्थमन्यत्॥ १८-२०॥

अध्यायं समापयति तत्र श्लोक इति॥ २१॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यामिन्द्रियस्थाने सद्योमरणीयो नाम दशमोऽध्याय:॥ १०॥

---

* 'विबध्य जनयन्' इति पाठोऽत्रादृत:।

† 'मुखं चूर्णकसंयुतम्' इति पाठोऽत्रादृत:।

एकादशोऽध्यायः ॥

सद्योमरणीयमिन्द्रियं व्याख्याय अवसरवशात् कालान्तरमरणीयानि अरिष्टानि व्याख्यातुकामोऽध्यायान्तरमारभते अथात इत्यादिना। तत्र प्राक् वर्षाभ्यन्तरमेव मृत्युज्ञापकान्यरिष्टान्याह अणुज्योतिरिति। समान्तरे वर्षाभ्यन्तरमेव परलोकं गन्ता यास्यन् जनः अणुज्योतिः हीनप्रभः अनेकाग्रः चञ्चलमानसः दुश्छायो दुर्वर्णः दुर्मनाः दुर्बलचित्तश्च सन् सदा रतिं न लभते। बलिमिति। बलिभुजः काकादयः। प्रणीतं भूतबलिविधिना भूम्यादौ प्रदत्तं बलिमन्नादिपिण्डम्। संवत्सरेणेति क्रियासमाप्तौ तृतीया। सप्तर्षीणामिति। सप्तर्षयः उत्तरे दिशि ध्रुवनक्षत्रसमीपस्थानि सप्त नक्षत्राणि। अरुन्धती तेषु एकस्मिन् वशिष्ठनक्षत्रे प्रायः संयुक्तं क्षुद्रतमं नक्षत्रम्। विकृत्येति। विकृत्या अस्वाभाविकेन रूपेण। विनिमित्तमकारणम्। शोभां शरीरकान्तिम्। उपचयं शरीरवृद्धिम्। अतः शोभादेः ॥ १–६ ॥

षण्मासाभ्यन्तरे मृत्योर्ज्ञापकान्यरिष्टान्याह भक्तिरिति। भक्तिरिच्छा। त्यागो दानम्। अहेतुकमनिमित्तम्। निवर्तन्ते ह्रस्वतां गच्छन्ति। धमनीनामिति। अत्र शिरार्थंकोऽयं धमनीशब्दः। लेखाभिरिति। चन्द्रवक्राभिः बालचन्द्रवद्वक्राभिः। लेखाभिः वह्नीभिः रेखाभिः ॥ ७–९ ॥

मासेनैकेन यमलोकं गन्तॄणामरिष्टान्याह शरीरेति। स्वजनद्वेष्टा यः स्त्रीपुत्रादिकमात्मीयं द्वेष्टि सः। हस्तपादमिति। विना देहादिति उभयत्रान्वीयते। तेन हस्तादौ शुष्के तद्व्यतिरिक्तदेहस्य शूनता अथवा तयोः शोफे इतरांगस्य शुष्कता चेद् भवेत्यर्थः। शूयेते ते उभे शूने भवतः इत्यर्थः ॥ १०–१२ ॥

एवं कालान्तरमृत्युलिंगान्यभिधाय कानिचित् नियतमृत्युलक्षणान्याह ललाटे इति। वस्तिशीर्षे लोमान्तान्नाभिपर्यन्ते स्थाने। राजिः लेखा। बालेन्दुकुटिला शुक्लद्वितीयाचन्द्रवद्वक्रा। प्रबालेति। प्रबालगुटिकाभासा उज्ज्वलरक्तवर्णेत्यर्थः। उत्पद्यबाह्यतो निर्गत्य विनश्यन्ति अन्तःप्रविशन्ति विलीयन्ते इत्यर्थः। न चिरादिति सप्ताहाभ्यन्तर एवेत्यर्थः। ग्रीवेति। ग्रीवावग्रहः मन्यास्तम्भः। ब्रध्नो नाम व्याधिस्तन्त्रान्तरोक्तलक्षणः तद्यथा—

"अत्यभिष्यन्दिगुर्वन्नसेवनान्निचयं गतः।
करोति ग्रन्थिवच्छोथं दोषो वंक्षणसन्धिषु ॥
ज्वरशूलांगदाहाढ्यं तं ब्रध्नमिति निर्दिशेत्॥" इति

वंक्षणसन्धिष्विति सर्वेषां दक्षिणे वंक्षणसन्धौ इति ज्ञातव्यम्। बहुवचनन्तु बहुपुरुषसंश्रयत्वात्। एकपुरुषीयवामवंक्षणसन्धावपि परिग्रहीतव्ये द्विवचनमेव साधु स्यात्। तथैव बहुशो दृष्टचरत्वात् व्याधिरयं कोष्ठे उण्डुकपुच्छे दोषसञ्चयादेव भवतीति दक्षिणवंक्षण एव तस्य स्थानं निर्दिशन्ति कुशलाः। तस्य आस्यस्य गलस्य च पाकः। तेषु चेद् ग्रीवामर्दादिलक्षणं

स्यात् तर्हि तं पुरुषं पक्वं पक्वफलवत् पिपतिषुं मुमूर्षुमित्यर्थः। संभ्रम इति। अस्थ्नामतिभेदः अस्थिभिन्नं भवतीतिवद्वेदना। कालपाशपरीतस्य त्वरितं यमलोकं गमिष्यतः। प्रमुह्येति। प्रमुह्य मोहग्रस्तः सन् लुञ्चयेत् स्वकेशानुत् पाटयितुं प्रयतेत। परान्* परकीयकेशानपि गृह्णाति उत्पाटयितुमना इत्यर्थः। स्वस्थवदाहारवचनः तस्य आहारे वचने च मोहो न दृश्यते इत्यर्थः।१३-१७।

समीपे इति। मृगयते संवीक्षते "संवीक्षणं मार्गणं मृगयणं मृगणा मृगः" इति कोषस्मरणात्। अनिमिषेक्षणः ऊर्ध्वाक्षश्च कालान् कांश्चित् कालान् व्याप्य स्थित्वेति शेषः। स्मयते ईषद्धास्यं करोति पुनश्च किं करोतीत्याह शयनादिति। शयनात् शय्यतलादिदेशात्। अंगात् स्वकीयादित्यर्थः। काष्ठात् काष्ठनिर्मिताद् गृहद्रव्यात् कुड्यात् भित्तितः किञ्चिदसत् इत्यनेन न तस्य किमपि द्रव्यं नष्टमपहृतं वेति बोद्धव्यम्। मृगयते नष्टद्रव्यवदनुसन्धत्ते। कथमेवं करोतीत्याह मुह्यन् कालप्रेरितत्वात् मोहाविष्टः सन्नित्यर्थः। अहास्येति। अहास्यहासी हास्यकारणाभावेऽपि हसनशीलः। एवमोष्ठावलेहनादावपि कारणाभावो ज्ञेयः। अत्रैव हेतुगर्भं विशेषणमाह संमुह्यन् इति। शीतेति पादादिषु अन्वीयते। पुनरपि महामोहग्रस्तस्य क्रियान्तरमाह आह्वयन् इति। समीपस्थं समीपे वर्तमानं स्वजनं पित्रादिकमात्मीयमनात्मीयं वा जनमाह्वयन् दूरस्थवद् उच्चैर्नामग्राहमाकारयन् तं पश्यन् समीपवर्तित्वात् अपि न पश्यति न बुद्ध्या अध्यवस्यति मे माता समीपे वर्तत एवेति ॥ १८-२१ ॥

अयोगमिति। खादीनामाकाशादिसम्भूतानां श्रोत्रादीन्द्रियाणामित्यर्थः। अयोगं विषयग्रहणासामर्थ्यम्। अतियोगं विषयातिरिक्तग्रहणम्। अतिप्रवृद्धयेति। शरीरी आत्मा। वर्णेति हीयते पूर्वापेक्षया अल्पीभवति। निद्रानित्या चिरस्थायिनी भवति न वा भवति। असुक्षये मृत्युकाले ॥ २२-२४ ॥

भिषगिति। पानान्नद्विषस्तु भिषग्भिः पथ्यत्वेन निर्दिष्टयोः पानान्नयोर्द्वेष्टारः। समवर्तिनः यमस्य वशगाः बोद्धव्याः ते मृता एव ज्ञेया इत्यर्थः। एतेषु भिषगादिद्वेष्टृषु रोगः क्रमते वर्धते भेषजञ्च प्रतिहन्यते अकिञ्चित्करं भवति। साम्प्रतं मुमूर्षुरोगिसकाशाद् वित्तादिग्रहणप्रयासरूपा अमानुषिकभिषग्व्यापाराः प्रतिषिध्यन्ते नैषामिति। एषां मुमूर्षूणां येन केनचिदरिष्टलक्षणेन अवबुद्धानामित्यर्थः। तेभ्यः अन्नपानादिग्रहणनिषेधस्य हीदमेव तात्पर्यम्। तेषु तेषु क्रियाणाम् असाफल्यात् न ततश्चिकित्सानिष्क्रयणार्थं किञ्चिदपि अन्नपानादिकमपि नादेयं वित्तस्य तु का कथा इति। अत्र तु केषाञ्चिद् वृद्धानां परमगुरूणां टीकाकृतां "प्रायेण तदन्नस्यारिष्टत्वात्" इति† तथा "भिषगादिद्वेषिणां मृतप्रायत्वेन अन्नजलयोरशुद्धत्वात्" इति‡ पुनः "तेषां पापित्वात्" इति च § व्याख्यानं तेषां प्रागुक्तसूत्रविस्मृतिं स्मारयति।

* "परान् गृह्णात्यतीव च" इति पाठः।

† आचार्यः चक्रपाणिदत्तः। ‡ परमाचार्यो गङ्गाधरः। § चरकोपस्कारः।

यदुक्तमत्रैव सौत्रीये प्रथमेऽध्याये—

"वरमाशीविषविषं क्वथितं ताम्रमेव वा।
पीतमत्यग्निसन्तप्ता भक्षिता वाप्ययोगुडाः॥
न तु श्रुतवतां वेशं बिभ्रता शरणागतात्।
गृहीतमन्नपानं वा वित्तं वा रोगपीडितात्॥" इति ॥२५-२६॥

लक्ष्यनिमित्तां विकृतिमुपसंजिहीर्षुस्तत्र प्राधान्येन आतुरस्य स्वस्थस्य वा आयुर्भिषजा सदैव परीक्ष्यं भवति इत्यायुःपरीक्षाफलं निवेदयति पादाः इति। साधकैर्गुणैः पूर्वोक्तैः षोडशगुणैः सम्पन्ना अपि चत्वारः पादाः भिषग्द्रव्योपस्थातृरोगिणः समेताः सम्मिलिताः अपि गतायुषः सम्बन्धे ते व्यर्था भवन्ति न च तत्र चिकित्साफलं भवतीत्यर्थः। चिकित्साफलन्तु आरोग्यम्, अत आयुरारोग्ययोश्च द्रव्यगुणयोरिव नित्यसम्बन्धं दृष्टान्तद्वारेण प्रतिपादयति द्रव्यं विनेति। यथाहि द्रव्यं विहाय गुणाः नोत्पद्यन्ते, तथैवायुर्विना आरोग्यं न भवितुमर्हतीत्यर्थः। अत एव आयुरादौ परीक्ष्यमित्याह परीक्ष्यमिति। आयुःपरीक्षाफलमाह आयुरिति। उपसंहृतिवाक्ये लक्ष्यनिमित्तायाः विकृतेर्लक्षणमाह क्रियापथमिति। क्रियापथं चिकित्साक्रमम्। केवलं कृत्स्नम्। चिह्नं लिंगम्। सर्वमन्यदवदातम् ॥ २७—२९ ॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यामिन्द्रियस्थाने अणुज्योतीयो नामैकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः।

प्रागेकादशभिरध्यायैः लक्ष्यनिमित्ता लक्षणनिमित्ता च विकृतिर्निरवशेषतो निवेदिता। पुनरध्यायान्तरेण निमित्तानुरूपां विकृतिं साकल्येन निर्देष्टुमारभते अथात इत्यादिना। यस्येति। गोमयचूर्णाभं शुष्कगोमयचूर्णसदृशम्। सस्नेहे ❀ तैलाभ्यक्ते मूर्धन्यपि भ्रश्यते स्वयमेव। च्युतांसइत्येकदेशग्रहणेन अंससन्धिरेव प्रत्येतव्यः। एतेनास्य हस्तद्वयमपि स्वकार्यासमर्थं सञ्जातमिति ज्ञेयम्। निर्घर्षन्निव † गमनकाले मृत्तिकया सहेत्यर्थः। चिरं न वसतीत्यनेन पूर्वोक्तमनुस्मृत्य मासं व्याप्येत्यर्थः। यस्येति। स्नातानुलिप्तस्येति उदकेन स्नातस्य चन्दनादिना अनुलिप्तगात्रस्य च। भृशं पुनः पुनः। एवं निर्दिष्टकालाभ्यन्तरमेव मरणं संसूच्य अनिर्दिष्टकालेन मरणं सूचयति यमुद्दिश्येति। संवर्तयितुं निर्मातुम्। विज्ञातमिति। बहुशो विज्ञातं दृष्टफलमित्यर्थः। अतएव सिद्धं नियतफलम। विधिवदवचारितं युक्त्या व्यवस्थया प्रयुक्तम्। आहारमिति। अयमर्थः—आहारस्य फलं बललाभः अभ्यवहृतेऽपि

❀ 'सस्नेहे भ्रश्यते चैव' इति पाठ आदृतः।
† 'निर्घर्षन्निव यः पादौ' इति पाठोऽत्र गृहीतः।

बृंहणाहारे क्रमशो दुर्बलता मरणायैव स्यादिति। एतेषां लक्षणानां तद्-गतत्वेऽपि दोषकार्यत्वाभावान् निमित्तानुरूपत्वमवगन्तव्यम् ॥ १—८ ॥

अधुना अवसरवशाद् दूतादिगतमरिष्टलक्षणं व्याख्यातुं प्रतिजानीते दूताधिकारे इति। तत्र प्राक् भिषजां कस्यां कस्यामवस्थायामागतस्य अगर्हित-लक्षणस्यापि तू तस्य तदागमनम् आतुरस्याहितकरत्वेन गर्हितं भवति तदाह मुक्तकेशे इति। मुक्तकेशे अभ्यंगार्थं मोचितकेशे। अप्रयते असंयते आत्म-नीति शेषः। मरणं यस्यार्थं दूत आगतस्तस्येत्यर्थः। छिन्दति पश्वादिहनन-प्रवृत्ते। भिन्दति काष्ठादीनि। नानुव्रजेत् न तेन सह चिकित्सार्थं गच्छेत्। पितृभ्यः पिण्डं निर्वपति इति श्राद्धं करोतीत्यर्थः। ते दूताः प्रजिघांसव-इति अमंगलजनकत्वाद् भर्तारं हन्तुमुद्युक्ता इत्यर्थः। कथयतीति। अप्र-शस्तानि अमंगल्यानि। मृतेति विनष्टानि अदर्शनं गतानि। भजति तत्रो-पस्थाय सेवमाने। व्याहरति मृतादिविषयकं वाक्यं ब्रवति। अन्यानि अप्र-शस्तानि दुर्भिक्षमरकादीनि व्याहरतीति योजना। विकारेति। विकारसामान्य-गुणे श्लेष्मजव्याधौ जलमध्ये शीते वा काले, एवमन्यत्र विचार्यम् ॥९—१५॥

दूतागमनकाले अप्रशस्तां भिषगवस्थां निर्दिश्य अप्रशस्तदूतलक्षणान्याह दीनेति। दीनान् भीतान्, द्रुतान् अतिद्रुतमागतान्, त्रस्तान् वेपथुमतश्च, पुरुषान दूतान् मलिनामसतीञ्च षण्डांश्च नपुंसकान् इति त्रीन् त्रिविधान् व्याकृतीन् विकृतिविशिष्टान् दूतान् मुमूर्षतां विद्यात्। अंगेति। अंगव्यसनिनं चक्षुर्हस्ताद्यं गहीनम्। लिंगिनं धर्मध्वजिनम्। उग्रकर्माणं पशुहननादिक्रूरवृत्तिकम्। दूतं संप्रेदयेति योजना गर्दभादिकमारुह्य आगतोऽपि दूतोऽप्रशस्त इत्याह आतु-रेति। खरो गर्दभः। अनुप्राप्तमागतम्। भिषजं प्रथमदर्शनकाले पलालादिकं स्पृष्ट्वा चेद्दूताः आतुरार्थमाह्वयेयुः, तर्हि स आतुरो मुमूर्षुः ज्ञेय इत्याह पलालेति। पलालः शस्यरहितो धान्यादिनालः। वुसं तुच्छधान्यम्। अत्र अस्थ्यादयो-ऽपरस्य परित्यक्ता ज्ञातव्याः न तु स्वकीयाः। सूर्पः कूल्यः 'कूला' इति वंगे। विच्युतं पादुकातोविच्छिन्नं पादुकाचर्म। तुषो धान्यत्वक्। यस्मिन्निति। अशुभं निमित्तममांगल्यं वक्ष्यमाणं शकुनम्। तथेति। व्यसनिनं विपद्-ग्रस्तं जनम्। प्रेतं मृतम्। प्रेतालंकारं मृतस्य भूषणादिकम्। भिन्नं विदारितं पात्रादि। दग्धं वस्त्रादि। विनष्टमपहृतं किञ्चिद् द्रव्यम्। पश्यन् नानुव्रजे-दित्यन्वयः। तद्वादीनि प्रेतादिविषयकाणि वचांसि शृण्वन्। वा-शब्दोऽत्र पक्षान्तरसूचकः। कटुको रसोऽशुभस्तमास्वादयन्। कौणपो गलितशव-गन्धः। क्रूर उष्णः कठिनो वा। एतान्यशुभानि निमित्तानि इन्द्रियैरनुभवति भिषजि दूतश्चेदातुरसंश्रयं वाक्यं ब्रूयात्तर्हि तं दूतं नानुगच्छेदित्यर्थः। पूर्वोक्ता-शुभप्रधानवाक्यस्य प्राक् पश्चाद् वाक्यकाले वा दूतश्चेद् आतुरदर्शनार्थमाहू-यात् तर्हि तस्य मरणं निश्चिनुयादित्याह तत्पूर्वमिति ॥ १६—२४ ॥

दूतगतमशुभं निमित्तं साकल्येन निवेद्य मार्गगतमातुरकुलगतञ्च निमित्तं निवेदयति इति दूतेति। इतः गसंहारे। औत्पातिकमशुभं निमित्तम्।

तत्र प्राङ् मार्गगतं निर्दिशति अवक्रुतमिति। अवक्रुतं छिक्का। उत्क्रुष्टं रोदनम्। प्रतिषेधं गन्तुं वारणम्। विगर्हणं निन्दा। वस्त्रादीनामासंगः केनचिदाबद्धता। छत्रादीनां व्यसनं भंगः। मृतानां व्यसनिनां विपद्ग्रस्तानां वा दर्शनम्। चैत्यस्य देवायतनस्य ध्वजाः, तथा अन्यत्रावचारिताः पताकाः, तासां पूर्णानां यथावत् पूर्णभावेन अवस्थितानामपि पतनानि। हतानिष्टप्रवादाः अमुको हतः अमुको वा विनष्टः इत्याकारकवाक्यानि। दूषणं भस्मपांशुभिरिति प्रतिकूलवातेन नीयमानैर्भस्मभिः धूलिभिर्वा मुखनेत्रवस्त्रादीनां मलिनीकरणमित्यर्थः। पथच्छेद इति—गच्छतः पुरुषस्य सम्मुखे विडालादिभिः दक्षिणतो वामगमनं, वामतो वा दक्षिणगमनमित्यर्थः, दीप्तामुद्भासितां। क्रूराणाममंगल्यानां शिवोलूककाकादीनाम्। शयनासनयानानां खट्वापीठगड्डालिकादीनाम्। उत्तानानां विवर्तितानाम्। पथि स्वगृहान्निर्गम्य आतुरगृहगमनमार्गे। आतुरवेश्मनि आतुरगृहप्रवेशमार्गे। विपश्चिता प्राज्ञेन भिषजा॥ २५-३२॥

मार्गगतमशुभं निवेद्यातुरगृहगतमाह इमानपीति। प्रवेशे प्रवेशकाले। निर्गतिमातुरगृहाद्बहिर्निर्गमनम्। भिन्नानि भग्नानि। विशिखानि अग्निशिखारहितानि शान्ताग्निपूर्णानीत्यर्थः। आतुरगृहवर्तिनो मानवाः सर्वाणि च द्रव्याणि छिन्नादिगुणविशिष्टानि सेवन्ते इत्याह छिन्नेति। वैश्मिकाः आतुरगृहवर्तिनः। यस्मिंश्च गृहे शयनादिकम् अमंगलसूचकं लक्ष्यते तत्रत्यआतुरो मुमूर्षुः ज्ञेय इत्याह शयनमिति। यस्य चातुरस्य आत्मीयास्तं मृतवन् मन्वानास्तस्य शयनादीन् अवहेलयन्ति स चापि मृतवज्ज्ञेयः इत्याह शयनमिति। यन्न आतुरस्य पथ्यं व्यापद्यते यत्ने कृतेऽपि पाकादौ विकृतिं गच्छति। ज्योतिर्गृहगतोऽग्निः। अमत्राणि मृदादिनिर्मितानि पात्राणि। अमत्रं पात्रमित्यमरः॥ ३३-३६॥

व्यासतो द्वादशभिरध्यायैररिष्टलक्षणान्यभिधाय शिष्यबुद्धिव्यवसायार्थं पुनरपि तानेव अर्थान् पद्येन उपदिशति यदिति। पर्यायान्तरमाश्रितं भिन्नक्रमेण व्याख्यातमित्यर्थः। ननु तर्हि पुनरुक्तत्वेनाधिकतादोषस्तत्र स्यादित्यपाकुर्वन् समर्थयति पर्यायेति। हि यतः पर्यायवचनम् अर्थविज्ञानाय उपकल्पते इति पूर्वोक्तोऽर्थश्चेत् सन्दिग्धार्थः स्यात्, स च भिन्नक्रमेणाभिहितः निःसन्दिग्धार्थो भवेदित्यर्थः। ननु तर्हि समासतः कथमुक्तिरित्याह अत्यर्थमिति *। तस्मिन् अधिकरणे अध्याये वा पूर्वं यद्वस्तु अभिदर्शितं विस्तरेण व्याख्यातञ्च तस्यैव पुनरत्यर्थं विस्तरेण इयं मे विवक्षा नोपपद्यते न युज्यते॥ ४०-४२॥

समासतो वक्तुमुपक्रमते वसतामिति। चरमे काले मृत्युकाले। शरीरेषु वसतां शरीरिणां जीवात्मनाम्। विनाशाय विनाशमाप्तुम् अभ्यग्राणां

* 'अत्यर्थं पुनरेवेयं विवक्षा नोपपद्यते' इति पाठोऽत्रादृतः।

व्यग्राणां त्वरितं विनशिष्यतामित्यर्थः। देहेभ्यः प्रविवत्सतां देहान् विहाय परलोकरूपं प्रवासं गन्तुमिच्छताम्। कान्तं वासं देहरूपं जिहासतां त्यक्तुमिच्छताम्। तन्त्रयन्त्रेषु देहयन्त्रेषु हृदयादिषु भिन्नेषु अकर्मण्येषु सत्सु। अन्त्यं तमः मरणरूपम्। यथोद्देशं यथापूर्वाचार्यैरुद्दिष्टम्। तानि लक्षणान्याह प्राणा इति। पञ्च प्राणवायवः समुपरुध्यन्ते न यथावत् कार्यं कुर्वन्ति। विज्ञानं सांसारिकं ज्ञानम्। बलं वमन्ति बलं निर्हरन्ति। चेष्टाः शरीरक्रियाः खिलीभवन्ति संक्षिप्ता भवन्ति। सत्त्वं मनः। भीर्भयम्। श्रीः कान्तिः। पाप्मानः दुरदृष्टानि। शीलं प्रकृतिः। व्यावर्तते परिवर्तितं भवति। भक्तिरिच्छा, उष्माणः प्रलयं यान्ति शरीरस्य स्वाभाविकोष्मा नश्यति। कायच्छिद्रं मुखनासादिबहिर्मुखस्रोतांसि। सततस्पन्दनाः देशाः हृदयनाडीपरीक्षास्थानानि। भेषजानि न संवृत्तिं प्राप्नुवन्ति औषधानि यत्ने कृतेऽपि नासाद्यन्ते। यथारुचि इच्छानुरूपम्। उपपद्यन्ते प्रयुज्यन्ते। नानाप्रकृतयः विविधदोषजाः। क्रूरा असाध्याः। समभिवर्तन्ते वर्धिता भवन्ति। प्रतिकर्मप्रवृत्तिषु चिकित्सासु। दौरात्म्यं दुष्टबुद्धित्वम्। प्रेष्याः भृत्याः प्रतिपाल्यादयश्च। प्रतीपतां विरुद्धताम्। प्रेताकृतिः मृतवत्शरीरसंस्थानम्। औत्पातिकं दुर्लक्षणाक्रान्तम्॥ ४६-६१॥

एतैर्लक्षणैः प्रत्युपस्थितमरणमातुरस्य ज्ञात्वापि नापृष्टः कस्यचिद् ब्रूयात्, पृष्टोऽपि नातुरं, नवा तस्य स्निग्धमात्मीयं ब्रूयादित्याह मरणायेति। आतुरस्य उपघातकं भवेत् त्वरितमृत्योः कारणं भवेत्। तस्य मरणम् अब्रुवन् न कथयन्। अध्रुवमिति पाठे तु नास्ति ध्रुवं निश्चितं यस्मादिति ध्रुवं तर्को यत्र वेति सुनिश्चितं मरणं ज्ञात्वेत्यन्वयः॥ ६२-६४॥

पक्षान्तरे स्वल्पमपि अरिष्टबाधकमारोग्यप्रदं लक्षणं दृष्ट्वा तदेव निश्चितं वक्तव्यमित्याह लिंगेभ्य इति। आगन्तुरागच्छन्नित्यर्थः। अतएव कानिचिदरिष्टविपरीतानि लक्षणान्याह स्वाचारमिति। अव्यंगं न अंगहीनम्। अमुण्डं न निर्वापितकेशम्। अजटिलं जटारहितम्। अदारुणेषु न तीक्ष्णगणेषु अश्लेषार्द्राज्येष्ठामूलावर्जितेष्वित्यर्थः। अनुग्रेषु उग्रगणपठितत्रिवामघाभरणीवर्जितेषु अध्रुवेषु ध्रुवगणपठितोत्तरत्रयरोहिणीवर्जितेषु। रिक्तामिति चतुर्थ्यादिविशेषणम्। शुभदूतलक्षणमभिधाय पथि आतुरकुले च मांगल्यानि लक्षणान्याह दध्यक्षतेति। वर्धमानानां पूर्णवयस्कानाम्। उद्धृतायाः कृष्टायाः। सुमनसां पुष्पाणाम्। चन्दनमंत्र श्वेतम्। नृभिः पूर्णस्य शकटस्य। स्त्रियाः सुन्दर्या इति शेषः। जीवञ्जीवकः चकोराकारः। सिद्धार्थो नाम पक्षी विजिज्ञासितव्यः। जीवञ्जीवचक्रवाकः इति पाठस्तु सुगमः। प्रियवादिनः शुकसारिकाकोकिलादयः। शतपत्रं द्वार्वाघाटः। चाषः नीलचातकः। रुचकं सौवर्चललवणम्। सिद्धार्थः श्वेतसर्षपः। रोचना नाम गवां मलपित्तकोषे जाता अश्मरी गोरोचनेति ख्याता॥ ६५-७६॥


पुनरपि आरोग्यदानि लक्षणान्याह मंगलेति। श्रद्दधानः वैद्ये भेषजे

च। पुनः स्वप्नगतशुभलक्षणान्याह गृहेति। अत्र गृहशब्देन पर्णतृणमृत्तिकादिनिर्मितो गृहः सूच्यते। गृहादीनां शीर्षे स्वप्ने समधिरोहणम्। अर्णवानां समुद्राणां प्रतरणं सन्तरणेन पोतादिना वा। अमेध्यानि पुरीषादीनि तेषां परिग्रहः प्राप्तिः स्पर्शो वा। सम्बाधनिसृतिः संकटादुत्तरणम्। पुनरारोग्यलक्षणमाह सत्त्वेति। सत्त्वलक्षणसंयोगः सत्त्वस्य मनसो लक्षणैः गुणैः संयोगः। साध्यत्वं रोगाणाम्। न च निर्वेदः मनोबलराहित्यस्याभावः। अतिरोहितार्थमन्यत्॥ ८०-८८॥

अध्यायार्थं निवेद्याधिकरणं समापयति तत्र श्लोकाविति॥८९-९०॥

इति श्रीज्योतिषचन्द्रसरस्वतीविरचितायां चरकप्रदीपिकायां चरकटिप्पण्यामिन्द्रियस्थाने गोमयचूर्णीयो नाम द्वादशोऽध्यायः॥ १२॥

यत्र विमर्शिता कृत्स्ना साध्यासाध्यविकल्पना।
एतावता सुसम्पूर्णा सेन्द्रियस्थानटिप्पणी॥



चरक-प्रदीपिकायां टिप्पण्यां केषाञ्चिद् विद्वद्वर्य्याणामभिमतानि ।

महामहोपाध्यायपदभाजां एम्. ए. एल्. एम्. एस्. इत्याद्युपाधिकानां प्राच्यप्रतीच्यायुर्वेद-निष्णातानां भारतविश्रुतानां कविराज श्रीगणनाथसेनशर्म्मणामभिमतम्—

भवद्विरचितया प्राञ्जलया टिप्पण्याऽलङ्कृतञ्चरकशारीरस्थानस्य प्रथमोऽध्यायाख्यं ग्रन्थमधीत्यास्माभिः परः प्रमोदः प्राप्तः । तत्र चोपोद्घातः दुरूहाणामंशानाञ्च विवृतिर्विशेषत उपादेयत्वेन मे प्रतिभाति । गतानुगतिकेन पथाऽगच्छता भवता अव्यक्तादेः पदस्य या सुसङ्गता विवृतिः कृता, तया भवतां स्वाधीनचिन्ता निपुणता च सम्यक् परिस्फुटाऽभवत् । आशास्महे चैवं भवता चेत् सम्पूर्णस्यास्य ग्रन्थस्य टीका प्रकाश्येत तर्हि सा विचक्षणानां क्षणमाधास्यतीति ।

(स्वाः) श्रीगणनाथसेन शर्म्माणः

\+ \+ \+

कलिकाता राजकीय-संस्कृत-महाविद्यालय-प्रधानाध्यापकानां महामहोपाध्यायपदभाजां श्रीयोगेन्द्रनाथ तर्कतीर्थपादानामभिमतानि ।

भिषगाचार्य-श्रीज्योतिषचन्द्र-सरस्वती-प्रणीतया चरकप्रदीपिकाख्यया टिप्पण्याऽलंकृतश्चरकसंहिताया: शारीरस्थानस्य प्रथमोऽध्याय आद्योपान्तं मया निरीक्षितः । सरस्वतीमहोदयैश्चात्र प्राचां टीकाकृता क्वणां मार्गमपहाय काचिन्नवीनैव सरणिराश्रिता । प्राञ्चस्तु ते पञ्चविंशतितत्त्ववादिनां सांख्याचार्य्याणां मतमनुसृत्य चरकोक्तिं व्याख्यातुकामः सुस्पष्टमपि मूलांशमस्पष्टमेव कृतवन्तः । प्रदीपिकाकारस्तु चतुर्विंशतितत्त्ववादिनां प्रत्नतमानां सांख्याचार्य्याणां मतमनुहरन् प्राञ्जलया गिरा टिप्पणीमकरोदिति सर्व्वत्रैव मूलतात्पर्य्यमविकृतमेवाभूदिति मे सम्मतिर्वर्त्तते । उपोद्घाते तु बहुभिर्बहुभिः प्रमाणैश्चतुर्विंशतितत्त्ववादिनां सांख्यानामस्तित्वं विज्ञापितं तेनेति सांख्यदर्शनमधिजिगांसूनामायुर्वेदाध्येतॄणाञ्च टिप्पण्याऽनया महदुपकृतिर्भवेत् ❀ ❀ ।

(स्वाः) श्रीयोगेन्द्रनाथ शर्म्माणः ।

\+ \+ \+ \+

महामहोपाध्यायपदमलंकुर्व्वाणानां प्रवीणसांख्यवेदान्ताद्यध्यापकानां श्रीमद्दुर्गाचरणसांख्यवेदान्ततीर्थानामभिमतानि—

❀ ❀ ❀ सरस्वतीमहोदयैश्चात्र प्राचीनटीकाकृद्भिः जुष्णं मार्गमपहाय कापि नवीना सरणिरनुसृता। ❀ ❀ ❀ प्रदीपिकाकारस्तु चतुर्विंशतितत्त्ववादमाश्रित्य तदनुसारेण प्राञ्जलया गिरा यामेतां टिप्पणीं कृतवन्तः, तया खलु ग्रन्थतात्पर्यं विशेषेण विशदीकृतमेवेति नः प्रतिभाति। ❀ ❀ ❀ वयन्तु मन्यामहे सांख्यशास्त्रे कृतश्रमाणामपि सांख्यतत्त्वजिज्ञासूनामायुर्वेदाध्येतॄणामनया टिप्पण्या महानुपकारो भविष्यतीति।

(स्वाः) सांख्यवेदान्ततीर्थोपनामक श्रीदुर्गाचरण शर्म्माणः।

\+ \+ \+ \+

महामहोपाध्यायपदमधितिष्ठतां तर्कधुरीणाग्रगण्यानां नवद्वीपप्रवासिनां श्रीमच्चण्डीदास न्यायतीर्थपादानामभिमतानि—

❀ ❀ ❀ चरकप्रदीपिका समाख्या टीका सुपठिता मया। तेन चेदं वक्तुमलमस्मि टीकेयमभिनवा आयुर्वेदपाठार्थिनां सम्यगुपकृतौ समर्था भविष्यतीति। अन्यच्च दर्शनशास्त्रसम्मतपदार्थ-समालोचनावसरे टीकायां स्वप्रणेतुः शास्त्रान्तरपाण्डित्यप्रतिभामपि सुस्पष्टमेव प्रकटीकरोति इत्यलम्।

(स्वः) श्रीचण्डीदास न्याय-तर्कतीर्थ-देवशर्म्मा।

\+ \+ \+ \+

महामहोपाध्यायपदभाजां कलिकाता-विश्वविद्यालय-संस्कृतविभागाध्यक्षाणाम् आशुतोषाध्यापकानां श्रीमद्विधुशेखर-भट्टाचार्य्यपादानामभिमतानि—

Padit Jyotis Chandra Saraswati is not only a very renowned Ayurvedic physician, but also a profound Sanskrit scholar. This is fully evinced from his Sanskrit commentary on the Charak Sanhita. The work does credit to his scholarship and we notice at least one remarkable thing even within the short compass of the small volume. So for scholars were of opinion that the Charak Sanhita deals also with the Sankhya system of phylosophy. With great ability and and scholarship Pandit Saraswati has discussed the point in his commentary and has shown that this system, as appearing in the Charak Sanhita is widely divergent from the classical Sankhya system. There is no doubt that the student of the Sanskrit pathashalas, for whom the portion of the

Charak Sanhita has been prescribed a text book, will drive great help and benefit from the present commentary by Pandit Saraswati.

(Sd) **V. Bhattacharya.**

\+ + + +

कलिकाता-राजकीय-संस्कृतविद्यालयाध्यक्षाणां, एम-ए, पि-एच, डि इत्युपाधिकानां श्रीमत्सुरेन्द्रनाथदास गुप्तानामभिमतानि—

I have read with much satisfaction the Sankhya portion of Charak's Sharir as edited by Pandit Jyotis Chandra Saraswati with commentary. The commentary is very clear and Pandit Saraswati has rightly noted the difference between Chark's Sankhya and carrent Iswar Krishna's Classical Sankhya. **** We are greatful to Pandit Saraswati for his kindly separately edited it with a commentary for the benefit of our students.

(Sd) **S. N, Das Gupta.**

\+ + + +

कलिकाता राजकीय-संस्कृतकालेज-न्यायशास्त्र-प्रधानाध्यापकानां महामहोपाध्यायानां कविवराणां श्रीमत्कालीपदतर्काचार्य्याणामभिमतानि—

श्रीमज्ज्योतिषचन्द्रः सांख्याचार्य्योपनामको विद्वान् ।
चरकनिरुक्तं सांख्यं व्याचक्षाणश्चिरं जयति ॥
व्याख्यामक्षतपक्षां दर्शितलक्ष्यां सतां सुखे दक्षाम् ।
कृत्वा कीर्त्तिममेयामर्हति मान्यो विदां सोऽयम् ॥
ईश्वरकृष्णनिरुक्ताच्चरके सांख्ये स्थितो विशेषो यः ।
प्राक्तनमतसंवादैः सोऽयं टीकाकृता दिष्टः ॥
ईश्वरकृष्णकृतान्तं चरकप्रोक्ते पुरातने सांख्ये ।
संगमयन्ति जना ये ते नहि लोके विशेषज्ञाः ॥
अव्यक्ताख्यः पुरुषः सोऽयं सिद्धो गुणैर्जगत्कर्त्ता ।
मतमिदमतिचिरमाप्तं व्याकृतमस्मिन्नुपोद्घाते ॥
एवं बहुवैषम्यं कतिधापुरुषीयकाभिधे सांख्ये ।
प्राक्तनशास्त्रवचोभिर्विदुषानेन क्षयं नीतम् ॥
सुगमपदावलिबन्धा बुधहृदि सन्धारिता मलप्रज्ञा ।
जयति तदीया टीका चरकप्रोक्तक्रमे सांख्ये ।
तत्त्वबुभुत्सुजना ये कतिधापुरुषीयकाभिधे भागे ।
शरणं तेषामेषा ज्योतिषचन्द्र-प्रसाधिता टीका ॥
ज्योतिषचन्द्रवितीर्णां टीकां चरकप्रदीपिकानाम्नीम् ।

दृष्ट्वा मानसतोषं प्रापमशेषं णोल्लासात् ॥
भिषगाचार्य्यवर-श्रीज्योतिषचन्द्रः सरस्वतीनामा ।
सांख्याचार्य्यपदाङ्कश्चरकप्रदीपिकाकर्त्ता ॥
एवं दुर्गमतन्त्रव्याख्यां कृत्वा विचक्षणो भव्याम् ।
जनतामुपकुर्व्वाणः पार्व्वणचन्द्रोपमो जीयात् ॥

(स्वः) श्रीकालीपद तर्काचार्य्य भट्टाचार्य्यः ।

\+ + + +

कलिकाता-राजकीय-संस्कृत-कालेजाध्यापकानां महामहोपाध्यायानां पाणिनीयादिदुर्गमतन्त्रपारीणानां श्रीमत्-हाराणचन्द्रशास्त्रिणामभिमतानि—

❀ ❀ सौभाग्यमेतदस्माकीनं यदयं नानातन्त्रावगाहनावदातमतिश्चरकतन्त्रे विहितातिपरिश्रमः श्रीमत्सरस्वतीमहाशयो मूलकर्त्तुश्चरकस्याभिप्रायं यथावदवधार्य्य चरकोदितं सांख्यमतं सुनिपुणं परिष्कृतवान् । गतानुगतिकबहुले कालेऽस्मिन्नतिदुर्लभोऽयं प्रयास इति नातिशयोक्तिगर्भितमिदं वचनम् । टीकेयं चरकमर्म्मोद्घाटने जिज्ञासूनां महान्तमुपकारं विधास्यतीति निःशङ्कमुद्घोष्यते ।

(स्वाः) हाराणचन्द्रभट्टाचार्य्य-शास्त्रिणा ।

\+ + + +

राजसाही-महाराणी-हेमन्तकुमारी-संस्कृत-महाविद्यालयस्य न्यायादिदर्शनशास्त्राध्यापकानां तर्क-सांख्य-वेदान्त-मीमांसातीर्थोपनामकानां महामहोपाध्यायानां श्रीमद्रमेशचन्द्रशर्म्मणामभिमतानि—

\+ + + + स्वल्पाक्षरेणातिसरलया भाषया व्याख्यानतात्पर्य्यादिसम्बलिततया प्राक्तनविचारनैपुण्य-सम्पत्तिमत्तया च अभिनवेयं दीपिका अधुनातनानां विद्यार्थिनां खलु सुखबोधाय तथा ग्रन्थाध्यापयितृणाञ्च महदुपकरिष्यतीत्यत्र सम्मतिरस्ति + + + अधुना चास्याः टीकाया उपोद्घातप्रकरणे विवृतौ च बहुलायासं सप्रमाणं पूर्व्वेषां मतमपाकृत्य सुसूक्ष्मया धिया प्राचीनतमानां सांख्याचार्य्याणां योऽयं मतभेदः समानीतः नूनमनेनास्माकं परमां प्रीतिमुद्वहता सांख्यसिद्धान्ते नवमिव वर्त्म समुद्भावितम् । + + +

(स्वः) श्रीरमेशचन्द्र देवशर्म्माणः ।

\+ + + +

वहरमपुर जुविली चतुष्पाठीप्रधानाध्यापकानां न्यायरत्न-तर्कतीर्थोपाधिकानां श्रीमद्गोपालनाथदेवशर्म्मणामभिमतानि—

\+ + + + चरकसंहितायाश्चरकप्रदीपिकानामटीकां समधिगम्य वयमतीव प्रीताः । वर्त्तमानभिषगाचार्य्याणामस्यायुर्व्वेदशास्त्रानु-

शीलनपरिशीलितदिशोत्तरोत्तरमायुर्व्वेदशास्त्रस्योत्कर्षं नूनं जायते आशास्महे च आयुर्व्वेदशास्त्रतत्त्वबुभुत्सूनां चरकसंहिताया दुर्गमोऽशष्टीकयानया सुगमः सम्पत्स्यते इति—

(स्वाः) श्रीगोपालनाथ देवशर्म्मणः।

\+ + + +

कलिकातावास्तव्यानां चरकचतुराननानां तर्कतीर्थोपनामक—कविराजवर्य्याणां श्रीमाधवचन्द्रभट्टाचार्य्याणामभिमतम्।

आपञ्चाशद्वर्षात् परःशतान् विद्यार्थिनश्चरकसंहितामध्यापयद्भिराचार्य्यगङ्गाधरस्य जल्पकल्पतरुटीका चक्रपाणिदत्तकृता च चरकतात्पर्य्यटीकाध्यापने सहायत्वेन कल्प्येतेऽस्माभिः। अतिगम्भीरार्थत्वाच्चरकवाक्यस्य ताभ्यामपि न सर्वत्र तदर्थोद्घाटने प्रयासो नः सफलीभूतः। इति सतोरपि तयोष्टीकान्तराकांक्षा सदैवानुभूयते। मूलतत्त्वावबोधे श्रीमज्ज्योतिषचन्द्रस्य नवीनापीयं टिप्पणी सर्वथोपयुज्यत इति मन्यामहे। अतश्चरकप्रदीपिकेति नामास्या अन्वर्थत्वेनाभाति। चरकस्याध्यापकानामध्येतॄणाञ्चार्थविज्ञाने इयमेव परं सहायिका भविष्यतीत्याशास्महे। इत्यलम्।

(स्वाः) श्रीमाधवचन्द्रभट्टाचार्य्यः।

\+ + + +

कलिकताविश्वविद्यालये संस्कृतविभागाध्यक्षाणाम् आशुतोषाध्यापकानां एम० ए०, पी० एच० डी०, इत्युपाधिकानां श्रीसातकडिमुखोपाध्यायमहोदयानामभिमतम्।

चरकसंहिताया: शारीरस्थानस्य चरकप्रदीपिकानाम्नी नवीना टीका श्रीमता ज्योतिषचन्द्रसरस्वतीमहोदयेन विरचितास्माकं भागतो दृष्टिगोचरं प्राप्ता, सम्यगालोचिता चास्माभिः। यद्यपि वैद्यकशास्त्रेष्वात्यन्तिकव्युत्पत्त्याभावात् प्रबन्धस्यास्य गुणदोषविचारेऽनधिकारिणो वयं, तथापि शारीरस्थानस्य दार्शनिकतत्त्वप्रधानत्वात् तदेवाधिकृत्य किञ्चिदिव लेखनी व्यापारयितुमुत्सहामहे। टीकाकृता सांख्यनयतश्चरकोक्तपुरुषलक्षणस्य वैलक्षण्यं महाभारतादिप्रामाणिकशास्त्रसंवादेन समुद्भावितम्, तत्र च विशेषतोऽव्यक्तशब्दस्य पुरुषपरत्वं तस्यापि बुद्ध्यादिविकारप्रकृतित्वं सर्वथा नवीनमिव प्रतिभायात् सांख्यशास्त्रवेदिनाम्। निष्क्रियत्वं च पुरुषस्य चरकस्यापि तिपन्नमेव, निष्क्रि[illegible]स्य च कथं बुद्ध्यादिविकारोपादानत्वं सङ्गच्छत इति तु [illegible]पादनीयमेव टीकाकृता। चरकप्रोक्ततत्त्वानाञ्च सांख्यप्रसिद्धतत्त्वे : क्वचित् क्वचिद्वैलक्षण्यमुपलभ्यते—तत्र च मनसोऽणुत्ववादो न्यायवैशेषिकसंवादं बिभर्त्ति सांख्यसिद्धान्तं प्रतिकूलयति च। आकाशस्याप्रतिघातं लिङ्गं ब्रुवता

वैभाषिकसिद्धान्तसाम्यं चोट्टङ्कितम्। आधुनिकस्यापीयं टीका भाषासौष्ठवेन विचारपरिपाट्या अर्थगौरवेण च सर्वथा प्राचीनानां शैलीं स्मारयति। मूलग्रन्थस्य सुबोधतामापादयन्तीयं टीका विद्यार्थिनां महत उपकाराय प्रकल्पेतेत्यत्र संशयलवोऽपि नास्माकं चेतसि पदं करोति। टीकाकारोऽस्माकं श्लाघार्हः संवृत्तः। अवशिष्टभागेषु चेयमेवोत्कर्षकाष्ठा परिपालयिष्यत इति वयमाशास्महे। इति शम्।

(स्वाः) श्रीसातकडिमुखोपाध्यायस्य।

\+ + + +

इन्दोरराजकीयसंस्कृतमहाविद्यालयस्य नवद्वीप'पाकाटोल'इत्याख्यविद्यालयस्य च भूतपूर्वन्यायदर्शनाध्यापकानां श्रीमद् अमरेन्द्रमोहनतर्कतीर्थभट्टाचार्य्याणामभिमतम्।

भिषगाचार्य्येण श्रीज्योतिषचन्द्रसरस्वतीमहाशयेन प्रणीयमानायाश्चरकसंहिताटीकायाः केचनांशा मयावलोकिताः। तत्र च स्थानविशेषेषु अनेन भिषगवरेणोद्भावितं नवीनं व्याख्यानं व्याख्यानान्तरतुलनया सम्यगिति मे प्रतिभाति। प्रायेण वर्षद्वयं यावदेतेन दाक्षिण्यसदाचारपूतेन चिकित्सकवरेण सहासकृन् मे शास्त्रसंवादो जातस्तेन च नितरां सन्तोषमुपागतोऽस्मि। सम्भावयामि चायुर्वेदप्राणभूतायाश्चरकसंहिताया भूयान् दुर्गमोऽंशः एतद्व्याख्यानेन वाचकानां सुबोधः सम्पत्स्यते। इति।

(स्वाः) श्री अमरेन्द्रमोहनतर्कतीर्थभट्टाचार्य्यः।

\+ + + +

त्रिवांकुरप्रदेशस्थाया वैद्यसारथिरित्याख्याया वैद्यकपत्रिकाया अभिमतानि—

\+ + + कतिधापुरुषीयनाम्न्यस्मिन्नध्याये विद्यमानानां प्रकरणानां सारार्थतत्त्वविवेचनं कर्त्तुमियं चरकप्रदीपिका टिप्पणी प्रकामोपकारिणीति मन्ये। इतः परमस्याः संहिताया परिपूर्णां टिप्पणीमायुर्वेदाध्यापकाध्येतृणामनुग्रहार्थमदूर एव मुद्रितां द्रष्टुमाशास्महे।

\+ + + +

निखिलभारतीयायुर्व्वेदमहामण्डलमुखपत्र-स्वरूपाया वैद्यसम्मेलनपत्रिकाया अभिमतानि—

\+ + + यह टिप्पणी विद्वत्ता-पूर्ण है। यह नमूना में सांख्य का पञ्चविंशतितत्त्वमय पुरुष और चरक के २४ तत्त्वमय पुरुष का भिन्न मत है, इसका सामञ्जस्य दिखाकर यह प्रतिपादित किया है कि पहले चरक का मत ही सांख्यमत था।

\+ + + +

जयपुरनगरीस्थायाः संस्कृतसाहित्यसम्मेलनस्य मुखपत्रस्वरूपायाः संस्कृतरत्नाकरेत्याख्यायाः संस्कृतपत्रिकाया अभिमतानि—

+ + + + टिप्पणीविरचयित्रा सांख्यदर्शनमूलग्रन्थानां तत्र तत्र च ग्रन्थान्तरेषु समुद्धृतानां सांख्यविषयाणाञ्च महता ध्यानेन तुलनात्मकतया अनुशीलनं कृतमिति परमसन्तोषावहम् । श्रीईश्वरकृष्णादिप्रधानसांख्याचार्य्याणां मतेन सांख्यदर्शनं पंचविंशतितत्त्वानि प्रतिजानीते। परं चरकसंहितायां "चतुर्विंशतिको राशिः पुरुषः" इति दर्शनात्तत्संस्कर्त्तुश्चरकाचार्य्यस्य अभ्युपगमः सांख्यविरुद्ध इव प्रतीयते। परं सुगूढसंशोधनप्रवणेन टिप्पणीकृता बुद्धचरितादिप्रामाणिकग्रन्थाधारेण चतुर्विंशतितत्त्वाङ्गीकार्य्यप्यासीदेकः सांख्याचार्य्याणां संघः, स चेश्वरकृष्णादेः प्रत्नतम आसीदिति संसाध्य चरकस्य तदनुसारित्वान्नाप्रामाणिकत्वमिति व्यवस्थापितम्, सेयमस्य गम्भीरान्वेषणप्रवृत्तिः कथं न सम्मानार्हा ? + + + +

चरकप्रदीपिकायां संशुद्धिपत्रम्

पृष्ठ	पंक्तौ	अशुद्धम्	शुद्धम
५	२८	स्वम्भू-	स्वयम्भू-
६	१३	अपयर्यायं	अपर्यायं
१४	६	मृद्विकेति	मृद्वीकेति
१७	१४	कषाशतानि	कषायशतानि
१६	६	गुडुची	गुडूची
२३	२६	वल्लुरं	वल्लूरं
२६	१४	दोषा	दोषाः
२८	१८	–८६	–८६
३१	३६	सततबहि	सततं बहि
३२	५	हेत्वतरं	हेत्वन्तरं
३३	१७	उवविष्ट	उपविष्ट
३८	२२	इर्ष्येति	ईर्ष्येति
३६	१३	नभा	न वा
४२	१५	–याणां हण	–याणां ग्रहण
४४	२१	अगनम्	अगणम्
४८	३२	तादृशो शतं	तादृशः शतं
५०	१८	पत्र	यत्र
५१	८	असाध्याया	असाध्याना
५१	१३	कर्मारभमानः	कर्मारभमाणः
६०	१५	विषयपतनं	विषमपतनं
,,	३१	भवति	भवन्ति
६५	१५	निह्रादो	निर्ह्रादो
६६	१७	वर्षलक्षणः	वर्षलक्षणाः
६८	२७	२३–२८	२६–२८
,,	२६	मध्या	मध्याह्न
७६	५	विनायिता	विलायिता
७१	६	विरेति	निरेति
७२	२२	६१–६५	६१–६५
७३	२८	तत्र नु	तत्र तु
७५	५	गुडुची	गुडूची
७७	७	मूलतोऽयं	मूलत इदं

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम
८१	४	शप्याया	शय्याया
,,	१२	लक्षणो	लक्षणः
,,	१३	मस्तुः	मस्तु
,,	३४	समीक्ष्यमानो	समीक्ष्यमाणो
८३	२२	शानमेव	शाणमेव
८५	५	१३–१४	१३–१६
८७	१	वैद्यस्तु	वैद्यास्तु
९१	२८	द्रष्टव्यम्	द्रष्टव्यौ
,,	३०	जहति	जहाति
९३	३०	ओजधातु	ओजोधातु
९६	३६	केते	कास्ताः
१०१	१२	दारुणासाध्यस्तु	दारुणासाध्यास्तु
१०३	१६	संजिघुक्षु-	संजिघृक्षु-
१०६	१९	स्वण्डिता	खण्डिता
,,	२६	तृणि	तृनि
१०९	१४	सर्वांगीन	सर्वांगीण
११२	२०	२०–२८	१८–२८
११५	१४	कर्तृणि	कर्तृणि
११८	३५	सातन्त्र्येण	स्वातन्त्र्येण
१२४	१४	खटद्रव–	खरद्रव–
१३३,	६,	१७–२२,	१६–२२
१४१	१९	पक्तः	पक्वः
१५२	१८	विमलाः	विमला
१५८	१२	लूनाति	लुनाति
१६१	५	कुर्वन्ति	करोति
१६२	३६	भेद	मेद
१६३	८	पूनर्भेदो	पुनर्मेदो
१६४	५	पिच्छादीनावयवानां	पिच्छादीनामवयवानां
,,	३१	उहसंहरति	उपसंहरति
१६५	३०	व्याधिर्न	व्याधिं न
,,	३४	मात्रातिक्रम्य	मात्रामतिक्रम्य
१६८	३५	प्रकोपनम्	प्रकोपणम्
१७१	२८	अनाहुता	अनाहूता
,,	३२	द्वित्रेणाह्ना	द्वित्रेणाह्ना
१७२	२४	वर्धयति	वर्धयन्ति

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
१७३	६	भदन्ती	भवन्ती
१७५	२४	नार्घाञ्जलि	नार्घाञ्जलि
,,	,,	पोषिता सर्व	पोषिताः सर्व
१७६	३२	शरीर	शारीर
,,	३६	मोज अष्ट-	मोजः, अष्ट-
१८१	५	अर्थवेदस्य-	अथर्ववेदस्य
,,	२१	तन्त्रार्थश्च	तन्त्राथञ्च
१८८	१६	युज्यते	युज्यन्ते
,,	१७	संश्रयते	संश्रयन्ते
१९३	६	अभिष्यदेन	अभिष्यन्देन
१९६	१४	विप्रतिसिद्धो	विप्रतिषिद्धो
१९८	३	दुष्या	दूष्या
,,	८	दोषदुष्या	दोषदूष्या
१९८	३४	श्लेश्म	श्लेष्म
१९९	२०	सन्दुष्य	सन्दूष्य
२०२	३१	अनानुपूर्व्या	अननुपूर्व्या
२०५	१०	पीडकाभिः	पिडकाभिः
२०८	२६	जनयति	जनयन्ति
२१६	२६	वोपशयन्ति	वोपशमयन्ति
२१७	८	पोगेवोक्ताः	प्रागेवोक्ता
२१८	३३	दोषसञ्चानु-	दोषसञ्चयानु-
२२१	३३	उद्दिश्वति	उद्दिशति
२२३	३२	विविधिः	विविधः
२२६	३०	समवायकरणं	समवायिकारणं
२२८	७	उदयुज्यन्ते	उपयुज्यन्ते
,,	२८	परिवर्तेन	परिवर्तनेन
२२९	९	त्यागिनो	त्यागिनः
२४९	३	वकारत्वं	एवकारत्वं
,,	६	दोष ण	दोषाणां
२५०	२५	पक्ताः	पक्का
२५६	१	-च्यते	चोच्यते
,,	३३	पुनभित्यर्थः	पुनरित्यर्थः
२५७	३	धृवा	धृत्वा
२५८	२४	शान	शाण
२५९	३	ग्र ानि	ग्राह्याणि

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
२६०	२२	स मो	सप्तमो
२६२	६	अप्रमतः	अप्रमत्तः
२६५	७	वर्तमानम्	वर्तमानः
२६५	३७	पण्डनेति	पण्डेनेति
२६७	३५	व न	वचन
२७२	२२	हेतुना	हेतूना
२७८	११	ऊणातिरिक्त	ऊनातिरिक्त
२८७	२३	पिप्पलयादीनां	पिप्पल्यादीनां
२८८	३०	खर्जुर	खर्जूर
२८६	१६	सर्वानेव	सर्व एव
३०२	१५	सम्पन्नाः	सम्पन्नः
३०७	३३	मोक्षम्य	मोक्षस्य
३१०	१०	पश्यन्	पश्यन्तः
३१३	३३	गच्छतीर्थः	गच्छतीत्यर्थः
३१६	३	क्	पृथक्
३२२	१८	मर्मसंज्ञ	मर्मसंज्ञा
३२६	३२	उत्तकालो	उत्तरकालो
३२७	१५	दैहृदय्य	द्वैहृदय्य
३२८	१५	,,	,,
,,	१६	,,	,,
,,	३३	,,	,,
३३२	२७	अपश्चात्पदम्	न पश्चात्पदम्
३३७	६	गूहाया	गुहाया
३३६	६	विनाशयति	विनाशयन्ति
३४०	२	सास्थ्या	सास्थ्या
३४२	६	व्यन्तिरेकस्य	व्यतिरेकस्य
,,	३३	वर्धयती	वर्धयन्ती
३४६	१३	वर्तते	वर्तन्ते
३५०	२५	दृश्यते	दृश्येते
३५४	४	ष्परिहायी	दुष्परिहार्या
३५७	२५	ख्यामाना	संख्यामाना
३६२	३	नद्यादावगाह्य	नद्यादाववगाह्य
३६३	२४	तैः	ताभिः
,,	२७	यज्ञीय	यज्ञीय

पृष्ठे	पंक्तौ	अशुद्धम्	शुद्धम्
३६८	३२	विरुद्धोक्रम	विरुद्धोपक्रम
,,	,,	चरित्वेन	चरितत्वेन
३६६	२७	विदादि	विदाहि
३७०	४	व्यपाश्रयियाः	व्यपाश्रयिकाः
३७४	२२	भ्यरगत	भ्यन्तरगत
३८०	८	र्ण	पूर्ण
३८२	३४	प्रकृतिवर्ण	प्रकृतिवर्णान्
३८६	२०	नमेषः—	निमेषः—
३८८	४	व्यतिरेकेन	व्यतिरेकेण
,,	८	पश्यति	पश्यन्ति
३६२	१६	अर्हत्याह	अर्हन्तीत्याह
३६४	१२	मानमेव	माममेव
,,	२०	कम्पात्रितो	कम्पान्वितो
३६८	१८	कर्तनपत्	कर्तनवत्

बहुत्र वबयोरैक्यं भम्राक्षरादक्षरच्युतिश्च विद्वद्भिः स्वयं शोधनीयम्।

मुद्रणानामसौकर्याद् भ्रमप्रमादसंकुलात्।
पाठः शुद्धो ग्रहीतव्यो हंसैर्यथा जलात् पयः॥ इति

हमारे निज प्रकाशित अत्युत्तम कुछ वैद्यक ग्रन्थ

१. चरकसंहिता—श्री चक्रपाणिदत्त-कृत आयुर्वेददीपिका तथा वाग्भट्टशिष्य श्रीजज्जटाचार्य कृत निरन्तरपद दो प्राचीन संस्कृत व्याख्याओं सहित तथा अखिलभारतवर्षीय आयुर्वेद विद्यापीठ के मन्त्री आयुर्वेदाचार्य श्रीपण्डित हरिदत्त जी शास्त्री कृत छात्रोपयोगी अत्यन्त सरल टिप्पणी सहित। सम्पूर्ण ग्रन्थ का (२ जिल्दों) मूल्य केवल ११) ₹०

२. रसेन्द्रसारसंग्रह मूलमात्र—सम्पूर्ण छोटा साइज आजकल की मात्राएं साथ दी हैं। मूल्य अत्यन्त सस्ता केवल १)

३. अष्टाङ्गहृदय—अरुणदत्त कृत सर्वाङ्गसुन्दर संस्कृत व्याख्या तथा मौद्गल्य टिप्पणी सहित। छपाई बढ़िया, सुनहरी जिल्द मूल्य ६)

४. भैषज्यरत्नावली सटीक—लाहौर के सुप्रसिद्ध कविराज श्रीनरेन्द्रनाथ जी मित्र द्वारा परिवर्द्धित तथा आयुर्वेदचक्रवर्ती पं० नरेन्द्रनाथ जी शास्त्री कृत अतिसरल संस्कृत व्याख्या सहित। १३०० पृष्ठों की पुस्तक का मूल्य ८)

५. चक्रदत्त सटीक—शिवदाससेन कृत प्राचीन सं० व्या० समेत मू० ३॥)

६. माधवनिदानम्—महामहोपाध्याय-श्रीविजयरक्षित-श्रीकण्ठदत्ताभ्यां विरचितया मधुकोशाख्यया व्याख्यया समुल्लसितम्। मूल्यम् २॥)

७. त्रिदोषविमर्शः—गीर्वाणवाण्यात्मकस्त्रिदोषविषयको निबन्धश्चरक-सुश्रुतान्तर्गत-त्रिदोषवाक्यसंग्रहश्च। ले० पण्डितो धर्मदत्तः, गुरुकुलआयुर्वेद-महाविद्यालयाध्यक्षः, विद्यालङ्कारः, सिद्धान्तालङ्कार आयुर्वेदभूषणाम्। मू० १॥)

८ रसहृदयतन्त्रम्—जगद्गुरु श्रीशंकराचार्य जी के गुरु श्रीमद्भगवद् गोविन्दपादविरचित तथा मुग्धावबोधनीनामक प्राचीन सं०टी० सहित। मू० २।)

९. भावप्रकाश—(केवल ज्वराधिकार) विद्यार्थी परीक्षोपयोगी। सुप्रसिद्ध विद्वान् आयुर्वेदाचार्य श्री पं० हरिदत्त जी शास्त्री कृत सरल हिन्दी अनुवाद सहित तथा ज्वरपरिशिष्ट सहित। ३२० पृष्ठ का दाम १।) रु०।

इनके अतिरिक्त हर प्रकार के आयुर्वेद-संबन्धी ग्रन्थ हमारे यहां से विशेष रियायत पर मिलते हैं :—

मोतीलाल बनारसीदास

हिन्दी-संस्कृत-पुस्तक-विक्रेता, सैदमिट्ठा, लाहौर।